श्रीः

उभयवेदान्तग्रन्थमाला

श्रीकवितार्किकसिंह-सर्वतन्त्रस्वतन्त्र-

श्रीमद्वेंकटनाथ वेदान्तदेशिक-विरचिता

सुभाषितनीवी

श्रीकाञ्चीपुरीमण्डनभूत-चतुश्शास्त्रसाहित्यालङ्कारपारदृश्व-

तण्डूपट्टप्पास्वामि-श्रीनिवासताताचार्य-

कृतया हृद्यार्थदीपिकाख्यया

पद्धतित्रयव्याख्यया,

अभिनवदेशिक-श्रीशैलसच्चक्रवर्ति-

वात्स्यवीरराघवाचार्यविरचितया च

नानार्थदर्शनीसमाख्यया

समग्रव्याख्यया संस्कृत-द्राविडोभयविधया

समेता

SUBHASHITA NIVI

By

SRI VEDANTA DESIKA

WITH

TWO COMMENTARIES

Printed at
The India Printing Works, Mylapore, Madras-4

1971

Price: Rs. 15/-

SRI LAKSHMI HAYAGRIVA

SRIMAD VEDANTA DESIKA

IN MEMORY OF
HIS REVERED GRAND-FATHER

KARUMBUR NALLAN CHAKRAVARTHY

GOPALASWAMY AYYANGAR

[1882—1967]

by his grand-son

K. C. RAJAPPA

"SRINIVAS"

165, Lloyds Road, Madras-14

Sri K. GOPALASWAMI IYENGAR
Lakshmipuram, Mylapore, Madras.

நன்றியறிவிப்பு

ஸ்ரீ உ. வே. ஸ்ரீமான் K. கோபாலஸ்வாமி ஐயங்கார் ஸ்வாமி ஸித்தாந்த ஸம்ப்ரதாயங்களில் சிறந்த அறிவும் ஆற்றலும் உடையவர். உலகெல்லாம் நன்கு உணரும்படி பல நூல்களை வெளியிட வேண்டுமென்ற நோக்கம் அவருக்கு மிக்கிருந்ததை அவருடைய கடைசிதசையில் அவரே என்னிடம் சொல்லி ஸ்ரீமத்ரஹஸ்யத்ரயஸாரத்திலே தமக்கு உள்ள அபிமானத்தையும் வெளியிட்டார். திருமாலின் அர்ச்சாமூர்த்தியின் அனுபவத்தை விடாமல் செய்வதற்காக அற்புதமாய் ப்ரத்யேகமாய் ஓர் ஆலயம் அமைத்து உதவிய இம்மஹான் பிறர் அழிக்கவாகாதபடி ஸ்ரீதேசிகாதிகளான ஆசார்யர்கள் கட்டியுள்ள நூல்களாம் தெய்வ நிலையங்களையும் காக்க ஆவல் நிரம்பியவரென்பதற்கு உதாரணமாக. இப்போது, அவருடைய குமாரர் ஸ்ரீமான் K. C. வரதாச்சாரியர் அவர் நிருமித்த தேவாலயத்தில் வெகு ச்ரத்தா பக்திகளுடன் ஸதாசாரத்துடன் வழிபாடுகளை மேன்மேல் விருத்தி செய்து வருகின்றவர் தம் பந்து நமது Dr. ஸ்ரீ. ஸ்ரீநிவாஸன் மூலம் ஸந்தர்ப்பம் அறிந்து உடனே உத்ஸாஹத்துடன் நியமிக்க, அதன்மேல் அவர் குமாரர் ஸ்ரீமான் K. C. ராஜப்பா (Advocate) தம் பாட்டனரின் ஜ்ஞாபகார்த்தமாகப் பொருள் உதவி புரிந்தார். மாதவன் குமாரனும் பக்தனை சிங்கபூபாலனுக்கு ஸ்ரீ தேசிகன் அருளிய இத்த ஸுபாஷிதநீவி எல்லா வர்ணத்தினருக்கும் பொதுவாக நல்ல உபதேசமாயிருப்பதை வேறிடத்தில் குறித்திருக்கிறோம். எனவே ஸுபாஷித-நீவியில் அருளியபடி தோஷங்களை விலக்கி குணங்களைப் பெற்று அறிவுடன் ஆலய வழிபாடு செய்ய வேண்டுமென்றறிவித்ததாகுமென்று இதற்கு அதை உபயோகப்படுத்த இதன் வெளியீட்டை அன்னரின் ஜ்ஞாபகார்த்தமாக அமைத்தது. தேவாதிராஜ வரதராஜ பக்தர்களாவார் நூலாசிரியரும் உரைகாரர்களும். அவர்கள் இயற்றியவற்றின் வெளியீட்டை ஒரு வரதாச்சார்யர் வேண்ட அச்சிடத் தொடங்கிய நமக்கு, அதற்கு மற்றொரு வரதராஜப்பா த்ரவ்யம் ஸம்பூரணமாக அளித்ததால் இது வெளியாகிறது.

இந்த ஸ்ரீமான் K. C. வரதாச்சாரியர் ப்ரதிவருஷம் அச்சுக்காக ரூ. 300 கொடுத்து வருவதை ஸமயத்தில் தெரிவிப்பதும் கடமையாகும். இனியும் இவர் மேலே செய்யும் உதவியெல்லாம் பிறகு வெளியிடப்பெறும். இவர்களுக்கும் இவர்களின் ஸந்ததி முதலான குடும்பத்திற்கும் ஆயுராரோக்ய ஐச்வர்யாதிகளை தெய்வம் தேசிகன் என்ற இரு திருவேங்கடமுடையான்களும் அருள்வாராகுக.

24—6—71 உபய வேதாந்த க்ரந்தமாலா பதிப்பாளர்

श्रीः

वदान्यप्रेषितं स्वतातपादधर्मवृत्तम्

Sriman K. Gopalaswamy Iyengar has constructed a temple at Lakshmipuram, Royapettah, Madras-14, wherein he has installed Lord Srinivasa (Moolavar and Utsavar), Sri Padmavati Tayar (Moolavar and Utsavar), Sri Andal (Moolavar and Utsavar), Sri Lakshminarasimhan, Sri Rama, Lakshmana, Sita & Hanuman, Tirumangai Alwar, Nammazhwar, Sri Udaiyavar, and Sri Desikan.

The Lakshmipuram Temple was built out of his own earnings and is maintained as a private temple. The Temple Samprokshanam took place on 10th May 1943. It may be noted that Lord Srinivasa, Moolavar, is an exact replica of Lord Srinivasa of the Seven Hills, Tirupathi.

There is a hall attached to the Temple where religious discourses have been given by eminent Scholars. To mention a few—By Sri Kannanswami of Thirukkudandai (now Srimad Andavan of Srirangam Periashramam), and Sri Agnihotram Ramanuja Tatachariar.

The Chief Archakar of the Temple, Sri Sundararaja Tatachariar, hails from Navalpakkam and is well versed in Sanskrit literature, Veda, Prabandhas and Agama Sastra.

* * * *

अस्य सुभाषितनीवीग्रन्थस्येह मुद्रिता या हृद्यार्थदीपिकाख्या सर्वतोमुखप्रौढपाण्डित्यबुद्धि-कौशलदर्पणायमाना हृद्या व्याख्या, तां स्वमातामहपादप्रणीताम् उद्यानपत्रिकायां प्राक् प्रकाशितां तदीयस्वहस्तलिखितमातृकासहितां श्रीमन्तौ **नेल्वाय् मरुत्वान्बाडि माडभूषि एम्. एस्. वी. राघवाचार्य एम्. एस्. वरदाचार्यौ** भ्रातरौ अधीतवेदान्तौ आस्तिकतमौ मुद्रणाय मह्यमार्पयताम् । द्रव्यमपि रूप्यकसार्धसप्तशतीमितं (रू. 750) तदानीमदाताम् । अन्यः श्रीमान् **आर्. दौरैराजम् ऐय्यङ्गार्** महाशयः (तिरुवल्लिक्केणि), परमास्तिकः सद्धर्मप्रवणः रूप्यकपञ्चशतीं (रू 500) दत्तवानस्ति । तदुभयमपि श्रीदेशिकग्रन्थान्तरमुद्रणे तत्संमतिमनुसृत्य उपयोक्ष्यते प्रकाशयिष्यते च शीघ्रमेव । त्वयोऽपि श्रीदेशिक-सर्वमहाजनानुग्रहभाजनं भवन्ति ॥

संपादकः

श्रीः ।

भूमिका

व्याख्यात्रा श्रीनिवासाचार्येण स्वव्याख्यायां रत्नपेटिकायां ग्रन्थोऽयम् आचार्यैः राजमहेन्द्रनगरस्थितं शिंगभूपालं प्रति प्रेषितः तत्त्वसंदेश रहस्यसंदेशाभ्यां सत्त्वस्थानिति श्लोकेन च सहेति प्रारम्भे प्रतिबोधितम् । संदेशपदस्वारस्यादपि तत् युज्यत इति भाव्यम् । परंतु तत्त्वसंदेशान्ते, "त्रिविधचिदचिदेकतन्त्रलक्ष्ये यतिपतियामुनभाषितेऽनुयोक्तुः । इदमिति निगमान्तदेशिकेन प्रतिसमदिश्यत माधवात्मजस्य" इति कथनात् माधवात्मजकृतसंदेशप्रतिसंदेशत्वं तत्त्वसंदेशस्य स्पष्टम् । स्वाधीनत्रिविधेति चूर्णिकांशस्य यामुनयतिपतिभाषितगतस्य विवरणं तदपेक्षितमासीत् ; तदपेक्षापूरणमेवं कृतमिति ज्ञायते । रहस्य-संदेशावसाने माधवात्मजार्थमिति नोक्तम् । "शिष्याणां हितमिच्छता....संगृह्य समदर्श्यत" इत्येव निर्दिष्टमस्ति । तदन्तस्थायाः गाथायाः परं विवरणरूपं रहस्यसंदेशविवरणमिति रहस्यमेकं ज्ञापयति द्रमिडभाषापरिचयं विशेषेणालब्धवतां गाथार्थो मा भूदज्ञात इति तदकारीति । अतः आन्ध्रशिष्यान् प्रति रहस्यसंदेशादीति स्यान्नाम ।

परमयं शिंगभूपालः रसार्णवसुधाकराख्यालंकारग्रन्थकारश्च नैक ; तद्ग्रन्थकारोऽर्वाचीनस्तद्वंश्य इति विमर्शकानामाशयः । वाणीविलासमुद्रणे सुभाषितनीवीसंशोधकेन म. तो. (बेङ्गलूर) नरसिंहार्येणैव-मलेखि—आचार्यकालस्तावत् क्रि. प. १२६८-१३६९ । माधवनायकः अन्नपोतरेड्डिनामानं निहत्य राजमहेन्द्रराज्यमग्रहीत् । तस्य माधवस्य पिता शिंगप्रभुः । एतत्काल आचार्यकालश्चैकः । रसार्णवसुधाकरकर्ता शिंगभूपतिस्तु माधवाग्रजस्यानन्तस्य पुत्रः शिंगभूपतिः । स पश्चात्तनः । माधवपितुः शिंगभूपस्य पिता याचमनायकनामा । नूनं याचमात्मजस्येति आचार्यैर्लिखितं स्यात् माधवात्मजस्येति अन्यथाभूतमिति । अन्यथा हि माधव आत्मजो यस्येति विग्रहः स्यात् । स च क्लिष्टः । याचमेति व्यवहारनाम; माधवेत्येव पौत्रस्येव पितामहस्यापि यथाभूतं नामेति वा वक्तव्यम् । एवञ्च सुभाषितनीवी-निर्माणं शिंगभूपतत्पुत्रमाधवयोरभिवृद्धिकाले 1320–1360 वत्सरमध्ये इति सिद्ध्यति । पश्चात् राजमहेन्द्र राज्यं नायकवंशं विहाय रेड्डिवंशाधीनमासीदिति । एवं विमर्शकाभिप्रायमनुसृत्य वक्तव्यमुक्तम् ।

अत्र श्रीनिवासाचार्यनरसिंहाचार्यव्याख्याने न मुद्रिते । तदुक्तापेक्षया अधिकानामर्थानां वक्तव्यतामालोच्य स्वतन्त्रमेवास्माभिर्व्याख्या व्यलिख्यत पद्धतित्रयोपरि । वाचकमहाशयाः विद्यमानान् दोषान् विसृज्य गुणग्रहणेन संतुष्यन्तु ।

जयतु निगमान्तदेशिकसूक्तिः सर्वाऽपि सर्वदेशेषु ।
तद्रसमास्वादयतां विदुषामहमेष दासोऽस्मि ॥

उभयवेदान्तग्रन्थमालासंपादकः

सु. नी. शोधनिका.

250	19	मपीत्याह	289	27	भावप्रधान	,,	32	देहभृत्
,,	26	தாரக	291	21	यौवन	,,	33	आत्म..
255	23	புத்தி துரா	,,	26	जागरूका	,,	,,	पवित्र..
		சாரங்களுக்கு	293	22	மத்ஸ்ய	331	23	विक्रमा
256	7	प्रायश्चि	,,	31	अपह्नोतुं	332	13	पुरुषस्त्वन्यः
,,	18	त्रिप्रत्याशया	,,	33	अपह्नव	,,	16	லக்ஷ்மீ:
258	8	वाङ्मात्रेण	294	21	ஜோதி	334	1	राज्यस्था
260	15	ப்ருஹஸ்	295	1	मपि	,,	13	चूर्णीभ..
261	5	भवन्	296	12	गरुत्मत्	337	30	அஸ்திரம்
,,	16	परत्वमप्य	302	18	பூரணஞ்ச	,,	26	सर्वेश्वरत्व
,,	23	येषाम	305	3	योगी	343	30	सामोपायः
262	30	யிருக்கு	,,	19	महर्षि	344	13	तत्तद्भागानु..
263	25	வர்களால்	308	7	पापापहर—	347	10	श्लाघ्या
264	30	स्यान्वयः	310	32	स्नपयन्ति	,,	15	श्लाघ्य..
267	37	अहल्या	312	6	राह्वादि	351		वदान्य
268	10	संकल्पेनैव	316	23	अइउण्	,,	26	स्वकीय..
,,	20	श्वानश्चेति	,,	30	स्तौति	357	8	தம்மை
278	2	विष्णुभक्त्या	317	13	विष्णुमूर्तौ	,,	22	तिर्यङ्
,,	2	भक्त्या	320	4	शौरि	360	14	पुन
,,	20	यस्यास	323	18	मश्नुते	,,	17	ப்ரத்யு
281	12	विधि...विप्रा	325	23	भावात्	363	26	आरोही
,,	,,	विप्रा	326	25	पूर्वोक्तया	367	26	पुरुष
,,	17	समुच्चायक विधिना	,,	30	अनन्त	371	10	गेये
282	29	वृत्तिः	327	2	तिस्रः	373	18	स्त्री
,,	,,	तदेकपरता	,,	13	அனுக்ர	380	4	துக்த்த
283	1	कनीनिका	,,	17	கண்ணை	,,	16	वर्णितो
286	26	धारणस्य	,,	23	யாஜ்ஞ்யவ..	385	31	கல்ப்
288	4	विभूतिसामग्री	328	20	क्रियातिव	387	14	श्लोकार्थः
,,	11	ब्रह्माणं च	,,	28	वाक्पारुष्य			

★

सुभाषितनीवीश्लोकसूची

"एकया द्वौ" इति श्लोकः भा. उद्योगपर्वणि33. 54. श्लोकः। सुभाषितनीव्यां नीतिमत्पद्धतौ न स गणनीयः।

—०—०—

सुभाषितनीवीपद्धतिसूची

शुभमस्तु

श्रीः

श्रीमान् वेंकटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥

श्रीनिगमान्तमहादेशिकानुगृहीता

सुभाषितनीवी ॥

—०—०—

1. अनिपुणपद्धतिः ।

प्रथमसुजनाय पुंसे मह्यमपि प्रथमदुर्जनाय नमः ।
सर्वं हतः कृतं यौ सकृदुपकारापकाराभ्याम् ॥ (1)

श्रीकाञ्चीपुरालङ्कारभूत-पण्डितपरिबृढ-[पट्टप्पास्वाम्यपरनामधेय]
श्रीश्रीनिवासताताचार्यकृता

हृद्यार्थदीपिका व्याख्या

श्रीमत्प्रणतार्तिहरवरदपरब्रह्मणे नमः ॥
श्रीमते निगमान्तमहादेशिकाय नमः ॥
श्रीमते श्रीकृष्णतातार्यमहादेशिकाय नमः ॥

यत्सेवारसलाभलोभविवशा मोक्षं तृणीकुर्वते
यद्वीक्षालवभाजनं जनमभीष्टार्थाः स्वयं वृण्वते ।
स्रग्भूषं पुनरुक्तभावमयते यद्गात्रशोभाविधौ
देवः स द्विरदाद्रिवासरसिकः श्रेयांसि देयात् प्रभुः ॥ १ ॥

प्रोद्यत्तर्कमदप्रवाहपतनप्रभ्रष्टसद्दृष्टिक-
व्यावल्गत्कवितार्किकद्विपघटाहृत्खण्डिकण्ठीरवः ।
सच्छात्रध्वजिनीनिबद्धदशदिक्सौधाग्र जाग्रद्ध्वजो
दिश्यात् देशिकधूर्वहो निरवधीः कल्याणपारम्परीः ॥ २ ॥

नित्योद्दीपिततर्कशाणकषणप्रस्निग्धबुद्धिच्छटा-
शस्त्रच्छिन्नकठोरदुर्मतिमतस्पर्धालुसिद्धान्तकः ।
विद्यावृत्तसमृद्धसज्जनशिरस्सिंहासनाध्यासितः
पायात् पण्डितमण्डलीपरिबृढः श्रीकृष्णतातार्यराट् ॥ ३ ॥

श्रीशैलान्वयसिन्धुमौक्तिकमणिश्रीकृष्णताताग्रणी-
सूरीशानपदाब्जतल्लजरजःपातेन पूताकृतिः ।
श्रीमद्देशिकसत्सुभाषितवचोनीव्याः शुभव्याकृतिं
संक्षिप्तां विवृतिं तनोति विबुधः श्रीवासताताभिधः ॥ ४ ॥

भावाः सन्ति पदे पदे बहुतरा इत्यप्पयैर्दीक्षितैः
गम्भीरा क्व च गीर्गुरोरिति महाचार्यैश्च सम्भाविते ।
श्रीमद्देशिकसत्कृतेर्विवरणे यत्साहसेनोद्यमः
तत्राज्ञैव सतां पुनर्भवति मे मन्तुं निहन्तुं प्रभुः ॥ ५ ॥

श्रीमद्देशिकदर्शितश्रुतिशिरःसिद्धान्तनिर्धारणश्रद्धाबद्ध-
परिष्क्रिया मम पुनस्तद्व्याक्रियाप्रक्रिया ।
यावल्लब्धगुणग्रहादिह सतां प्रेक्ष्या गुणेक्षावतां
क्षीयन्तां च विपक्षपक्षपरिषद्वाग्जालकोलाहलाः ॥ ६ ॥

कलाश्चतुःषष्टिरिह प्रयत्नतो निवेशिताः श्रीनिगमान्तदेशिकैः ।
कथं न्वहं ताः परिदर्शयाम्यहो मितग्रहः प्राज्ञमनोतिवर्तिनीः ॥ ७ ॥

महार्थपूर्तेरिह पूर्वसूरिभिर्भियोज्झितायां विवृतौ यते कथम् ।
मनोजवैर्वाजिवरैर्दुराक्रमे क्रमेत किं धीः कमठस्य कस्यचित् ॥ ८ ॥

तथाऽपि च स्नेहभराद्गुरोः कृतौ पुरः स्फुरेत् योऽर्थ इमं प्रकाशये ।
करे गृहीता खलु काऽपि दीपिका न जातु सर्वार्थनिदर्शनक्षमा ॥ ९ ॥

विद्यावतां मुदं दद्यादद्याविद्यामपि द्यतु ।
पद्यानामनवद्यानां हृद्या हृद्यार्थदीपिका ॥ १० ॥

इह खलु भगवान् निगमान्तगुरुः परावरतत्त्वयाथार्थ्यवेदिनामपि परमपुरुषार्थसाधनीभूतभक्तिप्रपत्तिरूपोपायनिष्पादनायावश्यमपेक्षणीयाम्, 'अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम्' इत्यारभ्य 'अभयं सत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः। दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥ अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्। दया भूतेष्वलोलुत्वं मार्दवं ह्रीरचापलम् ॥ तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता। भवन्ति सम्पदं दैवीमभिजातस्य पाण्डव' इत्यन्तैर्भगवद्गीताप्रोक्तरीत्या सदैव दैवसम्पत्सम्पन्नानां भगवत्प्रसादमहिम्ना स्वतःप्रसरन्तीमपि तदितरेषामशेषपुरुषाणामध्यात्मशास्त्रपरिश्रमात् ऋते दुःसम्पादाम् आध्यात्मिकादिर्निखिलचित्तखेदप्रशमनीमात्मगुणपरिपूर्तिमम् अखिलजनानामक्लेशेनाऽऽपाद यितुकामः तत्तद्गुणस्वरूपाणां तत्प्रत्यनीकदोषस्वरूपाणां च इदंपरशास्त्रेषु निपुणं निरूपितानामपि सुखतरप्रतिपत्तये, स्वतः पठनपाठनादिप्रवृत्तये च सकलजनचित्तरञ्जन्या सुभाषितपद्धत्या बहुशः शब्दश्लेषादिमुखतः कचिच्च स्वतुल्यार्थान्तरनिदर्शनाच्च सदृष्टान्तमेव सुगुणदुर्गुणस्वरूपाण्याविष्कृत्य अनात्मगुणेषु स्वरसतो वैरस्यमुत्पादयितुमिमां सुभाषितनीवीसंज्ञां कृतिम् अतिपरिचयात् ऋते सुदुर्ग्रहार्थतया यथार्थनाम्नीम् अक्षुद्रार्थबहुलामपि शब्दतः क्षुद्रकाव्यविशेषरूपामपारकृपाप्रवाहपरवशः प्रबबन्ध।

तत्र च आदौ, 'रागो द्वेषस्तथा मोहो हर्षः शोकोऽभिमानिता। कामः क्रोधश्च दर्पश्च तन्द्रा चालस्यमेव च ॥ इच्छा द्वेषस्तथा तापः परवृद्ध्युपतापिता। अज्ञानमेतन्निर्दिष्टं पापानां चैव याः क्रियाः ॥' इत्यखिलपापानात्मगुणजालमूलभूताया अज्ञानाभिधाया अनिपुणताया अनेकधा विततिमाख्यातुकामः इमामनिपुणपद्धतिं प्रथमतः प्रबध्नन् तत्रापि प्रथमं तत्प्रसूतनिखिलपातकवर्गातिशायिन्याः कृतघ्नतायाः [ततोऽपि गरिष्ठयोः क्रियमाणकरिष्यमाणघ्नतयोश्च] 'कृतघ्ने नास्ति निष्कृतिः', 'बालघ्नांश्च कृतघ्नांश्च' इत्यादिशास्त्रशतैः सर्वविधप्रायश्चित्तकरणेऽपि साधुसंस्पृष्ट्यनर्हतापादकतया प्रतिपन्नं सर्वदोषप्राबल्यमुद्घाटयितुं काष्ठाप्राप्तकृतघ्नतातिशयस्थानतया अहङ्कारगर्भं कञ्चन जीवात्मानमुपक्षिप्य तत्स्मरणजनितदोषपरिहारार्थम्, अनुषंगतः स्वेष्टदेवतानमस्काररूपमङ्गलसिद्धये च परमकाष्ठापन्नसकलभूतसौहार्दशालिनो भगवतः परमपुरुषस्य कृतज्ञतातिशयमभिष्टौति **प्रथमे**ति।

अत्र **प्रथमसुजनाय पुंसे नम** इति प्रथमं वाक्यम्। सौजन्यं चात्राऽऽनुकूल्यम्; तच्च प्रत्युपकारमनपेक्ष्य उपकारैकरतत्वम्। प्राथम्यं च सर्वोत्कृष्टत्वम्, तच्च उत्कृष्टावधिरहितोत्कर्षवत्त्वम्। अपकर्षासमानाधिकरणोत्कर्षवत्त्वमिति यावत्। तस्य चानुकूल्ये पदार्थैकदेशेऽन्वयः। नीलतरो घट इत्यादौ तरबाद्यर्थातिशयस्य नैल्यादावन्वयदर्शनात् परमनीलः परमसुन्दर इत्यादावुत्कृष्टनैल्यसौन्दर्यादिप्रतीतेश्च उत्कृष्टार्थकपदसमभिव्याहारस्थले एकदेशान्वयावश्यकताया अभ्युपगन्तव्यत्वात्। अन्यथा घनादिभिरुत्कृष्टे किञ्चित्सुन्दरेऽपि परमसुन्दर इति प्रयोगापत्तेः। अत्र च प्रतियोग्यनिर्देशात् सर्वभूतप्रतियोगिकत्वम् उपाध्यनिर्देशात् निरुपाधिकत्वं चानुकूल्ये प्रतीयते। 'सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति',

'सर्वभूतसुहृदं दयानिधिम्' इत्यादिप्रमाणवचनानुरोधात् । प्रसिद्धं हि भगवतः सर्वेश्वरस्य स्वेच्छामात्रनियतसर्वचेतनाचेतनस्वरूपस्थितिप्रवृत्तिकस्य प्रत्युपकारादिनिरपेक्षमुपकारैकरतत्वं सकलचेतनजातस्वरूपधर्मादिरक्षणपुरःसरं परमपुरुषार्थसाधनानुष्ठानोपयोगिकरणकलेबरप्रदान-अध्यात्मशास्त्रप्रवर्तन-प्रथमकटाक्षप्रभृतिगुरूपसदनप्रपदनपर्यन्तेषु पश्चात्तनोत्क्रमणादिदिव्यपर्यङ्काधिरोहणपर्यन्तेषु च व्यापारेषु। यदि च वैषम्यादिपरिहाराय भगवान् प्रथमकटाक्षपातादिषु यादृच्छिकसुकृतादिकं व्याजतयोपाददीत, तदपि न प्रत्युपकारशब्दनिर्देश्यं स्यात् । घुणाक्षरन्यायापतितेषु केषुचित् कृत्येषु भगवता सुकृतत्वबुद्धिकलनेऽपि न खलु तान्युपकारपदभाञ्जि भवेयुः । उक्तञ्च, "मिथःकलहकल्पनाविषमवृत्तिलीलादयापरिग्रहणकौतुकप्रथितपारवश्यः प्रभुः । स्वलक्षितसमुद्गमे सुकृतलक्षणे कुत्रचित् घुणक्षतलिपिक्रमादुपनिपातिनः पाति नः" इति । न हि फलेच्छादिकमन्तरेणानुष्ठितस्य बुद्धिपूर्वकस्यापि स्वर्गाद्यर्थकर्मणः सुकृतशब्दवाच्यत्वं तत्फलजनकत्वं च । 'अनिच्छातो निवर्तेत स्वर्गाद्यं कर्मणां फलम्' इति न्यायात् । किं पुनर्यत्किञ्चिदज्ञातयादृच्छिकादेः । अस्तु वा यथाकथञ्चित् सुकृतशब्दवाच्यता, तथाऽप्युपकारशब्दनिर्देशः परम् अनिच्छुकृत्येषु सर्वथा न घटत एव । अन्यथा स्तेयार्थं क्वचित् गृहे प्रत्येकमागतयोर्द्वयोः पुरुषयोः परस्परदर्शनेन पलायमानयोर्गृहस्वामिनं प्रति उपकारित्वव्यपदेशापत्तेः ; तत्पुरुषवधोद्देशेन केनचित् प्रयुक्तात् शस्त्रात् यदृच्छया तत्प्रत्यनीकस्य वधे जाते तस्य तत्पुरुषोपकारित्वव्यवहारप्रसङ्गाच्च । अत एव तेषां व्याजत्वनिर्देशः सतामुपपद्यते । अकारणत्वे सति कार्यप्रवृत्त्यौपयिकत्वं हि तत् । अतः सिद्धं निरुपाधिकसौहार्दं भगवत एवेति स एवात्र सुजनशब्दमुख्यार्थः ।

यद्वा सुजनशब्दोऽत्र आचार्यवचनः, तस्यैव 'कृपया निःस्पृहो वदेत्' इति प्रत्युपकारनिरपेक्षोपकारकरणस्मरणात् । तथा च प्रथमगुरोर्भगवतः प्रथमसुजनशब्दनिर्देशः सम्यगुपपद्यत इति । सौजन्यं चात्र उत्तममध्यमाधमभेदात् त्रेधा विभज्यते । तत्रात्यल्पप्रत्युपकारमपेक्ष्य भूयस्तरोपकारकरणमधमम् ; तमप्यनपेक्ष्य तत्करणं मध्यमम् । असकृदपकर्तृष्वप्युपकारैकरतत्वमुत्तमं सौजन्यम् । प्रत्युपकारसमशीलोपकारकर्तृत्वं तु न सौजन्यशब्दार्थः, विनिमयविक्रयादिकारिषु तद्व्यवहारादर्शनात् । अत एवोक्तं नयशास्त्रे, 'उपकारिषु यः साधुः साधुत्वे तस्य को गुणः । अपकारिषु यः साधुः स साधुः सद्भिरुच्यते ' इति । अत्र च 'दासभूताः स्वतः सर्वे' इत्युक्तस्वाभाविकभगवद्दास्यापहारनिरतेष्वपि यत्किञ्चिद्व्याजपरिकल्पनपूर्वकपरिपूर्णानन्दप्रदानपर्यन्तपरमोपकारकरणं हि सौजन्यकाष्ठामातिष्ठते । लोकेऽपि स्वभृत्यवर्गेषु स्वशेषत्वमनुपगम्य स्वविरोधमाचरत्सु स्वामिनो महाक्रोधोद्भवदर्शनेन सिद्धमेव दासत्वापहारस्य सर्वापराधज्यायस्त्वम् । अतस्तादृशसर्वोत्तमसौजन्यशालित्वं निरुपाधिकं भगवत एव युज्यत इति द्रष्टव्यम् । 'पुंशब्दश्चात्र पुरुषशब्दवत् भगवदसाधारणः । 'पुंसः कस्यचिदास्थान' इत्यादिप्रयोक्ष्यमाणत्वात्, 'पुंस्त्वे तत्त्वेन दृष्टे' इति अन्यत्र प्रयुक्तत्वाच्च" इत्येके । आत्मसामान्यवचन एव सन् विशेषणमहिम्ना भगवन्तमभिधत्त इत्यपरे ।

(अन्तराकिञ्चिदलंकरादिविमर्शः)

प्रथमपक्षे स्वकृतनमस्कारफलाविनाभावद्योतकगुणविशेषाभिप्रायगर्भत्वाद्विशेषणस्य परिकरालङ्कारः। 'अलङ्कारः परिकरः साभिप्राये विशेषणे' इति तल्लक्षणात्। द्वितीयपक्षे च मङ्गलसिद्ध्यर्थनमस्कारोद्देश्यतावच्छेदकीभूतविष्णुत्वादिरूपेण विवक्षणीयस्य भगवतः सर्वातिशायिसौजन्यशालित्वेन रूपेण कीर्तनात् पर्यायोक्तमलंङ्कारः। 'पर्यायोक्तं तु गम्यस्य वचोभङ्ग्यन्तराश्रयम्' इति लक्षणात्। अनेन च अपकर्तृष्वपि स्वाभाविकसौहार्दशालिनो भगवतः स्वोद्देश्यकनमस्कारकारिषु निरतिशयप्रीतिकरतायाः कैमुत्यसिद्धता द्योत्यते। तदनुसन्धानेन च स्वस्य निरतिशयभगवद्विषयकरतिभावरूपभक्तिरसो व्यज्यते। उक्तविशेषणाच्चास्य ग्रन्थस्य, यथा राजेति न्यायेन भगवत्तुल्यसौजन्यातिशयः सम्पादनीय इति बुद्धिपूर्वकं तादृशसुजनतााद्यात्मगुणपरिपूर्तिप्राप्तिरेव प्रधानफलं प्रतीयत इत्युक्तालङ्कारमूलकाः वस्त्वादिध्वनय उन्नेयाः।

चतुर्थी चात्र नमः स्वस्तीत्यादितो नमःशब्दयोगनिबन्धना उद्देश्यत्वार्थिका। नमःशब्दश्च कायिकप्रणिपातरूपं मानसप्रपत्त्यादिरूपं वा नमस्कारमाचष्टे। 'नमस्कारात्मकं यस्मै विधायात्मनिवेदनम्' इत्यात्मसमर्पणेऽपि तत्प्रसिद्धेः। अस्त्विति क्रियापदमध्याहार्यम्। अत्र सारशास्त्राद्युक्तसूक्ष्मयोजनाविषया, भगवत एव दासोऽहम् न मम स्वातन्त्र्यमित्याद्यर्थोऽप्यनुसन्धेयः। तेन चैतद्ग्रन्थस्य केवलभगवत्कृपाधीनप्रवृत्तिता स्वस्य चात्र स्वतन्त्रकर्तृत्वभोक्तृत्वाद्यभिमानविरहश्च द्योत्यते।

अथ कथं नाम तादृशाभिमानविरहः सुशकः ; अहं करोमि अहमश्नामीत्याद्यनुभवदर्शनेन स्वतन्त्रकर्तृत्वभोक्तृत्वादिज्ञानस्यावर्जनीयत्वादित्यत आह मह्यमपीति। प्रथमदुर्जनाय मह्यमपि नम इत्यन्वयः। अस्मच्छब्दश्चात्राहंबुद्धिरूपाहङ्कारविशिष्टं जीवात्मानमाचष्टे। तस्य च स्वात्मस्वरूपस्य स्वकर्तृकनमस्कारोद्देश्यत्वबाधात् सविशेषणे हीति न्यायेन विशेषणरूपेऽहङ्कार एव विधेयान्वयः पर्यवस्यति। नमःशब्दश्च विरोधलक्षणया नित्यासरणरूपोपेक्षापरः। "तृष्णे देवि नमस्तुभ्यम्", "हे काशि तुभ्यं नमः" इत्यादिवत्। तथा च प्रथमदुर्जनरूपस्वात्मनिष्ठाहङ्कारो नित्यमसरणविषयो भवत्वित्यर्थः। अहं करोमीत्याद्यनुसन्धानं विहाय, 'स्वामी स्वशेषं स्ववशम्' इत्याद्यनुसन्धाने स्वाधीनकर्तृत्वभोक्तृत्वाद्यभिमानः सुदूरमपसरतीति भावः। उक्तं हि स्वयमेव, "अहन्ते नाहं ते विहरणपदं देशिकगिरः स्वदन्ते नः स्वान्ते सपदि गतसन्देहविषयाः। अनायासा यासामहिपतिशया सा भगवती धराधारा धाराधरनिकरसाधारणरुचिः" इति। तथा च निरुपाधिकसुहृद्भगवदधिष्ठानस्थानभूतस्य स्वात्मनो निरवधिकदौर्जन्यावहाहङ्कारनिवासस्थलत्वमनुचितमिति पूर्वार्धघट्टार्थः ॥ यद्वा नमःशब्दोऽत्र वैरूप्यपरिहाराय नमस्कारवाचक एव सन् 'नमस्ते रुद्र मा मा हिंसीः।', 'नमो अस्तु सर्वेभ्यः' इत्यादाविव हिंसापरिहारप्रार्थनौपयिकनमस्कारचर्यातात्पर्यकः। अतश्च भगवद्दास्यैकरते स्वस्मिन् स्वातन्त्र्याद्यभिमानरूपाहङ्कारमुद्दिश्य प्रार्थनारूपोऽयं वाक्यार्थः सम्पद्यत इति। अत एव करोमीत्याद्युत्तमपुरुषघटितशब्दाप्रयोग इत्यपि द्रष्टव्यम्। अत्र पूर्ववाक्यार्थभूतस्य भगवद्दास्यैकरतत्वसहितस्वातन्त्र्याद्यभावस्य उत्तरवाक्यार्थभूताहङ्कारनिवृत्तिप्रार्थनायां हेतुभावेन तत्समर्थनार्थत्वात् वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः। समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनमिति तल्लक्षणात्। दौर्जन्यमप्यत्र

पूर्वोक्तसौजन्यविरोध्यपकारैकरतत्वरूपम् । प्राथम्यं च निरतिशयोत्कर्षशालित्वम् । तादृशोत्कृष्टदौर्जन्यञ्च त्रैकालिकस्वोपकारैककर्तर्यप्यपकारैकचित्तत्वम्, यथा नाळीजङ्घादिविषये दुर्ब्राह्मणस्य गौतमादेः । व्याघ्रवानरसंवादे चायमर्थो द्रष्टव्यः । तादृशं च दौरात्म्यमहङ्कारगर्भे जीवात्मन्यतिशयकाष्ठामधितिष्ठति । यतः सर्वभूतसुहृदि भगवति, 'पिताऽहमस्य जगतः', 'माता पिता भ्राता निवासः शरणं सुहृत्' इत्यादि-प्रमाणगणप्रतिपन्ननिरुपाधिकवात्सल्यातिशयेन 'दहरकुहरे देवस्तिष्ठन्' इत्याद्युक्तातिजुगुप्सितदेहवासादि-कमपि विषह्य ब्रह्मनाडीप्रवेशाद्युपकारशतेषु बद्धसन्नाहं तिष्ठमानेऽपि, 'स्वयं मृत्पिण्डभूतस्य' इत्युक्तक्रमेण स्वरक्षणसामर्थ्यलेशशून्योऽयमवरात्मा स्वाभाविकतद्दास्यमप्यनुपगम्य, त्वं म इति स्वामिनि बलाद्ग्रहीतु-कामेऽपि अहं म इति हठात् प्रधावितुमारभमाणः सर्वथा वध्यकोटिप्रविष्टोऽवसरप्रतीक्षाया भगवत्कृपाया अप्यवकाशाप्रदाने बद्धादरो दुरात्मसार्वभौमताभूमिरिति । तदेवं पूर्वार्धस्य भगवद्विषयकनिरतिशयरति-भावनारूपपुण्ड्रेक्षुसारस्रवन्तीरसास्वादे स्वस्वातन्त्र्याहङ्कारादितृणजालमेलनं मा स्म भूदिति प्रार्थनमेव निर्गलितार्थो बोद्धव्यः ।

ननु चात्र भगवतः प्रत्युपकारादिकमनपेक्ष्यैवापकारैकनिरतसकलभुवनोपकारकरणरूपसौजन्याख्य-महागुणस्थापनोत्सुकानाम्, 'एकामसिद्धिं परिहरतो द्वितीयासिद्धिः' इति न्यायेन युगपत् सर्वजनमोक्ष-प्रदानाद्यभावप्रयुक्तो वैषम्यादिदोषः सुखोन्मेष इति शङ्कायाम्, 'न स्मरत्यपकाराणां शतमप्यात्मवत्तया । कथंचिदुपकारेण कृतेनैकेन तुष्यति' इत्यादिप्रमाणशतप्रतिपन्नां—चेतनजातगतं यदृच्छयापतितं कञ्चन व्यापारमुपकारत्वेन कथञ्चित् परिकल्प्य तत्क्षणमेव रक्षणोन्मुख्येन लीलादेवीदाक्षिण्यमनुपालयतोऽपि भगवतो दयैकपक्षपातितामुद्घाट्य समादधानः सुजनदुर्जनशब्दप्रवृत्त्यौपयिकं कृत्यविशेषमप्युपन्यस्यति सर्वमिति । यौ पूर्वोक्तसुजनदुर्जनौ । सकृत् कृतेन उपकारेणापकारेण च तत्पूर्वमाचरितं सर्वमप्यप-कारजातमुपकारजातं च हतः निष्फलं कुरुतः, यः सर्वेश्वरः सकृदुपकारेण कर्तुरुपकारत्वबुद्ध्यभावेऽपि व्याजमात्रतया कल्पितेन यत्किञ्चिद्व्यापारेण, सर्वं तत्पूर्वमनन्तजन्मसु विहितं सकलमप्यपराधजातं नरकप्रदान-गर्भजन्मजरामरणाद्युत्पादनमन्तरेण व्यर्थं करोति, तत्प्रयुक्तनिग्रहसङ्कल्पं स्वरूपत एव परित्यजति, तस्मै प्रथमसुजनायेत्यन्वयः । एवं यो दुर्जनात्मा सकृदपकारेण वस्तुतोपकारत्वबुद्ध्यभावेऽपि जनापवाद-भयभावनया व्याजमात्रतया परिकल्पितेन केनचित् कार्येण सर्वमपि पुराकृतमुपकारजातं निष्फलं करोति, न खलु तेषां प्रत्युपकरोति ; प्रत्युत तद्विषये विपरीतमेव सर्वदा चरति—तस्मै दुर्जनायेति [त्यन्वय इति ?] वाक्यार्थद्वयं सम्पद्यते । उभयत्र उपकारापकारशब्दौ उपकारत्वबुद्धिविषयार्थकौ । 'कथञ्चिदुपकारेण' इति प्रमाणानुरोधात् । वस्तुत उपकाररूपत्वे कथञ्चित्पदबोद्धव्यक्लेशकल्प्यत्वान्वयस्य दुःशकत्वात् । आचारोऽपि हि तथैव दृश्यते । तथा हि—तत्तादृशार्द्रापराधभूयसि वायसे को नामोपकारो रक्षणौपयिकतया स्थितः । किं तु सर्वथाऽप्यगतिकतया स्वसविधे व्यत्यस्तशिरःपादतया पतनमेव कथञ्चित् दिव्यदम्पतिभ्यामुप-कारस्थाने निवेशितमिति प्रसिद्धं पुराणेषु । एवं 'विभीषणो वा सुग्रीव यदि वा रावणः स्वयम् ।

आनयैनं हरिश्रेष्ठ दत्तमस्याभयं मया' इत्युद्घोषयतो भगवतो रावणाभयप्रदानप्रतिज्ञाने किं नाम निदानम्। न ह्यनेन तदानीं सीता प्रत्यानीता। नापि कश्चित् तदितर उपकारस्तदा कृतः। किं तु स्वस्थानागमनसन्देह एव तथात्वेन कल्पितो दयालुनेति। नन्वत्र स्वस्थानागमनादिरूपव्याजस्य कथमुपकारशब्दार्थत्वमिति चेत्—अत्र ब्रूमः। निरुपाधिकरक्षणदीक्षितोऽपि भगवान् लीलादेवीदाक्षिण्यमनुरुन्धानः कथमस्याः समाधानं कथनीयम् (करणीयम् ?), कथं वा दुर्जनः शिक्षणमन्तरेण रक्षणीयः स्यादिति सदा विचिन्तयन् मध्ये यदि किञ्चिद्व्याजमात्रमुत्पश्येत् तदा तदेव स्वस्य महोपकारं मन्यमानः स्वीकरोति तम्। न गणयति च तदनन्तरापराधगणानिति। अत एवोक्तम्, 'सकृत्प्रपदनस्पृशामभयदाननित्यव्रती' इति। स्पृशधातुः संपूर्णसाङ्गानुष्ठानाभावेऽपि तद्भावनामात्रमेवालमिति द्योतयति। व्रते नित्यत्वं च पश्चात्तनापराधगौरव्यमेद्यत्वम्। अत्र रक्षणशिक्षणविषये परस्परं विवदमानयोर्दयालीलयोः स्वस्नेहपात्रभूतदयाविजयावहत्वात् तादृशव्याजे उपकारत्वबुद्धिकरणं भगवत इति संप्रदायरसिकाः। अत एव वक्ष्यति, 'विषमेष्वपि भावयन् स्वमर्थं पुरुषः कोऽपि हृदि स्थितः प्रजानाम्' इति। किं बहुना। 'द्वेषाच्चैद्यादयो नृपाः (यथा ?)'इत्युक्तरीत्या अनुकूलाभासस्य कस्यचिदप्यदर्शने चैद्यादिगतसार्वदिकद्वेषकार्यपरुषभाषणादिष्वेव कथञ्चिदुपकारत्वबुद्धिकरणे किमु वक्तव्यमन्येषामिति स्मरणीयं प्रमाणशरणैः। एवं दुर्जनस्यापि स्वत एव जनापकारनिरतस्य लोकभयभावनया तत्कृते क्वापि कृत्ये स्वापकारताख्यापनं व्याघ्रानशाबवृत्तान्ते प्रसिद्धम्। रावणेनापि स्वप्राणरक्षणप्रत्याशयेव विभीषणविहितं हितोपदेशमपकारत्वेन स्वीकृत्य तदवमाननादिकं कृतमित्यादिकं निदर्शनीयम्। तत्र सिद्धं स्वत एवोपकारापकारप्रवृत्तौ सुजनदुर्जनयोः कारणवशाच्च कुतश्चिद्व्याजमात्रकल्पनमिति।

(अलङ्कारादि विमर्शः)

अत्र कारणत्वेन निर्दिष्टयोरुपकारापकारयोर्वस्तुतः कारणत्वाभावस्य सकृत्पदेन सूचनात् विभावनालङ्कारो ध्वन्यते। 'विभावना विनाऽपि स्यात् कारणं कार्यजन्म चेत्' इति तल्लक्षणात्। स्वात्मनोऽप्यत्र यच्छब्दाभिधानात् नोत्तमपुरुषप्रसक्तिः। अत्र सौजन्यदौर्जन्ययोः काष्ठाप्राप्तत्वचमत्कारौपयिकत्वरूपसाधारणधर्मनिर्देशात् परस्परोपमानोपमेयभावः प्रतीयते। तत्र यदि श्लोकस्यास्य मङ्गलार्थत्वं तदा प्रथमसुजनः पुमानेवात्र वर्ण्यतयोपमेयकोटिप्रविष्टः। यदि पुनः पद्धतिसङ्गत्या अनिपुणसार्वभौमः कृतघ्न एव वर्ण्यतया विवक्ष्यते, तदा स एवोपमेयकोटिमाटीकत इति। सर्वथाऽप्युत्तरार्धगतहेतुवाचकपदस्थद्वन्द्वसामर्थ्यमेदितवाक्यद्वयोपात्तयोः सकृदुपकारप्रयुक्तसर्वपूर्वकृतापकारविस्मरण सकृदपकारप्रयुक्तसर्वपूर्वकृतोपकारविस्मरणरूपविभिन्नधर्मयोर्बिम्बप्रतिबिम्बभावनिर्देशात् दृष्टान्तालङ्कारः। 'चेद्बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलंकृतिः इति तल्लक्षणात्। अनेन च सौजन्यदौर्जन्ययोः परमकाष्ठापन्नत्वप्रत्यायनेन यथा भगवतः परमकाष्ठापन्नं सौजन्यं सर्वात्मना नाशयितुं ह्रासयितुं वा न शक्यम् तथा मन्निष्ठं काष्ठाप्राप्तं दौर्जन्यमपीति नोभयोः पर्वतपरमाण्वोरिव सर्वात्मनाऽपि साम्यगन्धः संभवतीति आत्मनिन्दैव भगवत्साम्यकथनरूपस्तुतिव्याजेनाभिव्यज्यत इति व्याजस्तुतिरपि ध्वनिता। एवं परस्परदृष्टान्तप्रतीतिमहिम्ना प्रथमसुजनस्य पुंसः

प्रथमदुर्जनोऽहमेव सदृशः, प्रथमदुर्जनस्य मम प्रथमसुजनः स एव सदृश इति तृतीयसदृशव्यवच्छेदप्रतीतेरुपमेयोपमा ध्वन्यते । "पर्यायेण द्वयोः स्याच्चेदुपमेयोपमा मता" इति लक्षणात् । एवं प्रथमसुजनप्रथमदुर्जनशब्दाभ्यां 'परमः पुमानेक एव सुजनेषु मुख्यः न तु सुजनेषु तत्समः कश्चित् । अहमेक एव दुर्जनेषु मुख्यः, नान्यो मत्समः' इति सूचयद्भ्यां द्वयोरन्यसदृशव्यवच्छेदफलकोऽनन्वयालङ्कारोऽपि ध्वनितः ।

अनेन रामरावणयोर्युद्धं रामरावणयोरिवेति श्लोकप्रत्यभिज्ञापनात् प्रथमसुजनो राम एव, प्रथमदुर्जनो रावण एवेति विशेषव्यक्तिप्रतीतिरपि भवति । 'सर्वभूतहिते रतः. सर्वभूताभयप्रदः, प्रजानां च हिते रतः, कृतज्ञः सत्यसन्धश्च, साधूनामुपकारज्ञः, सर्वसत्त्वमनोहरः, निवासवृक्षस्साधूनां, धर्मज्ञश्च कृतज्ञश्च, रक्षिता जीवलोकस्य,—रावणो नाम दुर्वृत्तः, एष सर्वाहिते रतः, त्यक्तधर्मव्रतं क्रूरं, नृशंसमनृतं तथा, रावणस्य दुरात्मनः' इत्यादिप्रमाणशतपरामर्शात् । प्रसिद्धं हि स्वप्राणप्रियापहारकेऽपि सदा रक्षणोन्मुख्येन यदि वा रावणस्स्वयमिति वानरगोष्ठ्यामुद्घोषयतः युद्धाय प्रत्यवस्थानेऽपि सद्बुद्ध्युदयप्रतीक्षया विश्रामदानेन तद्रक्षणापेक्षिणो रघुनन्दनस्य, प्राणमोक्षणक्षणेऽपि 'द्विधा भज्येयमप्येवं न नमेयं तु कस्यचित्' इति उपकारैकनिरतेऽप्यनमनसंकल्पेन महाहंकारगर्भस्य रावणस्य चापकारोपकारनिरतगोचरतद्विपरीतैकनिरतत्वरूपसौजन्यदौर्जन्यपरमकाष्ठाधिष्ठानभूमित्वम् । अतः श्लोकेऽत्र तावेव प्रधानगोचरौ । सकृदुपकारशब्देन सकृदुपकारशब्देन सकृदेव प्रपन्नायेति श्लोको ज्ञापितः । दशेन्द्रियाननं घोरमित्यादिकं चेहानुसन्धेयमिति ।

एवं सुजनदुर्जनशब्दाभ्यां सुजनदुर्जनस्वरूपविवेकस्यैव एतद्ग्रन्थप्रधानप्रतिपाद्यता द्योत्यते । नमः शब्देन च नित्यादरणनित्यास्मरणरूपं तत्फलं च प्रतीयत इति विषयप्रयोजनादिकमपि विभाव्यताम् ।

प्रथमशब्देन सकलदोषाग्रयायिन्याः कृतघ्नतायाः प्रथमनिरूपणीयता ध्वन्यत इति यथायथं वस्त्वलङ्कारध्वनय उन्नेयाः । एवं भगवद्विषयकभक्तिरसजनितसन्तोषानुभवदशायां स्वदौर्जन्यस्मरणजनितविषादाविष्करणात् भावशबळतापि द्रष्टव्या । तथा कृतघ्नवर्ण्यतापक्षे तस्य सर्वोत्कृष्टेन भगवता समीकृत्य वचनात्, 'गुणोत्कृष्टैः समीकृत्य वचोऽन्या तुल्ययोगिता' इत्युक्ततुल्ययोगिताभेदोऽपि ग्राह्यः । यद्यपि तुल्ययोगितायां वर्ण्यमात्रगतमवर्ण्यमात्रगतं वा धर्मैक्यं तन्त्रम्—तथाऽप्युक्ततुल्ययोगिताविशेषेऽन्यशब्दविवक्षितं वर्ण्यावर्ण्यसाधारणत्वरूपवैलक्षण्यमप्यावश्यकम् । 'लोकपालो यमः पाशी श्रीदः शक्रो भवानपि' इत्युदाहरणानुरोधात् । अत्र गुणोत्कृष्टैस्साम्यवचनं स्तुतिपर्यवसायि ; प्रकृते स्तुतिनिन्दाद्वयपर्यवसायीति विशेषः । साधारणधर्मश्च स्थलद्वयेऽपि वस्तुतो भिन्नोऽप्येकत्र श्लेषमहिम्ना, अपरत्र बिंबप्रतिबिंबभावेन चाध्यवसिताभेद इति धर्मैक्यमुपपाद्यम् । यद्यप्यत्र द्विवचनोपात्तद्वित्वविशिष्टयोर्युगपत् सर्वकृतघातकत्वरूपधर्मान्वयात् 'सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः । शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम्' इत्यत्रेव दीपकमेव युक्तम्, न पुनः दृष्टान्तः—तथाप्यन्तःप्रविश्य क्षोदे प्रथमं द्वित्वविशिष्टे धर्मान्वयेऽपि चैत्रमैत्रौ गच्छतः, चैत्रो मैत्रश्च गच्छत इत्यादाविव द्वंद्वस्थले चकारस्थले चोत्तरबोधे भिद्येतैव द्वेधा वाक्यार्थ इति तादृशवाक्यार्थपरिशीलने

उपकारापकारघटितधर्मद्वयप्रतीतेर्द्वयोर्बिम्बप्रतिबिम्बभावप्रतितेश्च दृष्टान्तालङ्कारता स्वीकृता। यदि पुनरापाततः सर्वकृतघातकत्वरूपधर्ममात्रविवक्षया, 'मदेन भाति कलभः प्रतापेन महीपतिः' इत्यादाविव धर्मैक्यं स्वीक्रियते, तदा काममस्तु दीपकमेवेति। वस्तुतो मदेन भातीत्यत्रापि वाक्यद्वयत्वस्यैवावश्यवक्तव्यत्वात् भातिपदानुषङ्गेण तदर्थपर्यालोचने च मदप्रतापजन्यप्रकाशयोर्वस्तुतो भिन्नयोर्बिंबप्रतिबिंबभावप्रतीतेश्च, त्वमेव कीर्तिमानित्यादाविव दृष्टान्तालङ्कार एव वक्तुमुचितः। दीपकोदाहरणं तु मणिः शाणोल्लीढ इत्यादिकमेवेति। तथाऽपि धर्मपदस्य सकृन्निर्देशमात्रेण वाक्यद्वयोपकारकत्वात् दीपकसमाख्या कैश्चित्कल्पितेति तदनुसारेण दीपकत्वमुक्तमिति न विरोधः। लक्षणसाङ्कर्यपरिहारश्चैषामन्यत्र प्रपञ्चित इति विरम्यते। एतेषां च संसृष्टिः समप्राधान्यसङ्करो वा यथामति विभावनीयः।

ओजःप्रसादादयो गुणा वृत्त्यनुप्रासादयश्च तत्तत्स्थलेषु स्फुटावसेया एव। ध्वन्यादिबाहुल्यादुत्तमकाव्यता च भाव्या। अत्र प्रथमादिश्लोकदशके पथ्यार्यावृत्तम्। तल्लक्षणं च 'लक्ष्मैतत्सप्तगणा' इत्यारभ्य वृत्तरत्नाकरे विपुलमनुसन्धेयमिति संक्षेपः।

(2) एवमस्य श्लोकस्य रामरावणपरत्वे अन्यथाऽप्यर्थबोधः सुलभः। तथा हि—सुजनसार्वभौमाय नमोऽस्तु। मह्यमपि न नमेयमित्यहङ्कारविशिष्टाय रावणायापि नमनमस्तु। अपिर्विरोधे। शिरःपतनमहङ्कारभङ्गो वा समुत्पद्यतामित्यर्थः। यौ रामरावणौ कृतं ईश्वरकल्पितं कृत्स्नं वा सर्वं जगत् उपकारापकाराभ्यां सकृदेव हत। श्रीरामभद्र उपकारेण हन्ति। 'रिपुषु निहतेरेव हितता', 'निहति(त)रक्षितानां हितम्' इत्युक्तेः। रावणस्तु अपकारेण हन्ति 'रावणं लोकरावणम्' इत्युक्तेः। हत इत्यनेन हननसङ्कल्पो विवक्षितः। तत्र सकृच्छब्दार्थान्वयः। तथा च जगदुपकारार्थं हननसङ्कल्पः श्रीदाशरथिना, जगदपकारार्थं हननसङ्कल्पो रावणेन च सकृदेव कृत इत्यर्थः। अध्ययनेन वसतीतिवत् फले तृतीया। यद्वा उपकारापकाराभ्यामिति चतुर्थ्येव बोद्धव्या॥ अथवा कारशब्दः शब्दानुकारपरः, एवकार इत्यादिवत्। अतश्च श्रीराम उपकारेण हन्ति उपहन्तीत्यर्थः। उपघ्नवृक्षो भवतीति यावत्। निवासवृक्षः साधूनामिति प्रमाणानुसारात्। रावणस्तु सर्वं जगदपहन्ति। अपहन्तिश्च निरन्वयविनाशपरः। तमोऽपाघ्नन्निति वैदिकप्रयोगात्।

(3) एवमीश्वरपरतया जीवपरतयाऽपि कश्चिदर्थः। ईश्वरः स्वकृतं सर्वमपि जगत् उपकारार्थं सकृत् विनाशयति; प्रळयं करोति। सृष्टिप्रळययोः कृपाकार्यत्वात्। जीवस्तु सकृत् स्वकृतापकारेण 'यत् ब्रह्मकल्पनियुतानुभवेऽप्यनाश्यं तत् किल्बिषं सृजति जन्तुरिह क्षणार्धे' इत्युक्तेन सकृदनुष्ठितेन दुष्कर्मणा सर्वमपि स्वस्मै कृतं स्वभोगाय भगवत्कल्पितं जगत् हन्ति स्वभोगानुपयुक्तं करोति। भोगस्थानं सर्वं कर्मवशात् भयस्थानं भवतीत्यर्थः। 'किमत्र न भयास्पदं भवति रङ्गपृथ्वीपते', 'भवन्ति मुखभेदतो भयनिदानमेव प्रभो शुभाशुभविकल्पिता जगति देशकालादयः' इत्याद्युक्तेरिति भावः।

अत्र चाद्वैतमतभूमिकयाऽपि कश्चिदर्थबोधः सम्भवति । अस्याः पद्धतेरुपक्रमोपसंहाराविभिरद्वैतिपरताया वक्ष्यमाणत्वात् । तथा हि—अत्र पूर्वार्धे चतुर्थीचतुष्टयमपि समानाधिकरणमेव । तत्र पूर्वद्विकं जगदुत्पादनाय कृतावतारं मायावच्छिन्नचैतन्यरूपं विष्णुमभिधत्ते । उत्तरद्विकं च अहंबुद्धिगोचरमन्तःकरणावच्छिन्नं जीवात्मानमाचष्टे । उभयोरभेदः सामानाधिकरण्यबोध्यः । "मयि श्रुतिशतार्पिता तदहमस्मि पूर्णो हरिः" इत्यनुसन्धानात्" । तथा च प्रथमसुजनेश्वराभिन्नाय प्रथमदुर्जनाय नमः इत्यप्येकवाक्यतयाऽन्वयबोधः । **अपिः** विशेषणसमुच्चयद्योतकः । **यौ** मायावच्छिन्नचैतन्यान्तःकरणावच्छिन्नचैतन्यरूपावीश्वरजीवौ **कृतं** अनित्यभूतं **सर्वं** ब्रह्मस्वरूपभिन्नं सर्वमपि जगत्, **सकृत्** एकदा हतः—विनाशयतः । कुतः ? **उपकारापकाराभ्याम्** । उपकारः—उपायनं—संग्रहः इत्यर्थः । अपकारः—अपगमनं—त्याग इत्यर्थः । ताभ्याम् । तथा च सोऽहमितिशब्दात्, मायावच्छिन्नान्तःकरणावच्छिन्नचैतन्ययोः मायान्तःकरणरूपविशेषणत्यागात् चैतन्यमात्रविषयकबोधात् जगद्बाधो भवति इति तन्मतपरिपाटी स्फुटीक्रियते इति । अत्र च "श्रितान् परमहंसतां परमहंस इत्युक्तितः त्रयीपथमसौ गतान् कपटसौगतान् खण्डयन्" इत्युक्ताः शुद्धाद्वैतिनोऽप्यनिपुणकोटिप्रविष्टा इति तदुपक्षेपोऽत्र वस्तुनिर्देशरूपो भवतीति हृदयम् । एवमग्रेऽप्येतन्मतप्रक्रिया तत्रतत्र प्रपञ्चयिष्यत इति संक्षेपः ॥ (1).

श्रीमते कवितार्किकसिंहाय वेदान्तगुरवे नमः ।

संपादकीयम्

श्री श्रीनिवाससूरिकृतायां रत्नपेटिकाख्यायां प्राचीनव्याख्यायां तावत् उपोद्घात एवम्,—

"इह खलु भगवान् वेङ्कटनाथार्यः कवितार्किकसिंहः सर्वतन्त्रस्वतन्त्रः राजमहेन्द्रनगरस्थित-(सर्वज्ञ) शिङ्गक्ष्मावल्लभेन (श्रीमदान्ध्रमहीमण्डलाधीश्वर प्रतिगण्डभैरव श्रीधनपोतनरेन्द्रनन्दनभुजबलभीम रसार्णवसुधाकरनामकनाट्यालङ्कारशास्त्रप्रणेत श्रीशिङ्गभूपालेन) एकलव्यन्यायेन शिष्येण विशिष्टश्रीवैष्णवधर्मविविदिषया श्रीरङ्गनगरस्थितस्य वेदान्तदेशिकपदे अभिषिक्तस्य स्वस्य निकटं प्रति श्रीवैष्णवेषु प्रेषितेषु तदर्थं रहस्यसन्देश-तत्त्वसन्देशौ श्लोकश्च कश्चित्, "सत्त्वस्थान् निभृतं प्रसादय सतां वृत्तिं व्यवस्थापय त्रस्य ब्रह्मविदागसः तृणमिव त्रैवर्गिकान् भावय। नित्ये शेषिणि निक्षिपन् निजभरं सर्वंसहे श्रीसखे धर्मं धारय चातकस्य कुशलिन् धराधरैकान्तिनः" इति विरचय्य स्वरूपशिक्षार्थं तद्व्याजेन लोकहितार्थं सामान्यविशेषधर्मप्रतिपादनपरं द्वादशद्वादशपद्यकद्वादशपद्धतिकं सुभाषितनीव्याख्यं नीतिप्रबन्धं प्रणिनाय । तत्र अनिपुणपद्धतिः दृप्तपद्धतिः खलपद्धतिः दुर्वृत्तपद्धतिः असेव्यपद्धतिः महापुरुषपद्धतिः समचित्तपद्धतिः सदाश्रितपद्धतिः नीतिमत्पद्धतिः धनधान्यपद्धतिः (वदान्यपद्धतिः) सत्कविपद्धतिः परिष्कृतपद्धतिः इति क्रमः। दोषान् विधूय गुणाः प्रापणीया इति प्रथमं दोषपराः पद्धतयः प्रणीताः। तेषु आत्मोत्तारणनैपुण्याभावात् अनिपुणत्वम्। तस्य हेतुः देहात्मादिविवेकाभावः। तदेवाज्ञानम् । ततो दृप्तता खलत्वं दुर्वृत्तता च। तेन सज्जनैरसेव्यत्वमिति परस्परसंगतिः। तथा चाज्ञानस्य (सर्व) दोषकारणत्वात् तदेवावश्यं परिहरणीयमिति बुद्ध्या अनिपुणपद्धतिः प्रथममारब्धा। तत्र मङ्गलश्लोकस्य दुर्जनेभ्यो ग्रन्थस्य रक्ष्यत्वपरश्लोकस्य च पद्धतिनियमितद्वादशश्लोकयन्तर्गतत्वात् तयोरप्यनिपुणपरतां प्रतिपादयितुं तद्दोषकीर्तनम्। तत्रायं मङ्गलश्लोकः" इति।

तत्त्वसंदेशो माधवात्मजं प्रति तत्कृतसंदेशस्य प्रतिसंदेश इति तद्ग्रन्थान्ते आचार्यैरेवोक्तम्, रहस्यसंदेशः शिष्यान् प्रतीति च। सत्त्वस्थानिति श्लोकश्च तत्त्वसंदेशग्रन्थगतः। न च राजमहेन्द्र शिङ्गभूपालो माधवात्मज इति चेत्—व्यक्तिभेदस्यापरिहार्यत्वे प्रथमतो विलिख्य तस्मै प्रेषितानां पश्चादपेक्षानुरोधादस्मा अपि प्रेषणं कृतमित्यस्तु। अत्र तत्त्वसंदेशादिकमेतदर्थमेव कृतमित्यत्र विवादे सत्यपि सुभाषितनीवी एतदर्थैत्येतत् निर्बाधम्। पद्धतित्रयपर्यन्तमेव श्रीपट्टप्पास्वामि-व्याख्योपलम्भात् तदुपरि एतच्छ्रीनिवाससूरिकृता परिमिता व्याख्यैव मुद्रयिष्यते। तत्र सुजनत्वं किंरूपमिति न विवेचितम्। सुजनत्वं परोपकारैकरतत्वम्; एवमाचार्यत्वमपि इति हृद्यार्थदीपिकायामुक्तम्। प्रथमश्लोकोत्तरार्धे उपकारप्रस्तावः तत्र हेतुः। अस्तु सुजनत्वं निर्दोषकल्याण-गुणाकरत्वम्। तत्र प्राथम्यं कृत्स्नत्व-निरतिशयत्व—अनन्याधीनत्वकृतम्। एवं सुजनत्वादेव सर्वकृतापकारहन्तृत्वमप्यस्तीति तत्प्रदर्शनमुत्तरार्धे इति चेत्—तथापि परोपकारपर्यवसाने सत्येव लोके सुजन इति व्यवहार इति तत्र निष्कृष्योक्तं, सौजन्यमानुकूल्यमिति। (भगवद्व्यापारः सर्वोऽप्युपकाररूप एव विवेचने।) दुर्जनत्वं निर्गुणत्वे सति दोषाकरत्वम्। कृतघ्नशब्दस्य कृतोपकारहन्तर्येव रूढिरिति तत्पदमप्रयुज्य अर्थद्वयलाभाय, सर्वं हतः कृतमिति व्यस्य प्रयोगः कृतः। एवञ्च सर्वकृतहन्तृत्वं सुजनदुर्जनसाधारणधर्मः। तत्समन्वयाय अपकारोपकाररूप—विशेषग्रहणप्रदर्शनाय सकृदुपकारापकाराभ्यामिति निर्देशः कृतः। यच्छब्दघटितवाक्यस्य उत्तरत्वे तत्सापेक्षे पूर्ववाक्ये तच्छब्दस्यार्थसिद्धत्वादप्रयोगः। यौ कृतं हतः तयोरेकतरस्मै सुजनाय अन्यतरस्मै दुर्जनाय च नम इत्युक्तं भवति। कः प्रथमदुर्जन इत्यत्र मह्यमिति विशेषनिर्देशवत्, कः प्रथमसुजन इत्यत्र पुंसे इति परमपुरुषनिर्देशः। अथवा कामं परमपुरुषतुल्यः अन्योऽपि यथार्हप्रथमसौजन्यशाली गृह्यताम्; तस्यापि गौरवयितव्यत्वात् इत्याशयेन विष्णव इत्यनुक्त्वा सामान्येन पुंस इत्युक्तिः। प्रथमदुर्जनस्तु न मदन्यः कश्चित् इति नैच्यानुसन्धानेन काष्ठाप्राप्तेन मह्यमित्युक्तम्। अथवा मह्यमिति पदस्य अहंकारमम कारविशिष्टाय इत्यर्थः।

उपरितनश्लोकेषु व्याख्यायां बहवोऽर्थाः वक्ष्यन्ते। अत्रापि तथा प्रपञ्चनम्। अद्वैतिमत प्रक्रिययापि दर्शितस्त्वर्थोऽधिकः। निन्दापरतयापि नमश्शब्दप्रयोगो व्याखयानान्तरे एवं दर्शितः। "नमः पतनशीलाय खलाय मुसलाय च। कुर्वते स्वमुखेनैव बहुधान्योपखण्डनम्" इति। जीवकृत-व्यापारस्य भगवदुपकारत्वं कथमित्यत्र विस्तरः हृद्यार्थदीपिकायां (7 ; 9.) द्रष्टव्यः। व्याख्यान्तरोक्तं तावत् "भगवतो निरुपाधिककारुण्यतया रक्षापेक्षाप्रतीक्षत्वेन शरणागतिमपि स्वस्योपकारं मत्वा" इति।

ननु सकृदुपकारमप्यनपेक्ष्य यः सर्वमप्यपकारं न गणयति स एव प्रथमसुजनः, अपकारम-पेक्षमाणस्तु मध्यमः। एवं सकृदपकाराभावेपि यः कृतघ्नः, स एव प्रथमदुर्जन इति चेत्—स्यादेवं कश्चित् कदाचिल्लोके। सर्वदा तादृशत्वं कस्यापि नास्ति। ईश्वरस्तु न व्याजमप्यनपेक्ष्य अपराधो-पेक्षकः; सर्वमुक्तिप्रसंगादिति तत्त्वं व्युत्पादयितुमेवमुक्तम्। दुर्जनस्तु अपकारनिरपेक्षमेव कृतघ्नोऽपि परैः प्रश्ने कृते अपकारमन्तत एकं कल्पयतीति लोकरीतिमनुसृत्यैवमुक्तम्।

1 ஸ்ரீதேசிகன் அருளிய ஸுபாஷித நீவியென்ற இந்தக் காவியம் ராஜமஹேந்த்ர சிங்க பூபாலனுக்காகச் செய்யப்பட்டதென்பர். ரஹஸ்ய க்ரந்தங்களிற் சேர்ந்த தத்துவஸந்தேசம் ரஹஸ்யஸந்தேசம் என்ற க்ரந்தங்களும் இவனுக்கு அனுப்பப்பட்டன என்பர். தத்துவ ஸந்தேசம் மாதவனின் குமாரனுடைய ஸந்தேசத்திற்கு மறுமொழியான ஸந்தேச

மென்றும் அவனைக் குறித்தே "ஸத்துவஸ்த்தாந்" என்ற உபதேச ச்லோகமென்றும், ரஹஸ்ய ஸந்தேசம் சிஷ்யர்களுக்காக என்றும் அந்த க்ரந்தங்களிலே அருளிச்செய்யப்பட்டிருப்பதால் அவை சிங்க பூபால னுக்கு என்னலாகாதென்று வினவலாம். இவன் ஸுபாஷிதம் பொது வான தர்மோபதேசகாவ்யமொன்று கேட்டதற்காக இதனை யருளி, தத் துவஜ்ஞான ருசியிருப்பது தெரிந்து அவற்றையும் இவனுக்கு அனுப்பின தாகக் கொள்ளலாம். இங்கே மாதவாத்மஜனில்லையாகில் இப்படி நிர்வா ஹம். எப்படியும் ஸுபாஷிதநீவி இவனுக்காகலாம். இதைப் பின் பற்றி 2வது ச்லோகத்திற்குப் பொருள் நாம் குறிக்கப்போவதையும் காண்க.

இந்த காவ்யம் 12 பத்ததிகள்—பிரிவிகள் அடங்கியது. ஒவ்வொரு பிரிவிலும் 12-ச்லோகங்கள். முதல் பத்ததியில் ஆர்யாவ்ருத்தம். பத்தியமான விஷயம் சொல்லப்படுவதால் பத்யார்யாவ்ருத்தம், பிற கெல்லாம் அனுஷ்டுப்பு. எல்லா பத்ததியிலும் கடைசியில் பெரிய ச்லோ கங்கள். ஸுபாஷிதமாவது நல்வார்த்தை. கெட்டவனுடைய துர்க்குணத் தைச் சொல்ல ஐந்து பத்ததிகள். நல்லவனுடைய சீரைச் சொல்வன மேல் ஏழு பத்ததிகள். ஒவ்வொரு ச்லோகத்திற்கும் பல பொருள்களை ஸ்ரீபட்டப்பாஸ்வாமியின் உரை காட்டும். வேறு பொருளும் அவரவர் ஆராயலாம். ச்லோக அமைப்பு அதற்கேற்ப அழகாயிருக்கும்—

முதலாவது அநிபுணபத்ததி. அதன் முதல் ச்லோகம்—

ப்ரதமஸுஜநாய பும்ஸே மஹ்யமபி ப்ரதமதுர்ஜநாய நம:.
ஸர்வம் ஹத: க்ருதம் யௌ ஸக்ருத் உபகாராபகாராப்யாம். (க)

இதன் பொருள்—

நல்லோரில் முதல்வனான புருஷோத்தமனுக்கும் துர்ஜனங்களில் முதல்வனான எனக்கும் நமஸ்காரம். இருவரும் செய்தவற்றையெல்லாம் நினையாதவர்கள். அவன் ஒருதரம் நாம் செய்ததொன்றை உபகாரமாகக் கொண்டு முன் செய்த அபகாரங்களையெல்லாம் மறக்கிறான்; உபேக்ஷிக் கிறான். நானும் ஒருவன் செய்த நன்மைகளையெல்லாம் ஒருதரம் அவன் செய்ததைத் தவறாகக் கொண்டு உபேக்ஷிக்கிறேன். இவ்வொத்துமை யைக் கொண்டு இருவருக்கும் நமஸ்காரம். (துர்ஜனனுக்குச் செய்ய வேண்டும் திரஸ்காரத்தையே நமஸ்காரமாக இங்கே மறைத்துச் சொன்னதென்க.)

நமஸ்காரமாவது தலை கீழே விழுவது. துர்ஜனனுக்குத் தலை விண்டு கீழே விழட்டும். ராமனென்கிற ஸுஜநனுக்கு நேர்மாறான ராவணனுக் குத் தலைகள் வீழ்ந்தாற் போலே எனவும் தேறுமென்பர்.

2 வேறு பொருளும் உத்தரார்த்தத்திற்கு--ஸர்வம் க்ருதம்--ஈச்வரன் படைத்த எல்லாவுலகையும் ராவணனைப் போன்றவன் அபகாரத்திற் காகவே—கேடு விளைவிக்க வேண்டுமென்றே அழிக்கிறான். ஈச்வரன்

சத்ருவையும் அவனது நன்மைக்காகக் கொல்லுகிறான்; ஸக்ருத்; என்பது ஹத: என்பதோடு சேரும் நல்லதோ கெட்டதோ அவரவர் செய்யும் ஸங்கல்ப்பம் ஒருதரமே; மாறுவதில்லை யென்றதாகும்.

3 உபகாரமாவது உப என்ற சொல். அபகாரமாவது அப என்ற சொல். அவற்றோடு ஹத: என்பதைச் சேர்த்தால், நல்லவன் படைக்கப் பட்ட எல்லோருக்கும் உபக்னமாகிறான்—அதாவது வளர்வதற்கு வேண்டும் கொழு கொம்பாகிறான். துர்ஜனன் அபஹதியை—அழிவைச் செய்கிறான் என்ற பொருள்கள் கிடைக்கும்.

4 ஈச்வரன் ஒருசமயம் (ப்ரளயத்தில்) படைத்ததை யெல்லாம் அழிக்கிறான் அதன் நன்மைக்காக. இல்லையேல், பாபங்கள் மேன்மேல் குவியும். துர்ஜனன் ஒருதரம் கொடிய பாபமென்கிற அபகாரத்தாலே தான் முன் சேகரித்திருக்கும் நன்மைகளை யெல்லாம் தானே இழக்கிறான்.

5 அத்வைதமதத்தைச் சொல்வதாகவும் உரை செய்வர். ப்ரஹ்மம் ஒன்றே உளது. மற்றெல்லாம் பொய். அவ்வொரு ஆத்மாவே ஈச்வரனாக வும் ஜீவனாகவும் தோற்றும். உலகத்தை ஆளும் நிலைமையுடையதென்று ஈச்வரனென்கிறோம். ஸம்ஸார தோஷங்களையடைந்திருப்பதால் ஜீவ னென்கிறோம். தத்துவ ஜ்ஞானத்தினால் உலகமே மறைகிற போது அதன் மூலமான இந்த ஈச்வரகுணங்களோ ஜீவகுணங்களோ இருக்க மாட்டா. அவை இருப்பதாலே ஆத்மா வெவ்வேறாகத் தோற்றுகிறது. அவை தொலைந்தால் எல்லாம் ஒன்றாய்விடும். இந்த விஷயம் இந்த ச்லோ கத்திற் சொல்லப்படும்—ப்ரதமஸுஜநனென்கிற ஈச்வரனாகவும் ப்ரதம துர்ஜனனென்ற ஜீவனாகவுமிருக்கும் ஒரே ஆத்மாவுக்கே எல்லாம் வந்தவை. நம:—எனக்கென்பது வேறில்லை. நமது மோக்ஷமுயற்சி யெல்லாம் இவ்வொரு ஆத்மா நிற்பதற்காக; ந ம:—அஹமென்று சொல்லப்படும் அஹங்காரத்திற்காகவல்ல, ஸம்ஸாரிகளின் முயற்சிகளே அதற்காகும். அதற்காக இரண்டாகத் தோன்றுவதற்கு காரணங்களான குண துர்குணங்களை ஹதம் பண்ண வேண்டும். உபகாரமாவது உபா தானம், எடுத்துக் கொள்ளல்—அபகாரமாவது அப்பால் தள்ளல். ஆத்மா வென்கிற தத்துவத்தை எடுத்துக் கொள்வதாலும். குணதோஷங்களை யெல்லாம் அப்பால் தள்ளிப் பொய்யாக்குவதாலும் எல்லாவற்றையும் அழிப்பார்கள் தத்துவ ஜ்ஞானம் பிறந்த போது ஜீவேச்வரர்கள். அழிப்பதும் ஸக்ருத் ஒரேதரம். உலகம் உண்மை யென்பார்க்கு மஹா ப்ரளயத்திற்குப் பிறகும் படைப்பு உண்டு. பொய்யென்பார்க்கு போனது போனதே. உண்மையை அவ்வாறு கண்ட போது ஈச்வரனாகவும் ஜீவ னாகவும் ஒன்றேயாகிறது.

(அநிபுணபத்ததியில் இப்பொருளைச் சொன்னதால் இம்மதம் கொள் பவர் நிபுணரல்லர். சாஸ்த்ரப் பொருள் தெளிந்தவரல்லரென்றும் தெரிவித்ததாம். தொடக்கத்தில் மங்களமாக பகவானைக் கூறி, அவனை யறியாமல் பிறருக்கு அபகாரமே செய்யும் துர்ஜனனை இந்த ச்லோகம் காட்டும். அபகாரம் செய்யாத போதும் செய்ததாக நினைப்பானென்பதை விரித்துரைக்கும் 3வது ச்லோகம்.) (1)

प्रमितिपरिष्कृति(त)मुद्रा सहृदयहृदयैः(ये) समर्पिता कविभिः ।
भवति सुभाषितनीवी पर(पट्ट)गुणचोरैरहार्यार्था ॥ २ ॥

एवमनिपुणपद्धतौ प्रथमश्लोकेन स्वकार्यसाधनानिपुणं स्वतः परापकारैकनिरतं दुर्जनसार्वभौममभिधाय, अनन्तरश्लोकेन 'साहित्यपाथोनिधिमन्थनोत्थं कर्णामृतं रक्षत हे कवीन्द्राः । यत् तस्य दैत्या इव लुण्ठनाय काव्यार्थचोराः प्रगुणीभवन्ति ॥' इत्युक्तरीत्या स्वस्य काव्यकरणासामर्थ्येऽपि परकीयश्लोकतदेकदेशादिकं स्वकल्पितत्वेन तदुल्लिखितार्थसन्दर्भांश्च स्वकल्पितत्वेन जल्पतां सद्य एव पण्डितपरिहासपदतामातिष्ठमानानामनिपुणानां रीतिमुपदर्शयन् स्वग्रन्थस्य सकलकविकुलाभिष्टुतत्वेन काव्यान्तरेभ्यो वैलक्षण्यमपि सूचयन् ग्रन्थनामनिर्देशापदेशात् तदीयविषयादिकमप्याविष्करोति **प्रमिती**ति । **सुभाषितनीवी**ति ग्रन्थनाम । सुभाषितानि च लोकनीत्यादिप्रतिपादकशास्त्रार्थावगमकाः सरसचाटुश्लोकाः ; तेषां **नीवी** मूलधनमिति रूपकम् । अनेन चैतादृशा अनेकव्यवहाराः सुनिष्पादा एतदध्येतॄणामिति द्योत्यते । "नीवी परिपणं मूलधनम्" इत्यमरः । **परगुणचोरैः परेषां** स्वापेक्षया उत्कृष्टानां कवीनां ये **गुणाः** ऊहापोहादयो बुद्धिगुणा विलक्षणाः तेषां **चोराः** तदीयकल्पनादेः स्वोल्लिखितत्वेन जल्पनशीलाः तैः **अहार्यार्था** अनपहार्यार्था **भवति** सम्पद्यते । शब्दचौर्यस्य कथञ्चित् ज्ञेयत्वेऽपि दुर्विज्ञानस्यार्थचौर्यस्यापि निवर्तनोपायः कल्पित इत्यर्थः । तादृशमुपायमेवोद्घाटयति **प्रमिती**ति । अत्र यदित्यध्याहार्यम् । उत्तरार्धेऽपि तदिति । "जितोऽसि मन्दकन्दर्प मच्चित्तेऽस्ति त्रिलोचनः" इतिवत् यत्तच्छब्दपूरणेन हेतुहेतुमद्भावस्य बोधनीयत्वात् । **सहृदयहृदयैः** ; समानं हृदयं येषां तानि अन्यकविहृदयानि । अत्र हृदयशब्दो ग्रन्थकर्तृहृदयपरः । तादृशहृदयं इतरकविहृदयैस्तुल्यं ऐकरस्यमापन्नमिति सहृदयानि ग्रन्थकारहृदयतुल्यानीत्यर्थः सम्पद्यते । समानस्येति योगविभागाश्रयणादत्र सादेशो बोद्धव्यः । तादृशानि हृदयानि येषां तथाभूताः स्वकीयोल्लेखादिकं सुष्ठुत्वेन स्वीकृत्य तदीयरसास्वादैकनिरता इत्यर्थः । अत्र योगशक्त्या उक्तार्थबोधकोऽपि सहृदयशब्दो रूढ्या काव्यरसभावनापरिपक्वबुद्धीनाचष्टे । यथोक्तं कुवलयानन्दचन्द्रिकायां 'सहृदयः काव्यभावनापरिपक्वबुद्धिः' इति । एवं 'परिष्कुर्वन्त्वर्थान् सहृदयधुरीणाः कतिपय' इति रसगङ्गाधरश्लोकस्थसहृदयधुरीणशब्दो नागेशेन विवृतः 'केचन काव्यवासनावासितान्तःकरणश्रेष्ठाः' इति । अतः **सहृदयहृदयैः** काव्यवासनावासितान्तःकरणैः **कविभिः** काव्यकरणशीलैरित्यर्थः सम्पन्नः । 'हृदयालुः सुहृदयः' इत्यत्रामरकोशे 'सहृदय' इति केचित् पठन्ति । तदा निर्मत्सरसाधुहृदया इत्यर्थो बोद्धव्यः । तैः **प्रमितिपरिष्कृतिमुद्रा समर्पिता । प्रमितिः** यथावस्थितार्थग्रहणं **परिष्कृतिः** तत्तत्प्रदेशगतरसभावव्यञ्जनालङ्कारादीनां विविच्य निरूपणम् । तयोर्मुद्रा प्रकारः । 'विशेषणज्ञानमुद्रया हेतुः' इत्यादौ मुद्राशब्दस्य विधारूपप्रकारवाचित्वदर्शनात् । **समर्पिता** दत्ता । अस्यामिति शेषः । तथा च निर्मत्सरैः काव्यरसिकैः एतद्ग्रन्थस्थशब्दार्थसन्दर्भाः सम्यगालोडिता इत्यर्थः । अतः काव्यार्थचोराणां स्वोहितत्वेन कथनमत्र दुश्शकमेवेति भावः । अत्र उत्तरार्धस्य पूर्वार्धेन समर्थनात् काव्यलिङ्गमलङ्कारः ।

(2) एवं सुभाषितनीव्येव नीवीति श्लेषमूलकात् रूपकान्तरात् अन्योऽप्यर्थः प्रतीयते। नीवी क्षुद्रभस्त्रिका। यथा सम्पूर्णधनगर्भायां कस्यांचिन्नीव्यां स्वामिहृदयैकरसैः कैश्चित् गणकैः प्रमितिपरिष्कृतिमुद्रा समर्पिता। प्रमितिः प्रमाणम् संख्यानिर्णयः। नीव्यन्तर्गतसंख्यागणनमिति यावत्। परिष्कृतिः समीचीनरज्जुबन्धादिना परिष्करणम्। तदुभयसहिता मुद्रेति मध्यमपदलोपी समासः। मुद्रा च जत्वादिलेपोपरि स्वनामाक्षरादिचिह्नाङ्कनम्। एवं संख्यानिर्णयदृढबन्धनमुद्रणादिषु कृतेषु तदन्तर्गतार्थाः परगुणैः उत्कृष्टचौर्यादिगुणैरपि चोरैरनपहार्या भवन्ति। उत्कृष्टचोराश्च पश्यतोहराः। यद्वा परेषां गुणाः अप्रधानभूताः स्वकार्ये नियुक्ता अनुजीविवर्गाः। 'गुणो मौर्व्यामप्रधाने रूपादौ सूद इन्द्रिये' इति मेदिनी। त एव चोराः गणनाव्यत्ययादिना स्वामिधनापहारकाः। तदुक्तम्—'ये मुष्णन्ति निशि प्रविश्य भवने ये वा बलात् कानने नैते स्वामिधनं हरन्ति ननु तान् निन्दन्ति चोरा इति। सद्यो हन्त हरन्ति पोषकधनं संख्यां विपर्यस्य ये कष्टं तानिह वञ्चकानपि पुरस्कुर्वन्ति सर्वे जनाः' इति। तेषामप्यवकाशोऽत्र न लभ्यत इत्यर्थः।

एवमप्रस्तुतार्थस्य विशेषणसामर्थ्यबलात् प्रतीत्या समासोक्तिरलंकारः। "समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य चेदिति तल्लक्षणात्। विशेषणसाम्यं च श्लेषमूलकमिति तेन सङ्करः। पूर्वोक्तकाव्यलिङ्गेन संसृष्टिश्च। अत्र च प्रतीयमानेनाप्रस्तुतार्थेन सह प्रस्तुतार्थस्योपमानोपमेयभावः प्रतीयते। अन्यथा तत्प्रतीतिवैयर्थ्यात्। तेन च नीवीसाम्यात् स्वग्रन्थस्य बहुळार्थगर्भत्वं तत्तदर्थानां स्वोपभोगसत्पात्रप्रतिपादनादियोग्यत्वं स्वबुद्धिशक्त्यादिभिरेव सम्पादितत्वादिकं च व्यज्यते। तेन च परोच्छिष्टमिश्रणेन कैश्चित् कलितात् काव्यान्तरात् स्वग्रन्थस्य वैलक्षण्यद्योतनेन व्यतिरेकालंकारो व्यज्यत इत्येवं वस्त्वलंकारध्वनिपरंपराऽनुसन्धेया। एवमग्रेऽप्यूहनीयम्।

(3) अन्योऽप्यर्थः-सुभाषितानां चाटुश्लोकानां नीवी ग्रन्थिः। स्त्रीकटीवस्त्रग्रन्थिवाचकोऽपि नीवीशब्दोऽत्र ग्रन्थिमात्रे सादृश्यात् वर्तते। ग्रन्थिसादृश्याच्च अतिपरिचयात् ऋते दुर्विवेचार्थत्वं विपुलार्थगर्भत्वेऽप्याकारह्रस्वत्वमित्यादिकं प्रतीयते। तस्यां च सहृदयहृदयैः स्वसमानान्तःकरणैः कविभिः पण्डितैः। 'संख्यावान् पण्डितः कविः' इत्यमरः। स्वान्तेवासिभिरिति यावत्। प्रमितिपरिष्कृतिमुद्रा समर्पिता। प्रमितिः यथावदर्थश्रवणम्। परिष्कृतिः भावादिविवरणपूर्वकं युक्तिभिरनुचिन्तनम्। मुद्रा अनुकूलेभ्य एवात्रत्यार्थाः प्रकाशनीयाः; न तु विरोधिवर्गेभ्य इत्येवं व्यवस्थारूपः सङ्कोचः। 'मुद्रितानि कमलानि निशीथे' इत्यादौ मुद्राशब्दस्य सङ्कोचार्थकतायाः स्पष्टत्वात्। एवंविधव्यवस्था समर्पिता विहिता। अतः परगुणचोरैः अहार्यार्था भवति। किं तु श्रद्धापूर्वकगुर्वाराधनेन तादृशग्रन्थिमोक्षणोपायं विजानद्भिरेव एतद्ग्रन्थस्यसूक्ष्मार्थाः ग्रहीतुं शक्या इति भावः। अनेन च श्रीहर्षकविकृता काचन वचनभङ्गी संस्मार्यते। यथोच्यते—'ग्रन्थग्रन्थिरिह क्वचित् क्वचिदपि न्यासि प्रयत्नान्मया प्राज्ञंमन्यमना हठेन पठिती माऽस्मिन् खलः खेलतु। श्रद्धाराद्धगुरुश्लथीकृतदृढग्रन्थिः समासादयत्वेतत्काव्यरसोर्मिमज्जनसुखव्यासज्जनं सज्जनः॥' इति। एवं महाभारतेऽपि ग्रन्थग्रन्थिनिवेशः श्रूयते—"ग्रन्थग्रन्थिं तदा चक्रे मुनिर्गूढं कुतूहलात्। यस्मिन् प्रतिज्ञया प्राह मुनिर्द्वैपायनस्त्विदम्॥ अष्टौ श्लोकसहस्राणि अष्टौ श्लोकशतानि च। अहं वेद्मि शुको वेत्ति सञ्जयो वेत्ति वा नवा" इति।

(4) एवमप्रस्तुतोऽपि कश्चिदेतादृशोऽर्थः। तथा हि—सुभाषितशब्देन भाष्यादिग्रन्था उच्यन्ते। तेषां नीविः मूलधनं ब्रह्मसूत्रादि। तत्र च कविभिः ब्रह्मज्ञानिभिः। 'यत्तद्ब्रह्म, कवयो वेदयन्ते, 'तदेतद्ब्रह्म परमं कवीनाम्' इत्यादिप्रसिद्धेः। प्रमितिः श्रवणं परिष्कृतिः मननं तत्सहिता मुद्रा 'विद्ययैव समं कामं मर्तव्यं ब्रह्मवादिना। आपद्यपि च घोरायां न त्वेनामिरिणे वपेत्॥ ऊषरे निवपेत् बीजं षण्डे कन्यां प्रयोजयेत्। सृजेद्वा वानरे मालां नापात्रे शास्त्रमुत्सृजेत्' इत्यादिव्यवस्थानिर्बन्धः कृतः। अतः परगुणचोरैः—'यदृच्छया श्रुतो मन्त्रश्छन्नेनाथ च्छलेन वा। पत्रेक्षितो वा व्यर्थः स्यात्' इत्युक्तकुमार्गादिभिरर्थान् निर्णिनीषुभिः अनपहार्यार्था भवति।

(5) यद्वा सुभाषितानां नीवी मूलस्थानं श्रीभाष्यादिकं विशिष्टाद्वैतसिद्धान्तग्रन्थजातम्। तत्र सहृदयहृदयैः समानाधिकरणबुद्धिभिः कवितार्किकसिंहैः प्रमितिपरिष्कृतिमुद्रा प्रत्यक्षानुमितिशब्दादिप्रमितीनां प्रामाण्यप्रकारनिरूपणात्मिका परिष्कारमुद्रा समर्पिता विहिता। तदुक्तम्—'दृष्टेऽपह्नुत्यभावादनुमितिविषये लाघवस्यानुरोधात् शास्त्रेणैवावसेये विहतिविरहिते नास्तिकत्वप्रहाणात्। नाथोपज्ञं प्रवृत्तं बहुभिरुपचितं यामुनेयप्रबन्धैस्त्रातं सम्यक् यतीन्द्रैरिदमखिलतमःकर्शनं दर्शनं नः'' इति। अतः परगुणचोरैः परब्रह्मगुणतस्करैः ब्रह्मणो निर्गुणत्ववादेन वास्तवतद्गुणापलापकैरित्यर्थः। अहार्यार्था भवति। ''वेदोऽनृतो बुद्धकृतागमोऽनृतः प्रामाण्यमेतस्य च तस्य चानृतम्। बोद्धाऽनृतो बुद्धिफले तथाऽनृते यूयं च बौद्धाश्च समानसंसदः'' इत्युक्तबौद्धज्ञातिभिर्वास्तवप्रामाण्यानङ्गीकारेण निखिलजगत्कारणत्वादिरूपभगवद्गुणापलापो न शक्य इत्याशयः। ''वरद सुगतपाशश्चोरलावं विलाव्यः'' (श्रीरंग. 3. 6.) इति सुगतद्वयानुगमकश्रीसूक्त्यनुसारेणात्र चोरशब्दः प्रयुक्तः।

(6) अथ वा परगुणचोराः परमनोपहारकाः। 'रूपादौ सूद इन्द्रिये' इति मेदिनीकोशात् मनइन्द्रियपरत्वस्य निर्बाधत्वात्। ते च 'इतस्त्वरितमन्यतः प्रहिणु सारथे मद्रथं यदत्र कवयश्चरन्त्यपटुचित्तपाटचराः' इत्युक्ताश्चोलादिदेशस्थाः क्षुद्रफलार्थिनः कवयः। तैरियं सुभाषितनीवी अहार्यार्था भवति। सुभाषितैकजीवनानां सुभाषितशब्दश्रवणमात्रेणैवापहारबुद्ध्युदयावश्यंभावेऽपि समानाधिकरणबुद्धिभिरनन्यप्रयोजनैः कविसार्वभौमैर्देशान्तरस्थैर्ग्रहणधारणादिमुद्रायाः कृतत्वात् तेषामेतद्ग्रन्थस्थसुभाषितापहारावकाशो न लभ्यत इत्यर्थः। यद्वा अह आर्यार्थेति पदच्छेदः। ऋ-गताविति धातोः ण्यप्रत्यये आर्यः प्राप्य इत्यर्थः सम्पद्यते। अहेति खेदे। तथा चान्येभ्यः कथञ्चिद्रक्षणेऽपि उक्तपरचित्तचोरैरवश्यग्राह्यैव भवेदियमिति खेदोऽनेन द्योत्यते। एवमर्थचौर्यपरिहारमार्गः प्रदर्शितः। अथ शब्दचौर्यपरिहारप्रकारोऽप्यत्र प्रदर्श्यते। तथा हि—सहृदयहृदयैः समानाधिकरणमध्यप्रदेशैः अनुलोमगतिभिरित्यर्थः। अनेन अङ्कानां वामतो गतिरित्युक्तप्रतिलोमगतिर्व्यवच्छिद्यते। तादृशैः कविभिः 'कादि नव, टादि नव, पादि पञ्च, याद्यष्टौ' इत्युक्तसंख्याक्रमेण चतुश्चत्वारिंशदुत्तरशतसंख्यया प्रमितिः गणनम्, तत्सहिता परिष्कृतिः। परिः शब्दोक्तद्वादशसंख्यया करणं द्वादशधा परिच्छेदकरणं पद्धत्यादिनिर्माणमित्यर्थः। तादृशी मुद्रा व्यवस्था समर्पिता

संशब्दगतसकारमकारोक्तसप्तपञ्चसंख्यया अर्पिता। सुगुणपद्धतयः सप्त दुर्गुणपद्धतयःपञ्चेति व्यवस्था-पूर्वकम् इयत्यः पद्धतयः श्लोका इयन्त इति व्यवस्था कलितेत्यर्थः। अतः **परगुणचोरैः** परेण-द्वादशसंख्यया यो गुणः गुणनं गुण्यानिर्देशादुक्तसंख्यैव गुण्यतयाऽपि भासते। अतश्च द्वादशानां द्वादशभिर्गुणने ये **चोराः** गूढतया स्थिताः संख्याः चतुश्चत्वारिंशदुत्तरशतरूपाः ताभिः **अहार्यः** अविभाज्यः **अर्थः** प्रमेयः यस्यास्तथोक्ता भवति। एवं संख्यायाः विशेषरूपेण गणितत्वात् द्वादशश्लोकानां द्वादशपद्धत्या गुणने यत् फलं लब्धं तेन एतद्गतश्लोकानां विभागकरणरूपं हरणमनावश्यकमिति भावः। प्रातिस्विकरूपेण संख्यानिर्णयात् कस्यचित् गुणनं वा हरणं वा गणितशास्त्रोक्तमत्र न प्रसरतीति यावत्। यद्वा सुभाषितनीवीपदमक्षरद्वयरूपेण त्रेधा विभज्यते–सुभा–षित–नीवी इति। तत्र सुभाशब्देन चतुस्सप्ततिः, षितशब्देन षट्षष्टिः, नीवीशब्देन चतस्रश्च संख्या उच्यन्ते। सुभासहितः षित इत्यादिसमासाङ्गीकारात् आहत्य च ताः पूर्वोक्तचतुश्चत्वारिंशदधिकशतसंख्या भवन्ति। तद्घटकाः ये अर्थाः अनिपुणत्वदस-त्वादिरूपाः पद्धतिनियामकाः; परगुणसहितैः चोरैः परगुणाः परवासुदेवगुणाः षट्, षाड्गुण्याद्वासुदेव इत्युक्तेः। चोराः षट्, षट्चोरा इत्युक्तेः। तदुभयमेलने द्वादश भवन्ति। तैः अहार्याः अविभाज्याः भवन्ति। पूर्वोक्तविशिष्टसंख्यायाः द्वादशधा विभजनं कृत्वा पद्धतिसंख्यानिर्णयो नावश्यक इति भावः। प्रातिस्विकरूपेण उक्तरीत्या तत्तत्संख्यानिर्णयादिति।

(7) एवमन्योऽपि कश्चिदप्रकृतार्थः। नीवी स्यात् बन्धनागारमित्यमरशेषवचनात् कारागृहवचनो नीवीशब्दः। तत्र चोराणामनिर्गमनाय चोरसंख्यानिर्णयरूपा प्रमितिः, उन्नतप्राकारादिनिर्माणरूपा परिष्कृतिः ताभ्यां सहिता मुद्रा कवाटबन्धनादिरूपा तदधिकारिभिः कृता। अतः सा चोरैरविनाश्यप्रयोजना भवति। यद्वा **अहार्यम्** अहरणम् तयोरेवेति भावार्थेऽपि कृत्यविधानात् कृत्यल्युटो बहुळमित्यकर्म-कादिनियमहानेऽपि प्रयुक्तत्वात् पेयगेयादिशब्दवत्। भावप्रधाननिर्देशाद्वा अहार्यत्वपरं बोद्धव्यम्। प्रयुक्तं ह्यनर्घराघवे—'त्रैविक्रमः सकलदानवजीवितव्यविन्यासमाप्तलिपिरेष सुदर्शनो मे' इत्यत्र जीवितव्यपदं जीवनपरतया। एवं कृषिगोरक्ष्यवाणिज्यमिति श्लोकव्याख्याने गोरक्ष्यपदं गोरक्षणपरतया व्याख्यातं तात्पर्यचन्द्रिकायाम्। तथा च एतादृशपरिष्कारविशिष्टकारागृहदर्शने चोराणामपहारबुद्धिर्निवर्तत इत्यर्थः।

(8) एवं मुद्राशब्दस्वारस्यादन्योऽप्यर्थः प्रतीयते। सुभाषितनीवीशब्देन काचन जीवव्यक्तिर्लक्ष्यते। तस्यां च कविभिः मन्त्रशास्त्रविद्भिः प्रमितिपरिष्कृतेर्मुद्रा विवेकपरिष्कारजनिका काचन मन्त्रन्यासमुद्रा समर्पिता। अस्य[चेतनस्य] सदसद्विवेको जायतामिति तदङ्गे मन्त्रन्यासादिकं शंखचक्रमुद्रणादिकं वा कृतम्। तेन सा, **परगुणाः** शत्रुगुणाः कामक्रोधाद्यरिषड्वर्गा इत्यर्थः। त एव **चोराः** षडिन्द्रियापहारकाः **तैरहार्यार्था** भवति। अपरिहार्यपुरुषार्था भवतीत्यर्थः। अध्यात्मनिष्ठसकाशात् मुद्राधारणं लब्ध्वा सञ्जातविवेकपरिष्कृतेर्जीवव्यक्तेः कामादिगुणोपरोधैः पुरुषार्थहानिर्न भवतीति सम्प्रदायरहस्यमिहाशास्यम्।

(9) यद्वा तामसतन्त्रादिकथितमुद्रिकाषट्कमिह मुद्राशब्देन विवक्षणीयम्। तादृशमुद्राप्रयोगे

चोरपलायनं भवति । यथोक्तं बृहत्तन्त्रे—'षण्मुद्राः क्रमशो ज्ञेयाः पद्मपाशगदान्व(ह्?)याः । मुसलाश-निखड्गाख्याः शान्तिकादिषु कर्मसु' इत्यारभ्य 'भवेचोरगतिस्तम्भो मुसलीमुद्रधारणात्' इति ।

(10) यद्वा नीवीशब्दः स्त्रीकटीवस्त्रबन्धनरूपयथाश्रुतार्थपर एव । सा च-परेषां गुणाः अप्रधानभूताः, शेषभूता इति यावत् ; तदीयदारादयः ; तेषां चोरैः पराङ्गनालम्पटैरित्यर्थः । अहार्यार्था अनुच्छेद्या भवति । पूर्वोक्तविवेकपरिष्कारवत्या युवत्याः नीवीबन्धो दुष्टपुरुषैरनुच्छेद्यो भवतीति भावः । अनेनैतद्ग्रन्थस्य विवेकपूर्ति रेव प्रधानफलमिति प्रतीयते । एवमन्येऽप्यर्था यथायथमुन्नेयाः ।

अथ कथमत्र ग्रन्थारम्भात् पूर्वमेव सहृदयकर्तृकप्रमित्यादिकरणं सुशकं स्यात् । ग्रन्थसमाप्त्यनन्तरं तत्करणे च भूतार्थकनिष्ठाप्रयोग इह न सङ्गच्छत इति चेत्—अत्र ब्रूमः । उभयथा च दोषविरहात् । विशृङ्खलतया पूर्वमेव कृतानां सहृदयैस्तदा तदा श्रुतानामद्यैव ग्रन्थरूपतया ग्रथने भूतार्थकप्रयोगाविरोधात् । तदसहने च अर्हार्थे आशंसायां वा निष्ठाऽङ्गीकार्या । 'अर्हे कृत्यतृचश्च' इत्यत्र चकारात् निष्ठादिग्रहण-स्योक्तत्वात् । 'आशंसायां भूतवच्च' इति विशेषविधानाच्च । अतः समर्पितेत्यस्य समर्पयितुमर्हा इष्टा वेत्यर्थ-करणे न दोषगन्धः । [वस्तुतः समर्पितेति भूतकालनिर्देशः अहार्यार्थभवनकालापेक्षया, न तु प्रकृत-श्लोकरचनकालापेक्षया ।] उत्तरार्धे च वर्तमानसामीप्ये वर्तमानवद्वेति भविष्यदर्थे लट्प्रयोगोऽवसेय इति ।

(11) अत्र च सुभाषितानां साधुभाषणानां नीवी मूलधनभूता विद्या । विद्यामाख्याति भाषणमित्यनुशा-सनात् । सा च चोरैरनपहार्या भवति । साधारणधनादीनां तस्करग्राह्यत्वेऽपि, 'रत्नदीपस्य हि शिखा वात्ययाऽपि न नाश्यते' इति न्यायेन विद्याधनं न केनापि हार्यमिति सामान्यार्थोऽपि ध्वनितः ।

(12) एवमन्योऽप्यर्थो ध्वन्यते । सुभाषितानां शोभनवचनानाम्, अयं साधुः पण्डित इत्यादिसुकीर्तिव-चसामित्यर्थः । नीवी मूलभूता राङ्कवदुकूलादिवस्त्रसमृद्धिः । 'वस्त्रेण वपुषा, इति श्लोकानुसारात् सहृदय-हृदयैः शोभनवक्षस्कैः कविभिः हंसैः प्रमितिपरिष्कृतिमुद्रा कृता अस्येदं वस्त्विति प्रमितये अलङ्काराय च या मुद्रा हंसादिचिह्नम्, सा कृता । तथा चोक्तम्—'तद्दुकूलाङ्कमूर्ताविति । 'शब्दायन्ते न खलु कवयः सन्निधौ दुर्जनानाम्' इति च । अतः परज्ञानचोरैः असूयादिना परज्ञानापलापकैः, अहमेव पण्डितो नायमिति गर्जनशीलैर्दुर्जनैः अहार्यार्था अबाध्यप्रयोजना भवति । प्रतिष्ठावस्त्रवहनस्य सर्वैरपि कथञ्चित् शक्यत्वेऽपि तत्फलभूतप्रतिष्ठावहनं परं तदुचितज्ञानशक्त्यादिमतामेव भवति—नान्येषामित्यर्थः ।

(13) अत्र गुरुमतप्रक्रिययाऽपि कश्चनार्थबोधः सम्पद्यते । तथा हि प्रमितिः प्रामाण्यं तत्परिष्कृतिः तद्वेदनप्रकारः । तस्य मुद्रा चिह्नम् सहृदयहृदयैः शोभनजलपानादिभिः सुहृष्टहृदयैः कविभिः जलपक्षिभिः समर्पिता सूचिता । हृष्टपुष्टजलपक्षिसञ्चारादिवशात् अयं देशो जलवानिति निरंकुशज्ञानोत्पत्त्या तत्राप्रामा-ण्यशङ्काद्यनुदयेन च तादृशज्ञानेन स्वगतप्रामाण्यमपि गृह्यत एवेत्यर्थः । अतः सुभाषितानां साधुतमव्यव-हाराणां नीवी मूलभूतः प्रामाण्यनिश्चयः ; व्यवहारे व्यवहर्तव्यज्ञानगतप्रामाण्यनिश्चयस्य प्राचीनैः

कारणत्वोपगमात् । अत एव यत्संशयव्यतिरेकनिश्चयावित्यादिना प्रामाण्यनिश्चयस्य प्रवृत्तिहेतुत्वं साधितं **प्रामाण्यवाददीधितौ**। स च **परगुणचोरैः** परः स्वव्यतिरिक्तः गुणः नैयायिकैः प्रामाण्यग्रहणौपयिकतया स्वीकृतो गुणाख्यः विशेषणवद्विशेष्यगतचक्षुरिन्द्रियसन्निकर्षादिः । एवमनुमित्यादिस्थलेऽप्यूह्यम् । तादृशा ये चोराः अन्यग्राह्यत्वेन बोधयन्तः तैः अहार्यार्था अविषयीकार्यप्रमेया भवति। पूर्वोत्पन्नं

ज्ञानं प्रमा, यथावस्थितार्थविषयकत्वात् गुणजन्यत्वात् संवादिप्रवृत्तिजनकत्वादित्यादयोऽनुमितयः प्रामाण्यग्राहिकाः प्राचीनाभिमता इति गुणविषयकज्ञानजन्यत्वात् गुणप्रयोज्यत्वाभिधानं प्रामाण्यनिश्चये यत् नैयायिकानां तत् सर्वथा न सम्भवति किं तु स्वात्मकज्ञानेनैव ग्राह्यं तदित्यर्थः । एवं समासोक्ति-परम्परा तत्प्रयोजनादिकं च सुधीभिः स्वयमूहनीयम् ॥ २ ॥

अत्र श्लोके व्याख्यानान्तरे परिष्कृतेति हृदये इति पटु इति च पाठभेदाः। आचार्यः शिंगभूपालप्रेषितेषु कविषु ग्रन्थमिमं निर्माय अर्थानपि प्रतिबोध्य निचिक्षेप। ते सहृदयस्य-शिंगभूपालस्य हृदये समर्पितवन्तः। एवं प्रथमत एव प्रचारस्य कृततया नेयं कृतिः काव्यार्थ-चोरैर्हार्या भवतीत्याह। शब्दचौर्ये कृते ममेयं कृतिरिति केनचिदुक्ते अर्थं ब्रूहि इति इमे पृष्ट्वा प्रमितार्थाप्रकटनात् नेयं ते कृतिरिति निरूपयेयुरिति भावः । विशिष्य वेदान्तार्थनिरूपणं विना सर्वजनसाधारण्याय कृते ग्रन्थे स्वनाम निर्देष्टुमनिच्छन् आचार्यः अनिर्देशेऽपि बहुभिर्ज्ञातत्वात् देशान्तरं नीताऽपि कृतिर्न परहार्या भवेदिति ज्ञापयतीति ध्येयम् । अन्तिमपद्धतौ द्वादशाधिकं श्लोकद्वयमस्ति। तत्रैकः आचार्यकृतत्वाभिप्रायेण पूर्वैर्व्याख्यातः । पद्धतीनां द्वादशत्वं श्लोकानां चतुश्चत्वारिंशदधिकशतत्वञ्च तत्रादर्शि । श्रीवकुलभूषणसूरिभिरेकैकश्रीमुखसूक्ते एकादश्यां गाथायां गाथादशकमिति निर्देशवत् अधिकश्लोकेन पद्धतिश्लोकसंख्यानिर्देश इति भाव्यम् । तत्रापि न स्वनामनिर्देशः । तदनन्तरश्लोकोऽपि यदि आचार्यकृत एव, तर्हि वेंकटनाथेति वेदान्ताचार्येति नामनिर्देशाभावेऽपि कवित्वख्यापनौपयिकतया कविकथकसिंहेति नाम परं निरदेशि। तस्याप्यसाधारणत्वात् आचार्यकृतत्वप्रमितिर्भवेदेव सर्वेषामिति हृदयम्। श्लोकद्वयं संयोज्य शिंगभूपालसदस्यैः प्रकाशनं कृतमित्यप्युल्लिखेयुः।

व्याख्यान्तरपाठे मुद्रेत्यादिकं नीवीविशेषणमित्येकमेव वाक्यम्। प्रमितिरेव परिष्कृता मुद्रा। प्रकृतव्याख्यायां परिष्कृतीति पाठस्वीकारात् नीवीविशेषणत्वायोगात् वाक्यद्वयं कृत्वा यस्मात् तस्मादित्यध्याहारोऽपि कृतः। प्रमितिः परिष्कृतिर्मुद्रा च भिन्ना। तदनुसारेण ईषदर्थभेदेऽपि भाव एकरूप एव। बहवोऽर्था अत्र प्रदर्श्यन्ते । सुभाषितनीवीति ग्रन्थनाम। नीवी मूलधनं ग्रन्थिर्वा । मूलधनात् धनवृद्धिरिव इतो बहुसुभाषितोत्पत्तिर्भवितुमर्हति । अग्रद्वयपृथक्कारेण ग्रन्थिविस्रंसने गुप्तार्थोपलम्भवत् स्वयमस्याः अनेकार्थगर्भत्वात् एकैकार्थपृथक्कारेणानेकैर्वाक्यै-र्विशदीकरणे बहूनि सुभाषितानि कृतानि भवन्ति। चोरा द्विविधाः, केचित् पूर्णमेव वस्तु मुद्रासहितमेव मुष्णन्ति मुद्रां लोपयन्ति । अन्ये निक्षिप्ते राशौ चौर्यमज्ञातं यथा भवेत् तथा किञ्चिदपेक्षितमपहरेयुः। तत्र मुद्रायां कृतायाम्, अपहारो ज्ञातो भवेदिति न चोरयेयुः। कर्तृ-सविधेऽपि काव्यस्य वर्तमानत्वात् अत्र गुणचोरा एव वक्तव्याः; न पूर्णचोराः । अनेक वेदि तत्त्वाच्च। तेपि न भवन्तीत्युच्यते। पटुगुणचोरैरितिपाठे पटवो ये गुणचोराः सारांशचौर्यपरा इत्यपि विग्रहो भवति। परशब्दस्योत्कृष्टार्थत्वे पटुपरौ समानौ। स्त्रीणां वस्त्रनीव्यपि तन्मेखला-सूत्रादिगुणचौर्यसमर्थैरप्यहार्यः अननुभाव्यः य उत्कृष्टोऽर्थः तदर्था भवति।

இக் காவியத்திற்கு ஸுபாஷிதநீவி என்ற பெயரென்றும் இதன் பொருள்களை கவிஸஹ்ருதயமூலமாக அறியவேண்டுமென்றும் குறிப்பிடுகிருர். உரையில் பல பொருள்கள் கூறப்பட்டன. முதலில் அறியவேண்டுவதொன்று உண்டு. இந்த ஸுபாஷிதநீவியானது சிங்கபூபாலனென்ற பக்தன் வேதாந்தார்த்தங்களையே விசேஷமாகக் கூறுவதென்பதன்றி பொதுவாக சபைகளில் கவிகளும் ஸஹ்ருதயர்களும் ரஸிக்கும்படி ஒரு ஸுபாஷிதக்ரந்தம் அருளிச்செய்து அனுக்ரஹிக்கவேணுமென்று வேண்டி ஆசார்யரின் பெருமையைப் பிறர்க்கும் ப்ரகாசப்படுத்த ஆவல் கொண்டு கவிகளான ஸ்ரீவைஷ்ணவர்கள் பலர் தன் ஸபையிலிருப்போரை அனுப்பினுன்—அப்போது இந்த க்ரந்தத்தையருளி இதன் பொருள் அறியும் வகைகளையும் கவிகளுக்குக் கூறினுர். இவர்கள்மூலம் சிங்கபூபாலன் அறிந்து பல ஸஹ்ருதயர்களுக்கு வெளியிட அது அனுகூலமாயிற்று. இப்படி வரும் நிலையை இங்கே தெரிவிக்கிருர். இந்த க்ரந்தத்தின் பொருள் அறிவும் அதனைப் பிறர்க்குத் தெளிவாகப் பரிஷ்கரித்து விரித்துரைக்க வேண்டும் முறையும் வ்யவஸ்த்தைப் படுத்தப்பட்டது. (கடைசி ச்லோகத்தில் 12 பத்ததிகள் 144 ச்லோகங்களென்று எண்ணிக்கையும் செய்யப்பட்டிருக்கிறது.) இதனைக் கவிகள் நேரில் கொண்டனர். இவர்கள் ஸஹ்ருதயனுய் ரஸிகசிகாமணியான சிங்கபூபாலனின் ஹ்ருதயத்தோடு ஹ்ருதயமாயிருப்பவர்கள். அவனது ஹ்ருதயத்திலே இதை அவர்கள் ஸமர்ப்பிக்க ஏற்பாடு ஆய்விட்டது. இனி இதன் பொருளைத் திருடர்கள் கொள்ள முடியாது. சொற்களைத் தங்களுடையனவாக அவர்கள் சொன்னுல் பொருளைச் சொல் என்று கேட்கவேண்டும். நாம் தெரிவித்தபடி அவர்கள் சொல்லவல்லாரல்லர். அதனுல் பொருள் தெரியவில்லையாகையாலே பிறர் சொல்லைத் திருடினுர்களென்பது தெளிவாகும். திருடின வஸ்துவிலுள்ள சிற்சில ரஹஸ்யங்களை சொத்துக்காரர்களே அறிய முடியும். (ஆகையால் வேங்கடேசன் வேதாந்தாசார்யன் என்ற பெயரை இங்கே தெளிவாகக் கூருமலிருப்பினும் கவிகளும் ஸஹ்ருதயர்களும் நன்கு அறிந்த பிறகு யார் கொள்ளை கொள்ளமுடியும்? இந்தக் காலத்திற் போலே அச்சிட்டு ப்ரகாசப்படுத்த முடியாதாகையால் ஒருவர் க்ரந்தத்தினின்று மற்றெருவர் சில அம்சங்களையோ முழுக்ரந்தத்தையோ எளிதில் கொள்ளை கொள்ள முடியும். அதனுல் இவ்வாறு அருளினது.)

2. ப்ரமிதிபரிஷ்க்ருதி[த] முத்ரா
ஸஹ்ருதயஹ்ருதயை:(யே)ஸமர்ப்பிதா கவிபி: ।
பவதி ஸுபாஷிதநீவீ
பர(படு)குணசோரைரஹார்யார்த்தா.

இனி இந்த ச்லோகத்தின் பொருள்கள் சுருக்கமாக—

1 ஸுபாஷிதநீவியைச் செய்வதில் ஹ்ருதயம் வைத்த கவியோடு ஒத்த ஹ்ருதயம்வாய்ந்த பல கவிகளால் இதன் பொருள் முதலியவற்றின் அறிவின் வகையும் அதனை விரித்து உரைக்கும் வகையும் பலருக்கு அறிவிக்கப்படுகிறது. அதனால் சொற்பொருள்களைத் திருடுகின்றவர்கள் கொள்ளைகொண்டு இதை நமதன்றென்ன வொண்ணாது. (முத்ரையாவது வகை.)

2 நீவி. பணப்பை, அதனிலுள்ள பணத்தின் எண்ணிக்கையும் அதன் மேல் பல கட்டுகளும் பிறர் செய்யவாகாதபடி பெயர் கொண்ட முத்ரையும் சொத்துக்காரனின் ஹ்ருதயத்திற்கு இணங்கிய ஸமர்த்தர்களாலே செய்யப்பட்டிருக்க, கட்டுகளை அவிழ்க்கும் கள்ளர் அவிழ்க்க வாகாதபடி முத்ரையிருப்பதால் பணம் பறிக்கும்படி யாகாது. பொய்க் கணக்கு எழுதித் திருடுகிற வேலைக்காரர்கூட கொள்ளவாகாது.

3 ஆசார்யன் ஹ்ருதயத்திற்கிணங்கிய சிஷ்யர்கள் க்ரந்தத்தின் பொருளையும் அதன் ஆராய்ச்சியையும் அயோக்யர்களுக்குத் தெரியாதபடி முத்ரையிட்டிருப்பதால் பிறர்க்குச் சொல்வதில்லை யென்று ஸங்கற்பித்திருப்பதால் பிறர் கொள்ள வழியில்லை.

4 பாஷ்யம் முதலிய ஸுபாஷிதங்களுக்கு மூலதனமான ப்ரஹ்ம ஸூத்ரம் முதலியன, ப்ரஹ்மஜ்ஞானிகளாய், எல்லோருக்கும் ஸுஹ்ருத்தான எம்பெருமானிடம் ஹ்ருதயம் செலுத்தியவர்களால் ரக்ஷிக்கப்படுவதால் பிறர் கொள்ளவியலார்.

5 உலகைக் காக்கும் ஹ்ருதயமுடைய கவிதார்க்கிகசிங்கங்களாலே வேதாந்தசாஸ்த்ரத்திற்கு அறிவும் யுக்தி பரிஷ்காரங்களும் செய்யப்பட்டிருப்பதால் பரமாத்மாவின் குணங்களைக் கொள்ளைகொள்கிற (இல்லை யென்கிற) அத்வைதிகளாலே இதன் பொருள் மறுக்கப்படமாட்டா.

अन्योऽप्यर्थो भवति । निष्क्रष्टुं कश्चिदन्यः प्रभवति भगवल्लक्ष्मणाचार्यमुद्राम् इत्युक्ता भगवद्रामानुजकृता मुद्रा कवितार्किकसिंहैराचार्यैः सहृदयज्ञेयतया तत्त्वमुक्ताकलापादिभिः समर्पिता । अतो मतान्तरवासनावासिततया तत्र गुणग्राहिभिरेतदर्थलोपः कर्तुं न पार्यत इति ।

6 காதிநவ, டாதிநவ, பாதிபஞ்ச, யாத்யஷ்டௌ என்கிற எண்ணிக்கை யொன்று உண்டு. எண்ணிக்கையை ஒன்று பத்து நூறு என்றபடி திருப்பி இடது பக்கம் கொண்டு போவது வழக்கம். அதனை விட்டு ஸஹ்ருதயமாக நேராகவே நோக்கினால் கவிபி: என்ற क. व. भ. எழுத்துக்களால் 144க்கு ப்ரமிதி—அறிவு ஏற்படும். பரி என்றால் 12ஆம். 12ல் 144ஐ வகுக்க 12பத்ததியாகும், இவ் எண்ணிக்கையுள்ளது ஸுபாஷித நீவி ஆக पर என்னப்படும் 12ல் குண பெருக்க வேண்டும்படி चोर மறைந்திருக்கும் 144லுடன் अहार्य மீண்டும் வகுத்துக் கொண்டு வர வேண்டிய அவசியமில்லை (ஹரணமாவது கழித்தல் என்னலாம். 144

எண்ணிக்கையிருப்பதால் குறைக்கப்படமாட்டாது எனவாம்.) உத்த ரார்த்தத்திற்கு (பின்னடிக்கு) வேறு பொருளும் ஆம். குணநம்— பெருக்கல் ஹரணம்—வகுத்தல், பன்னிரண்டால் பெருக்குவதை வேண்டாமென்கிறவர்களாலே இது வகுக்கப்பட வாகாது. (அதாவது 12க்குக் குறைவில்லை. முடிவில் ஒன்றிரண்டு ச்லோகம் இருக்கலாம். ஆகையால் வகுத்துப் பங்கிட வேண்டா என்றவாறு.) ஸமர்ப்பிதா ஸம் என்ற எண்ணிக்கை யளிக்கப்படும். ஸ. 7. ஸுகுணபத்ததிகள். ம. 5 துர்குணபத்ததிகள். (பெருக்கப்பட்டால் வகுக்கவும் படும்.) सुभाषितनीवी. सुभा 47; षित 66; न என்றது எண்ணிக்கையில் சேர்ந்த தில்லை. அதை விட்டு वी. 4, சேர்க்க மொத்தம் 144 ஆம். பரகுணங்கள். பரமாத்மகுணங்கள் ஆறு. பஞ்சகம் பார்க்கும்போது ஷட்சோர: என்பர். ஆகையால் चो ம் 6. ஆறும் ஆறும் 12. இப்படி 144 12 உடன் கூடும். பன்னிரண்டு பத்ததியாகும். अहार्यार्था. (கஷ்டம் இவ்வளவு செய்தாலும் பிறரால் கொள்ளப்பட வேண்டும் பொருள் உடையதாகிறது. பொருட் கொள்ளை விலக்க முடியாது.) 12 பத்ததிகளால் அடையப்படும்பொருள் உடையது. அல்லது 12 பத்ததிகளுடன் அஹார்ய—அழிக்கப்படாத 12 பொருளும் உடையது.

7 நீவி-சிறை. கள்ளர்கள்விஷயமானகவனம், கதவுபூட்டு எல்லா முள்ள சிறையிருந்தால் கள்ளரால் பணம் பறிக்கப்படமாட்டாது.

8 நன்மனமுடைய ஞானிகளால் அறிவளிப்புடன் வேஷத்தைத் திருத்துவதுடன் சங்கசக்ரமுத்ரையும் உடலில் இடப்பெற்ற ஜீவன் நல்ல பேசுச்சும் படிப்பும் காமக்ரோதிகளாகிற சத்ருவான குணங்க ளாகிற திருடர்கள் பறிக்கவாகாத சிறந்த பொருளும் உடையனாய் ஸ்த்ரீ போல் பகவானுக்கு அதீனனாவான்.

9 சைவாகமத்தில் சொல்லப்பட்ட ஆறு முத்ரைகளில் முஸலி முத்ரை ஒன்று உண்டு. அம் முத்ரையிட்டவனிடம் திருடன் அண்டமாட் டான் என்றதும் இங்கே தோன்றும்.

10 ஸ்த்ரீகளின் புடவைமுடிப்பு இடுப்பிலிருப்பது பெரியோர்கள் சொல்லுகிறபடி நன்கு அமைக்கப்பட்டால், பிறருக்கு (பதிகளுக்கு) குண மாய் பவ்யப்பட்டிருக்கும் தாரங்களைத் தங்களுக்காகக் களவு கொள்ளும் துஷ்டர்கள் அவிழ்க்கவாகாது.

11 ஸுபாஷிதங்களுக்கு மூலதனமான வித்யையானது (பெரி யோர்கள் மூலம் தெளிவாக ஏற்பட்டிருந்தால்) பிறராலே குதர்க்கங் களாலே கொள்ளை கொள்ளப்படமாட்டாது.

12 பண்டிதன் என்கிற புகழுக்குக் காரணமான தோடா சால்வை முதலான முத்ரையுண்டு. ஆனால் வேஷம் போடும் கள்ளர்களாலே பலன் (ஸம்பாவனை) பறிக்கப்படமாட்டாது.

13 இனி குரு(மீமாம்ஸக)மதத்தைத் தழுவி ஒரு பொருள்—ஜ்ஞானம் உண்டானால் இது சரியான ஞானமென்று அதன் ப்ராமாண்யம் எப்படியறியப்படுகிறது என்பதை விசாரிக்கும்போது, ஓர் உதாரணம் கொடுப்பர். அதாவது தூரத்தினின்று வரும் கவிகளை(கம்-ஜலம்-வி-பக்ஷி) நீராடி வரும் பக்ஷிகளைக் கண்டு, இவை எங்கிருந்து வருகிறனவோ அந்த இடம் தண்ணீருள்ளதென்ற அறிவு உண்டாகிறது, இது சரியா (ப்ரமாணமா) அன்று என்று விசாரித்து, அந்தந்த ஜ்ஞானத்திற்கு காரணமான பரத்யக்ஷப்ரமாணமோ அனுமானப்ரமாணமோ சப்த ப்ரமாணமோ எதுவும் குணமுள்ளது ஒழுங்கானது என்று அறிந்தால் அறிவும் ப்ரமாண மென்றறியலாமென்பர் தார்க்கிகர். இப்படி குணமே, தீர்மானிக்கும் ஸாமர்த்தியத்தைக் கொள்ளைகொள்கிறதென்றதை ப்ராபாகரரும், வேதாந்திகளும் இசையமாட்டார்கள். அறிவு வரும்போதே ப்ரமாணமாகவே சரியென்றே உணரப்படுவதால் முதலில் ப்ராமாண் ஜ்ஞானத்திற்கு காரணங்களின் குணவிசாரம் வேண்டா என்பர். ஆக—ஸுபாஷிதங்களுக்கு காரணமான ப்ராமாண்யமுத்ரை பக்ஷிஸஞ்சாராதிகளால் வரும் ஜ்ஞானத்திலேயிருப்பது। குணங்களென்ற வேறு திருடர் சாதிக்கப்படுவதில்லையென்று பொருளாம்.

पश्यति परेषु दोषानसतोऽपि जनः सतोऽपि नैव गुणान् ।
विपरीतमिदं स्वस्मिन् महिमा मोहाञ्जनस्यैषः ॥ २ ॥

एवं स्वग्रन्थस्य विषयप्रयोजनादिकं प्रकाश्य इदानीं सदसद्विवेकलेशविधुरतया स्वतः समुन्मिषितमोहमषीविषीददन्तःकरणानां यथाजाततया स्थितानामनिपुणजनतानां अविवेकमूलभ्रमपरम्परां प्रस्तौति **पश्यतीति । जनः** जन्मवान् सर्वोऽपि । अनेन जातमात्रस्यैव एष स्वभावो दुरतिक्रम इति सूचितम् । **परेषु** स्वव्यतिरिक्तेषु जनेषु **असतोऽपि** अविद्यमानानपि **दोषान्** दुर्गुणान् **पश्यति** सत्त्वेन जानाति । **सतोऽपि** विद्यमानानपि **गुणान्** सद्गुणान् **नैव पश्यति** सत्त्वेन न जानात्येव । उदासीनतादशायां कदाचित् दोषदर्शनासम्भवेऽपि गुणादर्शनमात्रं सार्वदिकमित्येवकाराभिप्रायः । **स्वस्मिन् इदं** दर्शनमदर्शनं च **विपरीतं** भवति । विद्यमानानपि दोषान् न पश्यति । अविद्यमानानपि गुणान् पश्यतीत्यर्थः । **एषः** सद्दर्शनमसद्दर्शनं च । विधेयप्राधान्यात् पुंलिङ्गता । 'शैत्यं हि यत् सा प्रकृतिर्जलस्य' इतिवत् । **मोहाञ्जनस्य** अविवेकरूपस्य सिद्धाञ्जनस्य **महिमा** प्रभावः । तज्जन्यमिति यावत् । आयुर्घृतमितिवत् कार्यकारणयोरभेदोपचारः । 'हेतुहेतुमतोरैक्यं हेतुं केचित् प्रचक्षते' इत्यलङ्कारो वा । सामान्यतस्त्वविवेकजनः परेषु दोषानेव पश्यति, आत्मनि तु गुणानेव पश्यतीत्यौत्सर्गिकोऽयमविद्यामूलिका भ्रमपरम्परा जननशालिनामखिलानाम् , यथा मण्डूकवसाञ्जनाक्तदृष्टेः वंशे अविद्यमानमपि भुजङ्गत्वं साक्षात् क्रियते विद्यमानमपि वंशत्वं न गृह्यते तद्वदिति भावः ।

केचित्तु परेषु अविद्यमानानपि दोषान् आरोपयति विद्यमानानपि गुणान् छादयति। स्वस्मिंश्चासतोऽपि गुणान् आरोपयति सतोऽपि दोषानपह्नुत इति व्याचख्युः सङ्कल्पसूर्योदये। तेषां जनशब्दमोहाञ्जनशब्दयोःस्वारस्यभङ्गः प्रसज्यते। तथाविधारोपणाच्छादनादेरसूयाकार्यत्वेन मोहकार्यत्वाभावात्। जनसामान्यस्य उत्सर्गतस्तादृशासूयाद्यसम्भवाच्च। दुर्जना एव हि केचित् 'दह्यमानाः सुतीव्रेण नीचाः परयशोऽग्निना। अशक्तास्तत्पदं गन्तुं ततो निन्दां प्रकुर्वते' इति परेष्वविद्यमानत्वेन गृहीतानपि दोषान् विद्यमानतयोद्घाटयन्तीति न तेषां मोहप्रसक्तिः। अत्र त्वविद्याचक्रे परिवर्तमानानां सम्यग्विवेकाकरणप्रयुक्तमन्यथाज्ञानमेवोच्यत इति सामान्यनिर्देशस्वारस्यादवगम्यते। औत्तरपद्धतिष्वेव तादृशदुर्जना निरूपयिष्यन्त इति विवेकः।

(2) एवं परकीयानुमानादौ हेत्वाभासान् पश्यति व्याप्त्यादिगुणान् न पश्यतीत्यप्यर्थो बोद्धव्यः।

अत्रासतोऽपि पश्यति सतोऽपि न पश्यतीत्युक्त्या सत्त्वासत्त्वरूपकारणविरहेऽपि दर्शनादर्शनरूपकार्योत्पत्तिकथनात् विभावनालङ्कारः। 'विभावना विनाऽपि स्यात् कारणं कार्यजन्म चेत्' इति लक्षणात्। 'कार्याजनिर्विशेषोक्तिः सति पुष्कलकारणे' इत्युक्ता विशेषोक्तिर्वा द्वितीयपादे द्रष्टव्या। मोहाञ्जनरूपदोषहेतुकत्वात् तत्परिहारः।

(3) अत्र चाञ्जनपदस्य सम्बन्धमात्रार्थकतामाश्रित्य भ्रमसम्बन्धात् परेषु दूरस्थेषु। परश्श्रेष्ठादिदूरान्योत्तर इति मेदिनी असतोऽपि स्थाणुत्वादीन् पश्यति सतोऽपि पुरुषत्वादीन्न पश्यतीत्यर्थोऽप्यवसेयः।

(4) अथ वा परेषु असतोऽपि दोषान् **पश्यति** अन्वेषयति। समुद्रे मौक्तिकं पश्यति, नगरे गृहं पश्यतीत्यादौ तथाऽर्थावगमात्। सतोऽपि गुणान् **न पश्यति** उपेक्षते। स्वस्मिंस्तु तद्विपरीतं पश्यतीत्यर्थ इति। अयमपि स्वाभाविकाकार एवाविवेकिनामिति पद्धतिसङ्गतिः सुलभैव।

(5) अत्र दोषगुणशब्दस्वारस्यादन्योऽपि विरुद्धार्थो ध्वन्यते। तथा हि—दोषा नाम भ्रमजनकाः पित्तादयः। गुणाश्च प्रमाजनका इन्द्रियसन्निकर्षादयः। तत्र भ्रमस्थले दोषाणां सत्त्वं गुणानामसत्त्वं चावश्यकम्। एवं पित्तादिदोषाणामदृश्यत्वं सन्निकर्षादीनां दृश्यत्वं च लोकसंप्रतिपन्नम्। तदुभयमप्यस्मिन् मोहविशेषे विपरीतं भवतीत्यर्थः; यद्वा इदं असद्दर्शनादिकं स्वस्मिन् विपरीतं विरुद्धफलप्रदं उत्पातत्वेन भयावहत्वादिति भावः। विलक्षणमेतत् मोहसामर्थ्यमिति निर्गलितार्थः।

(6) अन्योऽप्यत्रैतादृशोऽर्थः। **अमोहाञ्जनस्य** अमायां अमावास्यारात्रौ ऊहः पदार्थविवेचनं येन तथोक्तमुलूकवसाञ्जनादि तस्यैष महिमा। किं तत्। **परेषु** परपक्षेषु; कृष्णपक्षेष्वित्यर्थः। **दोषा** रात्रिषु। दोषापदस्याव्ययत्वात् सप्तम्यर्थविवक्षा। **न सतः** अतिसूक्ष्मतया विद्यमानानपि पदार्थान् पुस्तकाक्षरादिकानित्यर्थः। अनुदरा कन्येतिवत् सूक्ष्मार्थे नकारः। कृष्णपक्षरात्रिषु अतिसूक्ष्माक्षरादिपदार्थानपि पश्यतीत्यर्थः। तदुक्तं दत्तात्रेयतन्त्रे विद्यासंग्रहे 'उलूकस्य कपालेन घृतेनाहृतकज्जलम्। तेन नेत्राञ्जनं कृत्वा रात्रौ पठति पुस्तकम्' इति। **गुणान्** गुण्यन्त इति व्युत्पत्त्या अतिमात्रं वर्धमानानपीत्यर्थः। **सतः** नक्षत्राणि न पश्यति। तेजोदर्शनासामर्थ्यादिति भावः। **इदं विपरीतं** एतादृशविरुद्धदर्शनं उक्तोलूकवसाञ्जनस्य स्वस्मिन् **महिमा** तत्प्रयोगजनितः प्रभाव इत्यर्थः।

(4) एवं 'क्षुद्रक्षोणिरजःकणस्थिरतृषः क्षुभ्यन्ति पृथ्वीभृतः' इत्युक्तरीत्या राज्यलोभेन मोमुह्यमानानां सर्वदा स्वमत(बल?)प्राबल्यं परमत(बल ?)दौर्बल्यं चैव चिन्तयतां क्षत्रियकिशोराणां स्वप्राणनाशमप्यविगणय्य युद्धोत्साहोऽपि मोहकार्य एवेति तादृशमोहस्वरूपमपि निरूप्यते। तथा हि--**जनः** क्षत्रियादिः **परेषुदोषान्** परेषूणां—शत्रुबाणानां दोषाः—अपराधाः, लक्ष्यभ्रंशादय इत्यर्थः, तान् **पश्यति** चिन्तयति। **सतोऽपि** समीचीनानपि तेषां **गुणान्** मौर्वीबन्धादीन् **न पश्यति** न गणयति। स्वस्मिन्निदं विपरीतं पश्यति(भवति ?)। स्वबाणस्य लक्ष्यभ्रंशं न पश्यति। स्वमौर्वीदृढबन्धं पश्यति। राज्यलोभात् 'परबाणा अपराद्धा भवेयुः ; स्वबाणा एव लक्ष्यं विध्येयुः। परेषां मौर्वीबन्धः श्लथो भवेत् ; स्वस्यैव स दृढो भवेत्' इति दृढनिश्चयेनैव युद्धे प्रवर्तन्त इति किमिदं मोहाञ्जनसामर्थ्यमित्यर्थः। यद्वा **महिर्भूमिः** मा संपत् तस्यां **मोहः** अतिशयितौत्सुक्यम्, कामिनीमोह इतिवत्। तस्य **अञ्जनं** संबन्धः तस्य **एषः** पूर्वोक्तः व्यापार इत्यध्याहारेण योजना। चैत्रस्येदमित्यादिवत् अनध्याहारेण वा।

(5) एवमद्वैतिमतप्रक्रियाऽपि अत्र स्फुरति। तथा हि—**जनः** तदीयः **परेषु** उत्कृष्टवस्तुष्वपि **दोषान्** मायाविद्यादिदोषान् असतोऽपि पश्यति। सामान्योक्तिमहिम्ना बहुवचनम्। यद्वा पूजायां बहुवचनम्; महत्स्वपि दोषान् आरोपयन्तीति निन्दाद्योतकम्। अथ वा परब्रह्मणोऽनन्तजीवभावेन विवर्तनात् तदभिप्रायकं वा तत्। तथा च परे ब्रह्मणि वस्तुतोऽविद्यमानानप्यविद्यादिदोषान् विद्यमानतया स्थापयति। 'परं ब्रह्मैवाज्ञं भ्रमपरिगतं संसरति तत्' इत्युक्तेः। एवं **गुणान्** ज्ञानशक्त्यादिकल्याणगुणान् **सतोऽपि** वस्तुतो विद्यमानानपि **नैव पश्यति** अविद्यमानतया स्थापयति। दोषहानिश्च कदाचित् सम्भवेत्; गुणप्राप्तिस्तु न कदाऽपीत्येवकाराभिप्रायः। **स्वस्मिन्** जीवात्मनि तु विद्यमानानपि **दोषान्** 'कर्माविद्यादिचक्रे प्रतिपुरुषमिहानादिचित्रप्रवाहे' इत्युक्तरीत्या प्रतिपुरुषं स्थितानप्यविद्यादिदोषान् **न पश्यति** न स्वीकरोति। अविद्यमानानपि गुणान् परब्रह्मतादात्म्यान्तःकरणाद्युपादानत्वाविद्याप्रतिबिम्बितत्वादिरूपान् धर्मान् कल्पयति। एतच्च **मोहाञ्जनस्य** श्रुतिवाक्यार्थान्यथाप्रतिपत्तिरूपस्य **महिमा** सामर्थ्यमित्यर्थः। अत्र **विपरीत**पदप्रयोगात् 'सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी' इति भगवद्गीतोक्ततामसबुद्धिकार्यत्वमेतादृशमोहस्येति ध्वन्यते। उक्तं च महामोहस्य तामसबुद्धिकार्यत्वं सङ्कल्पसूर्योदये—"त्रिगुणघटितात् भोक्तुर्बुद्धिः सती तदनुन्नता समयनियतोच्छ्रायं त्रेधा कुलं समजीजनत्" इति। एवंविधमोहाञ्जनभञ्जन एव 'निरञ्जनः परमं साम्यमुपैति' इत्युक्तपरमसाम्यापत्तिर्भविष्यतीत्यञ्जनशब्दरञ्जनजनिता व्यञ्जना बोद्धव्या। उक्तार्थानां पद्धतिसङ्गतिरनिपुणभावेन विभावनीया।

तदेवं सर्वार्थानामपि प्रस्तुतत्वात् 'प्रस्तुतेन प्रस्तुतस्य द्योतनं प्रस्तुतांकुरः' इत्युक्तः प्रस्तुतांकुरालङ्कारः सङ्कीर्यते पूर्वोक्तविभावनाविशेषोक्तिभ्यामिति विशेषोऽवसेयः॥ ३॥

3 ग्रन्थस्य स्वकीयत्वं परिहार्यत्वञ्च प्रमितिपरिष्कृतिमुद्रयेत्युक्तम् । अस्य ग्रन्थस्य स्वकीयग्रन्थान्तरगतानेकश्लोकवत्त्वमपि स्वकीयत्वे एका मुद्रा भवतीत्याशयेनैव तादृशमेव श्लोकं समनन्तरमारभते पश्यतीति । अयं श्लोकः, ग्रन्थान्ते द्वादशः श्लोकश्च संकल्पसूर्योदयेऽपि प्रथमेऽङ्के । एवं मध्येऽप्यनेके स्वग्रन्थान्तरगता एव द्रष्टव्याः ।

अयं श्लोकार्थः—मोहस्याविवेकस्य विद्यमानार्थदर्शकत्वं न भवति, मोहत्वात् । अतः सद्दर्शनानुपयोगिनः सद्दर्शनविरोधिनोऽस्यासद्दर्शकत्वे परत्रेव स्वस्मिन्नपि असद्दोषदर्शकत्वमस्तु। स्वस्मिन्निव परत्राप्यसद्गुणदर्शकत्वञ्चास्तु। अत्र वैषम्यमाश्चर्यमिति। अत्र सतोऽपि न पश्यतीत्यस्य सतोऽपि असत्त्वेन पश्यतीत्यर्थे पर्यवसानमपि भवितुमर्हति। एकमञ्जनमसद्दर्शकम्, अन्यत् सत्तिरोधायकम्, अपरं गूढस्य दर्शकम्। इदं तु सर्वविधम्, ततोऽप्यधिककार्यकरञ्चेति भावः।

பச்யதி பரேஷு தோஷாந் அஸதோऽபி ஜந: ஸதோऽபி நைவ குணாந்.
விபரீதமிதம் ஸ்வஸ்மிந் மஹிமா மோஹாஞ்ஜநஸ்யைஷ:.

பெரும்பாலும் மனிதன் பிறரிடத்தில் இல்லாத துர்குணங்களையும் இருப்பதாகக் காண்கிறன். நற்குணங்களை இருப்பவற்றையும் காண் கிறதில்லை. இது தன்னிடத்தில் மாறுபடுகிறது (அதாவது—இல்லாத குணங்களை இருப்பதாகக் காண்கிறன். இருக்கும் தோஷங்களைக் காண் கிறதில்லை.) மோகமென்கிற மை ஒவ்வோரிடத்தில் ஒவ்வொரு விதமாக வேலை செய்வது விசித்ரசக்தி. இங்கு, 'இருக்கும் குணங்களைக் காண்ப தில்லை' என்பதற்கு இருப்பவற்றை இல்லையென்கிறனென்பதிலே நோக்கு என்னலாம். பிறரிடத்தில் தோஷங்களை பச்யதி—ஆராய்கிறன். எப்படி எப்படி சொல்லலாமென்று விசாரிக்கிறன் எனவும் பொருளாம்.

பரேஷு—வெகு தூரத்திலுள்ள வஸ்துக்களில் இல்லாததைக் காண் கிறன், இருப்பதைக் காண்பதில்லை எனவுமாம்.

1 (பொதுவாகச் சொன்ன இந்தப் பொருளைப் பல உதாரணங்களைக் கொண்டு விளக்கலாம். அத்தகைய சில உதாரணங்களும் ச்லோகத்திற்கு நேர்ப் பொருளாகின்றன. எவ்வாறெனில்—)

2 உலகில் அறிவென்பது ப்ரமாணங்களைக் கொண்டு பெறப்படும். அவை ப்ரத்யக்ஷம் அனுமானம் சப்தம் என்பனவாம். அந்த ப்ரமாணங் களில் தோஷம் கலந்தால் விபரீத ஜ்ஞானம் பிறக்கும். குணமுள்ள போது நல்லறிவு, ஆக விபரீத புத்தியின் காரணத்திற்கு தோஷமென்றும், நல்லறி வின் காரணத்திற்கு குணமென்றும் பெயராம். ஜனங்கள் பிறரிடம் தோஷத்தைக் காண்கிறர்கள். குணத்தைக் காண்பதில்லை. அதனல் எல்லாரையும் ப்ராந்தர்களாக நினைக்கிறர்கள். தங்களிடத்திலே இதற்கு நேர்மாறு. சில தோஷங்கள் காணப்படா, குணங்கள் காணப்படும். அப்படி யிருந்தும் பிறரிடத்தில் மறுப்பது வியப்பே, ஒருவன் தன் கண்ணில் தோஷமிருக்க தோஷமில்லையென்று ஆக்ரஹப்பட்டால் அதனல் அவனுக்கே விபரீதம்—அதாவது ஆபத்து.

3 மோஹாஞ்சனமொன்று அமோஹாஞ்சனமாகிறது. அதாவது அமா—அமாவாஸ்யை. அதில் ஊஹம், வஸ்துக்களை கவனிக்கும் திறம். அதற்கானது அஞ்சனம். அது கோட்டானுடலினின்று செய்யப்பட்ட ஒருவகை மை. பரேஷு—க்ருஷ்ணபக்ஷங்களிலே தோஷா—இரவில் நஸத: அபி. இல்லையென்னலாம் போன்ற ஸூக்ஷ்மவஸ்துக்களையும் அதனால் காண்கிறான். குணாந்—நன்றாக விருத்தியடைந்த ஸத:—நக்ஷத்ரங்களையும் காண்பதில்லை. கோட்டானுக்குப் போல் அதன் மை யணிந்தவனுக்கும் ஒளியுள்ள வஸ்து காணப்படாது.

4 க்ஷத்ரியன் பர-இஷு-தோஷாந் பகைவரின் அம்புகளின் தவறுதல்களை யாராய்கிறான். நன்றாக இருக்கும் குணாந் நாண்முதலானவற்றை கவனிப்பதில்லை. தன்னை நேர்விபரீதமாக நன்கு அம்பு செலுத்துகின்றவனை நினைக்கிறான். இதற்குக் காரணம் மஹிமாமோஹாஞ்ஜநம். அதாவது. மஹி-பூமி அதன் மா-ஸம்பத்து. அது விஷயமான மோஹத்தினால் நீக்கலாகாதபடி பூசப்பட்டிருக்கை

5 அத்வைதமதத்தைத் தழுவியொரு பொருள்-பரேஷு-பரமாத்மாவினிடம் மாயை அவித்யை முதலான தோஷங்களைக் கொள்கிறார். ஜ்ஞானம் சக்தி முதலான குணங்கள் சாச்வதமாயிருக்க அவ்வாறு ஸத்யமாகக் கொள்வதில்லை. தன்னிடத்தில் இது விபரீதம். தோஷங்களில்லையென்றும் ப்ரஹ்மைக்யம் முதலான குணங்கள் இருப்பதாகவும் காண்கிறார் அத்வைதிமதத்தினர். பரேஷு என்ற பன்மை கௌரவத்தைக் காட்டும். பலதோற்றங்களுக்கு மூலஸ்த்தானமாயிருப்பதெனவும் குறிக்கும். शुक्तिरज्ज्वादिबहुप्रातिभासिकाधिष्ठानानामपि संग्रहेण वा बहुवचनम्। (3.)

यत्र पयःप्रभृति स्वं भुक्त्वा सत्यानुष(र)क्तधीश्चोरः।
पशुवृत्तिगणे तस्मिन्नपि नाम यशो दया वृत्तम् ॥ ४ ॥

अत्र पूर्वश्लोकोक्तभ्रमपरम्परानिदानभूताविवेकार्ये धर्माधर्मविवेकवैधुर्यमुदीर्यते **यत्रे**ति। **पशूनां** चतुष्पाज्जन्तूनां वृत्तिरिव वृत्तिर्येषां ते **पशुवृत्तयः** आहारनिद्रादिमात्ररताः तेषां **गणः** संघः तस्मिन्। घटकत्वं सप्तम्यर्थः। तदन्तर्गतः **कश्चि**दित्यध्याहारेण योजना। तथा च यादृशयथाजातगणान्तर्गतः कश्चित् पुरुष इति यावत्। कश्चिदिति सर्वोपलक्षणार्थम्; न त्वेकमात्रविश्रान्तम्। **पयःप्रभृति** क्षीरादिरूपं **स्वं** धनं, भोग्यजातमित्यर्थः, **भुक्त्वा** परगृहे स्वमित्रबन्ध्वादिगृहे वा भक्षयित्वा तत्रैव **असत्यानुषक्तधीः चोरश्च भवति** अनृतवदनेन कुटुम्बकलहादिकं करोति; कस्यचिदपहारं च करोति। यद्वा **चोरोऽसत्यानुषक्तधीश्च** भवति प्रथमं चौर्यं विधाय न किञ्चिदज्ञासिषमित्यपलपति। 'स्तेयानृता वाक्परुषाश्च नित्यम्' इत्यादि प्रमाणमत्र प्रत्यभिज्ञापितम्। अथ वा **सत्यानुषक्तधीरि**ति च्छेदः। सत्यं शपथः तत्सक्तबुद्धिर्भवति। चौर्यं कृत्वा, न किञ्चिदपि जानामीति प्रमाणकरणे उद्युक्तो भवतीत्यर्थः। 'सत्यं

शपथतथ्ययोः' इत्यमरः । धर्माधर्मविवेकवैधुर्यादन्नदातृगृह एव पाटच्चरवृत्तिमाचरतीति यावत् । 'अन्नदाता भयत्राता' इत्यारभ्य 'एते सर्वे वन्दनीयाः पूज्या भक्त्या च सादरम् । एतेभ्यो नापकुर्वीत नावमन्येत कदाचन' इत्यन्तवचनजातमत्रानुसार्यम् । अत्र च क्षीरपानदातृगृहे स्तेयं न कार्यमिति लोकप्रसिद्धिरपि द्योतिता । श्रूयते हि कथाऽपि तथाविधा—काचन गृहिणी स्वगृहे रात्रौ प्रविश्य सर्वं हृतवते कस्मैचिच्चोराय कथञ्चित् सामवचनादिपूर्वकं क्षीरं दत्त्वा तं पाययामास । स च क्षीरपानसमनन्तरमेव जातविवेकश्चौर्यं परिहार्य(हृत्य ?)पूर्वापहृतं सर्वमपि तस्यै प्रत्यार्पिपदिति । **तस्मिन्** पशुवृत्तिगणे तादृशाविवेकिसङ्घे **यशोदयावृत्तम्** । यशश्च दया च यशोदये तयोर्वृत्तमिति वा, यशश्च दया च वृत्तं चेति समाहारो वा—विभिन्नपदत्रयं वाऽत्र बोद्धव्यम् । **अपि नाम** अस्ति किमित्यर्थः । **अपिनामौ** गर्हार्थिकौ । 'गर्हासमुच्चयप्रश्नशङ्कासम्भावनास्वपि ।' **नाम** प्रकाश्यसम्भाव्यक्रोधोपगमकुत्सने' इत्यमरः । भुक्तगृह एव चौर्यादिलालसस्य किं वा यशः का दयेत्यर्थः । **वृत्तशब्दो** वृत्तान्तपरः । तद्वार्ताया एवानवकाश इत्यर्थः । पूर्वश्लोके भ्रमपरम्परा प्रस्तुता, अत्र मूढपरम्परा प्रस्तूयत इति सङ्गतिर्बोद्धव्या । यद्वा पूर्वत्रान्यथाप्रतिपत्तिः, अत्राप्रतिपत्तिरिति विशेषः । द्वयोरविवेकमूलकत्वाविशेषात् पद्धतिसङ्गतिः ।

(2) एवं मूढान्तरविषयकोऽपि एतादृशोऽर्थः। यत्र मूढगोष्ठ्यामन्तर्भूतः कश्चित् **स्वं** स्वीयं **पयः प्रभृति** तीर्थप्रमुखं सर्वमपि **भुक्त्वाऽपि** पानीयप्रभृति सर्वं परकीयानुपजीवनेनैवाभ्यवहरन्नपीत्यर्थः । स्वोपभोगक्षमान्नवस्त्रादिपरिपूर्णोऽपीति यावत् । असत्यानुषक्तधीः चोरश्च भवति । वृथैवानृतवदनस्तेयादिसक्तो भवति । तत्र किं नाम यशोदयावृत्तम् । 'बुभुक्षितः किं न करोति पापम्', 'प्राणात्यये सर्वधनापहारे' इत्याद्युक्तप्राणात्ययाद्यापत्समय एव कथञ्चित्परकीयापहाराद्यभ्यनुज्ञानेऽपि तादृशापद्विधुरस्येदृशविपरीतप्रवृत्तिर्यशोदयाभ्युदयविरोधिनीत्यर्थः । आपन्नस्य विरुद्धप्रवृत्तौ न यशः प्रहीयते, सर्वे दयाञ्च कुर्युः, न त्वनापन्नविषय इति भावः । अपिनामौ पूर्ववत् । यद्वा **असत्या** दुष्टस्त्रिया **अनुषक्तधीः** । तदासक्तोऽपि भवतीत्यर्थः । धर्माधर्मज्ञानशून्यत्वादिति भावः ॥

(3) अन्योऽपि—मूढः कश्चिच्चोरः सन् परकीयपयःप्रभृति भुक्त्वा सत्यानुषक्तधीः, मयेदमपहृतमिति सत्यवदनशीलो भवति । तस्मिन् निःसंशयचौर्यादिप्रत्ययात् यशसो दयायाश्चानवकाश इत्यप्यर्थः ॥

(4) एवं सुगतमतप्रक्रिययाऽपि कश्चिदर्थः । तथा हि—यत्र महामूढगोष्ठ्यामन्तर्गतः सुगतः **चोरः** प्रत्यक्षसिद्धसर्ववस्तुस्थैर्यसत्यत्वाद्यपलापात् पश्यतोहरः सन् **असत्यानुषक्तधीर्भवति** सर्वं मिथ्येति शून्यवादोत्सुको भवतीत्यर्थः । किं कृत्वा । **पयःप्रभृति** भोग्यजातं **भुक्त्वाऽपि** क्षीरान्नपानादिविषये अहमहमिकया प्रधावन्नपीत्यर्थः । तदुक्तमभियुक्तैः—'सन्ध्यावन्दनवेळायां मुक्तोऽहमिति मन्यसे । खण्डलड्डुकवेळायां दण्डमादाय धावसि' इति । क्षणिकत्वमिथ्यात्वादिबुद्ध्या भोजनादेर्न हानम्, तत्प्रतिरोधे महान् क्रोधो भवति । कर्मानुष्ठानादेस्तु अस्थिरत्वानावश्यकता प्रोच्यत इत्यर्थः । 'वरद

सुगतपाशश्चोरलावं विलाज्य:' इति श्रीसूक्तिकटाक्षेण चोरशब्दनिर्देशः । तस्मिन् **पशुवृत्तिगणे** अशनव्यवायादिमात्रनिरते पारलौकिकनिःश्रेयसाद्यनुपगन्तरि सुगतसङ्घे **यशः** 'सर्वज्ञः सुगतो बुद्धः' इत्यादिशब्दगौरवम्, **दया** सर्वभूतदया, **वृत्तं** तत्कृतमहिंसादिनैयत्यं च **अपि नाम**-किमर्थम्? सर्वशून्यत्वक्षणिकत्वादिवादिनां भूतदयादिस्वीकारे किं कारणमित्यर्थः ॥

(5) एवमपरोऽपि कश्चिदर्थः। **गणशब्दो** मातृगणं भूतगणं वाऽऽचष्टे। स च **पशुवृत्तिः** पशूपहारप्रियः। निम्बवृत्तिरितिवत्। स च महारण्यमध्यगतः तत्रस्थानां चोराणामुपहारादिकं प्रतिगृह्य तेषां चौर्यमार्गे प्रवृत्तानां यथेष्टवस्तुलाभमनुगृह्णातीति लोकप्रसिद्धिः। तत्र गणे **चोरः** तस्करजातिः **आसत्त्या** स्ववासस्थानसामीप्यात् अनुषक्तधीर्भवति। **अनुरक्तधीरित्य**पि पाठः समानार्थः। किं कृत्वा? पयःप्रभृति स्वं भुक्त्वा। णिजर्थान्तर्भावेण क्षीरान्नप्रभृति भोजयित्वेत्यर्थः। यद्वा तदीयतीर्थादिकं परिगृह्येत्यर्थः। अनुरक्तधीः तत्तीर्थादिनिषेवणस्य तद्भक्तिकार्यत्वादिति भावः। तस्मिन् चोराराध्ये गणे यशो नास्ति; नामाद्यश्रवणात्। दयाऽपि नास्ति; परशिरःकपालबिभित्सूनामनुग्रहकरणात्। वृत्तं सदाचारोऽपि नास्ति; सतां तत्राप्रवेशादिति भावः। ईदृशदेवतानामप्यविवेकसद्भावात् पद्धतिसङ्गतिः सुलभैव।

एवमन्योऽप्येतादृश ऐतिहासिकोऽर्थः। तथा हि–यशोदाया औरसपुत्री काचन भगवन्माया। सा च देवकीगर्भात् भगवदवतारसमय एव यशोदया प्रसूता। तदुक्तं हरिवंशे—

'यशोदाऽपि समाधत्त गर्भं तदहरेव तु। विष्णोः शरीरजां निद्रां विष्णुनिर्देशकारिणीम्॥ देवकी च यशोदा च सुषुवाते समं तदा। यामेव रजनीं कृष्णो जज्ञे वृष्णिकुलोद्वहः॥ तामेव रजनीं कन्यां यशोदाऽपि व्यजायत। देवक्यजनयद्विष्णुं यशोदा तां तु दारिकाम्' इति। विपर्यासितं चैतत् दारकद्वयं वसुदेवेन। तदप्युक्तम्, 'यशोदायास्त्वविज्ञातस्तत्र निक्षिप्य दारकम्। प्रगृह्य दारिकां चैव देवकीशयने न्यधात्' इति।

सा तु दारिका कंसेन शिलायां पातिता ऊर्ध्वमुद्गम्य विन्ध्याद्रिमध्यमध्यासीना गणरूपं किञ्चिदास्थाय पशूपहारप्रिया चोरैराराधिता तिष्ठति। यथोच्यते—

'दारिका या त्वया रात्रौ शिलायां कंस पातिता। तां यशोदासुतां विद्धि कृष्णं च वसुदेवजम्। सा तु कन्या यशोदाया विन्ध्ये पर्वतसत्तमे। कृताभिषेका वरदा भूतसङ्घनिषेविता। अर्च्यते दस्युभिर्घोरैर्महाबलिपशुप्रिया। शबरैर्बर्बरैश्चैव पुलिन्दैश्च सुपूजिता' इति।

तदयमर्थः—**पशुवृत्तिगणे** पशूपहारप्रिये यशोदापत्ये गणविशेषे, **पयःप्रभृति स्वं** अभिषेकतोयादिकं परिगृह्य **चोरः** दस्युजनः। जात्येकवचनम्। **सत्यानुषक्ता** यथावस्थितार्थसंयुक्ता **धीः** इच्छा प्रार्थनारूपा यस्य तथोक्तो भवति। तदप्युक्तम्—'त्रैलोक्यचारिणी सा त्वं भुवि सत्योपयाचना। चरिष्यसि महाभागे वरदा कामरूपिणी। कृत्वा तु यात्रां भूतैस्त्वं सुरामांसबलिप्रिया। तिथौ नवम्यां पूजां त्वं प्राप्स्यसे सपशुक्रियाम्' इति तत्रैव भगवता। **तस्मिंश्च** स्वापत्येऽपि यशोदया सह **वृत्तं** स्थितिः **अपि नाम** अस्ति किमित्यर्थः। अत्र औरसापत्यस्यापि यशोदया सह स्थित्यभाव उत्कर्षेन बोधितः॥

(6) अथ कृत्रिमापत्यस्यापि तया सह चिरकालवासोऽप्यर्थान्तरेण बोध्यते । तथाहि—पशुभिः **वृत्तिः** जीवनं यस्य स **गणः** गोपजातिः । तत्रावतीर्णः कश्चित् गोपकुमारः क्षीरनवनीतप्रभृतिकं सर्वं भोज्यवस्तुजातं **चोरःसन् भुक्त्वा** परगृहेषु प्रविश्यानुभूय **सत्यानुषक्तधीः** सत्यभामासक्तचित्तश्च भवति । **तस्मिन्** गोपकुले यशोदादेव्याऽपि **वृत्तं** स्थितं; चेष्टितं वा । कृष्णस्य नवनीतमोषादिसमये यशोदाऽप्युलूखलबन्धनादिव्यापारमकरोदित्यर्थः । **नामे**ति प्रसिद्धौ ॥

(7) अत्र चान्योऽपि केवलमप्रस्तुतार्थः परिस्फुरति । तथाहि—**पशुवृत्तिः** पशुनिष्ठः **गणः** सङ्घः यस्य क्रतोः सः पशुगणघटितः क्रतुः ऐकादशिनादिसंज्ञकः, 'आग्नेयः कृष्णग्रीवः सारस्वती मेषी' इत्यादिना विहितः सवनीयविकारः । यद्वा 'त्रीन् ललामानालभेत' इति विहितवृषगणघटितो वा कश्चित् ऐकादशिनविकारः । तदुक्तम्, "ललामादिगणे दैक्षादैकादशिनतोऽथ वा । आद्यो विशेषराहित्यादन्त्यो गणविशेषतः" इति । तस्मिन् गणे **यशोदया** यशोदाख्येष्टकया **अपिनाम वृत्तं**—स्थितं किमित्यर्थः । अयं भावः—'यशोदां त्वायशसि' इत्यादिमन्त्रोपधेया काचन इष्टका यशोदानामिका । सा च, 'यत् यशोदा उपदधाति' इत्यादिना महाग्निचयने विहिता । न तस्याः पशुगणे कथञ्चिदप्युपयोग इति । **अपिनामौ** प्रश्नार्थकौ । तत्र प्रथमार्धमित्थं योजनीयम्—यत्र क्रतौ **पयःप्रभृति** तीर्थादिकं **भुक्त्वा** अशित्वा **चोरोऽपि सत्यानुषक्तधीर्भवति**—अशुद्धहृदयोऽप्यन्तश्शुद्धियुक्तो भवति । यथोक्तम्, 'अपोऽश्नात्यन्तरत एव मेध्यो भवति' इति । यद्वा, पयो ब्राह्मणस्य व्रतमित्युक्तं क्षीरप्रभृति भक्षयित्वा असत्यवदननिवृत्तो भवतीत्यर्थः । 'नानृतं वदे'दिति क्रतावनृतवदनप्रतिषेधादिति भावः । अथवा **चोर** इत्यत्र च **उरः** इति पदच्छेदः । **उरश्च** श्रेष्ठश्च भवतीत्यर्थः । 'उरो वक्षसि च श्रेष्ठे', 'उरः श्रेष्ठे च वक्षसि' इति हि विश्वमेदिन्यौ । श्रैष्ठ्यं चोक्तम्, 'तस्माद्यजमानोऽयजमानादुत्तरः' इति । यद्यपि चयनसंस्कृतस्याग्नेरग्निष्टोमादावेवोपयोगो विहितः, 'अग्निष्टोमेन यजते' इति । तथा च तदन्तर्गतसवनीयपशुविकारभूते ऐकादशिनादावपि यशोदासम्बन्धो भवत्येव—तथाऽप्याधानसंस्कृतेनापि अग्निष्टोमादिकरणसम्भवात् तत्र चयनमात्रनियतयशोदेष्टकावश्यंभावो नास्त्येवेत्यभिप्रायः । चयनविधिश्चाभ्युदयविशेषार्थं शुद्धिविशेषार्थमेव वा । यथोक्तं स्मृतौ, 'अग्निचित् कपिला स्त्री च राजा भिक्षुर्महोदधिः । दृष्टमात्राः पुनन्त्येते तस्मात् पश्येत नित्यशः' इति । यद्वा **अपिनामौ** सम्भावनार्थकौ । तथा च कदाचित् यशोदेष्टकाऽपि तत्र सम्भाव्यत एवेत्यर्थः। तदेवं प्रस्तुताप्रस्तुतानेकार्थपरिस्फुरणात् समासोक्तिप्रस्तुतांकुरसङ्करो बोद्धव्यः(4)

(4) उपकारगुणं ज्ञातवानप्यपकाराभासव्याजेन कृतघ्नः प्रथममुक्तः। अन्यदीयवस्तुषु गुणग्रहणं यस्मिन् चौर्यदोषपर्यवसायि, स द्वितीये । गुणमेव यो न पश्यति, प्रत्युत दोषमारोपयति स तृतीये । परेषु गुणमेव दोषत्वेन मन्वानः इह चतुर्थे ।

1 अस्यायमपि कश्चिदर्थः—यस्मिन् पशुप्रायगणे योग्योऽपि चोरो भवति, यो गणो योग्यमपि चोरं मन्यत इत्यर्थः। तत्रगणे नाम्नो यशसो दयायाः सद्वृत्तस्य च कथं स्थितिः। अत एव कृष्णमुलूखले बबन्ध, पर्युवाद च । अथवा तस्मिन्नपि—तादृशे मूढे गणेऽपि कालक्रमेण विवेकात् नामयशोदयावृत्तानि भवन्तीति ।

2 यद्वा यत्र गोकुले एकैकोऽपि स्वतन्त्रात्मभ्रमात् कृष्णपारम्याज्ञानाच्च स्वं पयःप्रभृति स्वयमेव भुङ्क्ते, असत्यदेहाभिमानात् ततश्चोरो भवति च, तत्रापि पशुपालनवृत्तिरूपतत्कर्म-भाग्यवशात् कृष्णमातृत्ववद्भाग्यशालिन्या यशोदयापि पतिकुले स्थितम्, पश्चात् कृष्णेन चानुरक्तेन स्थितमिति ।

3 अन्यद्वा—असत्यसक्तचोरविलक्षणः सत्यैकसक्तचोरः असत्पुण्यपापहरः कृष्णः यत्र यमुनापयःप्रभृतिकं कालियगर्वभञ्जनादिना भुक्त्वा परिपाल्य सत्यधीः रराज । तत्र यशः-प्रभृतिर्ववृधे इति ।

4 யத்ர பய:ப்ரப்ருதி ஸ்வம் புக்த்வா ஸத்யாநுஷக்ததீ: சோர:. பசுவ்ருத்திகணே தஸ்மிந் அபிநாம யசோதயா வ்ருத்தம்.

1 பசுக்களாவன நாற்கால் ஜந்துக்கள் ஆடு மாடு முதலியன. அவற்றின் தொழில் போன்ற தொழில் உடைய அறிவிலியான வகுப்பிற் சேர்ந்திருந்து ஒருவன் பால் முதலிய போக்ய வஸ்துக்களை வெகு நாள் உண்டு வளர்ந்து (அவ்வகுப்புக்கே த்ரோஹம் செய்ய)பொய் சொல்வதில் நோக்கும், நான் ஒன்றும் செய்யவில்லை யென்று சபதம் பண்ணுவதில் நோக்கும் கள்ளத்தனமும் உடையனென்றால், இதனையறியாத அந்த வகுப்பில் யசஸ் தயை நன்னடவடிக்கை எல்லாம் ஏது. (ஏது இருந்தும் இல்லை போலவே யாம். அபிநாம என்பதற்கு உண்டோ என்றது பொருள்.)

2 எந்த மூடவகுப்பிற் சேர்ந்தவர்கள் தங்கள் சொத்தாக உண்ண, பால் முதலிய எல்லாப்பொருள்களும் பெற்றிருந்தும் பொய்யும் திருடுமே செய்கின்றனரோ (ஒன்று மில்லாதவன் உயிர் போகும் நிலையில் திருடியுண்டானென்றால் தவறாகாது) அந்த வகுப்பிற்குப் பேரும் குணமும் ஒழுக்கமும் ஏது? (அஸத்யா—துஷ்டஸ்த்ரீயுடன் சேர்க்கையில் நோக்குமுடையவன் எனவும் பொருளாம்.)

3 அறிவில்லாதாரின் வகுப்பைச் சார்ந்த சொத்தை ஒருவன் திருடியுண்டு, செய்தது தவறென்று அவர்களிடம் உண்மையைச்சொல்லிக் கொள்வதில் நோக்கு உடையனானால், அதற்காகப் பேர் பெறும்படி தயை புரியுமோ அந்த வகுப்பு. சிக்ஷைதான் செய்யும்.

4 எந்த பௌத்த வகுப்பிலிருப்பவன், எல்லாம் பொய்யென்பவன், காணப்படும் வஸ்துவை யெல்லாம் இல்லை யென்பவன், வைதிகமதத்தினரைத் தம் மதத்திலே கொள்ளைகொள்பவன் (இடம் வேளை என்றவற்றைப் பார்க்காமல்) சிறந்த ஆஹாரங்களை உட்கொண்டு அதே தொழிலிலிருக்கிறான், அந்த வகுப்பில் தயை முதலியன இல்லை. உலகைக் கெடுப்பதேயாகியதாலின்.

5 கள்ளர்கள் ஆஸத்யா—தங்களுக்கு அருகில் இருப்பதாலே மதிப்பு வைத்து' எந்த பூதகணத்திற்கு பசு முதலானவற்றை பலியாகக் கொடுத்து அவற்றை உண்பதை விருத்தியாகக்கொண்ட அந்த கணத்தின்

தீர்த்தப்ரஸாதங்களை உட்கொண்டு தொழில் நடத்துவரோ. அந்த துர்தேவதைகளிடத்தில் தயை முதலியன உண்டோ? இந்த தேவதா கணத்திலே யசோதைக்குப் பெண்ணுகப் பிறந்த மாயையும் சார்ந்தவளே. பகவானுடைய அனுக்ரஹத்தினுல் அவளுக்கும் பூசையைக் கள்ளர்கள் கூட செய்கிருர்கள். அந்த மாயையும் கணமாகக் கொள்ளலாம். அவள் யசோதையை விட்டுப் பிரிந்து கோவிலில் வாழ்கிறபடியால் அவளுக்கு யசோதயா—யசோதாதேவியுடன் வ்ருத்தம் இருப்பு, தாய் வீட்டிலிருப்பது உண்டோ? இல்லை எனவும் பொருள் ஆகும்.

6 கோகுலத்திலே வெண்ணெய் உண்டு ஜாரசோரனுக இருந்த கண்ணனுக்கு யசோதை யென்ற வளர்க்கும் தாயின் இல்லத்தில் இருப்பு உண்டெனவும் பொருளாம். நாம—இது ப்ரசித்த மென்றபடி.

7 ஸோமயாகத்தில் ஹோமத்திற்காக அக்னியை வைப்பதற்குச் சயனம் என்கிற இடம் பலவகையான செங்கற்களால் கருடன் போன்ற பல ஆகாரங்களால் செய்து கொள்ளலாம், அதற்குத் தனிப் பலன் உண்டென்று வேதம் ஓதுகிறது. அதில்லாமலும் யாகம் செய்யலாம். பல ஆடுகளைக் கொண்டு செய்யும் யாகத்தை பசுகணமென்பர். அதில் யஜமானனுக்கு பயோவ்ரதம் அதாவது பால் மட்டும் ஆஹாரம். ஸத்யமே சொல்லவேண்டும். (சோர: என்ற சொல்லை—ச. உர:- என்று பிரிக்கலாம்.) உர:—ச்ரேஷ்டன். யஜமானன் சிறந்தவன். சயனத்திலிருக்கும் செங்கற்களுக்கு யசோதை முதலான பெயர்கள் வேதத்தில் இடப்பட்டிருக்கின்றன. ஆகப் பால் உண்பவனுய் உண்மையே சொல்லும் சிறந்த யஜமானனை உடைய பசுகணம் சேர்ந்த பெரிய யாகத்தில் கூட யசோதை யென்ற செங்கலும், அதனுலாம் சயனமென்ற மேடையும் இருக்குமா? இருக்கலாம்; இல்லாமலும் யாகம் செய்யலாம் என்ற வேதப் பொருள் ஒன்றும் இங்கே கிடைக்கும்.

हरिकरपुष्करहंसं हारमणीनां प्रसूतिमिव लक्ष्म्याः ।
पित्तेन पाञ्चजन्यं पीतं पश्यन् भिषज्यतु(ति) कम् ॥ ५ ॥

एवमुक्तान्यथाज्ञानादिदूषितहृदयानां परदोषाद्यवभासेऽपि स्वाविवेकमेव तत्र कारणं मत्वा तच्चिकित्सैव प्रथमं कर्तव्या; न तु वस्तुतः परेषां दोषलेशलेपोऽपीत्यर्थमप्रस्तुतवृत्तान्तवर्णनेन द्रढयति—**हरीति** । **पाञ्चजन्यं** विष्णुशंखम् । पञ्चजनशब्दात् दैत्यविशेषवाचिनः, 'बहिर्देवपञ्चजनेभ्यश्चेति वक्तव्यम्' इति भवार्थे ञ्यः । समुद्रे तिमिरूपेण सञ्चरन्तं सान्दीपनिकुमारभक्षकं पञ्चजनाख्यं दैत्यं निर्भिद्य तदस्थ्ना निरमिमीत पाञ्चजन्यमिति हरिवंशादिप्रसिद्धिः । **पित्तेन** स्वनेत्रगतेन पित्ताख्यदोषेण **पीतं पश्यन्** पीतवर्णतया साक्षात्कुर्वन् । पित्तदोषस्य साधारणशंखेषु पीतत्वभ्रमजनकस्य साक्षात् पाञ्चजन्येऽपि तथाविधभ्रमजनकत्वं चेदित्यर्थः । कस्तत्र विशेष इत्यत्राह **हरीति** । **हरेः** विष्णोः **कर एव पुष्करं**

तामरसम् , तस्य हंसं तत्र हंसवदवभासमानमित्यर्थः । अत्र करस्य तामरसत्वेन शंखस्य हंसत्वेन च रूपणात् परम्परितरूपकम् । अनेन शंखस्य [चन्द्रसदृश ?]हंससादृश्यद्योतनात् शौक्ल्यातिशयो व्यज्यते । उक्तं हि हंसशंखयोश्चन्द्रसादृश्यम्—'राकाचन्द्रद्युतिसहचरं राजहंसं ददर्श', 'तं पाञ्चजन्यं शशिकोटिशुभ्रम्' इति । अतश्च निखिलतमोविमोचकत्वेन स्वस्मिन् दोषसम्बन्धासहता द्योत्यते । तथा **लक्ष्म्याः** भगवदुरःस्थलनिलयायाः श्रीदेव्याः **हारमणीनां** हारसङ्घटितानां मौक्तिकमणीनां **प्रसूतिं** उत्पत्तिस्थानमिवेत्युत्प्रेक्षा । अत्र लक्ष्मीवक्षःस्थलस्थितानां हारमौक्तिकानामत्यन्तसान्निध्यात् मुक्तोत्पादकतावच्छेदकशंखत्वजातिमत्त्वाच्च पाञ्चजन्यजन्यत्वमुत्प्रेक्ष्यते । आहुश्च शंखानां तदुत्पत्तिस्थानताम्, 'करीन्द्रजीमूतवराहशंखमत्स्याहिशुक्त्युद्भववेणुजानि' इति । 'शंखजं मौक्तिकं श्वेतं कपोताण्डनिभं परम्' इति च । [यादवाभ्युदयेऽप्यनेन कविना, "प्रभाप्रवाहोदित....तत्कन्धराशंखमतल्लिकायाः प्रसूतिराशंक्यत हारवृत्त्या" इत्युक्तं रुक्मिणीवर्णने 12 सर्गे ।] तथा चेदृशविलक्षणवलक्षस्थूलतरमुक्ताफलानामतिविपुलधवळतरपाञ्चजन्यप्रसूतत्वसम्भावनैव युक्ततरेति भावः । अनेन निर्दिष्टमुक्ताफलप्रसावकत्वात् निखिलदोषप्रतिभटत्वमध्यवसीयते । अथवा **हारमणीनां** भगवत्कण्ठस्थहारमौक्तिकानां **लक्ष्म्याः** शोभायाः **प्रसूतिमिव** उत्पादकमिवेत्युत्प्रेक्षा । ईदृशपाञ्चजन्यसान्निध्यादेव निरतिशयशुभ्रता हारमौक्तिकेषु रूढातेति हेतूत्प्रेक्षा पर्यवसिता । अनेन सन्निहितपदार्थेष्वपि निरतिशयशोभासमुदयहेतोः(तौ ?) स्वस्मिन् दोषगन्धसम्बन्धानर्हत्वं द्योत्यते । अत्र च मौक्तिकाशनसंज्ञकहंसत्वेन रूपितस्य मुक्तोत्पादकत्ववर्णनादद्भुतरसो विभावनाविशेषो वा व्यज्यते । यदुक्तम्, 'विरुद्धात्कार्यनिष्पत्तिर्दृष्टा काचिद्विभावना' इति । तथा ह्युक्तं **केशवनिघण्टौ** 'श्वेतपक्षो मानसौका मौक्तिकाशन इत्यपि' इति । तदनुगुण एव हि, 'पानीयं ते परिणमयिता तत्र मुक्तामयत्वम्' इति श्लोकोऽपि । अस्य चार्थान्तरं परिकल्प्य मौक्तिकाशनशब्दस्य केवलरूढत्वाश्रयणेऽपि हंसशब्देन स्वीयमौक्तिकाशनसमाख्योपस्थापनात्, अल्पकेशस्य चमरीराज इति समाख्यावत् मुक्ताप्रसूतेर्मौक्तिकाशन इति समाख्या अनुचिततरेत्यर्थविशेषो द्योत्यते ।

तदेवमेतादृशपरमपुरुषकरारविन्दनिरतिशयशोभासम्पादके शशिकोटिशुभ्रे पाञ्चजन्येऽपि पीतवर्णसम्बन्धमारोपयन्नयमिति पर्यवसितार्थः । **पश्यन्निति** शत्रा अद्यापि तद्दोषानुवृत्तिर्द्योत्यते । दोषविशेषजन्यभ्रमे शास्त्रशतैस्तदभावनिश्चयोऽप्यकिञ्चित्कर इति हृदयम् । तादृशः **कं भिषज्यतु**—कस्यान्यस्य चिकित्सां करोतु । कण्ड्वादित्वात् भिषजो यक् । किं पित्तदोषवतः स्वस्य चिकित्सां करोतु, उत निर्दोषस्य शंखस्य, किं वा शुक्लस्यैव साक्षात्कर्तॄणामन्येषामित्यर्थः । दोषयुक्तस्यैव तन्निवर्तनं कर्तव्यमित्याशयः । 'योऽपूर्ववैद्याय नमोऽस्तु तस्मै' इत्युक्तभवभयाभितप्तनिखिलजगदगदङ्कारभगवत्करारविन्दस्पर्शमनुभवतः शंखराजस्य पित्तादिदोषसम्बन्धसङ्कथाया एवानवकाश इति भावः । "भिषज्यति भवं प्रभो" इतिवत् चिकित्सनीयस्य कर्मतया निर्देशः । अथवा कस्य भिषक् भवतु । 'स्वयं तरितुमक्षमः किमपरानसौ तारयेत्' इति न्यायेन स्वयं पित्तदोषग्रस्तोऽयं कस्यान्यस्य तद्दोषदूषितस्य चिकित्सां करोत्वित्यर्थः ।

अयं चाप्रस्तुतप्रशंसालङ्कारः, 'अप्रस्तुतप्रशंसा स्यात् सा यत्र प्रस्तुताश्रया' इति लक्षितः। अत्र प्रस्तुताश्रयत्वं प्रस्तुतवृत्तान्तावगतिपर्यवसायित्वम्। तच्च सादृश्यादिमूलकम्। तथा चात्र कश्चित् अविवेकदूषितहृदयो नित्यनिर्दुष्टेषु शिष्टेषु स्वाविवेकवशादेव दोषसम्बन्धमवगच्छन् स्वाविवेकप्रशमनोपायमेव प्रथममन्वेषयेत। न तावदेतदवगतिमात्रेण विशिष्टेषु कश्चन दोषगन्धः प्रसजेत्। एवं स्वाविवेकप्रशमनोपायमजानन् अयं पराविवेकप्रशमने सर्वथाऽनर्ह इति प्राकरणिकार्थे पर्यवसानं बोद्धव्यम्।

(2) अन्योऽप्यर्थः। **पाञ्चजन्य**शब्देन पञ्चचितिनिष्पन्नोऽग्निरुच्यते। 'एष वा अग्निः पाञ्चजन्यो यः पञ्चचितीकः' इति श्रुतेः। अप्सुषदादीनि पञ्च अग्निरूपाणि भूयस्तुदादिषु पञ्चस्विष्टकासु चीयन्त इत्यग्निकाण्डे समाम्नायते। तं कीदृशम्। **हरिकरपुष्करहंसम्**। हरिः—हरितवर्णः करः—कान्तिः यस्य पुष्करस्य—पद्मपत्रस्य हंसं तत्र हंसवदवभासमानं पुष्करपर्णोत्पन्नत्वात् चित्याग्नेः। तदुक्तमग्निकाण्डे, 'त्वामग्ने पुष्करादध्यथर्वा निरमन्थत' इति। तदर्थश्च अथर्वा नाम ऋषिः पुष्करादधि पद्मपत्रस्योपरि त्वां निरमन्थत—निःशेषेण मथितवान्। अत एव ब्राह्मणम्—'त्वामग्ने पुष्करादधीत्याह पुष्करपर्णे ह्येनमुपश्रितमविन्दत्' इति। **हारमणीनां** तदुपलक्षितधनवस्त्रादीनां **लक्ष्म्याः** समृद्धेः **प्रसूतिमिव** उत्पत्तिस्थानमिव। 'इमानेवैताभिर्लोकान् द्रविणावतः कुरुते। वेदुको वासो भवति। य एवं विद्वानग्निं चिनुते। ऋध्नोत्येव' इत्यादिश्रुतिशतैश्चित्यस्याग्नेर्द्रविणवस्त्रादिसमृद्धिप्रापकत्वोक्तेः। उपादानकारणवाचिनः प्रसूतिशब्दस्येह गौणप्रयोगात् **इव**शब्दः। अथवा **हा रमणीना**मिति पदच्छेदः। रमणीशब्दः पुञ्जिकस्थलाद्यग्निरक्षकाप्सरोगणवचनः। तासां **लक्ष्मीः** समृद्धिः तदुत्पादकमित्यर्थः। तथा च ब्राह्मणम्, 'पञ्चचोडा उपदधात्यप्सरस एवैनमेता भूता अमुष्मिन् लोके उपशेरते। अथो तनूपानीरेवैता यजमानस्य' इति। 'अयं पुरो हरिकेश' इत्यादिपञ्चमन्त्रोपधेयानामिष्टकानां पञ्चचोडा इति समाख्या। तासामुपधाने सति एताः इष्टकाः अप्सरस एव भूताः—मन्त्रोक्तपुञ्जिकस्थलाद्यप्सरोरूपत्वं प्राप्ताः स्वर्गलोके एनं यजमानं उपशेरते—समीपे शेरते। अथो अपि च एता अप्सरसः यजमानस्य तनूपानीरेव शरीरपालनपरा एव भवन्तीति तदर्थः। अतश्चैतादृशाप्सरस्समृद्धिसम्पादकत्वात् **तत्प्रसूतिमिवे**त्युक्तम्। यद्वा **मणि**शब्देन रत्नवाचिना रत्नसमाना ज्वाला उच्यन्ते। 'दमेदमे सप्तरत्ना दधानः' इति मन्त्रानुगुण्यात्। दमेदमे—गृहेगृहे सप्तसंख्यकान् रत्नसमानान् ज्वालाविशेषान् धारयन्निति हि तदर्थः। तासां **प्रसूति**मुत्पादकं तादृशं चयननिष्पादितमग्निं **पित्तेन** तेजसा। 'अग्ने पित्तमपामसि' इति मन्त्रोक्तेः। **पीतं** अपीतं नष्टमित्यर्थः। अप्ययवाचकात् अपिपूर्वकादिणो निष्ठायां वष्टि भागुरिरित्यल्लोपे पीतमिति रूपं भवति। यद्वा **पीतं** पानकर्मीभूतं कबलिततेजस्कमित्यर्थः। **पश्यन्** यजमानः **कं भिषज्यतु** ईदृशातिप्रयत्नसाधितस्य पाञ्चजन्याग्नेस्तेजोविनाशे सति तत्स्वरूपस्यैव विलयात् कस्मै समाधानं करोत्वित्यर्थः। विद्यमानस्याग्नेः परिकरश्रेषे प्रायश्चित्तादिना समाधानमुचितम्। आत्यन्तिकविलये तु पुनश्चितिरेव कर्तव्येति भावः। अथ वा कं भिषज्यतु ब्रह्माणमेव भिषज्यत्वित्यर्थः। विधिकौटिल्यादेवेदृग्दशाविपाकात् तत्कौटिल्यमेव प्रथमं परिहरणीयमिति भावः।

(3) अत्र च जाठराग्निपरतयाऽपि कश्चिदर्थः प्रतीयते । तस्य हृदयादिपञ्चस्थानगतप्राणादिवाय्वाप्यायितत्वात् पञ्चजन्यत्वं स्वार्थे ष्यञा पाञ्चजन्यशब्दवाच्यत्वं च भवति । चतुर्वर्णादेराकृतिगणत्वात् । तस्य च 'पद्मकोशप्रतीकाशम्' इत्यारभ्य 'आहारमजरः कविः' इत्यन्तैर्हृदयकमलसम्बद्धत्वोक्त्या पुष्करहंसत्वम्, गात्रशोभासम्पादकत्वात् लक्ष्मीप्रसूतित्वं च कथञ्चिन्निर्वाह्यम् । तादृशं अग्निं पित्तरोगेण **पीतं** मस्तमित्यर्थः, **पश्यन्** जानन् स्वस्मिन्नग्निमालिन्यं पित्तजाड्यजन्यं विजानन्नित्यर्थः । **कं भिषज्यतु** कस्यान्यस्य तथाविधस्य भिषक् भवत्वित्यर्थः ।

एवमन्तर्यामिपरतयाऽपि कश्चिदर्थः । तथा हि—'यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः' इति श्रुत्युक्तपञ्चजनशब्दितचक्षुरादिपञ्चेन्द्रियाधारभूतः परमात्मा **पाञ्चजन्यशब्देनोच्यते** । पञ्चजनशब्दस्य पञ्चत्वविशेषणमहिम्ना तस्य समूह इत्यणि पाञ्चजनमिति रूपे तदुपरि, 'अन्येभ्योऽपि दृश्यते' इति मत्वर्थीय-यप्प्रत्ययेन तदुपपत्तेः । लोकेऽपि पञ्चजनशब्दः इन्द्रियपरतया प्रयुक्तः । यथा मृच्छकटिकायां भिक्षुवाक्यम्-पञ्चजणाजेण माळिदा इत्थियं माळियग्गामो ईंखिद इति । (पञ्चजनाः इन्द्रियाणि येन मारिताः वशीकृताः । स्त्रियं अविद्यां ग्रामः जीवात्मा) इत्यादिकं उन्नेयम् । तस्य परमात्मनो हृदयकमलमध्यस्थत्वेन **पुष्करहंसत्वम्**, 'अलङ्कार्यैः सर्वैर्निगदितमलङ्कार इति यः समाख्यानं धत्ते स वनगिरिनाथोऽस्तु शरणम्' इत्युक्तरीत्या दिव्याभरणगणानामपि शोभासम्पादकत्वात **हारमणिलक्ष्मीप्रसावकत्वं** च सुलभमेव । 'पीताभा स्यात् तनूपमा । तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः' इत्युक्तपीतवर्णशिखासम्बद्धत्वात् **पीतत्वमपि** । तादृशमन्तर्यामिविग्रहं **पित्तेन** भगवद्विषयकनिरतिशयोन्मादविशेषेण **पश्यन्** साक्षात्कुर्वन् यद्वा **पीतं पश्यन्** कबलितमिव पश्यन्नित्यर्थः । लोचनाभ्यां पिबन्निवेत्यादिप्रयोगानुरोधात । योगपरिपाकात् सञ्जातभगवत्साक्षात्कार इति यावत् । **कं भिषज्यतु** कस्यान्यस्य उपदेशादिना भैषज्यं करोत्वित्यर्थः । कवित्वमदकश्मलमित्यादिपर्वाण्यतिक्रम्य 'परप्रतिपदर्पणप्रथमयातनां च स्वयं निवर्त्य निरवग्रहां निभृतवृत्तिमातिष्ठसि' इत्युक्तक्रमेण परोपदेशादिनिवृत्तस्य, 'अङ्गान्यस्य मुहुर्मुहुः पुळकितान्यन्तर्मुखं मानसं चिन्ता च द्रुतशर्करप्रतिनिधिः शीताश्रुणी लोचने' इत्यनवधिकाद्भुतभगवत्साक्षात्कारविमुखीकृतबाह्यकरणस्य विविक्तसेविनः कमन्यं प्रति भवभयभिषग्भावो भवेदिति भावः । तादृशपरमभक्त्याविर्भावात् पूर्वमेव परोपदेशादिप्रवृत्तिरिति हृदयम् । ईदृशपरोपदेशादिक्लेशभयेन ह्युन्मत्तचर्यामभ्यनैषुर्भरतादय इत्यैतिहासिकाः । अत एव गीतम्, 'अरतिर्जनसंसदि' इति ॥ एवमप्रस्तुतार्थपरिस्फूर्तेः समासोक्तिरप्युक्ताप्रस्तुतप्रशंसया सङ्कीर्यत इति बोद्धव्यम् ॥

(5) 1 *திருமாலின் திருக்கைத் தாமரையில் அன்னமாகவும் திருவின் ஹாரங்களிலுள்ள முத்துக்களுக்குப் பிறப்பிடம் போன்றதுமான (வெள்ளவெளேலென்றிருக்கிற) வலம்புரிசங்கையும் தன்னிடமுள்ள பித்ததோஷத்தாலே மஞ்சள்நிறமாகப் பார்த்து (தன் தோஷத்தை இசையாமல்) அது மஞ்சநிறமே என்கிறவன் யாரை வைத்யனாகச்*

செய்து கொள்வான். தானே இப்படியிருந்து கொண்டு பிறர்க்கு தான் என்ன வைத்தியம் இவன் செய்வான். (भिषज्यतु வைத்யனுக்குவான். அல்லது வைத்யம் செய்வான்.)

2 யாகத்திற்கு வேண்டுவதான வைதிகாக்னியை வைப்பதற்குச் சயனம் உண்டென்று முன் ச்லோகத்திற் சொல்லப்பட்டதே. அதில் ஐந்து அடுக்குகளாலான ஒரு சயனவகையை பாஞ்சஜந்யமென்கிறது வேதம். அது முதலில் தாமரையிலையினின்று உண்டானதாகவும், செல்வம் சொத்து அப்ஸரஸ் முதலானவற்றை அதன் மூலம் பெறலாமென்றும் அங்கே வர்ணனையுண்டு. அதனுல் இதற்குப் பின்வருமாறு பொருள்.—ஹரிகர—பச்சையொளியுடைய தாமரையிலையிலே ஹம்ஸம் போன்றதும், ஹாரம், மணி, ரமணி செல்வம் எல்லாவற்றிறிக்கும் காரணமுமான பாஞ்சசன்னியமென்ற சயனமானது பித்தத்தாலே—நெருப்பாலே பீதம் அழிந்ததெனக் கண்ட யஜமானன் யாரிடம் ஸமாதானம் பெறுவது? க என்ற பிரமனைத் தான் கேட்க வேண்டும். (அல்லது க என்ற ப்ரஹ்மா என்னும் ருத்விக்கைக் கொண்டு ப்ராயச்சித்தமோ வேறு நடத்தவேணும்.)

3 பகவானை வஹித்துக் காண்பிக்கிற ஹ்ருதயகமலத்துடன் சேர்ந்து அன்னம் போல் சுத்தமாய், ஆஹாரத்தின் மூலம் வரும் சிறந்த மணிகளான ரத்தம் முதலான தாதுக்களுக்கும் மேனியொளிக்கும் காரணமுமாய் பராணுபாநாதி (பஞ்சஜந) பஞ்சவாயுக்களால் விருத்தி பெற்று பஞ்சஜனரெனப்படும் மனிதர்களின் வயிற்றிலுள்ள அக்னி யானது பித்தரோகத்தால் மந்தமாக்கப்பட்டால் அதைக் காண்பவன் எவனை வைத்யனுகக் கொள்ளவேண்டும். பித்தரோகமறியாதவனைக் கொள்ளலாகாது. இவ்வுரையின் விரிவு வடமொழியில் பின்வருமாறு—

अयमर्थ एवं व्याख्यानेनावगन्तव्यः—हरेः हार्दस्य परमात्मनः आविष्कारकस्य पुष्करस्य हृदयकमलस्य हंसवत् स्थितं हारात् आहारात् जातानां मणीनां श्रेष्ठरक्तादिधातूनां लक्ष्म्याः गात्रशोभायाश्च प्रसूतिं पञ्चवायुवर्ध्यत्वात् पञ्चजनशब्दवाच्यमनुष्यसंबन्धित्वाच्च पाञ्चजन्यं जाठराग्निं पित्तदोषेणाऽऽक्रान्तं मन्दञ्च पश्यन् तत्परिहारसमर्थमेव कं-शिरोभूतमेव वैद्यं कुर्यात्, न सर्वमिति।

4 हरेराविष्कारके हृदयपुष्करे हंसवत् स्थितं सर्वसंपत्प्रदं पञ्चजनशब्दितेन्द्रियनिर्वाहकं भगवन्तं पीताभाग्निज्वालामध्ये पीतवर्णलक्ष्मीप्रभाव्याप्त्या स्वयमपि पीतवर्णतां प्राप्तं भक्त्यतिशयोन्मादाख्यपित्तबलात् साक्षात्कुर्वन् मुमुक्षुः कमन्यं संसारव्याधिचिकित्सकं कुर्यात्। तमेव सिद्धोपायं सेवेतेत्यर्थः।

4 கண் முதலான ஐந்து வஸ்துக்களை பஞ்சஜந என்கிறது உபநிஷத்து. அவற்றிற்கு சக்தியளிக்கும் பகவான் பாஞ்சஜந்யன். அவன் ஹரியைப் படைப்பவனுக உடைய ஹ்ருதயகமலத்தில் ஹம்ஸம் போலிருப்பவன், ச்ரேஷ்டவஸ்துக்களுக்கும் செல்வத்திற்கும் காரணமானவன். பீதவர்ணமான அக்னிஜ்வாலையின் நடுவில் பீதவர்ணமான பிராட்டி

யோடிருப்பதால் பொன்மேனியன். அவனையனுபவித்து அனுபவித்துப் பித்தேறி யோகக் கண்ணால் காண்பவன் ஸம்ஸார வ்யாதியைத் தீர்க்க வேறு யாரை வைத்யனுக்க வேண்டும். அந்த யோகமே போதும். யோகம் செய்து கம் என்ற பகவானையே ஸித்தோபாயமாய் வைத்யனுக்க வேணும்அன்றி. யோகத்தில் ஆழ்ந்திருக்கும் போது பிறர்க்கு உபதேசம் செய்ய வியலாமைகையால் யாருக்கு சிகித்ஸை செய்வான் ?

स्फटिकस्स्वभावशुद्धया(द्धः) स एव सन् वहति (सहति) सर्वमारोपम् ।
तदपि न तत्रानास्था तदुपाधिषु वा भवत्यास्था ॥ ६ ॥

नन्वत्र पीतशंखाद्यारोपस्थले पित्तदोषदुष्टस्यैकस्य पीतवर्णत्वाद्यवभासेऽपि तदितरेषां सर्वेषामपि शुक्लत्वेनैव साक्षात्करणात् न तत्र वस्तुतो दोषसंस्पर्शः प्रसजेत् । एकपुरुषीयविरुद्धदर्शनमात्रस्याकिञ्चित्करत्वात् । अत्र त्वनेकजनदृष्टदोषेषु शिष्टेषु न तद्दृष्टान्तेन दोषसम्बन्धः परिहर्तुं शक्य इत्याशङ्कामन्यविधाप्रस्तुतप्रशंसया निराकरोति **स्फटिक** इति । **स्फटिकः** स्फटिकाख्यो मणिः **स्वभावशुद्धया** स्वाभाविकस्वच्छतातिशयेन हेतुना । मृदादिष्वारोपादर्शनादिति भावः । **स एव सन्** स्फटिक एव सन् स्फटिकत्वाप्रहाणेनैवेत्यर्थः । **सर्वं** सार्वजनीनम् **आरोपं** रक्तत्वादिधर्माध्यासं **वहति** अनुभवति । जपाकुसुमाद्युपाधिसमवधाने स्फटिको रक्त इति सर्वजनसमवेतभ्रमविषयो भवतीत्यर्थः । शुक्तिरजतादिभ्रमस्थले शुक्तित्वादिप्रहाणवत् नात्र स्फटिकत्वप्रहाणमिति भाव. । यद्वा **स एव सन्** स्वभावशुद्ध एव सन्; बुद्धिस्थस्य स्वभावशुद्धपदस्यात्र तत्पदेनोपस्थानम् । न त्वारोपमात्रेणास्य वास्तवशुद्धत्वं प्रहीयत इत्यर्थः । अथ वा **सर्वं** सर्वविधं आरोपं रक्तत्वपीतत्वादिभ्रमं वहति । जपाकुसुमहरिद्रादितत्तद्वस्तुसमवधान इति आदिः । **तदपि** तथाविषयावदारोपविषयत्वेऽपि **न तत्रानास्था** स्वभावशुद्धत्वात् तत्रोपेक्षा न भवति । अवश्यमन्विष्योपादीयत एवेत्यर्थः । **तदुपाधिषु** तादृशारोपनिदानभूतेषु समीपवर्तिषु जपाकुसुमादिपदार्थेषु **आस्था वा** आदरणीयत्वमपि । **वा**शब्दश्चार्थे । **न** भवतीत्यनुषङ्गः । तथा च 'गतानुगतिको लोको न लोकः पारमार्थिकः' इति न्यायेनान्धपरम्परया कस्मिंश्चिन्निर्दुष्टे शिष्टतमेऽनेकविधापवादारोपेऽपि तद्वचनमात्रेण तत्रानादरणं तादृशदोषोद्घोषणमात्रेण तद्वक्तृष्वादरणं च न भवतीति प्रस्तुतवृत्तान्तावगतिपर्यवसायिता अवसेया ।

वस्तुतः शब्दलभ्यत्वमपि तदर्थस्य सुवचम् । तथा हि—**स एव सन्** निर्दुष्टत्वेन लोकप्रसिद्धः सन् पुरुषः **स्फटिकस्वभावशुद्धया** स्फटिकवत् स्वाभाविकशुद्ध्यतिशयात् **सर्वमारोपं** सर्वविधदोषवत्तया अपवादं **वहति** सहते । न तु कस्मैचिदपि दूषकाय प्रतिब्रूते । यदि वस्तुतो दोषसंस्पर्शः, तदा तदाच्छादनाय प्रतिब्रूयादिति भावः । तथाऽपि वास्तवज्ञानां विशिष्टाग्रणीनां न तत्रानादरणं भवति, तादृशदोषवचनहेतुभूतेषु पुरुषेषु आदरणं च न भवतीत्यर्थः । पूर्वत्र उपाधिशब्दस्य समीपवर्तिपदार्थ-

परत्वं उप समीपे आधीयत इति कर्मणि व्युत्पत्त्या सुलभमेव। 'उपसर्गे घोः किः'। उप समीपे आधिः आधानं यस्येति वा। इह तु कारणपरत्वम्, 'उपाधिस्तत्रायं जयति जनिकर्तुः प्रकृतिता' इति मुरारिप्रयोगादवसीयते।

(२) अन्योऽप्यत्राद्वैतमतप्रक्रिययाऽर्थबोधः समुद्भवति। तथा हि—**स्फटिक**शब्देन, 'शुद्धस्फटिक-सङ्काशं,' 'शुद्धस्फटिकमणिभूभृत्प्रतिभटम्' इत्यादिदृष्टान्तोपन्यसनमहिम्ना विज्ञानघनं शुद्धब्रह्म निगीर्यते। स च **स्वभावशुद्धया** स्वभावतो निरस्तनिखिलधर्मत्वेन हेतुना। स्वभावत इत्यनेन निर्विशेषस्वरूपधर्मोऽपि न तत्रातिरिक्तः कश्चिदस्ति; किं तु स्वस्वरूप एव सोऽपीति सूचितम्। उक्तं हि **लघुचन्द्रिकायां** दृश्यत्वहेतूपपत्तौ, 'केवलो निर्गुणः इत्यादिश्रुत्या ब्रह्मणि परमार्थतो धर्मनिषेधात्' इति। **पञ्चपाद्यामपि,** "आनन्दो विषयानुभवो नित्यत्वं चेति ब्रह्मणो धर्मा अपृथक्त्वेऽपि चैतन्यात् पृथगिवावभासन्ते" इति। अतश्चानन्दादिपदार्था वस्तुतश्चिद्रूपा एवेति भावः। शुद्धं स्वप्रकाशमिति वाक्यादपि अशुद्धत्वमस्वप्रकाश-त्वव्यापकमित्येव बोधोदयस्य **अद्वैतसिद्धावुक्त**त्वेन शुद्धस्य वृत्तिविषयत्वरूपधर्मस्यापि तैरनङ्गीकारादिति। अशुद्धत्वमपि तत्र न शुद्धभिन्नत्वं शुद्धस्य वृत्तिविषयत्वापत्तेः। किं तूपहितत्वमेवेति तद्व्याख्यानादौ स्पष्टम्। तर्हि कथमस्य व्यवहृतिरित्यत्राह **स एव सन्नि**ति। शुद्ध एव सन्नित्यर्थः। न तु सत्तारूपधर्म-सम्बन्धः; किं तु सत्तामात्रमेव। 'सत्तामात्रमगोचरम्। यः सदाऽस्तीति केवलम्' इत्याद्युक्तेः इति भावः। यद्वा **स एव सन्** घटः सन् पटः सन्नित्यादिप्रतीतिषु ब्रह्मैव सत्त्वेन प्रतीयमानमित्यर्थः। **सर्वमारोपं** सर्ववस्तुतादात्म्याध्यासं वहति। सन् घटः घटः सन्नित्याद्याकारद्वयानुभवेनान्योन्यस्मिन्नन्योन्यतादात्म्याध्या-सस्यावश्योपेयत्वादिति भावः। उक्तं च **तद्भाष्ये** 'अन्योन्यस्मिन्नन्योन्यात्मकतामन्योऽन्यधर्मांश्चाध्यस्य' इति। **संक्षेपे** च, 'इदमर्थवस्त्वपि भवेद्रजते परिकल्पितं रजतवस्त्विदमि। इतरेतराध्यसनमेव ततश्चितिचैत्ययोरपि भवेदुचितम्' इति। **तदपि** सर्ववस्तुतादात्म्यारोपेऽपि **तत्र** शुद्धब्रह्मणि **अनास्था** अनादरणं नास्ति; मोक्षार्थं तस्यैव ज्ञातव्यत्वात्। तत्त्वमस्यादिवाक्यजन्याखण्डैकरसनिर्विकल्पकबोधस्यैव संसारोच्छेदकतायाः तैरङ्गीकारादिति भावः। **तदुपाधिषु** ब्रह्मांशे प्रकारीभूतेषु **आस्था वा** आदरणमपि ज्ञातव्यत्वादि-रूपमित्यर्थः। **न भवति** न सम्भवति। उपाधिशब्दस्य तैः कार्यानन्वयिनि विद्यमाने व्यावर्तके परिभाषित-तया शुद्धस्य वृत्तिविषयत्वापत्तिभयात् तत्त्वमस्यादिवाक्यजन्यज्ञाने उपहितस्यैव भानोपगमेऽपि न तद्घट-कानामुपाधीनां तादृशज्ञानविषयत्वावश्यकतेति भावः। अयमत्राशयः—शुद्धब्रह्मणस्तावत् ज्ञानविषयत्वम-ज्ञानविषयत्वं च न सम्भवति। तस्य सर्वविशेषविरक्तत्वात्। किन्तूपहितस्यैव तदुभयविषयत्वं वक्तव्यम्। तद्घटकोपाध्योस्तु केवलं व्यावर्तकतामात्रम्; न तु ज्ञानाज्ञानविषयतया। अत उपाध्यविषयकत्वे सति उपहितविषयकस्याज्ञानस्य तादृशमेव ज्ञानं निवर्तकं भविष्यतीति। उक्तं चाद्वैतसिद्धौ 'ज्ञानाज्ञानयो-रुभयोरप्युपाध्यविषयकत्वे सत्युपहितविषयकत्वात् समानविषयत्वमस्त्येव' इति। तत् सिद्धमुपहितस्य मोक्षार्थं ज्ञेयत्वमुपाधेरज्ञेयत्वं चेति।

(3) एवं विशिष्टाद्वैतरीत्याऽपि प्रत्यगात्मपरतया कश्चिदर्थः ग्रन्थकारसंमतः । यथोक्तं तैः 'स्वतः प्राप्तं रूपं यदिह किल भावेषु तदपि त्यजन्तस्ते दृष्टा नियतिघटितोपाधिवशतः । प्रकृत्या तिष्ठन्ति ह्युपधिविगमे ते च तदसावनादिः संसारः पुरुषमुपरुन्धे गळति च' इति । तदेवात्र विविच्यते । **स्फटिकशब्देन** 'सुमृष्टमणिभित्तिवत् स्वयमभिद्यमानः पुमान्', 'मणिवर इव शौरेर्नित्यहृद्योऽपि जीवः' इत्याद्युक्तः नित्य निर्मलस्वभावः प्रत्यगात्मोपस्थाप्यते । **स्वभावशुद्ध्या** — प्रजापतिवाक्योदितापहतपाप्मत्वादिविशिष्टतया **स एव सन्** तादृशज्ञानस्वरूप एव सन् **सर्वमारोपं** देवमनुष्यादिजडशरीराभेदारोपं वहति । 'त्रियुगमगुणशिल्पिना त्रिगुणतूलिकाधारिणा विविच्य विनिवेशितं वहति चित्रमत्यद्भुतम्' इत्युक्तरीत्या तत्तत्कर्मवशादीश्वरपरिकल्पितेषु देवमनुष्यादिदेहव्यूहेषु तादात्म्यबुद्धिमध्यास्त इत्यर्थः। **तदपि** तादृशाध्यासवहनेऽपि **तत्र** शुद्धप्रत्यगात्मनि अनास्था न भवति । तस्यैव मोक्षप्राप्त्यर्थं सर्वविधोपायपूर्तेः सम्पादनीयत्वादिति भावः । तदुपाधिषु तादृशभ्रमजनकेषु देवादिशरीरेषु । उपाधिशब्दस्यान्यस्मिन्नन्यधर्मावभासकपरत्वमुक्तसङ्कल्पसूर्योदयश्लोकादवगम्यते । **आस्था वा** आदरणं च न भवति । 'सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिनः । शरीरकस्यापि कृते मूढाः पापानि कुर्वते', 'देहे चेत् प्रीतिमान् मूढो भविता नरकेऽपि सः' इत्यादिभिर्हेयत्वेन सङ्कीर्तनादिति भावः । अत्राप्युक्तापस्तुतार्थानां दृष्टान्तविधयोपयोगः कथञ्चिदुन्नेयः ।

(4) अन्योऽपि कश्चिदप्रस्तुतार्थः । तथा हि । स्फटयैव **स्फटिकः । स्फटा** फणा । तद्वान् सर्पः । अत्र च स्फटशब्दाद्वा मत्वर्थीय इनिः कार्यः । 'स्फटायां तु फणा द्वयोः' इत्यमरः । अथ वा **स्फटि** फणावत् **कं** शिरः यस्य । 'कं शिरोऽम्बुनोः' इत्यमरः । तथा च फणावच्छिराः कश्चन नाग इति फलितम् । स्वस्य **भावशुद्ध्या** हृदयशुद्ध्या 'निवासशय्यासन' इत्युक्तसर्वविधकैङ्कर्यकरणकुतूहलेनेति यावत् । **स एव सन्** 'रसो वै सः' इत्युक्तभगवद्रूप एव सन् । 'विश्वम्भरे बहुमुखप्रतिपन्नभोगः शेषात्मना तु भवतीं शिरसा दधाति' इति भगवद्रूपतया प्रतिपादनात् । **सर्वमारोपम्** । **सर्वो** भगवान् ; 'सर्वः शर्वः शिवः स्थाणुः' इति सहस्रनामोक्तेः । **मा** लक्ष्मीः । तयोः **आरोपं** आरोहणम् । आङ्पूर्वकरुहो णिचि घञ् । **वहति** । स्वस्मिन् दिव्यदम्पती आरोपयतीत्यर्थः । **तदपि** भुवनभीषणसर्परूपवहनेऽपि तत्रानास्था न भवति ; सर्परूपेणैव विग्रहादिकं प्रतिष्ठाप्य पूजाद्यनुष्ठानादिति भावः । **तदुपाधिषु** तत्समशीलेषु सर्पान्तरेषु आस्था च न भवति । जन्यमात्रं कालोपाधिरित्यादौ **उपाधिशब्दस्य** समशीलार्थकत्वात् । यदि च उपाधिशब्दस्य धर्मपरतया कालगतधर्मवत्त्वमेव विवक्ष्येत—तदाऽपि तत्साधर्म्यमेव फलिष्यतीत्युक्तार्थ एव पर्यवसितिर्बोद्धव्या । अनेन च क्रूरजात्युद्भवानामपि गुणातिशयश्चेत् पूज्यता, अन्येषां तज्जातीयानां तद्विरहश्च प्रतिपाद्यत इति प्रस्तुतार्थोपयोगोऽवसेयः ॥ ६ ॥

1 ஸ்ப்படிகமென்பது இயற்கையிலே சுத்தமாய் பளபளப்பாயிருக்கும். அது அதுவாகவேயிருந்து தன்னிடத்தில் இல்லாதவற்றை ஏறிட்டால் எல்லாம் பொறுத்து வருகிறது. இப்படி ஏறிடும்படியிருப்பதால் அதனிடம் மதிப்புக் குறைவதில்லை. ஏறிடும் வஸ்துக்களில் மதிப்பு வைப்பது

மில்லை. (படிகத்தின் அருகில் சிவப்பு மஞ்சள் போன்ற பல நிறங்களான செம்பருத்தி போன்ற வஸ்துக்கள் இருந்தால் அவற்றின் நிறம் அதிலே தோன்றும். அது வெறும் தோற்றமே யன்றி உண்மையில் படிகத்திற்கு நிறமாற்றமில்லை. ஒருவர் தூஷிப்பதால் நல்லவன் கெட்டவனுகான்.

'ஸ்ப்படிகஸ்வபாவசுத்யா' என்றோ 'ஸ்ப்படிகஸ்வபாவசுத்த:' என்றோ ஒரேபதமாகக் கொண்டால் ஸ்படிகத்தின்ஸ்பவபாவமுடையனுய் சுத்தனுனபுருஷன் என்ன குற்றமேறிடப்பட்டாலும் கவலைப் படான். அவனிடம் மதிப்புப் போகாதென்றபொருள் நேராகவே கிடைக்கும்.

शुद्ध इति पाठे स एवेत्यस्य शुद्ध एवेत्यर्थः सुलभः । स्फटिकस्वभावशुद्ध इति एकपदपक्षेऽपि तदा क्रियाकर्तुः कण्ठोक्तिः ।

2 அத்வைதமதப் பொருள்—ஸ்படிகம்போல் நிர்மலமான ப்ரஹ்மம் (ஸத்) அஸ்தி என்று தோன்றுவதாய், இது இருக்கிறது அது இருக்கிறதென்றவாறு இது அது எல்லா வஸ்துக்களாகவும் கற்பிக்கப் படுகிறது. ஆயினும் கற்பனையாகப் பொய்யான ப்ரபஞ்சத்திலே அல்லது அதன் காரணமான அவித்யையிலே பற்றின்றி அதனையே பெற முயல்வர்.

3 விசிஷ்டாத்வைதம்—ஒவ்வொரு ஜீவாத்மாவும் இயற்கையில் நிர்மலமானது. அனுதிகர்மவசத்தினுல் பல சரீரம் கொண்டு பலவிதமான அபிமானத்திற்கு இடமாகிறது. விவேகிகளுக்கு தேஹாதிகளில் பற்று வராது.

4 ஸ்படமென்ருல் படம். க என்ருல் தலை. படமுள்ள பல தலைகளையுடையதும் இயற்கையில் வெளுப்புமான ஆதிசேஷன் தன் மேல் ஸர்வ எனப்படும் பகவானும் மா எனப்படும் லக்ஷ்மியும் பள்ளிகொள்ள ஏறியிருப்பதை ஏற்றுக்கொள்கிறுன். அதனுல்—ஆதிசேஷனிடத்தில் பாம்பென்று அநாதரவு உலகுக்குக் கிடையாது—பூஜையே செய்வர். அவனைப் போன்ற வேறு பாம்புகளிடத்தில் மதிப்பும் உண்டாவதில்லை.

स्थलपरिशेषितजलधेः सविधे सञ्जातडम्बरं जलदम् ।
प्रहसन्ति पाण्ड्यनद्यः शुक्तिमुखैर्मौक्तिकस्त्यानैः ॥ ७ ॥

अत्र च महाप्राज्ञपण्डितसार्वभौमसन्निधौ अत्यल्पज्ञस्य कस्यचित् क्षुद्रपुरुषस्य स्वज्ञानसीमामविज्ञया स्वपाण्डित्यभ्रममूलकव्यावघोषीविजृम्भणे सति पार्श्वस्थपामरजनपरिहास्यतैव फलति । न खल्वेतत्कोलाहलमात्रेण ततोऽपि ज्ञानातिशयं कश्चन मन्येतेत्यमुमर्थमन्यया अप्रस्तुतप्रशंसया प्रकाशयति स्थलेति । स्थलं परिशेषः यस्मिन् सः स्थलपरिशेषः । तथाविधः कृतः स्थलपरिशेषितः । तादृशो जलधिः समुद्रो येन तथोक्तः अगस्त्यमहर्षिः तस्य 'ध्रुवमिह चतुराम्भोनिधिरचितापोशानकर्मणि मुनीन्द्रे', 'विन्ध्यस्तम्भादविहतगतेर्विष्वगाचान्तसिन्धोः', 'कलशीसुतेन करपल्लवोदरे चुळकीकृतस्त्वमसि केन याचितः'

इत्याद्युक्तरीत्या स्वहस्तपुटमध्यलग्नां प्रथमाचमनमात्रेऽप्यपर्याप्तपानीयां चतुःसमुद्रीं कथञ्चित् पीतवतः, प्रभावेन महतो ह्रस्वमुनेरित्यर्थः । यथोच्यते—'भवतु वपुषा यावांस्तावानगस्त्यरुषा पुनर्निधिरयमपामीषदपानस्तवांसि नमोऽस्तु वः' इति, 'मुनेः कलशजन्मनो जयति काऽपि गम्भीरता यया चुळकमम्भसामपि निधिः समुत्पद्यते' इति च ।

अत्र स्थलपरिशेषितेति कर्मणि प्रयोगात्—स्थलमप्यपरिशेषेण भोक्तुंशक्नुयादेवायं महर्षिः ; किं तु निखिलभूतजातनिवासस्थलप्रदित्सापरवशः स्वेच्छयैव परिशेषयामास स्थलमिति प्रतीयते । एतेन महासमुद्रमध्ये यत्किञ्चिदम्भःकणकबळनादेवात्यर्थं गर्जतो जलदात् अतिप्रशान्तगम्भीरस्य महामुनेः, परमाणुकणादिव पर्वतस्य किमपि कष्ठपासं सर्वप्रकारउत्कर्षस्त्वमुक्तं भवति ।

सविध इत्यनेन 'अगस्त्यचरितामाशाम्', 'अगस्त्यगिरिनिम्नगासुभगवीचिकासोदर—' इत्यादिप्रमाणगणैर्दक्षिणदिशि मलयाचलशिखरे अगस्त्यवासप्रतीत्या, 'मलयं प्राप्य विक्रीडन् मृगाद्यैः परितो भ्रमन् । पुष्कलवर्तकाद्यांस्तान् चतुरो मेघनायकान् ॥ आसीनांस्तत्तटे दृष्ट्वा जग्राहानुगतो भटैः' इति स्कान्दवचनेन मेघानां मलयगिरितटवासप्रतीत्या च उभयोरत्यन्तप्रत्यासत्तिर्बोद्ध्यते । अत्र च अगस्त्यस्येति वक्तव्ये उक्तभङ्ग्यन्तरेणाभिधानात् पर्यायोक्तमलङ्कारः । तेन च निखिलजगद्विस्मयावहाश्चर्यचर्यापर्याप्तत्वात् महामहिमत्वं द्योत्यते । सविध इत्यनेन तादृशमहाप्रभावमुनिवरयशश्चन्द्रिकाधवळेषु चतुर्दशसु भुवनेषु यत्र कुत्रचित्कोणेऽपि मेघस्य गर्जितं प्रहासपदम् ; किमुत समक्षमेवेति द्योत्यते ।

सञ्जातडम्बरम् । डम्बरः सदर्पगर्जितम् ; अम्बुरुहडम्बरचौर्यनिघ्नमित्यादौ तादृशार्थे प्रयोगात् । आडम्बरशब्दस्य तूर्यरवपरतायाः 'आडम्बरस्तूर्यरवे गजेन्द्राणां च गर्जिते' इत्यमरकोशतः, 'आडम्बरः समारम्भे गजगर्जितत्तूर्ययोः' इति विश्वप्रकाशादितश्च प्रतीयमानतया अत्र स्वगर्जितस्यैव विजयतूर्यघोषत्वेन मेघाभिमानविषयताद्योतनाय डम्बरशब्दः प्रयुक्तः । डम्बराडम्बरशब्दौ च समानार्थकौ सर्वत्र प्रयुक्तौ । तथा च तादृशमहर्षिपार्श्वे उदग्रवज्रनिर्घातसदृशमहाघोषकर्तारमिति पर्यवसितार्थः । यद्यपि डम्बरशब्दस्य सदर्पगर्जितार्थकतायां दृप्तपद्धतिसङ्गतिरेवास्य श्लोकस्य भवति—तथापि तादृशदर्पमूलभूताविवेकनिरूपणार्थमेवात्र प्रकृतश्लोकसङ्कलनमिति बोद्ध्यम् । दृप्तपद्धतौ च, 'अपि सत्पथनिष्ठानाम्' इति श्लोक एव तादृशदर्पव्यापारो निरूपयिष्यत इति विवेकः । सविधे सञ्जातडम्बरमित्येताभ्यां सविधस्थितिमात्रमेवास्य परिहासास्पदम् ; अत्यन्तलज्जावहत्वात् ; किं पुनर्विपुलगर्जितेन उद्दामदर्पद्योतकेनेति निर्लज्जतातिशयो व्यज्यते । एवमेतत्पदाभ्याम्—'कदाचित् स्वावमानादिशङ्कया मुनिः प्रकुप्येत् , तदा चतुःसागराम्भस्समग्रभक्षणेऽप्यशान्तोदन्यस्यास्य कियानयं ग्रासो जलदपोतकः' इति शङ्कालेशमन्तरेण तत्समीपदेशगर्जनात् जडमयत्वकाष्ठा प्रतिष्ठाप्यते । सम्यगर्थकसमुपसर्गसज्ञाप्य योगदध्यानिविष्टचेतसोऽपि महर्षेरेतदाडम्बरकोलाहलेन जागरणं सुप्तव्याघ्रप्रबोधनमिवानर्थावहं भवेदिति बोद्ध्यते ।

जलदमित्यनेन—जलानि धीयन्तेऽस्मिन्निति व्युत्पत्तिलभ्यानन्यसामान्यजलपूर्णताकात् समुद्रादेत-त्पीतोत्सृष्टात् पल्वलादिसाधारणं जलदातृत्वमात्रमत्र न विशेषद्योतकम्, अपित्वपकर्षातिशयमेवेति सूच्यते। एवं जलदपदेन स्वपीतमल्पतोयमपि स्वान्तर्निवेशमलभमानं परस्मै दत्तमिति द्योतयता सोदरेककोणलग्न-चतुस्समुद्रात् महर्षेरप्यपकर्षातिशयप्रकाशनमुखेन महत्साम्यसम्पिपादयिषया आरम्भशौर्यमात्रमेव दुर्जना-नाम्, न तु स्वकृतमत्यल्पकृत्यमपि जरयितुं शक्तिरेषामिति सूचितम्। एवं जलं ददातीति व्युत्पत्त्या, दानेन द्विषन्तो मित्रा भवन्तीति श्रुत्यनुरोधादगस्त्यविजयाय सहायसंपादनमपि ध्वन्यते। एवमेतत्पदेन निखिलजलधिकुक्षिम्भरेः कुम्भयोनेः समीपे स्वस्य जलप्रदानबिरुदोद्घोषणं अयस्कारवाटिकायां सूचीवि-क्रयवत् अपहास्यताभूमिरिति प्रतीयते। यद्वा—जलं द्यति खण्डयतीत्यर्थकरणात् मध्येसमुद्रमनेन यत्किञ्चिज्जलमात्रं विभज्य खण्डितम्, न तु पूर्णं भक्षितमिति प्रतीयते।

एवं स्थलपरिशेषितेत्यनेन 'अब्धिर्लङ्घित एव वानरभटैः किंत्वस्य गम्भीरताम् पातालनिमग्नपीवर-तनुर्जानाति मन्थाचलः' इति न्यायेन समुद्रमध्यतलमापातालमखिलैरप्यवलोकितमगस्त्यपाने। जलदपाने तु तन्मध्यगतयादोविशेषाविशेषं जलमात्रमेव किञ्चित् पीतम्, न त्वधःप्रदेश इयद्दूर इत्यपि ज्ञातुं शक्यते तेनेति सूचितम्। एवं स्थलपरिशेषितेत्यनेन निरन्तरवृथागर्जनशीलस्य जलनिधेस्तर्जनाय तदीयं जलमात्रं पीत्वा स्थलं परिशेषितमगस्त्येन; क्षुद्रस्य जलदस्य गर्जिते श्रुते तु स्थलमपि न परिशेषयेत्। यद्वा तद्वदस्यापि स्थलपरिशेषणे तु तूलपिण्डायमानः क्षणमात्रेण विशीर्णो भवेदयमिति द्योत्यते। एवं स्थलमेव परितः शेषितम्, न तन्मध्यगतानि यादांस्यपीति सूचयता तादृशयादोनिःशेषीकरणफलेदित्यपि ध्वनितम्। अनेन च, "चतुरुदधिपानचेष्टादृष्टेऽपि से मुनावुद्यमाने", "ध्रुवमिह चतुरम्भोनिधिप्रचितापो-शानकर्मणि मुनीन्द्रे। स्कन्नमन्यानि ततश्चकम्पिरे सप्त भुवनानि" इत्युक्तक्रमेण निखिलभुवनभीषणाद्भुत-महाक्षुत्तृष्णमुनिदर्शनेन कम्पमानेषु निखिललोकेषु जडस्वरूपस्यास्य न भयलेशोऽपीति तदीयाविवेककाष्ठा प्रतिपाद्यते। ततश्च महाशान्तस्य महामुनेः स्वदेशवासादिप्रीत्यैव कृपया परिशेषितोऽयमिति भावः।

अस्तु तावत् कृपयैव परित्यागः; किन्त्वस्य इदानीं डम्बरं विजृम्भतस्येति चेत्—तत्रोत्तरमविदुर्दशा-निशामने. 'सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते' इति न्यायेन कुम्भयोन्युदरकुम्भे वातापिदानवदशापत्तिरेव ज्यायसी; न पुनः पामरपरिहासपदतेत्यमुमर्थमुत्तरार्धेन स्फोरयति प्रहसन्तीति। पाण्ड्यनद्य इत्यनेन तद्देशस्थिताः ताम्रपर्णी, वह्ना, क्षुद्राश्रमक्षेत्रगामिनी नदी च विवक्षिताः। बहुवचनाच्चैतासां जलदप्रहासार्थं सङ्घीभूतता द्योत्यते। यद्वा एककालिकत्वरूपं यौगपद्यं वा हसनक्रियायाम्। प्रहसन्ति प्रकर्षेण हसन्ति, भयलेशमन्तरेण तरलतरङ्गकरतालपूर्वकं हसन्तीत्यर्थः। अनेन निखिलजगत्प्रसिद्धापराधस्य सङ्घीभूय परिहसनेऽपि न काऽपि क्षतिरिति सूचितम्, येन तत्पक्षीयः कोऽपि नास्तीति। अत्र हासक्रियामहिम्ना पाण्ड्यनदीनां स्त्रीसङ्घत्वसमाधिर्द्योत्यते। शुक्तिमुखैः शुक्तय एव मुखानीति रूपकम् उपमितसमासे हि पूर्वपदार्थप्राधान्येन प्रहासक्रियान्वयानुपपत्तेः। 'मुक्तास्फोटः स्त्रियां शुक्तिः' इत्यमर-

कोशात् शुक्तिशब्देन मुक्ताफलप्रसूतिस्थानभूतयादोविशेषशरीरमुच्यते । तच्च पद्मकोशसङ्काशत्वात् मुखत्वेन रूप्यते । मौक्तिकस्त्यानैः मुक्ता एव मौक्तिकानि मुक्ताफलानि । विनयादित्वात् स्वार्थे ठक् । राक्षसादिशब्दवत् प्रयोगानुरोधात् लिङ्गव्यत्ययः । तैः स्त्यानानि सम्पूर्णानीति तदर्थः । 'संयोगादेरातो धातोर्यण्वतः' इति स्त्यायतेर्निष्ठानत्वम् । "शुक्तेश्च शङ्खात् जायन्ते मौक्तिकानि बहूनि च । बाहुल्यात् गुणबाहुल्यात् श्लक्ष्णं शुक्तिसमुद्भवम्' इति स्कान्दवचनमत्र स्त्यानशब्देन स्मारितम् । अत्र शुक्तीनां मुखत्वेन रूपणात् मौक्तिकानां दन्तत्वरूपणं व्यज्यत इत्येकदेशो रूपकस्य व्यङ्ग्यतया विवर्तनादेकदेशविवर्ति सावयवरूपकम् । तदुक्तं रसगङ्गाधरे—यत्र च कचिदवयवे शब्दोपात्तमारोप्यमाणं कचिच्चार्थसामर्थ्याक्षिप्तं तदेकदेशे शब्दानुपात्तविषयके अवयवरूपके विवर्तनात् स्वस्वरूपगोपनेनान्यथात्वेन वर्तनादेकदेशविवर्तीति । अनेन च रूपकेण निखिलदन्ताभिव्यक्तिसूचनात् हासस्य सकलजनवेद्यत्वरूपमुच्चैष्ट्वं व्यज्यते । एवमेव पाण्ड्यनदीनां सुन्दरीत्वरूपणमपि गम्यत इति तत्राप्येकदेशविवर्तिरूपकं बोध्यम् । अत्र च प्रहसन्ति पाण्ड्यनद्य इत्यनेन स्त्रीणामपि प्रहासविषयत्वकथनात् आस्त्रीबालवृद्धं सुप्रसिद्धेयम् अयुक्तकारिता जलदस्येति ध्वनितम् । यद्वा प्रहसन्तीत्यनेन स्वभर्तृविनाशमुत्पादयत कुम्भयोनेः के वाऽपकुर्युरिति चिरात् प्रतीक्षमाणानां कदाचित् सगर्जितजलदस्य कस्यचित् प्रत्यासत्तिं प्रतिपद्य, यद्ययं कदाचित् पराजयेत अस्मदपकारिणं कलशयोनिमिति सञ्जातप्रत्याशानां सद्य एव द्युमणिपुरःस्थितखद्योतवदुत्पद्यमानां दुर्दशामवेक्ष्य, 'येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम्' इत्युक्तरीत्या किमेवमस्माभिश्चिन्तितमिति सवैलक्ष्यं परस्परमुखावलोकनेन प्रहसन्तीत्यर्थो ध्वन्यते । एवं जलं द्यति खण्डयतीत्यर्थे समुद्रपीती मुनिवरोऽयं असत्पतिमखण्डमेवोत्सृष्टवान्, अयं तु जलदः प्रतिक्षणं विभज्य विभज्य खण्डयित्वा पर्वताग्रेषु प्रक्षिपतीत्यत्यन्तरोषाविष्टानां पाण्ड्यनदीनां कलशयोनिसविधसञ्जातमविनयं वीक्ष्य सद्य एवास्य दुर्दशा काचन भविष्यतीति सन्तोषस्फोरकमेव वा सङ्घीभूय प्रहसनमिति बोद्धव्यम् । अथ वा जलदवर्धितत्वेन तत्कन्यास्थानीयाः नद्योऽपि हसन्ति । स्वपितुरवमाने परिहासानौचित्येऽपि ईदृशाविवेकसमालोके स्वबन्धूनामपि हासो भवतीति भावः ।

एवं मौक्तिकस्त्यानैरित्यनेन नद्यन्तराणामीदृशरत्नादिदर्पविरहात् प्रशान्तगामित्वम्, पाण्ड्यनदीनां पुनरतिविपुलरत्नगर्भत्वात् घनमदमेदुरतया सर्वदा परपरिहसनादिव्यग्रता च द्योत्यत इत्यादिध्वनिपरम्परा यावन्मति विभावनीया । वस्तुतस्तु "ईशादस्त्राण्यधिगतवतां क्षत्रियाणां प्रभावात् कारागारस्थितिमधिगतैः सिक्तसस्यान् पयोदैः' इत्युक्तरीत्या एतावन्तं कालमस्मद्देशराजैरविनयगळनाय निगळबन्धे स्थापितोऽद्यैव विमुक्तोऽपि सद्य एव महानुभावकुम्भयोनिसविध एवाविनयं कर्तुमारेभे । अतः पूर्वशिक्षितस्यापि दुर्विनयानपायात् सदाऽस्य कारागृहस्थापनमेवोचितमिति परस्परं परिहसन्तीति वा हेतुसम्भावना विभावनीया । अथ 'कम्पन्ते गिरयः पुरन्दरभिया मैनाकमुख्याः पुनः क्रन्दन्त्यम्बुधराः स्फुरन्ति बडबावक्त्रोद्गता वह्नयः । भोः कुम्भोद्भव मुच्यतां जलनिधिः स्वस्त्यस्तु ते सांप्रतम्' इति त्वदीयाक्रन्दनासहनतयैव हि जलधिं मोचयामास भगवान् कुम्भयोनिः ; पुनश्च एतादृशाविनयदर्शने हि तव जीवनमेव

न लभ्येतेति वा प्रहासहेतुरुन्नेयः । यद्वा—'प्रससादोदयादम्भः कुम्भयोनेर्महौजसः' इत्यगस्त्यसान्निध्य महिम्ना सर्वाणि जलजातानि प्रसन्नानि भवन्ति । जलदस्य चास्य जलप्रचुरत्वेऽपि नान्तर्वैशद्यलेश उदपद्यतेति विस्मयगर्भ एव प्रहास इत्यवसेयम् ।

तदेवमेतेन द्रमिडभटजङ्घाजवभृतिन्यायेन अत्यन्ताशक्ता द्रमिडदेशीयाः ; तत्रापि तद्दक्षिणावधिः पाण्ड्यदेशः ; तत्रापि स्त्रियः ; तत्रापि दुर्मृतभर्तृकाः ; तत्रापि विरोधिसन्निधिरित्याद्यञ्चितपरम्परापरमकाष्ठापन्नाः पाण्ड्यनद्योऽपि परिहसन्ति जलदाविवेकावलोकादिति पर्यवसितार्थः । आहत्य चानेन श्लोकेनात्यल्पसाराणामेव लोके महत्सन्निधावविनयोद्योगः तदवेक्षणेऽपि महतां कोपलेशवैधुर्यं च प्रत्यवस्थाप्यते ।

अत्र च पूर्वोक्तसावयवरूपकानुप्राणिता हेतूत्प्रेक्षैव गम्या । तद्व्यञ्जकशब्दाभावात् यथोक्तं दण्डिना—'मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः । उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः' इति । अत्र शुक्तिगतमुक्ताप्रकाशस्य पाण्ड्यनदीप्रहासत्वेनाध्यवसितस्य स्वसविधगतायुक्तकारिजलददर्शननिमित्तकत्वमेवोत्प्रेक्ष्यते । तत्र च जलदस्यागस्त्यसविध सर्गाङ्गितस्थितिरेव सञ्जातडम्बरत्वेनाध्यवसीयते । तादृशजलदप्रत्यासत्तिरेव पाण्ड्यनदीनां तद्दर्शनत्वेनाध्यवसीयते । दर्शनमन्तरेण प्रहासानुदयात् दर्शनमत्राऽऽर्थं समर्थनीयम् । यद्यपि श्रवणमपि प्रहासहेतुर्भवति । तथापि तस्य सर्वदेशीयसाधारण्येनासाधकत्वात्, दर्शनमूलत्वेन श्रवणस्य प्राथमिकमुपजीव्यं च दर्शनमेव प्रहासहेतुतया कल्पयितुमुचितम् । अतः सविधस्थितिरूपदर्शनमेव हेतुत्वेन गम्यत इत्यवगम्यम् । अथवा शुक्तिगतमुक्ताप्रकाश एव तादृजलदकर्मकपाण्ड्यनदीकर्तृकप्रहासत्वेनोत्प्रेक्ष्यत इति स्वरूपोत्प्रेक्षैव बोद्धव्या । न च—अत्र 'सम्बन्धातिशयोक्तिः स्यादयोगे योगकल्पनम् । सौधाट्टानि पुरस्यास्य स्पृशन्ति विधुमण्डलम्' इत्यादिवत् सम्बन्धातिशयोक्तिरेव स्यात् ; अत एव, 'यमवाप्य विदर्भभूः प्रभुं हसति द्यामपि शक्रभर्तृकाम्' इत्यत्रातिशयोक्तिरेवोक्ता व्याख्यातृभिरिति वाच्यम्—सौधाट्टानीत्यत्र चन्द्रमण्डलाभिमुखमूर्ध्वदेशव्यापनस्य तत्स्पर्शनत्वेन सम्भावने तु तत्राप्युत्प्रेक्षाया अनाक्षेपात् ; परन्तु व्यञ्जकाभावात् गम्या भवतु । हसति द्यामपीत्यादौ तु द्योकर्मकहासत्वोत्प्रेक्षायाः सामग्रीविरहादेवासम्भवः । तद्भिन्नत्वेन निश्चितस्य तद्वृत्तिधर्मनिमित्तकं तत्त्वेन सम्भावनं ह्युत्प्रेक्षा । अत्र कस्य हासत्वेन सम्भावनम्, किं वा तन्निमित्तमिति विवेचने उत्प्रेक्षालङ्कारशङ्कैव नावतरति । प्रकृते शुक्तिप्रकाशवत् तत्र कस्यचित् सम्भावनाधिकरणस्यादर्शनात् । अतस्तत्र चक्रमिरे सप्त भुवनानीत्यत्रेव सम्बन्धातिशयोक्तिरेव युक्तिमती । इह तु शुक्तिमुखैः प्रहसन्तीति शुक्तिप्रकाशे अविनीतजलददर्शननिमित्तकहासत्वसम्भावनाकरणे न काऽप्यसङ्गतिः । किञ्चात्रातिशयोक्तिवादिनः सञ्जातडम्बरं जलदमिति कर्मान्वयः सर्वथा न घटत एव । शुक्तिगतप्रकाशस्य हासत्वेन निगीर्यमाणस्य जलदकर्मकत्वासम्भवात् । हसति द्यामपीत्यत्र विदर्भदेशस्य स्वर्गावधिकोत्कर्ष एव तत्कर्मकहासत्वेनोपवर्ण्यते । अत्र तु पाण्ड्यनदीनां शुक्तिप्रकाशादिषु प्रहासत्वोपचारसम्भवेऽपि तस्य जलदकर्मकत्वं कथमायातीति प्रष्टव्यम् । यदि च प्रहासस्य सकर्मकत्वात् जलदस्य च सन्निहितत्वात् स एव कर्मतयाऽन्वेतीत्युच्येत, तदा ततोऽपि सन्निहितानां कूलस्थवृक्षादीनामेव तत्कर्मता प्रसजेदिति न किञ्चिदेतत् । किञ्च धर्मिणोऽप्रकृतत्वमप्यत्रातिशयोक्तिं व्याहन्ति सौधाट्टानां तत्र प्रस्तुतत्वेन तथात्वोपगमात् । प्रस्तुतधर्मिण्ययुक्तसम्बन्धकथनं हि सा । अत्र तु पाण्ड्यनदीनामतथात्वात्र तस्य धर्मितया प्रवेशो विशोभत इति । इवशब्दाद्यध्याहारे तु सुप्रसिद्धमेवात्रोत्प्रेक्षात्वं सकलाक्षिसाक्षिकम् ।

विग्रहादुक्तार्थलाभोऽवसेयः । तादृशश्रीरामसन्निधौ सञ्जाताडम्बरं नितरां स्वप्रभावमुद्गर्जन्तं जलदं मेघनादम् । जलदशब्देन मेघनादशब्दैकदेशसूचनम्, 'क्रुरग्रहस्स केतुश्चन्द्रम्' इत्यादिवत् । सत्याभीमादिशब्दवत् नामैकदेशे नामग्रहणं वा । तत्रापि इन्द्रपर्यायाणामिन्द्रकोपवाचकशब्दघटकत्ववत् चन्द्रपर्यायाणां कर्पूरवाचकत्ववच्च मेघपर्यायाणामपि तन्नामघटकत्वात् जलदशब्दोऽपि मेघनादवाचक एवेति बोद्धव्यम् । गर्जितं ध्वनेन डिम्भेन श्रीदाशरथिसन्निधौ, "क्षुद्राः सन्त्रासमेते विजहतु हरयः क्षुण्णशक्रेभकुम्भा युष्मद्गात्रेषु लज्जां दधति परममी सायकाः सम्पतन्तः । सौमित्रे तिष्ठ पात्रं त्वमसि न हि रुषां नन्वहं मेघनादः किञ्चित् भ्रूभङ्गलीलानियमितजलधिं राममन्वेषयामि" इत्यादि । श्रीरामायणे च, 'तच्छ्रुत्वा राक्षसेन्द्रस्य गर्जितं लक्ष्मणस्तदा । अभीतवदनः क्रुद्धो रावणिं वाक्यमब्रवीत्' इति प्रसिद्धं तद्गर्जितम् । तं च पाण्ड्यनद्यः प्रहसन्ति । 'चापमानय सौमित्रे शरांश्चाशीविषोपमान्' इति निरवधिकजलजातशोषधिजलनिधिगर्जनतर्जननिपुणस्य रामबाणस्यात्यल्पजडमयमेघनादव्यापादनमीषत्करं लज्जाकरञ्चेति मत्वा परिजनमुखेन तं घातयामास भगवानिति पाण्ड्यनद्यः परिहसन्तीवेत्युत्प्रेक्षा । अत्र च श्रीरामसेतोः पाण्ड्यदेशसीमासमुद्रव्याप्ततया तद्देशनदीनां तत्रत्यसागरे प्रवेष्टुमायान्तीनां 'ताम्रपर्णीसमेतस्ये'त्युक्तरीत्या स्थलमयसेतावेव स्वीयमौक्तिकजालनिक्षेपावश्यंभावात् तादृशमुक्ताप्रकाशे तत्सन्निहितलङ्कापुरवृत्तान्तदर्शनजनितप्रहासत्वमुत्प्रेक्ष्यत इति निर्गलितार्थः । अत्र च नन्वहं मेघनाद इत्यत्र इन्द्रजित्पदमनिर्दिश्य मेघनादपदनिर्देशादर्थान्तरमपि ध्वन्यते । (?) 'मेघनादस्य मूलं तु मुखस्थं तारवेष्टितम् । परवादी भवेन्मूकोऽथवा याति दिगन्तरम्' इति मेघनादस्य स्वमुखस्थस्यापि संमुखस्थप्रतिवाद्युत्सारणसामर्थ्यसमर्थनादिति ।

(३) अत्र च लडयोरभेदादन्योऽप्यद्वैतमनभूमिकयाऽर्थबोधो भवति तथा हि—जडधिः परिपूर्णजडपदार्थघटितो व्यावहारिकः प्रपञ्चः । स च ब्रह्माधिष्ठानतया ब्रह्मणि भातस्तस्मिन्नवतिष्ठमानो वेदान्तजन्यब्रह्माद्वैतज्ञानेन समूलमुन्मूल्यते । तथा च तादृशं ब्रह्मज्ञानमेव स्थलपरिशेषितजडधि । स्थलस्थानीयस्य अधिष्ठानस्य ब्रह्ममात्रस्य परिशेषणात । परं तु स च्छिन्नमूलोऽपि प्रपञ्चः सूक्ष्मतया स्थितेन स्वकारणेन सह किञ्चित्कालमनुवर्तते । चिरकालाभ्यस्ताया द्वैतवासनायाः अद्वैतज्ञानोत्पत्तिक्षण एव झटिति विनाशायोगेन किञ्चित्कालं बाधितानुवृत्त्यभ्युपगमात् । अतस्तादृशब्रह्मज्ञानस्य सविधे सञ्जाताडम्बरम् अविनाशेन तिष्ठन्तम् । शत्रोः पुरतः स्वस्वरूपप्रदर्शनरूपं प्रत्यवस्थानमेवात्र डम्बरः । जडदं जडवस्तुसृष्टिकरमज्ञानम्, ब्रह्मज्ञानेन मूलाज्ञानस्य विनाशेऽपि सूक्ष्मरूपेण तदवस्थानोपगमात । उक्तं हि लघुचन्द्रिकायाम्—सा स्थूलरूपा संस्कारादिरूपा च; जीवन्मुक्तौ संस्कारादिरूपेण मोहसत्त्वादिति । यद्वा स्थलपरिशेषितजडधिः अनवरताद्वैतभावनासहकृतं वेदान्तवाक्यजन्यमपरोक्षज्ञानम् । तदुत्तरक्षणे ब्रह्मव्यतिरिक्तस्य सर्वस्यापि निरन्वयनिवृत्तिरूपविदेहकैवल्याभ्युपगमात् । तस्य सविधं समानप्रकारकम् । विधाशब्दस्य प्रकारवाचित्वात् । समानस्येति योगविभागेनान्यत्रापि सादेशस्य निर्बाधत्वात् । तादृशं च वेदान्तवाक्यजन्यं परोक्षज्ञानम् । अथवा विधया सह वर्तत इति विग्रहे तदीयप्रकारविशिष्टार्थकत्वं सुलभमेव । परोक्षापरोक्षयोर्ब्रह्ममात्रविषयकत्वेन

समानप्रकारत्वात् । तस्मिन् । सतीति शेष । स्वज्ञ तडम्बरं नादृशपरोक्षज्ञानाविनाश्यत्वेन यथावदवतिष्ठमानं जडदम्—पुनश्च जडपदार्थप्रसूतिकरं मूलाज्ञानं पाण्डचनद्यः प्रहसन्ति । पाण्डचपदमविवक्षितम् । नद्य इति पदेन 'यथा नद्यः स्यन्दमानाः समुद्रे अस्तं गच्छन्ति नामरूपे विहाय' इति नद्यःपदघटितानि श्रुतिवाक्यानि । "इमास्सोम्य नद्यः पुरस्तात् प्राच्यस्स्यन्दन्ते तास्समुद्रात् समुद्रमेवापियन्ति । यथा तत्र न विदुरियमहमस्मीति" इत्यादयो बहुवचनविवक्षिताः । शब्दानुकारमात्रत्वेनाव्ययसरूपत्वात् बहुवचनार्थकत्वमप्यविरुद्धम् । तस्यैव दृष्टान्तवाचकत्वेन प्रधानत्वात् तेनैवेतरपदोपलक्षणं बोध्यम् । मौक्तिकस्त्यानैः मुक्ताफलसदृक्षाति-स्वच्छार्थसमृद्धैः शुक्तिमुखैः शुक्तिवत् प्रकाशमानैः शाब्दबोधप्रकारैः प्रहसन्ति । विनश्यदवस्थस्यापीदृशो डम्बर इति परिहसन्तीत्यर्थः । यथा समुद्रं प्रति स्यन्दमाना महानद्यः स्वमूलभूतमहाह्रदादिविच्छेदे क्रमेण समुद्र एव सन्निपत्य नामरूपविभागानर्हं निरन्वयं नाशमाप्नुवन्ति, तथा छिन्नमूलः प्रपञ्चोपि विशरि-तुमारब्धः क्रमात् सूक्ष्मरूपमप्यपहाय समूलं विलीयत इति स्पष्टार्थप्रतिपादकानि श्रुतिवाक्यानि परिह-सन्तीति अतिशयोक्तिगर्भो वाक्यार्थः सम्पन्नो भवतीति बोध्यम् । अत्र च द्वैतिसार्वभौमेनापि कविना अद्वैतमतसिद्धार्थसूचनमपि विच्छित्तिविशेष एव । यथा अद्वैतिनापि श्रीहर्षेण, 'अधिगत्य जगत्यधीश्वरात्' इति श्लोके द्वैतिमतसिद्धार्थो निवेशितः, तद्वत् पूर्वापरप्रकरणसूचिताद्वैतमतप्रक्रियाया बुद्धिस्थत्वात् तत्सूचनमपि भवति चमत्क्रियेति । एवमुत्तरत्रापि बोध्यम् ।

(4) एवमत्रोतथ्यमुनिवृत्तान्तोऽपि प्रतीयते । तथा ह्यानुशासनिकपर्वणि महाभारते श्रूयते—"भद्रा सोमस्य दुहिता रूपेण परमा मता । यस्यास्तुल्यं पतिं सोम उतथ्यं समपश्यत ॥ सा च तीव्रं तपस्तेपे महाभागा यशस्विनी । उतथ्यार्थे तु चार्वङ्गी परं नियममास्थिता । तत आहूय चोतथ्यं ददावत्रिर्य-शस्विनीम् ॥ भार्यार्थे स तु जग्राह विधिवत् भूरिदक्षिणः । तां त्वकामयत श्रीमान् वरुणः पूर्वमेव ह ॥ स चागम्य वनप्रस्थं यमुनायां जहार ताम् । जलेश्वरस्तु हृत्वा तामनयत् स्वपुरं प्रति ॥ परमाद्भुत-सङ्काशं षट्सहस्रशतं ह्रदम् । तत्र देवस्तया सार्धं रेमे राजन् जलेश्वरः । अथाख्यातमुतथ्याय ततः पत्नच-मर्दनम् ॥ तच्छ्रुत्वा नारदात् सर्वमुतथ्यो नारदं तदा । प्रोवाच गच्छ ब्रूहि त्वं वरुणं परुषं वचः ॥ मद्वाक्यात् मुञ्च मे भार्यां कस्मात् त्वं हृतवानसि । इत्युक्तो वचनात् तस्य नारदेन जलेश्वरः ॥ ममैषा सुप्रिया भीरुर्नैनामुत्स्त्रष्टुमुत्सहे । इत्युक्तो वरुणेनाथ नारदः प्राप्य वै मुनिम् । उतथ्यमब्रवीद्वाक्यं नाति-हृष्टमना इव । गळे गृहीत्वा क्षिप्तोऽस्मि वरुणेन महामुने । न प्रयच्छति ते भार्यां यत् ते कार्यं कुरुष्व तत् । नारदस्य वचः श्रुत्वा क्रुद्धः प्राज्वलदङ्गिराः ॥ अपिबत् तेजसा वारि विष्टभ्य सुमहातपाः । पीयमाने तु सर्वस्मिंस्तोये वै सलिलेश्वरः ॥ सुहृद्भिः क्षोभ्यमाणोऽपि नैवामुञ्चत तां तदा । ततः क्रुद्धोऽब्रवीद्-भूमिमुतथ्यो ब्राह्मणोत्तमः ॥ दर्शयस्व स्थलं भद्रे षट्सहस्रशतं ह्रदम् । ततस्तदिरिणं जातं समुद्रश्चापसर्पित. ॥ तस्माद्देशान्नदीं चैव प्रोवाचासौ द्विजोत्तमः । अदृश्या गच्छ भीरु त्वं सरस्वति मरून् प्रति ॥ तस्मिन् संशोषिते देशे भद्रामादाय वारिपः । अददात् शरणं गत्वा भार्यामङ्गिरसाय वै ॥ प्रतिगृह्य तु तां

भार्यामुतथ्यः सुमनाभवत् । मुमोच च जगद्दुःखात् वरुणं चैव हैहय" इति। तथा चायमर्थः—जलधि-शब्देन जलपूर्णं षट्सहस्रशतह्रदसमुद्रनद्यादिकं सर्वमपि जलमयं विवक्षितम् । तत् सर्वं स्थलपरिशेषीकुर्वतः उतथ्यमुनेः सविधे सञ्जातयुद्धडम्बरम् भार्यां तव न मुञ्चामीति गर्जन्तं जलदं सर्वत्र जलप्रदानाधिकृतं वरुणं पाण्ड्यनद्यः प्रहसन्ति । वरुणस्य मलयाचलस्थितमेघनयकनियमनाय प्रतिपदं तत्र समागमनात् तद्देशोद्भवा नद्यः तद्दर्शनमात्रेण स्व(तत्र ?)परिभूतिमुतथ्यप्रापितां स्मरन्त्यः शश्वत् प्रहसन्ति ईदृशाशक्ततम-स्वनायकचरितमिति । यद्वा वरुणस्यापांपतित्वव्यवहारात् नदीनां तत्पत्नीत्वलाभात स्वभर्तारमन्यस्त्रीहरणसक्तं तत्पतिना परिभूतं चोद्वीक्ष्य हसन्तीति ध्येयम् ॥ ७ ॥

ஸ்த்தலபரிசேஷிதஜலதே: ஸவிதே ஸஞ்ஜாதடம்பரம் ஜலதம்।
ப்ரஹஸந்தி பாண்ட்யநத்ய: சுக்திமுகைர் மௌக்திகஸ்த்யாநை: ॥ 7 ॥

1 கடலிருந்த இடத்தை மட்டும் விட்டு முழுக் கடலையும் ஓர் ஆசமனத்தில் உட்கொண்ட அகத்தி முனிவரின் அருகிலே, ஏதோ சிறிது கடல்நீரை உட்கொண்டு அதையும் வைத்துக் கொள்ளமுடியாமல் கண்ட இடத்தில் விட்டு விடுகிற மேகம் ஆடம்பரமாக கர்ஜித்துக் கிளர்ந்து மேல் செல்வதைக் கண்டு, பாண்டிய தேசத்து நதிகளெல்லாம் முத்துக்கள் நிறைந்த வாய்களுடன் கூடின முத்துச் சிப்பிகளைக் கொண்டு இதற்கு இவ்வளவு கர்வமா என்று சிரிக்கின்றன போலும் (இங்கு ஹாஸத்திற்குப் பல அபிப்ராயங்களை அழகாக உல்லேகித்திருக்கிறார் உரைகாரர்.) அகத்தி மஹர்ஷி தென் திக்கில் இருப்பதாலும் முத்துக்கள் தென்தேசத்து நதியில் நிரம்ப உண்டாகையாலும் பாண்டிய நதிகள் என்றது. தாம்ரபர்ணி ஒன்றில்தான் முத்துக்கள் இருப்பதாக ப்ரசித்தி என்று கேட்டுக்கொண்டு எல்லா நதிகளிலும் உண்டென்று உரையில் ஸ்த்தாபிக்கிறார். தாம்ர பர்ணிக்கே பல கிளைகள் இருப்பதால் பாண்ட்யநத்ய: என்ற பன்மை பொருந்துமென்றும் ஸமாதானம் செய்தார். ஹம்ஸஸந்தேசத்திலே இதே கவி மேகங்கள் பாண்டிய அரசர்களால் சிறையில் அடைக்கப் பட்டன என்று பண்டைய வரலாற்றைக் குறித்திருப்பதால் அந்த தேசத்து நதிகள், சிறையிலிருந்த பிறகும் உனக்கு அஹங்காரம் போகவில்லையென்று பரிஹாஸம் செய்வது பொருந்துமெனவும் கூறப் பட்டுள்ளது—பிறவும் காண்க.

2 கடலையே வற்றச் செய்து தலமாக்குகிறேனென்ற ஸங்கற்பித்த மஹாபுருஷனை இராமனுக்கு அருகே மேகநாதனென்ற இந்த்ரஜித்துச் செய்யும் கர்ஜனையைக் கேட்டு ஸேதுவின் ஓரம் சேர்ந்த நதிகள் முத்துச் சிப்பிகளை விரித்து அவனைப் பரிஹஸிக்கின்றன. (உன் நாதம் மேகநாதம் தானே, கடலின் ஒலியையே யழிக்கும் ராமனின் வில்லொலிக்கு இது ஈடாகுமோ எனவும் கருத்தாம்.)

2 स्थलमात्रं शेषयन् सागरं शोषयिष्यामीति कृतसंकल्पो रामः इतिवत् स्थलेन—सेतुना परिशेषितः परितः भिन्नः कृतः जलधिर्येनेति कृतसेतुबन्धो राम उच्यत इत्यपि सुवचम् । एवञ्च सेतुसमीपे समागताः नद्यः मुक्ताशुक्तिभिर्मेघनादं परिहसन्तीति विवक्षितार्थलाभसौकर्यमपि ।

3 அத்வைதிமத விஷயம்— பொய்யான ப்ரபஞ்சத்தின் தோற்றங்களுக்கெல்லாம் அதிஷ்டான ஸ்த்தலமான ப்ரஹ்மம் ஒன்றையே நிறுத்தி ஜடப்ரபஞ்சத்தை யழிக்கும் தத்துவ ஜ்ஞானத்தின் அருகிலே ஜீவந்முக்தி காலத்திலே சிறிது மிகுந்து ஜடவ்யவஹாரம் சிறிது நடத்தும் அஜ்ஞாநாம்சத்தை நத்ய: என்றுற் போன்ற சொற்கள் கொண்ட வேத வாக்யங்கள் தங்கள் பொருளான முத்துக்களான முக்தி (மோக்ஷ) விஷயங்களைக் கொண்டு பரிஹஸிக்கின்றன. அதாவது நதிகள் கடலில் மறைகின்றது போல் எல்லாம் மறையுமென்றது விரைவில் ஏற்படு மாகையால் இந்தச் சிதறின அஜ்ஞானம் எத்தனை நாளிருக்குமென்கிறன என்றதாம். இப்படி பல பொருள்கள் ஊஹிக்கலாமென்று உரைகாரர் சொல்லுகிறபடி வேறு பொருளும் ஆராயலாமாகையால்—

வேறு மதவிஷயமாகவும் கூறலாம். நதி வாக்யம் முதலான பேதச்ருதிகளால் ஜீவேச்வர பேதமும் ஜீவ பேதமும் ஸ்பஷ்டமாயிருப்பதால் அந்த ச்ருதிகள் அத்வைத ஜ்ஞானத்தைப் பரிஹஸிக்கின்றன. பேத ஜ்ஞானம் நன்ருகப் பெற்றவர்களின் அருகில் இந்த அபேத ஜ்ஞானத்தின் ஆடம்பரம் செல்லாதாதலின். இதன் விரிவு—

(क) जलधिः-जडस्थानमठादिः तादृशस्थानेषु जडान् निरस्य मठादिस्थलमात्रपरिशेषणसमर्थ-प्राज्ञसविधे जलदं जडखण्डकत्वेनाद्वैत्यभिमतमखण्डवाक्यार्थज्ञानं वस्तुतो विपरीतज्ञानत्वात्, 'ततो भूय इव तमः' इति जडसंसारवृद्धिकरं बह्वाडम्बराद्वैतग्रन्थदर्शितम्, नद्यः इति पदघटिताः श्रुति-वाचः समुद्रान्नदीनामिव ब्रह्मणो जीवानां मुक्तावपि भेदवादिन्यो बह्व्यः श्रुतयः अनिर्वचनीयार्थस्थापकशुक्तिदृष्टान्तप्रमुखार्थैः सह परिहसन्ति । शुक्त्यादिदृष्टान्तानौचित्यमद्वैतवाक्यार्थबाधादिकञ्च परिकल्य्य हसन्तीति यावत् । मुक्तिरेव मुक्तिका । तत्संबद्धार्थजातं मौक्तिकं तत्सान्द्रैः शुक्तिमुखैः शुक्त्यधीनैः रजतादिभिः सहेत्यर्थः । शुक्तिरजतादेरप्यनिर्वचनीयत्वात् हास्यता ।

(ख) एवं विशिष्टाद्वैतरीत्याऽर्थे पाण्डयेति संबोधनं स्यात् । श्रीविष्णुचित्तो नाम दिव्यसूरिः राजानं पाण्ड्यं संबोध्याऽऽह—जडवर्धकसर्वपरवादिकुक्षिम्भरेः सतः समीपे आडम्बरेण अविद्या-द्यर्थवादिनमद्वैतिनं नदीसमुद्रदृष्टान्तेन भेदवादिन्यः श्रुतयो हसन्तीति । एवञ्च प्रथमश्लोके नीवी-शब्दः श्रीविष्णुचित्तस्वायत्तीकृतनिधिग्रन्थिपरोऽपि स्यादिति पूर्वैरालोचितत्वेन कैश्चिदुक्तमपि युज्यते । सुभाषितस्य सम्यग्वादिन इयं नीवी राज्ञा यथावन्मुद्रिता गोष्ठीपुराधिपाभिमानतुङ्ग-संपन्न-कविप्रभृतिभिर्मध्यस्थसहृदयमध्ये समर्पिता निर्गुणवादि प्रभृतिभिः भगवत्स्वभूतस्वात्म चौर्यपरै-रहार्यधना भवतीति तदर्थसंभवात् । एवञ्च आदितः एतावत् विष्णुचित्तोक्तिरूपं स्यात् ।

இப்படி பாண்டியராஜனை விளித்துப் பெரியாழ்வார் சொல்லுவதாகக் கொள்ளலாம். முதல் ச்லோகத்தில் நீவி என்றதும் வாதப்போரில் அவர் பெற்ற கிழிச்சீரையைக் கூறும்—விரிவு வடமொழியில். (7)

4 (சந்திரனின் பெண்ணுன பத்ரையென்பவள் உதத்ய மஹர்ஷிக்குக் கொடுக்கப்பட்டிருக்க அவளிடத்தில் முன்னமே காதல் கொண்டிருந்த வருணன் அவளைக் கொண்டு போய்விட்டான். நாரதர் மூலம் இது

தெரிந்து உதத்தியர் ஆஜ்ஞாபித்தும் அவனுக்கு விட மனம் வரவில்லை. உடனே உதத்தியமுனி முனிந்து அவனில்லமான மிகப் பெரிதான மடுவை வற்றச்செய்து ஸ்த்தலமாக்கினர். கடலும் அப்புறப்படுத்தப் பட்டது. பாலைவனமாய்விட்டது. உடனே வருணன் வெட்கமுற்று பத்ரையைக் கொணர்ந்து கொடுத்து விட்டான், ஆக) மலயமலையில் மேகங்களுக்கு எஜமானனை வருணன் அக்ரமம் செய்து உதத்திய முனியினிடம் டம்பமாக முதலில் இருந்ததற்கு பாண்டிய நதிகள் பரிஹஸிக்கின்றன என்றதும் பொருளாம். (7)

प्रतिपन्नवामदृष्टिस्स्तन इव कश्चित् समुन्नतोऽप्यधिकम् ।
पतनमधिगम्य समये परिहासरसावहो भवति ॥ ८ ॥

पूर्वश्लोके किञ्चिदूज्ञस्य कस्यचित् महाप्राज्ञसन्निधौ स्वपाण्डित्यदर्पाविष्करणे परिहासपदता प्रतिपादिता ; इदानीं महाप्राज्ञस्यापि कस्यचित् देशकालस्वभावात् किञ्चिद्वैकल्यसम्भवेऽपि महाजन-परिहास्यतासिद्धौ किमु वक्तव्यमत्यल्पसारपतने इतीममर्थमनेकदृष्टान्तप्रदर्शनेन स्थिरीकरोति **प्रतिपन्नेति** ।

(1. क.) **कश्चित्** प्राज्ञपुरुषः **समुन्नतो**ऽपि शास्त्रपाण्डित्य-राजसम्माननादिभिः सर्वोत्कृष्टोऽपि, **प्रतिपन्ना** प्राप्ता, **वामा** वक्रा । वामं वल्गुप्रतीपयोरित्यमरः । **दृष्टिः** बुद्धिः यस्य तथोक्तश्चेत्—पाण्डित्यमदेन साधुजनावज्ञादिप्रतिकूलबुद्धियुक्तश्चेदित्यर्थः । सः **समये** कदाचिद्विस्मरणाद्युपनिपाते **पतनमधिगम्य** समीचीनोत्तरमदत्वा **परिहासरसावहः** पूर्वावज्ञातैः किञ्चिदूज्ञैरेव परिहास्यो भवतीत्यर्थः ।

(ख) यद्वा **समुन्नतो**ऽपि तर्कव्याकरणादिसामान्यशास्त्रशृङ्गारूढोऽपि, **प्रतिपन्नवामदृष्टिः** प्राप्तव्यधिकरणबुद्धिः, नास्तिक्यात् स्वसिद्धान्तश्रद्धाशून्य इत्यर्थः, **समये** स्वसिद्धान्ते । समयः शपथाचार-सिद्धान्तेष्विति मेदिनी । **पतनमधिगम्य** अप्रवृत्तबुद्धिः सन् **परिहासरसावहो भवति** साधूनां परिहसनीयो भवति ।

(ग) यद्वा **कश्चिद्**धनिकः **समुन्नतो**ऽपि गर्भश्रीमान् अहरहर्द्रव्यसञ्चयादियुक्तोऽपि, **प्रतिपन्नवाम-दृष्टिः** प्राप्तप्रतिकूलदर्शनश्चेत्, जनापकारादिनिरतश्चेदित्यर्थः, **समये** कालवैगुण्येनाऽऽपदाद्युत्पत्तिसमये **परिहासरसावहो भवति** सर्वजनावमानयोग्यो भवतीत्यर्थः । [अनेन च] 'सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः' इत्यादिशास्त्रबलात् सर्वोत्कृष्टैश्वर्यसम्पन्नानामपि कदाचित् पतनमवश्यम्भावीति प्रतिबुद्धो जनापकारादितो विरतो भवेदिति पर्यवसितार्थः ।

(घ) अथवा **कश्चित्** श्रोत्रियाग्रेसरः **समुन्नतोपि** वैदिकाचारादिभिर्बहुमतोऽपि **प्रतिपन्नवामदृष्टिः** प्राप्तविरुद्धदर्शनः स्वकीयशौचाचाराग्रहङ्कारेण इतरजनतिरस्कारकारी चेदित्यर्थः । यद्वा समये प्रतिपन्न-वामदृष्टिः—लीलोद्यानादिविविक्तस्थलीषु कदाचित् क्रीडार्थमागतातिसुन्दरविलोचनाकटाक्षपातवशीकृत इत्यर्थः । 'वामं सव्ये प्रतीपे च द्रविणे चातिसुन्दरे' इति विश्वः । तदुक्तम्—'इन्द्रियाणां हि चरतां

यद्येकं क्षरतीन्द्रियम् । तेनास्य क्षरति प्रज्ञा दृतेः पादादिवोदकम् ॥', 'यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः । इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मन ॥', 'बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति' इति । **पतनमधिगम्य** तात्कालिकबुद्धिभ्रंशात् कथञ्चित् तत्सञ्जाय्युपनिपातेन पातित्यमधिगम्य **परिहासरसावहो भवति** अतिक्षुद्राणामपि छिद्रान्वेषिणां परिहसनभूमिर्भवति ।

यथा, **स्तन इव**—स्तनस्तु **अधिकं समुन्नतोऽपि** यौवनादिसमये प्रतिदिनं प्रवर्धमानोऽपि प्रतिपन्ना **वामदृष्टिः** तरुणी येन तथोक्तस्सन् **समये** वार्धकादिसमये **पतनमधिगम्य** शैथिल्यं प्राप्य परिहासरसावहो भवति । 'तुङ्गस्तनीपरीरम्भस्तुङ्गस्य तपसः फलम्' इत्युत्तुङ्गतपःफलतया सम्भावितोऽपि पयोधरः, 'स्तनपतनावधि जीवितं रतं वा' इति जीवितहानिपर्यन्तदुःखावहतया परिहासयोग्यो भवतीत्यर्थः । यद्वा परि—हा—सः रसावह इति छेदः । स्तनस्य पतने तत्परिहाराय **सः** स्तनः **परि** परितः । उपसर्गप्रतिरूपकमव्ययम् । **रसावहः** रसकल्कतैलावहः भवति । यथोक्तं वराहमिहिरेण—"श्रीपर्णिकाया रसकल्कसिद्धं तिलोद्भवं तैलवरं प्रदिष्टम् । तूलेन वक्षोजयुगे प्रदेयं प्रयाति वृद्धिं (पुष्टिं) पतितोऽपि नार्याः" इति । हा—खेदे ।

एवं सामान्यरूपतया अर्थबोधः । अथ विशेषरूपतयापि स प्रदर्श्यते ।

√(2) **कश्चित्** चन्द्रः **अधिकं समुन्नतोऽपि** प्रतिदिनं **वर्धमानोऽपि**, यद्वा उदयगिरिमारभ्य गगनमध्यपर्यन्तात्युच्चदेशे आरोहन्नपि **प्रतिपन्नवामदृष्टिः** भगवतो वामाक्षितां प्रतिपद्यमानः ; [यद्वा] **प्रतिपदि** शुक्लप्रथमायां **नवा** नूतना **आमं** अमापर्यन्तं **दृष्टिः** दर्शनं यस्येत्यपि केचित् । **समये** कृष्णपक्षे अर्धरात्रात्परं वा **पतनमधिगम्य**—पुनरपि क्षयं प्राप्य, गगनमध्यात् अधःप्रदेशाभिमुखं पतित्वा वा **परिहासरसावहो भवति** परितो हासः—प्रकाशः तेन यो रसः सन्तोषः तदुत्पादको भवति । 'वक्ष्यति च प्राचीं दिशमतिक्रम्य पतनं प्रतिपद्यते' इति ।

(3) एवं चतुर्मुखपरतयापि कश्चिदर्थः । कश्चिदित्यत्र **कः** **चिदिति** पदच्छेदः । **कः** ब्रह्मा 'मारुते वेधसि ब्रध्ने पुंसि कः' इत्यमरः । **चित्समुन्नतोपि** चिता—जगत्सृष्ट्याद्यौपयिकवेदादिज्ञानेन समुन्नतोऽपि—सर्वोत्कृष्टोऽपि **प्रतिपन्नवामदृष्टिः** अहमेव जगत्स्रष्टेत्यहङ्कारविकृतबुद्धिः । तथात्वं च **हस्तिगिरिमाहात्म्यब्रह्माण्डादा**वनुसन्धेयम् । **समये** तादृशाहङ्कारजनितभगवन्निग्रहादिसमये, **पतनमधिगम्य** वेदापहारादिना अज्ञानमनुभूय **परिहासरसावहो भवति** । 'वेदा मे परमं चक्षुः वेदा मे परमं धनम् । मम वेदा हृताः सर्वे दानवाभ्यां बलादितः । अन्धकारा इमे लोका जाता वै वेदवर्जिताः । वेदे हृतेऽहं किं कुर्यां लोकान् वै स्रष्टुमुद्यतः । अहो बत महत् दुःखं वेद-नाशनजं मम' इत्युक्तप्रकारेण रोदनादिति भावः ।

√(4) एवं काकपरतयापि । **कश्चित्** काकः **स्तने** सीतास्तनप्रदेशे, तद्गतपिशितांश इति यावत् । **समुदिव** प्रीतिमानिव भूत्वा । वस्तुतो हिंसार्थमेव तत्प्रवृत्तेरिति भावः । **अधिकं नतोऽपि**—'स पित्रा

च परित्यक्तः इत्युक्तक्रमेण अतीव गर्वभङ्गमवाप्तश्च **समये** सर्वजनपरित्यागसमये **पतनमधिगम्य,** 'स तं निपतितं भूमौ' इत्युक्तं पतनं प्राप्य **प्रतिपन्नवामदृष्टिः** दक्षिणाक्षिमोक्षणेन लब्धवामदृष्टिमात्रः **परिहासरसावहः** दिव्यदम्पत्योः स्वयमेव शिक्षणरक्षणादिकरणम् इतरेषां तद्रक्षणाक्षमतां च वीक्ष्य परस्परहासरसानुभवजनको भवतीत्यर्थः ।

(5) एवं कृष्णावतारपरतयापि कश्चित् । तथाहि—**कश्चित्** अनिर्वाच्यः परमात्मा **प्रतिपन्नः** गृहीतः **वामदृष्टीनां** गोपाङ्गनानां स्तनः येन तथोक्तः । **समुदित** तेन प्राप्तसन्तोष इव स्थितः । स्वतस्सिद्धानन्दस्य वस्तुतः किञ्चिदधीनत्वाभावादिति भावः । **अधिकं नतोऽपि** गोपिकाकरकुट्टनबन्धनाद्यङ्गीकारेणातिविनयमभिनयन्नपि । **अपिः** समुच्चये । **समये** प्रतिज्ञायाम् । समयः शपथाचारसिद्धान्तेष्विति मेदिनीकोशात्, समयबन्धः कृत इति प्रयोगाच्च समयशब्दः शपथाख्यप्रतिज्ञापरः । **पतनं** भङ्गम् **अधिगम्य** प्राप्य, भीष्मयुद्धे तद्वधार्थं चक्रधारणपूर्वकं रथादवप्लुत्य आयुधं न ग्रहीष्य इति पूर्वसङ्कल्पितप्रतिज्ञाभङ्गमवाप्य, **परिहासरसावहो भवति** । दुर्योधनादिगोष्ठ्याम्, उभयपक्षकक्ष्याद्व्यक्षसमक्षं 'सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते । येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम्' इत्यादि स्वयमेवोद्घुष्य सद्य एवातीव लाघवानुभवेन दुष्टचतुष्टयपरिहासभूमिर्भवतीति भावः ।

(6) एवं त्रिविक्रमावतारपरतयापि—**कश्चित्** परमात्मा **प्रतिपन्नवामदृष्टिः** प्रथमं वामन इति दृष्टिं प्राप्तः । वामनशब्दस्य ह्रस्वार्थकस्य पामादिगणपठितकौटिल्यार्थकवामन् शब्दोपरि मत्वर्थीयनप्रत्ययादिकरणनिष्पन्नत्वस्योक्ततया तादृशवामन्शब्दाद्वामशब्दाद्वा स्वाङ्गाद्धीनादित्युक्त अर्शआदिगणपाठान्तर्भावेना अच् प्रत्ययकरणात् टिलोपाच्च वाम इति रूपस्यापि तदर्थकस्य संभवमभिप्रेत्यात्र **वामदृष्टिरित्युक्तम्** । कौटिल्यार्थकवाधातोरौणादिकमनिन्प्रत्यये वामन् शब्दस्तदर्थकः । यद्वा नामैकदेशे नामग्रहणमिति न्यायेन वामनार्थे वामशब्दप्रयोग इति द्रष्टव्यम् । **अधिकं समुन्नतोऽपि** सद्य एवाऽऽक्रान्तसर्वभुवनश्च भवति । **समये** तत्समये **अपरि हा सः** इति च्छेदः । **सः** औदार्यादिप्रसिद्धो बलिचक्रवर्ती **अपरि** अपगतसंपत्कम् । रैशब्द ऐश्वर्यार्थकः । "राः पुंसि स्वर्णवित्तयोः" इति मेदिनी । **पतनं** अधःपतनं प्राप्य **रसां** पातालं **वहति** प्राप्नोति । रसारसातलशब्दौ समानार्थकौ । 'रसां विविशतुस्तूर्णमुदपूर्णे महोदधौ', 'जग्राह वेदान् अखिलान् रसातलगतान् हरिः' इति प्रयोगदर्शनात् । ईदृशमहोदारोऽप्यधोगतिमवापेति विस्मयं विषादं वा द्योतयति हाशब्दः ॥

(7) एवं शेषपरोऽपि कश्चिदर्थः । तथा हि; **कश्चित्** पन्नगाधिपः **अधिकं शिरसि** । 'कं शिरोऽम्बुनोः' इत्यमरः । **समुन्नतोऽपि** सहस्रसंख्यावानपि, अन्यशिरसामेतावत्संख्याविरहात् समुपसर्गः । प्रतिपन्ना, **वामे** वक्रगतौ **दृष्टिः** बुद्धिः येन तथोक्तः; जिह्मगत्वात् । यद्वा प्राप्तवक्रदर्शनः । वक्रगत्या वक्रदर्शनस्यानुमेयत्वात्; दर्शनानुगुण्येनैव गमनस्य लोकदृष्टत्वादिति भावः । **पतनमधिगम्य**

पाताळगमनं प्राप्य **परिहासेन** लीलया, अक्लेशेनेति यावत् , **रसां** भूमिं वहतीति तथोक्तो भवति । यद्वा **परितो हासेन** 'फणामणिव्रातमयूखमण्डलप्रकाशमानोदरदिव्यधामनि' इत्युक्तप्रकाशेन सह, रसावह इति योजना ॥

(8) एवमेव वराहावतारपरोऽपि । तत्र, 'खुरमध्यगतो यस्य मेरुः कणकणायते । क्वापि कल्पान्तवेशन्ते खुरदघ्ने' इत्युक्तविपुलतरविग्रहपरिग्रहादधिकं समुन्नतोऽपि **पतनमधिगम्य** समुद्रेऽवगाह्य **प्रतिपन्ना** प्राप्ता **वामदृष्टिः** पत्नी भूरूपा येन तथोक्तः सन् लीलया भूमिधरो भवति । 'लीलयोद्धरते महीम्', 'लीलया महीमुद्धरतो भगवतो महावराहस्य' इत्याद्युक्तेः । यद्वा परिहासोक्त्या सह भूमिवहनं विवक्षितम् । श्रीवाराहपुराणस्य तत्कालकृतोक्तिप्रत्युक्तिरूपत्वादिति भावः ।

(9) एवमुपासकपरोऽप्यन्य । **कश्चित्** उपासनाधिकारी **प्रतिपन्नवामदृष्टिः** प्राप्तविरुद्धदृष्टिः नामब्रह्मेत्युपासीतेति विहितनामाद्यधिकरणकब्रह्मदृष्टियुक्तः **अधिकं** सुखे, 'कं शिरोम्बुसुखे क्लीबम्' इति रत्नमाला । **समुन्नतोऽपि** 'यस्मिन्नोष्णं न शीतं नारतिः', 'यन्न दुःखेन संभिन्नम्' इत्याद्युक्तनिरतिशयसुखरूपस्वर्गादिभागपि **समये** पुण्यक्षयावसरे **पतनमधिगम्य** 'क्षीणे पुण्ये मर्त्यलोकं विशन्ति' इत्युक्तभूतलपतनं प्राप्य परिहासेन **रसां** भूमिं वहति प्राप्नोतीति तथोक्तो भवति । उपासने प्रविश्यापि अचेतनमुपासीनः परिमितफलो बभूवायमिति प्राज्ञपरिहासेन भूमिप्राप्तो भवतीति यावत् ।

(10) एवं रावणपरोऽपि । वरबलादितोऽधिकं समुन्नतोऽपि **प्रतिपन्नवामदृष्टिः** लोकपालाङ्गनादिचौर्यपरः **पतनमधिगम्य** 'पपात स्यन्दनाद्भूमौ वृत्रो वज्रहतो यथा' इत्युक्तं पतनं प्राप्य परितः सन्तोषजनितहासरसावहो भवति । 'ततो विनेदुः संहृष्टा वानरा जितकाशिनः' इत्युक्तप्रकारेणेति भावः । यद्वा 'चपलकपिकुलानुक्रियमाणकाकुप्रकारकातरस्वरमन्दोदरी' इत्युक्तकपिकुलपरिहासपात्रं भवतीति भावः । यद्वा **अधिकं पतनमधिगम्य** 'शिवशिरसि शिरांसि यानि रेजुः शिवशिव तानि लुठन्ति गृध्रपादैः' इत्युक्तमतिखेदावहं शिरःपतनमधिगम्येति वा अर्थो बोद्धव्यः ।

(11) एवं शुकादिपरोऽपि कश्चिदर्थः । उक्तं हि सङ्कल्पसूर्योदये—"निरपायमुख्यरागं निजपक्षनिविष्टनित्यहरितत्वम् । गुणपञ्जरस्थितं त्वां शुकमिव मोक्ष्यामि दिव्यगतियोग्यम्" इति । तदयमर्थः—**कश्चित्** शुककपोतादिः **प्रतिपन्ना** प्राप्ता **वामदृष्टिः** अतिसुन्दरदर्शनं यस्य तथोक्तः **समुत्** सन्तोषजनकः । **अधिकं** शिरसि नमनवानपि, पञ्जरबन्धादिना अनवरतशिरोनतिमानपीत्यर्थः । **समये** क्रीडासमये **पतनमधिगम्य** गगनसञ्चारमाश्रित्य । पततेः पक्षिगतिवाचकतायाः, श्येनः पतति, श्येन एव भूत्वा सुवर्गं लोकं पतति, स यथा शकुनिः दिशं दिशं पतित्वा' इत्यादिलौकिकवैदिकप्रयोगैरवश्योपगम्यत्वात् । **परिहासो** लीला तद्रसावहो भवति । परिपूर्णानामपि शुककपोतादेः स्वेच्छया पञ्जरबन्धनं कदाचित् सन्तोषादिसमये तन्मोक्षणं च लीलारसावहं दृष्टमिति भावः ।

(12) एवं स्तन इवेति दृष्टान्तमहिम्ना 'य एष स्तन इवावलम्बते' इति श्रुतिप्रत्यभिज्ञापनात् तादृशं-हृदयकमलपरतयाऽपि कश्चिदर्थः। तथा हि—स्तन इव कश्चित् स्तनाकारः कश्चन हृदयकमलकोशः पतनमधिगम्य स्थितः अधोमुखतया स्थितः प्रतिपन्नवामदृष्टिः प्राप्तप्रतीपवर्तिनयनः। प्रतीपवर्तित्वं च अन्तर्मुखतया परिवृत्तिः। समुन्नतोऽपि योगमार्गादूर्ध्वमुखश्च भूत्वा परिहासेन परितो विकासेन रसावहः अन्तःस्थितपरमात्मसाक्षात्कारेण निरतिशयानन्दजनकः। यद्वा रसम् आनन्दरूपं परमात्मानमावहतीति तथोक्तो भवति। अत्र च 'उद्घाट्य योगकलया हृदयाब्जकोशम्' इत्युक्तक्रमेण योगाभ्यासमार्गेण स्वनयने यदा अन्तर्मुखतया परिवर्तेते, तदा अधोमुखो हृदयाब्जकोशोऽपि क्रमेणोर्ध्वमुखो भूत्वा तादृशयोग-परिपाकसमये विकासमाप्नोति। अनन्तरमेवान्तर्यामी साक्षात्क्रियत इति योगशास्त्रपरिपाटी स्फुटी कृता।

(13) एवमत्र मुरारिश्लोककटाक्षणादुद्बोधितः कश्चिदर्थोऽपि लीलार्थं विन्यस्तः। तथा ह्युक्तं तत्र।

'एतस्यां हि तुषारभूधरशिरःसीम्नि प्रियार्धेन च स्वेनार्धेन च तादृशे पशुपतौ वृत्तेऽर्धनारीश्वरे। शेषेणार्धयुगेन सप्रहसनं गौरीसखीभिस्तदा चक्रे दक्षिणवामयोर्विनिमयादन्योऽर्धनारीश्वरः" इति।

तदयमर्थः—कश्चित् रुद्रदेहः प्रतिपन्नौ पार्वत्या गृहीतौ वामदृष्टिस्तनौ वामनयनस्तनाद्युपलक्षितो वामभागः यस्य तथोक्तः। अत्र च 'स्वच्छन्दैकस्तनश्री' इति श्लोके स्तननयनादिविभागकरणस्योक्तत्वात्, स्तननयनादेः स्त्रीदेहगतवैलक्षण्यद्योतकत्वाच्च तन्मात्रोपादानमितरोपलक्षणार्थम्। समुन्नतोऽपि अर्धांशग्रहणात्पूर्वं ऊर्ध्वशिरस्कतया उपवेशादियोग्योऽपि। अनन्तरं पतनमधिगम्य अर्धदेहहानादधः पतनमवाप्य परिहासरसावहः व्यत्यस्तदक्षिणवामकार्धनारीश्वरान्तरकरणात् गौरीसखीनां क्रीडारसजनको भवतीति।

(14) अत्र च प्रहेळिकाप्रणाळ्याऽपि कश्चिदर्थः परिस्फुरति। तथा हि—समुन्नतपदस्तनपदाभ्यां 'समुन्नतघनस्तनस्तबकचुम्बितुम्बीफलक्वणन्मधुरवीणया विबुधलोकलोलभ्रुवा' इति भोजराजकालिकः कश्चन श्लोकः प्रत्यभिज्ञाप्यते। तस्य च प्रथमपादगतं शब्दगुम्भगाम्भीर्यं द्वितीयपाद एव पतितम्। ततश्च ग्रन्थकारकृतिवत् पादचतुष्टयेऽपि अत्यन्तसरूपवर्णसमाद्यनुप्रासगुम्भनं नोक्तश्लोक इति एतत् कविपरिहासपदं भवतीति भावः। स्त्रीकर्तृकत्वात् प्रतिपन्नवामदृष्टित्वमस्यावसेयम्।

(15) अत्र च 'समये तिष्ठ सुग्रीव' इत्यादेः, 'पतनमधिगम्य समये' इत्यनेन प्रत्यभिज्ञापनात् सुग्रीवपरोऽप्यर्थोऽवसेयः। तत्र प्राप्ततारारुमादिस्त्रीगणः राज्यसुखादिना समुन्नतोऽपि समये पूर्वप्रतिज्ञातांशे पतनं विस्मरणमवाप्य परिहासरसावहो भवति। 'न च संकुचितः पन्थाः' इत्यादितः क्रुध्यति दाशरथौ सर्वेषामपि स्त्रीमुग्धोऽयं जड इति परिहासयोग्यो भवतीत्यर्थः। एवमन्येऽप्यर्था यथायथं चिन्तनीयाः।

सर्वेषामप्यर्थानां दृष्टान्तविषयोपयोगः सुलभ एव। अप्रस्तुतानेकार्थपरिस्फूर्तेः समासोक्तिश्च स्फुटा। उपमालङ्कारोऽप्यत्राधिकः। सा च पूर्णा। 'स्वर्गङ्गामवगाहते' इत्यत्रेव एकशब्दोपादानेनाद्ध्यवसिताभेदकसाधारणधर्मोपादानात्। संसृज्येते चेमे परस्परोपजीवकभावविरहादिति संग्रहः॥ ८॥

ப்ரதிபந்நவாமத்ருஷ்டிஸ்தந இவ கச்சித் ஸமுந்நதோऽப்யதிகம். பதநமதிகம்ய ஸமயே பரிஹாஸ ரஸாவஹோ பவதி ॥ 8 ॥

1 ஒருவன் ராஜகௌரவத்திலோ, சாஸ்த்ர ஜ்ஞானத்திலோ, பணத்திலோ, ஸதாசாரத்திலோ மிக்க உயர்ச்சியுடையனுயினும் வக்ரமான—சாஸ்த்ரத்திற்கு மாருன நோக்கு உடையனுகில் அல்லது (வாமத்ருஷ்டி) கண்ணழகுள்ள பிற ஸ்த்ரீகளோடு கலந்தானுகில், ஸமயத்திலே கீழ்க்கிறங்கி பரிஹஸிக்கப் படுகிறவனுகிருன். எது போல்—ஸ்தனம் போலே. அது இளமையில் ஸ்த்ரீயினிடம் நன்ருக வளர்ச்சி பெற்று வயது சென்ற போது விழுந்து பரிஹாஸத்திற்கு இடமாகிறது. (பரி-ஹா-ஸ:—ரஸாவஹ: என்று பதங்களைப் பிரிக்கில்) ஸ்தனம் விழுந்த பிறகும் (ஆயுர்வேத முறைப்படி) நான்கு பக்கங்களிலும் எண்ணெயோடு சேர்ந்த ச்ரீபர்ணியின் சாற்றை விழாமல் எழுச்சி பெறுதற்குச் சுமந்து வருகிறது—ஆச்சர்யம். எனவும் பொருளாம்.

2 प्रतिपत्—नव. आम दृष्टि: என்றவாறு பிரிக்க. वामदृष्टि என்று முன் போலவுமாம். பகவானுடைய இடது கண்ணைச் சார்ந்த ஒருவன்—அதாவது சந்த்ரன் ப்ரதிபத்தில்—ப்ரதமாதிதியில் புதியவனுய் அமாவாஸ்யை வரையில் கண்ணுக்குப் புலப்படுகிறவன் க்ருஷ்ண பக்ஷத்திலே கீழே இருந்துகொண்டு நான்கு பக்கங்களிலும் (ஹாஸ)ப்ரகாசத்தை—நிலாவைப் பரப்புகிருன். ஆம அமாவைச் சார்ந்த. அமா-அமாவாஸ்யை.

3 क: चि समुन्नत: என்று பிரிக்க. க:—பிரமன் ஜ்ஞாநாதிகளாலே பெரும் பதவியி லிருப்பவன் வாமத்ருஷ்டி—தான் ஸமர்த்தன் என்கிற விபரீத எண்ணமுடையவனுய் (மதுகைடபர்களாலே வேதங்கள் அபஹரிக்கப்படவே) கீழே விழுந்தவனுய் பிறர் சிரிக்கும்படியானுன்.

4 காகாசுரன் பிராட்டியின் ஸ்தனத்திலே समुत्—நமக்கு மாம்ஸம் கிடைத்ததென்ற ஆனந்தமுடையதாய் (ராமன் ப்ரஹ்மாஸ்த்ரம் ப்ரயோகித்த போது) எங்கும் பறந்து யாரை வணங்கியும் பயனில்லாமல் ராமனின் திருவடியில் வீழ்தலைப் பெற்று ப்ரதிபந்ந வாமத்ருஷ்டி—இடது கண்ணை மட்டும் அடைந்து பரிஹஸிக்கப்பட்டது.

5 கண்ணன் வாமத்ருஷ்டிகளான கோபஸ்திரீகளின் ஸ்தனங்களை அணைந்தவன், அவர்களுக்கும் மற்ற நீசர்களுக்கும் நத:-கீழ்ப்படிந்தவன் அதனுல் ஸமுத்—ஆனந்தமுடையவன். போரிலே பீஷ்மரிடம் ஸமயே—ப்ரதிஜ்ஞை செய்த போது—पतनमधिगम्य—ப்ரதிஜ்ஞையை விட்டு ஆயுதமெடுத்து துர்யோதநாதிகளுக்கு பரிஹாஸரஸத்தை உண்டு பண்ணினுன்.

6 பகவான் வாமத்ருஷ்டி: அழகிய வாமனத் தோற்றமுடையனுய் தானம் பெற்ற பிறகு ஓங்கி உயர்ந்தவனை. अ रि-ा-स: रसावह: என்று பிரிக்க. அந்த மாவலி எல்லாம் அளித்து அபரி(ரை—செல்வம்) செல்வம் இழந்தவனுகி இவ்வுலகினின்று கீழே விழுந்து (ரஸா) பாதாளத்திலே வாஸம் பெற்றவனுனன்.

7 ஆதிசேஷன் பாம்பானபடியாலே வாமமாய்—வக்ரமாய் வளைந்து வளைந்து போவதில் நோக்கு உடையனாய் அதிகம்—(கம்-தலை) தலை விஷயத்திலும் பெரியவனாய் அதாவது ஆயிரம் தலையுடையனாய் பாதாளம் சென்று தன் தலைகளால் (ரஸா) பூமியை வஹித்து வருகிறான். (அதற்காகவே தலை ஆயிரம் போலும்.) தனது படங்களிலிருக்கும் ரத்னங்களின் ஹாஸ—ஒளியாலே ரஸ-ஆவஹ-ரஸம் ஆனந்தத்தையும் விளைவிக்கிறான்.

8 வராஹப்பெருமான் கடலே குளம்பளவில் ஆம்படி நன்கு உயர்ந்தவனாய் கடலினுள்ளே புகுந்து வாமத்ருஷ்டி—அழகிய கண்களை யுடைய பூதேவியைப் பெற்று அவளோடு பரிஹாஸமாகப் பேசி பல உபதேசங்களாலே உலகுக்கு ஆனந்தம் விளைப்பவனானான்.

9 உபாஸகன் விஷயமாகவும் ஒரு பொருள்-உபாஸனம் செய்கிறவன் நேர்மையாக பக்தி யோகத்திலிழியாமல், நாமாத்யுபாஸனம் எனப்படும் த்ருஷ்டியுபாஸனம் (அதாவது கீழ்ப்பட்ட வஸ்துவை மேற்பட்ட வஸ்துவாக சாஸ்த்ரம் காண்பித்த வழியில் கற்பனையான உபாஸனம்) செய்து சிறந்த ஐச்வர்யம் பெற்றாலும் அந்தப் புண்யத்தின் முடிவில் வீழ்ச்சியுற்று (ரஸா) பூமியைச் சேருகிறான்.

10 ராவணன் வரபலத்தாலே எவ்வளவு உயர்ந்திருந்தும் அதி கம்—தலை விஷயமான வீழ்ச்சியுற்று—அதாவது தலைகள் அறுத்துத் தள்ளப் பட்டதாலும் தானே தேரினின்று வீழ்ந்ததாலும் பரிஹாஸத்திற்கு இடமானான்.

11 கிளி போன்ற பக்ஷி பார்வைக்கு அழகாய் கூட்டிலே ஸமுத்—களிப்புடன், அதி கம்—தலை விஷயமாக நத:- வணக்கமுற்று பதநம் அதிகம்ய—விடப்பட்ட போது வெளியில் பறந்து வளர்ப்போர்க்கு வேடிக்கையாயிருக்கும். स यथा शकुनिर्दिशं दिशं पतित्वा என்று உபநிஷத்தில் உள்ளது.

12 ஸ்தன இவ—ஸ்தனம் போல் தொங்கும் ஹ்ருதய கமலமானது வெளியினின்று மறித்து உள்ளே திருப்பப்பட்ட த்ருஷ்டியைப் பெற்று. யோகபலத்தாலே ஸமுந்நத:-நிமிர்த்தப்பட்டு பரி-நாலுபக்கமும் ஹாஸேந-மலர்ச்சியால் ரஸ—ஆனந்தத்தை விளைவிக்கின்றதாகும்.

13 பரமசிவன் அர்த்தநாரீச்வரமூர்த்தியாய் இடது பக்கம் ஸ்த்ரீயின் கண் ஸ்தனம் இவற்றைப் பெற்று ஒரு பாதியால் உயர்ச்சியைப் பெற்றாலும், மிகுந்த புருஷ உருவிற் பாதியும் பார்வதி யுருவிற் பாதியும் கீழே வீழ்ச்சியுற்றிருக்க, பார்வதியின் தோழிகள் அவற்றைக் கொண்டு மற்றோர் அர்த்தநாரீச்வர மூர்த்தி யமைத்து விநோதிக்க நேர்ந்தது. (என முராரிகவியின் வர்ணனம் இருப்பது இந்த ச்லோகத்தில் தோன்றும்.)

14 போஜராஜன் காலத்தில் செய்யப்பட்ட ஒரு ச்லோகத்தில் ஸ்தனம் முதலிய சொல்லுள்ள பாதம் கம்பீரமாய் சிறந்திருந்தாலும்

மேல் பாகம் வீழ்ச்சியுற்றிருந்ததால் சாதாரண கவி செய்ததென்று பரிஹஸிக்கப்பட்டது. அதுவும் இங்கே தோன்றும். (ச்லோகத்தில் வாமத்ருஷ்டி: ஸ்தந: என்று இருபதங்களாகவும், சில யோஜனையில் ஒரே பதமாகவும் கொள்ள வேண்டும்.)

15 ஸுக்ரீவன் ராமனால் அனுக்ரஹிக்கப் பெற்று வானரராஜ்யத்தால் மஹாராஜனானதும் வாமத்ருஷ்டிகளிடம்—ஸ்திரீகளிடம் சாபல்யத்தாலே, தான் செய்த ப்ரதிஜ்ஞையினின்று வீழ்ச்சியுற்று பரிஹஸிக்கப் பட்டானென்றதும் கிடைக்கும்.

बहु विदधत्युपकारान् गुप्त्या दुरितं प्रकाश्य पिदधति च।
सुहृदि विहिताहितमतिर्यन्न प्रत्युपकरोति न तत् ॥ ९ ॥

इदानीं [च] कथञ्चिदुपकारेणेति पूर्वप्रस्तुतां प्रसक्तानुप्रसक्तकथां परिसमाप्य तादृशप्रत्युपकार-स्वरूपमीदृशमिति निरूपयन् तादृशोपकारकरणेऽप्यनिपुणान् अविवेकिन उपालभते **बह्विति**।

सुहृदि 'बाल्यात्प्रभृति सुस्निग्धः' इत्युक्तस्वाभाविकसौहार्दशालिनि। कीदृशे। **उपकारान् बहु विदधति** सर्वथा उपकारकरणशीले। **गुप्त्या** गोपनेन। अषट्कर्णमित्यर्थः। **दुरितं** दोषं **प्रकाश्य** 'गुरुं रहसि बोधयेत्' इतिवत्, त्वयैतदकार्यं न कार्यमिति रहसि बोधयित्वा **पिदधति च**—अन्याज्ञेयत्वेनान्तर्धापयति च। तादृशे **सुहृदि** मित्रे **हितमतिः** अयमेव हित इति बुद्धिः न विहितेति **यत्**—'अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः' इति न्यायेन स्वदोषकथनादिजनितवैरस्येन तदुपरि हितबुद्ध्यकरणमित्यर्थः। **तत् न प्रत्युपकरोति**। सामान्ये नपुंसकम्। प्रत्युपकारो नेत्यर्थः। प्रत्युपकाररूपं न भवतीति यावत्; भावप्रधानमाख्यातमिति शास्त्रेण चैत्रकर्तृकः पाक इति धात्वर्थमुख्यविशेष्यकबोधस्यैवानुभविकताया वैयाकरणादिभिरङ्गीकारात्। आलङ्कारिकैरपि 'लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः' इत्यादौ तमःकर्तृकलेपनादिबोधस्यैवोपगमात्। 'न्यग्भूतोऽसौ क्रियापदे' इति दण्डी। एवं नैयायिकैरपि कैश्चित्, पश्य मृगो धावतीत्यादौ एकवाक्यत्वानुभवरसिकैः मृगकर्तृकधावनं पश्येति वाक्यार्थबोधोपगमाच्च। तदपलापेच्छूनामपि भावाख्यातस्थले धात्वर्थमुख्यविशेष्यकबोधोपगमेन प्रथमान्तकर्तृपद-समभिव्याहारमात्रेणान्यविधबोधकथनस्य कार्यकारणभावगौरवादिदोषकबलितत्वादप्रामाणिकत्वाच्चेति भावः। यद्वा तन्मतरीत्या कर्तृमुख्यविशेष्यकबोधोपगमेऽपि अत्र—तादृशसुहृदि हितमतिरनेन यत् यस्मात् न विहिता, तस्मात् कारणादयं **न प्रत्युपकरोति,** प्रत्युपकारकारी नेत्यर्थस्य सुलभता बोद्धव्या। 'न किञ्चिदपि कुर्वाणः सौख्यैर्दुःखान्यपोहति। तत् तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः' इत्युक्तक्रमेण प्रत्युपकार-सामन्यानर्हेऽपि सुहृज्जने हित इति बुद्धिकरणमात्रमेव प्रत्युपकारः; न तु पूर्वकृतानां सर्वेषामपि प्रतिकर्तव्यमिति नियमः, न वा परस्परं प्रत्युपकारमपेक्षते स्नेहस्वरूपमिति। तया च तादृशहितबुद्धेरप्यकरणे अयं प्रत्युपकर्ता नेति सामान्यरूपोऽयमर्थः।

(2) विशेषतस्तु भगवत्परोऽप्ययम्ः। सुहृदि 'सुहृदं सर्वभूतानाम्' इत्युक्तनिरुपाधिकसौहार्दवति भगवति। कीदृशे। **उपकारान् बहु विदधति** करणकलेवरप्रदानादिकमारभ्य पूर्वोक्तसर्वविधोपकारकरणशीले। **गुप्तया** रक्षणेन। रक्षणार्थमित्यर्थः। अध्ययनेन वसतीतिवत् फलस्य हेतुत्वविवक्षया तृतीया। **दुरितं प्रकाश्य** तत्कृतपापानां तद्रक्षणार्थमेव किञ्चित् फलप्रदानं कृत्वा अनिष्टप्रदानेन पापं प्रकाश्येति यावत्। अनिष्टप्रदानमपि पापान्तरारम्भपरिहारकतया रक्षणरूपमेवेति भावः। 'वधार्हमपि काकुत्स्थ कृपया पर्यपालयत्' इति अक्षिमोक्षणमपि रक्षणरूपमेव हि श्रुतमिति हृदयम्। उक्तं हि—'कृपे काकस्यैकं हितमिति हिनस्ति स्म नयनम्' इति। 'निहतिरक्षितानां हितम्' इत्यादि च। **पिदधति च**। अल्पानिष्टप्रदानमात्रेण तत्कृतानन्तदुष्कृतानामवश्यकर्तव्यनिग्रहादिसङ्कल्पं स्वरूपेण परित्यजतीत्यर्थः। कृपया सर्वमपि क्षाम्यतीति यावत्। तादृशे भगवति **हितमतिः स** एवोपायभूत इति बुद्धिः यस्मान्न विहिता, **तत् न प्रत्युपकरोति**। 'दद्यान्न प्रतिगृह्णीयात्' इति प्रत्युपकारसामान्यनिषेधकस्य भगवतः, 'कथञ्चिदुपकारेण कृतेनैकेन' इति चेतनकर्तृकहितबुद्धिमात्र एव प्रत्युपकारत्वबुद्धिकरणाभ्यनुज्ञानेऽपि तादृशबुद्धिमात्रस्याप्यकरणे कथञ्चिदपि प्रत्युपकर्ता न भवेदयमिति भावः। हितबुद्धिमात्रमपि न क्रियते जनैरित्यनुशयोऽत्र द्योत्यते॥

(3) एवमाचार्यपरतयाऽप्यर्थो बोद्धव्यः। 'ब्रह्मविद्याप्रदानस्य देवैरपि न शक्यते। प्रतिप्रदानम्' इत्युक्तबहुविधोपकारान् कुर्वति। शिष्यदोषादिकं तत्तत्काले बोधयित्वा तत्समाधानं च कुर्वति आचार्ये विषये शिष्यस्य हिते मतिः **हितमतिः** हितविषयकबुद्धिप्रवृत्तिरेव प्रत्युपकारः; न त्वन्यः। प्रत्युपकाराभावविधानादिति भावः॥

(4) एवं शिष्यपरोऽपि कश्चिदर्थः। गुरुकुलवासादिषु तत्तत्कैङ्कर्यरूपोपकारान् बहुश कुर्वति। दोषलेशमपि कदाचिदुपनतं 'गुरुं रहसि बोधयेत्' इति शास्त्रेण रहसि विज्ञाप्य अन्यैरज्ञातमेवाऽऽच्छादयति च साधुहृदये शिष्ये हितशिक्षा न विहितेति यत, तत न **प्रत्युपकरोत्येव**। शिष्यकर्तृकोपकाराणां सर्वेषामपि आचार्यकर्तृकहितोपदेश एव प्रत्युपकार इति भावः। अत्र च 'सुहृद्दुर्हृदौ मित्रामित्रयोः' इति मित्रार्थे निपातितस्य सुहृच्छब्दस्य आचार्यशिष्यादिविषये कथं प्रवृत्तिरिति चेत्—उच्यते। 'सखा दासोऽस्मि राघव' इत्युक्तक्रमेण दासत्वमित्रत्वयोर्विरोधभावात्। 'शिष्यस्तेऽहं' इत्युक्तपरमशिष्यतापन्नस्यापि धनञ्जयस्य, ''य एष पद्मपत्राक्षः पीतवासा महाभुजः। सुहृत् भ्राता च मित्रं च सम्बन्धी च तथाऽच्युतः। य इमान् सकलान् लोकान् चर्मवत् परिवेष्टयेत्। इच्छन् प्रभुरचिन्त्यात्मा गोविन्दः पुरुषोत्तमः। स्थितः प्रियहिते जिष्णोः स एव पुरुषोत्तमः'' इति महाभारते सुहृत्त्वमित्रत्वनिर्देशाच्च। वस्तुतः श्लेषस्थलमहिम्ना रूढ्यर्थविमोकेऽपि बाधकाभावात् शोभनं हृत यस्येति विग्रहलभ्यकेवलयोगार्थमात्रबोधकत्वमपि सम्भवतीति बोद्धव्यम्। अत एव प्रयुञ्जते सर्वभूतसुहृदमिति। न हि तिरश्चामपि मित्रता भगवति सुवचा॥

एवं स्वस्वहृदयपरोऽपि कश्चिदर्थः । सुहृदि शास्त्रश्रवणादिसंस्तुते साधुहृदये । कीदृशे । उपकारान् बहु विदधति 'मन एव मनुष्याणां कारणं बन्धमोक्षयोः' इत्याद्युक्तसकलविधसुपथप्रवृत्त्याद्युपयोगिनि । गुप्त्या एकान्ते दुरितं प्रकाश्य 'अदर्शि सङ्गोप्य' इत्युक्तरीत्या इतराज्ञातमेव दोषवैरस्यादिकमुत्पाद्य । उच्यते हि, 'स्वतः सतां ह्रीः परतोऽपि गुर्वी' इति । पिदधति पुनरपि तत्प्रवृत्त्यादिकं निरुन्धति तादृशे हृदये हितबुद्धिः न विहितेति यत्, तत् न प्रत्युपकरोति । 'स्वस्य च प्रियमात्मन', 'सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः', 'अखिलं विदुषामनाविलं सुहृदा च स्वहृदा च पश्यताम्' इत्याद्युक्तप्रामाण्यबुद्धिकरणमेव प्रत्युपकार इति व्यतिरेकमुखेनार्थबोधः ॥

एवं मातापितृसहस्रेभ्योऽपि वत्सलतरे शास्त्रेऽपि हितबुद्धिकरणं व्याख्यातम् । तत्र उपकारान् इतिकर्तव्यताः बहु विदधति बहुशो विदधति, दोषस्वरूपं प्रकाश्य तन्निरासकप्रायश्चित्तादिकं रक्षणार्थमुपदिशतीत्यर्थो योज्यः ॥

(7) एवं विभीषणपरतयाऽप्यपरोऽर्थः । तत्र सुहृदि विभीषणे 'हितं न गृह्णन्ति सुहृद्भिरीरितम्' इति स्वयमेवाभिधानात् । कथंभूते । बहुविदधत्युपकारान् लङ्कोज्जीवनोपायानां बहुशो विधायके । विहितं ह्येवमनेन 'इदं पुरस्यास्य सराक्षसस्य राज्ञश्च पथ्यं ससुहृज्जनस्य । सम्यग्घि वाक्यं स्वमतं ब्रवीमि नरेन्द्रपुत्राय ददाम पत्नीम्' इति, 'सीतां च रामाय निवेद्य देवीं वसेम राजन्निह वीतशोकाः' इति च । गुप्त्या दुरितं प्रकाश्य—'स रावणं महात्मानं विजने मन्त्रिसन्निधौ । उवाच हितमत्यर्थं वचनं हेतुनिश्चितम् । यदाप्रभृति वैदेही संप्राप्तेमां पुरीं तव । तदाप्रभृति दृश्यन्ते निमित्तान्यशुभानि नः' इत्यादिकमेकान्ते उपदिश्य, पिदधति च 'तदेवं प्रस्तुते कार्ये प्रायश्चित्तमिदं क्षमम् । रोचते यदि वैदेही राघवाय प्रदीयताम्' इति तन्निवृत्तिमार्गमपि प्रदर्शितवतीत्यर्थः । [रावणगतं दोषं प्राक् कुलाप्यनुक्तवति अग्रज इति मानितवति चेत्यर्थः ?] तादृशे सुहृदि 'हितं महार्थं मृदु हेतुसंहितम्' इत्युक्तरीत्या हितवक्तरीति भावः । विहिता अहितमतिः येन सः अहितबुद्धिकारी यत् यस्मात् हेतोः । 'न तु मित्रप्रवादेन संवसेच्छत्रुसेविना' इत्युक्तत्वात् तेनेति भावः । तत् तस्मात् सः न प्रत्युपकरोतीति न । प्रत्युपकरोत्येव । 'द्वौ नञौ प्रकृतमर्थं द्रढयतः' । रावणस्य बिभीषणे अहितबुद्धिकरणमेव प्रत्युपकारे पर्यवसितमिति यावत् । 'सोऽहं परुषितस्तेन दासवच्चावमनितिः । त्यक्त्वा पुत्रांश्च दारांश्च राघवं शरणं गतः' इति सद्य एव भगवत्प्राप्तिसिद्धेरिति भावः । अनेन दुर्जनसहवासापेक्षया तत्परित्याग एव श्रेयस्कर इति द्योत्यते । उच्यते हि 'सर्पादिवत् त्वदपराधिषु दूरयाताः' इति ।

अत्र च बहुविदधतीत्यादिविशेषणयोः हितबुद्धिकरणौपयिकगुणविशेषपौष्कल्याभिप्रायगर्भत्वात् सुहृदीति विशेष्यस्य च त्रैकालिकोपकारकरणोपयोग्यन्तःशुद्ध्याद्यभिप्रायगर्भत्वाच्च परिकरपरिकराङ्कुरालङ्कारौ । तौ च प्रस्तुतप्रस्तुताङ्कुरेण सङ्कीर्येते इति विवेकः । उक्तार्थानां कथञ्चित्प्रस्तुतत्वसम्पत्तेरिति ॥

பஹு³ விததத்யுபகாராந் கு³ப்த்யா து³ரிதம் ப்ரகாச்ய பி⁴ததி ச.
ஸு ஹ்ருதி விஹிதாஹிதமதி: யந்ந ப்ரத்யுபகரோதி ந தத் 9

तान् ध्नन्ति हन्त शान्तमिति प्राचीनं पाठान्तरम्। येभ्यस्सिद्धि प्राप्नुवन्ति। तानेव घ्नन्ति। हन्त; शान्तं पापम्। एतत्कथनमपि दोषायेत्यर्थः। एधान् दहन्तीति पाठः सरलः। शान्तमिति त्वत्रापि भवितुमर्हति।

உபகாரங்கள் பல செய்கின்றவனும், பாவம் செய்திருந்தால் ஏகாந்தத்தில், இது பாவம் என்று ஹிதமாகச் சொல்பவனும், பிறருக்கு அதை மறைக்கின்றவனுமான நல்ல மனமுடைய புருஷனிடம், இவன் நமக்கு ஹிதமானவன் என்கிற எண்ணமும் கொள்ளப்பட்டவில்லையாகில் ப்ரத்யுபகாரம் செய்ததாகாது. (ப்ரத்யுபகாரம் செய்யாமற் போனாலும் இவ் எண்ணமுமில்லையாகில் அவன் அவிவேகி. नरः प्रत्युपकारार्थी विपत्तिमभिकांक्षतीति न्यायात् विपदि प्रसक्तायां किल प्रत्युकारः। हित इति मतिस्तु सर्वदैव युज्यते।)

விபீஷணனிடம் ராவணன் நடந்துகொண்டதும் அவிவேகமாகும். இங்கே विहिताहितमतिः என்று ஒரே பதமாக்கி, விபீஷணனிடம் அஹித புத்தியைச் செய்த ராவணன் न प्रत्युपकरोतीति न; ப்ரயுபகாரம் செய்தவனே, ராவணன் அஹிதபுத்தியைப் பண்ணியதாலல்லவோ ராமனைச் சரண மடைய வாய்த்ததெனவும் பொருளாம். (ஆனால் இங்கே அவிவேகியை நிந்திக்க வேண்டுமாகையால் அதற்கு இப் பொருள் பொருந்தாது போலும். உபகாரமாகவானாலும் அவன் அவிவேகியே என்றதுமாம்.)

एवमर्थस्तु युज्यते, (क) विहिता अहितमतिर्येन तथाभूतस्सन् सुहृदि न प्रत्युपकरोतीति यत्—तत्—तस्मात् कारणात् न। स न भवति असत्प्राय इति। (ख) एवं वा सुहृदि सुहृद्विषये शास्त्रविहिता हितइति मतिर्यस्मान्नास्ति, तत्—तस्मादेव हेतोरयं न प्रत्युपकरोतीति। (ग)-यद्वा हितमतिर्विहिता। तदकरणं प्रत्यवायाय। न प्रत्युपकरोतीति यत् तत् न-न प्रत्यवायकरम्। प्रत्युपकारस्य परकीयापत्सापेक्षत्वात् स्वशक्तिसापेक्षत्वाच्च न तन्नियम इति भावः। अथवा विहिता हितमतिः अहितमतिकारी प्रत्युपकारं न करोतीति यत्, तन्नाश्चर्यम् अन्यदाश्चर्यमस्ति, तदुच्यते इति उत्तरश्लोकेनान्वयेन एकमहावाक्यता। (घ)-अपि वा अहितमतिकारी न प्रत्युपकरोतीति यत्, न तदेव, हितमतिकार्यपि न समये प्रत्युपकरोतीति इदमप्यनैपुण्यमित्यलम्।

எந்த காரணத்தினால் இவன் ஹிதமானவனென்ற புத்தியே ஒருவனால் கொள்ளப்படவில்லையோ, அதனாலேயே அவன்விஷயத்தில் ப்ரத்யுபகாரம் செய்கின்றவனாகான்.

அநாதியாகப் பலவாறு உடல் கருவி முதலானவற்றை யளித்து உபகாரமே செய்பவனும், காகாசுரன் போன்றார்க்குச் செய்த குற்றத் தைச் சிறிய தண்டனையால் விளக்கி ப்ரபலமான தண்டனைகளை உபேக்ஷிக் கின்றவனும், சமயத்தில் 'என் அடியார் அது செய்யார் செய்தாரேல் நன்று செய்தார்' என்பவனுமான பேரருளாளனிடம் ஹிதபுத்தியில்லை யாகில் அவிவேகியாவான். विदधतीत्यस्य, आश्रितविषये अम्बुजवासिन्या कृतेऽपि दूषणे नैष दोषोऽस्ति इति विवक्षतीत्यर्थः सुवचः।

4 ஆசார்யனிடம் சிஷ்யன் நன்ருக நடக்கவில்லையாகில், தவறு.

5 பணிவிடைகளைச் செய்து கொண்டு, குருவினிடம் ஏதேனும் குற்றம் காணப்பட்டால் ஏகாந்தத்தில் கூறி, யாருக்கும் தெரியாதபடி மறைக்கின்ற ஒழுங்கான சிஷ்யனுக்கு ஆசார்யன் ஹிதோபதேசமான சாஸ்த்ரங்களை அளிக்கவில்லையாகில், அது தகாது.

6 ஸுஹ்ருதி என்பதற்கு நல்ல ஹ்ருதயத்தினிடம் என்றும் ஸுஹ்ருத்தான சாஸ்திரத்தினிடம் என்றும் பொருள் கொண்டும் உரை செய்யலாம்.

एधान् दहन्ति शान्तान् (तान् घ्नन्ति हन्त शान्तं) येभ्यः सिद्ध्येयुरसितवर्त्मानः ।
अगणितनिजप्रका(णा)शैः किमाश्रयाशैरनाश्यमिह ॥ १० ॥

एतावता बहूपकर्तृष्वपि हितमतिकरणमात्रमेव प्रत्युपकारायालमिति प्रतिज्ञाय तत्प्रसङ्गात् तादृशबुद्धिकरणेऽप्यक्षमान् प्रत्युत सर्वविधोपकारकारिण एव निर्दयं निर्दहतः कृतघ्नमुख्यान् प्रथमोपकान्तान् सिंहावलोकितेन पुनरप्युपालभते **एधानिति** । **असितवर्त्मानः** अशुद्धमार्गस्थाः कृतघ्नाः **येभ्यः सिद्ध्येयुः** यैर्लब्धोपकारा भवन्ति । हेतौ पञ्चमी । तान् **शान्तान्** शमदमादिगुणसंपन्नान् **एधान्** एधयन्तीत्येधाः स्ववर्धकाः तादृशानपि **दहन्ति** निघ्नन्ति । **तैरिति** शेषः । तादृशैः । **अगणितनिजप्रकाशैः** प्रकाशः पूर्वोपकारजन्यातिशयः स न गणितः न चिन्तितो यैस्तथोक्तैः । पूर्वोपकारजातं सर्वमपि विस्मरद्भिरित्यर्थः । **आश्रयाशैः** आश्रयमश्नन्तीति तथोक्तैः । स्वस्थितिहेतुभूतपुरुषमेव बाधमानैरित्यर्थः । अनेन क्रियमाणकरिष्यमाणघ्नते विवक्षिते । **इह** लोके **किमनाश्यं** त्रैकालिकस्वस्थितिहेतुभूतानपि विनाशयतामविनाश्यं किञ्चिदस्ति किमित्यर्थः । एवं कृतघ्नसामान्यपरतयाऽर्थ उक्तः ।

(2) अथ तद्विशेषपरतयाऽपि स प्रोच्यते । तथा हि—महाभारते शान्तिपर्वणि कृतघ्नोपाख्याने कथा श्रूयते—गौतमो नाम मध्यदेशीयः कश्चित् ब्राह्मणः द्रविणकांक्षया उत्तरदिशाभिमुखं प्रतिष्ठमानः मध्ये कस्मिंश्चित् शबरालये प्रविश्य तत्र धनिकस्य कस्यचित् शबरस्य गृहे चिरमुवास । स चास्मै यत्किञ्चित् गृहं भोजनार्थमनवधिकान् धान्यादिसम्भारान् वस्त्रशय्यादिकं कांचित् भर्तृविरहितां तरुणीं च प्रादात् । अयं तत् सर्वं प्रतिगृह्य प्रहृष्टस्तत्रैव चिरमुवास । तत्रायं शबरसहवासादिवशात् प्रत्यहं चक्राङ्गादिपक्षिजातं प्रहृत्य भक्ष्यार्थमुपानीय कालं क्षपयामास । अथैकदा कश्चित् ब्राह्मणोत्तमः शूद्रान्नवर्जकः भिक्षार्थमेतद्गृहे प्रविश्य प्रहतचक्राङ्गभारस्कन्धं धनुष्पाणिं रुधिरावसिक्तगात्रमेतमवलोक्य निर्विण्णस्तस्मै हितोपदेशमकरोत् । अथायं तद्देशपरिभ्रष्टः धनलोहलेनैकाकी समुद्राभिमुखं प्रयातः परिश्रान्तो भिक्षार्थी कश्चित् न्यग्रोधवृक्षमुद्वीक्ष्य तन्मूले समुपविष्टः सुष्वाप । तत्रस्थश्च नाळीजङ्घ रूयः कश्यपसूनुः कश्चित् बकराजः क्षुत्पिपासापरिश्रान्तं तमवलोक्य स्वगृहागतिप्रीत्या तस्मै अनवधिकभक्ष्यभोज्यादिकं समर्प्य सत्कारमकरोत् । अनन्तरं चायं नाळीजङ्घेन आगमनकारणं पृष्टः स्वीयद्रविणोत्कण्ठां

निवेदयामास । स चैतस्य पूर्णद्रविणभारं प्रदित्सुः स्वमित्रस्य विरूपाक्षनाम्नो राक्षसराजस्य सन्निधिमेनं प्रेषयामास । स्वयं चानुपदमेव तत्राऽऽगत्य अपरिमितसत्कारादिकरणानन्तरं सुवर्णवज्रादिभारान् यथेष्टान् समर्पयामास । गौतमोऽपि सुवर्णादिभारमादाय बकराजाधिष्ठानं न्यग्रोधमेवागत्य क्षुधितः पुनरपि तेन कृतसत्कारः यथेच्छं भुक्त्वा तेन सह सुप्तः प्रभात उत्थाय—

'हाटकस्याभिरूपस्य भारोऽयं सुमहान् मया । गृहीतो लोभमोहाभ्यां दूरं च गमनं मम ॥ न चास्ति पथि भोक्तव्यं प्राणसन्धारणं मम । किं कृत्वा धारयेयं वै प्राणानित्यभ्यचिन्तयत् । ततः स पथि भोक्तव्यं प्रेक्षमाणो न किञ्चन । कृतघ्नः पुरुषव्याघ्र मनसेदमचिन्तयत् ॥ अयं बकपतिः पार्श्वे मांसराशिः स्थितो महान् । इमं हत्वा गृहीत्वा च यास्येऽहं समभिद्रुतम् ॥ अथ तत्र महार्चिष्मान् अनलो वातसारथिः । तस्याविदूरे रक्षार्थं खगेन्द्रेण कृतोऽभवत् ॥ स चापि पार्श्वे सुष्वाप विश्वस्तो बकराट् तदा । कृतघ्नस्तु स दुष्टात्मा तं जिघांसुरथाग्रतः । ततोऽलातेन दीप्तेन विश्वस्तं निजघान तम् ॥ निहत्य च मुदा युक्तः सोऽनुबन्धं न दृष्टवान् । स तं विपक्षरोमाणं कृत्वाऽग्नावपचत् तदा ॥ तं गृहीत्वा सुवर्णं च ययौ द्रुततरं द्विजः ॥' इति ।

तथा चायमर्थः—अशुद्धाचरणशीलः शबरादिसङ्गात् पक्षिगणभक्षणकुतूहली यस्मात् सिद्धिमाप, तं स्ववर्धकं बकराजमेव दहति—अग्नौ पचति । स्वीयरक्षणादिकं सर्वथा अगणयता स्वस्य सर्वविधरक्षाकरं बकराजमश्नता अभक्ष्यं किञ्चिद्वस्त्वस्ति किमित्यर्थः । वर्त्मशब्द आचारपरः । आ मनोर्वर्त्मनः परमिति रघुवंशप्रयोगात् । एवंविधविशेषाभिसन्धिसद्भावेऽपि सामान्योक्तिस्वभावनिबन्धनं सर्वत्र बहुवचनम् । यथा—'ईशादस्त्राण्यधिगतवतां क्षत्रियाणां प्रभावात् कारागारस्थितिमधिगतैः सिक्तसस्यान् पयोदैः' इति श्लोके पाण्ड्यक्षत्रियस्यैकस्यैव 'अथ पाण्ड्यमहीपालो मुमोच जलभृद्गरान्' इत्युक्तक्रमेण जलदानां कारागृहबन्धनमोचनादिकरणेऽपि बहुवचनं दृश्यते । यथा वा 'इच्छामात्राज्जगदपरथा संविधातुं क्षमाणामिक्ष्वाकूणां प्रकृतिमहतामीदृशीं प्रेक्ष्य वेळाम्' इत्यत्र स्वस्यैकस्यैव 'जगत् समस्तं परिवर्तयाम्यहम्' इतित्यादिना जगद्विपरिवर्तनादिकरणोद्घोषणेऽपि सर्वेषामपीक्ष्वाकुवंश्यानां तथात्वमभिहितं श्रीदाशरथिना । तादृशनिर्देशप्रयोजनं च सर्वेऽप्येवं कर्तुं शक्नुयुरिति तद्वंशमात्रस्य महाप्रभावताद्योतनमेव । तथा सर्वेऽपि दुर्जना अविवेकादिवशादेवं कर्तुं शक्नुयुरित्यभिप्रायेणात्रापि बहुवचनप्रयोग इत्यवगन्तव्यम् ॥

एवमग्निपरतयाऽपि काचित् योजना । **असितवर्त्मानः** कृष्णवर्त्मानः । धूमप्रचारात् ; दग्धस्थान-नीलिमोत्पत्तेर्वा । ते च येभ्य इन्धनेभ्यः **सिद्ध्येयुः** उत्पद्येरन्, तान् **शान्तान्** शुष्कान् **एधान्** ज्वलनसाधनानि इन्धनानि । एधतेः करणे घञ् । **दहन्ति** भस्मीकुर्वन्ति । यद्वा, **शान्तान् एधान्** शान्तांगारानपि दहन्तीति वा, तैः **अगणितनिजप्रकाशैः** गणनानर्हस्वीयप्रकाशैः । सूर्यचन्द्रादिप्रकाशः कालदेशादिनैयत्येन गणनार्हः एकरूपश्च, अग्निप्रकाशस्तु न तथा । इन्धनादिसामग्रीसम्भारानुगुणज्वालाया

दृश्यमानत्वादिति भावः । **आश्रयाशैः** अग्निभिः **इह** लोके **अनाश्यं** अविनाश्यं अभक्ष्यं वा **किमस्ति** न किमपीत्यर्थः । त्वं सर्वभक्षो भवेति भवानीशापादिति भावः । (कुमारसंभवे—'त्वं सर्वभक्षो भव भीमकर्मा कुष्ठाभिभूतोऽनल धूमगर्भः । इत्थं शशापाद्रिसुता हुताशं रुष्टा तदानन्दसुखस्य भङ्गात् ॥') 'बर्हिःशुष्मा कृष्णवर्त्मा', 'आश्रयाशो बृहद्भानुः' इत्युभयत्राप्यमरः ।

एवं चित्याग्निपरतयाऽपि कश्चिदर्थः । तथा हि—येभ्य इति चतुर्थी । **येभ्यः** चयनसंस्कृताग्निभ्यः उदधिप्रमुखेभ्यः पञ्चभ्यः **असितवर्त्मानः—असितो** नाम कश्चित् सर्पः । स प्राच्यां दिशि अग्निरक्षकः । एवं पृदाकुप्रभृतयोऽपि सर्पा दक्षिणादिदिशि तद्रक्षकाः । तथा च असितमार्गस्थाः असिताचारवन्तो वा अग्निरक्षका येभ्यः सिद्ध्येयुः—यद्रक्षणार्थमुत्पद्येरन्, ते तादृशाः यत्तदोर्नित्यसम्बन्धात् [अग्नयः] **शान्तान्** आहुत्यादिनिवृत्तान् **एधान्** स्ववर्धकान् अध्वर्युयजमानमुखान् **दहन्ति** । आलस्यादिना आहुतिविस्मृतौ तान् बाधन्त इत्यर्थः । तथा च ब्राह्मणम्—'पञ्च वा एतेऽग्नयो यच्चितयः । उदधिरेव नाम प्रथमः, दुध्रो द्वितीयो गह्वस्तृतीयः किंशिलश्चतुर्थो वन्यः पञ्चमः । तेभ्यो यदाहुतीर्न जुहुयादध्वर्युं च यजमानञ्च प्रदहेयुः' इति । 'समीची नामासि प्राची दिक् तस्यास्तेऽग्निरधिपतिरसितो रक्षिता' इत्यादि च । यद्वा असितमार्गस्थाः तद्रक्ष्या अग्नयः **येभ्यः** यजमानेभ्यः सिद्ध्येयुः, तान् **एधान्** स्ववर्धकान् यजमानान् **शान्तान्** मृतान् दहन्ति । आहिताग्नीनां मृतानां स्वाग्निभिरेव दहनविधानादिति भावः । **तैः अगणितनिजप्रकाशैः** प्रकाशः प्रतापः सः अगणितः अगण्यः अचिन्त्य इत्यर्थः । येषां तैः । अर्हार्थे क्तः । अचिन्त्यप्रतापैरिति यावत् । तथा च श्रुतिः, 'रुद्रो वा एष यदग्निः स यथा व्याघ्रः क्रुद्धस्तिष्ठति' इत्यादिः । **आश्रयाशैः** आश्रय आशाः येषां तैः सर्वदिगाश्रितैः । उक्तं हि समीचीनामासीति ब्राह्मणम् । तथा 'यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवना विवेश, तस्मै रुद्राय नमो अस्तु' इति च । अत्रत्यरुद्रशब्दाश्चित्याग्निपरा इति स्थितं तद्भाष्येषु । अग्नावित्यस्य लौकिकाग्नावित्यर्थः । तादृशैः अग्निभिः अनाश्यं पापं किमस्ति । 'सर्वं वा एतेन पाप्मानं देवा अतरन् अपि वा एतेन ब्रह्महत्यामतरन्' इति सर्वमहापापलोपकत्वोक्तेरिति भावः ।

एवं संहाररुद्रपरतयाऽपि अर्थो योज्यः । तत्र हि आश्रयः आशाः येषां ते तथोक्ताः । 'सहस्राणि सहस्रशो ये रुद्रा अधिभूम्यां य एतावन्तश्च भूयांसश्च दिशो रुद्रा वितस्थिरे' इत्युक्ताः सर्वदिगाश्रिता रुद्रगणाः तदंशभूताः । तैरनाश्यं किमस्ति, प्रळयकाले सर्वजगद्भस्मीकरणादिति भावः । **अगणितनिजप्रकाशैः** नेत्रादिसन्दीपनादपरिमितस्वीयप्रकाशैरित्यर्थः । कीदृशास्ते । येभ्यः सकाशात् अग्नयः **सिद्ध्येयुः** उत्पद्येरन् ते अग्नयः रुद्रा वा **शान्तान्** स्वकारणेषु लीनान् **एधान्** वर्धमानान् लोकान् । एधतेः कर्तरि घञ् । **दहन्ति** भस्मीकुर्वन्ति । तादृशैराश्रयाशैरिति योजना ।

अत्र चाद्वैतमतप्रक्रिययाऽपि कश्चिदर्थः परिस्फुरति । तथा हि—आश्रयाशं निखिलजगन्निवर्तकं चरमज्ञानम् । तच्च स्वाधारभूतमन्तःकरणादिकर्मापि नाशयतीत्याश्रयाशशब्दवाच्यम् । व्यक्तिबहुत्वाभिप्रायकं बहुवचनम् । तच्च तत्त्वमस्यादिवाक्यजन्यमपरोक्षमिति दर्शितमधस्तात् । तानि च **शान्तान्**—शास्त्रजन्यपरोक्षज्ञानेनैव पूर्वमेव निवृत्तप्रायान्, अथ च किञ्चित्कालमनुवर्तमानान्, बाधितानुवृत्तेः पूर्वमुक्तत्वात् । एधयन्तीत्येधाः जगद्वर्धकाः । तथाविधान् अविद्यातच्छक्त्यादिरूपान् **दहन्ति** विनाशयन्ति । कीदृशास्ते । येभ्यः—**असितवर्त्मानः** अशुद्धमार्गस्थाः अपरमार्थस्वरूपा इत्यर्थः। तादृशा व्यावहारिकपदार्थाः सिद्ध्येयुः । यत्प्रयुक्ता इत्यर्थः । तादृशव्यावहारिकपदार्थोत्पादकाविद्यादीन् विनाशयन्तीत्यर्थः । यद्वा **असितवर्त्मानः** व्यावहारिकपदार्थाः **येभ्यः** अन्तःकरणेभ्यः सिद्ध्येयुः अन्तःकरणपरिणामरूपमनोवृत्तिविषयतयैव प्रपञ्चसिद्धेरिति भावः । तान् **शान्तान् एधान्** शान्ताङ्गारतुल्यान् जडरूपान् अहङ्कारान् । तदुक्तम्—'शान्ताङ्गार इवादित्यमहङ्कारो जडात्मकः' इति । **दहन्ति** विनाशयन्ति । तादृशै**रगणितनिजप्रकाशैः** । **निजप्रकाशं**—स्वप्रकाशं ब्रह्म स्वीयप्रकाशरूपमित्यर्थः । तत् **अगणितं** अविषयीकृतं यैः स्वप्रकाशशुद्धब्रह्माविषयकैरित्यर्थः । तस्य सर्वज्ञानवैदेशिकत्वादिति भावः । तत्त्वमस्यादिवाक्यजन्यज्ञानेऽपि तत्तज्ज्ञानविषयत्वाद्युपहितमेव विषय इति प्रागेव प्राचीकशाम । अत एव **आश्रयाशैः** निखिलजगज्जातं स्वं स्वाश्रयमन्तःकरणादिकं स्वकारणीभूतमविद्यादिकं अन्ततः स्वविषयीभूतमुपहितब्रह्मापि विनाशयद्भिश्चरमज्ञानैरित्यर्थः । इह शब्दवाच्येषु सर्वपदार्थेषु मध्ये अनाश्यं किमस्ति । अविनाश्यं न किमपीत्यर्थः । शुद्धस्याविनाश्यत्वेऽपि तस्य शब्दवाच्यबहिर्भूतत्वात् । शुद्धपदस्यापि शुद्धत्वोपहितवाचकताया एव सिद्धान्तितत्वादिति भावः । यद्वा अनाश्यं किमिति प्रश्नः । तस्य च तादृशानाश्यवाचकपदाभावात् अनुत्तरमेवोत्तरमिति भावः । 'गुरोस्तु मौनं व्याख्यानं शिष्यास्तु छिन्नसंशयाः' इत्यत्रापि पारमार्थिकब्रह्मणः शब्दागोचरत्वाद्यभिप्रायकत्वमेव वक्तव्यमिति हृदयम् ॥

अत्र च प्रागुक्तपरिकरपरिकराङ्कुरालङ्कारसङ्कीर्णाः समासोक्तिप्रस्तुताङ्कुरादयो यथायथमुन्नेयाः ॥१०

ஏதாந் தஹந்தி சாந்தாந் யேப்ய: ஸித்யேயுரஸித வர்த்மாந:
அகணிதநிஜப்ரகாசை: கிமாச்ரயாசைரநாச்யமிஹ

1 அசுத்தமான நடவடிக்கையுடையவர்கள் யாரிடம் தாங்கள் பிறந்து வளர்கிறுர்களோ அவர்களையே அழிக்கின்றனர். தாம் அண்டின இடத்தையே அழிக்கின்றவராய் தம் புகழையே பாராட்டாத வரும் தமக்கு வரும் கேட்டை கவனிக்காதவருமான அவர்களால் எது தான் அழிக்கப்படாது.

2 தான் சென்றவிடமெல்லாம் கறுப்பாக்கும் நெருப்பு தன்னை வளர்க்கும் விறகுகளையே எரித்தொழிக்கின்றது. இப்படி க்ருஷ்ண வர்த்மா என்றும் தன் இடத்தையே எரிப்பதால் ஆச்ரயாசமென்றும் பேர் கொண்டதாம் நெருப்பு. தன் தோற்றமும் போய் விடுகிறதே யென்றும் தனக்கு அழிவு வருகிறதேயென்றுங் கூட கவனிக்காமல் எரிக்கும் இதனுல் அழிக்கக் கூடாததென்ன உள்ளது.

(2) இங்கே நாளீஜங்கனின் உபாக்யானம் நினைத்தற்பாலது—மஹா பாரதம் சாந்திபர்வத்தில் (167) க்ருதக்னனின் கதையொன்று கூறப் பட்டுள்ளது—கௌதமனென்றப் ப்ராஹ்மணன் பணத்தில் ஆசையால் வடக்கே சென்று வேடுவச் சேரியில் ஒரு தனிகனை வேடுவனில்லத்தில் வெகுநாள் வஸித்திருந்தான். அந்த தனிகன் இவனுக்கு அளவற்ற தான்யம் ஆடை படுக்கை கணவனில்லாத யௌவன ஸ்திரீ எல்லாம் அளித்தான். அங்குப் பழக்கவழக்கத்திற்கு இணங்க, பட்சிகளை அடித் துண்பது முதலியவற்றில் தேற்சியுற்றான். பிறகு ஒரு சமயம் ஒரு சிறந்த ப்ராஹ்மணன் இவனிடம் பிக்ஷைக்கு வந்து வேடுவர்களைப் போலே வில்லும் கையுமாய் தோளில் பல பட்சிகளை யடித்துச் சுமந்து கொண்டு வருமிவனைக் கண்டு வருந்தி ஹிதோபதேசம் செய்தான். அதன் மேல் இவன் அந்த இடத்தை விட்டு வேறு எங்காவது எப்படியாவது பணம் சேகரிக்க விரும்பிப் புறப்பட்டு ஓர் ஆலமரத்தின் கீழே சென்று உறங்கிக் கிடந்தான். கச்யபரின் பிள்ளையான நாளீஜங்கன் என்ற கொக்கரசன் இவனைக் கண்டு, 'தன் இடம் புகுந்து பசியினால் வருந்துகிறானே' என்று இரக்கத்துடன் ஆஹாரங்களைக் கொடுத்துப் பிறகு இவனுக்குப் பணம் வேண்டுமென்பதைக் கேட்டறிந்து தன் தோழனை விரூபாக்ஷனென்ற ராக்ஷஸ ராஜனிடத்திற்கு அனுப்ப அவன் மூலம் கௌதமன் பல பணமூட்டைகளைப் பெற்று அவ் ஆலமரத்திற்கே வந்து நாளீஜங்கனால் பூஜிக்கப்பட்டான். பிறகு கௌதமன் இவ்வளவு மூட்டைகளைப் பசியோடு எப்படி எடுத்து ஊர் செல்வதென்று யோசித்து வழியில் ஆஹாரமாக இந்த நாளீஜங்கனின் மாமிசத்தைக் கொள்ள வேண்டுமென்று தனக்கு வெகு உபகாரம் செய்திருந்து தன் அருகில் நம்பிக்கையுடன் படுத்திருந்த நாளீஜங்கனைத் தனக்கு வெளிச்சத்திற்காக அதுவே மூட்டியிருந்த நெருப்புக் கட்டையை யெடுத்து அடித்துக் கொன்று அதிலே சுட்டு அந்த மாம்சத்தையே வழியில் ஆஹாரமாக வைத்துக் கொண்டு ஊர் சென்றான். நண்பனை நாளீஜங்கனுக்காக துஷ்டப்ரஹ்மணனுக்குப் பணம் அளித்த ராக்ஷஸன் தினந்தோறும் தன்னில்லத்திற்கு வந்து போம் நண்பன் அன்று வாராமையால் ஸம்சயப்பட்டுத் தன் மகனைப் பார்த்து வர அனுப்ப அதன் மேல் வரலாறு தெரிந்து ஓடி ப்ராஹ்மணனை வதைத்து அவன் மாமிசத்தைப் பலருக்கு இட்டான். க்ருதக்னனுடைய மாம்ஸமென்று பக்ஷிகளும் அதைத் தொடவில்லை, பிறகு நாளீஜங்கனின் உடலுக்கு ஸம்ஸ்காரம் செய்தான். காமதேனு நேரில் வந்து வாயினின்று நுரையைப் பால் போல் கொடுத்து ஸுவர்க்கம் புகுவித்தது. கௌதமன் நரகத்தில் வீழ்ந்தான். இது நாளீஜங்கோபாக்யானம். இந்த ச்லோகம் பூர்ணமாக இந்த கௌதமனைக் குறிப்பதாம்.

प्रथमश्लोके कृतध्नस्योक्तत्वात् श्लोकोऽयं पूर्वार्धे करिष्यमाणध्नविषयः, सिध्येयुरिति भविष्य दुपकारनिर्देशात्।, उत्तरार्धे क्रियमाणध्नविषयः, आश्रयाशैरिति संबन्धवर्तमानतालाभादित्यपि सुवचम्। अग्निरपि क्वचित् ज्वलन् स्फोटनेनोद्गत्यान्यत्रापि पतति, यत्र पश्चात् स्वार्थवस्तु-प्रसक्तिः। अतः तस्य करिष्यमाणध्नतापि।

(3) வைதிகமாகச் சயனம் மூலம் சேகரிக்கப்பட்ட அக்னி விஷயமாகவும் ஒரு பொருளாம். அஸிதன் என்ற ஸர்ப்பம் முதலான பல ஸர்ப்பங்கள் ஐந்து விதமான அக்னிகளைக் காக்கின்றன. ஆக யேப்ய:—எந்த அக்னி களுக்காக அஸிதன் போன்று நடப்பவர் ஏற்பட்டனரோ, அந்த அக்னி கள் ஒழுங்காக யாகம் செய்யாவிடில் தங்களை விருத்தி செய்த அத்வர்யு முதலானோரையும் அழிக்கும். சிந்திக்க முடியாத ப்ரபாவமுடைய அக்னி களால் அழிக்கவாகாத பாபம் என்ன உண்டு என்றதாம்.

(4) அத்வைத மதத்தைக் கூறுவதுமாம். ஸாம்ஸாரிகமாய் பொய்யான கெட்ட வஸ்துக்கள் எவற்றினின்று தோற்றுகின்றனவோ, அந்த அவித்யை மாயை முதலான ஸம்ஸார விருத்தி செய்யும் வஸ்துக்களையும் பஸ்மமாக்குகின்றன அவரவர்க்கு வரும் தத்வஜ்ஞானங்கள். தத்துவ ஜ்ஞானம் பிறப்பது மனத்திலே, அந்த மனமும் சேர்ந்து அழிகிற படியால் அது ஆச்ரயாசமாகும். அத்தால் அழிக்கப்படாதது ஏது— ஸகுண ப்ரஹ்மத்தையுங் கூட அழிக்கும் படியான தத்துவ ப்ரகாசமா யிற்றே அது. சாந்தாந் என்பதற்கு அப்ரகாசமான ஜடவஸ்து என்பது பொருளாம்.

(வேறு மதத்திலும் உரைக்கலாம். ஸம்ஸாரிகள் எந்த வினைகள் மூலம் பிறக்கின்றனரோ, அவ் வினைகளை பக்தி ப்ரபத்திகளாகிற தத்துவ ஜ்ஞானங்கள் பஸ்மமாக்குகின்றன. ஜ்ஞானம் உண்டாம் இடமான உடலையே மீண்டும் உண்டாகாதபடி செய்யும் ஜ்ஞானத்தினாலும் அழிக்கப்படாத பாபமே கிடையாது. ஆனால் இப்பத்ததிக்குச் சேராது.

एधपदेन पुण्यपापकर्मग्रहणम्। येभ्यः कर्मभ्यः असितवर्त्मानः बद्धजीवा जायन्ते, तान् एधान् दहन्ति भक्तिप्रपत्तिरूपाः देहादिरूपाश्रये अभिमानवारकाः उपाया इत्यप्यर्थः स्यात् एवं तु नात्राविवेकबन्धः।)

नवदळपुटे कल्प्या यस्य प्रभोरपि तल्पधीर्नटपरिबृढो यस्याधस्ताच्छ्रमं शमयिष्यते।
वटविटपिनस्तस्याङ्कूरान् अनुत्कटपल्लवान् स्वपुटचटसापेक्षी भिक्षुः प्रतिक्षणमीक्षते॥११॥

अथात्र दुर्जनसार्वभौमकृतघ्नप्रस्तावात् तत्प्रत्यनीकप्रथमसुजनभूतभगवद्विषयकभावनायां प्रवर्तमानः कविः निरवधिकनिखिलपुरुषार्थप्रदानबद्धादरेऽपि भगवति जाग्रति क्षुद्रतराः कतिपये विवेकविमोकात् अत्यल्पफलकांक्षिणस्तत्फललाभमात्रेण कृतार्थम्मन्याः अन्यायमाचरन्तीति तज्जुगुप्साशबलितहृदयः तमेवार्थमप्रस्तुतवृत्तान्तवर्णनेन निदर्शयति **नवदळेति।** यस्य **वटविटपिनः** शाखोपशाखविततबहुळ-प्ररोहव्यूहनिचिडितस्य महान्यग्रोधशाखिनः **नवदळपुटे** नूतनपलाशमध्यप्रदेशे, **प्रभोरपि** सर्वजगदेकात पत्रनियमनधुरन्धुरस्यापि भगवतः **तल्पधीः** स्वोचितात्युत्तमशय्याबुद्धिः **कल्प्या** अवश्यं। कल्पनीया

मसृणमांसळमृदुळकोमळशीतळैतद्दळसौष्ठवावलोकने अवश्यं जगत्प्रभोरपि परार्ध्यपट्टदुकूलाद्यास्तरणं खचितनवरत्नजालरोचिःपुञ्जपिञ्जरितमपि शय्याप्रकाण्डम् अकाण्डतस्त्यक्त्वा अत्यल्पशरीरेऽप्येतद्दळे अनल्पबुद्धिः कल्प्येतैवेति भावः । नवशब्देन चात्र पूर्वपरिगृहीते वटदळे दुग्धाब्धिमध्यस्थितेऽतिचिरानुभवात् यातयामताबुद्धिर्द्योत्यते । दळशब्देन सद्योविदलितत्वं द्योतयता पुराणपत्रे जुगुप्साजनकशीतमसृणमांसळत्वादिभोग्यताप्रकर्षो व्यज्यते । पुटशब्देन मध्यार्थकेन निखिलब्रह्माण्डभाण्डकबळनकुक्षिम्भरेरपि भगवतस्तत्तादृशमहाप्रथिमशाल्यपि वपुः सर्वथा सङ्कोच्यापि अत्यन्तभोग्यभूतैतद्दळमध्यदेशे शयनौत्सुक्यद्योतनात् आदरातिशयो व्यज्यते । तदुक्तम्—'मुग्धः शिशुर्वटदळे शयितोऽतितन्वा तन्वा' इति । **कल्प्येत्यत्र** योग्यार्थकप्रत्ययघटनेन सर्वजन्तोरप्येतद्भोग्यतातिशयदर्शने अवश्यमुत्पद्येतैव तल्पबुद्धिः; अतोऽस्माभिः पूर्वग्राहिभिर्भवितव्यम्; अन्यथा न लभ्यमेव भवेदेतदिति त्वरातिशयो व्यज्यते । **प्रभुशब्देन** एतादृशानेकदळसृष्टिसमर्थस्यापि परार्ध्यकुसुमाद्यास्तृतमृदुळपट्टतळिनादिमेदुरस्यापि अतिसुरभिलस्वच्छगम्भीरमृदुपवनतूलजटिलश्लक्ष्णसुभगपन्नगभोगसुखशयितस्यापि अतिभोग्यभूतैतद्दर्शनमात्रमेव विळम्बो ग्रहणस्येति अनितरसाधारणगुणप्रकर्षो द्योत्यते । नवदळपुट इत्येकवचनेन निखिलजगज्जालेष्वेतज्जिघृक्षादत्तदृष्टिषु किमेकमपि दळमेतद्विटपिनि लभ्यं स्यादिति उत्कण्ठातिशयो व्यज्यते । अनेनानेकपलाशपरिग्रहेण विपुलतरपर्यङ्कपरिकल्पनशङ्का परास्ता । तल्पधीरित्यनेन कदाचिदनन्तभोगिदाक्षिण्यात् तत्र शयनाभ्युपगमेऽपि तल्पबुद्धिमात्रमत्रैव पत्रे भवेद्भगवत इति द्योत्यते । यतः सर्वजगत्प्रळयेऽप्येतद्वटमात्रमुत्पाद्य तत्रैव शेते बालाकृतिर्भगवान् । यदुक्तं श्रीभागवते—'एक एवार्णवे भ्राम्यन् ददर्श पुरुषं किल । वटपत्रपुटे तोकं शयानं त्वेकमद्भुतम्' इति । एवं देवतान्तराणामप्येतद्वृक्षापेक्षाऽस्तीत्याह **नटेति** । **परिबृढशब्दः** प्रभौ निपातितोऽपि रघुपरिबृढ इत्यादाविवात्र केवलोत्कृष्टमात्रार्थक । तथा च नटोत्कृष्टः, महानट इत्यर्थः पर्यवसितः । अनेन च प्रचण्डतरताण्डवपरिश्रान्तिः सूच्यते । **यस्याधस्तात्** यादृशवटवृक्षच्छायायामुपविष्टः **श्रमं शमयिष्यते** नाट्यश्रमपरिहारमवश्यं करिष्यति । अत्र च "चित्रं वटतरोर्मूले वृद्धाः शिष्या गुरुर्युवा । गुरोस्तु मौनं व्याख्यानं शिष्यास्तु छिन्नसंशयाः" इति दक्षिणामूर्तिरूपस्य भवस्य वटतरुच्छायायामुपविश्य सनकादिभ्यो मौनमात्रेण ज्ञानोपदेशकरणमपि नाट्यश्रममूलकमेवेति द्योत्यते । तादृशश्रमपरिहारार्थत्वमत्र वटतरुच्छायोपवेशे उत्प्रेक्ष्यत इति भावः । **यस्याधस्तादित्यनेन** एतद्व्यक्तिदर्शने अवश्यमुपविशेदेव एतच्छायायामिति श्रमशमनदाढर्यमत्र प्रतीयते । एवं हरिहरयोरत्यन्तापेक्षितत्वकथनादन्येषां तदपेक्षायाः कैमुत्यसिद्धता व्याख्याता । तादृशस्य **वटविटपिनः** । दोष्मान् कार्तवीर्य इतिवत् भूमार्थे मत्वर्थीयः । शाखोपशाखविततस्य वटवृक्षस्येत्यर्थः । किमायातं तस्येत्यत्राह—**अङ्कुरानिति** । **अनुत्कटः** अप्रकटः अबहिर्निर्गत इत्यर्थः । **पल्लवः** किसलयं, येषां तान् । अद्यापि पल्लवत्वावस्थामप्राप्तान् **अङ्कुरान्** नूतनप्ररोहान् **भिक्षुः** कश्चन माणवको यतिर्वा, **स्थपुटः** निम्नोन्नतभावमापन्नः **यश्चटसः** तीर्थादिपानोपयुक्ततया पत्रसंपुटसङ्घटितः

पात्रविशेषः। तमपेक्षमाणः सन्। तत्पणयनायेत्यर्थः। प्रतिक्षणमीक्षते क्षणे क्षणे पश्यति। पल्लवनिर्गमनात् पूर्वमेव भिक्षार्थतीर्थपानकरणाय क्षणे क्षणे पश्यतीत्यर्थः। यस्याङ्कुरस्य दळत्वावस्थायां हरिस्तल्पाय, हरः प्रच्छायादानाय चावश्यमपेक्षेयाताम्, तादृशान् अनेकाङ्कुरान् युगपदेव समूलमुच्छेत्तुं व्यवस्यत्ययं माणवकः; न तु पल्लवत्वावस्थाविळम्बमपि सहत इति भावः। दर्शनमात्रेण तृप्तिजनकमतिमनोहरं वटदळमत्यल्पव्यापाराय सूच्यादिभिः प्रविद्ध्य म्लापयत्ययमिति स्थपुटशब्देन सूचितम्। [अनेन च, वक्ष्यमाणभगवद्विषयार्थबोधे, निखिलफलप्रदानदीक्षितं भगवन्तमनिच्छुमप्यल्पप्रयोजनाय निर्बद्ध्य याचन्त एते अविवेकिलोका इत्यर्थविशेषः प्रतीयते] प्रतिक्षणमीक्षत इत्यनेन सर्वजनपूर्वभावेनास्य ग्रहणोद्योगः प्रतीयते। अनुत्कटपल्लवानित्यनेन पल्लवत्वावस्थायामप्यन्ये परिगृह्णीयुरिति तत्पूर्वं वस्तुतः स्वोपयोगाभावेऽपि परिजिघृक्षातिशयात् भिक्षोरविवेककाष्ठा प्रतिष्ठाप्यते। भिक्षुशब्देन स्वोदरपूरणार्थमेव भिक्षाटनात् जनवचनाभीरुता व्यज्यते। प्रतिक्षणमीक्षत इत्यनेन क्षणमात्रमनवधानेऽपि वस्तुनाशो भवेदिति भीतिर्ध्वनिता। दार्ष्टान्तिकेऽप्येतदनुगुणध्वनय उन्नेयाः।

अत्र च भिक्षुशब्दात् नवदळपुटादिशब्दाच्च श्रीभागवतगतमार्कण्डेयभगवद्दर्शनादिप्रकरणस्थानां 'बृहद्व्रतधरः शान्तो जटिलो वल्कलाम्बरः। बिभ्रत् कमण्डलुं दण्डमुपवीतं समेखलम्॥ सायंप्रातः स्वगुरवे भैक्षमाहृत्य वाग्यतः। बुभुजे गुर्वनुज्ञातः सकृन् नो चेदुपोषितः॥ स कदाचित् भ्रमंस्तस्मिन् पृथिव्याः ककुदि द्विजः। न्यग्रोधपोतं ददृशे फलपल्लवशोभितम्॥ प्रागुत्तरस्यां शाखायां तस्यापि ददृशे शिशुम्। शयानं पर्णपुटके ग्रसन्तं प्रभया तमः॥ अथ तं बालकं वीक्ष्य नेत्राभ्यां विष्ठितं हृदि। अभ्ययादतिसंहृष्टः परिष्वक्तुमधोक्षजम्॥ तावत् स भगवान् साक्षात् योगाधीशो गुहाशयः। अन्तर्दध ऋषेस्तस्य' इत्यादिश्लोकप्रत्यभिज्ञानात् प्रळयाब्धिमध्ये वटपत्रपुटे शयानं भगवदर्भकं वीक्ष्य प्रमोदभरभरितस्य तदालिङ्गनेच्छयाऽभिधावतो मार्कण्डेयस्य सद्य एव भगवत्तिरोधानात् अनुरहसदृष्टातिचिराभिलषितेष्टतमकामिनीपरिष्वङ्गोत्कण्ठया त्वरमाणस्य कस्यचित् यूनः सद्य एव तस्यास्तिरोधाने यथा तदधिकरणस्थल एव प्रतिक्षणं परिभ्रमणम्, पश्चादपि तत्स्थानावलोकनकालेषु, यदीयं प्रियतमा पुनरप्यत्र परिदृश्येतेति प्रत्याशया प्रतिक्षणमीक्षणं च सम्भाव्यते—तद्वदेव वटविटपिदर्शनकालसामान्ये तद्दर्शनप्रत्याशया प्रतिपत्त्रं प्रतिक्षणमवेक्षणं क्षममेवेति तदीयभक्तिरसो विप्रलम्भशृङ्गारसध्रीचीनोऽप्रस्तुतः परिस्फुरतीति बोध्यम्। अत एव इयमपि काचित् समासोक्तिः।

अन्याऽप्यत्र काचित् भगवद्वृत्तान्तस्फूर्तिरूपा। तथा हि—महाभारते आदिपर्वणि 'युधिष्ठिरो धर्ममयो महाद्रुमः स्कन्धोऽर्जुनो भीमसेनोऽस्य शाखा। माद्रीसुतौ पुष्पफले समृद्धे मूलं कृष्णो ब्रह्म च ब्राह्मणाश्च' इति श्लोकोक्तो युधिष्ठिररूपो महाद्रुमोऽत्र विटपिशब्देनाभिधीयते। तस्य दळपुटाद्युपलक्षितस्कन्धशाखापुष्पफलादिरूपभ्रातृवर्गाधीनसिद्धिकत्वेन तत्रैव विश्रान्ततया तत्प्रधीकल्पनं च युज्यते।

प्रभोरपि यस्य राजस्थानेऽभिषिक्तस्यापि यस्य स्वावयवभूते नवदळादिशब्दिते भ्रातृवर्गे विश्रमबुद्धिः कल्प्येति योजना। **नटपरिबृढः** श्रीकृष्णः, नाथस्य नन्दभवने नवनीतनाट्यमित्युक्तत्वात्। यद्वा महानटसमाख्यातस्य रुद्रस्यापि वञ्चनात् यदुनन्दन एव नटपरिबृढः। उक्तं हि—'जातं कुतस्तदकृतज्ञविचेष्टितं ते पुत्रीयया किल वरं ववृषे वृषाङ्कात्। अक्षेषु सक्तमतिना च निरादरेण वाराणसी हरपुरी भवता विदग्धा' इति। सोऽपि **यस्य युधिष्ठिरवृक्षस्या**धस्तात् मूलरूपः सन् श्रमं दुष्टक्षत्रियभारवहनजनितं भूमिदेवीश्रमं शमयिष्यते निरसिष्यति। 'सम्भवामि युगे युगे' इत्यादिकटाक्षात्, कलियुगान्ते अवशिष्टदुष्टजनपेषणशेषणाच्च भविष्यत्प्रयोगः। **तस्य वटविटपिनः** धर्मसूनोः **अङ्कूरान्** वंशप्ररोहान् उत्तरागर्भस्थान् परीक्षिदारम्भकभूतसूक्ष्मान् **अनुत्कटपल्लवान्** अश्वत्थामापाण्डवास्त्रप्लुष्टत्वेन बहिर्निर्गन्तुमनर्हान् मृतजातत्वेन चेष्टितुमनर्हान् वा। अनेन 'द्रौण्यस्त्रविप्लुष्टमिदं मदङ्गं सन्तानबीजं कुरुपाण्डवानाम्' इति श्लोकः प्रत्यभिज्ञाप्यते। **भिक्षुः** नित्यब्रह्मचारी श्रीमद्वसुदेवनन्दनः। "पादेन कमलाभेन ब्रह्मरुद्रार्चितेन च। पस्पर्श पुण्डरीकाक्षः आपादतलमस्तकम्॥ यदि मे ब्रह्मचर्यं स्यात् सत्यं च मयि तिष्ठति। अव्याहतं ममैश्वर्यं तेन जीवतु बालकः" इति श्लोकः प्रत्यभिज्ञापितः। **स्थपुटचटसापेक्षी** राज्यभोजनोपयुक्तसत्पात्रगवेषणकुतूहली प्रतिक्षणमीक्षते। निहतं च सर्वं कुरुपाण्डवकुलमामूलम्; न कश्चिदपि शिष्यते राज्यभोगानुकूलः कुलकुमारः। अतो द्रौण्यस्त्रविप्लुष्टा उत्तरागर्भांशा एव कञ्चित्कुलपल्लवमुत्पादयिष्यन्तीति प्रत्याशया प्रतिक्षणमेषां सञ्जीवनोपायमालोचयन्नवेक्षत इति पर्यवसितार्थः।

एवं महाभारतगतकुरुवंशवृक्षप्रधानभूतभीष्माचार्यपरतयाऽप्यर्थबोध उन्नेयः। उक्तं **ह्यादिपर्वणि**— 'तस्य वृक्षस्य वक्ष्यामि शश्वत्पुष्पफलोदयम्। मातुर्नियोगाद्धर्मात्मा गाङ्गेयस्य च धीमतः॥ क्षेत्रे विचित्रवीर्यस्य कृष्णद्वैपायनः पुरा। त्रीनग्नीनिव कौरव्यान् जनयामास वीर्यवान्॥' इति। अत्र च वटविटपिशब्देन पाण्डवधार्तराष्ट्राद्यनेककुटुम्बगर्भितकुरुवंशप्रधानभूतो भीष्म एव लक्ष्यते। तस्य च **प्रभोरपि** सुखशयनाद्युचितमहाराजवंशोद्भवस्यापि **नवदळपुटे**। दळयन्तीति दळाः शरा इत्यर्थः। तथा च शरकूटे तल्पधीः कल्प्या। स्वेच्छयैव शरतल्पशयनादिति भावः। नटश्रेष्ठः श्रीकृष्णश्च स्थित्वा युद्धकालिकबाणाभिघातश्रमं शमयिष्यते। उक्तं हि भीष्मं प्रति श्रीकृष्णेन—'न ते ग्लानिर्न ते मूर्छा न दाहो न च ते रुजा। प्रभविष्यन्ति गाङ्गेय क्षुत्पिपासे न चाप्युत॥' इति। तस्य भीष्मस्य अंकूरान् इत्यादि पूर्ववत्।

एवमप्रस्तुतवृत्तान्तेषु द्योतमानेषु प्रस्तुतवृत्तान्तोऽपि कश्चिदत्यल्पप्रयोजनलिप्सोः कस्यचिदनवधिकातिशयमहासाम्राज्यदानदीक्षितमपि भगवन्तं निर्बद्ध्य स्वाभीष्टक्षुद्रफलयाचनारूपः अत्र प्रतीयते। तथा हि—'वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्' इति श्रुत्युक्तः परमात्मैवात्र वृक्षतया विवक्ष्यते। उक्तं ह्यनुगीतायामपि—'सदापत्रः सदापुष्पः शुभाशुभफलोदयः। आजीव्यः सर्वभूतानां ब्रह्मवृक्षः सनातनः' इति। तत्रापि विटपिशब्दनिर्देशात् 'पद्मावीरुदुपाश्रयः स्तबकितः

स्रग्भूषणाम्बरैर्भास्वत्पाण्यघरांघ्रिपल्लवधरो दोस्कन्धविभ्राजितः । भक्तानां फलितोऽर्थितैर्मरकतश्यामत्विषा पलळो भद्रायास्तु मुकुन्दकल्पविटपी शेषाद्रिसङ्गी स नः' इत्युक्तो वृषाद्रिनाथो बोद्धचते । तस्य च नवदळ्पुटे दिव्यमङ्गळविग्रहे प्रभोः परवासुदेवस्य तल्पधीः नित्याविर्भावधीः कल्प्या स्वयंव्यक्तत्वात् । एवं शिवश्च यस्य छायायां श्रमशमनमिच्छति । यथोक्तं वेङ्कटाचलमाहात्म्ये रुद्रवाक्यम्—'परावरपतिर्देवो विश्वयोनिर्जनार्दनः । मया चान्यैश्च विश्वात्मा ध्येयो नारायणो हरिः ॥ नारायणगिरावस्मिन् वसत्येष सनातनः । अस्मिन् न्यस्तं मनो यस्मात् मया सर्वेश्वरे हरौ ॥ तस्मात् समागतं त्वां हि नाभिभाषे न चान्यथा' इति । तस्य श्रीनिवासस्य कटाक्षाङ्कुरान् अखिलफलप्रदान् अनुत्कटपल्लवान् आरुण्यादिना पल्लवशोभातिरस्कारकान् अत्यल्पपशुपुत्रादिप्रयोजनाकांक्षी जनः प्रतिदिनमनुक्षणं निर्बध्नातीत्यर्थः । ईदृशक्षुद्रजनस्याप्यविवेकिकोटिप्रवेशात् प्रस्तुतत्वम् ।

एतादृशप्रस्तुतवृत्तान्तस्य पूर्वोक्तनाप्रस्तुतवृत्तान्तेन परिस्फुरणात् अत्राप्रस्तुतप्रशंसालङ्कारः। नन्वत्र रूपकातिशयोक्तिरेवास्तु । यथा च 'पश्य नीलोत्पलद्वन्द्वान्निःसरन्ति शिताःशराः' इत्यत्र नीलोत्पलशब्देन तत्त्वेनाध्यवसितयोरीक्षणयोर्लक्षणया बोधः साध्यते—तद्वत् नवदळपुटादिशब्दैस्तत्त्वेनाध्यवसितभगवद्विग्रहादिकमभिधीयताम् । न च तर्हि अप्रस्तुतप्रशंसाया एवोच्छेदापत्तिरिति वाच्यम् ; यत्र च विषयिवाचकपदेन विषयनिगरणमन्तरेण केवलाप्रस्तुतवृत्तान्तकथनमात्रेण प्रस्तुतवृत्तान्तस्य व्यङ्ग्यमर्यादया प्रतीतिः, यथा—'यद्वक्त्रं मुहुरीक्षसे न धनिनाम्' इत्यादावप्रस्तुतमृगस्तुत्या प्रस्तुतात्मनिन्दाप्रतीतिः—तत्रैव सा । प्रातिस्विकरूपेण तत्तदुपमानवाचकपदैरुपमेयानां लक्षणीयताविरहात् । किं तु वाच्यार्थान्वयबोधसमाप्त्यनन्तरमेव व्यञ्जनया अर्थान्तरप्रतीतेश्च ॥ अथ कथं तर्ह्यस्यालङ्कारत्वमुच्यते । ध्वनित्वेनैवार्थान्तरप्रतीतेरुक्तत्वात् । अत एव रसगङ्गाधरेऽपि ध्वनित्वमेव सारूप्यनिबन्धनाप्रस्तुतप्रशंसाया अभ्यनुज्ञातमिति चेत्—सत्यम् । तर्हि समासोक्तिव्याजस्तुत्यादिष्वपि ध्वनिप्रणाल्यैवार्थान्तरप्रतीत्या अलङ्कारत्वोच्छेदापत्तेः। तदयं विशेषः—यत्र वाच्यार्थस्य ततोऽप्यतिशयितस्य व्यङ्ग्यस्य च मुख्यतया विवक्षितत्वं तत्रैव ध्वनिप्रभेदता । यत्र च तयोरन्यतरस्यात्यन्ताप्रस्तुतत्वादिभिरविवक्षा, तत्रालङ्कारत्वमिति । समासोक्तौ व्यङ्ग्यार्थस्य स्फूर्तिमात्रमेव विच्छित्तिविशेषहेतुः । न त्वप्रस्तुतत्वात् तस्य मुख्यतया विवक्षणीयता । शब्दशक्त्युपात्तेऽप्यप्रस्तुतार्थे शब्दशक्तेः प्रकरणादिनियन्त्रितत्वेन व्यञ्जनयैव तद्बोधस्याभ्युपगन्तव्यत्वात् । अप्रस्तुतप्रशंसायां तु वाच्यस्य व्यङ्ग्यप्रतीतिजननमात्रे विश्रान्तिः ; न त्वप्रस्तुतत्वात् मुख्यतात्पर्यविषयता । ध्वनिस्थले तु यथायथमुभयोरेव सेति । एतेन वाच्यतावच्छेदकरूपेण लक्ष्यार्थप्रतीतिरतिशयोक्तावित्यप्रस्तुतप्रशंसातो भेदकल्पनमपि रसगङ्गाधरोक्तमयुक्तं वेदितव्यम् । नीलोत्पलादिशब्दैर्लक्षणया तत्सदृशत्वेन लोचनत्वेन वा लोचनबोधस्यैवानुभविकत्वात्, नीलोत्पलत्वेन लोचनबोधस्यानावश्यकत्वात् अनुभवविरहात् । लक्षणाबीजेन नीलोत्पलत्वावच्छिन्नस्य कटाक्षोत्पादकत्वबाधप्रतिसन्धानेन प्रतिबद्धत्वाच्च । योग्यताज्ञानस्य कारणत्वेनायोग्यविषयकशाब्दबोधानुत्पादाच्च । एवं रूपकस्थले मुखं चन्द्र इत्यादावप्यन्ततः तत्सदृशत्वमेव बुद्ध्येत ; न तु तदभेदः । यद्यप्यालङ्कारिकैराहार्यशाब्दबोधोऽभ्युपगतः । तथा च मुखे चन्द्राभेदबुद्धिर्भवत्येव—तथाऽपि तादृशाहार्यपूर्वभाविना तदभावनिश्चयेन विषयापहारात् अन्वयानुपपत्तिरूपलक्षणाबीजोत्थाने तत्सदृशत्वबोध एवोदीच्यः प्रत्युद्भविष्यतीति । अत एव दण्डिप्रभृतयोऽप्युप-

मायामेवानेकालङ्कारान् अन्तर्भावयामासुः । परं तु प्राथमिकाद्वार्यज्ञानमात्रा‌ऽऽैव रूपकादिभेदो व्युत्पादनीय इति । तथा च रूपकातिशयोक्तौ विषयिवाचकशब्देन विषयबोधनरूपं निगरणमेव प्रधाननियामकं रूपकादिव्यावृत्तमसाधारणमिति न वाच्यतावच्छेदकरूपेण लक्ष्यार्थबोधनमनुभव-पदवीवैदेशिकं कल्पयितुमुचितमिति । तथा चातिशयोक्तौ लक्ष्यार्थमात्रविवक्षा, अप्रस्तुतप्रशंसायां व्यङ्ग्यार्थमात्रविवक्षेत्येव भेदकल्पनस्योचितत्वेन नान्यविधप्रकारगवेषणावसरोऽपि ।

अनेन च यद्वक्त्रमित्याद्युक्तश्लोकस्य स्तुतिव्याजेन निन्दाभिव्यञ्जनात् व्याजस्तुतित्वमेव युक्तमिति कुवलयानन्दसिद्धान्तोऽप्यपास्तः । यस्य हि निन्दा प्रतीयते तस्यैव स्तुतौ पर्यवसान एव व्याजस्तुतेरुचितत्वात् । यथा 'कः स्वर्धुनि विवेकस्ते' इत्यादौ । यत्राप्रस्तुतस्तुत्या तन्निन्दया वा प्रस्तुतनिन्दास्तुत्योः प्रतीतिः, तत्राप्रस्तुतप्रशंसैव । अप्रस्तुतार्थवर्णनेन प्रस्तुतार्थावगतिपर्यवसान-रूपस्य तल्लक्षणस्य जागरूकत्वात्; प्रस्तुतार्थो निन्दारूप इत्येतावन्मात्रेण भेदकल्पनानौचित्याच्च । स्वयमेवाप्रस्तुतप्रशंसाप्रकरणे—'एकः कृती' 'आबद्धकृत्रिमे'ति श्लोकद्वयमुपादाय चातकप्रशंसायाः प्रस्तुतमानिप्रशंसायां शुनकनिन्दाया वेषधारिनिन्दायां च पर्यवसानकथनस्याविस्मरणीयत्वाच्च । स्तुत्या निन्दया वा स्तुतिनिन्दाभिव्यक्तिमात्रस्य विभाजकत्वानौचित्याच्च । अन्यथा 'हृतसारमि-वेन्दुमण्डलम्' इत्यत्र चन्द्रनिन्दया दमयन्तीवदनस्तुतिपर्यवसानेन स्वयमेवास्याप्रस्तुतप्रशंसोदा-हरणत्वेन कीर्तनस्यासामञ्जस्यापाताच्च । अत एवैतत् समशीलस्थले उक्तं दण्डिना—'सुखं जीवन्ति हरिणा वनेष्वपरसेविनः । अन्नैरयत्नसुलभैस्तृणदर्भाङ्कुरादिभिः ॥ सेयमप्रस्तुतैवात्र मृगवृत्तिः प्रशस्यते । राजानुवर्तनक्लेशनिर्विण्णेन मनस्विना' इति प्रवृत्तिनिमित्तप्रदर्शनपूर्वकमप्रस्तुत-प्रशंसात्वम् । यदप्युत्तरत्र अप्रस्तुतात् प्रस्तुतावगतिमात्रस्याप्रस्तुतप्रशंसात्वमभ्युपगम्य व्याजस्तुतावप्यप्रस्तुतया निन्दया प्रस्तुतायाः स्तुतेरभिव्यक्त्या तयोर्नियतसाङ्कर्यं स्यादित्यापादनं तदप्ययुक्तम् । अप्रस्तुतमात्रविषयकवृत्तान्तवर्णनस्य प्रस्तुतवृत्तान्तावगतिमात्रे पर्यवसानं यत्र, तत्राप्रस्तुतप्रशंसा; प्रस्तुतेऽप्रस्तुते वा किञ्चिद्विषयिण्या स्तुत्या निन्दया वा तद्विषयक-निन्दास्तुत्योरभिव्यक्तौ व्याजस्तुतिरिति लक्षणशिक्षणे साङ्कर्यप्रसक्त्यभावात् । संसृज्येतां चेमे अलङ्कारान्तरवत् कुत्रचित् । यथा, विधिरेव विशेषगर्हणीय इत्यादौ । तत्र करटो निरपराधत्व-कीर्तनव्याजेन निन्द्यते । तादृशनिन्दया चाप्रस्तुतमूर्खनिन्दा पर्यवस्यतीति ।

यदप्यन्यस्तुत्या अन्यस्तुतिव्यक्तिरपि कदाचिद्व्याजस्तुतिरित्युक्तम्, उदाहृतञ्च—'शिखरिणि क्वनुनामेति पद्यमपि । तदपि 'उक्तिर्व्याजस्तुतिर्निन्दास्तुतिभ्यां स्तुतिनिन्दयोः' इति विवक्षितक्रम-लक्षणाक्षराननुगुणत्वात्, मूलकृतैवाप्रस्तुतप्रशंसालक्षण उदाहृतेन 'एकः कृती शकुन्तेषु योऽन्यं शक्रान्न याचते' इति श्लोकेन मानिस्तुतिपर्यवसायिचातकस्तुतिवाचिना समानयोगक्षेमोदाहरण-कत्वाच्च उपेक्षणीयम् । एतेन भिन्नविषयनिन्दया स्तुत्यभिव्यक्तेरुदाहरणतया 'कस्त्वं वानर' इति श्लोकमुपन्यस्य तत्र हनुमन्निन्दया इतरवानरस्तुत्यभिव्यक्तिरिति लक्षणसमन्वयप्रदर्शनमपि परास्तम् । तत्र इतरवानरस्तुतेः शाब्द्याः व्यङ्ग्यत्वप्रसक्त्यभावात् । येन प्रमाणेन हनुमन्निन्दा बोद्ध्यते, तेनैव प्रमाणेन इतरवानरस्तुतिरपि एकबुद्धिवेद्यतया प्रतीयत एव । सन्ताडनतर्जनादि-कर्तृत्वरूपहनूमदवधिकोत्कर्षस्य वानरान्तरेषु शब्देनैव बोधनात् । चैत्रेण मैत्रो हत इत्युक्ते हननकर्तृत्वतत्कर्मत्वरूपोत्कर्षापकर्षयोः समानबुद्धिवेद्यत्ववत् । किं त्वत्र मिथ्याध्यवसितहनूमदप-कर्ष-कप्यन्तरोत्कर्षादिकं एकैकस्मादपि लङ्कादाहो भवेदिति भवता मेतद्यमित्यर्थविशेषस्फोरणायैव कृतमिति प्रस्तुतावगतिपर्यवसायित्वात्, 'रात्रिः शिवे'ति श्लोकवत् अ(?)प्रस्तुतवृत्तान्तेन

[प्रस्तुतवृत्तान्तावगतिपर्यवसायी अ]प्रस्तुतांकुरविशेष एवायमित्यवसेयम् । यदपि 'विधिरेव विशेषगर्हणीयः' इति श्लोके विधिनिन्दया काकनिन्दाभिव्यक्तेरन्यनिन्दाभिव्यक्तिलक्षणा व्याजनिन्देति कथनम्—तदप्यसङ्गतम् । तत्र करटनिन्दाया अपि विधिनिन्दान्तर्भावेणैव कृतत्वेन पृथक्त्वविरहात् । योयमेवंविधं करटं ससर्ज स विधिरेव निन्दनीय इति वचनव्यक्त्या करटस्यापि निन्द्यतया हेतुकोट्यनुप्रवेशस्य स्फुटत्वात् । 'निन्दाया निन्दया व्यक्तिर्व्याजनिन्देति गीयते' इति मूलश्लोके अन्यशब्दनिर्देशादर्शनात् । 'विधे स निन्द्यो यस्ते प्रागेकमेवाहरच्छिरः' इति मूलोदाहरणेऽपि विधिसम्बन्ध्येकमात्रशिरोहरणेन करणेन हरनिन्दा प्रतीयत इति विधेरपि तत्र निन्द्यकोटिप्रवेशस्यावर्जनीयत्वात् । अन्यविषयकत्वसंभवमात्रेण एतद्विषयकत्वानपहाराच्च । तथा च यस्यैकविधनिन्दया अन्यविधनिन्दाप्रतीतिः तत्रैव, व्याजनिन्देति, यद्वा यत्र प्रस्तुते अप्रस्तुते वा यद्विषयकव्यापारेण करणेन तदन्यनिन्दा तन्निन्दामात्रे पर्यवस्यति, तत्रैव सेति । अत्र च विधिनिन्दा प्रस्तुतैव, अयुक्तकारित्वात् । विधिरेवेति श्लोके तु विधिनिन्दान्तर्भूता करटनिन्दा अप्रस्तुता प्रस्तुतमूर्खनिन्दायां पर्यवस्यतीत्यप्रस्तुतप्रशंसया सङ्कीर्यत इति विवेकः । लीलोद्यानादिषु विहरतः कस्यापि काककोकिलसमावेशदर्शनप्रकरणे श्लोकोत्थाने तु केवलं व्याजनिन्दामात्रमेव । इत्थं मूलाक्षरेणैव स्फुटेष्वप्यसङ्कीर्णलक्षणोदाहरणेषु स्वयं प्रसङ्गकरणेन साङ्कर्यमापादयन्तो ह्यापातमात्रमधुरा एव । अत्र च वक्तव्यबहुळसद्भावेऽपि विस्तरभरत्रस्ता विरमाम इत्यलं प्रसक्तानुप्रसक्तपरिवर्तनेन ।

अतश्च प्रकृते विटप्यादिशब्दानां निगीर्याध्यवसानतो भगवत्परत्वादिसम्भवात् रूपकातिशयोक्तिरेवास्त्विति चेन्न । अतिशयोक्तिस्थले उपमानवाचकशब्दात् लोकप्रसिद्धतदुपमेयताकपदार्थबोधनस्य पुरःस्फूर्तिकत्वेन विषयनिगरणस्य कल्पनाभ्युपगमेऽपि प्रकृते नवदळादीनां तत्तद्वस्तुविशेषोपमानतायाः कविसमयसिद्धत्वविरहेण निगीर्याध्यवसानेन तत्तत्प्रतीतिजनकत्वाभावात् । प्रत्युत वाच्यार्थबोधसमाप्त्यनन्तरमेव प्रकरणादिपरामर्शात् प्रस्तुतार्थपर्यवसानस्य व्यञ्जनादिना श्लिष्टपदादिसमभिव्याहारोपस्कृतेन कल्पनीयत्वाच्च । किञ्चातिशयोक्तिस्थले यथाश्रुतवाक्यार्थासामञ्जस्यमप्यपरं लिङ्गम् ; अप्रस्तुतप्रशंसायां तु न तथेति । अत एव लक्षणाप्रसराप्रसरावपि विशेषोऽनयोरित्यवधेयम् । न चाप्रस्तुतप्रशंसाया यथाश्रुतार्थयथार्थत्व एवावतार इति वाच्यम् ; कल्पितत्वेपि तथात्वस्यालंङ्कारिकसमयसंमतत्वात् । यथा 'हृतसारमिवेन्दुमण्डलम्', 'आश्रित्य नूनममृतद्युतयः पदं ते', 'हारं वक्षसि केनापि दत्तमज्ञेन मर्कट' इत्यादिषु । अस्तु तर्हि सौधाट्टानीत्यत्रैव भिक्षोरवेक्षणायोगेऽपि तद्योगकल्पनात् सम्बन्धातिशयोक्तिरिति चेत्—युज्यत एव सा, यदि धर्मी प्रकृतः स्यात् । तत्र सौधाट्टानामिवात्र भिक्षोः प्रस्तुतत्वविरह एवापराधः । अत एव 'प्रहसन्ति पाण्ड्यनद्यः' इत्यत्रापि सा निराकृता । अतो नात्रातिशयोक्तिगन्धोऽपि । एवमत्र अविवेकिसामान्यस्य महाफलदातृसन्निधौ क्षुद्रफललाभापेक्षायाः प्रस्तुतार्थत्वमङ्गीकृत्य विशेषेण सामान्यप्रतीतिपर्यवसाननिबन्धनामप्रशंसामपि केचिदभिप्रयन्तीत्यलमतिचर्चया ॥

अत्र भिक्षुशब्दनिर्देशात् सङ्कल्पसूर्योदये परिव्राजकप्रकरणपाठाच्चाविवेकपरिव्राजकपरोऽपि कश्चिदर्थः प्रतीयते । यतिस्तावदेकः स्वीयैकोदरभिक्षार्थमनवधिकधनधान्यादिसमृद्धस्यानन्ताधिकारिपुरुषैरनुक्षणमपेक्ष्यमाणस्यानेकप्रौढजनानामन्नधनपश्वादिदानैराराधकस्य अनवरतरचिताशेषाश्रमान्नदानयशोविशोभितदिशो गृहस्थप्रभोः कस्यचित् पुत्रपौत्राद्यङ्कुरोत्पत्तिमनुक्षणमपेक्षत इति । अत्र च देशे देशे भवनमिति

पर्यटाट्यमानस्य भिक्षोः कस्यचिद् गृहस्थस्य पुत्रोत्पत्त्यादिप्रार्थनमविवेकमूलकमिति सकलविषयविरक्तस्यापी-दृशाविवेके किमु वक्तव्यमितरजनानामित्यर्थः प्रतीयते । अत्र च प्रस्तुतधर्मिणं निर्दिश्य प्रस्तुतवर्ण्यधर्म-सजातीयनिर्देशात् ललितमलङ्कारः, 'प्रस्तुते वर्ण्यवाक्यार्थप्रतिबिम्बस्य वर्णनम्'इति लक्षितः । 'एकाकी गृहसंत्यक्तः पाणिपात्रो दिगम्बरः । सोऽपि संबाध्यते लोके तृष्णया पश्य कौतुकम्' इति श्लोकोऽत्र प्रत्यभिज्ञायत इति संक्षेपः । इदं च हरिणीवृत्तम्—'रसयुगहयैश्छिन्ना न्सौ म्रौ स्लौ हरिणी गुरुः' इति तल्लक्षणात् । एवमुत्तरत्रापि द्रष्टव्यम् ।

(6) अत्र च आश्वमेधिकपर्वगतानुगीतास्थे—'प्रज्ञावृक्षं मोक्षफलं शान्तिच्छायासमन्वितम् । ज्ञानाश्रयं तृप्तितोयमन्तःक्षेत्रज्ञभास्करम् ॥ येऽधिगच्छन्ति तं सन्तस्तेषां नास्ति भयं पुनः' इति श्लोके प्र[ति?]पन्नः प्रज्ञारूपवृक्षोऽपि बोद्धयते । तस्य च **नवदळपुटः** 'प्रजहाति यदा कामान्' इत्यारभ्य—'वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता' इत्यन्तमुक्तः प्रकारविशेषः । तस्य च 'ब्रह्मनिर्वाणमृच्छति' इति फलनिर्देशात् **प्रभुतल्परूपत्वम्** । **यस्याधस्तात्** शान्तिरूपच्छायायाम्, शिवः सनकादीनां श्रमपरिहारं करोति । 'या ते रुद्र शिवा तनूरघोरा' इत्युक्तशान्तविग्रहविशिष्टः शिवः सनकादीनां ब्रह्मविद्यामुपदिदेशेति स्कान्दप्रसिद्धेः । **तस्य** प्रज्ञावृक्षस्य **अङ्कुरान्** तदुत्पादकप्रथमपर्वरूप-यत्किञ्चिच्छ्रवणादिमात्रं प्रतिलभ्य भिक्षुवेषधारी चटस्थानीयाल्पप्रयोजनमपेक्षमाणः तादृशप्रज्ञावृक्षमनु-क्षणमवेक्षत इत्यर्थः । 'आत्मा संस्कृत्य संस्कृत्य परोपकरणीकृत.' इत्युक्तरीत्या प्रज्ञांकुरलाभमात्रेण परोपदेशे प्रवृत्तस्तदुचितवेषधारी ख्यातिलाभादिनिरतो भवतीति भावः । पद्धतिसङ्गतिश्च स्पष्टा ॥११॥

நவதளபுடே கல்ப்யா யஸ்ய ப்ரபோரபி தல்ப்பதீ: நடபரிப்ருடோ யஸ்யாதஸ்தாத் ச்ரமம் சமயிஷ்யதே. வட விடபிநஸ்தஸ்யாங்கூராந் அநுத்கடபல்லவாந் ஸ்த்தபுடசடஸாபேக்ஷீ பிக்ஷு: ப்ரதிக்ஷணமீக்ஷதே.

1 ஸர்வேச்வரனை திருமாலுக்கும் எந்த மரத்தின் ஒரு பவனை தளிரிலே இது நமக்குப் பள்ளியாமென்ற எண்ணம் வரத்தகுமோ (வடபத்ர சாயியல்லனே அவன்), நடராஜன் நாட்யமாடுகின்றவன் தக்ஷிணமூர்த்தியாய் ஆலமரத்தின் கீழ் இருந்து ஸநகாதிகளுக்கு மௌனமாயிருந்தே உபதேசிப்பவன் லோக ஸம்ஹாரம் செய்த பிறகு எதன் கீழ் களைப்பு ஆறுவானே, எதை ஆச்ரமமாகப் பெற்றிருப்பனே, அத்தகைய ஆலமரத்தின் தளிர்நிலை பெருத முளைகளை பிக்ஷை வாங்கிப் புசிப்பவன், எப்போது தளிர் பெறும், தொன்னை தைத்துக் கொள்ளலா மென்று க்ஷணந்தோறும் கண்டு வருகிருன். (அதன் மேன்மை யறியாத அவிவேகி.)

2 ப்ரபுவான எந்த தர்மபுத்ரனுக்குத் தன்னுடைய இலைகள் போன்ற ப்ராதாக்களிடம், இவர்கள் நம் களையைப் போக்கும் பள்ளி யாவார்கள் என்ற எண்ணமோ, நவநீதநடனும் காளிய நடனுமான

கண்ணன் எவனுக்குக் கீழ்ப்பட்டிருந்து உலக பாரத்தைப் போக்கி உலக ச்ரமத்தைத் தீர்ப்பானோ, அந்த தர்மபுத்திரனும் ஆலமரத்தின் வம்ச முளையின் பாகங்கள் அச்வத்தாமனின் அம்பினால் அழிக்கப்பட்டு உத்தரையின் கருவில் நின்றவை. அவற்றை அந்தக் கண்ணன் என்ற ப்ரஹ்மசாரீ முதலினின்றே பரீக்ஷித் என்ற குமாரனுக்கக் கண்டு வருகிறான் என்றதும் ஒரு பொருள்.

3 ப்ரபுவாய் குருவம்ச கூடஸ்த்தரான பீஷ்மருக்குப் போருக்குப் பிறகு சரதல்பமே பள்ளியென்ற புத்தியேற்பட்டது. நவநீத நடனை கண்ணன் அவருக்கு பவ்யப்பட்டு பசிதாகங்களை அனுக்ரஹத்தால் போக்கி வந்தான். அந்த பீஷ்மரின் தளிர்களான பாண்டவர் விருத்தி யடையாமலிருந்த போது தூது சென்றும் ஊர்ப்பிச்சை கேட்டு வந்த கண்ணன் எப்போதும் கண்காணிப்பாயிருந்தான்.

4 ப்ரபுவான திருமாலுக்குத் தளிர் போன்ற திருமேனிக்கு இட மான திருமலையிலே இது தன் பள்ளியென்ற புத்தியுண்டாம். திருமாலின் கீழேயிருந்து திருமலையில் வாஸம் செய்து ருத்ரன் தவம் புரிந்து துயர் தீர்த்துக் கொள்வது புராணத்திற் கூறியதாம். அற்ப பலன்களிலே நோக்குள்ளவர் அத்தகைய பகவானை என்னென்னவோ கேட்டு நிர்ப்பந்திக்கின்றனர். அவனையே பெற விரும்புவாரில்லை.

5 ஒருநாளைக்கு ஒரு க்ராமமாகத் திரியவேண்டிய ஸந்நியாசியும், ப்ரபுவாய் ஸுகமாய் வாழ்ந்து பலருக்கு அனுகூலமான ஒரு க்ருஹஸ்த னிடத்திலே தான் பிக்ஷை பெறுதற்காக அவனுக்கு புத்ர பௌத்ர ஸந்தானம் ஏற்பட வேணுமென்று வேண்டுகிறான். என்ன அவிவேகம் பாருங்கள்.

6 அறிவென்பதே ஒரு மரம். இந்திரியங்களை அடக்குவது போன்ற வை அதற்குப் பள்ளி. அவ்வறிவின் கீழ் இருந்தே பரமசிவன் அண்டின வருக்கும் ச்ரமத்தைப் போக்குகிறான். அவ்வறிவின் முளைகளையே பணப் பிச்சை யெடுப்பவன் தன் பலனுக்காக அரைகுறையாக எப்போதும் பார்த்து வருகிறான். (॥)

निरवधिगुणग्रामे रामे निरागसि वागसिस्फुरणमुषितालोका लोका वदन्ति सदन्तिके ।
वरतनुहतिं वालिद्रोहं मनागपसर्पणं परिमितगुणे स्पष्टावद्ये मुदा(धा)किमुदासते ॥१२॥

इत्थमुक्तश्लोकेन महापुरुषसकाशादल्पप्रयोजनाकांक्षिणामविवेकिनामुपालम्भे प्रस्तुते, तत्प्रसङ्गात् तादृशमहापुरुषमपि विदूष्य आत्यन्तिकप्रयोजनहानिसम्पादकानां ततोऽप्यविवेकिनां स्थानास्थानविवेकमन्तरेण स्वतोविदूषणप्रवृत्तानामज्ञानकाष्ठामुपस्थाप्य पद्धतिं निगमयति **निरवधीति** । निरवधित्वं संख्याशून्यत्वं

नामसंख्यापरिमाणादिपरिच्छेदशून्यत्वं वा। तदुक्तं सूरिवर्यैः-'यत् तादृशागसमरिं रघुवीर वीक्ष्य विश्रम्यतामिति मुमोचिथ मुग्धमाजौ। कोऽयं गुणः, कतरकोटिगतः, कियान् वा, कस्य स्तुतेः पदमहो, बत कस्य भूमिः' इति। अत्र तादृशगुणस्य नामपरिमाणादिपरिच्छेद्यत्वाभावः सुव्यक्तमुक्तः। गुणग्रामशब्देन गुणानां परस्परसाहित्यं परस्परविरहासहत्वं सङ्घीभूयैकत्र वासश्च द्योत्यते। गुणशब्देन च, 'दान्तैः सर्वप्रजाकान्तैः प्रीतिसञ्जननैर्नृणाम। गुणैर्विरुरुचे रामो दीप्तः सूर्य इवांशुभिः॥, बहवो नृप कल्याणगुणाः पुत्रस्य सन्ति ते।, राघवं शोभयन्त्येते षड्गुणाः पुरुषोत्तमम्।, धातूनामिव शैलेन्द्रो गुणानामाकरो महान्।, तमेवंगुणसम्पन्नमप्रधृष्यपराक्रमम्, ज्येष्ठं श्रेष्ठगुणैर्युक्तं...., बहिश्चर इव प्राणो बभूव गुणवत्तरः, इत्यादिप्रमाणगणोद्घोषः प्रत्यभिज्ञाप्यते। एवं पूर्वाचार्यैरपि 'वंशे मनोरनुजिघृक्षुरिहावतीर्णो दिव्यैर्ववर्षिथ तथाऽत्र भवद्गुणौघैः' इति ग्रामशब्दार्थो विवृतः। अत्र निरवधिगुणानां ग्रामः वासस्थानमित्येकोऽर्थः। निरवधिः गुणग्रामो यस्येत्यपरः। शब्दादिपूर्वो बृन्देऽपीत्यमरकोशानुशासनात् सङ्घपरोऽत्र ग्रामशब्दः। प्रयुक्तश्च—'भूतग्राममिमं कृत्स्नम्', 'तत्तादृक्प्रथनाय तावकगुणग्रामाय रामायणम्' इति। एवं ग्रामशब्देन स्वरप्रस्तारबोधनात् एकैकगुणानामपि प्रस्तारमहिम्ना अनेकधाऽभिवृद्धिर्द्योत्यते। रामशब्देन च रमु क्रीडायामिति धातुनिष्पन्नेन केवललीलामानुषविग्रहपरिग्रहेऽपि कल्याणगुणानामेकीभूय सङ्घशो वसतां परब्रह्मभावपिशुनता सूचिता। रमयतीति विग्रहे तु वज्रसंपुटघटितमाणिक्यगणानामिव गुणानामपि शोभासंपादकता दिव्यविग्रहस्य द्योत्यते। यद्वा निखिलजगद्रञ्जकत्वं द्योतयन्नयं 'गुणैर्दास्यमुपागतः' इति न्यायेन गुणवागुरावशीकृतजगत्त्रयस्यापि दुर्जनविषये मोघत्वमनुस्मार्य विषादं द्योतयतीति बोद्धव्यम्। रमन्तेऽस्मिन् जना इति विग्रहे तु 'पुंसां दृष्टिचित्तापहारिणम्', 'धन्याः पश्यन्ति मे नाथम्' 'श्यामग्रामस्तनीभिः शबरयुवतिभिः कौतुकोदञ्चदक्षं कृच्छ्राद्वीक्ष्यमानः क्षणमचलमथो चित्रकूटं प्रतस्थे' इत्याद्युक्तक्रमेण आचित्रकूटमविदितक्षुत्पिपासमनुवर्तमानातिपामरशबरीजननयनशफरहारिरामणीयकशोभासौभाग्यशालिदिव्यवपुःसुषमासम्पन्नत्वमुक्तं भवति। एतेन सर्वजगन्मोहनदिव्यावयवशोभासमृद्धेऽपि भगवति दृढमुष्टयः कतिपये तादृशशबर्यादिपामरेभ्योऽपि निहीनतराः सुतरामपराध्यन्ति दुदूषयिषयेति तान् प्रति अनुशयातिशयो द्योत्यते। रामशब्देन 'रामो रामो राम इति प्रजानामभवन् कथाः' इत्युक्तं सदाऽनुचिन्तनमभिप्रेतम्। **निरागसि** अपराधलेशशून्ये 'न तं पश्याम्यहं लोके परोक्षमपि यो नरः। ....निरस्तोऽपि योऽस्य दोषमुदीरयेत्' इति श्लोकोऽत्र ज्ञापितः। उक्तविशेषणद्वयेन उभयलिङ्गत्वबोधकेन स्वान्तर्निगूहिताऽपि परब्रह्मताऽस्य सुव्यक्तं प्रकाशिता।

वागसिस्फुरणमुषितालोकाः वाक्शब्दो दूषणैकव्यग्रजिह्वापरः। सैव असिः कृपाणिका, परहिंसैकप्रयोजनत्वात्, आकारसाम्याच्च। तस्य स्फुरणं विद्युल्लतावदसकृत् प्रकाशः। तेन मुषितः—अपहृतः आलोकः नयनस्य वीक्षणसामर्थ्यम्, अन्यत्र विवेकः यथावस्थितार्थग्रहणरूपो येषां तथोक्ताः। 'विद्युद्दामस्फुरणचकितैर्यत्र पौराङ्गनानां लोलापाङ्गैर्यदि न रमसे लोचनैः' इत्यत्र शश्वत्प्रकाशरूपस्फुरणस्य

नाशनतेजोविघातकत्वं प्रसिद्धम् । एतादृशदुर्जनजिह्वाक्रौर्यमभिसन्धायैव 'कस्तूरिकामृगाणां नाभेर्गन्धगुणमखिलमादाय । यदि पुनरहं विधिः स्यां खलजिह्वायां निवेशयिष्यामि' इति ब्रह्मसायुज्यमपेक्षितं केनचित् कविना । **लोकाः** जनाः । लोकयन्तीति व्युत्पत्त्या मांसचक्षुर्मात्रसम्पन्नत्वं सूचितम् । **वदन्ति** वाचा कथयन्ति, न तु हृदये धारयन्ति । अनेन महाजनभयं नास्तीति द्योतितम् । **सदन्तिके** । सतां सुगुणदुर्गुणशिक्षणप्रवणानां सत्पुरुषाणाम् । अनेन 'इह सन्तो न वा सन्ति सतो वा नानुवर्तसे' इत्युक्तशिक्षकसन्निधावेव दोषं कथयन्तीति धाष्टर्यातिशयो ध्वन्यते । **अन्तिके** अत्यन्तसमीपदेशे । अनेन च कदाचिदत्यन्तकोपावेशेन चपेटिकाप्रदानं कुर्युरिति भयलेशविनाकृतिर्द्योत्यते । तेन स्वकथ्यमानार्थे स्वस्य याथार्थ्यबुद्धिदार्ढ्यं प्रतीयते । अनेन च सत्पुरुषैर्गुणत्वेन निरूपितानामपि स्वयं दोषत्वेन ग्रहणात् 'दृढपूर्वश्रुतो मूर्खः' इत्युक्तमौर्ख्यातिशयो द्योत्यते । अतश्च दोषलाभैकसन्तुष्टता तदनुगुणाविवेककाष्ठा च प्रतिष्ठाप्यत इत्येवं प्रतीतिपरम्पराऽनुसन्धेया ।

नन्वसूययैव केवलं महापुरुषदूषणमशेषलोकसिद्धम् । तत् कथमिवाविवेककार्यता निर्धार्यते । गुणेषु दोषत्वारोपणं ह्यसूयाकार्यमन्यत्र निर्दिष्टम् । अत एव **सङ्कल्पसूर्योदये** असूयाप्रवेशसमय एवैतच्छ्लोकोपन्यासः क्रियत इति चेत्—सत्यम् । श्रीदाशरथेरवतारकाले तादात्त्विकमूर्खजनैरसूययैव केवलं व्यवहियतां नाम दोषलेशः । इदानीन्तनानां तु तत्रासूयाप्रसक्त्यभावात् केवलाविवेकमूलकदोषैकग्रहणकुतूहलादिवशात् तत्कर्णाकर्णिकामात्रतृप्तत्वम् तदधीनफलपश्चात्र प्रतिपाद्यत इति पद्धतिसङ्गतिर्बोद्धव्या । उक्तं हि—'पश्यति परेषु दोषान्' इत्यत्र दोषमात्रग्रहणकुतूहलिवक्रनिपुणजनानाम् , तदेवात्र उपसंहियत इति विवेकः । तथैव ह्युक्तं **सङ्कल्पसूर्योदयेऽपि** 'गतद्रविणदोहळं गळितमाननागौरवं यशस्यनभिसन्धिकं यमिनमप्यनुदूगृह्णति । तिरस्करणकौतुकग्रहगृहीतचित्ते जने गुणग्रहणलालसो न खलु कश्चिदालक्ष्यते' इति । **अनुदूगृह्णति** अनङ्गीकुर्वतीत्यर्थः । अत्र च स्वरसतस्तिरस्कारैककुतूहलरूपग्रहविशेषग्रस्तानां वस्तुतः ख्यातिलाभपूजानिरपेक्षेऽपि यतिसार्वभौमे प्रथमतो डम्भादिमूलकत्वबुद्धिरेवोत्सर्गत उत्पद्यते सर्वजनानाम् । विवेकमहामान्त्रिकमन्त्रप्रयोगे तु तादृशग्रहोत्सारणात् वास्तविकार्थो गृह्यत इति हृदयम् । अतः पद्धतिसङ्गतेर्न काऽप्यसङ्गतिः । कीदृशं तद्दूषणं तत्राह- **वरतन्विति** । **वरतनुहतिं**—ताटकारूपस्त्रीवधम् , **वालिद्रोहं** वालिनो वञ्चनेन हननं प्रच्छन्नवधमित्यर्थः । **मनागपसर्पणं खरयुद्धे** ईषत्पश्चात् पदविन्यसनं च दोषतया वदन्तीत्यर्थः । कथमेषामदोषत्वमिति चेत्—कथमेषां दोषत्वमिति भवतैव वक्तव्यम् ॥ 'शरणागतहन्तॄंश्च स्त्रीहन्तॄंश्च न संवसेत्' इति मन्वादिस्मरणादिति चेत्—किमत्र प्रत्यहं परस्सहस्रमुनिवर्गविघायिनीनां पिशाचिकानामपि स्त्रीशब्देन ग्रहणमिति कुतश्चित् त्वया ज्ञायते । सामान्यवचनमहिम्नेति चेत्—तर्हि 'विनाशाय च दुष्कृताम्' इति सामान्यवचनविषयत्वस्य दुरपह्नवत्वात् तद्वधोऽपि विधीयतां भगवता । पुरुषविषयमेव तद्वचनं भवत्विति चेत्—त्वद्वचनमेवादुष्टस्त्रीविषयं भवतु । को विशेषः ? । अन्यथा पश्वालम्भादिविधीनामपीदृशदशैवापद्येत । तत्र निस्संशयं विशेषवचनमस्ति,

इह तूभयोः सामान्यविशेषभावे संशय एवेति चेत्, किं विश्वामित्रादिमुनिवरविधानमेतादृशशास्त्रसन्देहनिराकरणेऽप्यपर्याप्तं मन्यसे। उक्तं हि तत्र मुनिना—'सैषा शापकृतामर्षा ताटका क्रोधमूर्च्छिता। देशमुत्सादयत्येनमगस्त्यचरितं शुभम्। एनां राघव दुर्वृत्तां यक्षीं परमदारुणाम्। गोब्राह्मणहितार्थाय जहि दुष्टपराक्रमाम्। न ह्येनां शापसंस्पृष्टां कश्चिदुत्सहते पुमान्। निहन्तुं त्रिषु लोकेषु त्वामृते रघुनन्दन। न हि ते स्त्रीवधकृते घृणा कार्या नरोत्तम॥ चातुर्वर्ण्यहितार्थाय कर्तव्यं राजसूनुना। नृशंसमनृशंसं वा प्रजारक्षणकारणात्॥ पातकं वा सदोषं वा कर्तव्यं रक्षता सताम्। राज्यभारनियुक्तानामेष धर्मः सनातनः' इति।

अतश्चानेनाधिकारिविशेषे धर्मत्वविधानात् तदितरविषयं भवतु निषेधवचनम्। एतद्वचनाविश्वासे मनुवचनेऽप्यनाश्वासप्रसङ्गेन धर्माधर्मनिर्णयकथाया एवानकाशप्रसङ्गाच्च। किं बहुना; शास्त्रमेवात्रानावश्यकमिति प्रतिभाति, लोकन्यायत एवावश्यापतनात्। तथा हि—किमत्र कर्तव्यं प्रजापालनाधिकृतैः? त्वयैव वक्तव्यम्। प्रत्यहं परश्शतब्राह्मणभोजिन्याः कामरूपत्वेन कारागृहबन्धनाद्यनर्हायास्तद्विधूननादिनिपुणायाश्च दुष्टस्त्रिया वधात् ऋते कमन्यं ब्राह्मणरक्षणोपायं मन्यसे? त्वमेव वद। स्त्रीवधत्वादुपेक्षणे तु ब्राह्मणवधादिदोषमापतन्तं 'राजा त्वशासन् पापस्य तदवाप्नोति किल्बिषम्' इति शास्त्रविहितं को वा निवारयेत्। अस्तु नाम शास्त्रम्; प्रजारक्षणमेषां कथं नाम निर्वहेत्। तथा सति रावणादीनामपि प्रतिदिनमुनिवधनिरतानां कामरूपतया स्त्रीवेषपरिग्रहे अवध्यत्वापत्त्या दुष्टनिग्रहशास्त्रसामान्यमुच्छिद्येत। मायाविसामान्यं वा अवध्यतामापद्येत। जननकालिकस्त्रीरूपधरत्वमेवावधशास्त्रगोचर इति चेत्—तर्हि 'कन्यारत्नं ददौ राम ताटकां नाम नामत.' इत्युक्तजन्मकालिकरूपमगस्त्यशापाद्विनिवृत्तम्, उदितश्चापूर्वं यक्षरूपमिति पश्यतु भवान्। यक्षरूपत्वेऽपि स्त्रीरूपत्वमेवेति चेत्—दत्तमेवोत्तरम्, अनेकरूपपरिग्रहयोग्यानां तात्कालिकवेषमात्रस्याकार्यकरत्वादिति, शापोपनतरूपस्यासंरक्ष्यत्वाच्चेति। अन्यथा अहल्याशिलादेहमोक्षणमपि पातकं भवेदिति न किञ्चिदेतत्। उक्तमेव मायाविनां मान्त्रिकाणां वा प्रत्यहं ब्रह्महत्यादिकरणे सद्यः स्त्रीवेषधरणे चावद्ध्यतापातान्निखिलजगज्जातं दुष्टसङ्घातनिबिडमेव भवेदिति। अतश्च महाराजानां भगवदवताराणाञ्चानवकाशग्रस्तैव भवेदिति लोकन्यायत एव सुलभे ह्यर्थनिर्णये, प्रत्युत महर्षिणा वृद्धाचारप्रदर्शनपुरःसरं कण्ठोक्ते च धर्मत्वे किमकाण्डेऽस्माकमाशङ्कनमिति। वरतनुशब्दप्रयोगेण अवरतनोरपि पूर्वगृहीतवरशरीरमालम्ब्य दूषणान्वेषणकुतूहलं व्यज्यते। अतोऽत्र दुष्टजनमृगपूगमृगयापरायणानां राज्यतन्त्रनियुक्तानां तदर्थमेवावतीर्णानां च महान् धर्मोऽयमित्यविवेकिनां बुद्ध्युत्पादनायैव ईदृशव्यापारोऽभिनीतो भगवतेत्यवधेयम्। अन्यथा सङ्कल्पमात्रेण सुलभे ताटकावधे किमर्थमीदृशः क्लेश इति भवतैव विभावनीयमिति॥ एवं वालिवञ्चनमपि किंरूपमिति विवेचनीयम्।

किं वालिनो वध एव दोष, उत प्रच्छन्नकृत इति। नाद्यः; तथा सति निरपराधस्य साधुबुद्धेः स्वस्मिन् पितृतौल्यमध्यवस्यतः सुग्रीवस्य भार्यायां महासाध्व्यामनिच्छन्त्यां सकलमहाजनप्रसिद्धं बलात्कारेण आमरणमनार्याचरणस्य को दण्डः। न हि वधात् ऋतेऽस्य विहिता काचन शिक्षा। उक्तं हि—'औरसीं

भगिनीं वाऽपि भार्यां चाप्यनुजस्य यः। प्रचरेत नरः कामात् तस्य दण्डो बधः स्मृतः॥' इति। अथ पूर्वापराधी सुग्रीव एवेति चेत्—कोऽयमपराधस्तस्य। दुन्दुभिवधाय गते वालिनि शिलादिना गुहापिधानमिति चेत्—किमयं महामतिः स्वतो दशगुणितबलशालिनो वालिनो महाशिलादिविधूननिपुणतां विजानन् तद्बधाय व्यधात् पिधानमिति भवतो निश्चयः? अतो वालिवधनिश्चयात् दुन्दुभिसमागमनशङ्कयैव तात्कालिकभयोपप्लवनिवृत्त्यर्थमेतद्विधानमित्यकामतोऽपि स्वीकार्यम्। अस्तु वा वालिनस्तत्रापराधत्वधीः; तथाऽपि साधुबुद्धेर्भ्रान्तस्य कोऽयं विधीयतां दण्डः। भार्यापरिग्रह इति चेत, किमपराद्धं तया। किं वा कुत्रापि शास्त्रे विहितो राज्ञो बलादागस्विभार्यापरिग्रहो दण्डतया? किं तमनुमन्येरन् शिष्टाः साधुतया। केवलबलदर्पेणैवेदृशानार्याचरणमिति चेत्—तर्हि निघ्नन्त्येव तं तदुत्तराधिकारिणः शिक्षकाः। अस्ति हि रक्षणाधिकृतस्य राज्ञो बलदृप्तस्यानिच्छन्त्यां साध्व्यां बलादसाध्वाचरणे महाजनानामपि तद्वधाधिकारः। असामर्थ्ये च तेषामन्यदेशीयमहाराजानां तत्राधिकारः सम्पूर्ण एव। उच्यते हि—'गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः। उत्पथं प्रतिपन्नस्य कार्यं भवति शासनम्' इति शिष्यस्यापि गुरुदण्डाधिकारः।

अत एव हि महाभारते—याज्ञसेन्यवज्ञानिमित्तमष्टादशाक्षौहिणी परिक्षीणा। लोके हि राज्ञां प्रजापालनाधिकृतानां स्त्रीपालनमेव मुख्यो धर्मः, यतः पतिव्रता असहाया वीथ्यादिषु निश्शङ्कं विचरन्ति। राजानुग्रह एव हि तत्र निदानम्। उक्तं हि महाभारते राजधर्मानुशासने—'हरेयुर्बलवन्तो हि दुर्बलानां परिग्रहान्। हन्युर्व्यायच्छमानांश्च यदि राजा न पालयेत्॥ ममेदमिति लोकेऽस्मिन् न भवेत् संपरिग्रहः। न दारा न च पुत्रः स्यान्न त्वन्नं न परिग्रहः॥ विष्वग् लोपः प्रवर्तेत यदि राजा न पालयेत्। स्त्रियश्चापुरुषा मार्गं सर्वालङ्कारभूषिताः॥ निर्भयाः प्रतिपद्यन्ते यदि रक्षति भूमिपः। न योनिदोषो वर्तेत न कृषिर्न वणिक्पथः॥ मज्जेत् धर्मस्त्रयी न स्यात् यदि राजा न पालयेत्॥' इत्यादि।

अयमेव चेत् राजा स्वयमेव बलात् पतिव्रतादोषमन्विच्छति, तस्य केन विधीयतां दण्डः। प्रजाभिरेव तस्य वधः कार्यः। असामर्थ्ये समर्थैरन्यदेशीयैः। उक्तं हि शान्तिपर्वणि कामन्दाङ्गरिष्ठसंवादे—'कामन्दमृषिमासीनमभिवाद्य नराधिपः। आङ्गरिष्ठोऽथ पप्रच्छ कृत्वा समयपर्ययम्॥ यः पापं कुरुते राजा काममोहबलात्कृतः। प्रत्यासन्नस्य तस्यर्षे किं स्यात् पापप्रणाशनम्॥' इत्यारभ्य पृष्टेन कामन्देन—'यो धर्मार्थौ परित्यज्य काममेवानुवर्तते। स धर्मार्थपरित्यागात् प्रज्ञानाशमिहर्च्छति। प्रज्ञानाशात्मको मोहस्तथा धर्मार्थनाशकः। तस्मान्नास्तिकता चैव दुराचारश्च जायते। दुराचारान् यदा राजा प्रदुष्टान् न नियच्छति। तस्मादुद्विजते लोकः सर्पात् वेश्मगतादिव॥ तं प्रजा नानुवर्तन्ते ब्राह्मणा न च साधवः। ततः संशयमाप्नोति तथा वध्यत्वमेव च' इत्यादि। औशनसादिष्वस्यार्थस्य नितरां सुभिक्षता बोद्धव्या।

एवं प्राप्तविषयकामाधिक्यस्यैव महानर्थहेतुत्वे बलात् पतिव्रतापहारं कः क्षमेत। कीदृशं वा तद्भर्तुर्विवासितस्य हृदयमभिज्वलेदिति त्वमेव विवेचय। अत एव श्रीमति रामायणे रावणं प्रति विधिनियोगः—'अद्यप्रभृति यामन्यां बलान्नारीं गमिष्यसि। तदा ते शतधा मूर्धा फलिष्यति न संशयः ॥' इति। एवं रम्भां प्रत्यपि—'यदा ह्यकामां कामार्तो धर्षयिष्यति योषितम्। मूर्धा तु सप्तधा तस्य शकलीभविता तदा' इति। तत् एवंविधपतिव्रतापराधो बलवत्तरः। ततोऽपि बलवत्तरश्च 'लघुर्दण्डः प्रपन्नस्य राजपुत्रापराधवत्' इत्युक्तलघुदण्डप्रयोजकीभूतप्रपन्नत्वपुत्र[तुल्य ?]त्वरूपधर्मद्वयसमावेशशालिनि केवलं क्षमामात्रस्यैव युक्तत्वेऽपि राष्ट्रान्निष्कासनं पत्नीपरिग्रहणमुपद्रवकरणं कृतमिति। स्वापराधकर्तृषु रावणादिष्वपि क्षमाकरणस्य भगवदभीप्सितत्वेऽपि आश्रितापराधिविषये दीनबन्धोरार्ताश्रयस्य सर्वथा न क्षमा क्षमेति तदभिप्रायो विशदतरः शास्त्रेषु ॥ उक्तं हि तत्रैव 'रुमायां वर्तसे कामात् स्नुषायां पापकर्मकृत्। न हि ते मर्षये पापं क्षत्रियोऽहं कुलोद्भवः' इति। एवं शरणागतहिंसाक्रौर्यमितिहासपुराणेषु श्येनकपोतादिवृत्तान्तेषु बहुशः प्रपञ्चितं तत्रतत्रानुसन्धेयम्। विस्तरभयाद्विरतिः। अतो वध्यत्वमस्यावश्यकमेव।

न द्वितीयः। मृगयाव्यग्रस्य व्याधादिवधवत्, दुष्टचोरस्य वधदण्डविधानवच्च दुष्टशाखामृगवधस्यापि दूरस्थितकृतस्यादोषावहत्वात्। न ह्ययं राज्यादिकामनया वानरेण योद्धुमारब्धः; येन धर्मयुद्धादेरवकाशः स्यात्। किंतु दुष्टसत्त्ववधसमाधिना एकेनैव बाणेन प्राविध्यद्वालिनम्। यथोच्यते—'मुक्तस्तु वज्रनिर्घोषः प्रदीप्ताशनिसन्निभः। राघवेण महान् बाणो वालिवक्षसि पातितः। ततः शरेणाभिहतो रामेण रणकर्कशः। पपात सहसा वाली निकृत्त इव पादपः' इति। अदोषत्वमप्यस्य तत्रैवोच्यते—'यान्ति राजर्षयश्चात्र मृगयां धर्मकोविदाः....अयुद्ध्यन् प्रतियुद्ध्यन् वा यस्माच्छाखामृगो ह्यसि' इति। अतिमानुषस्तवेऽपि, 'यद्वा मृगं मृगयुवन्मृगयापथेन छन्नो जघन्थ न तु शत्रुवदाभिमुख्यात्। तत् युक्तमेव तव राघववंशजस्य तिर्यक्षु नैव हि विपक्षतयोपचारः' इति। अत एव प्रगल्भं भाषमाणेनापि पूर्वं वालिनाऽनुपदमेव श्रुतधर्मेणाभ्युपगतमेव तस्य धर्मत्वमिति नास्माकं तत्र विवादावश्यम्भावः। यथोच्यते 'एवमुक्तस्तु रामेण वाली प्रव्यथितो भृशम्। न दोषं राघवे दध्यौ धर्मेऽधिगतनिश्चयः ॥ प्रत्युवाच ततो रामं प्राञ्जलिर्वानरोत्तमः। यत्त्वमात्थ नरश्रेष्ठ तदेवं नात्र संशयः ॥' इति। अतो न तत्र शास्त्रीयविरोधः कश्चित्।

ननु न वयमत्र शास्त्रविरोधं ब्रूमः; किंत्ववमानमेव तत्र महापुरुषस्येति चेत्, को वाऽवमानः। किं सर्वशक्तस्य भगवतः सर्वेश्वरस्य सङ्कल्पमात्रेण वालिनं सृजतस्तन्निग्रहसामर्थ्यं नास्तीति ब्रूषे; अविस्रम्भे हि तत्र सर्वस्यामपि कथायामविस्रम्भ एव प्रसज्येत। किं वा तादृशशरस्य सप्तसाल-रसातलादिभेदनदर्शितवालिसहस्रसंहारसामर्थ्यस्य तद्वधशक्तिरपैतीति। अथ प्रत्यक्षयुद्धे अजेयता वरबलसम्पादिता वालिन इति चेत्; अस्तु तावत्। तर्हि तादृशवरदानस्यापि भगवदायत्तत्वेन तत्परिपालनमपि ह्यवश्यकर्तव्यमेव; स्वनिग्रहकार्यादपि स्वानुग्रहकार्यस्यावश्यरक्ष्यत्वात्। तर्हि मानुष्यकाभिनये जनावमान एव फलतीति चेत्—

किं ततः। किं वामनभूमिकायां पदत्रययाचनं गौरवावहम् ? किं वा भीष्मयुद्धे स्वप्रतिज्ञाभञ्जनं सर्वजनश्लिकं ख्यात्यावहम् ? किं वा जातिसाङ्कर्यमापाद्य हिरण्यकशिपुभेदनं कीर्तिकरम् ? एतदुक्तं भवति—दैत्यस्तावदुदारः। अतो न तद्वधः शास्त्रीयः। इन्द्राय त्ववश्यं राज्यं प्रदातव्यम्। अतो याच्ञामार्गं जनावमानार्हमपि शास्त्रविरोधविधुरं स्वीकरोति स्म भगवान्। उक्तं हि पूर्वाचार्यैः—'दैत्यौदार्येन्द्रयाच्ञाविहतिमपनयन् वामनोऽर्थी त्वमासीः' इति। एवमेवावश्यवध्यो वाली; वरप्रदातुरप्यनुग्रहः कार्यः। छन्नेन शाखामृगमृगयायां न शास्त्रविरोधश्च। अतः सर्वाबाधेनोपपद्यमानतया एतन्मार्गानुसरणमपि राजतन्त्रविशेष एवेति चिन्तयन्ते गुणरसिकाः। इदमेव हि महतां हृदयमार्द्रीकरोति, यत् सर्वाविरोधेन कार्यनिर्वहणम्। न हि रावणादिवधं गौरवावहमनुमन्यन्ते गुणरसिकाः; रावणो न स्यादित्येकसङ्कल्पस्यैव तद्धूर्वहत्वात्। किं त्वत्यन्तसौशील्यादिकमवरजनैर्दोषतया कल्पितमेव। यदुक्तमतिमानुषस्तवे—'या कंसमुख्यनृपकीटनिबर्हणोत्था सा निर्जितत्रिजगतस्तव नैव कीर्तिः। गोपालनादि यदिदं भवदीयकर्मेत्यार्द्रीकरोति विदुषां हृदयं तदेतत्' इति। इदमेव—'सूक्ष्मः परमदुर्ज्ञेयः सतां धर्मः प्लवङ्गम' इत्यतिगम्भीरतया परिहासपूर्वकमुक्तमित्यवधेहि।

एवं खरवधे पदमेकमपसर्पणं च तदीयशोणितविस्रगन्धासहननिबन्धनमिति तत्रैव व्यक्तम्। यथोच्यते—'तस्य बाणान्तरात् रक्तं बहु सुस्राव फेनिलम्। गिरेः प्रस्रवणस्येव तोयधारापरिस्रवः॥ विह्वलः स कृतो बाणैः खरो रामेण संयुगे। मत्तो रुधिरगन्धेन तमेवाभ्यद्रवत् द्रुतम्॥ तमापतन्तं संरब्धं कृतास्त्रो रुधिराप्लुतम्। अपासर्पत् प्रतिपदं किञ्चित् त्वरितविक्रमः॥ ततः पावकसङ्काशं वधाय समरे शरम्। खरस्य रामो जग्राह ब्रह्मदण्डमिवापरम्। अर्धाधिकमुहूर्तेन रामेण निशितैः शरैः। चतुर्दशसहस्राणि रक्षसां भीमकर्मणाम्॥ खरदूषणमुख्यानां निहतानि महारणे' इति। एवंविधानल्पविकाद्भुतविक्रमक्रीतजगत्त्रयस्य एकवीरस्य खरवधः कथमपसर्पणात् ऋते दुष्कर इति प्रतिभाति भवत। तदेवंविधाविवेकप्रवेकमपहाय निपुणनिरूपणे अनवधिकातिशयनिखिलकल्याणगुणगणौघमहार्णवे भगवति दोषपरमाणुकणानां सतामपि न दर्शनावकाशः; किमुत स्वरूपेण शशशृङ्गायमाणानामिति पश्यतु भवान्।

अत्र निरागसीत्यनेन दूषणहेत्वभावकथनात् विभावनालङ्कारः। निरवधिगुणग्राम इत्यस्य 'अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम्। एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः' इत्युक्तनयेन दोषलेशसत्त्वेऽपि गुणसन्निपातमग्नत्वात् तस्य न दूषणोक्तिगमकतेति द्योतनाभिप्रायगर्भत्वात् परिकरालङ्कारः। उक्तविशेषणाभ्यामल्पगुणस्फुटदोषपुरुषदूषणे कैमुतिकन्याय उक्तः।

एवं विशेषनिरूपणेऽनिपुणसामान्यस्वाभाविकगुणं दोषैकदर्शनं समर्थयते परिमितेति। परिमितः अल्पः गुणः यस्य तस्मिन्। अन्वेष्टव्यगुणे इत्यर्थः। स्पष्टावद्ये पुरःस्फुरितदोषजाते जने, मुधा व्यर्थं निष्प्रयोजनमित्यर्थः। उदासते किं उपेक्षन्ते किम्। तिरस्करण एव स्वतःप्रवृत्तानां दोषेषु पुरःस्फूर्तिकेषु तदुद्घोषणोपेक्षायां किं वा प्रयोजनलाभः। यदि द्रव्याद्युत्कोचदानेन सन्तोष्येरन्, तदाऽपि

त्रिचतुरक्षणविरामं सहेरन् नवेति सन्देह एवेति भावः। मुदा किमुदासत इति पाठे, मुदा—प्रीत्या उदासते किम्। जगद्दूषकाणां कस्मिंश्चित् दूष्ये प्रीतिहेतोरदर्शनादिति भावः। यद्वा स्पष्टान्वये मुदा तद्विषयकसन्तोषेणेत्यर्थः। दोषान्वेषणपरस्य सुव्यक्तदोषदर्शनदार्शिनि प्रीत्युत्पत्त्यवश्यंभावेऽपि तादृशप्रीत्या उदासते किम्। किंतु महान् दोषलाभः समजनीति सन्तोषादधिकमेवोद्गर्जन्तीति भावः। स्वभावो दुरतिक्रम इति न्यायेन पात्रापात्रविवेकमन्तरेण सर्वत्र स्वस्वभावं नोज्झन्ति जन्तवो हन्त मोहजलधिमग्ना इति भावः।

अनेनात्र काव्यार्थापत्तिरलङ्कारः सूचितो भवति। तल्लक्षणं चोक्तम्—'कैमुत्येनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यते' इति। अत्र च काव्यार्थापत्तेरलङ्कारान्तरत्वमनभ्युपगच्छतां तत्स्थाने सम्भावनादिकमेव यत्किञ्चिदाचक्षाणानां मते, [श्लोकस्यास्य?] स्वत एव सज्जनसामान्याधिक्षेपणस्वभावानां जनानां श्रीदाशरथिरूपसज्जनविशेषदूषणोद्योगेन सामान्यदूषणसंरम्भसमर्थनार्थत्वादर्थान्तरन्यासभेद एव वाच्यः। अथ कथमेतत् सङ्गच्छते। निरवधिगुणपरिमितगुणयोर्वस्तुतः सामान्यविशेषभावाभावात्। न चोक्तविशेषणानां कैमुत्यन्यायबोधनमात्रोपक्षीणत्वेन समर्थ्यसमर्थककोट्यननुप्रवेश इति वाच्यम्; तथासत्यपि श्लोके सामान्यविशेषवाचकपदानुपन्यसनेन 'उक्तिरर्थान्तरन्यासः स्यात् सामान्यविशेषयोः' इति लक्षणवाक्याननुगुणत्वात्। न च पूर्ववाक्यार्थेन उत्तरवाक्यार्थसमर्थनमेवार्थान्तरन्यासः कैमुतिकन्यायस्थलसाधारण इति वाच्यम्; तथासति वाक्यार्थहेतुककाव्यलिङ्गादवैलक्षण्यापातात्। 'कामं नृपाः सन्तु सहस्रशोऽन्ये राजन्वतीमाहुरनेन भूमिम्। नक्षत्रताराग्रहसङ्कुलाऽपि ज्योतिष्मती चन्द्रमसैव रात्रिः' इत्यादिदृष्टान्तसाधारण्यापाताच्च। अत्र च उत्तरार्धगतस्यापि पूर्वत्वं योजनाक्रमतः सम्भवति। दृष्टान्तप्रदर्शनस्यापि दार्ष्टान्तिक-समर्थनार्थत्वं लोकसिद्धम्। न च—उत्तरवाक्यार्थस्य तदनन्येन पूर्ववाक्यार्थेन समर्थने स इत्युच्यते। दृष्टान्तस्थले काव्यलिङ्गस्थले च एकविशेषेणापरविशेषसमर्थनेन वस्तुतस्तयोरनन्यत्वाभावात्। अर्थान्तरन्यासे तु सामान्येन विशेषस्य विशेषेण वा सामान्यस्य समर्थनात् वस्तुतः सामान्यविशेषयोः स्वरूपभेदाभावादनन्यत्वं सम्भवत्येव। कैमुतिकस्थलेऽपि जनसामान्यदूषणव्यग्रतायाः श्रीरामदूषणोद्योगरूपविशेषेण समर्थनाभिप्रायकत्वात् तदनुगमोऽपि सुगम एवेति—वाच्यम्। तथाऽपि 'स जितस्त्वन्मुखेनेन्दुः का वार्ता सरसीरुहाम्', 'अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु' इत्यादिदण्डापूपिकान्यायविषये सामान्यविशेषभावप्रसक्त्यभावेन तत्क्रोडीकारासम्भवात्। 'कार्यं च कारणेनेदं कार्येण च समर्थ्यते' इति प्राचीनोक्ते 'सहसा विदधीत न क्रियामविवेकः परमापदां पदम्। वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः' इत्यत्रोदाहृते अर्थान्तरन्यासभेदेऽपि विमृश्यकारिणः सम्पद्वरणरूपकार्येण सहसाविधानाभावकारणस्य अविवेकनिष्ठापत्पदत्वस्य समर्थनात् तत्रोक्तसामान्यविशेषभावविरहेण तदनुगमासम्भवाच्च। आदृतं चेदं कार्यात् कारणसमर्थनमर्थान्तरन्यासतया विद्यानाथ-विश्वनाथादिभिः। यद्यपि कारणात् कार्यसमर्थनं काव्यलिङ्गविषयो भवितुमर्हतीति कैश्चिदुक्तम्—तथाऽपि कार्यात् कारणसमर्थनस्यान्यत्वमपरिवर्जनीयमिति सर्वसम्मतमेव॥ एतेन समर्थनसापेक्षस्य समर्थने काव्यलिङ्गम्; तन्निरपेक्षस्यापि स्फुटार्थस्य समर्थने अर्थान्तरन्यास इति कुवलयानन्दोक्तमपास्तम्। किञ्चिज्ज्ञानां सर्वस्यापि समर्थनसापेक्षत्वात्; विशेषज्ञानां सर्वत्र तदभावाच्च। पर्वतो वह्निमान् धूमवत्त्वादिति वाक्यप्रयोगे तत् कथमित्याकांक्षा प्रायशः समुत्पद्यते। यो यो धूमवान् स स

वह्निमानिति सामान्यतो व्याप्तिबोधकवाक्यप्रयोगे सापि सा प्रशाम्यति । तत्रापि कथंताकांक्षायाः केषांचिदुत्पत्तौ, यथा महानस[म्?] इति विशेषविषयकवाक्यं प्रयुज्यते । अतश्च सामान्येन विशेष समर्थनं विशेषेण सामान्यसमर्थनञ्च लोकशास्त्रसम्मतमिति सर्वत्र समर्थनसापेक्षत्वमस्त्येव । काव्यलिङ्गेऽपि विशेषज्ञस्य समर्थनापेक्षा नास्त्येव। 'मयि पश्यति सा केशैः सीमन्तमणिमावृणोत्' इति सूक्ष्मालङ्कारभेदे यथा गूढस्यापि हेतोर्ज्ञातत्वं सम्भवति, तथा काव्यलिङ्गेऽपि गम्य एव भवेत् हेतुः ; ज्ञायत एव तदभिज्ञैः काव्यरसिकैः । अत ईदृशभेदकोक्तिर्न सङ्गच्छत एव । यदपि तत्रैवोत्तरत्र बहुदूरं भ्रमित्वा अन्ततः सिद्धान्तितम्—समर्थ्यसमर्थकयोः सामान्यविशेषसम्बन्धेऽर्थान्तरन्यासः ; तदितरसम्बन्धे 'काव्यलिङ्गमित्येव व्यवस्थाऽवधारणीये'ति—तदपि ग्रामप्रदक्षिणं कृत्वाऽपि स्वगृहं नागमदिति न्यायेन न सर्वानुगमकलक्षणशिक्षणोपक्षीणम । कारणात् कार्यस्य, कार्यात् कारणस्य च समर्थनरूपेऽर्थान्तरन्यासे अव्याप्तेर्जागरूकत्वात् सामान्यविशेषविषयकत्वमात्रेण कस्यचित् विच्छित्तिविशेषस्यादर्शनेन तस्य भेदकत्वानौचित्यात् । अन्यथा द्रव्याद्रव्यविषयकत्वादीनामपि तद्भेदकत्वापातात् । समर्थनीयार्थसमर्थनं काव्यलिङ्गमिति लक्षिते हि, सोऽर्थः कीदृश इत्याकांक्षाया एवानुदयेन तत्र सामान्यविशेषरूपत्वतदितररूपत्वाभ्यां विधाभेदकल्पनस्याप्यनावश्यकत्वे अलङ्कारान्तरत्वकल्पनस्य सर्वथैवानवसरग्रस्तत्वात् । उत्प्रेक्षादिषु अनुक्तविषयायाः (षयया?) एकधर्मिणि तदन्यत्वेन सम्भावनारूपलक्षणाननुगमाशङ्कया उक्तानुक्तविषयत्वेन विभज्य तत्कोडीकारकरणादिवत् इह विषयविशेषे कस्या अपि शङ्काया अनुदयेन नात्रालङ्कारभेदस्तदवान्तरभेदो वा सुवचः । एवं समर्थ्यसमर्थकयोः सामान्यविशेषभावसम्बन्धमात्रस्यार्थान्तरन्यासत्वे, 'अमितगुणोऽपि पदार्थो दोषेणैकेन निन्दितो भवति। निखिलरसायनराजो गन्धेनोग्रेण लशुन इव' इत्युदाहरणालङ्कारपद्येऽतिप्रसङ्गो दुर्वार एव ; समर्थ्यसमर्थकभावस्य सामान्यविशेषभावस्य च जागरूकत्वात् । न च वाच्यम् उदाहरणालङ्कार एव नास्माभिः स्वीकृतः ; अत एव तस्य लक्षणादिकमपि नोक्तमिति । अनुमानालङ्कारस्य भवद्भिरलक्षितत्वेऽपि अर्थान्तरन्यासप्रकरणे, 'नाप्यनुमानालङ्कार इव प्रस्तुतप्रतीतिजनकतये'ति वाक्यविलेखनेन तदङ्गीकारप्रतीतिवत् उदाहरणालङ्कारस्य कुत्राप्यन्तर्भावाकरणेन तस्याप्यवश्याभ्युपगम्यत्वावसायात् । न च तस्योपमायामेवान्तर्भाव इति वाच्यम् ; सामान्यविशेषरूपत्वेन वस्तुतो वस्तुभेदाभावात् । औपम्यस्य भेदघटितत्वाच्च । नापि दृष्टान्तादिषु ; एकवाक्यत्वात् । वाक्यार्थद्वयस्य बिम्बप्रतिबिम्बभाव एव तत्समुन्मेषात् । अत एव नार्थान्तरन्यासेऽपि तथात्वम् । तस्यापि वाक्यद्वयस्थल एवोन्मेषाच्च । न च प्राचीनैरनुदाहृतत्वान्न तस्यालङ्कारत्वमिष्यत इति वाच्यम् । अत्रोदाहृतेषु शताधिकालङ्कारेषु प्राचीनानुदाहृतानामपि बहूनां विद्यमानत्वात् । प्राचीनानुदाहरणमात्रेण वस्तुस्थित्यपलापासम्भवाच्च । अत उदाहरणालङ्कारोऽप्यवश्यं वाच्यः । तद्बहिर्भूतमप्येतल्लक्षणं वक्तव्यम् । कार्यं च कारणेनेदमित्युक्तार्थान्तरन्यासोऽप्यन्तर्भावनीयः । काव्यलिङ्गं च बहिर्भावनीयमिति ।

अतश्चेत्थमेवैषामसङ्कीर्णानि लक्षणानि शिक्षणीयानि । यथा प्रस्तुतवाक्यार्थनिष्पादकत्वरूपं तत्समर्थकत्वं काव्यलिङ्गस्य विषयः । तच्च पदार्थगतं वाक्यार्थगतं वा भवतु । अत एवोभयथाऽपि तद्द्विधा विधातव्या । चित्ते त्रिलोचनसाहित्यस्य कन्दर्पविजयं प्रति हेतुत्वात् । बिम्बप्रतिबिम्बप्रतीतिर्दृष्टान्तस्य विषयः । सामान्येन विशेषस्य, कार्येण कारणस्य प्रतीतिस्थले बिम्बप्रतिबिम्बभावाभानात् पूर्ववाक्यार्थनिष्ठमुत्तरवाक्यार्थज्ञापकत्वरूपं तत्समर्थकत्वं अर्थान्तरन्यासस्य विषयः । पूर्वोत्तरत्वादिकमन्वयक्रमतः, न पाठक्रमतः । सामान्यज्ञानेन विशेषज्ञानस्य विशेषज्ञानेन सामान्य-

ज्ञानस्य च पूर्वोक्तप्रतिज्ञोदाहरणादिस्थलसिद्धत्वात् कारणकार्यविज्ञानेन कार्यकारणविज्ञानस्य लोक-सिद्धत्वाच्च न लक्षणासङ्गतिः। उदाहरणे वाक्यार्थद्वयविरहेण तदनुगमश्च न संभवति। अत एवानुमानसाधारण्यमपि निवारणीयम्। तत्र च, 'तस्मिन् मणिव्रातहतान्धकारे पुरे निशालोप-विधानदक्षे। सद्यो वियुक्ता दिवसावसाने कोकाः सशोकाः कथयन्ति नित्यम्' इत्युदाहरणश्लोके एकवाक्यतयैवान्वयबोधस्य निर्विवादतया वाक्यार्थद्वयविरहात्। न च पदसंघात एव वाक्यमिति नैयायिकपक्षरीत्या उदाहरणानुमानयोरतिप्रसङ्ग इति वाच्यम्। एकक्रियान्वयबोधजनकपदसमुदा-यस्यैव वाक्यतया आलङ्कारिकैरभ्युपगमेनातिप्रसङ्गविरहात्। अन्यथा पदार्थहेतुककाव्यलिङ्गो-च्छेदापाताच्च। एवमनुमानस्थले, कथयन्ति, मन्ये इत्यादिशब्दनिर्देशेन संभावनारूपज्ञानस्य वाच्य-त्वात् तज्जनकज्ञानविषयत्वमात्रं सशोककोकादिषु बोधनीयम्। अर्थान्तरन्यासस्थले तु तद्ज्ञान-जनकज्ञानविषयत्वमपि तथा। सामान्यविशेषयोः परस्परज्ञानज्ञाप्यत्वात्। अनुमानोत्प्रेक्षयोस्तु सम्भावनाविषयकत्वसाम्येऽपि विषयभेदादेव भेदो निरूपणीयः।

यत्तु कैश्चिदुक्तम्। उत्प्रेक्षायां संशयो विषयः; अनुमाने तु निश्चय इति—तन्नातीव रमणीयम्। उत्कटैकतरकोटिकसंशयरूपसम्भावनाया एवोभयत्र विषयत्वात्। 'यत्र पतत्यबलानां दृष्टिर्निशिताः पतन्ति तत्र शराः। तच्चापरोपितशरो धावत्यासां पुरः स्मरो मन्ये' इत्यादिषूत्प्रेक्षावदेव मन्ये शङ्के इत्यादिशब्दनिर्देशेन सम्भावनाया एव प्रतीतेः। प्रत्युत उत्प्रेक्षायामेव ध्रुवं नूनमित्यादि-निश्चयद्योतकशब्दो निर्दिश्यत इति स्थलद्वयेऽप्यूहरूपसम्भावनैवावश्यमङ्गीकार्या॥ तर्हि को भेद-स्तयोरिति चेत्—इत्थम्—स्वरूपोत्प्रेक्षायां यत्किञ्चिद्धर्मिणि तदन्यतादात्म्यं तद्गतधर्मवत्त्वं वा सम्भाव्यते। अनुमाने तु यत्किञ्चिद्वस्तुस्वरूपमेव सम्भाव्यते। यथा स्मरधावनादिरूपम्। हेतुफलो-त्प्रेक्षयोश्च तादृशहेतुजन्यत्वं तादृशफलजनकत्वं वा सम्भाव्यते। 'रक्तौ तवांघ्री मृदुलौ भुवि विक्षेपणात् ध्रुवम्। मध्यः किं कुचयोर्धृत्यै बद्धः कनकदामभि'रित्यादौ विद्यमानयोः स्वाभा-विकरक्तत्वकनकदाम्नोः भूनिक्षेपणजन्यत्वमध्यधृत्यर्थत्वसम्भावनात्। इह तु दिवसावसाने सशोक-कोकज्ञाप्यत्वमेव सम्भाव्यत इति महानयं भेदः। एवमेतादृशा विषयभेदा ऊहनीयाः। उदाहरणानि च क्वचिदाधुनिकप्रयुक्तानि व्यत्यस्तानि उक्तलक्षणानुगुणं विपर्यसितव्यानीति।

अतश्च काव्यार्थापत्तेः क्वान्तर्भाव इति चेत्--अत्रेदं विचारणीयम्—काव्यार्थापत्तेः पृथगलङ्कार-त्वानभ्युपगन्तृमते तस्याः कुत्रान्तर्भाव इति। यत्तु रसगङ्गाधरे अर्थापत्त्यलङ्कारप्रकरणे कैमु-त्येनार्थसंसिद्धिरिति कुवलयानन्दोक्तलक्षणस्य 'तवाग्रे यदि दारिद्र्यं स्थितं भूप द्विजन्मनाम्। शनैः सवितुरप्यग्रे तमः स्थास्यत्यसंशयम्' इत्यधिकार्थापत्तावव्याप्तिरित्युक्तम्। तन्न; अधिकार्थापत्तेः काव्यप्रकाशोक्तयद्यर्थातिशयोक्तौ कुवलयानन्दोक्तसम्भावनायां वाऽन्तर्भावसम्भवेन तस्य काव्यार्था-पत्तिविषयताया अनावश्यकत्वात्। न च वाच्यमर्थापत्तिसामान्यस्यैकलक्षणक्रोडीकार उचित इति; असम्भवात्। केनचिदर्थेन तुल्यन्यायत्वादर्थान्तरस्यापत्तिरिति तदुक्तलक्षणं तु न सर्वानुगमकम्। 'का वार्ता सरसीरुहाम्' इत्यादिदण्डापूपिकाविषये कस्याश्चिदव्यापत्तेरदर्शनात्। 'पारेपरार्धं गणितं यदि स्यात् गणेयनिःशेषगुणोऽपि स स्यात्' इत्यादिस्थलेऽपि कस्यचिदनिष्टापादनस्यादर्शनात्। 'यो मे गर्भगतस्यापि वृत्तिं कल्पितवान् प्रभुः। शेषवृत्तिविधानेऽपि किं सुप्तः सोऽथ वा मृतः' इत्यादिस्थलेष्वपि शेषवृत्तिं विधास्यत्येवेति सम्भावनाया एव प्रतीत्या अनिष्टापादनस्यानुपलम्भात्। 'कस्तूरिकामृगाणाम्' इत्यादिपूर्वोक्तश्लोके निवेशयिष्यामीत्यध्यवसायस्यैव प्रतीत्या तदसंग्रहाच्च। यद्युपबन्धस्थले सर्वत्र एकरूपप्रतीतेरदर्शनाच्च। न च येन न्यायेनैकोऽर्थः सिद्धः, तेनैव न्यायेनापरो-ऽप्यर्थः सेद्धुमर्हतीत्येवंरूपप्रत्ययविशेष एवार्थापत्तिरिति वाच्यम्, तादृशप्रत्ययस्य सम्भावनारूप-

त्वमनिष्टापत्तिरूपत्वं अध्यवसायरूपत्वं वेति विवेचनीयम्। त्रितयानुगतेतरव्यावृत्तधर्मस्तु कश्चित् अप्रसिद्ध एव। अन्यतमत्वादिकं त्वप्रयोजकम्। शब्दैक्यमात्रमप्यकिञ्चित्करम्।

अतो विविच्य निरूपणे सम्भावनारूपत्वे, 'अद्य श्वः फणिनाम्' इति त्वदुक्तानिष्टापादने 'दिन-मध्येऽपि जितं तमोगणैः' इत्यादिविपरीतोद्भावने च तद्विरहादप्रसङ्गः। आपत्तिरूपत्वे तु शेषवृत्ति-विधानेऽपीत्यादिसम्भावनायां सः। उभयथाऽपि 'का वार्ता सरसीरुहाम्' इत्यादिनिश्चयरूपे अप्रसङ्ग-स्तदवस्थ एव। अतो न सर्वानुगमकं लक्षणं भवितुमर्हति। अथ यद्यर्थघटितेन केनचिदर्थेनापरार्थ-निरूपणं सम्भावनापादनादिसाधारणम्—यद्येवं स्यात् तर्हि तदपि स्यादित्याकारकमेव लक्षणं विवक्षणीयमिति चेत्—तर्हि दण्डापूपिकान्यायविषयबहिष्कारः सिद्ध एवेति न तत्कोडीकारः शक्य-शङ्कः। न च तस्य कैमुत्यन्यायरूपतामात्रम्; न त्वलंङ्कारत्वमिति वाच्यम्—'स जितस्त्वन्मुखे-न्दुः का वार्ता सरसीरुहाम्', 'स्वकीयं हृदयं भित्त्वा निर्गतौ यौ पयोधरौ। हृदयस्यान्यदीयस्य भेदने का कृपा तयोः' इत्यादौ कविप्रतिभामात्रसिद्धस्य कैमुत्यन्यायस्य अलङ्कारतायाः केना-प्यपलपितुमशक्यत्वात्। अन्यथा अर्थान्तरन्यासस्यापि पूर्वोक्तपञ्चावयवप्रयोगमात्रत्वेन कथन-सम्भवादलङ्कारबहिर्भावापत्तेः। तर्हि किं कर्तव्यमिति चेत्—उच्यते। उक्तरीत्या यद्यर्थोपहितं सम्भावनायां वा अर्थापत्तौ वा अन्तर्भवतु। तत्र समर्थ्यसमर्थकाद्यनुपलम्भात्। कैमुतिकन्या यविषयस्य तु यत्किञ्चिदर्थं प्रति ज्ञापकत्वरूपसमर्थकत्वसत्त्वादर्थान्तरन्यास एवान्तर्भावो युक्त इति। न च सामान्यविशेषरूपत्वाभावान्न तथात्वमिति वाच्यम्; लक्षणे सामान्यविशेषप्रवेशस्यानु-पयुक्तत्वात्; कार्यात् कारणसमर्थने अप्रसङ्गापादकत्वाच्च।

यत्तु रसगङ्गाधरे—कारणेन कार्यस्य कार्येण वा कारणस्य समर्थनमित्यपि भेदद्वयमर्था-न्तरन्यासस्यालंङ्कारसर्वस्वकारो न्यरूपयदित्याशङ्क्य, 'तन्न; तस्य काव्यलिङ्गविषयत्वात्। अन्यथा वपुःप्रादुर्भावादिति सकलालंङ्कारिकसिद्धं काव्यलिङ्गोदाहरणमसंगतं स्यात्। अपराधे वाक्यार्थ-द्वयस्य कारणत्वेनार्थान्तरन्यासोदाहरणतापत्तेः' इति। तच्च पूर्वोक्तहेतुत्वभेदविवेचनमन्तरेण आपातप्रतिभामात्रनिरूपणप्रसूतं विपरीतम्। निष्पादकत्वरूपहेतुत्वविवक्षायां काव्यलिङ्गमिति विवेचनेन पूर्वोत्तरजन्मानमनस्य वस्तुतोऽपराधित्वनिष्पादकतया अर्थान्तरन्यासप्रसक्त्यभावात्। परं तु उत्तरजन्मानमनस्यापराधित्वं वस्तुतोऽसिद्धमपि मिथ्याध्यवसितमित्यतिशयोक्तिगर्भमत्र काव्यलिङ्गम्। अर्थान्तरन्यासे तु ज्ञापकत्वसम्बन्धो विषयः। अत एव 'सहसा विदधीत न क्रियाम्' इत्यादौ सम्पद्वरणरूपकार्यज्ञानस्यैव सहसाविधानाभावप्रयोजनकाविवेकगतापत्प्रदत्वज्ञानहेतु-त्वात् तत्स्वरूपस्याहेतुत्वाच्च न तस्य काव्यलिङ्गविषयता। एवं कारणात् कार्यसमर्थनेऽपि कारण-ज्ञानस्य कार्यजनकत्वं तद्ज्ञानजनकत्वं चेत्युभयविधं हेतुत्वम्, तत्र 'पृथ्वि स्थिरा भव भुजङ्गम धार-यैनामार्यः करोति हरकार्मुकमाततज्यम्' इत्यादौ सम्यक्पृथ्वीधारणादौ प्रयत्नविशेषरूपे हरकार्मु-काततज्यीकरणज्ञानस्यैव हेतुत्वात् तज्जन्यत्वमेव। न पुनरज्ञातस्य तस्य तत्र हेतुता, किन्तु पृथ्वी-प्रक्षोभादावेवेति न तत्रापि काव्यलिङ्गप्रसरावकाशः। तथा 'उपाहसत् कीर्त्यमहत्त्वमेव तं गिरां हि पारे निषधेन्द्रवैभवम्' इत्यत्रापि नळवैभवस्य वागगोचरत्वज्ञानमेव कीर्तनीयमाहात्म्यस्यान्यस्य नृपस्योपहसने हेतुरिति। कार्यज्ञानस्य कारणज्ञानप्रयोज्यत्वं तु 'गतिर्व्योम्ने'ति (2-11) श्लोके विपुलमुपपादयिष्यते। एवं काव्यलिङ्गोदाहरणेषु सर्वेष्वपि ज्ञानाघटितमेव कारणत्वं तत्र तत्र सुव्यक्तम्; यथा मुखालोकोच्छेदकत्वस्य महामोहताप्रसावकत्वमित्यादि निरूपणीयम्। प्रकृते च कैमुत्यन्यायस्थलेकलितविधाभेद एवार्थान्तरन्यसनेऽन्तर्भाव इति। विस्तरस्त्वन्यत्र।

एवमत्राद्वैतमतप्रक्रिययाऽप्यर्थविशेषः कश्चिदुन्मिषति । तथा हि—**निरवधिगुणग्रामे** 'पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च', 'यस्सर्वज्ञस्सर्ववित्', 'सत्यकामस्सत्यसङ्कल्पः' इत्याद्युक्तनिरवधिककल्याणगुणरत्नरत्नाकरायमाणे, **निरागसि** अपहतपाप्मा विजरो विमृत्युः, निष्कळं निष्क्रियं शान्तं निरवद्यं निरञ्जनमित्यादिश्रुतिगणघोषितहेयप्रत्यनीकताके, **रामे**—'रमन्ते योगिनो यस्मिन्' इत्युक्तनिखिलयोगिमनीषालम्बनभूत-दिव्यषाड्गुण्यविग्रहदिव्यायुधमाल्यभूषणाम्बराद्याडम्बर-विजृम्भितनिखिलजगदाधिराज्यलक्ष्मीविशिष्टे परे ब्रह्मणि । अनेन चाद्वैत्युक्तनिर्गुणत्वाविद्याख्यदोष-सम्बन्ध-विग्रहराहित्यादीनां निर्मूलता सूचिता । वस्तुस्वभावे एवंविधेऽपि कस्याश्चिच्छ्रुतेरपार्थकल्पनया प्रत्यवतिष्ठन्त इत्याह—**वागसीति । वाक्** तत्त्वमस्यादिवाक्यजातं सैव **असिः** खड्गः 'असिना तत्त्वमसिना' इति स्वयमेवोक्तेरिति भावः । तस्य **स्फुरणं** आपातार्थप्रकाशः दृढतरविचारादिकमन्तरेण तात्कालिकप्रकाशस्यैव स्फुरणशब्दार्थत्वात् । तेन **मुषितः** अपहृतः **आलोकः** बुद्धिशक्तिः विविच्य निर्धारणरूपा येषां तथोक्ताः **लोकाः** तन्मतानुयायिनः **सदन्तिके** सतां गोष्ठीषु **वदन्ति** । स्वमत-सम्यक्त्वनिश्चयात् निश्शङ्कमुद्घोषयन्तीत्यर्थः । कथमित्यत्राह-**वरतन्विति** । वरतनुशब्देन स्त्रीलिङ्गत्वात्, 'स्वविषयायाश्च भोग्यबुद्धेर्जननीम्' इत्युक्तजगन्मोहकप्रकृत्याद्यात्मकपरिणामशालित्वाच्चाविद्योच्यते । तया **हृतिं** तिरस्कारं स्वस्वरूपतिरोधानमित्यर्थः । अथ **वालिद्रोहं** जगद्द्रोहम्, वालिशब्देन 'ब्रह्म पुच्छं प्रतिष्ठा' इत्युक्तवालस्थानीयब्रह्मप्रतिसम्बन्धि जीवादिकमुच्यते । **मनागपसर्पणं** क्रमेणाद्वैतज्ञानोत्पत्त्या तादृशाविद्याविमोक्षणं च **वदन्ति** सिद्धान्ततया ब्रुवते । एवं ब्रह्माज्ञानपक्षमुपक्षिप्य जीवाज्ञानपक्षमुपन्य-स्यति—**परिमितेति** । वस्तुतोऽल्पगुणे दोषभूयिष्ठे जीवात्मनि अविद्यासम्बन्धकथनमुपेक्षन्ते किमित्यर्थः तथाविधशुद्धब्रह्मण्येवाज्ञानसम्बन्धं कथयतां जीवात्मसु तत्कथनं कैमुत्यसिद्धमिति भावः । अत्र च प्रथमश्लोकोपक्रान्तस्य, मध्ये च 'पश्यति परेषु दोषान्' इत्याद्यनेकश्लोकैराप्यायितस्याद्वैतमतसिद्ध-ब्रह्माज्ञानादेरुपसंहारात् उपक्रमोपसंहारादितात्पर्यलिङ्गैः शुद्धाद्वैतवादिन एवैतत्पद्धतिप्रधानप्रतिपाद्याः अनिपुणसार्वभौमा इति तान् प्रत्यनुशयो ध्वन्यते । यत् किल निर्विण्णं पूर्वाचार्यैः—"चित्रं विधेर्विलसितं त्विदमाविरस्ति दुष्टात्मनामयमहो किल दुर्विपाकः । यत् केचिदत्रभवतीं श्रुतिमाश्रयन्तोऽप्यर्थे कुदृष्टि-विनिविष्टधियो विनष्टाः ॥", "धृतनिगमकवचगूढाः कष्टं संप्रति कुदृष्टयः केचित् । छलयन्ति सौगतादीन् स्वालोपालम्भतुल्यया वाचा" इत्यादि । तदेतन्मोहजालं समूलमुन्मूल्य सुखी भवतु जीवलोक इति भगवत्प्रार्थनया समापिपत् पद्धतिमिति संक्षेपः । वृत्तं च पूर्वोक्तम् ॥ १२ ॥

इति श्रीसुभाषितनीवीव्याख्यायां हृद्यार्थदीपिकायां

अनिपुणपद्धतिः प्रथमा ।

நிரவதிகுணக்ராமே ராமே நிராகஸி வாகஸி—
ஸ்ப்புரணமுஷிதாலோகா லோகா வதந்தி ஸதந்திகே.
வரதநுஹதிம் வாலித்ரோஹம் மநாகபஸர்ப்பணம்
பரிமிதகுணே ஸ்பஷ்டாவத்யே முதா கிமுதாஸதே 12.

1 எல்லையற்ற குணக்குவியலாய் குற்றமொன்றுமில்லாத ஸ்ரீராம பிரான் விஷயமாகவே கத்தி போன்ற(வா)நாக்கின் துடிப்பைக் கொண்டு பிறருக்குள்ள வெளிச்சிறப்பைப் போக்கும் ஜனங்கள் ஸ்த்ரீயை (தாடகையை)க் கொன்றான், அபகாரம் செய்யானென்று நினைத்திருந்த வாலிக்கு த்ரோஹம் செய்தான், கரனோடு போர் புரிந்தபோது சிறிது பின் வாங்கினானென்ற குற்றங்களை நல்லோர்களின் அருகிலும் கூறுகின்றனர். இவர்கள், அற்ப சொற்ப குணமுடையனைக் குற்றம் மலிந்து தெரிய விருக்குமவனைப் பற்றி, பேச விஷயம் கிடைத்ததற்குக் களிப்புடன் இருப்பவர், ஏன் வெறுமனேயிருப்பர். (தாடகாவதம் முதலியன ந்யாய் மானவை என்று உரையில் வெகு அழகாகவும் விரிவாகவும் கூறப் பட்டிருப்பது காண்க.)

2 அத்வைத மதத்தைத் தழுவியும் ஒரு பொருளாம்—ஸர்வேச்வரன் கல்யாண குணங்களெல்லாம் நிறைந்து குற்றமென்பது என்றும் ஒன்று மில்லாதவன், அவனை நிர்குணனென்றோ, தோஷமும் மாயையினால் நேரலாமென்றோ சொல்லலாகாது. இப்படியிருக்க அத்வைதிகள் நல் லோரிடமே வந்து (ஸதந்திகே ஸத்வித்யையின் முடிவிலுள்ளதான-ஜகத் காரணப்ரஹ்ம விஷயமான) அஸி என்ற வாக்கை அதாவது தத்த்வமஸி என்பதைக் கொண்டு உள்ள அறிவைப் போக்கிக் கொண்டவர்களாகி அந்த பரப்ரஹ்மமே உயர்ந்த உருக்களாம் மோகனப்ரபஞ்சம் பலவாக மாறக் கூடிய மாயையினால் மறைக்கப்படுமென்றும், வாலமாய்-புச்சமாய் அதாவது ஸர்வாதிஷ்டாநமான ப்ரஹ்மத்திலே தோன்றியதால் வாலி என்னப்படும் ப்ரபஞ்சத்தை யழிக்கும் அத்வைத ஜ்ஞானம் சிறிது உண்டானாலே, த்யானாதிகளின்றியே வாக்யத்தினின்று வரும் அறிவாலேயே எல்லாம் அப்பால் போமென்றும் சொல்லுகிறார்கள். அந்த ப்ரஹ்மத்திற்கே இந்த நிலையைச் சொல்லும்போது ஜீவர் களுக்குக் குறை கூறாமலிருப்பரா—सदन्तिके—सद्विद्याया अन्तगतसंदर्भे वागसिः तत्त्वमसिवाक्यम्। तदापातार्थस्फुरणेन पूर्वगृहीतार्थज्ञानं मुषितं येषां ते इत्यर्थः।

முதற்பத்து முற்றிற்று.

२ सुभाषितनीव्यां दुष्टपद्धतिः

तदेव गृह्यतां नाम च्छागमण्डूकरासभैः ।
तिसृणां तावता हन्त मूर्तीनां किमिहागतम् ॥ १ ॥

तदेवं प्राथमिकपद्धत्या सुमत्यादिविरहात् अनादिमोहवासनाकोलाहलाच्च स्वभावतः परदोषगवेषणैकनिपुणान् अनिपुणान् उपालभ्य तत्प्रसङ्गात् 'यद्धि मनसा ध्यायति तद्वाचा वदति तत् कर्मणा करोती'ति श्रुतिविहितप्रकारेण मनोवाक्कायकर्मसु परदोषचिन्तनतत्प्रजल्पनरूपकर्मद्वयकथनानन्तरं कर्मणा करणरूपं तृतीयप्रकारमप्युदाजिहीर्षुस्तद्वितितिभूतेषु महापुरुषावमाननादिप्रकारेषु योऽयमसूयाजनितदर्पवशात् तत्प्रभावज्ञोऽपि तदवमिमंसया कथञ्चित् तत्साम्यं संपिपादयिषति, तमादौ विदूषयितुमिमां दुष्टपद्धतिमारभमाणः प्रथमश्लोकेन, महापुरुषनाममात्रधारणेन तान् विडम्बयतामवरपुरुषाणां हानिरेव केवलम्, न खलु किञ्चिदपि प्रयोजनं सिद्ध्येदित्येतत् प्रसिद्धदृष्टान्तप्रदर्शनेन प्रकटयति—तदिति । **छागमण्डूकरासभैः** अजभेकगर्दभैः **तत् नामैव** लोकवेदप्रसिद्धं ब्रह्मविष्णुरुद्ररूपत्रिमूर्तिवाचकं नामैव **गृह्यताम्** स्वीक्रियताम् । **तावता** तादृशनामधारणमात्रेण **तिसृणां मूर्तीनां** जगत्सृष्टिस्थितिसंहारानुगुणमूर्तित्रयपरिग्रहवतां ब्रह्मविष्णुरुद्राणां **इह** अस्मिन् विषये **किमागतं** किंवाऽनिष्टमुपनतम् । अत्र च छागेन ब्रह्मणः, मण्डूकेन विष्णोः, रासभेन रुद्रस्य च नाम गृह्यतामिति क्रमान्वयो विवक्षितः । तथा ह्युक्तममरकोशे—"विरिञ्चोऽजो विरिञ्चनः', 'छागबस्तच्छागलका अज' इत्यजनाम ब्रह्मच्छागयोः, 'यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु । शुकाहिकपिभेकेषु हरिर्ना' इति हरिनाम विष्णुमण्डूकयोः, एवं 'खरा रुद्राग्निरासभाः' इति खरनाम रुद्रासभयोः रत्नमालायाम्, 'हरा रुद्राग्निगर्दभाः' इति हरनाम वैजयन्त्याञ्च । यद्वा क्रमान्वयाविवक्षया त्रिमूर्तिनाम यथायथं छागादिभिः स्वीक्रियतामित्यर्थः । तेन 'अजा विष्णुहरच्छागाः' इत्यमरकोशात्, 'अजो हरौ हरे कामे विधौच्छागे रघोः सुते' इति विश्वकोशाच्च जनाम्न एव त्रिमूर्तिवाचकत्वमनुसन्धेयम् ।

नन्वत्र शुकसर्पकप्यादीनामपि हर्यादिनामग्रहणम् उक्तकोशादवसीयते । तत् कथमत्र च्छागादिमात्रकथनमिति चेत्–अत्र ब्रूमः । शुकादीनां तु दर्शनीयत्वमधुरवाक्त्वादिगुणलवसम्बन्धोऽप्यस्ति । छागादिषु तु प्रथमचरमयोः 'अजारजः खररजस्तथा सम्मार्जिनीरजः' इत्यस्पृश्यरजस्कत्वाशुद्ध्यावहत्वादिकं शास्त्रोक्तम् । मध्यमस्य च 'मण्डूकेन विकर्षत्येष वै पशूनामनुपजीवनीयो न वा एष ग्राम्येषु पशुषु हितो नारण्येषु' इति सर्वपश्वनुपयुक्तत्वेनाप्रयोजकत्वं प्रत्यक्षश्रुतिपठितम् । वर्णितं च कविभिर्निकृष्टवस्तूपलक्षणत्वमस्य, 'पुरा सरसि मानसे' इति श्लोके 'लसदनेकभेकाकुलम्' इति । अतश्चैवंविधनिकर्षातिशयमभिसन्धायैव इत्थमभिहितमिति द्रष्टव्यम् ।

अनेन कस्यचित् दृप्तपुरुषस्य महापुरुषसन्निधौ तदीयाभिजनादिनामधारणपुरस्सरमाह्वानादौ कृतेऽपि महानुभावस्य तस्य न काऽपि हानिः ; प्रत्युतायमेव नश्येत् तत्परिबुभूषयेति प्रस्तुतवृत्तान्तावगतिपर्यवसानात् अप्रस्तुतप्रशंसालङ्कारः । सङ्कीर्यते चायं तुल्ययोगितया अनेकेष्वेकक्रियान्वयप्रयुक्तयेति ।

(2) अन्योऽप्यर्थः । छागमण्डूकरासभैः तदेव नाम वेदमद्ध्यस्थमहामन्त्रादिगतं छागमण्डूकरासभाख्यं नामैव गृह्यताम् स्वीक्रियताम् । यथा छागनाम, 'छागस्य वपाया मेदसः' एष च्छागः पुरो अश्वेन वाजिना पूष्णो भागो नीयते विश्वदेव्यः' इति मन्त्रवर्णे । मण्डूकनाम च, 'मण्डूकि ताभिरागहि सेमन्नो यज्ञम् । स्तेगान् दँष्ट्राभ्यां मण्डूकान् जम्भ्येभिः' इत्यादि मन्त्रवर्णे, रासभनाम च 'प्रैतु वाजी कनिक्रदन्नानदद्रासभः पत्वा । रासभो वाङ्कनिक्रदत् सुयुक्तो वृषणा रथ' इत्यादिमन्त्रवर्णे च घटकीभूतम् । तथा च उक्तनाम्नां महामन्त्रघटकतया जपादिगोचरत्व-महाफलप्रदत्व-महापातकादिप्रायश्चित्तभूतस्वोच्चारणकत्वाद्यतिशयविशेषसम्पत्तावपि तावता तिसृणां मूर्तीनां किमागतम् । अयमाशयः—ईश्वरसृष्टयोर्नामरूपयोर्मध्ये नाममात्रस्य मन्त्रघटकतयोत्कर्षसिद्धावपि छागमण्डूकरासभरूपमूर्तित्रयस्य किं फलमागतम् । पूर्वोक्तरीत्याऽशुद्धत्वस्यैव शास्त्रविहितत्वादिति, भगवदाज्ञानियतदेहाशुद्धेर्यथाशास्त्रमङ्गीकर्तव्यत्वादिति । अनेन दृप्तानां भगवद्भागवतादिनामधारिणां तादृशनाममात्रस्य विशिष्टनामत्वेन तत्प्रयुक्तोत्कर्षसिद्धावपि निहीनवंशजत्वदुष्कृत्यादिप्रयुक्तदेहाशुद्ध्यादिकं न हीयत एवेति सूचितम् । अत्र संज्ञामूर्तिक्लप्तिरिति सूत्रानुरोधात् मूर्तिशब्दः प्रयुक्तः । कथञ्चिन्नामशुद्धिसम्पादनेऽपि रूपशुद्धिः सर्वथा न सम्भवतीत्याशयः ।

(3) एवमन्योऽपि कश्चिदर्थः—छागमण्डूकरासभैः, तदेव 'यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम् । अभिलाषोपनीतं तत् स्वर्गाख्यं परमं सुखम् (सुखं स्वःपदास्पदम्') इति प्रसिद्धं स्वर्गसुखमेव गृह्यतां नाम—स्वीक्रियतां तावत् । नामेति प्रसिद्ध्यर्थकम् । प्रसिद्धिश्च वेदादौ । तथा हि—'न वा उ एतन्म्रियसे न रिष्यसि देवाँ इदेषि पथिभिस्सुगेभिः, यत्र यन्ति सुकृतो नापि दुष्कृतस्तत्र त्वा देवस्सविता दधातु' इति यागोपाकृतपशूनां स्वर्गप्राप्तिः श्रूयते । एवं 'यजमानेन सहिताः स्वर्गं यान्ति नराधिप' इति महाभारतवचनेन यागोपयुक्तपदार्थसामान्यस्य स्थावरजङ्गमरूपस्य स्वर्गप्राप्तिरविशेषतः श्रुता । उक्तं हि न्यायसिद्धाञ्जने, यजमानेन सह पश्वादीनां स्वर्गादिगमनवद्वा मोक्षसिद्धिरिति । व्याख्यातं च [1]रङ्गरामानुजीये—यजमानेन यागौपयिकस्थावरतिर्यङ्मनुष्याणां तुल्यस्वर्गत्वाद्यसम्भवेनेत्यादिना । अतश्च प्रकृते छागस्य तावत् पशुत्वप्रयुक्ता स्वर्गप्राप्तिरनिवार्या । मण्डूकस्य तु 'मण्डूकेन विकर्षती'ति श्रुतिविहितं इष्टकोपरि विकर्षणं, अष्टाभिर्विकर्षतीति विहिताष्टकृत्करणत्वेनाष्टवारं प्रयुज्यमानं जीवनाशमेवापादयेदिति तस्यापि यागोपयुक्त-

---

1 मूलवाक्यस्यार्थान्तरमपि रत्नपेटिकायामुक्तमिति मनसिकृत्य रङ्गरामानुजीय इत्युक्तम् । स्वर्गाद्यनपेक्षियजमानकर्तृकनित्यादिकर्माङ्गपशुविशसने यजमानतुल्यफलता कथम् । तद्वत् किञ्चिदुपयोगिमण्डूकादेरपि किञ्चिद्भवति फलमित्याशयेनैतदुक्तिः ।

पदार्थसामान्यादापतन्ती स्वर्गप्राप्तिरनिवार्यैव। एवं रासभस्यापि चयनार्थमृद्भारवहनात् तदुपयुक्तत्वं स्वर्गप्राप्तिहेतुरविशिष्टम्। अविवादं च तस्यापि 'नैर्ऋतं गर्दभमालभते'ति विहितावकीर्णिब्रह्मचारिप्रायश्चित्तपशुत्वात् स्वर्गगमनमिति। तथा चैवंविधप्रमाणानुरोधात् छागादिदेहावच्छिन्नजीवानां यजमानदेहावच्छिन्नजीवेन सह समानस्वर्गादिसुखवत्त्वसिद्धावपि **तिसृणां मूर्तीनां**–तदवच्छेदकदेहभेदानां **इह** अस्मिन् लोके, **किमागतम्**—न किमपि फलं प्राप्तम्। परलोके स्वर्गप्राप्तिरविशिष्टाऽस्तु नाम। इह लोके तु पशुर्विनष्टः, मण्डूकश्चाष्टवारमिष्टकोपरि विकृष्टः प्रनष्टप्रायः, रासभश्च शकटमात्रमृद्भारवहनात् विशीर्णपृष्ठश्चेति दुःखजातमेवात्रानुभूयते तैरिति भावः। जीवनेऽप्येषामशुद्धिः पूर्वमेव निवेदिता। रासभस्य तु निकर्षः प्रत्यक्षश्रुत्यैव दर्शितः; 'तस्माद्गर्दभो द्विरेताः सन् कनिष्ठं पशूनां प्रजायते' इति गर्दभस्याश्वतररेतसा द्विरेतस्त्वं प्रजननब्राह्मणे प्रसिद्धम्। पशूनां मध्ये अपकृष्टमपत्यमुत्पादयतीत्यर्थः। यजमानस्य तु 'अग्निचित् कपिला स्त्री' इति स्मृतिवचनात् दर्शनमात्रेण शुद्ध्यावहत्वं प्रसिद्धम्। एवं 'तस्माद्वाजपेययाजी पूतो मेध्यो बर्हिष्यः' [इति ?] 'तस्माद्वाजपेययाजी न कञ्चन प्रत्यवरोहति' इति विद्वदनूचानसमागमेऽपि प्रत्युत्थानाद्यनर्हता च विहिता। अतः परलोकप्राप्तिविषयसाम्यं इहलोकव्यवहारानुपयुक्तमिति भावः। अनेन कस्यचित् दासस्याचार्यकटाक्षादिवशात् मोक्षादिप्राप्तिसम्भवेऽपि तदीयदुष्कर्मादिप्रयुक्ता साधुसंसृष्ट्यनर्हता न हीयत इति सूचितो भावः। गृह्यतां नामेति पदद्वयेन 'जन्मकर्मपरिभ्रष्टः सन्ध्योपासनवर्जितः। नामधारकविप्रस्तु दशाहं सूतकी भवेत्॥ ब्रह्मबीजसमुत्पन्नो मन्त्रसंस्कारवर्जितः। जातिमात्रोपजीवी च स भवेत् नामधारकः' इत्याद्युक्ता निन्द्यताऽप्यस्य द्योत्यते। विप्रमात्रस्योक्ता नामधारिता तिर्यक्ष्वपि प्रसक्तेत्याश्चर्यद्योतको हन्तशब्दः। अत्यन्तनिम्नोन्नतयोरपि साम्यसम्भावनाप्रसक्तिमवेक्ष्य विषादद्योतको वा सः। नामग्रहणमात्रस्याकिञ्चित्करत्वं बुध्वाऽपि निरर्थकं प्रवर्तन्ते हता इति प्रहासद्योतको वा। एवं तदेव गृह्यतां नामेति समभिव्याहारबलात्, 'फलं कतकवृक्षस्य यद्यप्यम्बुप्रसादनम्। न नामग्रहणेनैव तस्य वारि प्रसीदति' इति श्लोकगतो नामग्रहणेनैवेति सन्दर्भः प्रत्यभिज्ञाप्यमानः कार्यविशेषशक्तमहापुरुषनामग्रहणमात्रात् न तथाविधः शक्तिविशेषोऽस्य सिद्ध्यति, किं तु लोकगर्हैव केवलमनुचितव्यापारसमारम्भात् फलिष्यतीति सूचितम् ॥१

2. த்ருப்தபத்ததி

ததேவ க்ருஹ்யதாம் நாம ச்சாகமண்டூகராஸபை:
திஸ்ருணாம் தாவதா ஹந்த மூர்த்தீநாம் கிமிஹாகதம் (1)

1 மும்மூர்த்திகளின் பெயர் ஆடு, தவளை, கழுதை என்றவற்றுலும் கொள்ளப்படலாம். அவ்வளவால் அம் மும்மூர்த்திகளுக்கு என்ன நேர்ந்துவிடும். (அஜ என்ற சொல்லுக்கு பிரமனும் ஆடும் பொருள்; கர(खर), ஹர என்பவற்றிற்கு ருத்ரனும் கழுதையும். அன்றி, அஜ என்ற ஒரு சொல்லுக்கு ருத்ரமூர்த்தியும் ஆடும் பொருள்.

2 சாக, மண்டுக-ராஸப என்ற சொற்கள் வேதத்தில் ஜபாதிகளில் உபயோகப்படும் மந்திரங்களிலுள்ளவையே. அச்சொற்களுக்கு மதிப்பு உண்டு. இப்படி வேத ப்ரசித்தமான பெயர் இருக்கட்டும். அவ்வளவால் ஆடு தவளை கழுதை என்ற உருக்களுக்கு மதிப்பு ஏது?

3 ஆடு தவளை கழுதை என்ற ஜந்துக்களில் ஆத்மாக்கள் யஜமானனைப் போல் ஸ்வர்க்கஸுகத்தைப் பெறலாம், (யாகத்தில் சாஸ்த்ர முறைப்படி ப்ராணனை விடுவதால்.) ஆயினும் மரித்த அந்த மூன்று ஜந்துக்களின் உடல்களுக்கு மதிப்பு ஏற்படாது. (ஆடு முதலானவற்றைக் கண்டு விலகுவதே சாஸ்த்ரத்தில் கூறப்பட்டதே. யாகத்திற்கு முன் அவற்றை யார் நெருங்குவான்.) பௌண்ட்ரகவாசுதேவன் போல் பெரியோர்பேரைச் சிலர் வைத்துக்கொள்வதால் பெரியோர்களுக்கு நஷ்டமொன்றுமில்லை. பேருக்கு மதிப்பு இருந்தாலும் அதன் பொருளுக்கெல்லாம் மதிப்பு உண்டாகாதென்றது கருத்தாகும். मूर्तीनां किमिहागतम्। ब्रह्मादिमूर्तिसंबन्धि किं महत्त्वमिह छागादिष्वागतमिति वा, इह जगति छागादिभिर्नामग्रहणेन मूर्तीनां का न्यूनतेति वाऽर्थः।

अण्डजाः पुण्डरीकेषु समुद्रेषु जनार्दनाः।
नीलकण्ठाश्च शैलेषु निवसन्तु(न्ति) नतेनते ॥ २ ॥

नन्वास्तां नाम केवलनामधारणमात्रस्याकार्यकरत्वम्; किं तु तत्स्थानापन्नत्वसहितस्य तस्य तत्साम्यसम्पादकत्वं संभविष्यतीत्यत्राह अण्डजा इति। अण्डजाः हंसचक्रवाकादिपक्षिणः पुण्डरीकेषु तामरसकुसुमेषु निवसन्तु नितरां वसन्तु, अनेन, 'तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्। तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः।,' 'तत्र सुप्तस्य वै देवि नाभौ पद्ममजायत। तस्मिन् पद्मे महाभागो वेदवेदान्त(ज्ञ)पारगः। ब्रह्मोत्पन्नः स तेनोक्तः प्रजाः सृज महामते', 'नाभिप्रभिन्नाम्बुरुहासनेन संस्तूयमानः प्रथमेन धात्रा।' इत्यादिप्रमाणप्रतिपन्नाण्डजत्वपुण्डरीकासनत्वरूपचतुर्मुखधर्मसम्पादनमभिप्रेतम्।

ननु च हंसादीनां न पुण्डरीकेषु प्रजापतिवत् नियतवासः, किं तु क्वचित् समयविशेष एव विहारार्थमागमनम्। उच्यते हि 'क्रीडाखेलं कमलसरसि क्वापि कालोपयातं राकाचन्द्रद्युतिसहचरं राजहंसं ददर्श' इति। अतो नियतस्थानापत्त्यनापत्तिरिति दृष्टान्तान्तरमनुसरति समुद्रेष्विति। जनार्दनाः नक्राः। जनान् अर्दयन्ति पीडयन्तीति जनार्दनाः। पीडार्थकोऽप्यर्दधातुः प्रयुक्तः। यथा 'मृगाः सिंहार्दिता इव' इति महाभारते। ततो णिजन्तात् कर्तरि ल्युः। 'जनार्दनो हृषीकेशे नक्रे व्याघ्रादिके तथा' इति कविदर्पणश्च। ते च समुद्रेषु निवसन्तु। अनेन जनैः अर्द्यते गम्यते याच्यते वा स्वाभीष्टमिति कर्मव्युत्पत्त्या भगवत्परजनार्दननामवहनं तद्वत् समुद्रशायित्वं च परिगृहीतमित्यभिप्रेतम्। 'अर्द गतौ याचने चेति' धातोः कर्मणि ल्युट्। 'शरद्घनं नार्दति चातकोऽपि इति रघुवंशप्रयोगश्च।

अथास्तु तावत् यथाकथञ्चित् समाख्यासम्पत्तिः—तथाऽपि योगार्थसाम्यविरहात् महावृक्षादिसमाख्यावत् अप्रयोजकत्वैवेत्यत आह—**नीलकण्ठा** इति। **नीलकण्ठा** मयूराः **शैलेषु** पर्वतेषु निवसन्तु। अनेन नीलरूपविशिष्टकण्ठवत्त्वरूपयोगार्थपौष्कल्यसहितशैलवासरूपरुद्रासाधारणधर्मसंपादनमभिप्रेतम्।

तेन स्थानसाम्यसहिततत्तत्समाख्यापरिग्रहेण, **न ते** तादृशत्रिमूर्तिरूपा न भवन्ति। सर्वजगत्सृष्टिस्थितिसंहारसमर्थत्रिमूर्तितुल्यशक्तिमन्तो न भवन्तीत्यर्थः। यद्वा **तेन** तादृशवासस्थानसाम्यमात्रेणापि **न ते** तत्सदृशा न भवन्तीत्यर्थः; तेषामनेकस्थानसद्भावात्। तथा हि—ब्रह्मणस्तावत् न पुण्डरीकमात्रे निवासः; किं तु सत्यलोकाद्यनेकस्थलेषु। भगवतोऽपि श्रीवैकुण्ठविष्णुलोकेन्द्रलोकादिस्थानेषु। रुद्रस्यापि 'नीलग्रीवाः शितिकण्ठाः शर्वा अधःक्षमाचराः,' 'नीलग्रीवाः शितिकण्ठा दिवं रुद्रा उपश्रिताः' इत्यादिश्रुत्युक्तपृथिव्यन्तरिक्षादिस्थानेषु च वासः प्रसिद्ध एवेति न वासस्थानसाम्यमात्रमपि तेषां संभवतीति भावः। अनेन सदाचारसम्पन्नानां महावंशजातानां श्रोत्रियाग्रेसराणां नामधारणमात्रेऽप्यतृप्तः कश्चन दृप्तस्तदीयवासस्थानमप्याक्रामति चेत्, न ततोऽपि किञ्चित् फलं तस्य। प्रत्युत गर्हणाधिवयमेव फलति तस्येति भावो विभावितः। तथा च तत्स्थानापन्नस्तद्धर्मं लभत इति न्यायः प्रत्यक्षदृष्टवैसादृश्यविषये न प्रवर्तत इति भावः। अत्र च प्रधानभूताप्रस्तुतप्रशंसा अण्डजादिषु निवासरूपैकधर्मान्वयनिबन्धनतुल्ययोगितया सङ्कीयते। सा च शब्दश्लेषाद्यनुप्राणितेनाण्डजादिविशेष्यपदस्य त्रिमूर्तिनामसाम्यग्रहणाभिप्रायगर्भताप्रयुक्तपरिकराङ्कुरेणेति बोद्धव्यम्। अनुप्रासयमकादयोऽपि तत्तत्स्थानेषु यथायथमवधारणीयाः॥

अन्योऽप्यर्थः: **अण्डजाः** कुलिङ्गगृध्रादिशकुनयः **पुण्डरीकेषु** महाव्याघ्रादिषु। तत्समीप इत्यर्थः। निवसन्तु मांसादिलोलुपतया व्याघ्रादिभिः सह सर्वदा तिष्ठन्तु। आचार्ये वसति, राज्ञि वसति ते पुत्र इत्यादाविव साहचर्यार्थे सप्तमी। एवं **समुद्रेषु** मुद्रावत्सु महाराजेषु **जनार्दनाः** जनपीडकाः केचिदाधिकारिकपुरुषाः **निवसन्तु** तत्साहचर्येण वसन्तु। एवं **शैलेषु** शीलवत्सु महापुरुषेषु। शीलशब्दात् मत्वर्थीयः प्रज्ञाद्यण्। **नीलकण्ठाः** मलिनहृदयाः केचन पुरुषाः निवसन्तु। एककण्ठाः पुरुषा इत्यादौ कण्ठशब्दस्य हृदयपरत्वात्। तथाऽपि ते नते न इत्यन्वयः। ते अण्डजादयः पुण्डरीकादयश्च। न ते तद्भिन्नाः न भवन्तीत्यर्थः। अयं भावः—अतिक्रूरव्याघ्रादिभिः सह मांसादिजिहीर्षया अत्यल्पतरपक्षिणां सदा सहवासेऽपि परस्परगुणासंक्रमस्तेषां यथा सर्वलोकप्रसिद्धः, तथा महापुरुषावरपुरुषयोरेकाधिकरण्यसद्भावेऽपि न तयोः परस्परगुणसंक्रम इति न वृथा स्थानसाम्यादिकमपेक्षणीयमिति। 'स्वभावो दुरतिक्रमः' इति भगवद्गीतावचनमहिम्ना आजानसिद्धास्तत्तज्जातीयधर्माः अन्योन्यसाहित्येऽपि न विपर्यस्यन्तीति फलितम्। अत्र च पुण्डरीकादीनां क्रमेण महाबलत्वरक्षकत्वसुशीलत्वादयो गुणाः अण्डजादीनां क्रमेण दुर्बलत्वहिंसकत्वदुष्टहृदयत्वादयश्च यथायथमुन्नेयाः। उक्तार्थस्यापि प्रस्तुतत्वसंपत्त्या प्रस्तुताङ्कुरादिकमवधारणीयमिति॥ २॥

அண்டஜா: புண்டரீகேஷு ஸமுத்ரேஷு ஜநார்தநா:
நீலகண்டாச்ச சைலேஷு நிவஸந்து ந தேந தே

(பெயரோடு இருப்பிடமும் ஒன்ருனல் மதிப்பு உண்டோ என்னில், இல்லையென்கிறது—த்ருப்தன்—கர்வமுடையவன். தான் பிறருக்குக் குறையாமல் மேம்பட்டிருப்பதாக நினைப்பவன்.

1 அண்டஜ என்ற சொல் பிரமனையும் அன்னத்தையும் கூறும். இரண்டும் இருப்பது தாமரைப் பூவில். ஜநார்தந என்ற சொல்லுக்கு பகவானும் முதலையும் பொருள், வாஸம் கடலில். நீலகண்ட என்ற சொல் பரமசிவனையும் மயிலையும் கூறும். வாஸம் மலையில். அதனுல் அவை அவர்களாகமாட்டா.

2 (மாமிசம் தின்னும்) பக்ஷிகள் புலி முதலானவற்றுடனும், ஆனந்தம் அளிப்பவர்களோடு ஜனங்களைப் பீடிப்பவரும், சீலம் உடையவரோடு கறுத்த மனம் உடையரும் இருக்கலாம். அதனுல் ஒன்றின் குணம் மற்ருென்றுக்கு வாராது. (நல்லோருடனிருந்தாலும் கர்வமுடையன் திருந்தான். समुद्रेषु-मुदा रमन्ते मुदं रान्ति ददतीति वा मुद्राः । तद्युक्तेषु । न ते नते. பக்ஷிகள் பக்ஷிகளை விட வேருகா புலியாகா. नते என்பது ஒரேசொல் அவற்றை விட வேருகா என்ற பொருளது. பிரம்மாண்டம் படைத்தவுடன் அங்கே தோன்றினதால் பிரமன் அண்டஜன். ஜனங்களாலே ப்ரார்த்திக்கப்படுகின்றவனும், புநர்ஜன்மத்தைப் போக்குகின்றவனுமாகி விஷ்ணு ஜநார்த்தநன். விஷம் உண்டு கழுத்திலே நிறுத்திக் கொண்டதால் சிவன் நீலகண்டன். இந்த குணங்கள் வேருென்றுக்கு வருமோ.)

कामं लिखतु संस्थानं कश्चिद्रूपं च भास्वतः ।
अभित्तिविहितालम्बमालोकं विलिखेत् कथम् ॥ ३ ॥

अस्तु नाम नामस्थानसाम्यसम्पादनस्याप्रयोजकता । तत्सरूपवेषपरिग्रहस्य तु तत्साम्यापादकता निर्बाधमेव सेत्स्यतीत्यतः सर्वथा तदभिसन्धिः न घटत एवेत्यर्थं सदृष्टान्तमुपपादयति **काम**मिति । **कश्चित्** चित्रलेखाग्रणीः **भास्वतः** सूर्यस्य **संस्थानं** आकारसन्निवेशविशेषं वर्तुलत्वादिकं **कामं** यथेच्छं **लिखतु** भित्त्यादौ तूलिकादिना विलिखतु; तथा **रूपं च** लोहितादिवर्णविशेषं च लिखतु नाम । **अभित्तिविहितालम्बं** भित्तौ—कुड्ये विहितः—कृतः आलम्बः—अवलम्बनं यस्य तथोक्तो न भवतीति तथाभूतम् । दुर्ग्रहत्वादिभिः भित्तावनिष्पाद्यावलम्बमित्यर्थः । **आलोकं** तेजस्काण्डं **कथं विलिखेत्** निरवधिकतेजोराशिनिर्दग्धजीवलोकस्य मनश्चक्षुरादिदुर्निरीक्षस्य जगच्चक्षुषो गभस्तिमालामहस्तावलम्बां कथं नाम विलेखितुं शक्नुयादयमिति भावः । भास्वच्छब्देन भूमार्थकमतुप्प्रत्ययघटितेनातिशयिततेजस्समृद्धिर्विवक्षणीया । ततश्च वज्रमौक्तिकादिमणिकिरणानां कथञ्चिच्चित्रादिषु किञ्चिदंशच्छायापत्तिमात्रेण निवेशनसंभवेऽपि द्युमणिकिरणस्य चक्षुःप्रसरमपि विघातयतः कथं मनसाऽपि स्मरणयोग्यं विलेखनमिति तदभिप्रायः

सूचितः। यद्वा सूर्यस्य वर्तुलाद्याकारं सर्वोऽपि चित्रकृल्लिखतु। कर्तुरनिर्देशात्। एवं कश्चित् छायाग्राहकयन्त्रादिमान् तत्सरूपंरूपं च लिखतु। **अभित्ति** अखण्डम्। भित्तं खण्डः तद्वान् भित्ती स न भवतीति तथोक्तं सत् विहितालम्बं अखण्डतया सर्वतो व्याप्तमित्यर्थः। **आलोकं** तेजोराशिं कथं विलिखेदित्यर्थः।

(2) एवमप्रस्तुतार्थप्रदर्शनेन निदर्शितोऽपि प्रस्तुतार्थः श्लेषमहिम्नापि स्फुटमवसीयते। तथा हि—**कश्चित् द्दसः भास्वतः** ब्रह्मतेजःप्रज्वलितगात्रस्य कस्यचित् विशिष्टपुरुषस्य संस्थानं—आकारसाम्यं देहाभिनयादिकं वा, रूपम्—वस्त्रोपवीतादिवेषपरिग्रहं च लिखतु स्वस्मिन्नारोपयतु। अभित्तिविहितालम्बं-भित्तिस्थानीये स्वदेहे आरोपयितुमशक्यम्। ज्ञानगन्धशून्यत्वाद्वा कुड्यप्रायत्वं स्वदेहस्य बोद्धव्यम्। आलोकं पारमैकान्त्यतेजःसमृद्धिं कथं विलिखेत्, कथमारोपयेत्। 'रूपमेवास्यैतन्महिमानं व्याचष्टे' इत्युक्तरीत्या मुखदर्शनेनैव शिष्टाशिष्टाधिकारिणोर्भेदः सुबोध इति भावः। यद्वा **आलोकं** ज्ञानविशेषं अध्यात्मशास्त्रादिषु विशदतमप्रकाशमित्यर्थः। ज्ञानसम्पदां कथञ्चिदपि दुरारोपत्वादिति भावः।

(3) अन्योऽप्यर्थः। **कः चिद्रूपमिति** पदच्छेदः; **भाः स्वत** इति च। **संस्थानं** देवमनुष्यादि-देहाकारं **कामं लिखतु** यथाकथञ्चित् विलिखतु। अत्यन्तसरूपतया लेखनस्याशक्यत्वेऽपि किञ्चिदूनतयाऽपि स्वापेक्षितं निर्वहतु। **कः** को वा पुरुषः, **चिद्रूपं** च जीवात्मस्वरूपमपि; कीदृशम्? **स्वतो भाः** स्वतः प्रकाशमानम्। भाश्शब्द इह नपुंसको द्वितीयान्तः भासदीप्ताविति धातोः कर्तरि क्विबन्तो विशेष्यनिघ्नः। **अभित्त्या** अभेदेन, **विहितः** कृत, **आलम्बः** ज्ञानगोचरता यस्य तथोक्तम्। देवोऽहं मनुष्योऽहमिति देवादिदेहाभेदेन भासमानमित्यर्थः। उक्तं हि—'स्थिरत्रसविभक्तिमत् त्रिगुणरागदृश्योदयं सुमृष्टमणिभित्तिवत् स्वयमभिद्यमानः पुमान्। त्रिगुम्मगुणशिल्पिना त्रिणतूलिकाधारिणा विविच्य विनिवेशितं वहति चित्रमत्यद्भुतम्' इति। **आलोकं** आ लोकादिति व्युत्पत्त्या लोकमभिव्याप्येत्यर्थः लोकव्याप्तिपर्यन्तमिति यावत्। **कथं विलिखेत्?** देवाद्याकारसदृशं लिखतु नाम; तदन्तर्वर्ति जीवात्मस्वरूपं कः कथं विलिखेत्। को वा पुरुषः, केन वा उपकरणेन लेखितुं शक्नुयादिति भावः।

(4) एवमन्यविधोऽप्यर्थः शरीरपरत्वे(त्वेन?)। तथा हि-संस्थानं देहाकारं कामं लिखतु। कः, चिद्रूपञ्च भास्वतः इति पदच्छेदः। चित् जीवात्मा द्रुः, वृक्षतया निरूपितं सूक्ष्मशरीरादि। श्रूयते हि—'समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः' इति। यद्वा द्रुपदेन 'वृक्ष इव स्तब्धो दिवि तिष्ठत्येकः' इत्युक्तः परमात्मैवाभिधीयते। अथवा—'प्रज्ञावृक्षं मोक्षफलं शान्तिच्छायासमन्वितम्। ज्ञानाश्रयं तृप्तितोयमन्तःक्षेत्रज्ञभास्करम्॥ येऽधिगच्छन्ति तं सन्तः तेषां नास्ति भयं पुनः।' इत्यनुगीतापर्वान्तर्गतब्राह्मणब्राह्मणीसंवादोक्तः मोक्षोपयोगिज्ञानरूपः प्रज्ञावृक्ष एव द्रुशब्देन विवक्षितः। तथा च सूक्ष्मचिदचितौ, जीवपरमात्मानौ, जीवतज्ज्ञानविशेषौ वेति फलितम्। तावुभौ; द्वितीयान्तं; पञ्च भास्वतः तेजोरूपाणि पञ्च ज्ञानेन्द्रियाणि। 'तं देवा ज्योतिषां ज्योतिरायुर्होपासते मृतम्'—इति श्रुत्या पञ्चेन्द्रियाणां प्रकाशकत्वोक्तेः। भाषितं हि श्रीभाष्ये—'ब्रह्माधीनस्वकार्याणि कानिचित् ज्योतींषि प्रतिपन्नानि।

तानि च विषयाणां प्रकाशकानीन्द्रियाणि' इति । अभित्तिविहितालम्बं अपृथग्भावेन प्रकाशमानं आलोकं धर्मभूतज्ञानं च कथं विलिखेदित्यर्थः । देहमात्रस्य लेखनसम्भवेऽपि तदन्तर्वर्तिनां सूक्ष्मशरीरजीवपरमात्मधर्मभूतज्ञानतद्विशेषपञ्चेन्द्रियादीनां कथमपि विलेखनासम्भवादिति भावः ।

(5) अन्योऽप्यर्थः—कामं **संस्थानं** मन्मथस्वरूपमाकारसन्निवेशं कश्चित् लिखतु । एवं **भास्वतः** निरवधिकसौन्दर्यादिना भासमानस्य कामस्य **रूपं** रामणीयकमपि लिखतु । **अभित्तिविहितालम्बं** अपृथगवस्थितं पृथक्करणानर्हमित्यर्थः । **आलोकं** कान्तिविशेषरूपं लावण्यं **कथं** विलिखेत् । लक्षितं च तत् बहुधा—'मुक्ताफलेषु छायायास्तरळत्वमिवान्तरा । प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते । भूयिष्ठं तेज एवाद्भिः बहुळाभिर्मृदूकृतम् । चक्षुरानन्दजनकं लावण्यं तदिहोच्यते' इत्यादिभिः ।

(6) एवमद्वैतमतरीत्याऽपि कश्चिदर्थः । संस्थानं ब्रह्माधिष्ठानस्थानरूपं व्यावहारिकपदार्थजातं लिखतु नाम चित्रे । चित्ते वा ; 'हृदि मुग्धशिखण्डमण्डनो लिखितः केन ममैष शिल्पिना' इति प्रयोगात् । **चिद्रूपं** ब्रह्मस्वरूपं **स्वतो भाः** स्वयंप्रकाशरूपं **आलोकं** लोकमभिव्याप्य **अभित्त्या** अभेदेन **विहितालम्बं** ज्ञानगोचरम् । घटस्सन् पटस्सन् घटोऽनुभूयते पटोऽनुभूयत इति घटपटाद्यभेदेन भासमानमित्यर्थः । उक्तं हि—'अविद्यामाहात्म्यादनहमिदमर्थे जगदिदं गृणन्त्येते भातं गगन इव गन्धर्वनगरम्' इति । **कथं विलिखेत्** । चित्रलेखनस्याशक्यत्वं तु स्फुटमेव । चित्तलेखनमपि हि निरालम्बे स्वयंप्रकाशे शुद्धे ब्रह्मणि सर्वथा न शक्यमेवेत्यर्थः । घटपटाद्यवच्छिन्नचैतन्यस्यैव तत्तल्लौकिकज्ञानेषु भानोपगमात् । अनवरताद्वैतभावनासुसंस्कृतचेतसामपि तत्त्वमस्यादिवाक्यजन्ये ब्रह्मापरोक्ष्यज्ञाने वृत्त्याद्युपहितस्यैव विषयत्वसमर्थनादिति भावः ॥ कथं तर्हि शुद्धचैतन्यस्याभेदेन तत्तज्ज्ञानगोचरता, घटपटाद्यवच्छिन्नस्यैव तथात्वोपगमादिति चेत्-अत्र ब्रूमः । तन्मते हि शुद्धोपहितयोर्भेदवदभेदस्याप्युपगमेन तादृशज्ञानविषयीभूतोपहिताभिन्नत्वमादाय तथात्वं समर्थनीयमिति । यद्यपि विशिष्टाद्वैतसिद्धान्तेऽपि निर्विकल्पकसमाधौ शुद्धस्य दिव्यात्मस्वरूपस्य विषयताऽभ्युपगता । तथापि षाड्गुण्यादिविशिष्टस्यैव तत्र भानोपगमात् न निर्विशेषभानप्रसक्तिः । उक्तं हि शतदूषण्यां 'संप्रज्ञातस्थितिमधिगते निर्विकल्पे समाधौ शान्तावद्यं स्तिमितबहुळानन्दसन्दोहमन्तः । यत्तद्ब्रह्म स्फुरति यमिनां पूर्णषाड्गुण्यरूपं सा मे नित्यं हृदि हयमुखी देवता सन्निधत्ताम्' इति ।

(7) एवमन्योऽपि चक्षुःपरतया कश्चिदर्थः । तथा हि **भास्वतः** तेजोमयस्य चक्षुरिन्द्रियस्य **संस्थानं** गोळाकारं **रूपं** च शुक्लकृष्णादिवर्णं च कश्चित् चित्रे लिखतु । **अभित्त्या** अभेदेन, अपृथग्भावेनेत्यर्थः । अभेदेनोपास्त इत्यादिवत् । **विहितालम्बं** कृतालम्बनं अयुतसिद्धतया पृथक्कारानर्हमित्यर्थः । **आलोकं** दर्शनात्मकव्यापारं विषयप्रकाशनशक्तिमिति यावत् । **कथं विलिखेत्** । चक्षुराकारगोळकस्य लेखनेऽपि द्रष्टृत्वशक्तिं न कोऽपि लिखेदित्यर्थः ।

अत्र चाप्रस्तुतार्थानां दृष्टान्ततयोपयोगः सुगमः । प्रस्तुतार्थस्यापि श्लेषादिमहिम्ना शब्दवेद्यत्वेऽपि अत्र पूर्वापराप्रस्तुतप्रशंसाप्रकरणसन्दंशात् अप्रस्तुतप्रशंसैव मुख्या । अन्येऽलङ्काराः तदुपस्कारका इत्यवधेयम् । अत्र चाभित्तिविहितालम्बमिति विशेषणस्य, भास्वत इति विशेष्यस्य च निरवधिकतेजोराशि-विलेखनाशक्यत्वाभिप्रायगर्भत्वात् परिकर परिकराङ्कुरावप्यलङ्कारौ बोध्यौ । अथास्तु नाम आलोकस्थानीयस्य यत्किञ्चिद्गुणविशेषस्याशक्यसंपादनता । सुसम्पादैः संस्थानरूपाद्याकारैरेव विशिष्टपुरुषसाम्यसिद्धिर्भविष्यतीत्यतः—ज्ञानभक्त्यादिगुणविशेषस्यैव प्रधानतमत्वं सर्वशिष्टसमादरणीयत्वं आश्रितजनपरित्राणाद्यनुगुणत्वं केवलाकारसाम्यादीनामत्यन्ताप्रयोजकत्वं विशिष्टपुरुषविडम्बनादिभिर्नरकाद्यौपयिकत्वं च भवतीत्यभि-प्रायकोऽयं भास्वच्छब्दः प्रयुक्त इति ध्येयम् । अत एवोक्तमच्युतशतके—'अच्चुअ ण देत्ति मोक्खं ईसरहावेण हाविआ इअरसुरा । रत्तिं परिवट्टेउं लक्खं आलेखदिणअराण वि ण खमम्' इति (अच्युत न ददति मोक्षं ईश्वरभावेन भाविता इतरसुराः । रात्रिं परिवर्तयितुं लक्षमालेख्यदिनकराणामपि न क्षमम्) ॥३

காமம் லிகது ஸம்ஸ்த்தாநம் கச்சித் ரூபம் ச பாஸ்வத:
அபித்திவிஹிதாலம்பம் ஆலோகம் விலிகேத் கதம். (3)

1 சூரியனுடைய உருவையும் நிறத்தையும் ஒருவன் நன்ருக எழுதுவானென்க. சுவரில் நிறுத்தலாகாத ஒளியை எப்படி எழுதுவான்.

2 (பெயர் இடம் இரண்டையும் போல்) உருவையும் வேஷத்தையும் கூட ஸமமாக ஒருவன் பெறலாம். ஆயினும் எளிதிற் பெறவாகாத ப்ரஹ்மதேஜஸ்ஸைப் பெறவாகுமோ. (ஏன் கர்வம்?)

3 (க:, சித்ரூபம், பா:, ஸ்வத: என்று பதங்களைப் பிரிக்க.) ஒருவன் தேஹங்களையெல்லாம் நன்ருக எழுதலாம். தர்மபூதஜ்ஞானத்தையே ரூபமாக (குணமாக) உடையதும், வேறு ரூபம் நிறமில்லாததாய் தானே ப்ரகாசிக்கின்றதும், அபித்தி-தேஹத்தோடு வேறுபடாமல் தோன்றுகிறதுமான ஜீவாத்மாவை, ஆலோகம்-கண்ணுற்காணும்படி யார் எழுதக்கூடும்.

भाः—भासमानम् चिद्रूपमित्यस्य स्वतो भा इत्यनेन पौनरुक्त्यपरिहाराय चिद्गुणकं धर्मभूतज्ञानविशिष्टमित्यर्थो युक्तः । रूपपदप्रयोगेण, चिदेव रूपम्, न तु नीलादीति अलेख्यत्वं ज्ञाप्यते । आलोकम्—समन्तात् स्पष्टदर्शनकं यथातथा ।

4 (க:, சித்த்ரு, பாஸ்வத: எனப்பிரிக்க. சித்தாவது ஜீவன், த்ரு-மரம். அதாவது ஸூக்ஷ்மசரீரம், அல்லது விருட்சமாக வர்ணிக்கப்படும் பரமாத்மா, அல்லது மோக்ஷத்திற்கான தெளிவே மரம். பாஸ்வத:—ஜ்ஞானேந்த்ரியங்கள். அபித்தி—விஷயங்களோடு விட்டுப்பிரியாமல் தோன்றுகிற ஆலோகம்—தர்மபூதஜ்ஞானம்.) தேஹம் போன்றதைச் சித்ரத்தில் எழுதலாம். ஜீவாத்மாவையும் மரமென்று சொல்லப் பட்டவைகளையும் ஐந்து ஜ்ஞாநேந்திரியங்களையும் தர்மபூதஜ்ஞானத்தையும் எவன் எவ்வாறு எழுதுவான்.

5 காமன்—மன்மதன். மன்மதனுக்கான வடிவையும் நிறத்தையும் எழுதலாம். அழகை—ஒளியை எழுத முடியுமோ.

6 (அத்வைதமதத்தைத்தழுவி பின் வருமாறு—) ப்ரஹ்மத்திலே கல்ப்பனையால் நிறுத்தப்பட்ட ப்ரஞ்சத்தை எழுதலாம். அந்த ப்ரபஞ்சத்தோடே. அபித்தி—பிரியாமல் தோன்றுகிற, தானே ப்ரகாசிக்கின்ற சித்ரூபமான ப்ரஹ்மம் சித்திரத்திலோ, சித்தத்திலோ எழுதவாகாது. சுத்தமான ப்ரஹ்மத்தை மனத்தால் கூட க்ரஹிக்கமுடியாதென்பது அத்வைதிகளின் சித்தாந்தம்.

7 ப்ரகாசிக்கின்ற கண்போன்ற இந்திரியத்தின் இடமான கோளம் போன்ற உருக்களை எழுதலாம். அங்கு அபித்தி—பிரியாமற் சேர்ந்திருக்கும் இந்திரியசக்தியை யாரும் எழுதமாட்டிலன்.

இத்தனை அர்த்தங்களாலும் சொன்னதென்னவெனில் வெளியுருக்களில் ஒரு மஹானுக்கு ஒரு சிறுவன் ஒத்திருந்தாலும் சிறுவன் கர்வப் படலாகாது. மேன்மை வந்து விடாதென்றதே.

अपि सत्पथनिष्ठानामाशाः पूरयतामपि ।
अगस्त्यवृत्तिर्मेघानां हन्त मालिन्यकारणम् ॥ ४ ॥

एतावता नामस्थानवेषसारूप्यस्य निष्फलता निगदिता ; अथ कृत्यसारूप्यस्यापि तथात्वं सदृष्टान्तमुद्घाटयन् तस्य विपरीतफलावहत्वमपि दर्शयति **अपीति । सत्पथनिष्ठानां** सन्मार्गनिष्ठानां गगनमार्गनिष्ठानां च **सतां** नक्षत्राणां पन्थाः सत्पथः । पथिन्शब्दात् समासान्तः अप्रत्ययः । **आशाः** इच्छाः दिशश्च **पूरयतामपि** परिपूर्णाः कुर्वतामपि व्याप्नुवतामपि च, **मेघानां** जलदानां **अगस्त्यवृत्तिः** कुम्भयोनिकृत्याचरणं समुद्रजलपानादिरूपं **मालिन्यकारणं** प्रत्यवायसम्पादकं परापवादसम्पादकं वा, नीलवर्णाधायकं च । अयमर्थः—अभिजनविद्याद्युत्कृष्टैः शिष्टाग्रेसरैरनुष्ठेयस्याचार्यकादिकर्मणो जात्यादिनिकृष्टैः समुचि(?)तानुष्ठाननिष्ठैर्दर्पवशादनुष्ठाने हि 'पातयन्ति पतन्ति च' इत्युक्तोभयविधपातित्यसम्पादनेन सह लोकगर्हाऽप्यजस्रमनुचितकार्यकरणात् सिद्ध्यति । ते च सत्पथनिष्ठाः वस्तुतः सन्मार्गगमनश्रद्धालवो भवन्तु । धनवन्तश्चेत् धनधान्यादिद्रविणदानेन याचकाभीष्टानि च पूरयन्तु नाम । एतादृशानुचितव्यापारकरणे उक्तसन्मार्गगमनादीनां फलमप्यलभमानानां तन्मात्रविश्रान्तिमन्तरेण, किमेतादृशं कर्मानेन क्रियत इत्यापामरमशेषतो निन्दनीयताऽपि सम्भवेत् । यथा च जलदः सन्मार्गगमनाद्युक्तलक्षणसम्पन्नोऽप्यगस्त्यस्य महामुनेराजन्मसिद्धमहाप्रभावातिशयनियमितनिखिललोकस्य क्षणमात्र एवामूलनिपीतोत्सृष्टसप्तसमुद्रीकस्य चर्यां किञ्चिदनुष्ठाय सद्य एवातिशयितं मालिन्यं सर्वलोकसाक्षिकमनुभवति तद्वदिति, घट्टार्थः । हन्तेति खेदे ।

अत्र च सदारनिष्ठत्वाभीष्टप्रदातृत्वयोः, 'धनवन्तमदातारं दरिद्रमतपस्विनम् । कण्ठे बध्वा शिलां गुर्वीं सिन्धुमध्ये विनिक्षिपेत्' इति शास्त्रेण अधनधनाढ्यरूपाधिकारिभेदव्यवस्थितमभिसन्धाय

अपिशब्दद्वयम् । एवं व्यवस्थितधर्मवाचकविशेषणयोः मेघसामानाधिकरण्येन निर्देशात् तादृशधर्मद्वयस्य क्वचित् समावेशोऽपि एतादृशकार्यकरणे समुदितस्याप्रयोजकता सूचिता । कारणशब्देन चान्वयव्यतिरेक-सहचारबोधात् तादृशवृत्तित्यागे मालिन्यनिवृत्तिः सूचिता । अनेन च यथा जलधरः सद्यःपातं जलभरं प्रवर्ष्य तदुत्तरमपीत एव स्थितो मालिन्यं न प्राप्नोति, तथा अज्ञानादितः साधुजनसाम्यसम्पादने प्रथमं प्रवर्तमानोऽपि सद्य एव सञ्जातानुशयः परित्यज्य तत् पुनश्च तत्प्रवृत्तिमन्तरेणावस्थितश्चेत्, उत्पन्नमपि मालिन्यं निवर्तेत इति द्योतितम् । सत्त्वनिष्ठानामुत्कृष्टचर्याणामप्यकार्यकरणोद्योगमभिसन्धाय विस्मयो वा हन्तशब्देन बोद्ध्यते । मेघानामिति बहुवचनेन—प्रतिदिनं परार्धाधिका जलधराः पिबन्तु नाम पाथोधिम् ; न तैः सङ्घीभूतैरप्येकागस्त्यकृतकार्यैकदेशलेशसादृश्यसम्पादनमप्यशक्यतमम् । प्रत्युत युगपदेव तेषां मालिन्यमकाण्डत एवाविर्भवेदिति भावः सूचितः । एतेन वस्तुतः सत्पथनिष्ठानामप्यगस्त्यकृतकार्यै-कदेशारम्भमात्रेणैवेदृशदशाविपाकसम्भवे सत्पथनिष्ठवत् नानस्यमानानां दृप्तानां महापुरुषप्रतिनियतकार्य-विशेषपरिग्रहे किमु वक्तव्यं मलिन्मोत्पादस्येत्यर्थो व्यज्यते ।

(2) एवमन्योऽपि कश्चिदर्थो ग्रन्थकारानुसन्धानसधर्मा प्रतीयते । तथा हि मेघानामित्यत्र मे अघानामिति पदच्छेदः । अस्मच्छब्देन ; मह्यमपि प्रथमदुर्जनाय नम इत्यत्रेव ग्रन्थकर्ता विवक्षितः । स(म ?)त्सम्बन्धिनां अघानां पापानाम् । कीदृशाम् । सत्पथनिष्ठानां समीचीनराजमार्गस्थितानाम् ; सर्व-जनप्रत्यक्षवेद्यानामिति यावत् । आशाः पूरयतामपि सर्वदिग्व्याप्तानामपि ; दिगन्तविश्रान्तानामपीत्यर्थः । यद्वा सत्पथनिष्ठानां सन्मार्गप्रवर्तकानां भगवद्दयादिदिव्यगुणानां आशाः भोजनेच्छाः पूरयतां पूर्णाः कुर्वताम् ; अपरिच्छेद्यानामिति यावत् । उक्तं हि—स्वयमेव, "मयि तिष्ठति दुष्कृतां प्रधाने मितदोषान् इतरान् विचिन्वती त्वम् । अपराधगणैरपूर्णकुक्षिः कमलाकान्तदये कथं भवित्री" इति । अन्यदीयापराधैरपूर्णकुक्षिः सती कथं भवित्री जीवित्रीत्यर्थः । अतश्च मदपराधस्यैकस्यैव भगवद्दया-कुक्षिपूरकत्वम् , नान्येषामित्यभिधानात् तदिच्छापूरकत्वमवसेयम् । तादृशानां मदीयाघानां अगस्त्यवृत्तिः अगस्त्यशाकभक्षणाभ्यासः मालिन्यकारणं विनाशजनकः सजातीयपापान्तरारम्भकत्वशक्तिनिरोधको वा, अधीता वेदा मलिनीबभूवुः, अन्तर्न्यस्तानि बीजानि मलिनीबभूवुरित्यादावुभयविधार्थप्रसिद्धेः । अगस्त्य-शाकस्य च भगवत्प्रसादद्वारा पापनिरासकत्वं स्वयमेवोक्तम् । 'तस्मिन् कस्मिंश्चिदाद्ये मुनिदळतुळसी-द्वादशीभिः प्रसाद्ये भद्राणामेकसेतौ भवतु भगवति श्रीसखे भावना नः' इति । ग्रन्थकर्तुश्चास्यागस्त्यशाक-वृत्तिस्तदीयाष्टोत्तरसहस्रे प्रसिद्धा, 'अगस्त्यशाकप्रमुखसात्त्विकाहारभासुरः' इति । वस्तुतो ग्रन्थकर्तुरघले-शासम्भवेऽपि, मह्यमपि प्रथमदुर्जनायेत्यत्रेवास्मादृशजनानुसन्धानसिद्ध्यर्थं पापमार्गप्रवृत्तबुद्धीनां तन्निरोध-कागस्त्यशाकवृत्तिप्रवृत्तिसिद्ध्यर्थं च स्वस्मिन् तथात्वमारोप्याभिधानमिति द्रष्टव्यम् ।

(3) अन्योऽपि वैद्यकतन्त्रप्रसिद्धः कश्चिदर्थः—मेघशब्देन मेहाख्यरोगविशेष उच्यते । मेघशब्दो मेहशब्दश्च मिह स्नेहन इति धातुनिष्पन्नत्वात् समानार्थकावेव । कर्त्रर्थकघञ्प्रत्यययोगश्च उभयत्राविशिष्टः ।

परं तु कुत्वमात्रमेकत्राधिकम् । प्रयुज्यते च मेघशब्दोऽपि मेहपरतया वैद्यकेषु । तेषां **अगस्त्यवृत्तिः** अगस्त्यशाकेन जीवनं **मालिन्यकारणं** निवृत्तिहेतुः । मेहाख्यरोगविशेषवतां अगस्त्यशाकनियतभक्षणे तद्रोगनिवृत्तिर्भवतीत्यर्थः । केषामित्यत्राह **सत्पथनिष्ठानामित्यादि** । सत्पथनिष्ठानां आशाः **पूरयतामिति** शब्दद्वयेनाघनघनिकरूपाधिकारिद्वयमुच्यते । तत्र चाघनाधिकारिणां मुनिवर्तनस्य मेहनिवर्तकत्वमुक्तमष्टाङ्गहृदये वाग्भटीये मेहरोगप्रकरणे—'अधनश्छत्रपादत्ररहितो मुनिवर्तनः । योजनानां शतं यायात् खनेद्वा सलिलाशयान् । गोशकृन्मूत्रवृत्तिर्वा गोभिरेव सह भ्रमेत् ॥' इति । घनिकाधिकारिणामतिशयितद्रव्यसाध्यौषधादिकरणसम्भवेऽपि ईदृशकायक्लेशवृत्तेरपि तन्निवारकत्वमवर्जनीयम् । एतदेवोक्तम्—'अपि सत्पथनिष्ठानामाशाः पूरयतामपि' इति । केवलसदाचारनिष्ठानां, द्रव्यादिदानैर्भिषगाशाः पूरयतां घनिकाधिकारिणामपि उक्तमुनिवृत्तिर्मेहनिवर्तिकेत्यर्थः । घनिकानामपीदृशवृत्तिरेव श्लाघ्येति यावत् । मुनिदळवृत्तेश्च पापनिवारकत्वेन औषधान्तरेभ्यः सर्वोत्कर्षस्य सुप्रसिद्धत्वात् ।

अथास्तु नाम मुनिदळस्य ओषधिविशेषत्वात् रोगनिवर्तकता । अघनिवर्तकत्वं तु कथमिति चेत्—ब्रूमः । यथा तुळसीदळस्य तीर्थजलादीनां च भक्षणे पापनिवृत्तिः शास्त्रावसेया, तथा मुनिदळ भक्षणस्यापि तन्निवर्तकता शास्त्रसिद्धा दुर्निवारैव । वस्तुतस्तु 'जन्मान्तरकृतं पापं व्याधिरूपेण बाधते । तच्छान्तिरौषधैर्दानैर्जपहोमार्चनादिभिः' इति शास्त्रपर्यालोचनायां जपहोमादिवदौषधानामपि प्रारब्धपापनिवर्तकत्वप्रतीत्या तादृशौषधतल्लजस्य मुनिदळपल्लवस्य भगवत्प्रसादविशेषप्रसाधकस्य अवर्जनीयमेव ह्यघनिवर्तकत्वं मेघनिवर्तकत्वं च । उच्यते हि—मुनिशाकस्य सर्वरोगपरमौषधत्वं वैद्यकतन्त्रेषु । यथा भावप्रकाशे—'अगस्त्यः पित्तकफजित् चातुर्थिकहरो हिमः । रूक्षो वातहरस्तिक्तः प्रतिश्यायनिवारकः ॥ अगस्त्यः शिशिरं गौल्यं (रुम?) त्रिदोषघ्नं भ्रमापहम् । बलासकासवैवर्ण्यभूतघ्नं च बलावहम् । अगस्त्यकुसुमं शीतं चातुर्थिकनिवारकम् । नक्तान्ध्यनाशनं तिक्तं कषायं कटुपाकि च । पीनसश्लेष्मपित्तघ्नं वातघ्नं मुनिभिर्मतम् । पर्णं तु मुनिवृक्षस्य त्वच्छंक्रिमिकफापहम् । कण्डूविषं रक्तपित्तं नाशयेदिति कीर्तितम् । मुनिशिम्बी तु संप्रोक्ता बुद्धिदा रुचिदा लघुः । त्रिदोषशूलकफहृत् पाण्डुरोगविषापनुत् । मेहगुल्महरा प्रोक्ता सा पक्वा रूक्षपित्तला' इति । अत्र चाप्रस्तुतप्रशंसादयोऽलङ्काराः स्वयमूहनीयाः ।

(4) एवं मेघपरत्वेऽन्यविधश्च कश्चिदर्थः प्रस्तुतोयुक्तः । **अगस्त्यवृत्तिरिति** शब्देन अगस्त्यस्य वृत्तिरिव वृत्तिर्यस्येति व्युत्पत्त्या अगस्त्यसदृशव्यापारवान् कश्चिदुच्यते । तथाच अगस्त्यवत् मलयादिवासनियमवान् मलयपवन एवागस्त्यवृत्तिशब्दवाच्यः । स च **सत्पथनिष्ठानां** ऊर्ध्वप्रदेशवर्तिनां, **आशाः पूरयतामपि** वर्षणार्थं तत्तद्दिक्ष्ववरूढानामपि मेघानां **मालिन्यकारणं** विनाशहेतुः । दक्षिणमारुतस्पन्दने हि मेघनिवृत्तिर्भवतीति लोकप्रसिद्धिः ।

अनेन चार्थविशेषेणार्थान्तरमपि प्रतीयते । अगस्त्यवृत्तिशब्देन वेषभाषादिभिः कश्चन महापुरुषं विडम्बयन् कश्चन दसपुरुष उच्यते । स च सदाचारनिष्ठानां शिष्टानां धनधान्यादिदानशीलानां लौकिकानामपि मनोमालिन्यहेतुर्भवतीति । अनुचितव्यापारकारिणं निरीक्ष्य शिष्टा अन्ये च तद्विषयकनिर्वेदादिभिः स्वमनोमालिन्यमुत्पादयन्तीत्यर्थः । मेघशब्देन परोपकारित्वादिशीलवत्त्वं स्निग्धत्वं वा विवक्षणीयम् । हन्तेति खेदे । स्वतो विशुद्धमनसामपि खेदजननेन मनोमालिन्यमुत्पादयन्ति दस्रा इति विषादं द्योतयति ।

(5) यद्वा—अगस्त्योदयात् प्रसीदन्ति पयांसीति सर्वलोकप्रसिद्धम् । तथाऽपि जलमयानां मेघानामगस्त्यव्यापारवता केनचिन्मालिन्यं भवतीत्येतदत्यन्ताश्चर्यावहमिति विस्मयद्योतकोऽपि भवति हन्तशब्द इति बोद्धव्यम् ।

(6) अथात्राद्वैतमतप्रक्रिययाऽपि कश्चिदर्थः परिस्फुरति । तथा हि—मेघशब्देन सदात्मकब्रह्माध्यस्ताः गन्धर्वनगरकल्पाः व्यावहारिकप्रपञ्चा उच्यन्ते । उक्तं हि सङ्कल्पसूर्योदये—'अविद्यामाहात्म्यात् अनहमिदमर्थे जगदिदं गृणन्त्येते भातं गगन इव गन्धर्वनगरम्' इति । तथा च गन्धर्वनगरप्रकृतिभूतमेघशब्दवाच्यत्वं अध्यस्तजगत्सामान्यस्य, कमलादिशब्दस्य मुखादिबोधकत्वमिव निर्विवादम् । ते च **सत्पथनिष्ठाः** सतः ब्रह्मणः **पन्थाः** प्रकारविशेषः सत्पथः ; तत्राध्यस्ताः ; घटपटाद्यवच्छिन्नचित्येव घटपटादीनां अध्यस्तताया लघुचन्द्रिकादिषूक्तत्वात् । तस्य च सद्ब्रह्मप्रकारविशेषत्वात् । **आशाः पूरयतां** सकलदिगन्तव्याप्तानाम् । यद्वा—निखिलभोग्यभोपकरणादिपरिणामेन सकललोकेच्छाः परिपूरयतां तादृशव्यावहारिकप्रपञ्चानां **अगस्त्यवृत्तिः** अगस्त्याकारः कश्चन मनोवृत्तिविशेषः ; ब्रह्माद्वैतज्ञानमिति यावत् , **मालिन्यकारणं** विनाशहेतुरित्यर्थः । तस्यागस्त्याकारत्वं च मोहाकूपारकुक्षिम्भरित्वात् । उक्तं हि सङ्कल्पसूर्योदये—'मोहाकूपारकुक्षिम्भरिरयमनघो मुक्तिवीरुत्प्ररोहः' इत्यारभ्य 'क्रूरक्रोधाशुशुक्षण्युपशमनसुधासारसेको विवेकः' इति । तादृशविवेकरूपतत्त्वज्ञानस्यागस्त्यवदत्यल्पाङ्गस्याखिलजगद्व्याप्तसर्वव्यावहारिकपदार्थसमूलोन्मूलकत्वमाश्चर्यावहमिति विस्मयद्योतको हन्तशब्दः । यद्वा—एकाज्ञानपक्षे अगस्त्यमुनिज्ञानस्यापि निखिलजगन्निर्मूलकत्वात् अगस्त्यवृत्तेः मेघनिवर्तकत्वमनुसन्धेयम् । श्रूयते हि—'तद्धैतत् पश्यन् ऋषिर्वामदेवः प्रतिपेदे' इत्यादिषु वामदेवाद्यृषीणां तादृशज्ञानवत्त्वम् । सङ्कल्पमात्रेण सकलसमुद्रचुळकनव्यापारस्यागस्त्यमुनौ प्रत्यक्षदृष्टत्वात् तदीयमनोवृत्तिविशेषस्य निखिलजगद्भक्षकत्वं युक्तमेवेति प्रदर्शनार्थमगस्त्योपादानमिति द्रष्टव्यम् ॥ ४ ॥

1 மேகம் கடல் நீரைக் கொள்வதால் கறுப்பாகிறது. அதை ஒரு விதம் சமத்காரமாகப் பேசுகிறார். ஸத்பதத்திலிருப்பும் ஆசாபூரணம் செய்வதும் அகத்தி முனிவருக்குப் போல் மேகத்திற்கும் உண்டு. அதனால்

அகத்தியரைப் போலே கடலையும் குடிக்கிறோமென்றறியலாமோ. அப்படி யிழிந்ததால் தானே முழுமையும் குடிக்கமாட்டாமே அபகீர்த்தி பெற்று அதைத் தன் கருமையினால் மேகம் காண்பிக்கிறது. ஸத்பதத்திலிருப்பாவது அகத்தியருக்கு நல்லொழுக்கத்தில் நிலைத்திருக்கையாம்; மேகத்திற்கு நக்ஷத்ரங்களின் மார்க்கமான ஆகாசத்தில் பெய்யும் போது இருப்பாம். ஸத்—நக்ஷத்ரம். ஆசாபூரணமாவது அகத்தியருக்கு கேட்போர்களின் மனோரதங்களை நிறைவேற்றுகையும் தென்திக்கிலும் கீர்த்தியாலேற்பட்ட நிறைவும். மேகத்திற்குப் பல திக்குகளில் ஸஞ்சாரமே அதாகும்.

2 நல்லோருழுக்கத்திலே நிலைத்திருந்தாலும் கேட்போருக்கு எல்லாம் அளிக்கவல்லனானாலும் நானும் அகத்தியர் கடல் குடித்தல், விந்திய மலையை நிறுத்தல், வாதாபியைப் புசித்து ஜரிப்பித்தல் எல்லாம் செய்தது போல் பெரும் செயல்களைச் செய்வேன் என்று கர்வப்பட்டால் அபகீர்த்தியும் பாபமுமே சேரும். சில விஷயங்களிலே பெரியோருடன் ஒத்துமையிருப்பதைக் கண்டு எவ்விதத்திலும் அவர்களைப் போல் தங்களை நினைத்தல் தகாது. மேகம் குடித்த நீரை விட்ட பிறகு கருமை நீங்கி விளங்குகிறது. அது போல் தகாததைச் செய்ய முயன்றாலும் விட்டு விட்டால் ப்ரகாசமாம். ஓர் அகத்தியருக்கு ஈடாக உலகிலுள்ள மேகங்களெல்லாம் சேர்ந்தாலுமாகா. பலர் கூடினாலும் பெரியோரொருவருக்கு இணையாகார்.

3 உரையிற் கூறியதையே சிறிது மாற்றி வரைவோம்—நல்ல மார்க்கத்திலிருப்பவர் பலரின் மனோரதங்களைப் பூர்த்தி செய்கின்றவர்கள் ஸத்துவகுணம் மேலிடாமைக்கான பாபங்கள் உள்ளவராகில் அவற்றைக் குறைக்க அகத்திக் கீரையை என்னைப் போல் உட்கொள்ள வேணும். நல்லோரின் மனோரதங்களை வெள்ளத்திற் கொண்டு விலக்குமளவான பாபங்களானாலும் இதனால் போம் என்று த்வாதசியில் உட்கொள்ளும் அகத்திக் கீரையைப் புகழ்ந்ததாம். நல்லொழுக்கத்திலிருக்கும் ஏழைகளுக்கும் வைத்யர்களுக்கு வாரிக் கொடுக்கும் தனவான்களுக்கும் எல்லாருக்குமே மேகரோகம் போவது எளிதில் அகத்திக்கீரை உண்பதாலாமெனவும் பொருளாம். வைத்யசாஸ்த்ர விரிவு உரையில்.

4 அகஸ்த்யரைப் போல் மலயமலையிலிருக்கும் காற்று, அதாவது தென்னல் ஆகாசத்தை சூழ்ந்து வரும் மேகங்களையும் குறைத்து விடும்.

5 அகத்தியரின் உதயத்தில் எல்லா நீரும் நிர்மலமாகுமென்பரே. அகத்திய நிலையைக் கொண்ட மேகம் மட்டும் கறுத்துக் கிடக்கிறது ஆச்சர்யம்.

6 அத்வைத மதம்—அகஸ்த்யவ்ருத்தி: அகஸ்த்யரைப் போல் சிறிய தாயும் எல்லாம் உட்கொள்ளக் கூடியதுமான வ்ருத்திஞானம்—ப்ரஹ்மம் ஒன்றே என்னும் ஞானம், ஸத் என்னப்படும் ப்ரஹ்மத்திலே கற்பிக்கப் பட்டுப் பலவகையான போகங்களுக்குக் காரணமாய் எங்கும் பரவிய எல்லாவுலகின் அழிவுக்கும் காரணமாகிறது.

(7 எப்படிப்பட்ட பெரியோர்களுக்கும் அகத்தியபாஷையின் பயிர்ச்சி ஆழ்வார்களின் அருளிச்செயல்கள் மூலமாக, பாபங்களைப் போக்கும், தெளிவும் பக்தியும் பெறக் காரணமுமாகுமெனவும் உரைக்கலாம். என்னுடைய அகத்தியவிருத்தி அதாவது அம்முனிவருக்கிணங்கி நான் செய்திருக்கும் தேசிக ப்ரபந்தம் போன்ற தமிழ்ப் பாக்களும் சொற்றொகைகளும் புத்தியிலுள்ள குறைகளைப் போக்கி அனுகூலம் செய்யும்.)

(3 ये सन्मार्गस्थाः शिष्याणामध्यापनादिना आशापूरकाश्च महान्तः, तेषां मे अगस्त्यवृत्तिः—मया क्रियमाणमिदमगस्त्यशाकभक्षणं अघमालिन्यस्य पापनाशस्य कारणं भवेत् । यदि अहमिव सन्तः अगस्त्यशाकं भक्षयेयुः, तदा सत्त्वगुणाभिवृद्धया रजस्तमोनाशः, भगवति श्रीसखे भावनावृद्धिश्च स्यादिति स्वानुभवः परेभ्य उपदिश्यते आचार्येणेति ध्येयम् । व्याख्योक्त एव विषयः अक्लिष्टत्वायैवं दर्शितः । पूर्वार्धस्याघविशेषणत्वे तु सत्पथनिष्ठमहाजनमनोरथा अपि पुण्याधीनाः पूरवन्तः प्रवाहवन्तः प्रवाहेणापनीताः क्रियन्ते यैरघैः, तेषामप्यघानां मालिन्यस्य-लोपस्य कारणमगस्त्यशाकभक्षणमिति प्रशंसा । अत्र पूर्वार्धेन, 'अपि निखिललोकसुचरितमुष्टिन्धयदुरितमूर्छनाजुष्टम्' इति दयाशतकोक्तार्थरीतिप्रदर्शनम् । पूरयतां-पूरवत्तया कुर्वतां—पूरेणापनयतामिति यावत् । व्याख्यानगमनिका तत्रैव द्रष्टव्या ।

7 एवमपि स्यात्—सर्वाशापूरणसमर्थानां श्रुतिमार्गनिष्णातानां महात्मनामपि ममैवागस्त्यभाषायामधिका निष्ठा दिव्यसूरिसूक्तिरसास्वादबलात् अघनिवर्तिका शास्त्रार्थवैशद्य-अनुभवपरीवाहादिहेतुर्भवतीति । अथवा मे अगस्त्यवृत्तिः मदीयदेशिकप्रबन्धादिरित्यर्थः ।)

अस्तु तावदगस्त्यस्य(स्त्येन) जह्नोर्महिमनिह्नवः ।
का कथा तस्य बालस्य विश्वग्रासेऽप्यतृप्यतः ॥ ५ ॥

एवमुक्तश्लोकैर्दर्पाविष्टानामशिष्टानां विशिष्टपुरुषविडम्बनस्य बन्ध्यत्वं प्रसाध्य तत्प्रसङ्गात् तादृशदर्पमोक्षणोपायमुपदिदिक्षुः प्रथममुत्तरोत्तरमतिशयितोत्कर्षेष्वपि योगिवर्येषु प्रभावतरतमतां परामृश्य ततोऽवरैरस्माभिः क्वचिदपि विषये दर्पो न कार्य इत्याह—अस्त्विति । अगस्त्यस्य 'क्षुद्रात् क्षुद्रतरो महाजलनिधिर्गण्डूषमेकं मुनेः' इत्येकगण्डूषत्वेन सप्तमहासमुद्रपायिनो महामुनेः, जह्नोः गङ्गापायिनो महर्षेः महिमनिह्नवः माहात्म्याच्छादनम् अस्तु तावत् सम्भवतु नाम । जह्नुमहर्षेर्गङ्गापानजन्मा योऽयमुत्कर्षः, स ततोऽप्यतिशयितप्रथिमशालिसमुद्रपानादाविष्कृततदधिकोत्कर्षविशेषेणागस्त्यमहर्षिणा तिरोधीयतां

नामेत्यर्थः । यद्वा—स्वच्छत्वादुसुभगतादिसुगुणगणोत्तुङ्गाया गङ्गायाः सुपानाया अनायासेन पानं न विस्मयावहम्, मधुरतरतीर्थादेस्तृष्णाधिकपानस्य लोकसिद्धत्वात् । लवणाकरस्य त्वेकगण्डूषमात्रेऽप्यशक्यप्रवृत्तेस्तत्क्षण एव भक्षणं तु रूक्षमेव कर्मेत्यर्थः ।

वस्तुतो जह्नुमहर्षेस्तादृशसिन्धुपानसामर्थ्यात्यन्ताभावानिश्चयेऽपि तादृसतामर्थ्यानाविष्करणमात्रमेवात्र निह्नवशब्देनोच्यते । को हि वा वेद जह्नुमहर्षेः सिन्धुपानसामर्थ्यं नास्तीति । यतः स्वानुष्ठितक्रतुविघातकारिणीं निर्जरनिर्झरिणीमेकचुळकेनैव पपौ जह्नुमुनीन्द्रः । तादृशप्रसक्त्यसम्भवादेव न पपे पाथोधिरनेनेति प्रतीयते । न ह्ययं स्वसामर्थ्यपरीक्षार्थमापगामापपौ ; किंतु प्रसक्तिवशादेव । उक्तं हि श्रीमद्रामायणे—'ततो हि यजमानस्य जह्नोरद्भुतकर्मणः । गङ्गा संप्लावयामास यज्ञवाटं महात्मनः ॥ तस्यावलेपनं ज्ञात्वा क्रुद्धो यज्वा तु राघव । अपिबच्च जलं सर्वं गङ्गायाः परमाद्भुतम् ॥ ततस्तुष्टो महातेजाः श्रोत्राभ्यामसृजत् पुनः' इति ॥ तत् कथमेतादृशप्रभावातिशयशालिनो जह्नोरप्रसक्तसमुद्रपानाकरणमात्रेण माहात्म्यनिह्नव उच्यत इति ॥ अत्रोच्यते—लोके हि तावत् शतदायकात् सहस्रदायिन उत्कर्षोद्घुष्टिर्दृष्टचरी । शतदायकस्य सहस्रदानशक्तिश्रद्धादिसत्त्वेऽपि प्रार्थनाद्यानुगुण्यात् शतदानोपनिपातमात्रेण सहस्रदायकादपकर्षव्यवहारस्य लोकसिद्धत्वात् । दृष्टकार्यतरतमताद्यनुगुण एव लौकिकानामुत्कर्षापकर्षव्यवहारः । न ह्यदृष्टां कार्यकरणशक्तिं परीक्षन्ते केचन लौकिकाः । अत एव पूर्वाचार्येषु सर्वेषामपि ग्रन्थकरणशक्तिपौष्कल्यस्य निर्विवादत्वेऽपि ग्रन्थरूपोपकारकर्तृत्वाधिक्यबुद्धेस्तदनुगुणविग्रहप्रतिष्ठादेश्च दर्शनमुपपद्यते परीक्षकाणाम् । अतस्तदभिप्रायेणैव निह्नवाभिधानमिति द्रष्टव्यम् ।

अत्र चागस्त्यस्य वस्तुतो जह्नुमहिमनिह्नवाकर्तृत्वेऽपि तत्कर्तृत्वोक्त्या सम्बन्धातिशयोक्तिर्द्रष्टव्या । यद्वा निह्नवशब्देन निह्नवव्यवहारप्रयोजकसमुद्रपानादिव्यापारस्य विवक्षितत्वान्न दोषः । इत्थं चागस्त्यकर्तृकव्यापारस्य जह्नुकर्तृकव्यापारादतिशयितत्वेन तन्महिमतिरोधानव्यवहारस्य लोकप्रसिद्धत्वेऽपि नात्र दर्पः कार्योऽगस्त्येन ।

कुत इत्यत्राह—**का कथेति । तस्य बालस्य** महाप्रळयकालेऽप्येकाकिनोऽवस्थितस्य वटदळशयितस्य मुग्धशिशोः, **विश्वग्रासेऽपि** सर्वजगद्भक्षणेऽपि **अतृप्यतः** स्वोदरैकदेशस्यापि पूर्त्यभावेन महाक्षुधितस्य **का कथा** । किं प्रतिवक्ताऽगस्त्यः । स्वापेक्षया न्यूनव्यापारकारिणमवेक्ष्य दर्पकरणे स्वावधिकोत्कृष्टताककार्यकरविशिष्टपुरुषावेक्षणे किं प्रतिवक्ष्यतीत्यर्थः । वस्तुतो महात्मनां दर्प एव नोत्पत्स्यते । उत्पन्नोऽपि वा स्वापेक्षयोत्कृष्टकार्यकरमवेक्ष्य सद्य एव विलीयेतेति भावः । कथं वाऽस्य विश्वग्रासेऽप्यतृप्तिरुन्नीयत इति चेत्—ग्रस्तमात्रस्य जगतः स्वोदरैकदेशपूरणेऽप्यपर्याप्तत्वात् स्वप्रभया विस्मरतमस्काण्डकबळीकरणात्, भक्ष्यान्तरविरहेण स्वपदाम्बुजस्यैव चुम्बनात्, अन्ततः स्वप्रसादमहिमावशेषितस्य मार्कण्डेयस्यापि ग्रसनाच्चेति ब्रूमः । सर्वमिदमभिहितं श्रीमद्भागवते—'सक्ष्मान्तरिक्षं

सदिवं सभागणं त्रैलोक्यमासीत् सहसाऽद्भिराप्लुतम् । स एक एवोर्मिजले महामुनिर्बभ्राम निक्षिप्य जटा जडान्धवत् ॥ स कदाचित् भ्रमंस्तस्मिन् पृथिव्याः ककुदि द्विजः । न्यग्रोधपोतं ददृशे फलपल्लवशोभितम् । प्रागुत्तरस्यां शाखायां तस्यापि ददृशे शिशुम् । शयानं पर्णपुटके ग्रसन्तं प्रभया तमः । चार्वङ्गुलिभ्यां पाणिभ्यामुन्नीय चरणाम्बुजम् । मुखे निधाय विप्रेन्द्र धयन्तं वीक्ष्य विस्मितः । तद्दर्शनाद्वीतपरिश्रमो मुदा प्रोत्फुल्लहृत्पद्मविलोचनाम्बुजः । प्रहृष्टरोमाऽद्भुतभावशङ्कितः स्प्रष्टुं पुनस्तं प्रससार बालकम् । तावच्छिशोर्निश्वसितेन भार्गवः सोऽन्तःशरीरं मशको यथाऽविशत् । तत्राप्यधो न्यस्तमुदीक्ष्य कृत्स्नशो यथा पुराऽमुह्यदतीव विस्मितः ॥" इत्यादि । लोकेऽपि स्वोदरैकदेश-पूरणेऽप्यक्षमस्यान्नपानादेर्भक्षणे अतृप्तिव्यवहारो हि दृष्टचरः । अत एवोक्तम्—'अपराधगणैरपूर्णकुक्षिः कमलाकान्तदये कथं भवित्री' इति । कथं जीवित्रीत्यर्थः ।

ततश्चैतादृशनिखिलजगद्ग्रसनेऽपि परस्परासङ्कीर्णतया तेषां स्वोदरैकदेशनिक्षेपनिदर्शितनिखिल-मुनिवरातिशायिप्रभावविशेषविस्मापितजीव्य(व)लोकस्य परमात्मशिशोः किं स्वोदरैकदेशकोणे शिला-काष्ठादिविशेषं परिलुठन्तावगस्त्यजह्नू प्रतिवक्तारौ, उत ततोऽप्यतिशयितप्रभावप्रत्यक्षसाक्षी मार्कण्डेयः प्रतिवक्तेत्यर्थः ।

(ख) यद्वा का कथेत्यनेन सर्वेषु लोकेषु निरन्वयं निलीनेषु तात्कालिककथाप्रस्तावकोऽपि कोऽपि न सम्भवतीति द्योत्यते । अनेन परिणतवयसामनवरताभ्यस्तयोगप्रभावभावितात्यद्भुताति-मानुषकृत्यविशेषाणामगस्त्यादीनामतिमुग्धबालमात्रेणापीदृशपराभवप्राप्तौ अस्मादृशानामति क्षुद्राणां कुत्रापि कार्ये दर्पवहनमत्यन्तायुक्तमिति सूचितम् । (ग) यद्वा का कथेत्यनेन निखिलजगद्भक्षणेऽप्यतिक्षुधि-तवद् भक्ष्यान्तरमपेक्षमाणस्य को वा अस्य भक्ष्यजातमुपकल्प्य समर्पयेत् । कथं वा अस्य सञ्जीवनं शक्येतेत्यनुशयातिशयो द्योत्यते । (घ) अथ वा 'सर्वमिदमभ्यात्तोऽवाक्यनादरः' इत्यवाप्तसमस्तकामतया निखिलं जगत् तृणीकृत्य जोषमासीनस्य परिपूर्णस्यापीदृशातृप्त्युन्मेषः आश्चर्यावह इति भावः । (ङ) यद्वा का वा कथा तस्य बालस्य; वाङ्मनसापरिच्छेद्यो महिमातिशयोऽस्य परमयोगिभिरप्य-निर्वाच्य इत्यर्थः । (च) अथवा का कथा 'पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्' इति श्रुतिप्रति-पादनात् बाल्यमात्रमाभ्यां कथञ्चित् सम्पादयितुं शक्येत । विश्वग्रासशक्तिसम्पादनस्य त्वनयोः का कथेत्यर्थः । (छ) यद्वा का कथा—कथाशब्दो वादपरः । ततश्च 'विश्वान्तर्यामिबालोदरगतमखिलं कस्य विश्वासभूमिः तस्मादैन्द्रमीदृक् भवतु रसवशादिन्द्रजालं प्रवृत्तम्' इत्यादिदुर्वादिवादस्यानवकाश इत्यर्थः । आश्चर्यशक्तित्वात् भगवत इति भावः । उक्तं हि पूर्वाचार्यैः—'मुग्धः शिशुर्वटदळे शयितोऽतितन्वा तन्वा जगन्ति बिभृषे सविकासमेव । ऐशीमिमां तव तु शक्तिमतर्कितव्यामव्याजतः प्रथयसे किमिहावतीर्ण.' इति विचित्रशक्तेस्तत्तदनुगुणशरीरपरिग्रहादिभिः सर्वनिर्वहणस्य श्रुतिपुराणगण-घुष्टत्वादिति भावः ।

तस्य । 'यत्तत् कवयो वेदयन्ते', 'यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः । मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः' इति नित्यसूरिभिन्नैरवेद्यदिनस्य निखिलजगत्कुक्षिम्भरित्वेन श्रुतिप्रसिद्धस्य । यद्वा **तस्य** "तदिति परोक्षं विजानीयात्" इति तान्त्रिकव्युत्पादनानुगुणं सर्वस्यापि परोक्षनिर्देशमन्तरेण प्रत्यक्षतया अनिर्देश्यस्येत्यर्थः । अथ वा **तस्य** 'तत् सत्यं स आत्मा । तत्त्वमसि । तदेवाग्निस्त-द्वायुस्तत्सूर्यस्तदु चन्द्रमाः । तद्ब्रह्म तदाप' इत्यादिष्वनन्तस्थलेषु तच्छब्दनिर्दिष्टब्रह्मस्वरूपस्येत्यर्थः ।

बालस्य । 'बालत्वावस्थायामपि 'बालाकृतेर्वटपलाशमितस्य यस्य ब्रह्माण्डमण्डलमभूदुदरैकदेशे' इत्यगस्त्यजह्नादेस्तृणगुल्माद्यविशेषमुदरैकदेशपरिभ्रमणे प्रवृत्ते कौमारयौवनादिषु का (को ?) वाऽस्य पुरतः प्रत्यवतिष्ठेतेति हृदयम् । यद्वा **बालस्य** । 'जीर्यन्ते जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः', 'चक्षुः—श्रोत्रे च जीर्येते तृष्णैका तरुणायते' इत्युक्तक्रमेण जरठत्वावस्थायामुत्पत्तियोग्या ह्यतृप्तिर्बालभाव एवास्याविरभूदित्याश्चर्यं व्यज्यते । अथ वा **बालस्य** । तृष्णैका तरुणायत इत्युक्तनित्यतरुण्यास्तृष्णाया-स्तत्प्राणनाथस्य नित्ययूनो लोभस्य च यावत्तृप्तिप्रकारौ 'प्रहृष्टैस्तत्तादृक्प्रथिमविकटहाटकमयैरखण्डैर्ब्रह्माण्डैरपि न खलु तृप्तिर्भवति मे' । 'कनककलधौतशैलप्रभृतिभिरपि हन्त पूरणे क्षिप्तैः । तृष्णे भजति समृद्धिं भूयो भूयस्तवोदरे कार्श्यम्' इत्युक्तौ ततोऽप्यधिका ह्यतृप्तिर्बालस्यैवास्य सम्बभूवेति तदपेक्षयाऽऽधिक्यं द्योत्यते ।

यद्वा **तस्य बालस्य** । लौकिकबालानां स्तन्यपानमात्रात् अत्यल्पगोक्षीरादिपानादपेक्षित-किञ्चिद्वस्तुदानादिभिश्च सद्यस्तनी तृप्तिर्दृष्टचरी । विलक्षणस्त्वयं बालः सकलजगद्भक्षणेऽपि न तृप्यतीति तच्छब्दविशेषणफलमनुसन्धेयम् ।

विश्वशब्देन जलतरुपाषाणखण्डशैलादिपिण्डितमखण्डाण्डमण्डलमुच्यते । तेन सद्रवजलमात्रपानेन गर्वितयोरगस्त्यजह्वोरनायासनिरासः फलितः । द्रवद्रव्यपानादपि कठिनतरशिलादिभक्षणस्य दुष्करतम-त्वात् । **ग्रासेऽपि** ओष्ठदन्तादिदशनपूर्वकं सावयवभक्षणेऽपि । तेन ओष्ठदन्तादिसम्बन्धमन्तरेण सुकरात् तीर्थपानाद्व्यावृत्तिरुक्ता । कटुकस्यापि हि द्रवद्रव्यस्य जिह्वादिसम्बन्धमन्तरेणान्तःप्रशने न किञ्चिदपि क्लेशगन्ध इत्यस्य सुप्रसिद्धत्वात् । यद्वा ग्रासशब्दः सम्पूर्णभक्षणमाचक्षाणः, 'मुनिभ्यामाभ्यां कथञ्चिदाचान्ते अपि समुद्रगङ्गे स्वोदरे जरणमलभमाने क्षणादेव पूरोत्पीडेन व्यशीर्येताम् । अस्य तु सर्वमप्येतज्जग्धमज्ञातस्थानमेव वातापिदानवदशां नीतम्' इत्याश्चर्यरसं द्योतयति । एवं विश्वग्रासशब्देन समस्तजगतां क्रमशः प्रातिस्विकभक्षणमाचक्षाणेन समुद्रमशेषमेकचुलुकमात्रीकृत्य सकृदेव पिबतोऽगस्त्यमुने-र्व्यावृत्तिर्दर्शिता । यतः क्षणादेवैवपाने अभूतां अकूपारगङ्गे मुनीभ्ययोः । अस्य तु ब्रह्मादिस्थावरान्त-मशेषं क्रमेण तत्तत्प्रकृतिषु विलीनं तत्तत्काले मृत्यूपसेचनपूर्वकं भुञ्जानस्यान्याशक्यतमः प्रौढो

व्यापारश्चित्तवागगोचरश्चित्रकर्मैवेति भावः । **अतृप्यतः** स्वपादाम्बुजादिचुम्बनात् आविष्कृतातृप्तिकस्य, यद्वा **अतृप्यतः** एकदेशमात्रस्यापि पूरणविरहेण दुःख्यतः । वर्तमाननिर्देशाच्चातृप्तेरद्याप्यनिवृत्तिर्द्योत्यते । तेन निखिलजद्भक्षणेऽप्यपर्याप्ततया पुनरपि सकलं जगत् स्रष्टुमारभ्य सम्यक् प्रवर्ध्य समूलभक्षणेऽपि पुनश्चालब्धतृप्तिः भूयोऽपि सृष्टिसंहारादिकमारभ्य अद्ययावदनेकवारजगद्भक्षणेऽपि क्षुधार्त एवास्ते ; न स्वताप्सीत् किञ्चिदपीति सूचितम् । उक्तं हि स्तोत्ररत्ने—'क्रान्त्वा निगीर्य पुनरुद्गिरति त्वदन्यः' इति । अथ वा **अतृप्यतः** । 'करिण्यः कारुण्यास्पदमसमशीलाः खलु मृगाः नखानां पाण्डित्यं प्रकटयतु कस्मिन् मृगपतिः' इतिवत् , नित्यमुक्ताः कारुण्यपरित्यक्ताः, अन्ये च भक्षिताः, भक्षणसाधनमुपसेचनं च नष्टम् , क नु खलु भक्षणपाण्डित्यं प्रकाशयेयमिति चिन्तयैव हस्वतां गतोऽयं हरिशिशुरिति व्यज्यते । यद्वा--**विश्वग्रासेऽपि** निखिलजगद्भक्षणेन पूर्णमनोरथत्वेऽपि, **अतृप्यतः** अतिभक्तयोरगस्त्यजह्न्वोरहङ्कारखण्डनेन पश्चात्तप्यमानस्येत्यर्थः । यद्यपि तयोर्दर्पितयोर्नियमनार्थमखिलं जगत् ग्रसितं मया, तदप्यसाम्प्रतमेतत् कर्म ; 'एकः पापानि कुरुते फलं भुङ्क्ते महाजनः' इत्युक्तरीत्या जनद्वयापराधाज्जगदेवास्तमैत् भक्तोत्तमौ तावपि नावमन्तव्याविल्यनुशयो वा द्योतनीयः । यद्वा—**अतृप्यतः** । 'तथा वृत्तं पापैर्व्यपयति यथा क्षालितमपि' इत्युक्तनयेनागस्त्यजह्नुकृतकार्यविशेषजनितरोषेण निखिलं जगद्भस्मीकृत्य जलेऽपि विद्राव्य समूलमाचमनेऽपि, प्रतिद्वन्द्विनोस्तयोः जठरपिठरैकदेशे परमाण्वविशेषं परिलोठनेऽपि तत्कृतकार्यविशेषस्मरणे हीदृशपूर्णनिष्क्रयणाचरणेऽपि तृप्तिमात्रं नाभूत् भगवत इति द्योत्यते । यतश्च स्वपादोद्भवाम् अमरसरितमन्यायतः कन्यास्थानीयाम् अपानीयमप्यपांपतिं तत्पतिं च क्षीरपायं पपतुरेताववनीताविति । अथ वा **अतृप्यत** इत्यनेन तादृशस्वविजयदशामवेक्ष्य सन्तोषकाभावात् अतृप्तिर्वा, महेश्वरो महाशान्त इत्युक्तस्य ममाप्येवंविधकोपारभटी प्रकटीभूतेति निर्वेदो वाऽवसाय्यते इति बोद्धव्यम् । वस्तुतस्तु 'एको ह वै नारायण आसीत् । न ब्रह्मा नेशानो नेमे द्यावापृथिवी न नक्षत्राणि नापो नाग्निर्न सोमो न सूर्यः स एकाकी न रमते' इति श्रुतिप्रतिपन्ना रतिरूपा तृप्तिरेव प्रळयकालीना अतृप्यत इति पदबोद्धव्येति ध्येयम् ।

अथ वा **तस्य बालस्यातृप्यत** इत्यनेन अन्यस्य बालस्य तृप्तिर्जातेति द्योतनात् यशोदाकिशोरभावमनुभवतः स्वावतारभूतस्य बालस्य 'मृत्यूपसिक्तैर्भुवनैरशेषैरनन्यदत्तैरपि हव्यकव्यैः । अलब्धपूर्वामभजत् तदानीं गोपाहृतैः प्रीतिमशेषगोप्ता' (यादु. 7-9) इत्युक्तक्रमेण गोपगोपीसमर्पितैर्नवनीतदध्यादिभिः समीचीना तृप्तिः समभूत् । मम तु निखिलजगज्जालगिलनेऽपि न किञ्चिदपि शाम्यति क्षुदिति निर्वेदातिशयो व्यज्यते । यद्वा **विश्वग्रासेऽप्यतृप्यतः** जगद्भक्षणेन पूर्णोदरतया तद्विषये तृप्यतोऽपि भक्तोत्तमस्य मार्कण्डेयस्य समीपागमनविषये अतृप्यतः अलंबुद्धिरहितप्रीतियुक्तस्य । 'श्रुतादन्यत्र सन्तुष्टः' इत्यत्रेवालंबुद्धिस्तृप्त्यर्थः । अधिकप्रीतियुक्तस्येति यावत् । उक्तं हि माघे—'युगान्तकालप्रतिसंहृतात्मनो जगन्ति यस्यां सविकासमासत । तनौ ममुस्तस्य न कैटभद्विषस्तपोधनाभ्यागमसम्भवा मुदः ॥' इति ।

अतश्चैतादृशाशेषजगदाचूषणक्षममहापुरुषानुभावविभावनात् तदन्यैः सामान्यजनैर्न कचिदपि दर्पः कार्य इति निर्गळितार्थः ।

अथ वा **तस्य बालस्ये**त्यनेन यशोदाकिशोरभावमनुभवन् भगवानेव विवक्षितः । तस्य **विश्वग्रासेऽपि** निखिलं जगत् स्वोदरैकदेशे अन्तर्भावयतोऽपि **अतृप्यतः** पुनरपि मृत्तिकाभक्षणयशोदास्तन्यपानपूतनास्तन्यपाननवनीतपानादिभिरतृप्तिं सूचयतः, का कथा अगस्त्यजह्नू किं वा प्रतिब्रूयाताम् । उक्तं हि श्रीमद्भागवते—'एकदाऽर्भकमादाय स्वाङ्कमारोप्य भामिनी । प्रस्नुतं पाययामास स्तनं स्नेहपरिप्लुता । पीतप्रायस्य जननी सुतस्य रुचिरस्मितम् । मुखं लालयती राजन् जृम्भतो ददृशे जगत् ॥ खं रोदसी ज्योतिरनीकमाशाः सूर्येन्दुवह्निश्वसनाम्बुधींश्च । द्वीपान् नगान् तद्दुहितॄर्वनानि भूतानि यानि स्थिरजङ्गमानि ॥' इति । एवम्, एकदा क्रीडमानास्ते रामाद्या गोपदारकाः । कृष्णो मृदं भक्षितवानिति मात्रे न्यवेदयन् ॥ सा गृहीत्वा करे पुत्रमुपालभ्य हितैषिणी । यशोदा भयसंभ्रान्तप्रेक्षणाक्षमभाषत ॥ कस्मान्मृदमदान्तात्मन् भवान् भक्षितवान् रहः । वदन्ति तावका ह्येते कुमारास्तेऽग्रजोऽप्ययम् । नाहं भक्षितवानम्ब सर्वे मिथ्याभिशंसिनः ॥ यदि सत्यगिरस्तर्हि समक्षं पश्य मे मुखम् । यद्येवं तर्हि व्यादेहीत्युक्तः स भगवान् हरिः । व्यादत्ताव्याहतैश्वर्यः क्रीडामनुजबालकः ॥ सा तत्र ददृशे विश्वं जगत् स्थास्नु च खं दिशः । साद्रिद्वीपाब्धिभूगोलं सवाय्वग्नीन्दुतारकम् ॥' इति । अत्र समक्षं पश्येत्यस्य मिथ्यावादिगोपकूटैः सह त्वमपि पश्येत्यर्थात् प्रळयार्णवशायिजगद्ग्रसनस्य मार्कण्डेयैकसाक्ष्यदोषदूषितत्वेऽपि आबालगोपालमध्यक्षवेद्यमिदं गोपकिशोरजठरपरिलुठनं जगत इति प्रतीत्या अगस्त्यपीतः पल्वलः तत्पाता अगस्त्यश्चात्राणुरायं विलीनौ, कुत्रेति न ज्ञायेते इति का कथेत्यनेन ध्वनितम् ।

अथ कथं ग्रासशब्दप्रयोगोऽत्र सङ्गच्छते । सा तत्र ददृशे विश्वमिति कृष्णोदरे जगद्दर्शनमात्रप्रतीतावपि कृष्णेन जगद्ग्रसनस्य कुत्राप्यकथनात्, तदुदरनित्यस्थितिमात्रेण उक्तवचसश्चरितार्थत्वात् । अगस्त्यजह्न्वोस्तु समुद्रगङ्गापानं कण्ठोक्तमेवैतिहासिकैरिति चेत्—सत्यम् । उदरस्थितिमात्रेण पूर्वग्रासानुमानस्य निर्बाधत्वात् । 'लेलिह्यसे ग्रसमानः समन्तात् लोकान् समग्रान् वदनैर्ज्वलद्भिः । यथा प्रदीप्तं ज्वलनं पतङ्गा विशन्ति नाशाय समृद्धवेगाः । तथैव नाशाय विशन्ति लोकास्तवापि वक्त्राणि समृद्धवेगाः' इत्यादिभगवद्गीतावचनैर्भारतसमरसमये अशेषपुरुषसमक्षमखिललोकभक्षणस्य निर्विवादोपलम्भाच्च न कोऽपि दोषः । यद्वा (?) शषयोरभेदात् विष्वग्ग्रासेपीति पाठं परिकल्प्य **विष्वक्** समन्तात् ग्रासेऽपि लोकभक्षणेऽपीत्यर्थकरणात्, 'ग्रसमानः समन्ताल्लोकान् समग्रान्' इति गीतानुगुण्यं सुस्थिरमेवेति बोद्धव्यम् ।

अत्र रासेऽपीत्यपि पदच्छेदं केचिदिच्छन्ति । (क) अर्थं चेत्थमाहुः—**विष्वक् रासेऽपि** 'अङ्गनामङ्गनामन्तरे माधवः' इत्युक्तक्रमेण गोपाङ्गनाकूटमध्ये, 'द्वयोर्द्वयोरेकतया स तासां मध्ये स्थितो मण्डलरासनृत्ते' (याद. 8-84) इत्यनेकशरीरपरिग्रहेण युगपत् सर्वशरीरसंश्लेषरसानुभवेऽपि **अतृप्यतः** पुनश्च षोडशसहस्रस्त्रीयूथपरिग्रहादिभिरलब्धतृप्तितामाविष्कुर्वतः । उक्ता हि रासक्रीडास्मरणजनितहर्षस्याप्यनु-

वृत्तिवरदराजस्तवे—'परिमण्डितरासमण्डलाभिर्वरदाघ्रातमभीष्टगोपिकाभिः । अनुवृत्ततदातनप्रहर्षादिव फुल्लं हि कपोलयोर्युगं तत्' इति । तस्य च का कथा—किं वा प्रतिवक्तारावगस्त्यजह्नू । तौ हि आजन्म-ब्रह्मचर्यनिष्ठौ बहोः कालात् सनियमाचरिततपःप्रभावेण गङ्गासागरपानशक्तिमभ्यास्यताम् । अयं हि शैशव-मारभ्य नित्यसुरतक्रीडासक्तोऽपि तपःकृच्छ्राचरणलेशविधुरोऽपि, 'यदि मे ब्रह्मचर्यं स्यात् सत्यं च मयि तिष्ठति । अव्याहतं ममैश्वर्यं तेन जीवतु बालकः' इति अनेकमुनिसन्निधाने व्यासादिभिरप्यशक्यक्रियं मृतपिण्डसञ्जीवनं ब्रह्मचर्योद्घाटनेनैव निरवहदिति विलक्षणमेवास्य विचित्रं कर्मेत्यर्थः । अत एवोक्तम्—'धूर्तायितं परमपावनमामनन्ति' इति । (ख) अन्ये तु—'धन्यैः श्रुतं तदिह तावकरासकाले गीतेन येन हि शिलाः सलिलीबभूवुः । पश्चापि किञ्च परिवृत्तगुणानि भूतान्युर्वीकृशानुमरुदम्बरशम्बराणि' इत्युक्तसमस्त-जगद्विपरिवर्तनतत्तत्स्वभावविपर्यासनादिशक्तिर्भगवतो रासबन्धकालसन्दर्शिता किमगस्त्यादिभिः सुसंपादेति भावं वर्णयन्ति ।

(3) अत्रान्यविधोऽप्यर्थविशेषः सुखोन्मेषः । तथा हि—जह्नुशब्देन अत्र भगवानेवोच्यते—'जह्नुर्नारायणो नरः' इति सहस्रनामपाठात् । तस्य महिमनिह्नवः अगस्त्येन क्रियतां नाम ; अगस्त्येन तत्पर्यङ्कभूतस्य सरित्पतेः पीतत्वात् । 'यद्विक्षेपविसंस्फुळोदधिपय.प्रेंखोळपर्यङ्किकानित्यारोहणनिर्वृतो विहरते देवः सहैव श्रिया' इति क्षीराम्बुधौ श्वशुरगृहस्थ-विसंस्फुळडोलापर्यङ्करूपे अतिसुभगभोगिभोगे श्रिया सह शयानस्य भगवतः पर्यङ्किकादिसर्वस्वहरणमगस्त्येन क्रियमाणं भगवता तत्प्रतीकाराकरणं च परामृश्य तन्महिमतिरोधायकत्वमगस्त्यस्योक्तमिति ध्येयम् । यतश्चायं जह्नुः तदानीमपह्नुतशक्तिः । उक्तं हि भगवद्गुणदर्पणे, 'जह्नुः अभक्तेष्वात्ममाहात्म्यमपह्नुते' इति । एतदुक्तं भवति—भगवतो हि नाम अप्सु शयानस्यावस्थाद्वयं प्रमाणसिद्धम् । एकं क्षीरोदधिमध्ये आत्ममाहात्म्यनिह्नवेन योगनिद्राकरणम् ; अपरं च प्रळयार्णवमध्ये कस्मिंश्चिद्वटदळे सूक्ष्मतरशरीरेण निखिलाण्डषण्डसंपिण्डितेन स्वीयाश्चर्यशक्ति-समुद्गिरणेनावस्थानम् । ऐश्रीमिमां तव तु शक्तिमिति ह्युक्तम् । तथा च जह्नुत्वावस्थायामगस्त्यस्य तन्माहात्म्यतिरस्कारेऽपि वटदळबालत्वावस्थायां का कथा तस्य । घटपटाद्यविशेषं जठरपिठरे परिलुठनादिति भावः । अतश्च कस्यचिन्महापुरुषस्य निजशक्तितिरोधानादिसमयविशेषे केनचित् पराभवसम्भवेऽपि समयान्तरे तज्जयस्य निर्व्यूहतया न दर्पस्तेन कार्य इति पर्यवसितोऽर्थः ।

(4) अत्र चाद्वैतमतप्रक्रियाऽपि परिस्फुरति । तथा हि—बालस्येत्यत्र वबयोरभेदात् वालस्येति पठनीयम् । तस्य वालस्य 'ब्रह्म पुच्छं प्रतिष्ठे'ति श्रुतिप्रसिद्धस्य पुच्छत्वेन रूपितस्य ब्रह्मणः विश्वग्रासे-ऽप्यतृप्यतः तस्य सर्वलोकप्रतिष्ठात्वेन सकलजगदध्यासाधिष्ठानतया अधिष्ठानतत्त्वज्ञानेन निखिलजगद्विल-यकाले स्वमात्रपरिशेषेणावस्थानेऽपि तृप्तिहीनस्य । अद्वैतमते हि मुक्तिकाले विशिष्टाद्वैतिवत् आनन्दानु-भवाद्यनभ्युपगमेन तृप्त्यभावः सुलभोपपादनः । का कथा—कथं तस्य शब्दवाच्यता । 'कथाशेषान्नराधि-पान्' इति तत्तन्नरेन्द्रविप्लवकाले तत्तत्कथावक्तॄणां अन्येषां सत्त्वात् कथामात्रमवशिष्टमभूत् । ब्रह्ममुक्ति-काले तु तन्निष्ठनिखिलजगद्विलयेन कथावक्तॄणामपि निरन्वयनाशात् तत्कथैव न सम्भवतीति भावः ।

वस्तुतः शुद्धब्रह्मणः शब्दवाच्यत्वानभ्युपगमेन शुद्धतासमये तदभिलापकशब्द एव नास्तीत्यर्थः । तदानीमीश्वरतत्त्वस्य विष्णोरपि मायामूलकत्वेन विनष्टत्वात् पुनरपि प्रळयादिकालेष्विव तत्सृष्ट्यभावाच्च तस्य शाश्वतो महिमापह्नवो भवतीति तन्मतम् । तदेवानुभाषते—**अस्त्वति** । अगः त्यस्येति पदच्छेदः । त्यच्छब्दस्तच्छब्दपर्यायः । निखिलजगत्सृष्टिस्थित्यादिकर्तृत्वेन प्रसिद्धस्य इत्यर्थः । जह्नोः नारायणरूपस्येश्वरस्य **महिमनिह्नवः** शुद्धब्रह्ममुक्तिकाले तस्य विनाशात् तच्छक्तितिरोधानं अगः—निश्चलः । पुनश्चानुत्पद्यमानत्वेन स्थिर इत्यर्थः । अस्तु तावत् ! ब्रह्ममुक्तिकाले ईश्वरादिनिखिलपदार्थनिश्चलविलयात् शुद्धं ब्रह्ममात्रमवशिष्यतां नाम । तस्यापि 'स एकाकी न रमेते'ति स्वानुभवितृद्वितीयाभावात् सञ्जातामतृप्तिं को वा निवारयिता । अतो ब्रह्मादिसकलवस्तूनामपि यत्किञ्चिद्विषये अतृप्तेः संभावितत्तया न कैश्चिदपि अत्यल्पलाभमात्रेण दर्पः कार्य इति फलितोऽर्थः ।

(5) एवं वालस्येति पाठे हनूमद्वालस्येत्यर्थकरणमपि सुशकमेव भवति । तथा हि—**तस्य वालस्य** कठिनप्रकृतीन् लङ्कापुराट्टगोपुरादीन् निरन्वयं विनाशयतो हनुमत्पुच्छस्य **विष्वक् ग्रासे**ऽपि सर्वतोमुखं भक्षयतोऽपि सर्वलङ्कापुरग्रासेऽपीति वा । **अतृप्यतः** 'दग्धाः प्रदीप्तपावकपरिचयपिण्डस्थहेमवेश्मानः । क्षणमुरुपुच्छयमाने हनुमति लङ्कापुरोद्देशाः' इत्युक्तरीत्या क्षणमात्र एव निखिललङ्कापुरोद्देशनिर्दहनात् तद्गतसुवर्णगेहनिवहविद्रावणप्रोज्ज्वलितस्य ज्वलनकूटस्यावशिष्टकठिनभागाभावात् अन्ततः तत्परिघाकारः सागर एव दाह्यतया ग्राह्य इति निर्विद्यमानस्येत्यर्थः । **का कथा**— किं प्रतिवचता अगस्त्यः । द्रवद्रव्यं मुखेन पिबतोऽगस्त्यादपि कठिनद्रव्याणि वालेन ग्रसतो हनूमत प्रभावातिशयस्य सुलभा(?)वसेयत्वादित्यर्थः। यद्वा—अवशिष्टवह्नेर्दाह्यविरहादवसीदतः समुद्रलक्षीकारे अयःपिण्डपतितजलबिन्दुलायं विलीयेतायं तोयराशिरगस्त्यमहिमराशिना सहेति का कथेत्यस्य भावः । अतश्चायमगस्त्यो हनुमद्वालरोम्णोऽपि न सदृश इति हृदयम् ।

(6) यद्वा **वाल**शब्दोऽयं रोमपर एव ; 'चिकुरः कुन्तलो बालः' इति केशपर्यायतया पाठात् अयत्नवालव्यजनीबभूवुरिति महाकविप्रयोगाच्च । तच्चैकैकं हनूमद्रोम एकैकलिङ्गतयाऽऽविर्भूतमिति पुराणसिद्धम् । लिङ्गञ्च रुद्रांशत्वात् प्रळये निखिलजगद्घस्मरमिति । उक्तं हि भवभूतिना—'एतद्घस्मरकालरुद्रकबळव्यापारमभ्यस्यतु ब्रह्मस्तम्बनिकुञ्जपुञ्जितघनज्याघोषघोरं धनुः' इति । तथाच हनुमत्पुच्छरोम्णापि निखिलजगत्कुक्षिम्भरिणा निरस्तमगस्त्यवैभवमिति भावः । तथा च कथा पुराणेषु श्रूयते—युधिष्ठिरयज्ञवाटपवित्रीकरणाय पुरुषमृगमानेतुं प्रहितो हि वृकोदरः मध्येमार्गमुपविष्टस्य पवनसूनोः एतदागमनप्रयोजनमवगम्य विश्राणितं वालभारमुपगम्य लिंगपूजारतपुरुषमृगसविधे स्वग्रहणभयात् एकैकरोम प्रक्षिप्य लिङ्गभावापन्नतत्पूजानिरते तस्मिन् क्षण एव योजनाधिकमतिक्रम्य पुनश्च स्वग्रहणाय द्रुततरमभिधावति तस्मिन् पूर्ववदेव रोमान्तरप्रक्षेपपूर्वकं तमानिनाय यज्ञवाटनिकटमिति । पुराणवचनानि च **कूरेशविजय**व्याख्याने हनुमत्पुच्छरोमेश्वरत्वादिति प्रकरणे विपुलमनुसन्धेयानि । विस्तरभयाद्विरम्यते । अलङ्कारादिकं पूर्ववदिति संक्षेपः ॥ ५ ॥

அஸ்து தாவத் அகஸ்த்யஸ்ய ஜந்ஹோர்மஹிம நிந்ஹவ:
கா கதா தஸ்ய பாலஸ்ய விச்வக்ராஸேப்யத்ருப்யத: ॥ 5 ॥

का कथा तस्य बालस्य। षष्ठी चानादरे। बालमनादृत्य कथा काऽस्ति। यद्वा बालगता कथा कीदृशी। अगस्त्यमहिमलोपकरी किल। अथ वा अगस्त्यवार्ता बालं प्रति कीदृशीत्येवमर्थो ग्राह्यः। न तु, बालस्य का कथा-बालस्यात्र प्रसक्तिरेव नास्तीत्यर्थः।

1 ஜந்ஹுா என்கிற முனிவரின் மேன்மை அகத்திமுனிவரால் குன்றி விட்டது. கங்கையை மட்டும் உட்கொண்டார் முதல்வர். அகத்தி யர் கடலேயே கொண்டாரே. ஆயினும் உலகெல்லாம் உட்கொண்டும் போதாதென்றிருக்கும் அவ் ஆலிலேக் குழவியின் கதை எத்தகையது ; அக் குழவிக்குச் சொல்வதென்ன கவனியுங்கள். அதனுல் அகத்திமுனிவரின் மேன்மை குன்றுவதில் ஐயமேது? (ஆகையால் சிலரைவிட மேம்பட்ட தால் எல்லோருக்கும் மேலாக நினைத்து கர்வப்படலாகாது. இந்த ச்லோகத்திற்கு உரையில் கருத்துக்கள் பலபடியாக வரையப் பெற்றன. இக்குழவி கண்ணனுமாம்.)

2 விச்வக்ராஸேபி என்றவிடத்தில் ச ஷ என்ற சொற்களின் ஒத்து மையைக் கொண்டு சகரமே ஷகரமாய் விஷ்வக்க்ராஸேபி என்றும் படிப்ப தாம். இதனையொட்டிச் சிலர் விஷ்வக் ராஸே அபி எனப் பிரித்து இரு பக்கம் கோப ஸ்த்ரீகள் விளங்கப் பல உருவங் கொண்டு ராஸக்ரீடை செய்தும் த்ருப்தி பெருமல் பதினறுமாயிரவரான பெண்மணிகளை மணந்து மகிழ்ந்து வருபவனுயிருக்கும் போது தனக்கு மேலான ப்ரஹ்ம சர்யம் ஒருவருக்குமில்லேயென்று கரிக்கட்டையை பரீக்ஷித் என்ற ராஜ குமாரனுக்கினவன் வரலாறு எத்தகையது? அதற்கு ஈடாகுமோ அகத்தியருடைய செயலெனவுமுரைப்பர் என்ருர் உரையில்.

3 'ஜந்ஹுர் நாராயணோ நர:' என்று ஸஹஸ்ரநாமத்தில் ஜந்ஹுா என்பதும் ஒரு நாமம். தன் சக்தியை மறைப்பவனென்பது பொருள். கடலில் பள்ளிகொண்ட பகவான் தன் சக்தியை மறைத்திருந்தபடி யாலே அகத்தியர் அவனுக்குப் பள்ளியான கடலேயும் உட்கொண்டு விட்டார். ஆலிலேப் பாலகனுய் எல்லாம் உண்பவனுய்த் தன் சக்தியை அவன் காண்பிக்கும்போது அகத்தியர் கதை யென்ன? அவரும் வயிற்றிற் புகவேண்டியவரே.

4 அத்வைதமதம். அகஸ்த்யஸ்ய என்பதை அக: த்யஸ்ய எனப் பிரிக்க. பாலஸ்ய என்பதை வாலஸ்ய என்று கொள்க. பகரமே வகரம் அக:—அசையாதது நிலேத்தது—வாலம் புச்சம் வால். ப்ரஹ்ம புச்சம் ப்ரதிஷ்ட்டா என்று ஸர்வத்திற்கும் இடமான ப்ரஹ்மம். த்யஸ்ய அந்த அத்வைத ஜ்ஞானம் பிறந்து எல்லாம் அழியும்போது ஈச்வரனும்

அவன் குணங்களும் அழிவதால், அந்த ஜந்ஹா என்ற ஈச்வரனுடைய மகிமையின் அழிவு அப்போது இருக்கட்டும். (அழிகிறவனுயிருப்பதாலேயே அவன் ஜந்ஹா எனப்படுவான் போலும்.) விச்வம் எல்லாம் ஒழிந்து தானும் ஆனந்த குணமுமில்லாமையால் த்ருப்தியிராத அந்த புச்சப்ரஹ்மத்தைப் பற்றிய அந்நிலையை எச்சொல்லால் சொல்வது? ப்ரஹ்மம் சப்தத்திற்கும் அப்போது எட்டாதென்றபடி.

5 வாலஸ்ய என்று அனுமானின் வாலைக் கொள்க. இலங்கையை முழுமையும் கொளுத்தியும் த்ருப்தியடையாத (கடலையும் எரியும் இரும்புண்டையில் விழுந்த நீர்ப்பொட்டைப் போல் ஆக்கவும் வல்லதான) நெருப்பு உடைய வாலின் வரலாறு கவனிக்கப்பட்ட போது அகத்தியர் எவ்வளவு? (அனுமானுக்கு இஷ்டமாயிருந்தால் அவர்வால் நெருப்பில் கடலும் போயிருக்கும்.)

6 ஹனுமானின் வாலமாவது உடல்மயிர். தர்மபுத்ரரின் யாக பூமியைச் சுத்தமாக்க புருஷம்ருகத்தை அழைத்துவரச் சென்ற பீமன் வழிநடுவிலே அனுமானை வணங்கி வரன் பெற்ருன். அவர் உடல்மயிர் ஒவ்வொன்றும் ஒவ்வொரு சிவலிங்கமாக, புருஷம்ருகன் லிங்கபூஜையிலீடுபட்டிருந்ததால் ஹனுமான் அளித்த மயிர்க்கட்டை வைத்துக் கொண்டு பீமன் ஒவ்வொரு மயிரையும் வழியில் எறிய அதை மேன்மேல் லிங்கமென்று பூஜிக்க இழிந்த புருஷமிருகத்தை தந்த்ரமாக தான் அகப்படாமல் மெதுவாக ராஜஸூய இடத்திற்குக் கொணர்ந்தான் பீமன். ஸம்ஹாரசக்தியை உடைய லிங்கமான அந்த வாலுக்கு ஈடாவரோ அகத்தியர். (5)

दष्टसारङ्गयूथोऽपि दंष्ट्रानखरवानपि ।
भूभृत्कटकसंस्थोऽपि सारमेयो न सिंहति ॥ ६ ॥

अथेदानीं समानस्थानसंस्थानव्यापाराणामपि मतान्तरस्थकुदृष्टीनामनवरततर्कशाणकषणनिशिततमपतीनामपि स्वपक्षदौर्बल्यप्रयुक्तम् अतिप्रगल्भतरश्रुत्यन्तसिद्धान्तशूरेण सह साम्यसम्पादनसम्भावनाविरहम् अप्रस्तुतवृत्तान्तनिदर्शनेन प्रदर्शयति दष्टेति । **सारमेयः** शुनकः । सरमाशब्दात् देवशुनीवाचकात् स्त्रीभ्यो ढकि सारमेय इति रूपम् । (?) न सिंहतीत्यन्वयः ।

कीदृशोऽपि । **दष्टाः** दन्तैर्विदलिताः सारङ्गाणां हरिणानां **यूथाः** सङ्घाः येन तथाविधोऽपि 'यूथं तिरश्चां पुन्नपुंसक'मित्यमरः । सिंहपक्षे **सारङ्गा** मत्तमातङ्गाः 'सारङ्गश्चातके भृङ्गे कुरङ्गे च मतङ्गजे' इति विश्वः । **दंष्ट्रानखरवानपि** तादृशमृगादिव्यापादानचतुरदंष्ट्रानखादिस्वतःसिद्धायुधसामग्रीसमग्रोऽपि, **भूभृत्कटकसंस्थोऽपि** भूभृतां राज्ञां कटके सेनामुखे संस्था सम्यक् स्थितिः यस्य तथोक्तोऽपि मृगयादि-

व्यापाराय शुनां राजसेनामुखेष्वपेक्षणादिति भावः। यद्वा कटशब्दः पर्यङ्कवाची अल्पार्थे कः। श्वपोषका हि राजानः प्रेमवशात् शुनकमतिह्रस्वेऽपि स्वपर्यङ्के निवेशयन्ति। केचन स्वकटितटेऽपि तमारोपयन्ति। कटशब्दस्य कटीतटवाचित्वमपि 'गजगण्डकटीकटौ' इत्यमरकोशावसेयम्। अन्यत्र **भूभृतां** पर्वतानां **कटकेषु** अधित्यकासु नितम्बेषु वा समीचीनस्थितियुतोऽपि, **न सिंहति** सिंहवन्नाचरति। सिंहकार्यकारी न भवतीत्यर्थः। एवंविधविशेषणत्रयविशिष्टोऽपि न सिंहवदाचरति। यद्यपि ग्रामसिंहादिनामवहनमात्रं शुनामपि सम्भवति—तथाऽपि सिंहासाधारणकृत्यं नानुष्ठातुं क्षम इत्यर्थः। तदुक्तम्, 'पिब पयः प्रचुरं क्षितिपान्तिके कलय काञ्चन काञ्चनशृंखलाम्। इदमवद्यतमं हि यदीहसे भषक संप्रति केसरिणस्तुलाम्', 'आबद्धकृत्रिमसटाजटिलांसभित्तिरारोपितो मृगपतेः पदवीं यदि श्वा। मत्तेभकुम्भतटपाटनलम्पटस्य नादं करिष्यति कथं हरिणाधिपस्य' इति। तथा चायं सारमेयः, 'दंष्ट्राकोटिविशङ्कटास्यकुहरः कुर्वन् सटामुत्कटामुत्कर्णः कुरुते क्रमं करिपतौ क्रूराकृतिः केसरी', 'एतस्मिन् मदगन्धवासितसटः कुञ्जेषु शेते हरिः' इत्युक्तमदोद्धतगभीरतरासनस्थानशयनप्लवनविक्रमणविलोकनादिवैलक्षण्यम्, 'कोपाटोपसमुद्भटोत्कटसटाकोटेरिभारेः पुनः सिन्धुध्वानिनि हुंकृते स्फुरति यत् तद्गर्जितं गर्जितम्। सोऽन्यः कोऽपि घनाघनध्वनिघनः सिंहारवो जृम्भते' इत्युक्तदिक्कुम्भिहृदयस्तम्भसम्भावनार्हगम्भीरविकटगर्जाविशेषम्, 'येनाक्रम्य करीन्द्रगण्डयुगलं निर्भिद्य हेलाबलात् लब्ध्वा ग्रासवरं वराटकधिया मुक्तागणः कीर्यते' इत्युक्तमदकुम्भतटपाटनपटिमाटोपविकटकठोरतरनखरव्यापारं च करोति किमित्यर्थः।

तत्र च कारणमुक्तं **सारमेय** इति। सरमागर्भसम्भूतत्वमेव तत्रापराध इत्यर्थः। सरमाशब्दस्य शुनीसामान्यवाचकत्वमुपचारात्। न ह्यन्यजातीयमन्यजातीयव्यापारमाचरितुं प्रभवति। यदि चायं सिंहीगर्भस्थितः तत्सम्भूतः शिशुर्वा, तदा न सहत एवायं गजराजबृंहितम्। यदुच्यते जगन्नाथपण्डितराजेन सिंहीवचनमुखेन, 'धीरध्वनिभिरलं ते नीरद मे मासिको गर्भः। उन्मदवारणबुद्ध्या मध्येजठरं समुच्छलति' इत्येकमासगर्भस्यापि मदकरटिघटाविपाटनाटोपसमुदितत्वरात्वरत्वम्। यथा वाऽन्येन, 'जातः स्तन्यं न जग्राह कण्ठीरवकिशोरकः। चक्षुर्व्यापारयामास कुञ्जे कुञ्जरशालिनि' इति जातमात्रस्यापि तथात्वम्। अत एव राजकुलवासिनं कौलेयककिशोरमवेक्ष्य कस्यचित् कवेः फणितिः, 'शूरोऽसि कृतविद्योऽसि दर्शनीयोऽसि पुत्रक। कुले तस्मिन्न जातोऽसि गजेन्द्रो यत्र हन्यते' इति।

अनेन बाह्यकुदृष्टीनां सामान्यशास्त्रादिपरिश्रमशालिनामपि स्वमतदौर्बल्यमेवापजयहेतुरिति सूचितम्। ते च **दृप्तसारङ्गयूथाः** अतितीक्ष्णयुक्तिदशनविदलितक्षुद्रमतपतितजननिवहा। **दंष्ट्रानखरवन्तश्च।** दंष्ट्रापदेनात्र स्वपक्षस्थापनपरपक्षनिराकरणोपयुक्तयुक्तियुगलमनुमानादिरूपं विवक्षितम्। नखरपदेन च तदुपस्कारकमात्माश्रयान्योन्याश्रयचक्रकानवस्थाऽनिष्टप्रसङ्गरूपतर्कपञ्चकं विवक्षितम्। उक्तं हि सङ्कल्पसूर्योदये—'प्रकटप्रकाशितसाधनोपालम्भदंष्ट्राङ्कुरेण प्रतिपन्नखरतरतर्कपञ्चकनखरेण आरण्यकारण्यवर्तिना

प्रमाणपराक्रमकण्ठीरवेण' इति। यद्वा विपर्ययपर्यवसानादिरूपतर्काङ्गपञ्चकेन सह दश नखरा विवक्षणीयाः। ते चोक्तास्तत्त्वमुक्ताकलापे—'तर्को व्याप्त्याभ्युपेतात्ननमितिपदव्यापकस्य प्रसक्तिर्मानप्रत्यूहघाती द्विविष उदितः पञ्चधाऽऽत्माश्रयादिः। विश्रान्तिर्वैपरीत्ये प्रतिहतिविरहोऽनिष्टताऽनानुकूल्यं व्याप्तिश्चास्याङ्गमेनं कतिचिदनुमितेस्तादृशं भेदमाहुः॥' इति। **भूभृत्कटकसंस्थाः—भूभृतां राज्ञां कटकानां** वीरकटकाङ्गदादीनां **संस्था** सम्माननं स्थितिर्वा यत्र तथोक्ता अपि। 'संस्था तु मर्यादा धारणा स्थितिः' इत्यमरः। सम्मानस्य पाण्डित्यमर्यादानिदानत्वात् मर्यादावाचकशब्दवाच्यत्वमुपपद्यते। यद्वा भूभृद्भ्यः **कटकानां** संस्था धारणा यत्रेति विग्रहो वा। **न सिंहति**। अत्यन्तपराक्रमेण जगदखिलं विजयमानस्य श्रुतिसिद्धान्तशूरस्य कृत्यं परमतकथकविमथनात्मकं नाचरन्तीत्यर्थः। यद्वा सिंहशब्दस्य प्रतीपवृत्त्या हिंसशब्दनिष्पन्नतायाः प्रमाणसिद्धतया तत्तत्कुमतिमतमर्मभेदनरूपां हिंसां नाचरितुं प्रभवन्तीति भावः। प्रत्युत स्वमतदौर्बल्येन परमतोपरि प्रयुज्यमानदूषणानां स्वपक्षे[ऽपि] विद्यमानतया स्वहिंसापर्यवसायित्वमेव सिद्ध्यतीति। उक्तं हि—'स्वपक्षस्थान् दोषान् वितथमतिरारोपयति यः। स्वहस्तेनोत्क्षिप्तैः स खलु निजगात्रेषु बहुलं गलद्भिर्जम्बालैर्गगनतलमालिम्पति जडः॥' इति।

एवमत्र सिंहादिशब्दस्वारस्यात् कवितार्किकसिंह[1]कृष्णमिश्रादिरूपविशेषप्रतिपत्तिरपि भवति। तथा हि—**दष्टसारङ्गयूथोऽपि**—सरङ्गाः—रङ्गविशिष्टाः श्रीरङ्गस्थाः तत्सम्बन्धी यूथः सारङ्गयूथः स दष्टः युक्तिशस्त्रक्षोभितो येन सः पञ्चरात्राद्यप्रमाण्यसमर्थनेन श्रीरङ्गनाथसमाराधनविरोधमापादयितुं प्रवर्तमानः तत्र स्थितान् महनीयजनान् अतिप्रगल्भकूटयुक्तिकोलाहलेन प्रक्षोभयन्नित्यर्थः। [2]**दंष्ट्रानखरवानपि** खरशब्दस्तैक्ष्ण्यरूपगुणवचनः; भावप्रधानो वा। तद्वान् तीक्ष्णः। स न भवतीति नखरवान् अतीक्ष्णः। दंष्ट्रायामतीक्ष्ण इति फलितम्। स्वपक्षसाधनानुमानादिरूपदंष्ट्रायामनुकूलतर्कागमाबाधादिरूपतैक्ष्ण्यरहित इत्यर्थः। **भूभृत्कटकसंस्थोऽपि** भूभृतः चोलराजस्य कटके आस्थाने संस्थाने निर्वाहकतादिरूपेणावस्थानं यस्य तथाविधोऽपि। **सारमेयः** सार इति मेयः। अयमेव श्रेष्ठ इति जनैः सम्भाव्यमानोऽपीत्यर्थः। **न सिंहति** न कवितार्किकसिंहवत् कुमतिमत्तमतङ्गजहृदयमर्मभेदिसिंहनादारभटीमाटीकितुं प्रभवतीत्यर्थः। यदुक्तम्—'कार्यः कथाहवकुतूहलिभिः परेषां कर्णे स एष कवितार्किकसिंहनादः' इति।

अस्यापि दष्टसारङ्गयूथत्वम्, 'कवितार्किकळभव्रजकवळीकृतिसिंहम्,' 'कविकथकघटाकेसरी वेङ्कटेशः' इत्युक्तप्रतिमतकथकधौरेययूथनाथशिरोभेदननिपुणत्वात्। यूथशब्देन 'श्रावराहकलहक्रमादमी

---

1 कृष्णमिश्रो न श्रीदेशिककाले इति केचित्। एतत्कालिकोऽपि कृष्णमिश्रः स्थितः स्यात्। अथवा किं नाम्न्याग्रहेण। एतत्प्रायान्यग्रहणसंभवात्।

2 अपिशब्दार्थस्य विरोधस्यान्वयानुगुण्याय दंष्ट्रायाः अन्तः सहायत्वात् प्राणभूतो यः खरः तीक्ष्णः तर्कः तद्वानपीत्यर्थो युक्तः। शास्त्रविरोधपरामर्शात् पूर्वं सम्यक्तया प्रतीतानुमानादियुक्तो पीति यावत्।

सम्पतन्ति निगमान्तरोधकाः', 'प्रागल्भ्यमात्रशरणाः प्रतिवावदूकाः सम्भूय वादकरणेऽपि न मे प्रभूताः' इति स्वोक्तक्रमेण बद्धसङ्केतमापतद्बहुतरप्रतिवादिकूटानामप्येकप्रयत्नेन निरसनप्रभावोऽभिप्रेतः। अत एव ह्यस्य सिंहसादृश्यमनन्यसाधारणं निर्वहति। यदुक्ता सिंहपरिपाटी—'एकोऽहमसहायोऽहं कृशोऽहमपरिच्छदः। स्वप्नेऽप्येवंविधा चिन्ता मृगेन्द्रस्य न जायते' इति। तद्रीत्यैवानेनापि 'वादाटोपमुपेयुषः प्रतिभटान् आसेतुहैमाचलं तूलायापि तृणाय वा न च तुषच्छेदाय मन्यामहे' इति स्वस्यैकमात्रस्यैव तृणीकृतनिखिलदुर्वादिकूटं भूमण्डलगतनिखिलपण्डितमण्डलैकगोष्ठीसमावेशेऽपि युगपदेव तैः स्वतन्त्रवादाहवबद्धशूरत्वं मध्येसभमुदघोषि। आसेतुहैमाचलमित्यनेनापरमप्यस्य सिंहगतं वैलक्षण्यमुद्बोधितम्, यत् स्वदेशपरदेशविभागं विनैव सर्वत्र विजयैकजीवितत्वम्। उच्यते हि कविना—'को वीरस्य निगीषतः स्वविषयः को वा विदेशस्तथा यं देशं श्रयते तमेव कुरुते बाहुप्रतापार्जितम्। यद्दंष्ट्रानखलाङ्गुलप्रहरणः सिंहो वनं गाहते तस्मिन्नेव हतद्विपेन्द्ररुधिरैस्तृष्णां छिनत्त्यात्मनः' इति। तथा आसन्नैर्विवादवैधुर्यं चापरं सिंहकृत्यम्। यथोक्तम्—'उत्तुङ्गमत्तमातङ्गमस्तकन्यस्तलोचनः। आसन्नेऽपि च सारङ्गे न वाञ्छां कुरुते हरिः', 'वेतण्डगण्डकण्डूतिपाण्डित्यपरिपन्थिना। हरिणा हरिणालीषु कथ्यतां कः पराक्रमः', 'अद्य तेन हरिणार्भके कथं कथ्यतां नु हरिणा पराक्रमः' इत्याद्युक्तक्रमेण प्राणमोक्षणक्षणेऽपि क्षुद्रमृगतृष्णां न पुष्णातीति भावः। उक्तं हि—'मत्तेभेन्द्रविभिन्नकुम्भपिशितग्रासैकबद्धस्पृहः किं जीर्णं मृगमत्ति मानमहतामग्रेसरः केसरी' इति। **दंष्ट्रानखरवा**नित्यत्र प्राशस्त्ये मतुप्। तेन चोत्कृष्टतरतर्कपञ्चकनखरोपस्कृत-स्वपक्षरक्षणपरपक्षक्षपणनिपुणसुयुक्तिदंष्ट्राविशिष्ट इत्यर्थः। भूभृतां श्रीवेङ्कटाद्रिहस्तिशैलप्रभृतीनां कटके समीपप्रदेशे सम्यक् स्थितिः यस्य सः। 'विहारभूर्वेङ्कटभूधरेन्द्रः', 'सत्यं शपे वारणशैलनाथ' इत्याद्युक्तेः। स्वपक्षभूतश्रीपाञ्चरात्रसार्वत्रिकप्रामाण्यस्थापनात् तत्कृतप्रबोधचन्द्रोदयखण्डनाच्चानन्यसामान्यसिंहशब्दवाच्यत्वम्, 'दान्तं यं कविवादिदन्तिहरिरित्यार्या वदन्ति क्षितौ इत्यभियुक्तप्रयोग-(गावगतः?)माहात्म्यादस्यैवासाधारणमित्यर्थः।

(4) एवं सिंहगतमन्यदपि वैलक्षण्यमत्र बोधयितुं शक्यम्। तथा हि उक्तं पण्डितराजेन—'दिगन्ते श्रूयन्ते मदमलिनगण्डाः करटिनः करिण्यः कारुण्यास्पदमसमशीलाः खलु मृगाः। इदानीं लोकेऽस्मिन् अनुपमशिखानां पुनरयं नखानां पाण्डित्यं प्रकटयतु कस्मिन् मृगपतिः॥' इति। तदयमर्थः—**दष्टाः** भक्षिताः **सारङ्गयूथाः** विद्यमानसकलमत्तमातङ्गसङ्घाः येन तथोक्तः। **दंष्ट्रानखरवान्** मातङ्गसत्त्वे तद्विदळनक्षमायुधसामग्रीसम्पूर्णः। क्षुद्रमृगाणामुपेक्षणविषयत्वात् मत्तगजानां च समूलनष्टत्वात् निर्व्यापारदंष्ट्रानखरशालीत्यर्थः। 'वदनालंकृतिमात्रमक्षिणी' इत्यादाविव दंष्ट्रानखरयोर्निर्व्यापारस्थितिर्विवक्षणीया। अत एव **भूभृत्कटके** पर्वतनितम्बे **संस्था तूष्णीं** स्थितिः यस्य सः स्वानुरूपभक्ष्यविशेषालाभेन तूष्णीमवतिष्ठमान इत्यर्थः। यद्वा भूभृत्कटके **संस्था** विनाशः यस्य सः भक्ष्यालाभेन मृतोऽपीति। 'संस्थश्चरेऽ-

वस्थिते स्त्री स्थितौ सादृश्यनाशयोः ;' इति मेदिनीकोशात् , 'संस्था सदर्चाविधेः' इति प्रयोगसत्त्वाच्च । तथा चायं मृगराजः जगति विद्यमानान् मत्तमातङ्गयूथान् अन्वहं विभिद्य भुञ्जानः तदन्वयविनाशे हि क्षुद्रमृगान्तरं तृणादिवदुपेक्ष्य तूष्णीं स्थितो मृतोऽपि वा भवन् श्रेष्ठतमकाष्ठामातिष्ठते । भषकस्तु प्रत्यहं भक्षार्थमितस्ततः पर्यटाट्यमानः शुष्कास्थिमुण्डखण्डादिकं मुधा विखण्डयन् जीवन्नपि सर्वाधमभावमेव वहतीति भावः ।

अत्र च दृष्टसारङ्गयूथत्वादिविशेषणत्रयविशिष्टः सन् न सिंहतीत्यन्वयात् तादृशविशेषणत्रय-प्रयुक्तसिंहसादृश्यवान् न भवतीत्यर्थबोधात् तादृशविशेषणत्रयं तन्निबन्धनसिंहसादृश्यं च शुनि न सम्भवतीत्यर्थबोधः पर्यवस्यति । अपित्वयं समुच्चये । आचार्यपरत्वेऽपि 'क्षोणीकोणशतांशे'त्युक्तक्रमेण तृणीकृतराजस्थानत्वेऽपि 'वादाटोपमुपेयुषः' इत्युक्तरीत्या स्वयमेव वादार्थं स्वसविधमागतानां दृप्तकथकानां यथायथमवधूननात् दृष्टसारङ्गयूथत्वं, स्वसिद्धान्तग्रन्थनिबन्धनार्थमनुमानतर्काद्याविष्करणात् दंष्ट्रानखरवत्त्वं, पश्चिमे वयसि 'कवित्वमदकश्मलं कथकदर्पतिग्मज्वरं विकत्थनमिळद्बहुप्रलपनाभिमानग्रहम्' इति स्वयमेव वादयुद्धपरित्यागादिप्रकाशनात् 'निरन्तरं निर्विशतः' इति करिगिरिकटकतट एव नित्यवासाशासनाच्च भूभृत्कटकसंस्थत्वं च निस्संशयमुन्नेयम् । कृष्णमिश्रादेस्तु सदा क्षुद्रजनवादाय राजस्थानेषु पर्यटतः क्वचित्क्वचिदपजयं चासकृदाप्नुवतो राजसम्माननादिप्राप्तिरपि निकर्षावहैवेत्यभिप्रायः । अत्र च कथा-प्रसङ्गात् स्वोत्कर्षख्यापनमपि न दोषाय । यथोक्तं श्रीभाष्यकारवाक्यमुखेन—'श्रुतिसिद्धान्तशूरस्य तद्विरुद्धान् निरुन्धतः । वल्गितं वावदूकस्य कृतिनः किं न शोभते' इति । अत्र किञ्चिदंशसाम्यकथनेऽप्य-न्नेकांशव्यतिरेकसमर्थनात् व्यतिरेकालङ्कारोऽपि गम्य इत्यवगम्यताम् । कृष्णमिश्रवृत्तान्तस्यापि दृप्तविषयत्वेन प्रकृतत्वात् प्रस्तुतांकुरोऽपि बोद्धव्यः । अत्र च न सिंहतीत्याचारक्विपा वस्तुतः शुनः सिंहत्वजातिसमागमेऽपि न सिंहगतकार्याचरणनिपुणत्वं सम्भवतीत्यपि भावः सूच्यते । यद्वा कल्पिताऽपि तत्र सिंहत्वजातिर्न स्थिरप्रतिष्ठिता भवतीति ।

(5) अनेन शान्तिपर्वगतऋषिसंवादकथाऽप्यनुसार्यते । तथा हि—कस्मिंश्चिद्वने कश्चन मुनिर्मूल-फलाशनः शान्तः प्रतिवसति स्म । तस्य च शान्तिमत्तामनुध्याय सर्वेऽपि मृगास्तत्समीपगाः सुखपक्षपराश्च बभूवुः । तत्र कश्चिच्छुनकोऽतीव भक्तस्तस्यैव समीपे फलमूलाशनः स्नेहबद्ध उवास । कदाचित् कश्चन द्वीपी शुनकं तं जिघांसुरायातः । शुनकश्चैनं मुनिं शरणं गतः प्रार्थयामास । तेन चायं द्वीपितां नीतस्तत्समीप एव निर्भयमवसत् । अनन्तरमेवं क्रमेण व्याघ्रादिरूपमप्यापाद्यान्ततो मातङ्गरूपमप्यापादितः सिंहभयात् पुनश्च तमृषिं शरणं प्रपन्नस्तेन च सिंहत्वमापादितस्तत्रैवाश्रमे सिंहभयशून्यो न्यवात्सीत् । अन्ये च सिंहा मृगाश्च तं सिंहमेव मत्वा पलायांचक्रिर इति । यथोच्यते–'स ततः सिंहतां नीतो नागेन्द्रो मुनिना तदा । वन्यं नाजगणत् सिंहं तुल्यजातिसमन्वयात् ॥ दृष्ट्वा च सोऽभवत् सिंहो वन्यो भयसमन्वितः । स चाश्रमेऽवसत् सिंहस्तस्मिन्नेव महावने ॥ तद्भयात् पशवो नान्ये तपोवनसमीपतः ।

न्यदर्शयन्त तदा त्रस्ताः जीविताकांक्षिणस्तथा' इति। तथा चायं सिंहत्वजातिसंक्रमादन्यमृगमृगेन्द्रादि-भयोत्पादननिदानभूतोऽपि ऋष्याश्रम एव सार्वदिकनिवसात् जातिसिंहादिवत् न मद(?)कुम्भिकुम्भवि-भेदनादिव्यापारमकरोदिति प्रतीयते। स चायं शुनकसिंहोऽपि दष्टसारङ्गयूथः 'तृप्तः सुप्तो हतैर्मृगैः' इत्युक्त्या स्वतो निहतहरिणादिजीवी, सिंहाकारसमागमात् दंष्ट्रानखरवान् भूभृतः मुनिराजस्य कटके समीपदेश एव समीचीनस्थितियुक्तः, उटजमूलस्थ इत्युक्तत्वात्। तथाऽपि **न सिंहति** सिंहव्यापारं न करोतीत्यर्थबोधः। यद्वा सिंहो भवति सिंहतीति विग्रहात् सिंहत्वजातिरप्यस्य न स्थिरा भवतीति। उच्यते ह्ययं सिंहः शरभरूपमापादितः पूर्ववदुटजान्तिकस्थितिमनिच्छुः पिशिताशनैकलोलस्तमेव मुनिं जिघांसन् पुनरपि तेन प्राथमिकशुनकरूपमेव प्रापित इति। यथा 'शरभोऽप्यतिसंहृष्टो नित्यं प्राणिवधे रतः। इयेष तं मुनिं हन्तुमकृतज्ञः श्वयोनिजः। ततस्तेन तपश्शक्त्या विदितो ज्ञानचक्षुषा। विज्ञाय स महाप्राज्ञो मुनिः श्वानं तमुक्तवान्॥ यस्मादेवमपापं मां पाप हिंसितुमिच्छसि। तस्मात् स्वयोनिमापन्नः श्वैव त्वं हि भविष्यसि' इति। तथा चात्यल्पानां महदाश्रयादिवशात् किञ्चिदुत्कृष्टपदप्राप्तावपि न [ते] तत्कृत्यमाचरितुं प्रभवन्ति, न वा तज्जरयितुं शक्नुवन्तीति सूचितम्।

6 अत्र च 'आश्रमं तु तयोः शून्यं प्रविश्य नरसिंहयोः। गोचरं गतयोर्भ्रात्रोरपनीता त्वयाऽधम॥ न हि गन्धमुपाघ्राय रामलक्ष्मणयोस्त्वया। शक्यं सन्दर्शने स्थातुं शुना शार्दूलयोरिव।' इति वचनात् रावणपरोऽपि कश्चिदर्थः। सारमेयः श्वतुल्यः सार इति जनैः प्रतीयमानश्च रावणो विवक्षितः[1]। तस्य मृगतुल्यसाधुजनयूथबाधकत्वात् दष्टसारङ्गयूथत्वम्। राक्षसजातित्वात् दंष्ट्रानखरवत्त्वम्, त्रिकूटशिखरस्थ-लङ्कास्थितत्वात् भूभृत्कटकसंस्थत्वं च सुलभमेव। स च **न सिंहति**। 'महाबाहुं महोरस्कं सिंहविक्रान्त-गामिनम्। नृसिंहं सिंहसङ्काशमहं राममनुव्रता।' इत्यादिदेवीवचनावबोधितानन्यसाधारणजनस्थानस्थ-चतुर्दशसहस्ररक्षोबलतदध्यक्षादिमदगजसार्थसार्धमुहूर्तशकलीकरणादिनिपुणमहाबाहुविक्रमक्रीतजगत्त्रयप्रत-महावीरसिंहबिरुदभाजनाभिरामेण श्रीरामेणात्यल्पमपि साम्यं न सम्पादयितुं शक्नोतीत्यर्थः॥ ६॥

1 सारङ्गः चातकः। चातकवत् स्वस्मिन् स्थितो विभीषणादिवर्गः। स रावणेन दष्टः--पीडितः। सारमेयो रावणः सरमापत्यग्रजत्वात्। सरमा विभीषणभार्या (रा. उ. 12)। सीतारक्षणाय रावणेनैवादिष्टा सा रावणस्य भयं सर्वमपि सीतायै (यु. 33) अवोचत्। एवं सरमाज्ञातनिज-दौर्बल्यो रावणः कथं राघवसमः स्यात्; कथं सीतया बलिष्ठत्वेन मन्येतेत्यपि स्यात्।

தஷ்டஸாரங்கயூதோபி தம்ஷ்ட்ராநகரவாநபி.
பூப்ருத்கடகஸம்ஸ்த்தோபி ஸாரமேயோ ந ஸிம்ஹதி. 6.

1 ஸாரமேயமாவது நாய். ஸரமா என்று ஒரு தேவநாய்க்குப் பெயராம். அதன் வம்சத்தியவை எல்லா நாயும். நாய்க்கும் சிங்கத்திற் கும் சில ஒத்துமை இருந்தாலும் நாய் சிங்கமாகாது. ஸாரங்கக் கூட்டத்

தைக் கடிப்பது இரண்டுக்கும் பொது. ஆனல் நாய் கடிக்கும் ஸாரங்க மாவது மானும். சிங்கம் கடிக்கும் ஸாரங்கமாவது யானை. பற்களும் நகங்களும் உடைமை இரண்டுக்கும் பொது. அது போல் பூப்ருத்கட கத்தில் இரண்டும் இருக்கும், அரசரின் சேனையில் அல்லது அவரோடு ஒரே படுக்கையில் நாய் இருக்கும். சிங்கம் மலையின் தாழ்வரைகளிலி ருக்கும் (சிலேடையான சொற்கள்.)

2 ஒருவன் மான் போல் அச்சமுடன் ஓடும் சில பண்டிதரை ஜெயிப் பவனுனாலும் சில ப்ரமாணங்களும் அவற்றிற்குத் துணையான தர்க்கங் களும் அறிந்தவனுனாலும், அரசர்களுடைய அரண்மனையில் மதிக்கப் பட்டிருந்தாலும் மிக ப்ரசித்தமாய் சிங்கமென்னப்பட்ட பண்டித ச்ரேஷ்ட்டனுகமட்டான் என்பது கருத்து.

3 சைவமதத்தைச் சார்ந்த பண்டிதன் சோளதேசத்தரசனுல் அபிமானிகப்பட்டு ஸ்ரீரங்கம் வந்து அங்குள்ள பண்டிதர்களை வென்று கோயிலில் பாஞ்சராத்ரபூஜையை நிறுத்தி ஆழ்வார் முதலான பக்த விக்ரஹங்களை எடுக்கவும் பாடுபட்டான். அப்போது அங்குள்ள பெரியோர்கள் எல்லோரும் காஞ்சியில் எழுந்தருளியிருந்த கவிதார்க்கிக ஸிம்ஹமான ஸ்ரீதேசிகனை எழுந்தருள ப்ரார்த்தித்தனர். ஸ்வாமியும் எழுந்தருளி அவனை வென்று கோயில் சீர்திருத்தம் செய்து முன்போல் அமைத்தருளினர். அதற்கிணங்க இங்குப் பொருளாவது--ஸரங்கராவார் ரங்கத்திலிருப்பவர். அவர்களுடையதான திரள் ஸாரங்கயூதம். அதைக் கடிப்பவனுனாலும், அதற்குத்தக்க ப்ரமாண தர்க்கங்கள் உடையனு னாலும் சோளவரசனின் துணையிலிருப்பவனுனாலும் அந்த மதாந்தர வாதி கவிதார்க்கிகஸிம்ஹத்திற்கு ஈடாகான் என்றதாம்.

4 இதற்கு முன் மிருகங்களை அடித்திருந்து இப்போது பெரிய மிருகமில்லாமையாலோ, சக்தியற்று சாகும் நிலையிலோ மலையோரத்தில் பல்லும் நகமும் சேர்ந்துகிடக்கும் சிங்கத்திற்குக் கூட நாய் ஈடாகாது.

5 பாரதம் சாந்திபர்வத்தில் ரிஷியும் நாயுமென்ற கதையொன்று உண்டு. ஒரு மஹர்ஷியின் ஆச்ரமத்தில் எல்லா மிருகங்களும் அடக்கத் துடன் இருந்தன. ஒரு நாயும் பக்தியுடன் இருந்தது. அந்த நாயினிடம் சில பெரிய மிருகங்கள் த்வேஷம் வைத்தபோது நாய் ரிஷியைச் சரண மடைந்தது. அவர் அதைப் புலியாகவும் யானையாகவும் சிங்கமாகவும் ஸமயோசிதமாக உருமாற்றி வந்தார். கடைசியாக சிங்கமானவுடனே அதுவே மஹர்ஷியையும். ஹிம்ஸிக்க முயன்றது உடனே பழையபடி நாயாக்கிவிட்டார். ஆக அந்த நாய் ரிஷிராஜனின் அருகில் சிங்கமாகியும் உண்மை சிங்கமாக நிலைக்கவில்லையென்றதாம்.

6 த்ரிகூட (மூப்ருத்) மலையின் இடையிலிருப்பவன் ஸாரமேயன்—ஸாரம்—பலமுள்ளவனாக பலரால் நினைக்கப்பட்டவன் உண்மையில் நாயைப்போன்றவன் கள்ளத்தனமாக சீதையைக் கொள்ளை கொண்ட அரக்கன் ராகவ ஸிம்ஹம் போலாகமாட்டான். (ஸரமா என்று விபீஷணரின் பார்யைக்குப் பெயர். அவள் மைத்துனன் ராவணன் ஸாரமேயன்.)

सत्पथे च्छादयन् मित्रमपि व्याळस्तमोमयः ।
अतीतपर्वा जगतामदृश्यः सहसा भवेत् ॥ ७ ॥

तदेवमुक्तश्लोकैः स्वतोऽधिकप्रभावैः महात्मभिः सह अवरजनानामसूयादिवशात् सर्वविधसाम्यसम्पादनप्रयतनेऽपि सर्वथा तन्न सम्भवतीति प्रसाध्य तत्प्रसङ्गात् केचिदत्यल्पाः तादृशासूयापरमकाष्ठया बाल्यात्प्रभृति मित्रेभ्योऽपि द्रुह्यन्तीत्यसूयालुजनदौष्ट्यातिशयप्रकाशनाय श्लेषबललब्धविविधदृष्टान्तप्रदर्शनेनासूयाप्रभावमाविष्कृत्य, अन्ततो नाश एव तेषां फलिष्यतीत्याह **सत्पथ** इति । सतां पन्थाः **सत्पथः** । 'येनास्य पितरो याता येन याताः पितामहाः । तेन यायात् सतां मार्गम्' इत्युक्तमहाजनपरिगृहीतमार्ग इत्यर्थः । तस्मिन् । स्थितमपीति शेषः । **मित्रमपि** बाल्यात् प्रभृति सुस्निग्धमपि 'मित्रमापदि जानीयात्' इत्युक्तापद्बन्धुमपीत्यर्थः । **छादयन्**—असूयया तद्गुणादिकं प्रच्छाद्याधिक्षिपन्, **तमोमयः** तादृशासूयानिदानभूततमोगुणप्रचुरः । 'तत्प्रकृतवचने मयट्' इति प्राचुर्यार्थे मयट् । **व्याळः** दुष्टः । 'मेचलिङ्गः शठे व्याळः पुंसि श्वापदसर्पयोः' इत्यमरः । 'व्याळो दुष्टगजे सर्पे श्वापदे नान्यवत् खले' इति मेदिनी च । स्वाभाविकदौष्ट्यात् तमोगुणप्राचुर्यजनितामर्षणाच्च बाल्यस्निग्धानपि प्रधर्षयन्नित्यर्थः । **अतीतपर्वा** सन् मर्यादातिक्रमयुक्तश्चेदित्यर्थः । परोक्षाधिक्षेपमात्रेऽप्यलब्धतृप्तिः प्रत्यक्षतोऽपि महाजनसमक्षमधिक्षेप्तुमारभमाणः तत्कार्यविच्छेदेऽपि प्रवृत्तश्चेदित्यर्थः । **सहसा** तादृशसीमातिलङ्घनक्षण एव । **जगतामदृश्यः** महाजनानां द्रष्टुमनर्हो भवेत । एतद्दर्शनेऽपि सर्वे जना नयनं निमीलयेयुरित्यर्थः । 'अघाय गतसत्त्वानां दर्शनस्पर्शनादिकम्' इति हि वक्ष्यते । **पर्वशब्दोऽत्र** मर्यादावचनः । 'पर्व ग्रन्थौ पञ्चदश्याम्' इत्युक्तग्रन्थिरूपसीमावाचकत्वाभिधानात्, इक्षुदण्डादिपर्वणोऽपि तत्तद्भागसीमारूपत्वात्, महाभारतादिषु प्रकरणसमाप्तिपरतया अप्येतदर्थप्रयुक्तत्वात्, "यः सप्तपर्वव्यघानतुङ्गां शेषत्वकाष्ठामभजन्मुरारेः' इति प्रयोगसद्भावाच्चेति बोद्धव्यम् । 'मित्रद्रोही कृतघ्नश्च,' 'मित्रद्रोहे च पातकम्' इत्यादिकमिहानुसन्धेयम् । 'भीतिप्रदानं शरणागतस्य स्त्रिया वधो ब्राह्मणस्वापहारः । मित्रद्रोहस्तानि चत्वारि शक्र ! भक्तत्यागश्चैव समो मतो मे' इति महाभारतवचनमपि ।

(2) एवं सूर्योपरागपरोऽप्यपरोऽर्थः । **सतां** नक्षत्राणां पन्थाः **सत्पथः** आकाशः तस्मिन् **मित्रमपि** सूर्यमपि । 'द्युमणिस्तरणिर्मित्रः' इत्यमरः । **छादयन्** स्वीयछायया प्रच्छादयन् **तमोमयः**

राहुस्वरूपः 'तमस्तु राहुस्स्वर्भानुः' इत्यमरः। स्वार्थे मयट्। व्यालः सर्पः। यद्वा तमोमयः छायाख्यतमः प्रचुरः। 'सुवर्भानुरासुरस्सूर्यं तमसा विद्ध्यत्' इति श्रुतेः। प्राचुर्ये मयट्। अतीतपर्वा सन् अमावास्यामतिक्रान्तश्चेत्। 'पर्वणी पञ्चदश्यौ द्वे' इति वैजयन्ती। 'प्रतिपत्सु चतुर्दश्यामष्टम्यां पर्वणोर्द्वयोः' इति प्रयोगश्च। जगतामदृश्यो भवेत्। दर्शातिक्रमे राहुदर्शनानुपलम्भादिति भावः। यद्वा—दर्शप्रतिपत्सन्धिरेव पर्वशब्दविवक्षितः। 'पर्व क्लीबे महे ग्रन्थौ प्रस्तावे लक्षणान्तरे। दर्शप्रतिपदोः सन्धौ विषुवत्प्रभृतिष्वपि' इति मेदिनीकोशात्, तत्रैवोपरागमोक्षणेन तदतिक्रमे राहुदर्शनविरहाच्चेति भावः।

(3) अन्योऽप्यर्थो बद्धजीवपरः। तथा हि—(क)तमोमयः प्रकृतिस्वरूपः, 'अक्षरं तमसि लीयते' इति श्रुतेः। व्यालः दुष्टपदार्थः, ज्ञाननिरोधकत्वात्। मित्रमपि अनादिकालसंसृष्टं जीवात्मानमपि सत्पथे सत्त्वगुणविशिष्टे साधुमार्गे छादयन् तत्प्रवेशं निरुन्धन्। सन्मार्गतिरोधानेन तत्राप्रवेशमापादयन्नित्यर्थः। यद्वा—छादयन् 'यवनिका माया जगन्मोहिनी' इत्युक्तक्रमेण तदीयस्वाभाविकसम्यग्ज्ञानतिरोधायक इत्यर्थः। अतीतपर्वा भगवत्कृपारूपनिश्रेणिकाद्वारा प्रकृतिमण्डलसीमातिलङ्घने सति जगतामदृश्यो भवेत्। सूक्ष्मशरीररूपेण विरजानदीतरणावधि अनुवर्तनात् तदन्तं दृश्यमानोऽपि तत्रैव विशरणात् शुद्धसत्त्वमयदेशासंस्पर्शाच्च सर्वेषामनुपलम्भपदं भवतीति भावः। (ख) यद्वा—तमोमयः प्रकृतिसंसृष्टः बद्धजीवः व्यालोऽपि प्रथमं शठोऽपि सत्पथेच्छात् सन्मार्गेच्छोः धार्मिकात्, आचार्याद्वा। तत्कटाक्षादित्यर्थः। मित्रमयन् सूर्यमण्डलं प्राप्य जगतामतीतपर्वा प्रकृतिमण्डलसीमामतिक्रम्य अदृश्यः—एन विष्णुना दृश्यः। अः दृश्यो यस्येति वा। तथोक्तः सन् भवेत् भूतिमृच्छेत्; 'भवत्यात्मना' इतिवत्। उक्तं हि—'अनपायदेशिकनिदर्शितामिमां कमलासहायकरुणाधिरोहणीम्। क्रमशोऽधिरुह्य कृतिनः समिन्धते परिशुद्धसत्त्वपरिकर्मिते पदे' इति॥

(4) एवं तमोगुणपरोऽपि कश्चिदर्थः। तमोगुणस्वरूपः कश्चन दुष्टपदार्थः (यद्वा) तमोगुणविकारभूतो महामोहरूपो दुष्ट इति वा। शरादिपाठकल्पनात् विकारार्थे मयट्। मोहस्य तमोविकारत्वं च तमोगुणविशिष्टजीवोपादानकत्वम्। तथा ह्युक्तं सङ्कल्पसूर्योदये—'त्रिगुणघटितात् भोक्तुर्बुद्धिः सती तदनुव्रता समयनियतोच्छ्रायं त्रेधा कुलं समजीजनत्। प्रथममिह तद्योगद्वेष्यं विवेकपुरस्सरं द्वितयमितरज्जुष्टं रागप्रमोहमुखं मिथः' इति। मित्रमपि सदा स्वसंसृष्टं पितृत्वेन स्वस्मिन् वत्सलमपि जीवात्मानं छादयन् सत्त्वगुणप्रचुरविवेकमार्गप्रवेशनिरोधेन बुद्ध्याख्यया मात्रा सह पुरुषं तिरोदधदित्यर्थः। यथोक्तम्—'पत्यौ दूरं गतवति रवौ पद्मिनीव प्रसुप्ता म्लानाकारा सुमुखि निभृता वर्तते बुद्धिरम्बा। मायायोगान्मलिनितरुचौ वल्लभे तुल्यशीला राहुग्रस्ते तुहिनकिरणे निष्प्रभा यामिनीव' इति। अतीतपर्वा एतादृशसमयातिक्रमे। यौवनपर्वेत्यादाविव पर्वशब्दः कालपरः। भगवत्सङ्कल्पकालाविर्भावसमय इत्यर्थः। यद्वा पर्वशब्दस्य उत्सवपरत्वमाश्रित्य भगवल्लीलोत्सवातिक्रम इति वाऽर्थोऽवसेयः। जगतामदृश्यो भवेत्।

तत्क्षण एव मध्याह्नदीपवन्निष्प्रकाशो विनष्टश्च भवेत्। यथोक्तं 'त्रिगुणात्मिकया तिरस्करिण्या स्थगयामास शुभं य एष मोहः। स बभूव तदा त्वदाभिमुख्ये दिवसारोपितदीपनिष्प्रकाशः' इति ॥

(5) एवमद्वैतपरिपाट्यापि कश्चित् उक्तक्रमेणार्थः। तथा हि—**सत्पथे** सद्रूपब्रह्ममार्गे। स्थित इति शेषः। **तमोमयः** अविद्यारूपः **व्याळः** दोषः। ब्रह्मण्येवाविद्यासंक्रमादिति भावः। **मित्रमपि** सूर्यवत् प्रकाशमानं ब्रह्मापि। तरुणादित्यसङ्काशमिति प्रमाणानुरोधात्। **छादयन्** तिरस्कुर्वन् तिरोदधान इत्यर्थः। **अतीतपर्वा** श्रवणमननिदिध्यासनादिकालातिक्रमे महावाक्यबोधाविर्भावे **सहसा** तत्क्षणमेव **अदृश्यो भवेत्** सर्वदृश्यशून्यो भवेत्। स्वोपादानकसर्वदृश्यैः सह स्वयमपि विनष्टो भवेदित्यर्थः। यद्वा ब्रह्मणोऽदृश्यो भवेदिति। अविद्यादर्शनविरहस्यैव मोक्षरूपत्वादिति भावः ॥

(6) एवमन्धकारप्रचुरभूभागपरोऽपि कश्चिदर्थः। तदुक्तं श्रीमति रामायणे—"ततःपरमगम्या स्यात् दिक् पूर्वा त्रिदशावृता। रहिता सूर्यचन्द्राभ्यां अदृश्या तिमिरावृता। एतावत् वानरैः शक्यं गन्तुं वानरपुङ्गवाः ॥ अभास्करममर्यादं न जानीमस्ततः परम्' इति। तदयमर्थः—**तमोमयः** अन्धकारप्रचुराः **व्याळः** कश्चन दुष्टप्रदेशः **सत्पथे** आकाशे **मित्रमपि** सूर्यमपि **छादयन्** आवृण्वन् **जगतामतीतपर्वा** जनसंचरणमर्यादामतिक्रान्तस्सन् **सहसा** वानराणां स्वभावभूतेन दुर्गतरणादिरूपबलेनापि **अदृश्यो भवेत्** दृश्यो न भवेत्। दृष्टिपातस्याप्यविषयो भवेदित्यर्थः। अत्र च **मित्र-तमःपर्वादृश्यादिशब्दैः** उक्तरामायणश्लोकस्थः **भास्कर तिमिर मर्यादादृश्यादिशब्दाः** प्रत्यभिज्ञायन्ते ॥

(7) एवमनयैव भूमिकया औरान्तसमुद्रसमीपप्रदेशः कश्चित् मार्गशीर्षमासे सूर्यस्यात्यन्तिकदक्षिणदेशाग्रभागगमनात् अदृष्टसूर्य एव भवति तन्मास इति प्रसिद्धेः तत्परोऽप्यर्थविशेषः सुबोधः। यथा गगनपथे सूर्यं छादयन् अत एव तिमिरमयः कश्चन प्रदेशः **जगतामतीतपर्वा** सूर्यरश्मिसञ्चारप्रदेशमतिवर्तमानः **सहसा**—मार्गशीर्षमाससम्बन्धेन हेतुना। 'मार्गशीर्षः सहा मार्गः' इत्यमरः। **अदृश्यो भवेत्**। ज्योतिर्विरहादिति भावः ॥

(8) एवं दुष्टगजरूपोऽप्यन्यः। तथा हि। **तमोमयः** मदविकारहेतुतमोगुणप्रचुरः कश्चन **व्याळः** दुष्टगजः। 'व्याळो दुष्टगजे सर्पे' इति मेदिनी। सत्पथे राजमार्गे **मित्रमपि** पोषकमपि **छादयन्** आवृण्वन् मदविकारारम्भात् तस्यापि मार्गमादौ निरुन्धन्नित्यर्थः। **अतीतपर्वा सन्** मदोद्रेकसमयसंप्राप्तावित्यर्थः। मदानामनुदिनमभिवर्धमानत्वादिति भावः। **सहसा** सद्य एव जगतां **अदृश्यो भवेत्** सर्वेषां पलायनेन वा मदकोपाविष्टतया दुष्प्रेक्षत्वाद्वा अदर्शनीयो भवेत्। स्वग्रहणभयात् सर्वेऽपि तं वीक्षितुमपि न क्षमन्त इति ॥

(9) एवमेव श्वापदपरोऽपि कश्चिदर्थः। **व्याळः** सालावृकादिः **तमोमयः** अन्धकार एव बहिःप्रचारवान् कश्चित् **सत्पथे मित्रमपि** राजमार्ग एव प्रीतिमन्तमपि **छादयन्** पन्थानमावृत्य

निरुन्धन् । रात्र्यवसानसमये(?) अरण्यसमीपवर्तिराजमार्गद्वारा बहवः पथिकाः सञ्चरन्ति ; तत्र श्वापदादि-दुष्टमृगाः केचिदाहारलोभात् रात्रौ राजमार्गमध्ये स्थित्वा तत्र गच्छतः पुरुषान् जिघृक्षन्तीति प्रसिद्धिः । तादृशारण्यसीमातिलंघने कथञ्चित् रात्र्यतिक्रमे वा सद्यः पलाय्य अदृश्यो भवति । स्वग्रहणभयात् जनसम्मर्दे विद्रुतो भवतीत्युत्तरार्धार्थः ॥

(10) एवमैन्द्रजालिकपरोऽपि कश्चिदर्थः । **तमोमयः** कृष्णचतुर्दश्यादिरूपान्धतमसप्रचुरसमय एव अदृश्याञ्जनादिसिद्धिसम्पादकत्वात् तमःप्रचुरः **व्याळः** दृष्टितिरोधानादिक्षमत्वात् नैकृतिकः। शठ इत्यर्थः। **सत्पथे** राजमार्गे **मित्रमपि** स्वेन सहैव वर्तमानमपि **छादयन्** मुद्रिकाबन्धनेन स्वहस्तस्थितवस्त्वदर्शनमुत्पादयन् । तदुक्तम्—'मुद्रिका सर्वलोकस्य पाणिस्था दृष्टिबन्धकृत्' इति । यद्वा स्वसमीपवर्तिनं स्वीयगोष्ठी-प्रविष्टं स्निग्धपुरुषमपि मन्त्रशक्त्या परैरदृश्यत्वेन तिरोधापयन् **अतीतपर्वा सन्** किञ्चित्समयातिक्रमे सति **सहसा** साहसव्यापारेण स्वयमप्यदृश्यो भवेत् । स्वस्मिन् विद्यमानं सर्वमपि पदार्थं स्वसहायभूतान् अन्यानपि प्रच्छाद्य स्वयमप्यन्तर्हितो भवेदित्यर्थः । तदुक्तमुत्पलपरिमलादौ—'रात्रौ कृष्णचतुर्दश्यां श्मशानान्तः शिवालये । बलिनाऽन्योपहारेण कुर्यादर्चनमुत्तमम् ॥ ततो दीपोज्ज्वलीतैलैः वर्तिः स्यादर्क-तन्तुभिः । प्रज्वाल्य नृकपाले तु तत्पात्रे धृतकज्जलम् । अञ्जयेन्नेत्रयुगलं देवैरपि न दृश्यते' इति । एवं कामरतोऽपि 'अर्कशाल्मलिकार्पासपट्टपादाब्जतन्तुभिः । पञ्चभिर्वर्तिकाभिश्च नृकपालेषु पञ्चभिः । नरतैलेन दीपाः स्युः कज्जलं नृकपालतः । ग्राहयेत् पञ्चभिर्यत्नात् पूर्ववच्च शिवालये । पञ्चस्थानीयजातं तु एकीकुर्यात्ततः पुनः । मन्त्रयित्वाऽञ्जयेन्नेत्रे अदृश्यो भवति क्षणात्' इति ॥

(11) एवं स्नातकपरोऽपि । तदुक्तम् , 'नेक्षेतोद्यन्तमादित्यं नास्तं यन्तं कदाचन । नोपरक्तं न वारिस्थं न मध्यं नभसो गतम्' इति व्रतविशेषनिष्ठस्यायं नियमः । **सत्पथे छादयन् मित्रमपि व्याळ-स्तमोमय** इत्युपरागसमये सूर्यं छादयन् राहूरूपः सर्पो विवक्षितः । **जगतामतीतपर्वा भवेत्** । यावदित्यध्याहारः । यावत् पर्वकालमतिक्रामेत् तावददृश्यः अदृश्यत्वसङ्कल्पविषयः । 'उपरक्तसूर्यः तादृशोपरागमोचनावधि न प्रेक्षणीयः इत्यर्थः । अत्र नञः पर्युदासार्थकतायाः चतुर्थाध्यायस्थापिततया नात्र ईक्षणप्रतिषेधो विवक्षितः । किन्तु अनीक्षणसङ्कल्पः । अत एव दृश्यो न भवेदित्यनुक्तम् । स्नातकस्य उपरक्तसूर्यः अदृश्य इत्यस्य अदृश्यत्वं स्नातकाभिमतमित्यर्थः । यथा, 'मीमांसकस्य वायुः प्रत्यक्षः' इत्यत्र वायुनिष्ठप्रत्यक्षता मीमांसकाभिमता इत्यर्थः, तद्वदित्यवधेयम् ॥

(12) एवं दरिद्रपरोऽपि कश्चिदर्थः । दरिद्रस्तु अर्थलोभात् अज्ञानपरः सदा क्रूरहृदयः मित्रेभ्योऽपि द्रुह्यति । उक्तं हि शान्तिपर्वणि हंससाध्यसंवादे, 'केनायमावृतो लोकः केन वा न प्रकाशते । केन त्यजति मित्राणि केन स्वर्गं न गच्छति' इति प्रश्नस्य हंसवाक्येनोत्तरम् , 'अज्ञानेनावृतो लोकः मात्सर्यान्न प्रकाशते । लोभात् त्यजति मित्राणि सङ्गात् स्वर्गं न गच्छति' इति । कथयन्ति चान्ये—

स्वजनोऽपि दरिद्राणां तत्क्षणात् दुर्जनायते ।' 'दारिद्र्यात् पुरुषस्य बान्धवजनो वाक्ये न सन्तिष्ठते सुस्निग्धा विमुखीभवन्ति सुहृदः, स्फारीभवन्त्यापदः ।', 'तदास्य मित्राण्यपि यान्त्यमित्रतां चिरानुरक्तोऽपि विरज्यते जनः' इति । तदयमर्थः—सन्मार्गे स्थितं मित्रमपि त्यजन् अज्ञानप्रचुरः कश्चनार्थलोभदुष्टः शठः **अतीतपर्वा** अर्थाभावात् परित्यक्तकल्याणः । 'क्षणः पर्व च कल्याणम्' इति वैजयन्ती । **जगतामदृश्यो भवेत्**—'दारिद्र्याय नमस्तुभ्यं सिद्धोऽहं त्वत्प्रसादतः । पश्याम्यहं जगत् सर्वं न मां पश्यति कश्चन' इत्युक्तरीत्या सर्वेषां पुरःस्थितोऽप्ययं न दृष्टिगोचरीभवतीत्यर्थः ॥

(13) एवं सत्पुरुषक्रोधतमोविषयतयाऽऽप्यर्थ उन्नेयः । 'कः क्रोधोद्भवमुत्सहेत तरितुं कल्पान्तकादम्बिनीकालोद्वेलकलिन्दशैलतनयाकल्लोलकाळं तमः' इत्युक्तं महापुरुषस्यापि कदाचिदाविर्भवत् कोपावेशप्रयुक्तं तम इह तमोमयो व्याळ उच्यते । व्याळशब्दो दुष्टवचनोऽपि भावप्रधानतया अत्र दोषपरः । स च सत्पथे स्थितमपि गुर्वादिकं मित्रमपि **छादयन्** तिरस्कुर्वन् ' क्रुद्धः पापं न कुर्यात् कः क्रुद्धो हन्यात् गुरूनपि', 'निर्धूतनिम्नोन्नतम् ' इत्याद्युक्तेः । **अतीतपर्वा**—तादृशकोपकालातिक्रमे सति जगतामदृश्यो भवेत् । तत्क्षण एव विनष्टत्वात् सकलजगत्समक्षमेवानुशयवान् कोपं त्यजति सत्पुरुष इत्यर्थः ॥

(14) एवं श्रीरामपरा अप्यर्थविशेषाः । तथा हि । (क) **सत्पथे** अरण्यगमनार्थं पौरजनैः सह प्रयाणसमये मध्येमार्गं **मित्रमपि** स्वसहायभूतं सुहृद्वर्गमपि । उक्तं हि—'निवर्तितेऽपि च बलात् सुहृद्वर्गे च राजनि । नैव ते सन्न्यवर्तन्त रामस्यानुगता रथम्' इति ॥ **छादयन्** तादृशमार्गमध्ये प्रसुप्तिसमये वञ्चयन् । तदपि चोक्तम्—'मोहनार्थं तु पौराणां सूतं रामोऽब्रवीद्वचः । उदङ्मुखः प्रयाहि त्वं रथमास्थाय सारथे ॥ मुहूर्तं त्वरितं गत्वा निवर्तय रथं पुनः । यथा न विद्युः पौरा मां तथा कुरु समाहितः ॥' इति । **तमोमयः**—शोकान्धकारप्रचुरः **व्याळः**—नैकृतिकः । तत्समये वञ्चनमार्गे प्रवृत्तत्वात् । **सहसा अतीतपर्वा** तत्क्षण एव तमसानदीसीमामतिलङ्घ्य, **जगतां** पौरवर्गाणां **अदृश्यो भवेत्** सर्वत्रान्वेषणेऽपि अनुपलभ्य एव भवेत् ॥

एवमन्यविधोऽपि कश्चिदर्थः (ख) **सत्पथे** साधुमार्गे स्थितमिति शेषः । **मित्रमपि** सर्वावस्थासु सहायभूतमपि सीतारूपं वस्तु **छादयन्** कस्यचित् पौरजनस्य वाक्यमात्रात् तिरस्कुर्वन् । परित्यजन्नित्यर्थः । यद्वा—**सत्पथेच्छात्** साधुमार्गनिरतात् जनकराजात् **मित्रं** मित्रत्वेन **अयन्** प्राप्नुवन्नपि । यद्वा—**अच्छात्** निर्मलात् जनकात् **सत्पथे** धर्ममार्गे **मित्रं** सहायत्वेन **अयन्** स्वीकुर्वन्नपि 'इयं सीता मम सुता सहधर्मचरी तव' इति सहधर्मचारिणीत्वेन तां गृह्णन्नपीत्यर्थः । **तमोमयः** कस्यचिद्रजकस्य वाक्यश्रवणमात्रेणाज्ञानप्रचुरः । वस्तुतः सर्वज्ञस्यापि अभिनयार्थमज्ञानारोपान्न दोषः । अत एव **व्याळः**—दुष्टकार्यनिरतः **अतीतपर्वा**—सम्पूर्णगर्भसमये अरण्यमध्ये त्यागात् लोकसीमामतिक्रान्तः **जगतामदृश्यो भवेत्**—लोकानामरम्यो भवति, दृश्यशब्दस्य रमणीयार्थकत्वात् दर्शनीयो भवतीत्यर्थः । (ग) एवमन्यविधोऽपि—**सत्पथे**-राजद्वारमार्गे अधिकृतं **मित्रमपि** बाल्यात्प्रभृति सुस्निग्धं लक्ष्मणमपि **छादयन्**

कुतश्चित् प्रतिज्ञाभङ्गकारणात् अदर्शनं प्रापयन् **व्याळः** तद्विषये क्रूरहृदयः श्रीरामः 'व्यालो भुजङ्गमे क्रूरे दुष्टदन्तिनि' इति विश्वः । **तमोमयः सन्**—सकलभूतमयप्रकृतिविशिष्टः सन् **अतीतपर्वा**—'समयस्ते कृतः सौम्य लोकान् संपरिरक्षितुम् । दशवर्षसहस्राणि दशवर्षशतानि च' इत्युक्तविधिनिर्मितावधिलङ्घने जगतामदृश्यो भवति, अवतारसमाप्तौ निखिलचराचरैः सह सरयूजलमज्जनादिति भावः । **सा**—चिरपरित्यक्ता सीताऽपि **सह भवेत्**—पत्या सहनित्यविभूतिं गच्छेत् । 'रामस्य दक्षिणे पार्श्वे पद्मा श्रीः समुपस्थिता' इत्युक्तेः । 'भवत्यात्मना, पराऽस्य भ्रातृव्यो भवती'त्यत्र भूधातोः भूतिप्राप्त्यर्थकत्ववत् अत्रापि भवेदित्यस्य नित्यभूतिं गच्छेदित्यर्थोऽपि सुगम इति ध्येयम् ॥

(15) अनयैव दिशा श्रीरामानुजपरोऽपि । सत्पथे स्थितं श्रीराममपि छादयन् दुःखाकुर्वन् । उच्यते हि—'कस्यचित्त्वथ कालस्य रामे धर्मपथे स्थिते' इत्यारभ्य 'जहि मां निर्विशङ्कस्त्वं धर्मं वर्धय राघव' इति, 'दुःखेन च सुसन्तप्तः स्मृत्वा तद्घोरदर्शनम् । अवाङ्मुखो दीनमना व्याहर्तुं न शशाक ह' इति च । यद्वा—**सत्पथे अच्छ आदयन्** इति पदच्छेदः । अच्छेत्याभिमुख्ये; 'महिमानमेवास्याच्छयाती'ति श्रौतप्रयोगात् । राजमार्गाभिमुखं यथेष्टान्नं भोजयन् । अर्थात् दुर्वाससमिति गम्यते । लक्ष्मणनिवेदनेन दुर्वाससो महाभोजनप्राप्तेरिति भावः । **मित्रमपि**—बाल्यात्प्रभृति सुस्निग्धोऽपि **व्याळः** शेषावतारभूतः **तमोमयः**—तात्कालिकयुक्तायुक्तज्ञानवान् । स्वयं रामाभिमुखं गमने प्रतिज्ञाभङ्गात् स्वस्य मरणम् ; अगमने दुर्वासश्शापात् कुलहानिः । अत्र विषये युक्तायुक्तमजानन्नित्यर्थः । **अतीतपर्वा सन्**—अन्ततः समयसीमामतिलङ्घयन् सन्—'स मे वध्यः खलु भवेत्', 'वाचं द्वन्द्वसमीरिताम्', 'ऋषेर्मम च सौमित्रे पश्येद्वा शृणुयाच्च यः' इत्युक्तां प्रतिज्ञामतिक्रामन्नित्यर्थः । **सहसा**—तत्क्षणमेव अदृश्यो भवेत् 'विसर्जये त्वां सौमित्रे मा भूत् धर्मविपर्ययः । त्यागो वधो वा विहितः साधूनां तूभयं समम् ॥ अदृश्यं सर्वमनुजैः सशरीरं महाबलम् । प्रगृह्य लक्ष्मणं शक्रस्त्रिदिवं संविवेश ह' इत्युक्त्या सर्वजगतामदृश्यो भवेत् इत्यर्थः ॥

(16) एवं वसुदेवनन्दनश्रीरामानुजपरोऽपि । तथा हि—**सत्पथे**-आकाशे **मित्रमपि**—सूर्यमपि **च्छादयन्**—स्वचक्रेण प्रच्छादयन् अत एव **तमोमयः**—तमसो **मयः** विश्वकर्मा स्रष्टेत्यर्थः । अहश्शेषस्थितावेव तमस्स्रष्टेरिति भावः । **व्याळः** नैकृतिकः । वञ्चनमार्गेण सैन्धवहननादिति भावः । **अतीतपर्वा**—मानुषकलीलोत्सवातिक्रमे स्वयमप्यदृश्यो भवेत् । नित्यविभूतिप्राप्तेः इत्यर्थः । यद्वा—रासक्रीडोत्सवावसाने 'तासां तत्सौभगमदं वीक्ष्य मानं च केशवः । प्रशमाय प्रसादाय तत्रैवान्तरधीयत' इत्युक्तमन्तर्धानं विवक्षितम् ॥

(17) एवं युधिष्ठिरपरोऽपि । **सत्पथे मित्रमपि** स्वर्गारोहणार्थं महाप्रस्थानमार्गे प्रतीतिमन्तमपि । **छादयन्** नरकमार्गगमनसमये तस्य बुद्धिप्रमोषमुत्पादयन् **तमोमयः**—अन्धकारप्रचुरः **व्याळः**—अतिक्रूरो नरकप्रदेशः । उक्तं हि महाभारते—'अग्रतो देवदूतस्तु ययौ राजा च पृष्ठतः । पन्थानमशुभं

दुर्गं सेवितं पापकर्मभिः ॥ तमसा संवृतं घोरं केशशैवलशाड्वलम् ।' इत्यारभ्य 'स तत्कुणपदुर्गन्धमशिवं लोमहर्षणम् । जगाम राजा धर्मात्मा मध्ये बहु विचिन्तयन् । युधिष्ठिरस्तु निर्विण्णस्तेन गन्धेन मूर्च्छितः ॥ इति । **अतीतपर्वा** तादृशनरकसीमामतिलंघ्य **अदृश्यो भवेत्**—अदर्शनं प्राप्नोति । तदप्युक्तम्, 'देवदूतोऽब्रवीचैनमेतावद्गमनं तव । निवर्तितव्यो हि मया तथाऽस्म्युक्तो दिवौकसैः ॥ तेषु भासुरदेहेषु पुण्याभिजनकर्मसु । समागतेषु देवेषु व्यगमत् तत तमो नृप ॥ नादृश्यन्त च तास्तत्र यातनाः पापकर्मणाम्' इति । उक्तप्रमाणवचने हि तमोऽदृश्यादिशब्दप्रत्यभिज्ञा द्रष्टव्या ॥

(18) एवं रावणपरोऽपि । **तमोमयः**—तमोगुणप्रचुरः कश्चित् **व्याळः**—क्रूरहृदयो रावणः **सत्पथे** लङ्काक्षेमचिन्तनरूपे हिततममार्गे स्थितमिति शेषः । **मित्रमपि** 'हितं न गृह्णन्ति सुहृद्भिरीरितम्' इति सुहृत्त्वेन व्यवहृतं विभीषणमपि **छादयन्** अमित्रत्वारोपेण तदीयसौमनस्यादि-कमाच्छादयन् । उक्तं हि तेन—'वसेत् सह सपत्नेन क्रुद्धेनाशीविषेण वा । न हि मित्रप्रवादेन संवसेच्छत्रुसेविना' इति । अथवा **अच्छ अदयन्**निति च्छेदः । तद्विषये आभिमुख्येन अदयमान इत्यर्थः । 'अनुदात्तङित' इत्यस्यानित्यत्वात् परस्मैपदम् । **अतीतपर्वा सन्**, 'अन्यस्त्वेवंविधं ब्रूयाद्वाक्यमेतन्निशाचर । अस्मिन् मुहूर्ते न भवेत् त्वां तु धिक् कुलपांसनम्' इत्युक्तरीत्या अतिक्रान्तमर्यादं प्रजल्पन्नित्यर्थः । अत एव वक्ष्यते—'भिन्नमर्याद निर्लज्ज चारित्रेष्वनवस्थित' इति । तत्क्षणमेव**ादृश्यो भवेत्** । 'परित्यक्ता मया लङ्का' इत्युक्तवतो विभीषणस्य प्रथममदृश्यः अनन्तरं तरसाचिन्त्येन दाशरथिना समूलघातं निहतत्वात् जगतामदृश्यो भवेदित्यर्थः ॥

(19) एवमुतथ्यवृत्तान्तोऽप्यत्नानुसन्धेयः । तथा हि श्रूयते मोक्षधर्मे—, "स्वपत्न्यामाहितो गर्भ उतथ्येन महात्मना । उतथ्येऽन्तर्हिते चैव कदाचित् देवमायया ॥ बृहस्पतिरथाविन्दत् पत्नीं तस्य महात्मनः । ततो वै तमृषिश्रेष्ठं मैथुनोपगतं तथा ॥ उवाच गर्भः कौन्तेय पञ्चभूतसमन्वितः । पूर्वाग-तोऽहं वरद नार्हस्यम्बां प्रबाधितुम् । एतद्बृहस्पतिः श्रुत्वा चुकोध च शशाप च ॥ मैथुनायागतो यस्मात् त्वयाऽहं विनिवारितः । तस्मादन्धो यास्यसि त्वं मच्छापान्नात्र संशयः । स शापादृषिमुख्यस्य दीर्घं तम उपेयिवान् । स हि दीर्घतमा नाम नाम्नाऽस्यासीदृषिः पुरा' इति । तथा च सत्पथे **मित्रं** उतथ्यतनयं **छादयन् तमोमयः** दीर्घतमोरूपः **व्याळः** बृहस्पतिप्रेरितः अतिक्रूर आन्ध्यविशेषः **अतीतपर्वा** केशव-नामस्मरणेन अतिक्रान्तकालः **सहसा अदृश्यो भवेत्** केशवप्रसादान्निवृत्तो भवेत् । उक्तं हि तत्रैव, 'प्रयोजयामास तदा नाम गुह्यमिदं मम । अनुरूपेण विधिना केशवेति पुनः पुनः । स चक्षुष्मान् समभवत् गौतमश्चाभवत् पुनः ॥' इति ॥

(20) एवं योगिविषयतयाऽपि कश्चिदर्थः । उक्तं हि योगशास्त्रे, "शिखामध्ये दीप्ततेजाः परमात्मा समाहितः । तत् तेजःसूर्यसङ्काशमदृश्यं मांसचक्षुषा । तमसाच्छादितं ह्येतात्' इति । तथा च हृत्पुण्डरीकमध्यवर्तिपरमात्मदर्शननिरोधकः तदाच्छादकः कश्चन तमोविशेषः योगशास्त्रप्रसिद्धः ; स

चेह तमश्शब्दविवक्षितः । स च सत्पथे दहराकाशमार्गे मित्रमपि सूर्यवत् प्रकाशमानं परमात्मानमपि । यद्वा—'दहरकुहरे देवस्तिष्ठन् निषद्वरदीर्घिकानिपतितनिजापत्यादित्सावतीर्णपितृक्रमात्' इत्युक्तक्रमेण निरुपाधिकवात्सल्ययुक्तं भगवन्तमपि छादयन् तिरोदधानः तमोमयः उक्तरूपः अतीतपर्वा यतमानसंज्ञादिरूपयोगपर्वविशेषाद्यतिक्रमे सहसा अदृश्यो भवेत् । 'उद्घाट्य योगकलया हृदयाब्जकोशं धन्यैश्चिरादपि यथारुचि गृह्यमाणः । यः प्रस्फुरत्यविरतं परिपूर्णरूपः' इत्युक्तयोगविधानप्रक्रियया क्रमेण तत्तत्पर्वातिक्रमे किञ्चित्किञ्चिन्मलिनीभूयान्ततः योगनिष्पत्तिसमये निरन्वयं विनश्यति तत्तम इति तच्छास्त्रप्रसिद्धत्वादिति भावः ॥

(ख) अत्र च प्राथमिकार्थस्य मित्रद्रोह्युपालम्भरूपस्यान्वयमुखेन समर्थितस्य व्यतिरेकमुखेनाप्यर्थबोधसौलभ्यं सूपपादम् । तथा हि— सत्पथे स्थितं मित्रं अच्छादयन् व्यालोऽपि क्रूरोऽपि यः पुमान् स्वभावतः क्रूरहृदयोऽपि 'मित्रद्रोहे च पातकम्' इत्यादिवचनपर्यालोचनया मित्रद्रोहमात्रे अप्रवृत्तश्चेदित्यर्थः । तं ओं अयः इति पदच्छेदः । तं प्रति तादृशं पुरुषं प्रति अयः शुभागमः कीदृशः अतीतपर्वा सीमामतिक्रान्तः निःसीमः इत्यर्थः । जगतामदृश्यः जगत्सु कुत्राप्यदृष्टचरः अपरिमितोऽत्यद्भुत इत्यर्थः । शुभाद्याविर्भावः भवेत् तादृशपुरुषस्योत्पद्येतेति ओम् सत्यम् । तथा चान्वयव्यतिरेकाभ्यां मित्रद्रोहतदभावयोः अशुभशुभप्रयोजकता आद्यन्तार्थप्रक्रियावसेयेत्यवधेयम् ।

अत्र च सर्वविशेषणानां विशेष्यस्य च साभिप्रायत्वात् परिकरपरिकराङ्कुरौ । तत्रापि पूर्वविशेषणार्थस्य उत्तरविशेषणार्थसमर्थकत्वात् काव्यलिङ्गम् । प्रस्तुताप्रस्तुतानेकार्थकथनात् प्रस्तुताङ्कुराप्रस्तुतप्रशंसादिकं च परस्परसंसृष्टं यथेष्टं विभावनीयम् ।

इत्थं विंशतिरर्था उक्ताः पद्यस्य चास्य हृद्यस ।
एवंप्राया ज्ञेया बहुधा हि बुधालिभिर्यथास्वमति ॥ ७ ॥

ஸத்பதேச்சாதயந் மித்ரமபி வ்யாளஸ் தமோமய:
அதீதபர்வா ஜகதாம் அத்ருச்யஸ் ஸஹஸா பவேத் (7)

1 நல்வழியில் சினேகிதனாயிருப்பவனை நல்வழியினின்று மறைத்து த்வேஷம் அசூயை முதலிய தமோகுணம் பூண்டவனாய் அத்து மீறி செல்கின்ற துஷ்டன் உடனே மஹான்களுக்கு அல்லது உலகத்திற்கே காணப் பிடிக்காதவனாவான்.

(உரைகாரர் பல உட்பிரிவுகளைப் பிரிக்காமல் அர்த்தங்கள் 20 என்றார். எல்லாம் தனியே பிரிப்பதால் தமிழில் எண்ணிக்கை அதிகமாகும்.)

2 நக்ஷத்ரமார்க்கமான வானத்திலே சூரியனையும் (சந்திரனையும்) பர்வத்தில் மறைக்கின்ற தம என்னப்படும் ராஹுவானவன் பர்வ மென்ற திதி அதாவது அமாவாஸ்யையும் பூர்ணிமையும் சென்ற பிறகு உலகம் காணும்படியிரான்.

3 மூலப்ரக்ருதி யென்ற தமஸ்ஸானது (தன் அபிவிருத்திக்கு—ப்ர பஞ்சமாய்தான் செழிப்பதற்குத்) துணையான ஜீவனை நல்வழியினின்று மறைக்கின்றதானாலும் ஜீவனுடைய துரத்ருஷ்டத்தோடு சேர்ந்திருக்கை யாம் நிலையைக் கடந்துவிட்டால் ஜீவனுக்குக் காணக்கூடியதாய் போக்யமாயிராது. (अतीतपर्वा-जीवदुरदृष्टरूपसहायसंपत्त्यतिक्रमे सति अदृश्यः—पूर्ववत् सुभोग्यो न भवेत्)

4 ஸத்பதேச்சாத்-அயன் என்று பிரிப்பது. அத்ருச்ய என்பதில் 'அ' என்பதற்கு விஷ்ணு என்று பொருளாம். ஆக நல்வழியில் நடத்த விருப்பமுடைய ஆசார்யனாலும் பகவானாலும் ஸூர்யமண்டலம் செல் வானாகும் ஜீவன் இதற்கு முன் இருள்சூழ்ந்தவனானாலும் உலகங்களுக் கெல்லாம் முடிவான ப்ரக்ருதியையும் கடந்து விரைந்து (வைகுண்டம் சென்று) 'அ' என்ற விஷ்ணுவையே தனக்கு எப்போதும் காணும் பொருளாகக் கொள்வான்.

5 தமோமய: என்று மூலப்ரக்ருதியைக் கொண்டதுபோல் மோஹம் முதலான துர்குணத்தையும் கொள்ளலாம். அதற்கும் மித்ரன் ஜீவன். தகப்பனனபடியாலே, பர்வ என்பது பகவல்லீலை. அதனைக் கடந்தால்— பகவான் லீலையை நிறுத்தி தயைபுரிந்தால் மோஹாதிகள் காணவாகா.

6 ஸத் என்ற ப்ரம்மத்தை மறைக்கின்ற அஜ்ஞானமென்ற இருளானது, தத்துவஜ்ஞானத்திற்குத் தடையான தருணத்தைக் கடந் தால்—தத்துவஜ்ஞானமுண்டானால் முழுதும் மாயும் என்று அத்வைத மதத்தைத் தழுவியும் பொருளாம்.

7 வானரங்களுக்கு வழியைக் கூறும் ஸுக்ரீவன் சொல்லுகிறான்— இதற்கு மேல் ஸூர்யனில்லை. வழியை மறைக்கும் ஒரே இருள். உலக ஸஞ்சார எல்லையைக் கடந்த இடம் யாரும் காண ஆகாதென்று. அந்த இடத்தை இங்கு அவ்வாறு சொல்வதாம்.

8 மார்கழி மாதமாம் தக்ஷிணாயன முடிவில் சூரியன் தென்கோடியி லிருப்பதால் வடக்கில் கடையிடமானது இருண்டுகாணப்படாமலிருக் கும். அந்த இடத்தை இங்கு வர்ணித்ததாம்.

9 வ்யாளம்—யானை. மதயானை ராஜவீதியில் பாகனையும் தடுத்து அடக்கும் நிலைமையைக் கடந்த போது யாரும் காண எதிரில் நிற்க வாகாது.

10 காட்டிலுள்ள சில துஷ்டம்ருகம் இருளில் ஸஞ்சாரம் செய்கின் றனவாய் ஜனங்கள் திரியும் வழியில் மறித்து நிற்கும் அடித்து உண்பதற்

காக. ஸூர்யோதயம் வந்து, இருள் நீங்கினால் யாருக்கும் தெரியாதபடி மறையும். [मित्रम्—प्राणिहिं सामकुर्वन्तमपि छादयन्]

11 இந்த்ரஜால வித்யை யறிபவன் க்ருஷ்ணபக்ஷ சதுர்தசியில் கண்ணை மறைக்கும் மை செய்யச் செல்லுகிறவன் சில முத்ரைகளாலே தன் சினேகிதனையும் பிறர் காணாதபடி செய்து கொண்டு சிறு பொழுது சென்ற பிறகு தானும் காணாதபடியாவான்.

12 ப்ரம்மசர்யத்தை முடித்து வ்ரதம் செய்தவன் ஸ்நாதகனாவான். அவனுக்கு பர்வத்தின் முடிவில் ஸூர்யாதிகளை மறைக்கும் ராகு காணக் கூடாதவன். அப்படிக்கு வ்ரதமாகும். अतीतेत्यस्य अत्येतुमुपक्रान्तेत्यर्थः । आदिकर्मणिक्तः க்ரஹண காலத்தில் அமாவாஸ்யையின் முடிவிலிருக்கும் ராகு என்றபடி.

13 தரித்ரன்—ஏழ்மையால் வருந்துகிறவன் நல்வழியில் சினேகிதனானவனையும் தூஷிப்பான், துஷ்டனாவான். அறிவு கெடும். ஒழுக்கம் மீறுவான். ஏழையானதால் அருகிலிருப்பவருக்கும் கண்ணுக்கு இலக்காகமாட்டான், அலக்ஷ்யமாயிடுவான்.

14 மிக்க கோபமுடையவனின் கோப இருள் சினேகமுள்ள ஆசார்யாதிகளையும் திரஸ்காரம் செய்யும். கோபம் கழிந்த பிறகு காணப் படாது. அவன் இவனுக்கா கோபம் இருந்ததென்னலாம்படியாவான்.

15 இராமன், காட்டிற்குப் போம் போது பின் தொடர்ந்த மித்ரர்களான பட்டணத்து ஜனங்களை நடுவழியில் நிறுத்துபவனாய்—போக வேண்டிய வழியை விட்டு வேறு வழியாகத் தேரைப் போகச் செய்து யாரும் காணாதபடி மறைந்தான்—व्याल इति भगवन्नाम । अहः संवत्सरो व्याल इति नामसहस्रे ।

16 ராமன் நற்செயல்களிலே தனக்கு ஸஹதர்மசாரிணியாய்த் துணையான ஸீதையை, ஸத்பதேச்சாத்-நல்வழியையே ஆசைப்படுகின்ற அல்லது அச்சாத்—மிகவும் சுத்தரான ஜனகரிடத்தினின்று அயந்அபி—அடைந்திருந்தும்—தமோமய:—யாரோ ஏதோ சொன்னானென்று இருளுக்கு இடமாகி, அதீத பர்வா-தருணம் தெரியாமல், கரு தரித்திருந்த சீதையைக் காட்டிலே விட்டான். இதனால் மஹான்களுக்கு அத்ருச்ய:—நன்கு காணப் பிடிக்காதவனாயிருந்திருப்பான். [ஆனால் सह सा அவனுடனே அவளிருப்பாள். லக்ஷ்மி பிரியாள்]

17 ராமன் தன் சினேகிதனான லக்ஷ்மணனை முன்னே மறைத்துக் விட்டு, தமோமய:—அயோத்தியிலிருந்த ப்ராக்ரத சராசரங்கள் முற்றவும் சேர்த்துக் கொண்டு 11ஆயிரம் வருஷம் முடிந்தவுடன் காணாதபடி மறைந்தான். தமஸ்—ப்ரக்ருதி.

18 வ்யாளம்—ஸர்ப்பம்—ஆதிசேஷனான லக்ஷ்மணன் நல்வழியில் எல்லாரையும் அச்ச—எதிர்முகமாக ஆதயந் அனுபவிக்கச் செய்கிறவன் ராமனுக்கு மித்ரன், முடிவில் துர்வாஸஸ்ஸு வந்த போது தமோமய:—

திகைத்தவனுய் ராமனின் ஆஜ்ஞையைக் கடந்தவனுய் ராமனை விட்டுக் காணுதபடியானுன் (ரா—2.) ஸத்பதே—அச்ச—ஆதயந் எனப்பிரிக்க.

19 க்ருஷ்ணன் பாரதப் போரிலே நக்ஷத்ரபதமான வானத்திலிருந்த சூரியனைத் திருவாழியால் மறைத்து இருளையும் படைத்தான். அவன் எப்போதுமே சமயம் தவறினுல் காணவாகான். எளிதிற் காணவாகாதவன்.

20 தர்மபுத்ரர் ஸ்வர்க்கம் போம் போது நல்வழி செல்லும் அவரையும் மறைத்து இருள் சூழ்ந்த நரகம் எதிரில் இருந்தது. சிறிது போதுக்குப் பிறகு மறைந்தது.

21 ராவணன் அஜ்ஞானம் மிக்கானுய் தனக்கு மித்ரனுன விபீஷணனை மறைத்தான். வரம்பு கடந்து பேசினுன். உடனே தானே யாரும் காணுதபடி மாண்டான்.

22 உதத்யர் என்ற ரிஷியினிடம் அவர் மனைவி கர்ப்பம் தரித்திருந்தாள். உதத்யர் இல்லாத போது அவளைப் புணர ப்ருஹஸ்பதி அண்டினுர். கருவிலிருந்த சிசு பேசிற்று, நான் இருக்கிறேன், நெருங்க வேண்டா என்று. உடனே நீண்ட இருள் உனக்கு என்று ப்ருஹஸ்பதி சிசுவை சபித்தார். அதனுல் அது தீர்க்கதமஸ் என்ற ரிஷியாயிற்று. கேசவ நாமத்தை நினைத்து வந்ததால் இருள் அகன்றது. கண் பெற்ருர். இதன்படி இருளானது சிசுவை மறைத்து எல்லை கடந்தவுடன் காணுதபடியொழிந்ததென்ற பொருளாம்.

23 ஜீவனுக்குள்ள இருளானது ஹ்ருதயாகாசத்திலே ஜீவனிடம் அன்பனுய் சூரியனைப் போல் விளங்கும் அந்தர்யாமியையும் மறைக்கின்றது. யோகசாஸ்திரத்தின்படி யோகம் தலைக்கட்டின போது போயிடும்.

24 ஸத்பதே அச்சாதயந்...தம் ஓம் அய: என்று பிரிக்கலாம். க்ரூரனுயிருந்தாலும் நன் மார்க்க விஷயத்திலே மித்ரனை மறைக்காதவன் மித்ரனுவான். அவனைக் குறித்து அய:—நன்மை தரும் புண்யமானது அளவு மீறினதாய் எங்கும் காணுததுமாய்க் கிட்டும். ஓம்—இது உண்மையெனவும் பொருளாம். (7)

उक्तश्लोकेन मित्रद्रोहिण उपालब्धाः ; तथैव केचित् ग्रामजनपदादिनिर्वाहकाः सुदुष्करकार्यनिर्वर्तनसमर्था अपि स्वाधिकारदर्पाद्विशात् प्रशान्तगम्भीरान् साधुकारिणः सुमतीन् अवजानन्तस्तदीयकार्यादिकं प्रतिघ्नन्ति । अतस्तेषामपन्यायनिवारणमवश्यकर्तव्यमित्याह **धुर्याणामिति** ।

धुर्याणामपि सत्कार्यगुणशालिविमर्दिनाम् ।
अनागमविदां युक्तमपनीतेर्निवारणम् ॥ ८ ॥

धुर्याणामपि निर्वाहकाणामपि । एतेन समुदायकार्यश्रद्धादिगुणयोगः सूचितः । **अपिशब्दः** साधुविरोधाचरणे उक्तगुणानामकिञ्चित्करत्वं सूचयति । **सत्कार्यगुणशालिविमर्दिनां—सत्कार्याः** साधुकार्यनिरताः । बहुव्रीहिः । शास्त्रीयकर्मानुष्ठानपरा इति यावत् । **गुणशालिनः** आत्मगुणपरिपूर्णाः ।

एतेन आचारात्मगुणेत्युक्ताधिकारिवैशिष्ट्यमुक्तं भवति । तान् विमर्दयन्ति तदीयकार्यविरोधाद्युपद्रवमाचरन्तीति तथोक्तानाम् । स्वाधिकारदर्पात् साधुजनबाधां कुर्वन्ति चेदित्यर्थः । **अनागमविदां** श्रुतिस्मृत्यादिकमविदुषाम् । यद्वा—श्रुत्यादिबोधितमागामिफलमजानताम् । नरकाद्यागमज्ञानशून्यानामिति यावत् । **अपनीतेः** अपन्यायस्य निवारणं युक्तम् । महाजनैः शास्त्रबाधादिकमुपदिश्य तदीयकुमतिनिवर्तनं कर्तव्यमित्यर्थः । तद्वार्तामप्यविगणय्य पुनश्चाकार्यप्रवृत्ताश्चेत्, **तेषामपनीतेः** अपनयनात् । अधिकारबहिष्कारादित्यर्थः । **निवारणं** उपद्रवनिवर्तनं **युक्तम्** । अधिकारदर्पस्यैव साधुविरोधाचरणबुद्धिहेतुत्वादिति भावः । अनन्तरमान्तरद्वेषानपगमेऽपि न कार्यहानिपर्यन्तता तस्येत्यवधेयम् ॥

(2) एवं कडंगरीयपरतयाऽप्यपरोऽर्थः । तथा हि—धुरं वहन्तीति **धुर्याः** । तेषां शकटादिनियुक्तौ भूयस्तरभारवहनसमर्थानामपीत्यर्थः । **सत्कार्यगुणशालिविमर्दिनाम्**—कार्यं फलभूतव्रीह्यादिकम्; तस्य गुणः गुणनम् आधिक्यम्; **सन्** पुष्कलः कार्यगुणः येषां ते; पुष्कलव्रीह्यादिसमृद्धा इत्यर्थः; तथाविधाः ये **शालयः** शाल्याख्यसस्यानि तान् **विमर्दयन्ति** सम्यक् भक्षणेन विनाशयन्तीति तथोक्तानाम् । **अनागमविदां** यथेच्छभक्षणेऽपि तृप्तिविरहात् पुनश्चागमनमलभमानानाम् । विदिर लाभ इत्यस्मात्क्विप् । **अपनीतेः** अपनयनात्—तादृशक्षेत्रप्रदेशादन्यत्रापनयनेन हेतुना निवारणं तादृशसस्यभक्षणान्निवर्तनं **युक्तं** अवश्यकर्तव्यम् । यद्वा—**अपनीतेः** सस्यभक्षादिरूपान्याय्याचरणाद्धेतोः **निवारणं** गतिप्रतिबन्धः पश्वादिकारागृहे प्रवेशनमित्यर्थः । **युक्तम्** । पुनश्च तेषां तत्स्वामिनां च समीचीनबुद्ध्युत्पादाय किञ्चिदुपद्रवोऽपि तेषां युक्त एवेत्यर्थः । अनेन प्रस्तुतार्थे कार्यनिर्वाहकाणामपि लोकविरोधप्रवृत्तानामुपद्रवकरणमपि न दोषायेत्यर्थोऽपि निदर्शितः ।

एवमत्र काणादवादपरतयाऽपि कश्चिदर्थविशेषः । तथा हि—धुर्याणामपि पदार्थनिरूपण-लक्षण-परिष्करण-प्रमाणादिसंव्यवहार-शाब्दबोधप्रक्रियादिषु मतान्तरस्थापेक्षया परिबृढतमानामपि । उक्तं हि न्यायसिद्धाञ्जने—"अक्लिष्टत्वेऽपि पक्षाणां नैयायिकादिमतमेव साधीयः । वाचां परिगृहीतानां यूपादित्यैक्यवाक्यवत् । व्याहतार्थाभिधायित्वात् वरं क्लिष्टार्थकल्पना" इति । **सत्कार्यगुणशालिविमर्दिनां** सदेव कार्यमिति वा, सच्च तत् कार्यमिति वा सद्रूपकार्यमित्यर्थः । कपालादिरूपेण विद्यमानस्यैव घटस्योत्पत्तिः; न त्वपूर्वस्य कस्यचिदिति कार्योपादानाभेदाङ्गीकरणादिति भावः । तच्च गुणशालि । रूपरसादिस्वाभाविकगुणविशिष्टम्; न तूत्पत्तिक्षणे सर्वगुणशून्यमित्यर्थः । सर्वत्र कर्मधारयः । तस्य विमर्दिनः तिराकरणशीलाः तेषाम् । सत्कार्यवादं सार्वदिकसगुणत्वादिकं च वेदान्त्युक्तमनभ्युपगम्य कपालादिभ्योऽपूर्वस्य घटादेरुत्पत्तिम् तस्य स्वीयगुणादिकं प्रति उपादानत्वसिद्धये, 'उत्पन्नं द्रव्यं क्षणमगुणं तिष्ठति' इत्यगुणत्वं चाभ्युपगच्छतामित्यर्थः । **अनागमविदां** प्रत्यक्षतः सत्कार्यवादविषायकश्रुतिवाक्यस्य तदर्थस्य वाऽनभिज्ञानाम्, प्रत्यक्षविरोधवदागमविरोधस्याप्युद्भावने परिहारकथनस्याशक्यत्वादित्यभिप्रायः । श्रूयते हि छान्दोग्ये—'सोम्येदमग्र आसीत्' इत्यारभ्य 'यथा सोम्यैकेन मृत्पिण्डेन

सर्वं मृण्मयं विज्ञातं स्यात् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्, 'तद्धैक आहुरसदेवेदमग्र आसीदिति। कथमसतः सज्जायेत? सत्त्वेव सोम्येदमग्र आसीत्' इत्यन्तैः शङ्कासमाधानपूर्वकं सत्कार्यवादसिद्धान्तकरणम्। **अपनीतेः** तादृशापन्यायस्य असत्कार्यवादसाधककुतर्कस्येत्यर्थः। **निवारणं** आगमबोधप्रदर्शनेनानुन्मेषकरणं **युक्तं** न्याय्यम्। उक्तं हि—'बाधादिभिः स्वमतहेतुगणे निरस्ते' इति। नरशिरःकपालशुचित्वानुमानादेरागमबाधोद्भावनेनैव तैरपि परिहरणादिति भावः। बहुशः प्रामाणिकमार्ग एव पर्यटन्तो हि नैयायिकाः असत्कार्यवादादिकतिपयविषयेषु केवलकुतर्कमाश्रयन्तः प्रमाद्यन्तीति पर्यवसितार्थः। उक्तं हि सङ्कल्पसूर्योदये—'असदुद्रव्यसृष्टिप्रभृत्यर्थक्लृप्त्या श्रुतिप्रक्रियाणामधिक्षेपतश्च। उलूकोपदेशापदेशप्रवृत्तः कथं शोषितोऽसौ कणादप्रणादः॥' इति।

(4) एवं कृष्णमिश्रादिदुर्वादिपरतयाऽपि कश्चिदर्थः। ते हि पञ्चरात्राप्रामाण्यसमर्थनेन श्रीरङ्गक्षेत्रे भगवत्समाराधनादिविरोधनप्रवृत्ताः ग्रन्थकारैः पराजिता इति सुप्रसिद्धमेवेदम् इदमीयमाहात्म्यवेदिनाम्। तदेवात्र विविच्यते। **धुर्याणामपि** सामान्यशास्त्रेषु परिश्रमशालिनामपि। **सत्कार्यगुणशालिविमर्दिनाम्।** सच्छब्दः सच्छास्त्राख्यश्रीपाञ्चरात्रघटकीभूतागमसिद्धान्तपरः। 'सदागमादिसिद्धान्तचतुष्के सत्फलप्रदे', 'आगमाख्यं हि सिद्धान्तं सन्मोक्षैकफलप्रदम्' इत्यादिश्रीपाद्मसंहितावचनात्। तस्य **कार्यभूतः** तद्विहितः कर्षणादिप्रतिष्ठान्तकार्यनिष्पाद्य इत्यर्थः। यो **गुणशाली** षाड्गुण्यपरिपूर्णः सौलभ्यादिगुणपूर्णो वा अर्चावतारगणः, तस्य **विमर्दिनां** तादृशविग्रहार्चनादिव्यापारमुपरुन्धताम् **अनागमविदां** आगमशब्दितश्रीपाञ्चरात्रस्वरूपानभिज्ञानाम् आगमादिसिद्धान्तचतुष्कस्वरूपानभिज्ञानां वा, **अपनीतेः** तदप्रामाण्यसाधकदुस्तर्कस्य **निवारणम्** श्रीमन्महाभारतादिप्रमाणगणप्रदर्शनेन वेदविरोधभ्रमपरिहरणेन च सार्वत्रिकतत्प्रामाण्यसमर्थनेन निरसनं **युक्तं** आवश्यकमित्यर्थः। यद्वा—**सत्** परवासुदेवाख्यं परं ब्रह्म, तस्य **कार्यभूतः** व्यूहविभवार्चादिः पररूपादाविर्भावस्य तच्छास्त्रप्रतिपादनात्। तादृशो यो गुणशालीत्यादिकं पूर्ववत्।

एवं सच्च कार्यं च गुणशालि चेति कर्मधारयाश्रयणात् ब्रह्मणोऽसत्त्वं वदन्तो माध्यमिकाः, अकार्यत्वमाचक्षाणाः काणादाः, निर्गुणत्वं गृणन्तः शाङ्कराश्च निरस्ता वेदितव्याः।

(5) एवं हरदत्तादिदुर्दान्तपरतयाऽपि कश्चिदर्थः। अत्र केचिदनधिगतश्रुत्यक्षरगन्धाः केवलवैयाकरणाः वैयात्यमात्रात् पुरुषोत्तमशब्दस्य भगवदसाधारणस्य केवलरूढत्वं ब्रुवते॥ 'न चापि वेदेषु समामनामः, रूढ्या तु कामं पुरुषोत्तमोऽस्तु' इति। तान् प्रतिक्षिपति **धुर्याणामिति।** पाणिनितन्त्रनिर्वाहकाणामपीत्यर्थः। **सत्कार्यगुणशालिविमर्दिनां।** सत् कार्यं व्याकरणविहितकृत्यं यस्य सः। प्रातिपदिकद्वयसंमेळनजनितसमासकार्यभाक्। स च पुरुषोत्तमशब्दः। अनेन केवलरूढत्वं नास्तीति फलितम्। तथात्वे हि व्याकरणविहितकार्याभावात्। अतएव **गुणशाली**—समासदशायां प्राप्तगुणकः। केवलरूढत्वे हि आद्गुणः इति शास्त्रप्रवृत्त्यधीनगुणप्राप्त्यसम्भवादिति भावः। तथा च अकारोकारयोः सन्धिवशात् ओकाररूपगुणशाली पुरुषोत्तमशब्दः तं विमर्दयतां—केवल-

रूढत्वाख्यानेन व्याकरणशास्त्राप्रवेशात् यौगिकत्वं निरुन्धताम्, **अनागमविदां** 'अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः' इति सर्वज्ञेन भगवता गीतं तद्दृष्टं वेदभागमनधीयानानां अल्पश्रुतानाम् **अपनीतेः** पञ्चम्यादिसमासानुपपत्तिसमर्थनरूपस्यापन्यायस्य **निवारणं** समुचितसमाधानकथनेन निवर्तनं युक्तम्। अयं भावः—किं समासानुपपत्तिमात्रात् केवलरूढत्वमुच्यते। उत प्रमाणान्तरात्। अन्त्यं चानुपलम्भनिरस्तम्। आद्ये च निरुक्तानुरोधेनैव व्याकरणादीनां नेयत्वेन तद्विषये तेषामसाम्राज्यमेव प्राज्यं समाधानम्। वस्तुतो न व्याकरणविरोधगन्धोऽपि। तात्परस्तपर इति विग्रहकरणेन पञ्चमीति योगविभागस्यावश्याश्रयणीयतया पञ्चमीसमासस्य निर्बाधत्वात्। 'न निर्धारणे' इति निषेधस्य षष्ठीमात्रविषयतायाः सुवचत्वेन सप्तमीसमासस्याप्यबाधत्वात्। 'स उत्तमः पुरुषः' इति वेदनिरुक्तानुरोधेन कर्मधारयस्याप्यवश्यवक्तव्यत्वात्। 'अधिगत्य जगत्यधीश्वरादथ मुक्तिं पुरुषोत्तमात् ततः' इति महाकविप्रयोगसद्भावात्, नागोत्तमादिशब्दानामेवमेव शब्दविद्भिर्निर्वहणाच्च निरसनीयः स जाल्म इति।

(6) एवमत्र महादृप्तरावणभुजव्यूहविषयतयाऽपि कश्चिदर्थः। **धुर्याणामपि** कैलासगिरिकूटविलोडन-दिग्दन्तिदन्तादन्तिविधान-राज्यभारवहनादिव्यापारधुरन्धराणामपि। **सत्कार्याः** सत्कारयोग्याः पूजार्हा इति यावत्। ये गुणाः परोपकारादयः तैः **शाली** प्रकाशमानः यो **विः** पक्षी जटायुः तं मर्दयन्ति पीडयन्तीति तथोक्तानाम्। **अनागमविदां।** आगमशब्द आगामिपरः। भाव्यनर्थानभिज्ञानामित्यर्थः। आपदागमनसमय एव तद्ज्ञानमाविर्भवति मूढानामिति भावः। यदुक्तं रावणेन—'स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः' इति। 'भुजनिवहविहङ्गिकावलम्बी विपुलगुणौघधृतोऽपि राज्यभारः। स्वयमिह दशकन्धरे धुरीणे स्खलति यदि स्खलितं तदास्य रूपम्' इति च निर्विद्यतेऽनर्घराघवे रावणेन। तादृशभुजानां **अपनीतेः** अपनयनात् देहाद्विभज्य पृथक्करणादित्यर्थः। **निवारणं** जटायुपक्षच्छेदप्रतीकारकरणं **युक्तं** आवश्यकम्। अन्यविधापराधानां कथञ्चित् क्षमासम्भवेऽपि असह्यतमजटायुपक्षच्छेदनापराधशालिनां दशवदनबाहुव्यूहानां युगपन्निकृत्य पातनस्यैवात्यन्तावश्यकत्वादिति भावः। क्रमेणैकैकभुजच्छेदे हि शिष्टभुजेषु कृत्तभुजवीर्यसंक्रमस्योक्ततया युगपन्निकर्तनमेव युक्तमिति भावः। उच्यते हि–'योयः कृत्तो दशमुखभुजस्तस्यतस्यैव वीर्यं लब्ध्वा दृप्यन्त्यधिकमधिकं बाहवः शिष्यमाणाः' इति। अस्य च विपक्षपक्षाघातिनो विपक्षपक्षिणो दिव्यदम्पतिभ्यामतिप्रेमपरवशमालिङ्गनेऽपि, अनवधिकातिशयोत्कर्षशालिसकलपुण्यलोकनिकरविश्राणनेऽपि, तदीयपक्षकर्तनप्रायश्चित्ततया विंशतिबाहुबाहुव्यूहानां युगपदेव वज्रनिर्भिण्णपर्वतकूटकोटिवत् समूलच्छेदं निपातनेऽपि, न सह्यत एवायं जटायुप्रायणमहादुःखजलधिर्दयानिधिना। यतोऽयं राज्याभिषेकजनितमहाप्रमोदभारानुभवदशायामपि 'विज्वरः प्रमुमोद ह' इति जटायुविषयकज्वरयुक्त एवास्तेति श्रूयते श्रीरामायणे। अतो नात्र क्षमा कार्येति भावः।

(7) यद्वा कार्तवीर्यभुजनिवहपरतयाऽप्यर्थबोध उन्नेयः। तस्यापि अतिदृप्तत्वेन पद्धतिसङ्गतेः सुलभत्वात्। तथा हि-**धुर्याणामपि** नर्मदाऽम्भस्स्तम्भनदशकन्धरबन्धनाद्युद्दण्डशौण्डीर्यमण्डितानामपि। यद्वा

समुद्रजलजन्तुजातसंक्षोभदक्षनाराचविन्यासतदभयप्रदानादिचतुराणामपि । तथाह्युक्तमाश्वमेधिकपर्वणि— 'कार्तवीर्यार्जुनो नाम राजा बहुसहस्रवान् । येन सागरपर्यन्ता धनुषा निर्जिता मही ॥ स कदाचित समुद्रान्ते विचरन् बलदर्पितः । अवाकिरच्छरशतैः समुद्रमिति नः श्रुतम् ॥ तं समुद्रो नमस्कृत्य कृताञ्जलिरुवाच ह । मा मुञ्च वीरनाराचान् ब्रूहि किं करवाणि ते ॥ मदाश्रयाणि भूतानि त्वद्विसृष्टैर्महेषुभिः । वध्यन्ते राजशार्दूल तेभ्यो देह्यभयं विभो ॥' इति । सत्कार्यगुणशालिविमर्दिनां पूजार्हगुणशालिजमदग्निहोमधेन्वाकर्षणादिनिरतानाम् । उक्तं हि—'जानास्येव यथा पितुः परिभवन् होमार्जुनीमर्जुनो मत्कोदण्डमनेकराजकवधस्वाध्यायमध्यापिपत् ।' इति । यद्वा धुर्याणामपि राज्यभारवहनसमर्थानामपि । **सत्कार्यगुणशालिविमर्दिनां**—सन्ति श्रेष्ठानि यानि कानि जलानि । श्रेष्ठ्यं च गाम्भीर्यवैशाल्यादिकम् । तत्र **आर्यः** गमनयोग्यो जलजन्तुनिवह उच्यते । **गुणः** मौर्वी; तत्र शालन्त इति गुणशालिनः शिञ्जिनीसंहिता बाणाः; तैः विमर्दयन्ति पीडयन्तीति गुणशालिविमर्दिनः। सत्कार्याणां गुणशालिविमर्दिनां समुद्रजलसञ्चरणयोग्यजन्तुनिवहान् स्वबाणगणमोक्षणैः पीडयतामित्यर्थः । **अनागमविदां-अनाः**-जीवनहेतुभूताः प्राणाः तेषां **आगमः** आ समन्तात् गमनम् । तद्विदाम्— बाणमोक्षणे प्राणमोक्षणं तेषामवश्यम्भावीति ज्ञानवताम् 'विदुषोतिक्रमे दण्डभूयस्त्वम्' इत्यस्यावकाशोऽनेन सूचितः । यद्वा अनानाम्—प्राणानाम्, अगमविदां गमनानभिज्ञानाम् । गमविदो न भवन्तीत्यगमविदः अनविषये गमनानभिज्ञा इति विगृह्य, एतादृशबाणमोक्षणक्षणे तदीयजलजन्तूनां विनाशो भवेदिति ज्ञानशून्यानामिति वा(त्य?)र्थोऽनुसन्धेयः । तादृशज्ञानविरहश्च दर्पजनितौदासीन्यात । तथा च तेषां ज्ञानाज्ञानाप्रसक्तावपि पुरुषगतज्ञानाज्ञाने एव बाहुगततयोपचर्येते । यद्वा-**धुर्याणामपि** दत्तात्रेयदत्तैर्वरैः सप्तद्वीपपरिवृतससागरसकलमहीमण्डलशासनसमर्थानामपि **सत्कार्यगुणशालिनां** पूजार्हगुणवतां ब्राह्मणानां तिरस्करणे प्रवृत्तानाम; दर्पवशात तदधरीकरणे उद्युक्तानाम् । तदुक्तमनुशासनपर्वणि—'सहस्रभुजभृच्छ्रीमान् कार्तवीर्योऽभवत् प्रभुः । अस्य लोकस्य सर्वस्य माहिष्मत्यां महाबल ॥ स तु रत्नाकरवतीं सद्वीपां सागराम्बराम् । शशास पृथिवीं सर्वां हैहयः सत्यविक्रमः' इत्यारभ्य 'ब्राह्मणाः संश्रिताः क्षत्रं न क्षत्रं ब्राह्मणाश्रितम् । क्षत्रियेष्वाश्रितो धर्मः प्रजानां परिपालनम् । क्षत्राद्वृत्तिर्ब्राह्मणानां तैः कथं ब्राह्मणो वरः । सर्वभूतप्रधानांस्तान् भैक्षवृत्तीनहं सदा ॥ आत्मसम्भावितान् विप्रान् स्थापयाम्यात्मनो वशे । विजेष्याम्यवशान् सर्वान् ब्राह्मणांश्चर्मवाससः ॥ न च मां च्यावयेद्राष्ट्रात् त्रिषु लोकेषु कश्चन । देवो वा मानुषो वाऽपि तस्माज्ज्येष्ठो द्विजादहम् ॥ अथ ब्रह्मोत्तरं लोकं करिष्ये क्षत्रियोत्तरम् । न हि मे संयुगे कश्चित् सोढुमुत्सहते बलम् ॥' इत्यार्जुनवचनपर्यन्तम् । अतः किं कर्तव्यं तेषामित्यत आह—**अपनीतेरिति** । तादृशभुजापनयादित्यर्थः । **निवारणम्** उपद्रवपरिहारः । **युक्तम्** । उक्तं हि तत्रैव महाभारते—"ततः स राजा प्रययौ क्रोधेन महता वृतः । स तमाश्रममागम्य राममेवान्वपद्यत ॥ ततस्तेजः प्रजज्वाल रामस्यामिततेजसः । प्रदहद्रिपुसैन्यानि तदा कमललोचने ॥ ततः परशुमादाय स तं बाहुसहस्रिणम् । चिच्छेद सहसा रामो बहुशाखमिव द्रुमम्' इति ।

(8) अत्र श्रीरामविषयतयाऽप्यर्थबोधः पस्फुरन् प्रकृतपद्धतिसङ्गतिविरहेऽपि अप्रस्तुतस्फूर्तिविषया कथञ्चिदुपयोज्यः। तथा हि—**धुर्याणामपि** राज्यभारवहनसमर्थानामपि **सत्कार्यं** पूजार्हं यद्गुणशलि मौर्वीविशिष्टं रुद्रधनुः **तद्विमर्दिनां** तद्भञ्जनमाचरितवताम्। सर्वत्र पूजायां बहुवचनम्। **अनागमविदां** अत्रानागमशब्दः नास्त्यागमो येषामिति बहुव्रीहिवशात् अनागतपरः; तद्विदां अनागतार्थज्ञातॄणां रावणसंहारादिरूपावश्यककार्यविशेषज्ञानवतां **अपनीतेः** राज्यादपनयात्—विवासनादित्यर्थः। **निवारणं** लोकापन्निवर्तनम् कैकेयीक्षोभजनितचक्रवर्तिमनोवैयाकुलीप्रशमनं च **युक्तम्**—तत्कालोचितम्। यद्वा—**अनागमविदां वसिष्ठादीनां युक्त**मित्यन्वयात् तादृशश्रीरामादीनां राज्यभरनिर्वहणशक्तानामपि प्रतिज्ञाभङ्गभीरुदशरथहृदयक्षोभं रक्षोवधादिरूपदेवकार्यनिर्वहणप्रतिज्ञादिकं चालोच्य किञ्चित्कालं वनाय प्रवासनमेवानागतज्ञानां वसिष्ठादिमहर्षीणां युक्ततरमित्यर्थः। विद्यमानमात्रज्ञानिनामवरजनानां तदानीं राज्यादपनयनस्यायुक्तत्वेन प्रतिभासेऽपि त्रैकालिकज्ञानवतां महर्षीणां तदा वनवासप्रस्थापनमेव युक्ततरं प्रतिभातीति हृदयम्। अथ वा **अपनीतेः** लोकापन्यायस्य निवारणमेव युक्तम्। दुष्टनिग्रहादेरेवावतारप्रयोजनत्वादिति भावः। तदा **अपिः** समुच्चये।

(9) एवं शङ्करादिविषयताऽपि कश्चिदर्थः। **धुर्याणामपि** वेदप्रामाण्यसमर्थने बौद्धादिविजये च धुरन्धराणामपि। **सत्कार्यगुणशालि** सदाख्यब्रह्मरूपं यत् कार्यं स्थूलचिदचिद्विशिष्टरूपेण कार्यभूतम्। **गुणशालि** अनन्तकल्याणगुणाकरम्। **तद्विमर्दिनां** ब्रह्मणः कार्यत्वं गुणवत्त्वं च प्रतिक्षिपताम्। यद्वा भावप्रधानतया कार्यगुणशालिपदे कार्यत्वगुणशालित्वपरे। तथा च ब्रह्मनिष्ठकार्यत्वगुणशालित्वयोर्विमर्दिनामित्यर्थः। शङ्करादीनामिति मन्यते। **अनागमविदां** वेदनं चात्र प्रमारूपम्। तथा चागमजन्यप्रमात्मकज्ञानशून्यानामित्यर्थः। स एव वेत्तीत्यादौ तत्त्वज्ञानपरतया प्रयोगदर्शनात्। पण्डितोत्तमानामपि कर्मवशात् तत्त्वज्ञानानुन्मेषस्य लोकसिद्धत्वात्। उक्तं हि महर्षीणामपि कर्मवशात् तत्त्वबोधानाविर्भवनम्। 'कपिलो यदि सर्वज्ञः कणादो नेति का प्रमा। तावुभौ यदि सर्वज्ञौ मत(ति)भेदः कथं भवेत्' इति॥ **अपनीतेः** तत्कृतापन्यायमूलकसूत्रार्थस्य **निवारणं** श्रीमद्रामानुजरूपेणावतीर्य श्रीभाष्यादिकलनया तत्कृतापन्यायनिरसनं **युक्तं** अवश्यकर्तव्यम्। अन्यथा शङ्करमतकोलाहलाकर्णनेन सकलं जगत् मोमुह्येतेति भावः।

(10) एवमत्र दुर्योधनादिदुर्मतपरतयाऽपि कश्चिदर्थः। **धुर्याणामपि** द्यूतादौ पाण्डवान् विजित्य अखण्डक्षोणीमण्डलमेकातपत्रयितुं शक्तानामपि **सत्कार्यगुणशालि** पूजार्हपातिव्रत्यादिगुणसमृद्धं वस्तु। द्रौपदीरूपमिति गम्यते। 'पूज्या भूषयितव्याश्च बहुकल्याणमीप्सुभिः' इति हि स्मर्यते। तस्य **विमर्दिनां** वस्त्रापहारेण परिभवकर्तॄणां, **अनागमविदां** श्रीकृष्णप्रसादेन वस्त्रागमो भवेदिति ज्ञानशून्यानाम्। तादृशज्ञानसत्त्वे ईदृशव्यापारे प्रवृत्तेरेवानुदयादिति भावः। दुर्योधनादीनां, **अपनीतेः** अपन्यायेनापि। हेतौ पञ्चमी। **निवारणं** राज्यान्निष्कासनं वधो वा **युक्तम्**। ईदृशासह्यतमान्यायपक्षुद्रव्यापारकर्तॄणां नीतिमार्गेणैव प्रतिसमाधानं कार्यमिति न नियमः; अपि तु अन्यायमार्गेणापि निराकरणं

शास्त्रीयमेव; पिशाचानां पिशाचभाषयैव उत्तरणीयत्वात् । अत एव भीष्मद्रोणकर्णसैन्धवादीनां वञ्चन-मार्गेणैव वधकरणं योयुज्यते । ते हि द्रौपदीपरिभवकाले शक्तावप्युदासनात् महापराधिन इति भगवदभिप्रायः ।

(11) एवं काळियादिसर्पपरतयाऽपि अर्थबोधः सुलभः । तथा हि-**धुर्याणामपि** गरुडाय प्रदेयं बलिं स्वयमुपभुज्य गरुडपक्षाभिघातमपि तृणीकृत्य काळिन्दीह्रदे निर्विशङ्कं सञ्चरणात् काद्रवेयेषु सारभूतानामपि, **सत्कार्यगुणशालिविमर्दिनां** । पूजार्हगुणशालिनः गोगोपादयः । गवां हि (?) च्यवनमहर्षितुल्यताया अनुगीतायां प्रतिपादनात् । **विः** पक्षी गगनचरः तेषां वि (वीनां ?) मर्दिनां विषाग्निदग्धजलोष्मवेगेन विनाशयताम् (कानां?) । उक्तं हि—'कालिन्द्यां काळियस्यासीत् ह्रदः कश्चिद्विषाग्निना । श्रप्यमाणपया यस्मिन् पतन्त्युपरिगाः खगाः ॥ म्रियन्ते तीरगा यस्य प्राणिनः स्थिरजङ्गमाः' इति । **अनागं अविदां युक्तं अपनि ईतेः निवारण**मिति पदच्छेदः । **अविदां** अज्ञानिनामिति वा, अं श्रीकृष्णं विन्दन्ति शरणं गच्छन्तीति तथोक्तानां वा काळियादिसर्पाणां **ईतेः** ईतिबाधायाः असकृद्गोगोपमूर्च्छनाद्यापदः **अनागं** नागशून्यं यथातथा, अपगतो नीः—तन्नेता काळियश्च यस्मिन् कर्मणि तद्यथा तथा **वारणं** निवारणं समुद्रजले निष्कासनं युक्तम् । शरणागतानां वधायोगादिति भावः । अलङ्कारादिकं पूर्ववत् ॥ ८ ॥

துர்யாணாமபி ஸத்கார்யகுணசாலிவிமர்திநாம்.
அநாகமவிதாம் யுக்தம் அபநீதேர் நிவாரணம்—8

1 கார்யங்களெல்லாம் நிர்வஹிக்கத் திறமை வாய்ந்தவராயிருப்பினும், நல்லொழுக்கமுடையரும் குணச்சிறப்புடையருமானவர்களை நலிகின்றவர்களாய் வேதநெறி யறியாதவர்களுமாயிருப்பவராகில் (1) அவர்கள் செய்யும் அந்யாயத்தை நீக்கிக் கொள்ளவேண்டும். (2) அவர்களை அக்ரமத்தினின்று விலகச் செய்யவேண்டும். (3) அவர்களைப் பதவியினின்று நீக்குவதால் அது மூலமாக உலகுக்கு வரும் கேட்டை விலக்க வேண்டும்.

2 மாடுகள் வண்டியிழுத்து பாரம் சுமந்து உழைக்கின்றவையானாலும் நல்ல (தான்யமாம்) பலன்களின் மிகுதிக்கான செந்நெற்பயிர்களை யழிக்கின்றனவாய் மீண்டும் வராமலிருக்காதவைகளுமாகில் அவ்வித அந்யாயத்தினின்று விலக்க ஏதேனும் வழி செய்வது யுக்தமாகும். आगमः-पुनः सस्यभक्षणार्थमागमनम् नसमासात् । नागमः—अनागमनम्, तद्विदः—तद्भाजो न भवन्ती-त्यनागमविदः । तथाभूतानामिति व्याख्येयम् ।

3 காணுதமத விஷயமான பொருள் ஒன்று—உலகிலுள்ள வஸ்துக்களையெல்லாம் விசாரிக்கத் தர்க்க சாஸ்திரம் இயற்றி சாஸ்திரப் படிப்புக்கு நல்ல அஸ்திவாரம் போடும் திறமையுடையராயினும் ஸத்கார்யவாதமென்ற கொள்கையை விட்டு அஸத்கார்யவாதத்தில் இழிந்து (மண்

ணுண்டையே குடமாகவும் நூற்களே துணியாகவும் மாறுகிறது த்ரவ்யம் வேறில்லை. மண் ஏற்கனவே நிறமுடையதாகையால் அதுவே குடமாகும் போது அந்த நிறம் அவ்வாறே இருக்கின்றது என்றவாறு சொல்ல வேண்டியிருக்க அவ்வாறு கூறுமல்) மண்ணுண்டை என்கிற த்ரவ்யம் வேறு, அதனின்று குடம் வேறு உண்டாகிறது. அந்தக் குடத்திற்கு நிறம் முதலிய குணங்கள் மண்ணுண்டையின் குணங்களின்று பிறகு உண்டாகின்றன என்று இல்லாத கற்பனைகளையெல்லாம் செய்கின்ருர்கள். உரு வேறு பேர் வேருயினும் வஸ்து வேறில்லையென்ற வேதாந்த வாக்யங்களை யறிகிருரல்லர், அவர்களை அவர்களுடைய குயுக்தியினின்று நிவிருத்தி செய்தல் நியாயமாகும்.

4 பாஞ்சராத்ரத்தை தூஷிப்பாரைப் பற்றிய வேறு பொருளுமாம். ஆகமமாவது பாஞ்சராத்ரம். அவர்கள் சாஸ்திரங்களிலே புலமையுடையராயினும் சிறந்த ப்ரதிஷ்டை முதலிய கார்யங்களாலே ஜனங்களுக்கு அருள் புரிய குணங்களோடு தோன்றிய அர்ச்சாமூர்த்திகளின் பூசனையைத் தடுப்பாராய் ஆகமசாஸ்த்ரத்தை யறியாதவர்களாகில் அவர்களை அவ் அக்ரமத்தினின்று விலக்கல் தகும். ஸத்கார்ய குணசாலி என்பதற்கு ஸத் என்ற வாஸுதேவ ப்ரஹமத்தின் தோற்றமான இருகுணப் பிறவு உடைய ஸங்கர்ஷணுதிவ்யூஹ மூர்த்திகளென்பதும் பொருளாம். அநாகமவிதாம்—'ஸங்கர்ஷணோ நாம ஜீவோ ஜாயதே' என்றது முதலான வாக்யங்களின் உண்மைப் பொருள் அறியாதவர்களின் என்றும் உரைக்க.

5 ஹரதத்தாதிசைவதூஷணமுமாம். புருஷ—உத்தம என்ற இரண்டு சொற்கள் சேர்ந்து வந்த புருஷோத்தமபதத்தை ரூடமேயாக்கி வியாகரணத்தை இங்கு நன்கு அறியாதவர் அறிஞராயினும் திருத்தப் பட வேண்டியவரே.

6 ராவணன் விஷயமான மற்றொரு பொருள்—ராவணனுடைய புஜங்கள் உலகமெல்லாம் ஆளவும் கைலாஸத்தை அசைக்கவும் வல்லமையுடையனவாயினும், சிறந்த குணம் உடைய—வி—ஜடாயுபக்ஷியை அழித்தனவாகைபாலே, வருவது தேரியாத அவற்றை உடலினின்று அபநீதியால் அப்புறப்படுத்தலால் பழி வாங்குதல் நியாயமாகும்.

7 கார்த்தவீர்யார்ஜுனன் புஜத்தில் கொழுப்பேறி போருக்கு யாரும் வராமையாலே கடல் மேல் அம்புகளை ஆநந்தனையும் எறிந்து வந்தான் என்ற வரலாற்றுக்கிணங்கவும் பொருளாம்—ராஜ்யபரிபாலனத்திலே பேர்பெற்றவனுயினும் ஸத்—நல்ல—க—ஜலத்திலே கடலிலே ஆர்ய—ஸஞ்சரிக்கின்ற குணசாலிகளான ஜந்துக்களை அம்பையெறிந்து ஹிம்ஸிக்கின்றவன்—அநாகமவித்—க்ஷத்ரியனை விட ப்ராஹ்மணனுக்கு மேன்மையுண்டென்ற வேதத்தை நன்கு அறியாதவன், அவனை ஆயிரங் கைகளைத் துணித்து அக்ரமத்தினின்று பரசுராமர் விலக்கினது நியாயமாகும்.

8 ஸ்ரீராமன் விஷயமாகவுமாம். எல்லாம் நிர்வஹிப்பவர். ஜனக மஹாராஜனின் ஸத்காரம் பூசை அதற்கு பாத்ரமான வில்—(குணசாலி—நாண் உடையது. அதாவது வில்) சிவதநுஸ். அதை முறித்தவர்—அநாகமம், வராதது—இனிவரப்போவது அதையுமறிந்தவர் அவரைக் காட்டிற்கு அனுப்பி உலகை அந்யாயத்தினின்று விலக்கியது ந்யாயமே.

9 எவ்வளவு புலமையிருந்தும் உலகில் ப்ரஜைகளால் பூஜிக்கப் படவேண்டிய ஸகுண ப்ரஹ்மமென்ற தத்துவத்தைப் பொய்யாக்கி உண்மையான வேதப்பொருள் அறியாதாரை—நிர்குண ப்ரஹ்மவாதிகளை குயுக்திகளினின்று விலக்குவது நலம்.

10 ராஜ்ய பரிபாலனத்திலே திறமை வாய்ந்திருந்தும் கௌரவிக்க வேண்டிய பாண்டவர் த்ரௌபதி இவர்களுக்குத் தீங்கே செய்துவந்தவரும் மேல் என்ன வருமென்பதையறியாதவர்களும் துயிலுரித்த காலத்தில் கண்ணனின் அனுக்ரஹம் நேர்ந்ததையும் நன்கு ஆராயாமல் நடந்துகொண்டவர்களுமான துர்யோதநாதிகளை அக்ரமவழியினால் அழிப்பது கூட நியாயமாகும்.

11 காளியன் தன் விஷக்காற்றாலே ஸத்காரத்திற்கு உரிய குணங்களையுடைய பசு முதலானவற்றிற்கும் அருகிலுள்ள சாலி—பயிர்களுக்கும் வி—பறக்கும் பக்ஷிகளுக்கும் ஹிம்ஸை செய்தவனாயினும் அவித்—அகாரத்தின் பொருளான கண்ணனைச் சரணம் புகுந்தான். ஆயினும் யமுனை மடுவை அநாகம்—பாம்புகள் அற்றதாயும், அபநி—நேதாவான நியமிக்கின்ற காளியனில்லாததாகவும் செய்து ஈதிவாதையினின்று விடுவித்தல் ந்யாயமே. உத்தரார்த்தத்திலே அநாகம், அவிதாம், யுக்தம், அபநி, ஈதேः. நிவாரணம் என்று பதப்பிரிவு கொள்க.

बलोत्तरेण हरिणा नागमल्लविभेदिना ।
सृगालः साम्यमाकांक्षन् शौर्याधिक्यं न विन्दति ॥ ९ ॥

एतावता प्रबन्धेन स्थानसंस्थाननामकृत्याद्यनेकविषयसाम्पादनेऽप्यन्यांशवैधर्म्यदर्शनेनाकिञ्चित्करत्वमुक्त्वा, तत्प्रसङ्गात् तस्य विपरीतफलप्रसावकतामपि सदृष्टान्तं प्रसाध्य पुनरपि सिंहावलोकितेन, [तर्हि?] यः सर्वांशेऽपि महापुरुषसाम्यं संपिपादयिषति, तस्य न कुत्रापि वैधर्म्यसम्भावना समुचितेत्याशङ्क्य तत्रापि न केवलं तत्साम्यसम्पादनप्रयत्नः निष्फल एव भवेत्, किं त्वनर्थावहोऽपीत्यर्थमप्रस्तुतप्रशंसया प्रसाधयति बलेति । वस्तुतः साम्यसत्त्वे ह्युत्कर्षागमः ; न तु दर्पवशात् विशिष्टपुरुषसाम्यं स्वप्रयत्नतः संपिपादयिषत इत्येतच्छ्लोकनिष्कृष्टार्थः । **बलोत्तरेण** सर्वोत्तरमहाबलपराक्रमविक्रमणादिवैलक्षण्यविख्यातेन । तदीयदिक्रमविलोकनादिवैलक्षण्यं च सविस्तरमुक्तमधस्तात् । **हरिणा** निखिलमृगहरणलब्धमृगराजपट्टाभिषेकेण सिंहेन । **नागमल्लविभेदिना** मदोद्धतकळभकुम्भपीठविपाटनाटोपपटुतरखरनखरकोटीमाटीकमानेन ।

ताच्छील्यार्थकणिनिना च गजयूथविदळनबद्धत्वरत्वमेवास्याऽऽजानसिद्धः स्वाभाविकाकार इति गम्यते। उक्तं हि पण्डितराजेन—'पिब स्तन्यं पोत त्वमिह मददन्ताबळधिया दृगन्तान् आधत्से किमिति हरिदन्तेषु परुषान्' इति जातमात्रस्यापि तथात्वम्। यद्वा—यादृच्छिकदर्शनेऽपि गजयूथपहृदयस्तम्भारम्भसंभ्रमत्वमिह भेदशब्दविवक्षितम्। उक्तं हि तदपि—'क्रीडाऽकारि तटाकवारिणि गतातङ्कं न पङ्केरुहैः वली काचन वल्लकीतरुगता नाकर्षि वा हर्षतः। नाऽऽश्लिष्टा करिणी करेण करिणा कामातुरेणामुना दंष्ट्राभिर्विकटाननः शिवशिव व्यालोकि पञ्चाननः' इति। अत्र व्यालोकनस्य पूर्वोक्तक्रीडादिसकलव्यापारसद्योविच्छेदकत्वं लोकप्रसिद्धिबललब्धव्यञ्जनमर्यादावसेयमिति काव्यज्ञाः। **साम्यं**-वनमृगत्वगजभासमक्षकत्वदंष्ट्रादिमत्त्वाद्यनेकांशवत्त्वलाभेन तादृशसिंहसमशीलत्वं **आकांक्षन्**—अपेक्षमाणः, **सृगालः**- जम्बुकः **शौर्याधिक्यं**- पराक्रमरूपमाधिक्यम्, **न विन्दति** न प्राप्नोत्येव। इतरांशेष्वापाततः साम्यसम्पादनसम्भावनाबकाशलेशसमुद्भवेऽपि गजगण्डभेदनरूपशौर्यांशे साम्यसम्पादनप्रयतनप्रसक्तिरेव न सम्भवतीति भावः। किं तु तादृशसाम्यापेक्षया प्रत्यवस्थाने मृगराजशौर्यलेशपराजितः पतनमेव परं प्रपद्येतेति भावः। **पूर्वं दृष्टसारङ्गयूथ** इति श्लोके शुनकः सिंहकृत्याचरणे न क्षम इत्युक्तम्। अत्र च तदीयकृत्यवहनाक्षमत्वेऽपि यथाकथञ्चित् तत्साम्यसम्पादनमपि न शक्यमित्युच्यत इति वैषम्यम्। दृष्टान्तात् दार्ष्टान्तिकस्य न्यूनधर्मत्वं हि सर्वत्र प्रसिद्धम्। यथा 'मनोजवा वाजिनः' इत्यादौ। तादृशन्यूनधर्मसंक्रमोऽप्यस्य न सम्भवतीत्येतदस्य श्लोकस्य मुख्यप्रमेयम्।

(2) अन्योऽप्यर्थः। **बलोत्तरेण**-बलभद्रानुजन्मना, 'कालिन्दीभेदनो बलः' इत्यमरः। **नागः** कुवलयापीडः, **मल्लाः**चाणूरमुष्टिकादयः, **विः**-बकरूपः कश्चिदसुरः, **तेषां भेदिना**-निग्राहकेण, **हरिणा**-श्रीकृष्णेन, **साम्यं**-शंखचक्रधारण-गरुडवाहनारोहण-वासुदेवनामवहनादिसर्वांशसाम्यवहनं द्वन्द्वयुद्धसाम्यवहनं च **आकांक्षन्**, अपेक्षमाणः, **सृगालः**-सृगालसमाख्यः-पौण्ड्रकवासुदेवः, **शौर्याधिक्यं**-शूर इति कश्चिद्वसुदेवपिता, तद्वंशोद्भवः शौरिः-श्रीकृष्णः, तस्याधिक्यं-तद्गतं निरवधिकोत्कर्षं शत्रुजयादिरूपं न **विन्दति**-नाप्नोतीत्यर्थः। न तु शौर्यापेक्षया आधिक्यमिति; साम्यापेक्षिणः अधिक्याप्राप्तेरदोषावहत्वात्। अत आधिक्यरूपधर्मांशे साम्यं न विन्दतीत्येवावश्यवक्तव्यम्। उक्तं हि श्रीमति हरिवंशे—'पुरेऽस्मिन् नृपतिः कृष्ण वासुदेवो महायशाः। सृगाल इति विख्यातो नित्यं परमकोपनः॥ नृपेण तेन गोविन्द तव वंशभवा नृप। दायादा निहताः सर्वे वीरद्वेषानुशा(या?)यिना॥' इत्यारभ्य 'तेन स्यन्दनमुख्येन द्विषत्स्यन्दनघातिना। स सृगालोऽभ्ययात् कृष्णं शलभः पावकं यथा। रथस्थ इव शैलेन्द्रः सृगालः प्रत्यदृश्यत। तमापतन्तं श्रीमन्तं मूर्तिमन्तमिवाचलम्॥ सृगालं लोकपालाभं दृष्ट्वा कृष्णो न विव्यथे। वासुदेवं स्थितं दृष्ट्वा सृगालो युद्धलालसः॥ अभिदुद्राव वेगेन मेघराशिमि(रि?)वाचलम्। सृगालस्त्वब्रवीत् कृष्णे समरे समुपस्थितम्। न चाहमेकं सबलो युक्तस्त्वां योद्धुमाहवे॥ अहमेकस्त्वमप्येको द्वौ युद्धावरणे स्थितौ। लोकेऽस्मिन् वासुदेवोऽहं भविष्यामि हते त्वयि। हते मयि त्वमप्येको

वासुदेवो भविष्यसि । सृगालस्य वचः श्रुत्वा वासुदेवः क्षमापरः । ईर्ष्यन्तं प्रहरस्वेति तमुक्त्वा चक्रमाददे ॥ चक्रमुद्यम्य गोविन्दः सृगालस्योपरि क्षिपन् । तं रथस्थं महोरस्कं सृगालं युद्धदुर्मदम् ॥ जघान समरे चक्रं (क्षिप्रं ?) जातदर्पं महाबलम् । ततः सुदर्शनं चक्रं पुनरायात् गुरोः करे ॥ चक्रेणोरसि निर्भिण्णः स गतासुर्गतोत्सवः । पपात क्षतजस्रावी सृगालोऽद्रिरिवोन्नतः ॥' इति । परिकरान्तरसाम्यसम्पादनं श्रीभागवते द्रष्टव्यम् । शौरिशब्देनात्र-शूरवंशोद्भवत्वादेव कृष्णस्येदृशशत्रुजयादिसामर्थ्यसम्भवः ; न तु वासुदेवनामधारणमात्रादिति द्योत्यते । तथा चात्र नामादिसाम्यवहनमात्रदृप्तानां पौण्ड्रकन्यायेनान्ततः पतनमेव भवेदिति व्यज्यते । नागमल्लविभेदिनेत्यनेन तादृशनागादिभेदनसामर्थ्यं पौण्ड्रकस्य नास्तीति द्योतयता श्रीमद्वासुदेवनिर्जितनागादिविजयसामर्थ्यमप्यस्य नास्ति, किमुत साक्षात् तद्विजयप्रसङ्गाशङ्केति गम्यते ।

(3) एवमत्र 'यदन्तरं सिंहसृगालयोर्वने तदन्तरं वै तव राघवस्य च ।', 'महाबाहुं महोरस्कं सिंहविक्रान्तगामिनम् । नृसिंहं सिंहसङ्काशमहं राममनुव्रता । त्वं पुनर्जम्बुकः सिंहीं मामिच्छसि सुदुर्लभाम्' इत्यादिदेवीवचनात् रामरावणपरोऽपि कश्चिदर्थः । तथा हि--**बलोत्तरेण**—'शत्रोः प्रख्यातवीर्यस्य रञ्जनीयस्य विक्रमैः' इति प्रतिवादिगोष्ठ्यामप्यतिसुभिक्षतया प्रख्यातेन 'भृगुपतिसहयुध्वा वीरभोगीणबाहुः' इत्यर्धाधिकमुहूर्तमात्रचतुर्दशसहस्ररक्षोबलाध्यक्षविक्षेपणधुरन्धरमहाबलवैलक्षण्यविचक्षणेन, यद्वा बलानामकेन विश्वामित्रोपदिष्टमन्त्रेण श्रेष्ठेन, **नागमल्लविभेदिना**-नगमल्लानां समूहो नागमल्लम् । तस्य समूह इत्यण् । सप्त सालवृक्षा इत्यर्थः । तद्विभेदनशीलेन । अथवा, 'स संप्रहारस्तुमुलो रामत्रिशिरसोर्महान् । बभूवातीव बलिनोः सिंहकुञ्जरयोरिव । बिभेद रामस्तं बाणैः हृदये सोऽभवज्जडः । शिरांस्यपातयद्रामो वेगवद्भिस्त्रिभिः शरैः ॥' इत्युक्तत्रिशिरःकुञ्जरविभेदनदक्षेण, **हरिणा**—श्रीराघवसिंहेन **सृगालः** 'शूरोऽहमिति चात्मानमवगच्छसि दुर्मते । नैव लज्जाऽस्ति ते सीतां चोरवद्व्यपकर्षतः ॥ यदि मत्सन्निधौ सीता धर्षिता स्यात् त्वया बलात् । भ्रातरं तु खरं पश्येस्तदा मत्सायकैर्हतः' इति समक्षोक्तक्रमेण वञ्चकाख्यसृगालतुल्यो रावणः, **साम्यम्**-मया सह वर्तत इति समः, तस्य भावं सीतासाहित्यं राज्यलक्ष्मीसाहित्यं वा अपेक्षमाणः शौर्येण आधिक्यं अधिगतशिरस्कत्वं ; अधिगतानि कानि यस्येति विग्रहात् । न विन्दति । 'ततः क्रुद्धो महाबाहू रघूणां कीर्तिवर्धनः ॥ सन्धाय धनुषा रामः क्षुरमाशीविषोपमम् । रावणस्य शिरोच्छिन्दत् श्रीमज्ज्वलितकुण्डलम् ॥ तच्छिरः पतितं भूमौ दृष्टं लोकैस्त्रिभिस्तदा ।' इत्युक्तेरिति भावः । अनेन चार्थेन 'न नमेय'मिति दृप्तानामीदृश्येव गतिरिति सूचितम् ॥

(4) अनयैव दिशा कविवादिकेसरि-वादिकेसरिविषयकोऽपि कश्चिदर्थः प्रतीयते । यथा हि—**बलोत्तरेण** 'को वा चक्रुरुदञ्चयेदपि पुरः साटोपतर्कच्छटाशस्त्राशस्त्रिविहारसम्भृतरणास्वादेषु वादेषु नः' 'सम्भूय वादकरणेऽपि न मे प्रभूताः' इत्याद्युक्तक्रमेण निखिलशास्त्रविशारदसर्वदुर्वादिश्रेणीतृणीकरणनिपुणबुद्धिबलशास्त्रबलविद्याबलादिसमृद्धेन, **नागमल्लविभेदिना** श्रीरङ्गवासिसात्विकजनसंक्षोभदक्षतर्कमदमेदुरकृष्णमिश्रादिकळभव्यूहविभेदनसमर्थेन हरिणा—"दान्तं यं कविवादिदन्तिहरिरित्यार्या वदन्ति

क्षितौ'' 'कवितार्किकलभव्रजकबलीकृतिसिंहं'' इत्याद्युक्तानन्यसाधारणकवितार्किकसिंहगुणसमाख्या-विख्यातेन। अनेन वादिकेसर्यादिनाममात्रधारणकृतार्थेभ्यो व्यावृत्तिरुक्ता। **साम्यमाकांक्षन्** अहमपि वादिकेसरी अहमपि लोकाचार्य इति नामधारणमात्रेण तदीययोग्यतातिशयमपेक्षमाणः **सृगालः,** 'विदुषामपि मोहमावहन्तो वितथैतिह्यसहस्रवर्णनेन। विनयमिनयत् खलाः किलामी विजयन्ते कपटालया जगन्ति' इत्युक्तवञ्चनमार्गेणैव जगद्विजयदीक्षित एकदेशिलोकः, **शौर्याधिक्यं न विन्दति।** भगवद्भक्त्यादिकतिपयांशेषु साम्यवहनेऽपि 'श्रुतिसिद्धान्तशूरस्य तद्विरुद्धान् निरुन्धत। वल्गितं वावदूकस्य कृतिनः किं न शोभते' इति श्रीभगवद्भाष्यकारप्रदत्तश्रुतिसिद्धान्तशौर्यपट्टाभिषेकं न वहत्येवेत्यर्थः। न केवलं नामधारणमात्रेण पञ्चरात्राप्रामाण्यसमर्थनार्थमागता दुर्वादिमतमल्लजाः बलात् पलायेरन्, अपि तु काञ्चीनगरात् कविवादिसिंहसमागमनानन्तरमेव। 'विदितनिगमसीम्ना वेङ्कटेशेन तत्तद्बहुसमयिसमक्षं बद्धजैत्रध्वजेन। प्रतिपदमवधानं पुष्यतां सात्त्विकानां परिषदि विहितेयं पञ्चकालस्य रक्षा' इत्युक्तक्रमेण सद्यो विजिततत्तद्वादिकरकलितविचित्रजैत्रस्तम्भनिखातनपुरःसरं श्रीरङ्गनाथसमाराधनादिकं निर्विघातं निर्वहेदित्यर्थः। अत्र च—'निष्कष्टुं कश्चिदन्यः प्रभवति भगवल्लक्ष्मणाचार्यमुद्रामक्षुद्राचार्यशिक्षाशतगुणितमतेरप्रमत्तान्न मत्तः,' 'तत्र त्वद्भुतनिर्भरप्रसरया बुद्ध्या परिष्कारिणः त्वत्तः प्रत्ययितो न कश्चिदपरः प्रत्यर्थिभिः प्रार्थित.' इति। भगवद्भाष्यकारश्रीसूक्तिस्वोक्त्याद्यनुरोधेन स्वमतसिद्धान्तस्थापने 'कथं कथकमानी स्यात् कश्चिदन्यो मयि स्थिते' इत्युक्तक्रमेण परमतजालसलोमूलमूने चानन्यसाधारणनिरवधिकसामर्थ्यावगमात्, 'तुरगवदनतेजोबृंहिताश्चर्यशक्तिः कविकथकमृगेन्द्रः सर्वतन्त्रस्वतन्त्रः। जयति गुरुरबाधो वेदचूडार्यसंज्ञामनितरजनलभ्यां लम्भितो रङ्गभर्त्रा' इति महाचार्यैरुदीरितानन्यसामान्यान्वर्थकवितार्किकसिंहादिसमाख्याभाक्त्वमाचार्यसिंहस्यैव योयुज्यते। अन्येषां तु तन्नामवहनं शृण्वतामपि व्रीडावहमयुक्तं चेति भावः सूच्यते।

यद्वा—नागमल्लविभेदिनेत्यस्य 'दन्तादन्तिविषानलम्पटधियो दिङ्नागमुख्या जडाः शृण्वन्त्वद्य विपद्यते पुनरियं शिक्षा भवत्पक्षतः। बुद्ध्वा बोद्धव्यमुदाहरन्ति विशदं बुद्धादयश्चेज्जितं नोचेद्धन्त जितं पुनस्तदिह नस्तूर्यं तु जोघुष्यताम्' इत्युक्तक्रमेण दन्तादन्तिदन्तुराणां दिङ्नागादीनां बौद्धमतप्रवर्तकानां एकविकल्प एव तदीयमतसामान्यप्रक्षोभणेन तद्विभेदिनेत्यर्थोऽवसेयः।

अथ वा **नागमत्। लविः** लवनं लूधातुर्वा। धातुनिर्देशविहित इग्वा धात्वर्थनिर्देशविहित इप्रत्ययो वाऽत्र बोद्धव्यः। धातुनिर्देशपक्षेऽपि धात्वर्थपर्यन्तं विवक्षणीयम्। 'गृहस्थधर्मो यो विप्रो ददातिपरिवर्जितः' इत्यत्र दानपरिवर्जित इति व्याख्यातं वैद्यनाथीये। तदंशे भेदवता शत्रुलवनांशे अत्यन्तभेदशालिनेत्यर्थः। **बलोत्तरेण**-बुद्धिबलादावतिशयितोत्कृष्टेन, यद्वा-एतावत्काले एतावन्तश्लोकाः कर्तव्या इत्यादिप्रतिज्ञाबलेषु 'अगणि सदसि सद्भिर्यः समस्यासहस्री कविकथकमृगेन्द्रः सर्वतन्त्रस्वतन्त्रः॥' इति सदस्यपण्डितसार्वभौमप्रदत्तसमस्यासहस्रित्व कवितार्किकसिंहत्व - सर्वतन्त्रस्वातन्त्र्यादिबिरुदवहनबहुगुणोद्दीपितनिजप्रचण्डपाण्डित्यबलशोभाविभ्राजमानभूम्ना **हरिणा**-प्रतिवादिदुरहङ्कृतिहरणशीलेन, श्रीमद्वेदान्ताचार्येण **साम्यं**-शास्त्र-

वादेषु प्रसक्तिलेशशून्यत्वेऽपि कवितांशे किञ्चित्साम्यवहनमपेक्षमाणः, सृगालः-तत्तुल्यो वादिकेसरी, कृष्णमिश्रादिमदोद्धतकलभसमागमादिसमये स्वकुटीरकुञ्जादिषु निलीय सत्त्वोत्तरश्रीमदाचार्यवर्याणां पुरतो निर्भयं विनयाभिनयेन प्रत्यवस्थानात् सृगालतौल्यमनुसन्धेयम् । **नागमत्**—सर्वथा साम्यं नागच्छत् । शौर्याधिक्यं तु न विन्दत्येवेत्यन्वयः । पदकमलसहस्रसर्जनाय प्रयतमानः त्रिशतीमेव पद्यानां निर्मम इति श्रूयमाणां सर्वतः परिमार्गणेऽप्यद्याप्यदृश्यमानां पद्मत्रिशतीमेव संख्यापूरणमात्रफलां निर्मातुं प्रभवति । न तु—'प्रख्यातानां परिषदि सतां कारयित्वा प्रतिज्ञाम्' इति बहुप्राज्ञगोष्ठ्यां प्रतिज्ञाबन्धनपुरःसरं 'कवीनां सम्राजं कथकरथि(सि)कानामधिपतिं नमःकर्मीकुर्मो निगममकुटीदेशिकमणिम् । सहस्रेण श्लोकैः सहृदयसुखैरेकनिशया मधुश्रीहृद्धुर्यो मधुरिपुपदत्वद्वयमनौत् ॥ पद्यानां दशभिर्यदस्तुत शतैस्त्वत्प्रेयसः पादुकां त्रय्यन्तार्यगुरुः परो हयमुखस्तत्राम्ब को विस्मयः' इत्याद्युक्तरीत्या रात्र्येकयाम एव 'स कविः कथ्यते स्रष्टा रमते यत्र भारती । रसभावगुणीभूतैरलङ्कारैर्गुणोदयैः' इत्युक्तरसभावालङ्कारनिकरपरिपुष्टस्वादुतमकवननिर्माणचणेन जात्यन्धाः पदबन्धवर्मसु हठात् द्वित्राक्षरोद्गारिणो निर्मात्रा निगमाञ्चलार्यकविना नित्यं प्रबन्धायुतम्' इति क्षणार्धमात्रेण बहुप्रबन्धकरणनैपुण्यगण्येन कविसिंहेन निर्मिते द्रवीभूतद्राक्षामधुरिमधुरीणाः फणितयः' 'मोचामाचाममन्यो मधुरिमगरिमा वेदचूडार्यवाचाम्' इत्युक्तद्राक्षापाकबहुळे, 'गौडवैदर्भपाञ्चालमालाकारां सरस्वतीम् । यस्य नित्यं प्रशंसन्ति सन्तः सौरभवेदिनः ॥' इति तत्तद्रीतिरसानुभवरसिकभावुकलोकास्वाद्ये श्रीमति पादुकासहस्रे—'प्रसादौजःकान्तिप्रभृतिगुणसङ्केतभवनं प्रगल्भं सन्दर्भं कविकथकसिंहार्यवचसाम् । लिहानः कर्णाभ्यां मुहुरभिदुहानं शमरसं कविंमन्यान् अन्यान् क इह बहुमन्येत रसिकः' इत्युक्तसर्वगुणसीमासमाहारसारसमुदायशेवधिमेकमपि श्लोकं पुरुषायुषमात्रेऽपि स्रष्टुं शूर इत्यर्थः ।

यद्वा—**शौर्यशब्दः** प्रतिज्ञापरः । तदीयशौर्यं नाफलदित्यादिप्रयोगात् । तत्राधिक्यं न विन्दतीति । तथा च कालादिसमयबन्धगन्धमन्तरेण कवितापणयनेऽप्यजगजान्तरायमानतरतमताकयोरनयोः प्रतिज्ञापुरस्सरकवितानिर्माणे का वा कथेत्येतत् शौर्याधिक्यं न विन्दतीत्यस्य हार्दार्थः ।

यद्वा—**लवि मेदिनेति** पदं विच्छिद्य लवोऽस्यास्तीति विग्रहादेकदेशविशिष्टमपि साम्यं तेन साकं नागमत् । शौर्याधिक्यं तु न विन्दतीति किमु वक्तव्यमित्यर्थोऽवसेयः । अनेन च दृष्टान्तेनाचार्यस्य तादात्विकविवादकोलाहलस्मरणजनितमसमानविवादनिर्वेदवेदनाजातमुद्बुद्धयते । निर्विण्णं ह्येवमेव केनचित् कविना—'स्मेराः सन्तु सभासदः करिचमूदर्पज्वरोत्सारिणा हर्यक्षेण समं च जम्बुकयुवा युद्धाय बद्धादरः । तत्रापि प्रथयन्ति तुल्यबलतामेके तयोरुच्चकैरन्ये संशयशंसिनस्तदपरे बाढं विपर्यासिनः' इति । तथा चास्य वादिकेसर्याचार्यस्याचार्यवर्यैः सह विवादमाबद्धय अन्ततोऽधिगतोऽपजयोऽपि प्रतिष्ठाया एव भवति । अत एव हि प्रार्थयन्त्यमीभिः सह विवादं प्रत्यर्थिविद्वांसः । उच्यते हि स्वयमेव—'त्वत्तः प्रत्ययितो न कश्चिदपरः प्रत्यर्थिभिः प्रार्थितः' इति । अतश्च 'निशमयति यः किल दृशा निशामयत्यग्रिण।

च यो विश्वम् । गजतुरगौ च मुखे यौ तैः सह वेदान्तदेशिको गण्यः ।' इति सूत्रकारादिमहर्षिगण-समशीलप्रभावतया प्रख्यातेन वेदान्तदेशिकेन सह मितंपचोऽयं प्रत्यवास्थितेति प्रतिष्ठा नाद्यापि निवर्तते । आचार्यवर्याणां तु तस्मिन् विवादे परिपन्थिविजयोऽपि न्यूनभावमेवावहतीति पर्यवसितोऽर्थः । तदप्युक्तं केनचित्—'वरमुन्नतलाङ्गूलात् सटाधूननभीषणात् । सिंहात् पादप्रहारोऽपि न सृगालाधिरोहणम् ॥' इति ध्येयम् ।

(5) एवं जीवपरमात्मपरतयाऽपि कश्चिदर्थ(र्थो)बोध: (ध्यः) । बलोत्तरेण–ज्ञानादिषड्गुणेषु ज्ञान-मात्रे नित्यमुक्तसाम्येऽपि बलैश्वर्यवीर्यशक्तितेजोरूपगुणपञ्चके स्वतो गरिष्ठेन, **नागमल्लविभेदिना**–नागमल्लः श्रीशेषः विः पक्षी गरुडः तदुपलक्षिता विष्वक्सेनाद्यसाधारणपरिजनाः तैः भेदिना–मुक्तादिभ्यो विलक्षणेन, **हरिणा**–परवासुदेवेन, **सृगालः**–तत्तुल्योऽल्पबलो जीवात्मा, साम्यमाकांक्षत् 'निरञ्जनः परमं साम्य-मुपैती'ति श्रुतिदर्शनमात्रेण सर्वांशेऽपि साम्यमपेक्षमाणश्चेत् शौर्याधिक्यं न विन्दति-'भोगमात्रसाम्यलिङ्गाच्चे'ति न्यायनिरूपणेन ज्ञानमात्र एव साम्यनिर्धारणात् बलादिरूपशौर्याद्यंशे आधिक्यं न विन्दति । अथ वा शौरेर्यदाधिक्यं छत्रचामरानन्तगरुडादिपरिकरवैलक्षण्यम्, तन्न गच्छतीत्यर्थः ।

(6) एवमत्र शान्तिपर्वप्रसिद्धव्याघ्रगोमायुवृत्तान्तोऽपि स्मार्यते । तथा हि—परहिंसानिरतः कश्चन राजा स्वायुरन्ते गोमायुरूपं प्राप्तः । पूर्वजन्मज्ञानाच्च जातानुशयः मांसभक्षणादिनिवृत्तः स्वतःपतितफलाद्या-हारः प्रतिवसति स्म । तज्जातीयाश्च गोमायवः तस्येदृशं नैयत्यमसहमानाः सान्त्ववचनेनैव कथञ्चित् तद्बुद्धिप्रचालने प्रवृत्ता अपि न शेकुस्तस्य पिशितभक्षणरुचिमुत्पादयितुम् । अतश्च तादृशं शौचमभिज्ञाय कश्चन शार्दूलस्तं साचिव्ये वरयामास । तच्च गोमायुरवदत् । 'सदृशं मृगराजैतत् तव वाक्यं मदन्तरे । यत्सहायान् मृगयसे धर्मार्थकुशलान् शुचीन् । यदि त्वेतन्मया कार्यं मृगेन्द्र यदि मन्यसे । समयं कर्तुमिच्छामि वर्तितव्यं यथा मयि ॥ कल्पिता या च मे वृत्तिः सा भवेत् त्वयि सुस्थिरा ।' इति । तस्य च व्याघ्रसहवासवशात् तत्समानाहारसेवने रुचिरुत्पन्नेत्यर्थः । अतश्चैवमर्थः—**बलोत्तरेण हरिणानिति** पदच्छेदः । स्वतो बलवत्तरेण **लविभेदिना** मृगलवनाद्यंशे विभेदवता द्वीपिना सह सृगालः **साम्यं**–वृत्तिमात्रे साम्यं अपेक्षमाणः, **हरिणान्**–तन्निहतान् आहारार्थं प्रकल्पितान् मृगान्, **आगमत्** स्वयमपि स्वीकृतवान्, शौर्याधिक्यं तु न विन्दति मृगयूथहननादितदसाधारणकर्म कर्तुं न शक्नोत्येव । अयमप्यर्थो दृष्टान्त-विषया प्रकृतोपयोग्येव ।

(7) एवं मोक्षधर्मगतः सृगालकाश्यपसंवादोऽप्यत्र स्मार्यते । तत्र हि—'वैश्यः कश्चिदृषिसुतं काश्यपं संशितव्रतम् ॥ रथेन पातयामास श्रीमान् दृप्तस्तपस्विनम् । आर्तः स पतितः क्रुद्धः त्यक्त्वाऽ-ऽत्मानमथाब्रवीत् ॥ मरिष्याम्यधनस्येह जीवितार्थो न विद्यते । तथा मुमूर्षुमासीनमकूजन्तमचेतसम् । इन्द्रः सृगालरूपेण बभाषे क्षुब्धमानसम् । मनुष्ययोनिमिच्छन्ति सर्वभूतानि सर्वशः ॥ मनुष्यत्वे च विप्रत्वं सर्व एवाभिनन्दति । मनुष्यो ब्राह्मणश्चासि श्रोत्रियश्चासि काश्यप ॥ सुदुर्लभमवाप्यैतन्न मोहान्मर्तु-

महेसि' इत्यादि । तदयमर्थः सृगालहरिशब्दौ सृगालदेवेन्द्रशरीरपरौ । तदवच्छिन्नात्मपर्यन्ताविवक्षणात् । तथा च, **बलोत्तरेण** वृत्रादिभेदनौपयिकबाहुबलशालिना, **नागमल्लविभेदिना** नगमल्लानां पर्वतश्रेष्ठानां समूहो नागमल्लं तस्य विभेदनशीलेन, गोत्रभिदेत्यर्थः । यद्वा—**नागमल्लेन** ऐरावतेन, **विभेदिना** वैलक्षण्यवता, तदारोहणादिना सृगालशरीराद्भेदवतेत्यर्थः । **हरिणा** देवेन्द्रदेहेन **साम्यमाकांक्षन्** एकात्मधार्यत्वज्ञानभोगादिसाम्यवहनमात्रेण तदीयगौरवाद्यंशेऽपि साम्यमपेक्षमाणश्चेत् । अत्र च वस्तुतस्तस्य तदपेक्षाविरहेऽपि अभूतोपमया कस्यचित् दृसस्य तत्साम्यमुपपादयितुमीदृशापेक्षापरिकल्पनमिति ध्येयम् । **शौर्याधिक्यम्** पराक्रमाद्याधिक्यम् । अथ वा **शौरिरुपेन्द्रः** तस्मादाधिक्यम्—ज्येष्ठत्वप्रयुक्तं श्रेष्ठत्वं न विन्दति । सृगालदेहस्य इन्द्रात्मव्याप्यत्वेन तदीयज्ञानप्रसरसुखभोगादिसाम्यसद्भावेऽपि देहवैलक्षण्यकृतं- देवेन्द्रदेहासाधारणं वृत्रजम्भादिभेदननिपुणवज्रहस्तत्वादिकं पर्वतपक्षच्छेदननागेन्द्रपृष्ठारोहणोपेन्द्रसम्भाव्य- त्वादिकं च श्रेष्ठ्यसम्पादकं सर्वथा न सम्भवत्येवेति भावः । अनेन चोपाख्यानेन एकात्मवत्त्वेनापि समानयोः कयोश्चिदत्यन्तसाम्यसम्पदनस्याशक्यत्वे पर्यवसिते किमुत भिन्नभिन्नात्मशरीरयोः स्वतोऽनेकविध वैलक्षण्यवतोः उत्तमाधमयोः । अतश्च कस्यचित् महनीयमहापुरुषाभिजनसमुद्भवस्य ज्ञानाद्यंशे तत्समशीलस्यान्यस्य निहीनवंशजस्य च न तुल्यरूपं सम्भाव्यत्वम् । अपि तु पितामहं नाथमुनिं विलोकयेति न्यायेन 'कुलान्युत्तारयत्याशु सप्त सप्त च सप्त च' इत्यादिप्रमाणगणघोषणेन च महावंशप्रसूते भगवदभि- मानभूमित्व-महाजनसत्कार्यत्वाद्यधिकाकारवत्त्वं युक्तमेवेति न तत् दृष्ट्वा केवलज्ञानदर्पात् अमर्षणादिकमव- माननादिकं च कार्यमित्यर्थोऽत्र प्रतिष्ठाप्यते । उक्ता हि महाकुलप्रसूते र्विशिष्टसुकृतमूलता भगवद्गीतायाम्- 'शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते । अथवा योगिनामेव कुले भवति धीमताम् ॥' इति । सृगालेनाप्युक्तोऽयमेवार्थः 'दिष्ट्या त्वं न सृगालोऽसि न क्रिमिर्न च मूषकः । न सर्पो न च मण्डूको न चान्यः पापयोनिजः ॥ एतावताऽपि लाभेन तोष्टुमर्हसि काश्यप । जात्यैवैके सुखितराः सन्त्यन्ये भृशदुःखिताः ॥ नैकान्तं सुखमेवेह कचित् पश्यामि कस्यचित् । मनुष्या ह्याढ्यतां प्राप्य राज्यमिच्छन्त्य- नन्तरम् ॥ राज्यात् देवत्वमिच्छन्ति देवत्वादिन्द्रतामपि ।' इत्यादिना । अतश्च स्पष्टमेवात्र सृगाल- देवेन्द्रयोरत्यन्तापकर्षोत्कर्षावुच्यमानौ देहभेदकृतगौरवातिशयं द्रढयतः । न हि सृगालो देवेन्द्रात्म- शरीभूत इत्यैरावतकुम्भिकुम्भपीठाधिरोहणघाटीमाटीकितुं प्रभवति ; न वा देवाधिराज्यं सप्तर्षिशिबि- कारोहणादिकं वा कर्तुं व्यवस्यति । अतः केवलज्ञानमात्रमकार्यकरं दृसस्येति फलितम् ।

(8) एवमत्रेन्द्रियपरतयाऽपि कश्चिदर्थः । **बलोत्तरेण,** बलवान् इन्द्रियग्रामो विद्वांसमपि कर्षतीत्युक्त- महाबलशालिना । **हरिणा** 'तेनास्य हरति प्रज्ञां' 'इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः' इत्युक्तहरण- शक्तिमता चक्षुरादीन्द्रियेण, **नागमल्लविभेदिना,** 'अपि च प्रभूतमदमेदुरात्मनो विषयाटवीषु विविधासु धावतः । स्वबलेन हन्त मनसो निवर्तनं बिसतन्तुनेव सुरदन्तियन्त्रणम्' इत्युक्तस्य मनोरूपस्य **विभेदिना** विक्षोभयित्रा । **सृगालः** तद्वच्चपलस्वभावो जीवात्मा **साम्यमाकांक्षन्** भगवत्सायुज्यमपे-

प्रमाणः, अथवा शसयोरभेदात् **शाम्यम्** । शम एव शाम्यमिति वा शमिनो भावः शाम्यमिति वा विग्रहात् शान्तिमित्यर्थः । **शौर्याधिक्यं न विन्दति** । मनसो दुर्निग्रहत्वात् इन्द्रियाणां च मनोहरणसामर्थ्यातिशयात् । अतिदुर्बलस्य सृगालवत् विषयचपलस्य जीवस्य शौर्यं तद्विषये निष्प्रयोजनमेव भवेदिति भावः । चपलस्य शान्तिः सुदुर्लभेति फलितम् । अनेन चार्थेन शौर्याधिक्यपदप्रत्यभिज्ञापितः अलर्कवृत्तान्तोऽपि स्मार्यते । तथा ह्यनुगीतायाम्—'अलर्को नाम राजर्षिरभवत्सुमहातपाः । धर्मज्ञः सत्यवादी च महात्मा सुदृढव्रतः ॥ स सागरान्तां धनुषा विनिर्जित्य महीमिमाम् । कृत्वा सुदुष्करं कर्म मनः सूक्ष्मे समादधे ॥ स्थितस्य वृक्षमूलेषु तस्य चिन्ता बभूव ह । मनसो मे बलं जातं मनो जित्वा ध्रुवो जयः । मनःप्रति सुतीक्ष्णाग्रानहं मोक्ष्यामि सायकान् ॥' इति । अथ च मनश्चक्षुःश्रोत्रजिह्वाघ्राणत्वग्रूपेष्विन्द्रियेषु बाणान् मुमोच । अथ तैरिन्द्रियैः 'नेमे बाणास्तरिष्यन्ति मामलर्क कथञ्चन । तवैव मर्म भेत्स्यन्ति भिन्नमर्मा मरिष्यसि । अन्यान् बाणान् समीक्षस्व यैस्त्वं मां सूदयिष्यसि ॥' इति प्रत्युक्तः स्वशौर्यभङ्गमवाप्य, 'स विचिन्त्य चिरं कालमलर्को द्विजसत्तम । नाध्यगच्छत् परं श्रेयः योगान्मतिमतां वरः । स एकाग्रं मनः कृत्वा निवृत्तो योगमास्थितः । इन्द्रियाणि जघानाशु बाणेनैकेन वीर्यवान् । योगेनात्मानमाविश्य सिद्धिं परमिकां गतः ॥' इति । ततश्च शाम्यं शान्तिमपेक्षमाणः **हरिणा** इन्द्रियेण सह **शौर्याधिक्यं न विन्दति** योगातिरिक्तस्वबलपराक्रमादिकं न गच्छयेवेत्यर्थः ।

(9) एवमानुशासनिकपर्वगतः सृगालवानरवृत्तान्तोऽपि अत्रानुस्मार्यते ; तत्र हि 'तौ सखायौ पुरा ह्यास्तां मानुषत्वे परन्तप । अन्यां योनिं समापन्नौ सार्गालीं वानरीं तथा ॥ ततः परासून् खादन्तं सृगालं वानरोऽब्रवीत् । श्मशानमध्ये संप्रेक्ष्य पूर्वजातिमनुस्मरन् ॥ किं त्वया पातकं पूर्वं कृतं कर्म सुदारुणम् । यस्त्वं श्मशाने मृतकान् पूतिकानत्सि कुत्सितान् ॥ एवमुक्तः प्रत्युवाच सृगालो वानरं तथा । ब्राह्मणस्य प्रतिश्रुत्य न मया तदुपाहृतम् ॥ तत्कृते पापकीं योनिमापन्नोऽस्मि प्लवङ्गम । तस्मादेवंविधं भैक्षं भक्षयामि बुभुक्षितः ॥ सृगालो वानरं प्राह पुनरेव नरोत्तम । किं त्वया पातकं कर्म कृतं येनासि वानरः ॥....सदा चाहं फलाहारो ब्राह्मणानां प्लवङ्गमः । तस्मान्न ब्राह्मणस्वं तु हर्तव्यं विदुषा सदा ॥ समं विवादो मोक्तव्यो दातव्यं च प्रतिश्रुतम् ॥' इति । ततश्च पूर्वजन्मन्युभावपि मित्रभूतौ मानुषौ पापतारतम्येन सृगालवानरशरीरमापन्नौ तत्तज्जात्यनुगुणाहारभाजौ च । अवरजातित्वादशक्तत्वाच्च सृगालः पूतिमांसभक्षणः । वानरस्तु प्लवनोत्प्लवनादिसामर्थ्यात् वृक्षगतपक्वफलादिभोजनः । अतः पूर्वजन्मसखित्वस्मरणात् एतज्जन्मनि वैषम्यदर्शनाच्च परस्परं तत्कारणविजिज्ञासया समवदेताम् । अतश्चायमर्थः । **बलोत्तरेण** वृक्षाग्रस्थितफलादिग्रहणानुगुणबाहुबलादिशालिना, अत एव नागमल्लविभेदिना **नगमल्लानां** अत्युच्चवृक्षाणां सम्बन्धि यत् फलादिकं तत् **नागमल्लं** तस्य **विभेदिना** दन्तादिभिर्विदळनशीलेन, **हरिणा**—वानरेण, सृगालः साम्यमाकांक्षन् पूर्वजन्मसाम्यस्मरणादेतज्जन्मन्यपि साम्यमन्विच्छन्, **शौर्याधिक्यं न विन्दति**—पक्वफलादनलोलुपत्वेऽपि तद्ग्रहणाद्यनुगुणसामर्थ्यलेशविरहात् तत्कृतोत्कर्षं न भजत एव । अतश्चास्य

मृतशवादनमेव स्वसामर्थ्यानुगुणं लब्धमित्यर्थः । परं तु न तत्र भोग्यताप्रत्ययः । जन्मान्तरस्मरणेन जुगुप्सितत्वावगमात् । अतोऽतिदरिद्रस्य यवाग्वादिपानवत् यावल्लब्धजग्धैवास्य कालयापनेऽपि स्वतुल्यपुरुषगतमुत्कृष्टान्नभोजनमवेक्ष्य तत्साम्यसम्पिपादयिषा लोकस्वभावसिद्धा दुस्त्यजा सृगालस्यापि सञ्जातेति । तथा चैतद्वृत्तान्तख्यापनेन पूर्वजन्मसाम्यादिकमकिञ्चित्करम् ; एतज्जन्मलब्धशरीरभेद एव उत्कर्षापकर्षप्रयोजकतयाऽऽस्थेय इति सारतरार्थः फलितः ॥ ९ ॥

> பலோத்தரேண ஹரிணா நாகமல்லவிபேதிநா.
> ஸ்ருகால: ஸாம்யம் ஆகாங்க்ஷந் சௌர்யாதிக்யம் ந விந்ததி—9

1 சிறந்த வலிவுற்றதும் உயர்ந்த வானைகளைப் பிளந்தெறிகின்றதுமான சிங்கத்துக்கு ஈடாயிருப்பதை நரி விரும்பும் (காட்டு ம்ருகமாய் மாம்ஸம் உண்பதாய் கோரைப்பல்லு முடையதகையாலே). ஆயினும் அதற்குள்ள சௌர்யமேன்மையைப் பெறவாகாது.

2 பலனென்ற பலராமனுக்குப்பின் தோன்றினவனான கண்ணன் ஹரி—பகவானே. குபலயாபீடமென்ற நாகத்தையும் மல்லர்களையும் மாய்த்தவன். இவனுக்கு ஸமமாகத் தன்னை விரும்பினவன் புராணங்களில் ஸ்ருகாலனென்ற பெயரால் சொல்லப்பட்ட பௌண்ட்ரக வாஸுதேவன். சூரனென்ற அரசனின் பேரனாய் வஸுதேவரின் மகனாய் வாஸுதேவனென்னப்பட்ட க்ருஷ்ணனிடம் உள்ள ஆதிக்யத்தை மேன்மையை அந்த பௌண்ட்ரகன் அடையமாட்டிலன். (நீ எப்படி வாஸுதேவனென்றால் பௌண்ட்ரகனுக்குப் பொருள் சொல்லவாகாது.) त्वं कथं वासुदेव इति पृष्टे न कोऽप्यर्थः पौण्ड्रकेन सुवचः ।

3 (யத் அந்தரம் ஸிம்ஹஸ்ருகாலயோர் வநே தத் அந்தரம் வை தவ ராகவஸ்ய ச' என்று ஸீதை ராவணனிடம் பேசின பேச்சை நினைப்பூட்டும் சொற்கள் இருப்பதால் ஸ்ரீராமன் விஷயமாகவும் உரைக்க) பலா என்ற மந்த்ரம் விச்வாமித்ரர் உபதேசித்தது. அதனால் சிறப்புற்றவன் பகவான் நகமல்லம்--ச்ரேஷ்டமான மரம். ஸால விருட்சம். நாகமல்லம்—ஏழுமரா மரங்களின் கூட்டம். அதனைப்பிளந்தவனோடு ஸமனாயிருக்கையை, அல்லது மா—லக்ஷ்மீ ஸீதை, அவளோடு சேர்ந்திருக்கையை விரும்பின ராவணனென்ற—நரி (திருடன்), தன் சௌர்யத்தினாலே ஆதிக்யம் (க என்றால் தலை) தலைகளையுடையனாயிருக்கையை வணங்காமுடிகளுடனிருக்கையைப் பெறமாட்டிலன். (ஹரிணா ராமனால்—ராமன் காரணமாக ராமன் அவனை ஸம்ஹரிக்க முன் வந்ததால்.) चौर्यमेव तस्मिन् ; न तु शौर्यम् ।

4 வேறொருபொருளுமாம். வேதம் பாஞ்சராத்ரம் முதலான ப்ரமாணங்களின் பலமும் தர்க்கபலமும் சேர்ந்து சிறப்பு வாய்ந்தவரும் கவி தார்க்கிக மதயானைகளை யடக்குகின்றவருமான கவிதார்க்கி ஸிம்ஹமாம்

ஸ்ரீதேசிகனென்ற இந்த காவ்யம் இயற்றும் கவியாருடன் குள்ளநரி போல் வஞ்சனையாய் ஞானபலமில்லாமல் பேச்சுக் கற்றிருக்கும் பேர்வழிகள் தாங்களும் கவிகளென்றும் தார்க்கிகர்களென்றும் போட்டிக்கு வந்தாலும் முடிவில் 'வாதாஹவபத்தசூர:' என்னும்படியான சிறந்த சூரத்தன்மையை அல்லது சௌரியான பெருமனாலாம் எப்பெருமையையும் பெறமாட்டார்கள். 'நாகமல்லவிபேதிநா' என்பதை ந, அகமத், லவிபேதிநா என்றும் பிரிக்கலாம். லவி-லவனம் அறுப்பு-பிறர் மதத்தை யறுப்பதாலே பேதிநா அதை அழிக்கின்ற மஹானுடன் நரிபோன்றவர் ஆகாங்க்ஷந்-ஆசைப்பட்டு, லவி-லவம் ஓர் அம்சமாவது உள்ள ஸாம்யம்-ஸமமான நிலைமையை நாகமத்-அடையாதொழிந்தார். ஆயிரம் ச்லோகம் எழுதுகிறேன் என்று போட்டியிட்டு ஆயிரமே எழுதவில்லை. அப்படியிருக்க யோக்யதையில் ஆதிக்யம் மேம்பாட்டை அடைவது ஏதென்றதாம். शौर्याधिक्यं नास्ति ; असमर्थ इति प्रथाधिक्यमेव ।

5 ஜீவாத்மாவுக்கும் பரமாத்மாவுக்கும் உள்ள பேதமும் பொருளாம். பலம் சக்தி முதலான கல்யாண குணச்சிறப்பு உடையனும் நாகமல்ல-ஸர்ப்ப ராஜனை ஆதிசேஷன், வி-கருடபட்சி இவர்களினும் பேதிநா-வைலக்ஷண்யமுடையனுமான ஹரிணா-விஷ்ணுவுடன் ஜீவன் ஸாம்யத்தை அபேக்ஷிக்கிறவன் மோக்ஷத்தில் ஜ்ஞாந ஸாம்யமும்-ஆனந்த ஸாம்யமும் அடையலாமாகிலும் பகவானைப் போலிருக்க அதிக சௌர்யத்தைப் பெறுவதில்லை. ஸர்வசக்தித்வாதிகளைப் பெறுன்.

6 பாரத சாந்தி பர்வத்திலிருக்கும் புலியும் நரியுமென்ற கதையையும் கொள்க. பிறரை ஹிம்ஸித்து வந்த ஓர் அரசன் நரியாகப் பிறந்தான். பூர்வஜன்ம ஞானம் ஏற்பட்டு இனி ஹிம்ஸிப்பதில்லை என்ற வ்ரதத்துடன் இருந்தான். அந்த விரதத்தையழிக்க நரிகளால் முடியவில்லை. ஒரு புலி அந்த நரியோடு சினேகம் கொண்டது. அதற்கு இதுவும் இசைந்து சில விஷயங்களில் மட்டும் ஸாம்யத்தை யடைந்து ஹிம்ஸையில் இறங்காமலிருந்தது. முடிவில் ஸஹவாஸ தோஷத்தால் மான்மாமிசங்களையும் உட்கொள்ள மனம் பெற்றது. இங்கே ஹரிணாந் அகமத் லவிபேதிநா எனப் பிரிக்க. பலத்திற் சிறந்ததும் லவிபேதிநா வெட்டிப் பிளப்பதுமான புலியோடு சினேகம் பெற்ற நரியானது ஹரிணாந்—மான்களையும் அகமத்—ஆஹாரமாகப் பெற்றது. புலியைப்போல் அதிக சௌர்யத்தை பராக்ரமத்தை யடையவில்லை.

7 நரியும் காச்யபனும் என்ற கதை மோக்ஷ தர்மத்தில். தனிகனான வைசியனொருவன் ருஷிகுமாரனை காச்யபனை வண்டியினின்று தள்ளினான். காச்யபனுக்கு, ஏழைக்கு உயிர் எதற்கென்று தன்னை அழித்துக்கொள்ள எண்ணம் உண்டாயிற்று. இந்த்ரன் நரியுருவில்

நெருங்கி நல்ல உபதேசம் செய்து திருத்தினன். இந்த்ரன் நரியானு னென்பது இங்கே நமக்கு வேண்டியது. பொருள் என்னவென்றால்— ஸ்ருகாலம்—நரியுருவானது. பலத்தில் சிறந்ததும், நகமாவது மலை—நக மல்லங்கள் சிறந்த மலைகள். நாகமல்லமாவது—மலைக்கூட்டம். அனேக மலைகளைப் பிளந்து சிறகுகளை வெட்டினதுமான ஹரிணு—தேவேந்த்ர வுருவுடன் ஸாம்யம்--இந்த்ரனென்ற ஆத்மாவைப் பெற்றிருக்கையென்ற ஒப்புமையை அடைந்தபோதிலும் சௌர்யாதிக்யம்—அந்த உடல்போல் பலமுள்ளதாகையையும் சௌரி என்ற உபேந்த்ரனுக்கு அண்ணனுகை யையும் அடைந்துவிடாது என்றதாம். நாகமல்லம்—ஐராவதம்; அதனுல் சிறப்புற்ற என்னலுமாம்.

8 இந்திரியத்தைக்கொண்டும் பொருள்—ஸ்ருகாலம்—நரிபோல் சாபல்யம் உடைய ஜீவாத்மா, அதிக பலம் பெற்றதும், திடமான மனத்தையும் நல்வழியிலிருந்து வேறுபடுத்துவதுமான (ஹரி) இந்திரி யத்தைக் கொண்டு பகவானேடு ஸாம்யமென்ற மோக்ஷத்தையும், சாம் யம்-சாந்தி என்ற குணத்தையும் விரும்புகின்றவன் தகுந்த சிறந்த சக்தியைப் பெறமாட்டான். ஆகையால் அலர்க்கரிஷியைப்போலே இந்திரிய ஜயத்தில் நோக்கு உடையனுக வேண்டும்.

9 அநுசாஸனபர்வாவில் நரியும் குரங்குமென்றதொரு கதை-மிக்க சினேகம் உடைய மனிதர் இருவர் ஒருவன் நரியாகவும் ஒருவன் குரங் காகவும் பிறந்தனர். பூர்வஜன்ம நினைவும் உடையராயினர். குரங்கு நரியைக் கண்டு கேட்டது ஏன் இப்படி சுடுகாட்டில் பிணம் தின்கிறு யென்று. நரி கூறிற்று—முன் பிறவியில் ப்ராஹ்மணனுக்குக் கொடுப்ப தாகச் சொல்லிக் கொடாமலிருந்தேன், அதனுலென்று. நீ ஏன் குரங்கானுயென்று நரி கேட்க, நானும் பிராஹ்மணர்களின் சொத்துக் களைப் பறித்திருந்தேன் என்றது குரங்கு. ஆக ச்லோகத்தின் பொருளா வது—பலம் பெற்றதும் நாகமல்லம் விருட்சக் காடு பல சிறந்த மரங் களில் தாவுகின்றதுமான குரங்குடன் சேர்ந்து நரியானது. சினேகத்தை விரும்புகின்றதாய் தான் முன் பிறவியில் செய்த பாபம் அறிந்து வியசனத் தாலே சோர்ந்து தன்னை சூரனுக நினைக்காமல்நொந்திருந்தது என்றதாம்.

सुदर्शनभृता कश्चिदजहत्कीर्तिमत्सरः ।
महाशान्तपदाकर्षी जलजन्तुर्निगृह्यते ॥ १० ॥

तदेवमुक्तश्लोकैरीर्ष्याप्रयुक्ततत्तन्नामस्थानरूपकृत्यतत्समुदायादेरन्तत ऐकात्म्यादपि साम्यभजनस्या- कार्यकरत्वं सदृष्टान्तमुक्त्वा तत एव हेतोः 'दह्यमानाः सुतीव्रेण नीचाः परयशोऽग्निना । अशक्तास्तत्पदं गन्तुं ततो निन्दां प्रकुर्वते ॥' इत्युक्तरीत्या परोत्कर्षाद्यसहिष्णुतया तदीयपदापहार एव प्रवृत्तानां

दृष्टानामन्ततो निग्रह एव बलीयान् आयातीत्यर्थमनुरूपदृष्टान्तनिदर्शनेन प्रदर्शयति सुदर्शनेति। सुदर्शनभृता शोभनसिद्धान्तशालिना । शोभनत्वं च युक्तिनिकराभेद्यत्वौपयिकविषयसामञ्जस्यम् । केनचिदिति गम्यते । अजहत्कीर्तिमत्सरः अजहत् कीर्तिमत्सरो यस्य(यम् ?) इति विग्रहे अपरित्यक्तकीर्तिविषकमात्सर्यवानित्यर्थः । अजहत्कीर्तिषु मत्सरो यस्येति विग्रहे तु तादृशकीर्तिमद्विषयकमात्सर्यवानित्यर्थो लभ्यते । अत एव महाशान्तानां सर्वोत्कृष्टशान्तिमतां पदानि स्थानानि, पूज्यगुरुत्वमहार्घत्वादीनि तान्याकर्षतीति तथोक्तः तदपलापनिरतो वा, स्वस्मिन् तदारोपरूपापहारनिरतो वा, स्वस्यापि तथात्वकथनेन तौल्यापादको वा, कश्चित् जडजन्तुः एतादृशेर्ष्यया तत्पदाहरणे परे परिहसेयुरिति ज्ञानलेशविधुरः लोकवृत्तानभिज्ञ इत्यर्थः । निगृह्यते तत्तद्विद्वद्गोष्ठीसमागमकाले केवलनामधारिणां निरक्षरकुक्षितां स्वस्य च सर्वशास्त्रवैशारद्यं च निरवद्यं प्रसाध्य न युक्तेयमस्येदृशासहिष्णुतेति सकलविबुधगोष्ठीबहिष्ठीकरणेन प्रशान्तमत्सरः क्रियते । सद्बुद्ध्युदयाय सभाध्यक्षैर्निगृह्यत इत्यर्थः ।

(2) एवं गजेन्द्रपरोऽपि कश्चिदर्थः । कीर्तिमत् प्रसादवत् पङ्कवद्वा, 'कीर्तिःप्रसादयशसोः कर्दमे विस्तृतावपि' इति रत्नमाला । 'कीर्तिः पङ्के यशस्यपि' इति वैजयन्ती च । सरः ह्रदम् अजहत् चिरकालं तत्रैव वसन् कश्चित् जलजन्तुः यादोविशेषः नक्रः महाशान्तपदाकर्षी सन् महाशान्तस्य महाशान्तनामकऋषेः (?) गजरूपतामापन्नस्य कमलाहरणाय तादृशह्रदेऽवतीर्णस्य पदं चरणं आकर्षतीति तथोक्तः सन् सुदर्शनभृता चक्रायुधधारिणा भगवता निगृह्यते तादृशचक्रप्रयोगान्निगृह्यते । विशेष्यस्य साभिप्रायत्वात् तदर्थलाभः । महाशान्त इति कश्चिन्मुनिः वने तपस्यन् तत्र च यदृच्छयाऽऽगतं करेणुबृन्दसन्दितं कञ्चन कळभमालोक्य तदीयक्रीडादिदर्शननिरतः तमेव स्मरन् देहान्ते गजरूपमेवास्थाय पूर्वजन्मज्ञानात् भगवदाराधनादिनिरतः प्रतिदिनं सहस्राधिकानि सहस्रपत्राण्याहृत्य भगवते समर्पयन् कदाचित् ग्राहेण गृहीत इति पौराणिकी कथाऽत्राऽनुसन्धेया ।

(3) अन्योऽप्यर्थः । सुदर्शनं चक्राङ्कनं बिभर्ति पोषयतीति तथोक्तेन श्रीमत्सच्चरित्ररक्षाप्रणयनेन सुदर्शनधारणस्थापकेन श्रीमद्वेदान्तगुरुणा, अजहत्कीर्तिषु महानुभावेषु श्रीवैष्णवेषु मत्सरो मात्सर्यं यस्य तथोक्तः कश्चन जडजन्तुः मूढजनः सुदर्शनादिधारणप्रमाणगणानभिज्ञः महाशान्तपदाकर्षी सन् महाशान्तानां पदं स्थानं श्रीरङ्गादिकं आकर्षति क्षोभयतीति तथोक्तः सन् निगृह्यते । 'सद्भिर्धृतेषु सततं विमतिं दधुर्ये पत्युस्समस्तजगतां परमायुधेषु । तैरेव तान्निगमशाणनिघर्षदीप्तैस्तर्कात्मना परिणतैः प्रहरामि मूर्ध्नान् ॥' इत्युक्तक्रमेण तर्करूपेण परिणतेन सुदर्शनेनैव विजीयत इत्यर्थः ।

(4) एवमत्र 'कलिपणिधिलक्षणैः कलितशाक्यलोकायतैस्तुरुष्कयवनादिभिर्जगति जृम्भमाणं भयम् । प्रकृष्टनिजशक्तिभिः प्रसभमायुधैः पञ्चभिः क्षितित्रिदशरक्षकैः क्षपय रङ्गनाथ क्षणात् ॥' इति श्लोकार्थोऽप्यनुस्मार्यते । तथा हि । सुदर्शनभृता चक्राद्यायुधभृता भगवता अजहत्कीर्तिमत्सरः 'निष्कारणमेव वैरिणो जगति' इत्युक्तनीत्या स्वाभाविकमान्यजनविद्वेषवान् महाशान्तानां पदं श्रीरङ्गं आकर्षति विध्वंसयतीति तथोक्तः

कश्चित् जडजन्तुः म्लेच्छयवनादिः निगृह्यते उच्छिद्यते । कदाचित् श्रीरङ्गक्षेत्रे तुरुष्कयवनादि-कलापोपनिपातात् प्रक्षुब्धेषु जनेषु भयात् कान्दिशीकेषु भगवद्दिव्यविग्रहसंरक्षणाय तदा तद्दिव्यदेशनि-वासिना श्रीमदाचार्यवर्येणाभीतिस्तवकथनपुरस्सरमभ्यर्थितो भगवान् तादृशम्लेच्छयोधानां परस्परवैरि-भावमुद्भाव्य महाद्वन्द्वयुद्धमुत्पादयन् केनचित् तन्मध्य आविर्भवता रथाङ्गपाणिना तद्यूथमुदच्छिनदिति ऐतिह्यकथाऽत्र स्मर्तव्या ।

(5) एवमत्र सुदर्शनोपाख्यानमप्यानुशासनिकपर्वगतं प्रत्यभिज्ञाप्यते । तथा हि—इक्ष्वाकुवंशप्रभवां सुदर्शनां नाम कन्यामग्निः कामयमानः परिणीय तस्यां सुदर्शनं नाम पुत्रमुत्पादयामास । स च शिशुरेव सकलवेदशास्त्रमधीयानः ओघवतीं नाम कन्यां उपयम्य गृहस्थाश्रमधर्ममनुतिष्ठन् महाशान्तिनिधिः गृहस्थ एव मृत्युं) विजेष्य इति प्रतिज्ञाय कुरुक्षेत्रे प्रत्यवात्सीत् । स चास्यै अतिथिपूजनमेव गृहस्थानां मुख्यधर्म इत्यसकृदावेद्य इध्मार्थमरण्यं गतः । तदानीं तदीयप्रतिज्ञाश्रवणजनितमन्युर्मृत्युः तमेव विप्रम-नवरतरन्ध्रान्वेषी प्रत्यपालयत् । गते च तस्मिन् धर्म एव मूर्तिमान् आश्रमं प्रविश्य तत्पत्नया सम्यक् सत्कृतोऽप्यतृप्यन् तामेव रत्यर्थं प्रार्थयामास । तस्यां च भर्तृवचनमनुस्मृत्य तदारिराधयिषया कथञ्चि-दभ्युपगम्य तत्संश्लेषाय प्रयतमानायामिध्महस्तो भर्ताऽऽगत्य तत्रत्यवृत्तान्तमुपश्रुत्य सन्तुष्टः त्यक्तमन्युः त्यक्तेर्ष्यश्च सन् तत्प्रतिग्रहाय तमतिथिं प्रार्थयामास । सोऽपि मृत्युरस्य शान्त्यादिकं परामृश्य सन्तुष्टतमः स्वं रूपमास्थाय 'धर्मोऽहमस्मि भद्रं ते जिज्ञासार्थं तवानघ । प्राप्तः सत्यं च ते ज्ञात्वा प्रीतिर्मे परमा त्वयि ॥ विजितश्च त्वया मृत्युर्योऽयं त्वामनुगच्छति । गृहस्थधर्मेणानेन कामक्रोधौ च ते जितौ ॥ स्नेहो रागश्च तन्द्री च मोहो द्रोहश्च केवलः' इत्याद्यब्रवीत् । तदयमर्थः—**सुदर्शनभृता** सुदर्शननाम-भृता शोभनदर्शनवता वा । 'सुदर्शनस्तु रूपेण पूर्णेन्दुसदृशोपमः' इत्युक्तत्वात् । **अजहत्कीर्तिमत्सरः** मृत्युजयादिकीर्तिश्रवणमृष्यमाणः, महाशान्त इति **पदं** स्थानं व्यवसायं वा निरोद्धुमिच्छन् कश्चित् जडजन्तुः शक्याशक्यविवेकमन्तरेण प्रवर्तमानः मृत्युरूपो मूढजन्तुः[1] निगृह्यते विजीयत इति ।

(6) एवं श्रीभागवतोक्तः सुदर्शनवृत्तान्तोऽप्यत्र स्मारितो भवति । तत्र हि सुदर्शनो नाम कश्चन गन्धर्वः रूपदर्पेण, विरूपान् ऋषीन् परिहसन्, तदीयशापादहिरूपं प्राप्तः सरस्वतीनदीतीरे प्रतिवसन् यदृच्छया तत्रागतेषु श्रीकृष्णबलदेवादिषु सनन्देषु तत्तीरे जलं प्राश्य शयानेषु तत्र शयानं श्रीनन्दगोपं ग्रसित्वा श्रीकृष्णपादघातेन सर्पवपुर्हित्वा गन्धर्वरूपमापद्य भगवन्तमस्तौदिति । तदेवमर्थः—**सुदर्शन-शरीरभृता** गन्धर्वेण **कीर्तिमत्** प्रसादवत् सरः सरस्वतीतीरम् । सरस्वतीशब्दस्य नामैकदेशनिर्देशः । सरस्वतीप्रवाहपरो वा । गङ्गायां घोष इतिवत् तीरपरत्वम् । अजहत् कश्चित् **जलजन्तुः** जलतीरवर्ति सर्पशरीरम् । महाशान्तस्य भगवतः 'महेश्वरो महाशान्तः' इति भारतप्रयोगात् । **पदा** पादेन, आकर्षी

---

1 जानां जातानां लः लयकरः मृत्युरित्यर्थः स्यात् ।

आकर्षणवान् सन् निगृह्यते त्यज्यते सुदर्शनदेहभरणेन जडजन्तुदेहस्त्यज्यत[1] इत्यर्थः। 'तमस्पृशत् पदाऽभ्येत्य भगवान् सात्वतां पतिः। ऊषुः सरस्वतीतीरे' इत्येतत् सरश्शब्देन ज्ञापितम्। 'यदहं लोकगुरुणा पदा स्पृष्टो हताशुभः' इत्येतत्पदाकर्षीत्यनेन ज्ञापितम्।

(7) एवं मन्मथारिपरतयाऽपि कश्चिदर्थः—**सुदर्शनभृता** शोभनतृतीयाक्षिवीक्षणभृता पशुपतिना, शोभनकटाक्षवता भगवता वा, **अजहत्कीर्तिमत्सरः** विशुद्धकीर्तिषु महात्मसु मात्सर्यवान् **महाशान्तपदाकर्षी** तपस्विनां व्यवसायभञ्जकः। 'पदं व्यवसितत्राणे'त्यमरः। **जडजन्तुः** निखिलजन्तुजाड्योत्पादको मन्मथरूपः। जडो जन्तुः येन स इति विग्रहात् तदर्थलाभः। उक्तं हि—'कुवलयनयनानां कूणिते लोचनास्त्रे शरणयतु विवेकः कां दिशं कान्दिशीकः' इति। **निगृह्यते**—भस्मीक्रियते। जाड्यरूपमविवेकं परित्याज्यते वा। कामस्य परकीर्तिमत्सरजनकत्वेन अजहत्कीर्तिमत्सरत्वं शान्तचित्ताध्यवसायभञ्जकत्वेन महाशान्तपदाकर्षित्वं च प्रसिद्धमेव। उच्यते ह्येतच्छ्लोकार्थो [2]भगवत्परः सङ्कल्पसूर्योदये, 'मदनमत्सरमानमयः पुमान् बहुपिशाचगृहीत इवार्भकः। निगमसिद्धनरेन्द्रनिरीक्षया निपुणपद्धतिमभ्युपपद्यते' इति। मदनस्य मत्सराविनाभावः भगवत्कटाक्षनिवर्तनीयता चात्र स्पष्टमेवोच्यत इति बोद्धव्यम्। निपुणपद्धतिः कामादिपरित्यागेन सम्यग्विवेकोत्पत्तिः।

(8) एवमत्रोपोद्घाताधिकार[3]वृत्तान्तोऽपि स्मार्यते। तत्र हि **सुदर्शनभृता**—'जायमानं हि पुरुषं यं पश्येन्मधुसूदनः। सात्त्विकः स तु विज्ञेयः स वै मोक्षार्थचिन्तकः॥' इत्युक्तजन्मकालसिद्धशोभनभगवत्कटाक्षभरणेन। भावे क्विप्। कर्तरि क्विपा वा शोभनकटाक्षवता भगवतेत्यर्थः। जडजन्तुः तत्त्वहितादिविवेकवैधुर्येण यथाजातवद्वर्तमानः। कः चिदिति पदच्छेदः। को वा जीवात्मेत्यर्थः। **अजहत्कीर्तिमत्सरः** कीर्तिमन्तो धार्मिकाः हितोपदेशपराः—कीर्तिः प्रसादः तद्वन्तोऽनुग्रहपराः इत्यर्थः। 'कीर्तिः प्रसादयशसोः' इति कोशात्। तेषां सरः सरणं अनुसरणं तत् अजहत् यस्य तथोक्तः। 'ईश्वरस्य च सौहार्दं यदृच्छासुकृतं तथा। विष्णोः कटाक्षमद्वेषमाभिमुख्यं च सात्त्विकैः॥ सम्भाषणं षडेतानि ह्याचार्यप्राप्तिहेतवः।' इत्युक्ताचार्यप्राप्तिहेतुभूतधार्मिकप्रासङ्ग्यादिकं लभमानः। यद्वा कीर्तिमतां सरः पङ्क्तिः अजहत् यं सः इति द्वितीयाबहुव्रीहिः भागवतगोष्ठीकक्षीकृत इत्यर्थः। अत एव **महाशान्तपदाकर्षी** महाशान्तानां 'डम्भासूयादिमुक्त'मित्युक्तगुणपूर्तिमतां आचार्याणां पदं—चरणं आकर्षति—स्वोज्जीवकत्वेन स्वीकरोतीति तथोक्तः। आकर्षणं हि नाम स्वप्रयत्नेन परस्य स्वसम्बन्धापादनम्। ततश्च समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमित्याद्युक्तप्रकारेण स्वयमेवाचार्यमुपसङ्क्रम्य 'तत्पादौ गृह्य मूर्धनी'त्युक्ततदीयचरणसम्पादकः सन् **निगृह्यते** निग्रहविषयो भवति। को वा जीवः जायमानकटाक्ष-

---

1 महाशान्तपदेति पृथक्पदं युक्तम्। आकर्षी नन्दगोपाकर्षी जन्तुर्महाशान्तस्य कृष्णस्य पदा पादेन निगृह्यत इत्यर्थः।

2 भगवत्पर इति। भगवत्प्रधानक इत्यर्थः।

3 उपोद्घाताधिकारः श्रीमद्रहस्यत्रयसारे।

शाली धार्मिकसहवासाचार्यसम्बन्धादिमान् सन् निग्रहं प्राप्नोति ? न कोऽपीत्यर्थः । अत एव गीतं—'न हि कल्याणकृत् कश्चित् दुर्गतिं तात गच्छति' इति । अनेन चार्थेन 'तल्लब्धस्वावकाशप्रथमगुरुकृपागृह्यमाणः कदाचित् मुक्तैश्वर्यान्तसम्पन्निधिरपि भविता कश्चिदित्थं विपश्चित्' इत्युक्तरीत्या भगवत्कटाक्षविषयीकृतः क्रमेण मुक्तिपर्यन्तो भवतीत्यर्थः सम्पद्यते ।

(9) एवं मन्मथपरतयाऽपि कश्चिदर्थः—**सुदर्शनभृता** शोभनसौन्दर्यभृता मन्मथेन, समीचीनदर्शनीयताभृता रम्भादिरूपाप्सरोगणेन वा, **कीर्तौमत्सरः** कीर्तिविषये ईर्ष्या कीर्तिसम्पादनप्रयत्न इत्यर्थः । सः **अजहत्** यस्य ख्यात्याद्यपेक्षावानित्यर्थः फलितः । **महाशायाः** अतिशयिततृष्णायाः **अन्तपदं** चरमकाष्ठा, तदाकर्षति स्वीकरोतीति तथोक्तः । **जडजन्तुः** अविवेकिजनः **निगृह्यते** परिहासपदं क्रियते । अन्तः ख्यात्यादितृष्णाधिकः बहिः शान्तवेषधारी मन्मथेन तत्परतन्त्रया रम्भादिकयाऽऽपि निर्जीयत इत्यर्थः ।

(10) एवं सूर्यपरोऽपि कश्चित्—**सुदर्शनभृता** सम्यगुदितेन दृष्टिविषयतां गतेन सूर्येण **जडजन्तुः** तमोरूपः जन्तुः जन्तुशब्दस्य केवलयोगेनाचेतनवाचकत्वाविघातात् । स्वयं जडत्वात् परगतजाड्योत्पादकत्वाच्च जडत्वम् । जडो जन्तुर्येनेति वा विगृह्य तमःपरत्वं बोद्धव्यम् । कीदृशः । **महाशन्तपदाकर्षी** महादिगन्तस्थानं आकर्षति स्ववासतया स्वीकरोतीति तथोक्तः । रवेरुदयात् प्रागेव नभोमण्डलविसृमरं तमः समवैति । दिगन्तनिलीनं तु सम्यग्दर्शनपथमधिरूढेन गभस्तिमालिनेति प्रसिद्धमेव । यथोच्यते अनर्घराघवे—'इन्दुर्यद्युदयाद्रिमूर्ध्नि न विभात्यद्यापि तन्मा स्म भूत्' इत्यादि । यद्वा महाशानां महादिशां अन्तपदं अन्तिमस्थानं तदाकर्षति । अन्धकारप्राचुर्ये अतिदूरवर्तिपदार्थानां समीपदेशे आकर्षणस्य सूर्योदये च तदुत्सारणस्य च कविभिर्वर्ण्यमानत्वात् । अजहत् कीर्तिमत् यथा तथा सरतीति तथोक्तः । अतिविस्तृतः सन् सञ्चरणशील इत्यर्थः । 'कर्दमे विस्तृतावपि' इति प्रागुक्तकोशात् । तादृशं तमो निगृह्यते । सर्वत्रादर्शनपदं नीयत इत्यर्थः ।

(11) एवमादर्शादिपरतयाऽपि । समीचीनं दर्शनं झटिति प्रतिबिम्बग्रहणादियोग्यः; प्रसादविशेषः तद्भृता आदर्शेन कश्चित् जडजन्तुः प्रतिबिम्बभूतो जन्तुविशेषः । प्रतिबिम्बस्य ज्ञानशून्यत्वेन जडत्वात् । स **निगृह्यते** नितरां गृह्यते । कीदृशः **अजहत्कीर्तिमत्सु** अपरित्यक्तप्रसादवत्सु पदार्थेषु **सरति** अनुगच्छतीति तथोक्तः । जलादिनिर्मलप्रदेशस्याक्षुब्धस्य प्रतिबिम्बग्राहकत्वादिति भावः । यद्वा कीर्तिमतां सरः सरणं अजहत् यस्य तथाविधः महाशान्तपदाकर्षी महादिगन्तव्यापिपदार्थानपि स्वेन सह आकर्षति प्रतिफलनयोग्यं करोतीति तादृशः । कस्यचित्प्रतिबिम्बे गृह्यमाणे तदानीं तेन सहैवातिदूरवर्तिपदार्थानामपि ग्रहणस्य दृश्यमानत्वादिति भावः ।

(12) एवमद्वैत्यभिमतोऽपि कश्चन वाक्यार्थः । तथा हि—**सुदर्शनभृता** 'श्रोतव्यो मन्तव्यो द्रष्टव्यः' इत्युक्तप्रत्यक्षतापन्नज्ञानेन । प्रत्यक्षतापन्नेनेति फलितम् तद्भृता पुरुषेण वा । **जडजन्तुः** जडरूपो

न्यपदार्थः। अज्ञानप्रयुक्तं सकलमपि पदार्थजातमित्यर्थः। कीदृशः **महाशान्तपदाकर्षी** महादिगन्तान् स्थानतया स्वीकुर्वन्। कस्यचिदज्ञानमात्रात् सर्वदिग्व्यापिपदार्थोत्पत्तेः तन्मते स्वीकारादिति भावः। **अजहत्कीर्तिमत्सरः** अपरित्यजद्विस्तारव....[वत्प्रसरः ?] सर्वत्र विसरणयोग्यः। तथा समीचीन-ब्रह्मात्मैक्यप्रत्यक्षवता पुरुषेण **निगृह्यते** विनाश्यते। **कश्चिन्निगृह्यते** को वा चिद्रूपो निगृह्यते ; जडानामेव विनाशादिति भावः।

(13) एवमाचार्यनिष्ठविषयकोऽपि कश्चित्। कश्चित् **जडजन्तुः** 'अन्धोऽनन्धग्रहणवशगो याति रङ्गेश यद्वदि'त्युक्तः ज्ञानहीनः पुरुषः **महाशान्तपदाकर्षी** महाशान्तानां आचार्याणां भागवतानां वा पदमेव चरणमेव स्वोपायतया आकर्षति स्वीकरोतीति तथाविधः। आचार्याद्याश्रित इत्यर्थः। तदा-श्रयस्यापि हेतुमाह **अजहदि**ति। कीर्तिमतां केवलकारुणिकानां धार्मिकाणामनुसरणवान् तादृशः अज्ञानिपुरुषोऽपि **सुदर्शनभृता** भगवत्सङ्कल्पभृता तादृशाचार्यसमाश्रयणजन्यमोक्षयिष्यामिसङ्कल्पभृता भगवता **निगृह्यते** नितरां स्वीक्रियते। सुदर्शनस्य भगवत्सङ्कल्परूपत्वं 'व्यक्तौ सन्नाहसङ्कल्पौ विश्व-गोप्तुरिमौ हरेः। प्रथितावागमग्रामे पक्षीश्वरसुदर्शनौ' इति सङ्कल्पसूर्योदयश्लोके, 'यदा देवस्य सङ्कल्पः सुदर्शनसमाह्वयः। आयुधादिस्वरूपेण कारकत्वं प्रपद्यते ॥' इत्यादिसंहितावचने चानुसन्धेयम्। यद्वा **कः चिदि**ति पदं विच्छिद्य तादृशाचार्यादिनिष्ठः को वा जीवात्मा भगवत्सङ्कल्पेन निगृह्यते इत्यर्थः।

(14) एवं गरुडपरतयाऽपि काचन योजना। **सुदर्शनभृता** मङ्गळकरदर्शनभृता। गरुडदर्शनस्य मङ्गळकरतया लोकशास्त्रप्रसिद्धिर्भूयसी। तादृशेन गरुडेन कश्चित् **जलजन्तुः** कच्छपः निगृह्यते। नितरां गृह्यत इति वा निगीर्यत इति वाऽर्थः। कोऽयम्? **अजहत् कीर्तिमत्सरः** विस्तृतं सरः अजहत्। कच्छपस्य जले बलाधिक्यात्। अत एव **महाशान्तपदाकर्षी** महान् अशान्तः युद्धकरणे अविश्रान्तश्च योऽयं गजः तस्य पदं आकर्षतीति तथोक्तः। जले कर्षति कच्छप इति तत्प्रकरणोक्तेः। अविश्रान्ति-श्चोक्ता 'सरसि नखमुखे पादपे गण्डशैले तुण्डाग्रे कण्ठरन्ध्रे तदनु च जठरे निर्विशेषं युयुत्सू' इति। **नितरां ग्रहणं** जीवग्राहं ग्रहणम्। उक्तं हि 'जीवग्राहं गृहीत्वा कमठकरटिनौ भक्षयन् पक्षिमल्लः' इति। अथ वा **जलजन्तुः** जलमयो जन्तुः सोमरसरूपः। जन्तुत्वं च तस्य धेन्वादिरूपेण गन्धर्वादिभ्योऽपक्रमणादिदर्शनादवगम्यते। यदाम्नायते—'सा रोहिद्रूपं कृत्वा गन्धर्वेभ्योपक्रम्यातिष्ठत्' इति। स च गायत्रीवपुषा तार्क्ष्येण गृह्यते। तच्च कद्रूश्च वा इत्यादिब्राह्मणे प्रसिद्धम्। कीदृशः **अजहत्कीर्तिमत्सरः कीर्तिमतां** अग्निष्टोमादिसोमसंस्थानुष्ठानलब्धप्रतिष्ठानां सरणं अनुविधानं अजहत् यस्य। जन्मान्तरसुकृतवशेन सोमयाजित्वकीर्तिसम्पन्नानां सोमरसः स्वाधीनतां प्रतिपद्यत इति भावः। महाशान्तपदाकर्षी 'सर्वेभ्यो ज्योतिष्टोमः' इति तत्तदाशावधिसकलपदप्रदानशक्त इत्यर्थः। महाशान्तं पदान्याकर्षतीति विग्रहो बोद्धव्यः। **महाशा** महातृष्णा यद्वा **महेन** उत्सवेन अशान्तं यत्पदं नित्योत्सवादर्यं स्वर्गाख्यं पदं तदाकर्षि। 'यन्न दुःखेन सम्भिन्नम्' इत्यादिप्रमाणप्रतिपन्नं स्वर्गसुखं फलतया आकर्षतीति

वथोक्त इत्यर्थः । अथवा महान्ति आशान्तसंख्याकानि पदानि आकर्षतीति वा । आशाशब्देन चतुःसंख्या विवक्षिता । सा अन्तः अवधिः येषां तानि पदानि अक्षराणि आकर्षतीति तथोक्तः । सोमं ग्रहीतुं प्रयातयोः जगतीत्रिष्टुभोः अक्षरचतुष्टयं सोमः प्रत्यग्रहीदिति पूर्वोक्तब्राह्मणे स्पष्टम् । प्रत्येकाक्षराणामर्थबोधकतायाः निरुक्तसिद्धत्वात् पदत्वमविरुद्धमिति ।

(15) एवमिन्द्रजालविद्यासंग्रहस्थेन 'सुदर्शनस्य मूलं तु करे धृत्वा जयी भवेत्' इति श्लोकेन सुदर्शनाख्यौषधिविशेषमूलभृता स्वकीर्तिश्रवणजनितमात्सर्यवान् कश्चन वादी निगृह्यते विजीयत इत्यर्थोऽपि बोद्धव्यः।

एवमत्र संज्ञानं विज्ञानमित्यनुवाकस्थाः सुदर्शनं कः महा-शान्त-तपत् यशःपर्यायकीर्त्यादिशब्दा निवेशिताः कश्चन शब्दालङ्कारमारचयन्तीति बोद्धव्यम् ॥ १० ॥

इत्थं पञ्चदशार्था उक्ताः पद्यस्य चाद्य हृद्यस्य ।
एवंप्रायाः प्रायो ज्ञेया न्यायादितोऽपरेऽप्यर्थाः ।

ஸுதர்சநப்ருதா கச்சித் அஜஹத்கீர்த்திமத்ஸா:—
மஹாசாந்த பதாகர்ஷீ ஜலஜந்துர் நிக்ருஹ்யதே (10)

1 சிறந்த மதத்தில் தெளிவு உடைய மஹாத்மாவினுல், புகழ் விடாத மஹான்களிடத்திலே த்வேஷம் உடையனும் சாந்திகுணம் நிறைந்தவரின் பெருமைகளை மறைக்கின்றவனுமான மூடமனிதன் சமயத்தில் திருத்தப்படுகிறுன்.

2 கீர்த்தி--சேறு. சேறு நிறைந்த ஸரஸ்ஸை-பொய்கையை விடாததான ஒரு நீர்ஜந்து—முதலையானது மஹாசாந்தனென்ற ரிஷி கஜேந்த்ரனுகப் பிறந்திருந்த போது அதன் காலை நீரில் இழுத்ததாய், திருவாழியை ஏந்தி வந்த எம்பெருமானுல் சிக்ஷிக்கப்பட்டது.

3 புகழ் வாய்ந்த பெரியோர்களிடத்தில் த்வேஷம் கொண்டு ஸ்ரீரங்கம் முதலான சாந்திக்கு இடமான கோயில்களை அழிக்கும் முகமதியக் கூட்டமானது. திருவாழியின் பெருமையை ஸ்தாபிக்கும் பெரியோரான ஸ்ரீதேசிகாதி மஹான்களின் அபீதிஸ்தவம் முதலான ப்ரார்த்தனைக் கிணங்கிய திருவாழியானுலே தொலைக்கப்பட்டது.

4 ஸுதர்சனமேந்தும் பெருமானுல் துருஷ்கனசன்யம் துரத்தப்பட்டது.

5 இக்ஷ்வாகு வம்சத்திற் பிறந்த ஸுதர்சனை என்ற பெண்ணை மணந்து அக்னி, ஸுதர்சனென்ற மகனைப் பெற்றுன். ஸுதர்சனன் க்ருஹஸ்த்தனுய் மிகவும் சாந்தியுடன் ம்ருத்யுவை ஜெயிக்க முயன்று நன்கு விளங்கினுன். யமன் பெரும்புகழ் உடைய அவனிடத்தில் த்வேஷம், பொருமை கொண்டு ஸுதர்சனன் இல்லாத ஸமயத்தில் அவனில்லம் புகுந்தான். அதிதியான அவனை மனைவி நன்கு உபசரித்தாள். அதிதி யார் வந்தாலும் அவர் கேட்டதெல்லாம் கொடுக்க வேண்டுமென்று கணவனின் உத்தரவு. யமன் வந்தவன் இவளுடன் புணர்ந்திருக்க விரும்பினுன். அதிதிக்கு இதுவும் ஆராதனமாகில் சரியென்று இசைந்

தாள் அவள். அதே சமயம் ஸுதர்சனன் இல்லத்திற்கு வந்து விட்டான். அவனும் சரியென்று இசைந்துவிட்டான். உடனே யமன் வியந்து உம்மை வெல்ல முடியாதென்று விட்டுச் சென்றான். ஆக ஸுதர்சன னென்ற பெயரையும் நல்ல எண்ணத்தையும் உடைய அவனால் யமன் ஜெயிக்கப்பட்டான் என்றபடி.

6 ஸ்ரீபாகவதத்திற் சொல்லப்பட்ட ஸுதர்சனன் விஷயமுமாகும்—ஸுதர்சனன் என்ற கந்தர்வன் தான் அழகானவனென்ற கர்வத்தாலே ரிஷிகளைப் பரிஹஸித்து அவர்களால் பாம்பாகி ஸரஸ்வதி நதிக்கரையில் வஸித்திருக்க, அங்கே நந்தகோபர், பலராமன் கிருஷ்ணன் முதலானோர் நீர் அருந்தித் தங்கின போது படுத்திருந்த நந்தரை விழுங்க, உடனே க்ருஷ்ணன் திருவடியால் உதைத்தருளினான், அதனால் பாம்புரு போயிற்று கந்தர்வனாய் மீண்டான். ஆக—ஸரஸ் என்றால் ஸரஸ்வதி. ஸுதர்சன வுருவை முன் கொண்டிருந்த கந்தர்வனால் சேறுள்ள ஸரஸ்வதி நதியை விடாமல் இருந்த தனது ஜடமான ஜந்துவாயிருக்கும் பாம்புடலானது மிகவும் சாந்தனான பகவானின் திருவடியினால் ஏற்பட்ட ஆகர்ஷணத்தை-லயத்தைப் பெறும்படி அழிக்கப்பட்டது. தன் உரு மாறுவதற்காகவே கந்தர்வன் நந்தரை விழுங்கினான்.

7 சிறந்த மூன்றும் கண்ணை உடைய பரமசிவனால், புகழ் விடாத பெரியோர்களிடமும் த்வேஷம் பொறாமையெல்லாம் உடையனும் சாந்தர் களான மஹான்களையும் உயர்ந்த ஸ்த்தானத்தினின்று இழுப்பவனும் ஜலவாஸியான ஜந்துவை மீனை த்வஜமாகவுடையனுமான மன்மதன் அழிக்கப்பட்டான். महाशान्तान् स्वपदेभ्यः अधस्तात् आकर्षतीति, जडः जलवासितया शीतो जन्तुर्मीनो यस्येति च मन्मथविशेषणं युक्तम्।

8 பிறக்கும்போது க்டாக்ஷிப்பதாலே ஸு-நல்ல தர்சனத்தைப் பிறப் பவரிடம் போஷிக்கும் பரமாத்மாவினால் கீர்திமான்களான பண்டிதர் உபஸரணத்தை, அவர்களை அணுகியிருப்பதை விடாதவனும் அதனால் தேஹாத்ம விவேகம் ஏற்பட்டு மஹாசாந்தர்களான ஸதாசார்யர்கள் திருவடியைப் பிடித்து சிரஸாவஹிக்கின்றவனுமான கः சித்—எந்த சேதனன் தான் நிக்ரஹிக்கப் படுவான் (அதற்கு நேர்மாறாக) அனுக்ரஹிக்கபடுவானென்க.

9 மற்றொரு பொருள்—அழகிய தோற்றமுடைய—மன்மத விகாரம் நிறைந்த அப்ஸரஸ் முதலிய ஸ்த்ரீ ஜனத்தினால், மாத்ஸர்யம் முதலான தோஷம் தன் புகழ் குன்றாதபடியிருக்கப் பெற்றவனும். உள்ளே தோஷ முடையனும் வெளியில் மஹா ஆசா-அந்த—பதாகர்ஷீ. அதிக ஆசையின் முடிவெல்லையைப் பிடிப்பவன் போலிருப்பவனுமான புத்திக் குறைவான தவம் புரிபவன் உள்பட எல்லா மூட ப்ராணியும் தன் வசமாக்கப் படுகிறது. अजहती प्रसरः कीर्तिः यं मत्सरः तादृशो मत्सरो यस्यसः जडजन्तुः युवतपस्वि-प्रभृतिः इति व्याख्यातुं शक्यम्।

9 ஸூர்யவிஷயமான பொருள்—கீர்த்தியாவது பரவுதல். எங்கும் பரவுதலைப் பெறும் ஸரம்—ஸஞ்சாரம் பெற்றதும், பெரும் திக்குகளின் முடிவெல்லையையும் பிடித்திருப்பதும், எல்லோருக்கும் அறியாமைக்குக் காரணமாய் திடீரென உண்டாவதுமான வஸ்து (அதாவது இருள்) நல்ல கண்களுக்கு வெளிச்சம் அளித்துப் போஷணம் செய்யும் (பூஷா) சூரியனால் அழிக்கப்படுகிறது. सुदर्शनभृता—वस्तुग्रहणसमर्थचक्षुःपोषकेन पूष्णा । जडजन्तुः—जडार्थं झटिति जायमानः अन्धकारः என்று உரைக்கலாம்.

10 நல்ல பார்வையைப் போஷிக்கின்ற (आदर्श) கண்ணாடியால்,— பொய்கைகளை விடாததும், (சேற்றை விடாத இடங்களிலே த்வேஷம்— சேராமையை உடையதுமென்னலுமாம். अजहत्पंकेषु मत्सरवान्) திக்குகளின் கோடியில் வெகுதூரத்திலிருப்பதையும் சேர்த்துக் கொள்ளுகின்றதும் ஜடமாய் சைதன்ய மற்றதுமான திடீரென உண்டாம் வஸ்து-ப்ரதிபிம்ப மானது நன்றாகக் கொள்ளப்படுகிறது. (பொய்கை முதலானவிடங்களை விடக் கண்ணாடியில் நிழல் நன்கு விளங்குமென்றபடி) என்றுமாம்.

11 அத்வைத மதத்தைத் தழுவி யொரு பொருளாம். தத்த்வமஸி என்ற தத்துவதர்சனம் நன்கு பெற்றவனால் எங்கும் பரவினதும் எல்லா திக்குகளின் முடிவான ஸ்தானங்களையும் கொண்டதுமான ஜடவஸ்து வான ப்ரபஞ்சமெல்லாம் அழிக்கப்படுகிறது.

12 கீர்த்தி வாய்ந்த பெரியோர்களை அண்டினவனும் ஆசார்யரின் திருவடியை யாச்ரயித்தவனுமான அறிவிலி ஆசார்ய நிஷ்ட்டையாலே நல்ல ஸங்கல்ப்பமுடைய பகவானால் ஏற்றுக்கொள்ளப்படுகிறான்.

13 க்ஷேமகாரியான தர்சனம் அளிக்கின்ற கெருடனால், சேறு நிறைந்த பொய்கையை விடாததும், விடாமல் நீடித்து சண்டையில் ஓய்வு பெறாத (अशान्त) ஆனையின் காலையும் இழுக்கின்றதுமான ஜலஜந்து ஆமை அழிக்கப்படும் 'ஜீவக்ராஹம் க்ருஹீத்வா கமட கரடிநௌ பக்ஷயந் பக்ஷிமல்ல:' என்று தேசிகனே அருளிச் செய்தாரே கருட பஞ்சாசத்தில்.

14 அல்லது ஜலரூபமாய் ஒருவிதமாக உண்டான வஸ்து அதாவது ஸோமரஸம் கருடனால் க்ருஹிக்கப்படுகிறது—ஸோமரஸமானது ஏழு ஸோம ஸம்ஸ்த்தை யெனப்படும் பெரிய யாகங்களைச் செய்து புகழ் பெற்றவரிடம் பரவியிருப்பது. பேராசைக்கு முடிவிடமான ஸ்வர்க்கம் முதலான ஸ்த்தானத்தையும் பலனாக இழுத்துக்கொள்வது. அன்றி, ஆசா என்றால் திக்கு; நான்கு என்றபடி; நான்கிலே அந்தம் முடிவுடைய சிறந்த பதங்களாவன வேதச்சந்தஸ்ஸின் அக்ஷரங்கள்; அவற்றுடன் கெருடனால் கொள்ளப்பட்டிருக்கையைப் பெற்றதென்னலாம். ஸோம ரஸம் பெற முயன்ற ஜகதீ, த்ரிஷ்டுப் என்ற சந்தஸ்ஸுக்களின் நான்கு அக்ஷரங்களையும் பறித்துக்கொண்டான் கெருடன் என்ற தெல்லாம் கத்ரூப்ராஹ்மணத்திலே காண்க.

15 ஸுதர்சனம் என்கிற ஓஷதியின் வேரைக் கையில் கொண்டு, இந்த்ரஜால வித்யையிலிழிந்தவனால் தன் புகழைப் பொறுமலிருப்பவனும் பெரிய பெரிய ஸ்த்தானங்களையும் வசமாக்குகின்றவனுமான வாதி வெல்லப்படுகிறான் என்னலாம்.

இந்த ச்லோகத்தில் ஸுதர்சந-க:—மஹா-சாந்த-தபத் என்றும் போன்ற சொற்கள் இருப்பதால் ஸம்ஜ்ஞாநம் விஜ்ஞாநம் என்ற அநுவாகம் நினைப்பூட்டப்படுகிறது.

(மற்றுமொரு பொருள் சேர்க்க வேண்டும்—ஸ்ரீதேசிகனின் புகழில் த்வேஷம் உடையனாய் சாந்தி தாந்தி முதலான குணபூர்த்தியுடைய ஸ்ரீதேசிகனின் திருவடியை இழுத்தவனுமான ஒரு மூடனானவன் அவனதுஆசார்யரான கந்தாடை லக்ஷ்மணாசார்யரென்ற சிறந்த ராமானுஜ தர்சனத்தைச் சார்ந்த மஹாத்மாவினால் நிக்ரஹிக்கப் பட்டான் 'சிஷ்யபாபம் குரோரபி' என்ற படியால் நீ செய்த பாபம் என்னைப் பீடிக்கப்போகிறதென்று சொல்லி. இது பொருளாகலாமே. (அதன்படி அவருக்கு ஆரோக்யக் குறைவும் ஏற்பட்டது என்ற வரலாற்றை குருபரம்பரா ப்ரபாவத்தில் காண்க. அதன் மேல் கந்தாடை லக்ஷ்மணாசார்யர் ஸ்ரீதேசிகனின் ஸ்ரீபாத தீர்த்தத்தை வெகு நாள் உட்கொண்டு ரோகம் நீங்கி அதன் பலனாக தீர்த்தப் பிள்ளையென்ற குமாரனையும் பெற்றார் என்று அங்கே கூறப் பெற்றது.)

अर्थान्तरमप्यस्य श्लोकस्य भवितुमर्हति—श्रीदेशिककीर्तौ दीर्घमात्सर्यः कश्चित् कन्दाडै श्रीलक्ष्मणाचार्यशिष्यः स्वाचार्येण सह वीथौ गमनकाले गृहवेद्यामुपविश्य श्रीभाष्यदत्तावधानं श्रीदेशिकमालोक्य अविज्ञातमेवाऽऽगत्य श्रीपादमाचकर्ष। तदा च अयमाचार्यः 'अहन्ते नाहं ते विहरणपदम्' इति श्लोकमकरोत्। वृत्तमिदमाकर्ण्य तदाचार्येण श्रीलक्ष्मणाचार्येण शोभनरामानुजदर्शनभृता शिष्यः सः, 'शिष्यपापं गुरोरपि' इत्युक्त्वा निगृह्यते स्मेति हि वृत्तम्। ततः पश्चादेव तस्याचार्यस्य श्रीदेशिकश्रीपादतीर्थं ग्राहिणः रोगनिवृत्त्या पुत्रोऽजनिष्ट । तदभिज्ञानार्थं तस्य पुत्रस्य तीर्थपिल्लै इति नाम चकारेति च ॥ अनेन श्लोकेन दत्तस्य परनिग्राह्यत्वमुक्तम् ।

गतिर्व्योम्ना किं तद्गरुडमभिटीकेत चटकः
पिबत्वम्भः क्षारं न खलु कलशीसूनुरलसः ।
कलः कण्ठे नादः क इव मशके(कः) किन्नरपतेः(तिः)
कथञ्चित् साधर्म्यं क्षिपति न हि वैधर्म्यनियमम् ॥ ११ ॥

अत्र केचिदितरजनविलक्षणानेकांशेषु महद्भिः पुरुषैः सह साम्यविशेषं सम्पादयन्ति । ततोऽपि तेषां न दर्पावकाशः । सर्वांशसाम्यस्याशक्यसम्पादनत्वात् । कथञ्चित् तदुपगमेऽपि शास्त्रसिद्धोत्कर्षापकर्षयोस्तत्तद्वस्तुस्वभावनिबन्धनयोर्दुरपलपत्वादित्येतमर्थं सदृष्टान्तं निरूपयति गतिरिति । व्योम्ना आकाशमार्गेण गतिः—गमनं चटकस्येति शेषः । तत् इतरजनमृगादिविलक्षणगमनशक्तिमत्त्वाद्धेतोः

चटकः कलविङ्काख्यः अल्पटिट्टिभः 'चटकः कलविङ्कः स्यात्' इत्यमरः । **गरुडमभिटीकेत** किम् गरुडस्याभ्यमितो वर्तेत किम् । 'अभिरभागे' इति कर्मप्रवचनीयसंज्ञाविधानात् द्वितीया । यद्वा गरुडस्याभिमुख्येन गच्छेत् किमित्यर्थः । गरुडगतिकलविङ्कगतिप्रदेशयोरत्यन्ताधरोत्तरीभावादिति भावः । तथा ह्युक्तम्, "आद्यः पन्थाः कुलिङ्गानां ये चान्ये धान्यजीविनः । द्वितीयो बलिभोजानां ये च वृक्षफलाशिनः । भासास्तृतीयं गच्छन्ति क्रौञ्चाश्च कुररैः सह । श्येनाश्चतुर्थं गच्छन्ति गृध्रा गच्छन्ति पञ्चमम् ॥ बलवीर्योपपन्नानां रूपयौवनशालिनाम् । षष्ठस्तु पन्था हंसानां वैनतेयगतिः परा ॥" इति । अत्र च संख्यानिर्देशप्रक्रमानुगुण्येन वैनतेयगतेः सप्तमत्वनिर्देशस्य न्याय्यत्वेऽपि परत्वमात्रोक्त्या सर्वतो निर्विघातप्रचारत्वमुक्तं भवति। तथा ह्युच्यते—'पाताळब्रह्मसौधावधिविहितसुधावर्तनान्यस्मदार्तिं ब्रह्माण्डस्यान्तराळे बृहति खगपतेरर्भकक्रीडितानि' इति । तथा च आद्यगतिशालिकुलिङ्गाख्यकलविङ्कस्य, 'पन्नगाशनमाकाशे पतन्तं पक्षिसेविते । वैनतेयमहं शक्तः परिगन्तुं सहस्रशः ॥' इति हनूमदाशास्यप्रौढतरसर्वोत्तरगतिशालिनो वैनतेयस्य च अनितरलभ्यगगनगतावेवात्यन्तवैसादृश्यमस्तीत्यर्थः ।

ननूक्तप्रमाणबलगम्यगगनदेशवैसादृश्यादेव गरुडचटकयोर्द्युमणिखद्योतयोरिव प्रस्पष्टभेदः सिद्ध्यतीति न तयोःसाम्यप्रसक्तिः । यथाकथञ्चित् साधर्म्यस्य प्रमेयत्वादिना सर्वत्र सुलभत्वादित्यत्राह **पिबत्विति**। **अलसः** अलसाख्यरोगवान् अग्निमान्द्यवानित्यर्थः । **क्षारमम्भः** लवणादिक्षाररूपं जलं लवणरसवज्जलं वा पिबतु । **तदित्यनुषङ्गः** । तादृशाकारादित्यर्थः । **कलशीसूनुर्न खलु**—अगस्त्यो न भवेद्धीत्यर्थः । **खल्विति** प्रसिद्धौ । अगस्त्यातुल्यो न भवेदिति यावत् ; अगस्त्यतादात्म्यस्याप्रसक्तत्वेनानिषेध्यत्वात् । अलसरोगस्तावदित्थं निरूपितोऽष्टाङ्गहृदये **वाग्भटीये**—'प्रयाति नोर्ध्वं नाधस्तादाहारो न च पच्यते । आमाशयेऽलसीभूतस्तेन सोऽलसकः स्मृतः । अलसं क्षोभितं दोषैः शल्यत्वेनैव सुस्थितम् । शूलादीन् कुरुते तीव्रान् छर्द्यतीसारवर्जितान्' इति । तत्परिहारश्च तत्रैवोक्तः—'चित्रकं कौटजं क्षारं तथा लवणपञ्चकम् । चूर्णीकृतं दधिसुरातन्मण्डोष्णाम्बुकाञ्जिकैः । पिबेदग्निविवृद्ध्यर्थं कोष्ठवातहरं परम् । ग्रहण्यां श्लेष्मदुष्टायां तीक्ष्णैः प्रच्छर्दने कृते । कट्वम्ललवणक्षारैः क्रमादग्निं विवर्धयेत् ॥' इति । **बृहन्निखण्डुरत्नाकरे** च—'अजीर्णमामं विष्टब्धं विदग्धं च यदीरितम् । विषूच्यलसकौ तस्माद्भवेच्चापि विलम्बिका' इति । परिहारप्रकारश्च—'सामुद्रसौवर्चलसैन्धवानां क्षारो यवानां च तथाऽजमोदा । अजीर्णवातं गुदगुल्मवातं श्वासं च कासं च हरेत् प्रयुक्तम् ॥ ईषदम्लैः सलवणैः सुखोष्णैर्वह्निदीपनैः । एतेनाग्निश्च वर्धेत बलमारोग्यमेव च' इति। क्षारलवणं चोक्तं **शार्ङ्गधरसंहितायां**—'क्षारवृक्षस्य काष्ठानि शुष्काण्यग्नौ प्रदीपयेत् । नीत्वा तद्भस्म मृत्पात्रे क्षिप्त्वा नीरे चतुर्गुणे । विमर्द्य धारयेद्रात्रौ प्रातरच्छजलं नयेत् । तन्नीरं क्वाथयेत् वह्नौ यावत् सर्वं विशुष्यति । ततः पात्रात्समुल्लिख्य क्षारो ग्राह्यः सितप्रभः । चूर्णाभः प्रतिधार्यः स्यात् पेयः स्यात् क्वाथवत् स्थितः । इति क्षारद्वयं धीमान् युक्तकार्येषु योजयेत् ॥' इति । क्षारभेदश्च **वैजयन्त्यामप्युक्तः**—'दशेत्थं लवणानि

स्युरयोपलवणास्त्रयः । तत्र क्षारो यवक्षारो निपाती कासनद्गर' इति । औषधक्षारोऽपि तत्रैवोक्तः— 'चाटसस्तीक्ष्णजो रूक्षः शुक्तश्च लवणेन तु । युक्तो वैखारकः क्षारः स्वाद्यश्च कटुकादयः ॥' इति । यद्वाऽत्र क्षारशब्दः केवललवणपरः । तथा च मेदिन्यां—'क्षारो रसान्तरे धूर्ते लवणे काचभस्मनोः' इति । 'क्षारस्तु लवणे काचे रसभेदे च भस्मनि' इति रत्नमालायां च । अतोऽगस्त्यपरत्वे केवल-लवणार्थकत्वमविरुद्धम् । ततश्चैवं 'मुनिर्जयति योगीन्द्रो महात्मा कुम्भसम्भवः । येनैकचुळके दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ' इत्युक्तात्यद्भुतचर्यस्य चतुःसमुद्रीमेकचुळकमात्रेऽप्यपर्याप्ततादशां नयतः स्तम्भित-विन्ध्यस्य कुम्भयोनेः, स्वोदरपूरणापर्याप्तमल्पाहारमपि जरयितुमशक्तस्यालसस्य च प्रस्पष्टवैधर्म्यवतोः, कथंतरां क्षाराम्बुपानमात्रप्रयुक्तं साधर्म्यं वक्तुमपि शक्येतेति भावः ।

ननु चोक्तरीत्या क्षाराम्भस एकचुळकधारणादिरूपप्रात्यक्षिकवैलक्षण्यसद्भावात् नास्यागस्त्यसाम्य-प्रसक्तिशङ्केत्यतो दृष्टान्तान्तरमनुसरति **कल** इति । **मशके** मशकाख्येऽत्यल्पजन्तौ, **कण्ठे नादः** कण्ठगतं कणितं **कलः** अव्यक्तमधुरः । 'कलमव्यक्तमधुरध्वनौ स्याद्वाच्यलिङ्गकः' इति रत्नमालायाम् । **तत्** तादृशमधुरध्वनिमत्त्वाद्धेतोः **किन्नरपतेः** किन्नरश्रेष्ठस्य कस्य चित् महागायकस्य **क इव** को वाऽनर्थः आपतितः । किं मशकसाम्यरूपमनिष्टमापादयितुं शक्येतेत्यर्थः । देवेन्द्रादिनिखिलजगन्मोहनमहागान-विद्याधुरन्धरस्य किन्नरराजस्य, अनवरतकर्णवेदनाकारिविकृतकणितस्य मशकशिशोश्च को वा मूढः औपम्यमापादयेदिति पर्यवसितार्थः ।

एवं विशेषरूपेण निर्दिष्टानां अनिष्टानापादकत्वादीनां समर्थकं सामान्यहेतुमुपन्यस्यति कथञ्चिदिति । **कथंचित् साधर्म्यं** अतिक्लेशसम्पाद्यं यत्किञ्चिदेकदेशांशे किञ्चित्कालावच्छिन्नं समानधर्मवत्त्वं, **वैधर्म्यनियमं** आजानसिद्धमामरणमनुवर्तमानं नियतविरुद्धधर्मवत्त्वम् । अनेन वैधर्म्यस्य स्वाभाविकत्वं साधर्म्यस्यौपाधिकत्वं च फलितम् । **न क्षिपति हि** नोच्छेदयति हि । तादृशवैधर्म्यस्वरूपना-शकत्वरूपं वा तादृशवैधर्म्यज्ञानप्रतिबन्धकज्ञानविषयत्वरूपं वा तदुच्छेदकत्वं साधर्म्यस्य न सम्भवतीत्यर्थः ।

अत्र च चटकस्य गरुडप्रत्यर्थित्वाभावो नाम तत्साम्योद्भावनाभाव एव वाच्यः । वस्तुतस्तस्य प्रत्यर्थित्वाभावेन तदभावस्याप्रसक्तेः । अतश्च चटकसाम्योद्भावनस्यैव गरुडानिष्टरूपतया सम्भावनीयत्वेन तदेव प्रत्यर्थित्वं वाच्यम् । तदभावं प्रति साधर्म्यगतवैधर्म्यप्रतिक्षेपकत्वाभावो न हेतुः ; किं तु वैधर्म्य-सद्भावमात्रं प्रति । तथा च नियतवैधर्म्यसद्भावज्ञानस्य यत्किञ्चिदंशसाम्याप्रयोजकीकरणज्ञानमुखेन तदीयात्यन्तसाम्यज्ञानभञ्जकत्वात् तत्प्रयुक्तः साम्योद्भावनरूपानिष्टाभाव इति तादृशसाम्योद्भावनाभावज्ञानस्य चटकगरुडयोः साम्यं नोद्भावयेयुर्विपश्चितः इत्याकारकस्य परम्परया प्रयोजकीभूतज्ञानविषयत्वात् तज्ज्ञापकत्वमेव उक्तवैधर्म्यक्षेपकत्वाभावस्येति कारणात् कार्यसमर्थनरूपोऽर्थान्तरन्यास एवात्र बोद्धव्यः । न तु काव्यलिङ्गेनास्यान्यथासिद्धिसम्पादनं शक्यशङ्कम् । चटकनिष्ठगरुडप्रत्यर्थित्वाभावस्य तदीयासामर्थ्यादि-प्रयुक्तस्य साधर्म्यनिष्ठवैधर्म्यभञ्जकत्वाभावरूपोत्तरवाक्यार्थानधीनत्वात् । निष्पाद्यनिष्पादकभावरूपकार्यकारण-

भावबोधस्थल एव तदुन्मेषस्य पूर्वमावेदितत्वात् । नापि सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽत्र प्रभवति ; सामान्यवाचकपदोपन्यसनादर्शनात् ; उक्तविशेषस्थलेष्वेव वैधर्म्यसद्भावरूपहेतुसमर्थनार्थं प्रवृत्तत्वावगमाच्च । अतः कारणात् कार्यसमर्थनरूपस्य ज्ञानद्वारकस्य प्रागुपदर्शितार्थान्तरन्यासभेदस्य काव्यलिङ्गाद्यसङ्कीर्णोदाहरणस्थलमिदमिति विदन्तु विद्वांसः ।

अथात्र 'कलः कण्ठे नादः' इति कथं सङ्गच्छेत । भ्रमरमशकादीनां पतनसमयोद्भवस्य पक्षध्वनेः कण्ठनादत्वासम्भवात् । गमनकालमात्र एवोपलम्भात तदितरकालेष्वनुपलम्भाच्च पक्षवातजन्यत्वमेव अन्वयव्यतिरेकवशात् तादात्विकशब्दस्योपगन्तव्यम् । (नै) 'तुलयन् सौरभलोभनिश्चलम् । पणिता न जनारवैरवैदपि कूजन्तमलिं मलीमसम्' इत्यत्र निश्चलस्यालेः गुञ्जनं कविना प्रौढिवादेनोक्तमिति व्याख्यातं मल्लिनाथेन । अतस्तत्कालमात्रोपलम्भस्य पक्षवातजन्यत्वमेवावश्यवक्तव्यमिति चेत्—अत्र ब्रूमः । सत्यम् । भृङ्गादिजन्तुगतस्य झङ्काररूपशब्दस्य पक्षवातजन्यत्वमस्तु नाम । कण्ठनादविलक्षणश्येनादिगमनकालोपलब्धशब्दविशेषसजातीयशब्दोपलम्भात् । अत एवोक्तम् 'स्यदझांकारिपतत्रपद्धति'रिति । मशकस्य त्वल्पतरपक्षस्य तथाविधझङ्कारविलक्षणस्य रयुङ्कारस्य कथं पक्षवातजन्यत्वम् ॥ नैश्चल्यसमयेऽनुपलम्भादिति चेत्, तदपि कथं ज्ञायते । अत्यल्पतरनादस्यास्मत्कर्णसमीपोपसरणसमय एव उपलब्धियोग्यत्वात् । किञ्चिद्व्यवहितस्थलीयगमनागमनसमययोस्तदुपलब्ध्यभावात् । अतः कण्ठनादत्वमेवास्याभिदध्महे । अत एव वक्ष्यते मशकक्वणितं यत्रेति । ननु चात्यल्पतरशरीरस्य मशकस्य कथं तथाविधकण्ठनादप्रागल्भ्यमात्रमिति चेत—वयं किं कुर्मः । 'झिल्लीनादश्रवणपुरुषं शीघ्रमेव व्यतीयाः' इत्युक्तात्यल्पतरकीटस्य निष्पक्षस्य कथं वा बहुदूरव्यापि-श्रवणपरुषातिदीर्घशब्दोत्पादकतेति प्रतिबन्ध्यवतारे किमुत्तरं कथयसि । अत्यल्पतरपक्षस्य वा कथं तथाविधोच्चतरशब्दजनकता मशके ? भगवत्सङ्कल्पमहिम्नेति चेत्—तुल्यम् । यदि च पक्षवातपक्षपात एव भवतः प्रगल्भते, तथाऽपि कण्ठपदस्य हृदयपरत्वमाश्रित्य पक्षद्वयगतस्य वातस्य तन्मध्यगतहृदयप्रदेशावच्छेदेनैवोत्पत्त्यभ्युपगमान्न कोऽपि दोष इति ध्येयम् ।

(2) एवमन्यविधोऽप्यत्रार्थबोधो भवति । तथा हि–कथञ्चित्साधर्म्यमित्यादेः साधर्म्यं समानधर्मवत्त्वं कथञ्चिदपि धर्म्यनियमं धर्मादनपेतं नियतिविशेषं न क्षिपति हीत्यर्थः । वैशब्दः प्रसिद्धौ । धर्मत्वं च शास्त्रैकसमधिगम्यश्रेयःसाधनत्वम् ; तदर्हत्वं धर्म्यत्वम् । तथा चान्यांशात्यन्तसाम्यसद्भावेऽपि नियतिबललब्धं शास्त्रैकसमधिगम्यमुत्कर्षापकर्षादिकं नापह्नोतुं शक्यमित्यर्थः । यथा तुलसीचम्पकादीनां गोगोपजातीनां ब्राह्मणयत्यादीनां शङ्खमौक्तिकादीनां च गुणाद्यंशे स्वात्यन्तसमवस्त्वन्तरसद्भावेऽपि केवलशास्त्रगम्यं जातिस्वभावप्रयुक्तमुत्कृष्टत्वमितरजनमान्यत्वं च दुरपह्नवम् , तद्वदित्यर्थः ।

तदेवोपपादयति गतिरिति । व्योम्ना 'तदक्षरे परमे व्योमन्' इति प्रसिद्धपरममपदमार्गेण गतिः सञ्चारः अस्तु नाम कस्यचिन्मुक्तस्य मुक्तानां वा । तत् तादृशपरमपदगमनसमानज्ञानभोगाद्यवाप्तिरूपहेतुना चटकः चटकपावः, चटकशब्देनाल्पर्टिट्टिभत्वसामान्यात् चातको लक्ष्यते । तेन च

लक्षितलक्षणया चातकवृत्तिः प्रपन्नजीव उच्यते। स च गरुडमभिटीकेत किम्। 'दासः सखा वाहनमासनं ध्वजः' इत्युक्तस्य भगवद्विजयध्वजस्य द्विजराजस्य प्रतिस्पर्धी भवेत् किम्। वक्ष्यते हि, 'पुंसः कस्यचिदास्थाने द्विजेन्द्रः सूरिसेविते। गुणवत्पक्षपातेऽपि मध्ये तिष्ठति मानभृत्' इति सर्वसूरिपरिषन्मध्येऽस्यैव मानभृत्त्वम्। ततश्चानवरतभगवत्कटाक्षपातपात्रभूतस्य दिव्यदम्पतिमणिदर्पणायमानस्य आजानसिद्धानन्यसाधारणान्तरङ्गकैङ्कर्यधुर्यस्य सखित्वव्यपदेशयोग्यस्य वैनतेयस्य, 'अमृतस्यन्दिनं कश्चित् कृष्णमेघं द्विजः स्मरन्' इत्युक्तक्रमेण सदा भगवत्कृपामेवोद्वीक्षमाणस्यानन्योपायस्य चातकवृत्तेर्मुक्तस्य च ज्ञानभोगांशात्यन्तसाम्यसद्भावेऽपि केवलभगवत्सङ्कल्पाधीनावुत्कर्षापकर्षौ नापह्नूयेते इति भावः। तदेवं बन्धरहितेषु चेतनवर्गेषु तरतमभाव उक्तः।

अथ चेतनाचेतनभेदभिन्नेषु लीलाविभूतिगपदार्थेष्वपि तरतमतामुपदिदिक्षुः प्रथमनचेतनवर्गे तामाह **पिबत्विति।** **कलशी सूनुरिति** पदच्छेदः। **कलशी** क्षीरवान्। भूम्नि नित्ययोगे वा मत्वर्थीयः। सार्वदिकक्षीरराशिसमृद्धिमानित्यर्थः। **सूनुः** कुमारः, **अलसः सन्** तादृशक्षीरपानाद्यतिरेकजनितमान्द्यरोग विशिष्टः सन्, **क्षारम् अम्भः** लवणरससंस्कृतं जलं न पिबतु **खलु।** तादृशरोगनिवृत्त्यर्थं क्षीरं विहाय क्षारमेव नाश्नाति किमु। **खलुः** किमुपर्यायः क्षेपार्थकः। यद्वा काक्वर्थगर्भः। अनेन च यथा क्षीरस्य सर्वावयवव्याप्तमेकरूपं माधुर्यमारोग्यजनकत्वं च [तथा?] ततोऽप्यतिशयितं लवणस्यैकरूपलवणरसघनत्वमशेषपुरुषपश्वादिजीवातुत्वं सकलामयभेषजत्वं च सुप्रसिद्धमेव **वैद्यशास्त्रेषु।** सर्वो हि जनोऽनुदिनं लवणमेवोपजीव्य जीवतीति प्रस्फुटमेव पदार्थगुणविदां विदुषाम्। अतश्च निखिलभेषजराजस्य लवणस्य, निखिलभोगिजनभोग्यस्य मधुरवस्तुसारस्य क्षीरस्य च गुणागुणनिरूपणविवादे आयुर्वेदवेदिनो लवणकक्ष्यामेव कक्षीकुर्वन्ति। तथाऽपि क्षीरस्य शास्त्रैकसिद्धमाजानशुद्धमखिलजनवेद्यमाभिजात्यमवैमत्यावहमेवेति भावः। (2) यद्वा **सूनुः** बालाकृतिः श्रीकृष्णः **कलशी सन्** बाल्यकौमाराद्यवस्थायामनवरतक्षीरपानलोलुपः सन् **अलसः** जगद्व्यापारतस्तन्द्रालुः सन् **क्षारमम्भो न पिबतु खलु**–अन्ते लवणसमुद्राद्युपलक्षितनिखिलपदार्थभक्षणं न करोतु किमित्यर्थः। ततश्च पूर्वावस्थानिपीतक्षीरजाताद्यधिकपरिमाणं लवणाम्भोराशिमाचूषताऽपि भगवता तत्तरतमता विदितैवेति भावः। अथ वा श्रीकृष्णरूपः कुमारः **कलशी** क्षीरपानसक्तः सन् अन्ते क्षारमम्भोऽपि पिबतु। तथापि **न खलु अरसः।** रलयोरभेदात्। न तयोर्यथावस्थितरसवैषम्यानभिज्ञः कार्यविशेषार्थं क्षाररसादिपानेऽपि न खलु क्षीरक्षारयोः समानसीमामनुमन्यत इत्यर्थः। यतश्चौर्यादिमार्गेणापि क्षीरपानलोलुपतामभ्यनैषीदिति हृदयम्। 'रसो वै सः' इत्युक्तस्य अरसत्वं न सम्भवतीत्यपि ध्वनितम्।

एवमचेतनवर्गेषु जात्यादिभेदनिबन्धनं तरतमभावमुक्त्वा चेतनवर्गेष्वपि तमभिधत्ते **कल** इति **मशके** मशकप्रायेऽनुजीविजने। **कलः** कलकलध्वनियुक्तः। शब्दानुकारो वा **कण्ठे नादः** कण्ठजन्यो घोषः, **क इव भवतु**—को वा भवतु। **नरपतेः किं**—सार्वभौमस्य ततः का वा क्षतिर्भवेत्। अनुजीविवर्गेषु राजद्वारेषु ततःफलाय विपुलमाक्रोशत्स्वपि तेषां मशकप्रायतामुत्पश्यतः तुङ्गतरसौधशृङ्गेष्वच्छिद्र

कवाटमुद्रं निद्राणस्य राजाधिराजस्य को वा प्रवाद आपद्येतेत्यर्थः। अयं भावः—'भुङ्क्ते भोगान् अविदितनृपः सेवकस्यार्भकादिः' इति न्यायेन राजसेवानिरतानां अमात्यादीनां राजाद्यन्यूनान्नपानभोगादिसक्तानामपि प्रभुत्वप्रजातित्वप्रयुक्तन्यूनाधिकभावः स्वभावसिद्ध एवेति। उक्तं हि श्रीमहाभारते शान्तिपर्वणि, 'तुल्यपाणिभुजग्रीवस्तुल्यबुद्धीन्द्रियात्मकः। तुल्यदुःखसुखात्मा च तुल्यपृष्ठमुखोदरः॥ तुल्यशुक्रास्थिमज्जा च तुल्यमांसासृगेव च। निश्वासोच्छ्वासतुल्यश्च तुल्यप्राणशरीरवान्॥ समानजन्ममरणः समः सर्वैर्गुणैर्नृणाम्। विशिष्टबुद्धीन् शूरांश्च कथमेकोऽधितिष्ठति' इति युधिष्ठिरप्रश्नस्य भीष्मेण समाधानम्, 'स्थापनं चाकरोद्विष्णुः स्वयमेव सनातनः। नातिवर्तिष्यते कश्चित् राजंस्त्वामिति भारत। तपसा भगवान् विष्णुराविवेश च भूमिपम्॥ देववन्नरदेवानां नमते यज्जगन्नृप' इति। ततश्च इतरांशसाम्येऽपि भगवदनुप्रवेशकृतं माहात्म्यमेव केवलशास्त्रैकवेद्यं प्रभुप्रजयोरनुशिष्टमिति तोष्टव्यमायुष्मता॥ यदि चोक्तार्थेऽनुजीविवर्गेष्वाक्रोशनिमित्तभूतदुःखादिसद्भावस्य प्रत्यक्षमवगमात् न राज्ञा सह समानभोगत्वप्रतीतिरित्युच्यते, तदा प्रकारान्तरेणापि तद्दोष उच्यते—मशकशब्दोऽत्र यथाश्रुतार्थक एव। मशके कण्ठे नादः कलः अव्यक्तमधुरः कोलाहलः, कलकल इत्युक्तकलकलैकदेशो वा। क इव भवतु यो वा को वा भवतु। अत्युत्साहजनितकोलाहलेन सदा मशकः प्रगायत्वित्यर्थः। सार्वदिकगानस्यात्युत्साहकार्यत्वादिति भावः। तथाऽपि नरपतेः किं चेतनवर्गेष्वत्यन्तनिहीनमशकसाम्यं सर्वोत्कृष्टे सार्वभौमे सम्भवति किमित्यर्थः। राज्यभोगसक्तस्य हि कदाचित् दुःखमप्यवर्जनीयं भवेत्। मशकस्य तु न किञ्चिदपि दुःखावकाशः। 'मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः' इति ह्युच्यते। उच्यते हि—'राजिलो (निर्विष सर्पः इत्यर्थः) राजगद्गाति स्वैः सुखी सुखहेतुभिः' इति नैषधेऽपि।

अत्र चानुशासनिकपर्वगतः कीटोपाख्यानवृत्तान्तोऽप्यनुसारितः। व्यासमहर्षिः कदाचिदरण्ये विचरन् शकटागमनमार्गगतं शकटशब्दं श्रुत्वाऽतिवेगेन धावन्तं कञ्चन कीटं पश्यन् पप्रच्छ, 'कीट सन्त्रस्तरूपोऽसि त्वरितश्चैव लक्ष्यसे। क धावसि तदाचक्ष्व कुतस्ते भयमागतम्' इति। अथ च 'शकटस्यास्य महतो घोषं श्रुत्वा भयं मम। तस्मादतिक्रमाम्येष भयादस्मात् सुदारुणात्॥ दुःखं हि मृत्युर्भूतानां जीवितं च सुदुर्लभम्॥' इति कीटेन प्रत्युक्तस्य व्यासस्य वचनम्, 'इत्युक्तः स तु तं प्राह कुतः कीट! सुखं तव। मरणं ते सुखं मन्ये तिर्यग्योनौ तु वर्तसे' इत्यादिकं श्रुत्वा पुनः कीटः प्राह, 'सर्वत्र निरतो जीवः इतश्चापि सुखं मम। चिन्तयामि महाप्राज्ञ तस्मादिच्छामि जीवितुम्॥ इहापि विषयः सर्वो यथादेहं प्रवर्तितः' इति। अतः समानविषयभोगत्वमेव कीटनृपयोरिति पर्यवसितम्। तथा च निर्विशङ्कमेव सर्वदा गायतोऽपि मशकस्य, सदा दुःख्यतोऽपि राज्ञः शास्त्रवेद्यं निखिलजनसम्मतं च तारतम्यं सम्यगवगम्यमेवेति।

यद्वा किन्नरपतेः कुबेरस्य। 'किन्नरेशो वैश्रवणः' इत्यमरः। क इव को वाऽनर्थ इति। 'निद्रारसं न लभते महतां निधीनां रक्षापिशाच इव संपति राजराजः' इत्युक्तरीत्या कुबेरस्य सदा

चिन्तादुःखं, मशकस्य तु तत् नेति कुबेरसाम्यं भवेत् किमित्यर्थः। एतेन प्रथमोक्ते श्लोकार्थे चटकगरुडयोः अलसागस्त्ययोः मशककिन्नरयोश्च यत्किञ्चिदंशसाम्यमात्रेण तत्तुल्यतयोद्भावनस्य तदंशे ऽपि पुष्कलसाम्याभावात् अधस्तनश्लोकैरेव निरस्तप्रायतया पुनश्च तच्छङ्कानुन्मेष इति परास्तम्। यत्किञ्चिदप्रधानांशेऽप्यपुष्कलसाम्यमात्रस्याप्रयोजकत्वेऽपि मुख्यतमभोगाद्यंशेऽत्यन्तसाम्यस्य तौल्यप्रयोजकत्वात् तन्निरसनफलत्वमुक्तार्थस्य भवेदिति न किञ्चिदपहीनमिति।

तदेवमेतादृशोदाहरणगणैः, सत्सन्तानप्रसूतेः ज्ञानगुणाद्यंशेऽत्यन्तसमानस्यपि पुरुषस्यावरवंशोद्भवस्य न तैः सह समानघटारोपः परीक्षकपरिषत्सम्मत इत्यर्थः सूचितो भवति। अयमेवार्थो रहस्यत्रयसारादिष्वपि विपुलमुपपादितः। शिखरिणीवृत्तम्। 'रसै रुद्रैश्छिन्ना यमनसभला ग शिखरिणी' इति तल्लक्षणात्॥११॥

கதிர் வ்யோம்நா கிம் தத் கருடமபிடீகேத சடக:
பிபத்வம்ப: க்ஷாரம் ந கலு கலசீஸூநுரலஸ:.
கல: கண்டே நாத: க இவ மசகே(க:) கிந்நரபதே: (தி:)
கதஞ்சித் ஸாதர்ம்யம் க்ஷிபதி ந ஹி வைதர்ம்யநியமம்—11

வானத்தில் பறக்க வல்லமை சிறிது இருக்கட்டும். அதனால் சிட்டுக் குருவி கருடனை எதிர்க்கலாகுமோ. அஜீர்ணம் அக்னிமந்தம் உள்ளவன் உப்புநீரைக் குடிக்கலாம். அதனால் (உப்புக்கடலையுட்கொண்ட) அகத்தி முனியாய்விடமாட்டானே. கொசுகுக்குக் கண்டத்தில் நாதமிருப்ப தானாலும் கிந்நரரென்ற பாடகரின் தலைவனிடம் ப்ரஸித்தமான மதுர நாதம் என்னதானிருக்கும். சிறிது ஏதேனும் உள்ள ஒத்துமையானது வேறுபாட்டிற்கான சாச்வதமான வித்யாஸங்களை விலக்கமாட்டாது. (வேறுபாட்டுக்குக் காரணங்கள் நிலையாயிருக்கும்போது ஏதோ ஒருவித ஒத்துமையினால் ஸமமாக நினைக்கல் ஆகாது.)

உரையில் ஒரு விமர்சனம் வண்டு, கொசுகு எல்லாம் பறக்கும்போது தான் சத்தம் உண்டாகிறது. ஆகையால் சிறகின் ஒலியே அது. கண்டத்தில் நாதம் கிடையாதே. 'கல: கண்டே நாத:' என்று எவ்வாறு கூறலாமென்று கேட்பர். நாதம் மிக மந்தமாயிருப்பதால் கொசுகு நம் செவியின் அருகில் வரும் போதுதான் கேட்கப்படுகிறபடியால் கண்டத்தில் நாதமில்லையென்று எங்ஙனம் முடிவு? சிறகொலிதான் அது என்றாலும், இங்கே கண்டே என்று சிறகு புறப்படுமிடமே குறிக்கப்படலாம் என விடையாமென்றவாறு. இனி டிப்பணியில் கூறுமாறும் உரையாம்.

अत्र किंनरपतेः कण्ठे स्थितो नादः को वा मशकेऽस्ति इत्यन्वयकरणे मशककण्ठनादोक्तिरूपदोषस्य नावकाशः। किञ्च अस्तु कण्ठ एव मशकस्य नाद इत्यङ्गीकृत्यापि साम्यप्रतिक्षेपे न दोषः। कण्ठे वा भवतु अवयवान्तरे वा; किंनरमशकसाम्यं स्वाङ्गात् मधुरनादोत्पादनरूपं विवक्षितमिति चास्तु। इवेत्यस्य कण्ठे इत्यत्रान्वये कण्ठ इव नादः कण्ठस्थ इवोपलभ्यमानो नाद इत्यपि सुवचम्।

वस्तुत एतद्व्याख्यात्राहतः पाठो न समीचीनः। किंनरपतेः कण्ठे स्थितो नादः क इव मशकेऽस्तीति एकवाक्यत्वेऽयं पाठः स्यान्नाम। पूर्वार्ध इव वाक्यद्वयत्वं व्याख्येयम्। तदा क इवेति उत्तरवाक्यस्थपदव्यवहितं मशके इति पदं पूर्ववाक्ये नीयत इति क्लेशः। अतो मशकः किन्नरपतिरिति पाठः। को वा मशकः किंनरपतिर्भवेदिति वाक्यार्थः। इदानीमपि कण्ठे नाद इत्यस्य कण्ठस्थितत्वेन प्रतीयमानो व्यवह्रियमाणश्च नाद इत्यर्थः। लोक एवं मन्वानोऽपि तयोः साम्यं नैव मन्यत इत्येतावदेव विवक्षितम्। एवं प्रथमपादे अभिटंकेत, अभिषेकेत, अभिटीकेत इति त्रेधा पाठः। तत्र टंकेतेत्यशुद्धम्। सेकेतेति शुद्धमपि न प्रासानुकूलम्। तदत्र ईषत्साम्येन हंसो गरुडागस्त्यकिंनरपतीन् उपेक्ष्य चटकालसमशकान् बहुमानपत्त्वित्युक्तं भवति॥

கலசீ தனிப்பதம், கிம் தனிப்பதம், நரபதே-என்பது தனிப்பதம் வைதர்ம்யநியமம் என்ற விடத்தில் வை என்பது தனி ; ப்ரசித்தியைச் சொல்லும். தர்ம்யமென்றால் தர்மத்தினின்று விலகாதது-தர்மமாவது சாஸ்த்ரமூலம் பயனுள்ளதாக அறியப்பட்டது. ஆக ஏதேனும் ஒத்துமை யிருந்தாலும் சில வஸ்துக்களுக்கு சாஸ்த்ரமூலம் ஏற்பட்ட மேன்மையை விலக்க முடியாதென்றதாம் இதற்கிணங்க ச்லோகத்தின் பொருளாவது-சடக என்றால் அற்பஜீவன், மோக்ஷம் போகிறவன் வ்யோம என்னப்படும் பரமபதத்திலே நடமாடினாலும் அங்கு எம்பெருமானுக்கு எதிரிலேயே யிருக்கும் கெருடனென்ற நித்ய ஸூரிக்கு ஸமனாகமாட்டான். நித்யஸூரி யின் ஏற்றம் சாஸ்த்ரமூலம் அறியப்படும். கலசீ-பாலுள்ள, ஸூநு:-குமாரன், பாலேயே அருந்துகின்றவன் அஜீர்ணமேற்பட்டால் உப்பு நீர் அருந்தாமலிருப்பானா? ஆகையால் உப்புக்கு ஒருவித மதிப்பு உண்டு. ஆனாலும் பாலுக்கு உள்ள கௌரவம் அதற்கேது? இங்கே ஸூநு: குமாரன் என்று நந்தகுமாரனை கண்ணனையும் கொள்ளலாம். அலஸ: என்பதை அரஸ என்று மாற்றி, கண்ணன் கடைசியில் உப்புநீரை ஜீரணத்திற்காகப் பருகினாலும், ரஸம் தெரியாதவனல்லன், பாலின் மதிப்பை நன்கறிவான் என்றதாம். கொசுகு போன்ற கீழ் மக்களின் கண்டத்தினின்று கல:-கலகல:-பலவித கோஷம் உண்டாகட்டும். நரபதே: கிம்: அதனால் நன்கு மாளிகையில் ஆனந்திக்கும் அரசனுக்கு என்ன குறைவு? அல்லது கொசுகுக்கு இருக்கும் மதுரகண்ட நாதம் கிந்நர பதியான குபேரனுக்கு ஏது, அவனுக்கு தன விஷயமான சிந்தையே. எப்போதும் கொசுகு நிர்விசாரமாயிருப்பது. ஆனாலும் குபேரனுக்குள்ள ஏற்றம் ஏது இதற்கு?

निमीलयतु लोचने न हि तिरस्कृतो भास्करः
श्रवः स्थगयतु स्थिरं परभृतः किमु ध्वाङ्क्षति।
स्वयं भ्रमतु बालिशो न खलु बम्भ्रमीति क्षितिः
कदर्थयतु मुष्टिभिः कथय किं नभः क्षुभ्यते॥ १२॥

इति हंसपद्धतिर्द्वितीया

ननु वयं नाभ्युपगच्छाम एव परश्शतजल्पनेऽपि जात्यादिप्रयुक्तमुत्कर्षापकर्षादिकम् । अन्यप्रलापस्त्वकिञ्चित्कर एवास्माकमित्याशङ्क्य त्वदन्यसर्वजनविदितेऽतिप्रसिद्धे वस्तुनि त्वदभ्युपगमोऽनावश्यक एव । यतोऽयं विषयो न सामान्यजनदुरूहः । येन, 'बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः । अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितम्' इत्यादिनिर्वेदस्य, 'प्रमाणतन्त्राः सन्तीति कुतो वेदार्थसंग्रहः' इत्यादिसमाधानस्य वा अवकाशः स्यात् । प्रकृतविषयस्य तु सर्वेऽपि बोद्धार एव । परं तु त्वमेक एव मत्सरात् नाभ्युपैषि ; भ्राम्यसि वा अभिनिवेशात् । तच्च अकिञ्चित्करमेव । महाजनपरिग्रहादित्येतमर्थम-प्रस्तुतप्रशंसया समर्थयति **निमीलयत्विति** । कश्चित् सूर्यतेजोऽसहनः **बालिशः** मूर्खः 'मूर्खवैधेय-बालिशाः' इत्यमरः । स च दृढपूर्वश्रुतत्वात् तद्दर्शनाद्यसूयया स्वनयने **नितरां मीलयतु** गाढं मीलयत्वित्यर्थः । स च निरर्थक एवेति भावः । तत्र हेतुमाह न हीति । **हि** यस्मात् कारणात् **भास्करः** निखिलजगज्ज्योतिष्करः सूर्यः **न तिरस्कृतः** नाच्छादितः । जगतामिति शेषः । एकजननयननिमीलनमात्रेण निखिलजगद्व्याप्ततेजोराशिसमुत्सारिततमस्काण्डस्य अखण्डमार्ताण्डमण्डलस्य अपार्थभावं को वा महाजनः कथयेदित्यर्थः । सुप्रसिद्धे विषयेऽनभ्युपगन्तुरेवाचातुर्यपर्यवसानस्य निखिलपरीक्षकसम्मतत्वादिति भावः । यद्वा—'सम्मीलने नयनयोर्न हि किञ्चिदस्तीत्यत्रेव' निमीलनमत्र असूयाप्रद्वेषभूम्ना मरणरूपमपि भवेत् । तथा चैतदस्तमयमात्रान्न सूर्यास्तमयो भवतीति लोकोक्तिरपि अत्राऽऽवेदितेति बोद्धव्यम् ।

नन्वत्र स्वनयननिमीलनेऽपि तदीयातपादेः त्वगिन्द्रियवेद्यतया नात्यन्ततः सूर्यप्रतीतितिरोधानमित्यतो दृष्टान्तान्तरमनुसरति **श्रव** इति । कश्चित् पिकद्वेषी बालिशः तदीयशब्दश्रवणप्रद्वेषात् **श्रवः** स्वीयं कर्णयुगळं **स्थिरं** दृढतरं **स्थगयतु** हस्ताभ्यामाच्छादयतु । तथापि **परभृतः** कोकिलः ध्वांक्षति किमु काकवदाचरति किमित्यर्थः । न तु कदापि पिकः काकवच्छब्दायेत ; न वा जनास्तं काकतुल्यतया विदन्तीत्यर्थः । 'काकानां कोकिलानां च सीमाभेदः कथं भवेत् । यदि विश्वसृजा साक्षात् न कृता कर्णशष्कुली' इति श्लोकस्य त्वदीयकर्णशष्कुली न विषयतापदमधिरोहति, किन्तु परीक्षकाणामेवेति भावः । परभृतशब्देन, यथा परैः काकैर्जन्मप्रभृति भृतत्वेऽपि तदीयजातियोगो न सम्भवति— तथा तदीयाचारसंक्रमोऽपि सुतरामित्यर्थोऽपि ध्वनितः । ननु श्रवणपिधानमपि पिककाकयोर्वैषम्यापरिज्ञानस्यैवोपयोगि, न तु साम्यज्ञानस्येत्यतः स्वभ्रान्तिस्थलमुदाहरति **स्वयमिति** । **बालिशः** बालः मूढो वा । 'शिशावज्ञे च बालिशः' इत्यमरः । स्वयं भ्रमतु भूभ्रमणसिद्ध्यर्थं स्वदेहं परिभ्रामयतु । यद्वा— स्वदेहभ्रमणसमये भूभ्रमणमपि भ्रमतु भूमिर्भ्राम्यतीति स्वयमन्यथा प्रतिपद्यतामित्यर्थः । तथाऽपि **क्षितिः न खलु बम्भ्रमीति** न भ्राम्यत्येव हीत्यर्थः । अत्र च "भ्रान्तैः क्लृप्तं त्रिलोकीभ्रमणमिह तथा मेदिनीभ्रान्तिपातौ" इति श्लोकार्थोऽपि ज्ञापितः । व्याख्यातं च तत्र स्वयम्, भ्राम्यन्तो हि बाला भुवं भ्राम्यन्तीमभिमन्यन्ते इति । भूभ्रमणवादस्तु श्रुत्यादिविरोधात्, भूगोळभ्रमणेऽपि गणितविरोधाभावात् गणितशास्त्रप्रवर्तकैरार्यभटाभिमिरेव, 'भपञ्जरः सग्रहो भ्रमती'ति उक्तत्वाच्चाप्रामाणिक एवेति भावः । यदि च सूर्यसिद्धान्तादौ भूभ्रमणवादोऽप्यनुमन्यते, तथाऽपि एतादृशविलक्षणवाक(?)भूभ्रमणस्य न कैश्चिदपि

सिद्धान्तिभिरभ्युपगमः सेत्स्यति । भूमेरधरोत्तरभावेन भ्रमणस्य कैश्चिदभ्युपगतत्वेऽपि भ्रान्तबाल-प्रादक्षिण्येन तद्भ्रमणस्य सर्वलोकविरुद्धत्वात् । ननु च स्वयं भ्राम्यतो भूभ्रमणादिभ्रान्तिमात्रमपि दुरपलपम् । तत्र च प्रामाण्याप्रामाण्यविवेकोऽपि विवादपदमेवेत्यतः दृष्टान्तान्तरमाह कदर्थयत्विति । कदर्थशब्दात् तत्करोतीति णिच् । गगनं क्षोभयामीति कश्चिद्बालिशः तदुपरि मुष्टिप्रहारैर्वृथा परिश्राम्यतु । अनेन गगनं क्षुभ्यते किं क्षोभं प्राप्नोति किमित्यर्थः । कथय । पादत्रयार्थेषु यत्किञ्चित्प्रतिवचनवदत्रापि यत्किञ्चित्प्रतिवचनसम्भवे तत् कथयेत्यर्थः । सर्वेऽप्युक्तदृष्टान्ताः प्रतिवचनानर्हा एवेति भावः ।

नन्वत्र भास्करतिरस्करणादीनां सर्वजनदुष्कराणां प्रसक्तिविरहेणैव न प्रतिषेधसम्भवः । यत्किञ्चिदितरसुकरस्यान्यैरशक्यत्वकथने हि दोषलेशः परामृशे(प्रसजे ?)दिति चेत्—अत्रोच्यते । दृढमुष्टितया स्वाभ्युपगतं सर्वथाऽप्यपरित्यजतो गृहीतग्राहिणः कस्यचित् स्वानभ्युपगममात्रेण वस्तुस्व-रूपासिद्धिमभिमन्यमानस्य तद्भ्रान्तिनिवृत्त्यर्थं सूर्याद्यनभ्युपगन्तारं कञ्चन वादिनं परिकल्प्य तदनभ्युपगम-मात्रेण यथा सर्वलोकप्रसिद्धसुप्रकाशसूर्यतेजसोऽसिद्धिकथनं न शक्यते सम्भावयितुम्, तद्वदेवैतदपीति दृष्टान्तकथनमात्रपरत्वान्न दोषः ।

वस्तुस्वरूपस्यैवंविधत्वेऽपि कविचातुर्यादत्र अप्रसक्तवस्तुनोऽपि प्रसक्तिः श्लेषादिमहिम्ना निवेशितेति तत्रत्याक्षेपार्थकशब्दजातपरित्यागेन तदितरपदगुम्भमात्रसमीक्षया प्रतीयत एव । तथा ह्यत्र श्रीकृष्णपरतया कश्चिदर्थः । बालिशः कश्चन शिशुरूपो भगवान् लोचने निमीलयतु । नेत्रबन्धनादिलीलासमये तत्तद्बालनेत्रच्छादनवत् सूर्यचन्द्ररूपे स्वनयने अपि निमीलयतु । तेन भास्करस्तिरस्कृत एव । न तु पुनश्चक्रादिपिधानमप्यपेक्षते सूर्यतिरस्कारः ; अपि तु पक्ष्मद्वयमेळनमात्र एव सूर्यास्तमयो भवेत् । सूर्यतिरस्काराच्च चन्द्रतिरस्कारोऽप्यर्थसिद्ध एव । सूर्यप्रकाशसंक्रमादेव चन्द्रतेजोभिवृद्धेरुक्तत्वादिति भावः । एकलोचनपिधानमात्रेण भगवतः सूर्यास्तमयो भवेत् । त्वं तु लोचनद्वयमपि निमील्य, किं भवेत् सूर्यास्तमय इति द्विवचनाभिप्रायः । यद्वा लोचनपदं जनलोचनपरम् । ते निमीलयतु भगवान्, सूर्यपिधानसमये चक्रेणाच्छादयतु । वस्तुतस्तदा सूर्यस्य सत्त्वात् जननयनयोरेवाच्छादनं कृतमिति भावः । एवं श्रवः स्थगयतु स्थिरम् । श्रवः श्रवणम्, वृद्धश्रवाः इत्यादौ तथाविधार्थकरणात् । तथा च श्रवणादिकं स्थिरं यथा तथा स्थगयतु निवर्तयतु असकृदुपदेशादिकं परित्यजत्वित्यर्थः । परभृतः परेण पाण्डुना भृतः पोषितो धर्मसूनुः, ध्वांक्षत्येव राज्यसुखादिकमपेक्षत एव । 'ध्वाक्षि कांक्षायामिति धातोः भौवादिकात् इदित्वान्नुमि लटि रूपम् । असकृत् भगवदुपदेशादेव तस्य नैस्पृह्योत्पादादित्यर्थः । प्रसिद्धं हि राज्यसुखादिनैराश्यं धर्मसूनोः । उच्यते हि स्वयमेव शान्तिपर्वणि—'नाहं राज्यसुखान्वेषी राज्यमिच्छाम्यपि क्षणम् । धर्मार्थं रोचये राज्यं धर्मश्चात्र न विद्यते ॥ तदलं मम राज्येन यत्र धर्मो न विद्यते । वनमेव गमिष्यामि तस्माद्धर्मचिकीर्षया ॥ तत्र मेध्येष्वरण्येषु न्यस्तदण्डो जितेन्द्रियः । धर्ममाराधयिष्यामि मुनिर्मूलफलाशनः ॥' इति । उपागमच्च भीष्मोऽप्यमुमर्थं 'वेदाहं तव या बुद्धिरानृशंस्यगुणैव सा ।

न च शुद्धानृशंस्येन शक्यं राज्यमुपासितुम्' इति । अतश्चैतादृशनैरपेक्ष्यमस्य कृष्णोपदेशमूलकमेवेति तन्निवृत्तौ उक्तनैराकांक्ष्यमपि निवर्तेतेति भावः । एवं स्वयं भ्रमतु बालिशः बालक्रीडासक्तः स्वयं स्वदेहमतिवेगतः परिभ्रामयतु । ततश्च क्षितिः बम्भ्रमीत्येव । स्वभ्रमणे स्वोदरगतस्य भूमण्डलस्यापि भ्रमणा-वश्यम्भावादिति भावः । असकृदावेदितं हि स्तन्यपानमृद्भक्षणादिसमयेषु स्वोदरगताखण्डभूमण्डलप्रकाशनं भगवतो भागवतादिसिद्धम् । एवं मुष्टिभिः कदर्थयतु । मुष्टिशब्दश्चौर्यपरः; मुषधातोः क्तिन्प्रत्ययनिष्पन्नत्वात् । तथा च देवेन्द्राराधनार्थमुपहृतानामन्नपानादीनां स्वयमपहरणेन स्वजातीयप्रयत्नं तदुपरि परिकुपितशतमखादिप्रकल्पितमनर्थजातं च कदर्थयतु व्यर्थं करोतु । ततो नभः क्षुभ्यत एव । नभोवर्तिपदार्थाः क्षोभं प्राप्नुवन्त्येव । मञ्चाः क्रोशन्तीतिवत् तात्स्थ्यात् प्रयोगः । नभोवर्तिनां देवतान्यूहानां पुष्कलावर्तकादिमेघडम्बराणां च यावन्नैराश्यमशेषतः कलुषीकरणात् इति भावः । कथय किमेतादृशं सामर्थ्यं भवतः शक्यसम्भावनम् ? त्वमेव कथय । नान्यः साक्षीत्यर्थः ।

तदेवमत्र पादचतुष्टयेन कृष्णवृत्तान्तप्रतीतिः प्रतिपादिता । अथ प्रतिपादमत्र विभिन्नवृत्तान्त-प्रतिपत्तिरपि प्रदर्श्यते । तथा हि—प्रथमपादेनात्र जरत्कारूपाख्यानप्रतीतिः । श्रूयते ह्यादिपर्वणि—जरत्कारुनामा कश्चन महर्षिः ब्रह्मचर्य एव व्यवस्थितो गार्हस्थ्यमनभिलषन् यत्रसायंगृहो वायुभक्षणमेव चरन् वने विचरन् कदाचित् स्वपितॄन् वीरणतन्तौ शिथिलीभूते लम्बमानान् गर्तपतनोन्मुखान् वीक्ष्य दयमानमनाः तैश्च स्वसन्तारणाय पुत्रोत्पादनमभ्यर्थितः कथञ्चिद्विवाहे मनः कुर्वन् जरत्कारुनाम्नीं वासुकिपुत्रीमुपयच्छन् गृहस्थधर्मनिरतः कदाचित् श्रान्तदेहः भार्योत्सङ्गे शिरो विन्यस्य प्रसुप्त आसायमनु-तिष्ठन् सन्ध्यादिलोपं शङ्कमानया तया सूर्यास्तमयं निरीक्ष्य अद्य भर्तुरुत्थापनं धर्म उत तूष्णींभाव इति विचिन्त्याग्निहोत्रादिलोपमेव गरीयस्त्वेनाभिमन्यमानया धर्मलोपभीतया मधुरतरं प्रार्थितः [मुनिः] क्षणादुद्बुध्य कोपविस्फुरमाणोष्ठ इदं वचनमब्रवीत्—'अवमानः प्रयुक्तोऽयं त्वया मम भुजङ्गमे । समीपे ते न वत्स्यामि गमिष्यामि यथागतम् ॥ शक्तिरस्ति न वामोरु मयि सुप्ते विभावसोः । अस्तं गन्तुं यथाकालमिति मे हृदि वर्तते ॥' इति ।

तथा चायमर्थः—जरत्कारुर्यथा(दा ?) लोचने निमीलयति तथा(दा ?) सूर्यः स्वकालसञ्चारविरहात् तिरस्कृत एवेति ॥ द्वितीयपादे च श्रीरामवृत्तान्तपरिस्फूर्तिः–दशमुखादिदुष्कृद्विनाशाय स्वेच्छयाऽवतरन् परःपुमान् स्वकीयातिमानुषकल्याणगुणचरित्राण्याविष्कृत्य प्रबन्धकर्तॄन् वाल्मीकिमुखान् कृतार्थयामासे-त्यखिललोकविश्रुतमेव । उक्तं ह्यनर्घराघवे—यदि क्षुण्णं पूर्वैरिति जहति रामस्य चरितं गुणैरेतावद्भिर्जगति पुनरन्यो जगति कः । स्वमात्मानं तत्तद्गुणगरिमगम्भीरमधुरस्फुरद्वाग्ब्रह्माणः कथमुपकरिष्यन्ति कवयः ॥' इति । तथा चायं भगवान् स्वीयकल्याणतमचरित्राणि यदि नाविष्करोति, तदा वाल्मीकिमहर्षिणा अन्यराज-कथामधिकृत्य प्रबन्धकरणे, सुबद्धमपि शब्देन काकवाशितमेव तत् इति न्यायेन तदीयोक्तिः काकवाशितमेव भवेदिति भावः । तथा चायमर्थः—स्वयं श्रीरामः भवः निजकीर्तिं स्थगयतु आच्छादयतु नाविष्करोत्विति

यावत् । तदा **परभृतः** 'वन्दे वाल्मीकिकोकिलम्' इत्युक्तः कविः **ध्वांक्षति** काकतुल्यो भवति । असत्कीर्तनादिना काकवाशितायमानोक्तिर्भवेदिति यावदिति । एवं **तृतीयपादे मङ्कणकवृत्तान्तः** स्फुरति । तथा ह्यारण्यपर्वणि तीर्थयात्रायाम्, 'यत्र मङ्कणकः सिद्धः' इत्युपक्रम्य दर्भक्षतात् तदीयकरतः शाकरसस्रुतिमुक्त्वाऽनन्तरमुक्तम्—'स वै शाकरसं दृष्ट्वा हर्षाविष्टो महातपाः । प्रनृत्तः किल विप्रर्षिर्विस्मयोत्फुल्ललोचनः ॥ ततस्तस्मिन् प्रनृत्ते वै स्थावरं जङ्गमं च यत् । प्रनृत्तमुभयं वीर तेजसा तस्य मोहितम् ॥' इति । तथा च **बालिशः** मङ्कणनामा ब्रह्मचारी । यद्वा—शाकरसस्रुतिपर्यन्तं स्वकीयतपोबलाज्ञानात् बालिशपदप्रयोगः । अथ वा बालकृत्यस्य सन्तोषकालीनभ्रमणस्य अनेनाचरणात् गौण्या तद्व्यपदेशः । **स्वयं भ्रमतु**—दर्भक्षते स्वकरे असृङ्निर्गमस्थाने शाकरसस्रवणमभिलक्ष्य स्वतपोबलसिद्धिं बुद्ध्यमानो विस्मयात् स्वदेहं भ्रामयतु । तेन **क्षितिः** भूलोकः बभ्रमीत्येव । तपोनिष्ठमहर्षिपरिभ्रमणात् स्वयमपि भृशं भ्रमत्येवेति योजना । **चतुर्थपादे च रघुवृत्तान्तः** । तस्य मुष्टिभिः कदर्थनं च कौत्समहर्षेर्गुरुदक्षिणार्थं देवलोकभेदनभावनम्; तेन नभः **क्षुभ्यत एव** । तन्मात्रेणैव भीतैः कुबेरागारे यथेष्टद्रव्याभिवर्षणादिति भावः । नभश्शब्देन तत्स्था देवता लक्ष्यन्ते ।

तदेवमर्थद्वयेन प्रतियोगिप्रसिद्धिरुपपादिता । अथार्थान्तरमप्येकदेशिविषयकम् । तथा हि—अत्र केचिदतीव दृप्ता अस्मन्मतैकदेशिनः शङ्करभास्करादिपरमतखण्डनाद्यनैपुण्यं स्वीयमप्रकाश्य तन्मतानुवादस्यापि महापातकापादकतां समुद्भावयन्तो भावयन्तश्च तत्तन्मताकर्णनाद्यनावश्यकताम्, तत्खण्डनैकपरान् श्रीभाष्यादिदिव्यग्रन्थान् बहुमतिलेशमन्तरेण परप्रञ्जनमिति परित्यजन्तः मतान्तरस्थपण्डितप्रत्यवस्थाने करमुष्टिमापीड्य सर्वमप्येतत् रहस्यशास्त्रमिति समादधानाः केवलैतिह्यकथाभिधानमात्रेण स्वमतस्थजनान् आवर्जयन्तो जगत् विजयन्ते । न पुनः 'शास्त्रज्ञानं बहुक्लेशम्' इत्यादिसद्बुद्बुदप्रेन निवृत्तिपद्धतिमध्यासते । तान् प्रत्याह **निमीलयत्विति** । **बालिशः** मूर्खः दृढपूर्वश्रुतः इति यावत् । स्वमतप्राबल्यदृढविश्वासवानित्यर्थः । **निमीलयतु लोचने** श्रीभाष्यादिग्रन्थेषु भास्करमतप्रस्तावसमये इदमस्माकमनावश्यकमिति नयने दृढं **निमीलयतु,** तद्भागं नावेक्षतामेव । न तावन्मात्रेण भास्करमतं तिरस्कारमाप्नोति । किन्तु तदीयमतप्राचीनार्वाचीनग्रन्थान् विपुलं समालोड्य तन्मतगतपरस्परव्याघातश्रुत्यादिविरोधानुमानक्षोभादिकथाप्रवर्तन-ग्रन्थनिर्माणादिपाण्डित्यपद्धत्यैव तन्मतं निरसनीयमित्यर्थः । एवं शङ्करमतप्रस्तावसमये श्रोत्रयुगलं निबिडं निपीड्य, ततोऽपि पापीयानयं पक्षः श्रवणस्याप्यनर्ह इति गर्हमाणाः परित्यजन्ति तं प्रदेशं तत्राह **श्रव** इति । **श्रवः** श्रोत्रं स्थिरमाच्छादयतु । तेन **परभृतः** शङ्करः; परैः भृतः पोषित इति विग्रहात् 'सांख्यसौगतचार्वाकसङ्कराच्छ((च्छां ?)ङ्करोदयः' इति स्वयमेव नामकरणेन शङ्करमतस्य तत्प्राक्तनमतत्रयसमाहारनिष्पन्नत्वावगमात् **शङ्करस्य** परभृतत्वम् । यद्वा **परशब्देन भृतः** ग्रन्थे धृतः परभृतः । **श्रुतप्रकाशिकायां** हि शङ्करस्य परशब्देन भास्करस्य अपरशब्देन यादवस्य चान्यशब्देन नियतव्यवहारात् । अतः पर इति भृत इति विग्रहात् शङ्करपरत्वं बोद्धव्यम् । स च ध्वांक्षति किमु । तदीयमतग्रन्था

असदनाकर्णनमात्रेण काकवाशितायन्ते किमित्यर्थः । आमूलं तन्मतमन्यपरिशीलनेन तद्गतव्याघातादि-प्रदर्शनेनैव तस्य काकशब्दतौल्यं सम्पादनीयमित्यर्थः । एवं पूर्वार्धेन परमतखण्डनासामर्थ्यं प्रतिपाद्य अपरार्धेन स्वमतदृढतरश्रद्धाया अपि दोषत्वमेव, न तु गुणत्वमित्याह **स्वयमिति बालिशः** दृढपूर्वश्रुतोऽयमेकदेशिजनः **स्वयं भ्रमतु**—परश्शतव्याघातजटिलत्वेऽपि स्वसंप्रदाय एव समीचीन इति दृढबुद्धिरध्यवस्यतु । न खलु ततः **क्षितिः** भूलोकवर्ती जनः **बम्भ्रमीति** भृशं भ्रमति । दृढमध्यवस्यत्ययं स्वमतप्राबल्यमिति न कोऽपि भूलोकवर्ती किञ्चिदपि स्वयं भ्राम्यति ; अपि तु परिहसत्येवास्य मूर्खभावमिति भावः । एतादृशभ्रान्त्यभावस्य भूलोकजनिमात्रमेवालम्, न पुनर्विपुलज्ञानापेक्षेति क्षितिशब्दाभिप्रायः । त्वमेवाभिनिवेशवशाद्भ्रम्यसि ; न तु त्वदन्यः कश्चिदपि जन्तुरङ्गीकरोति त्वदर्थम् । एवमाचार्यपरम्परागतोऽयं स्वसंप्रदायरहस्यार्थ इति निखिलधर्मस्वरूपत्यागादिरूपमपार्थं कञ्चित् मनसि निक्षिप्य परश्शतदोषगणोद्घोषणेऽपि तमेवार्थमपरित्यजन् वेदवैदिकधर्मान् विजहाति गृहीतग्राहितया । तत्राह-**कदर्थय**त्विति । **मुष्टिभिः** । **मुष्टिशब्दो**ऽत्र निगूढरहस्यार्थपरः । तस्य मुष्टितुल्यत्वात् । करमुष्टिकरणे हि कश्चित् पदार्थः करान्तर्गतः स्यादिति केषांचित् भ्रमो जायते, मुष्टिविसर्जने तु न कोऽप्यर्थोऽत्रेति परिह्रियते भ्रान्तिः । तद्वत् सम्प्रदायार्थोऽयं भवादृशेभ्यो न वक्तव्य इति बोधने, स्यादत्र कश्चनार्थविशेष इति केषांचिद्भ्रमो जायेतापि । कथञ्चित् तादृशार्थनिरीक्षणे हि सर्वेषामपि युगपत् परिहासरस एव फलिष्यतीति करविवरणे, न किमप्यस्तीति लोकोक्तिरप्यत्रानुसन्धेया । अतश्च मुष्टिनिक्षेपसदृशैः स्वगोष्ठीमात्रप्रचुरैः रहस्यार्थैः, **कदर्थयतु** कदर्थं करोतु चरमश्लोकादीनां कुत्सितार्थं करोतु । तेन **नभः क्षुभ्यते किम्** । नभोवद्विस्तीर्णः पण्डितहृदयाकाशः क्षोभमाप्नोति किम् । वेदवैदिकमार्गविरुद्धं सर्वधर्मस्वरूपत्यागादिपक्षं साधवो नाङ्गीकुर्वन्तीत्यर्थः । तादृशार्थश्रवणमपि न सहन्त इति यावत् । अत एव ह्युच्यते—'प्रपत्त्यङ्गं प्रतिज्ञातुं न शक्यं साधुसंसदि' इति । स्वसम्प्रदायार्थप्रकाशने साधुजनगर्हा भवेदिति भियैव सर्वमपि रहस्यार्थ इत्याच्छादयन्ति इति हृदयम् । यद्वा—**नभः**शब्देन नभोवर्तिनो वैशम्पायनादय उच्यन्ते । ते क्षुभ्यन्ते किम् । साक्षाद्व्यासमुखेनाधिगतचरमश्लोकार्थानां वैशम्पायनादीनां त्वदीयकदर्थनश्रवणात् भ्रान्तिर्भवेत्किमित्यर्थः । अपि तु 'येषामुक्तिषु मुक्तिसौधविशिखासोपानपङ्क्तिष्वमी वैशम्पायनशौनकप्रभृतयः श्रेष्ठाः शिरःकम्पिनः ।' इत्युक्तनयेन 'अतोऽशक्ताधिकारत्वम्' इत्यारभ्य 'सर्वधर्मपरित्यागशब्दार्थाः साधुसम्मताः' इत्यन्तम् उक्तान् साधुतमार्थानेव ते श्लाघन्त इति भावः । यद्वा—मुष्टिशब्दोऽत्र पूर्वोक्तप्रक्रियया शौर्यपर एव । अतश्च वैदिकधर्मापहारेण वेदादीन् **कदर्थयतु** व्यर्थान् करोतु । तेन **नभः** स्वर्गनरकादिरूपः परलोकः **क्षुभ्यते किं** प्रपन्नानां सकलवैदिकधर्मत्याग एव स्वरूपानुरूप इति वचनमात्रात् पञ्चमहायज्ञादिहाने नरकादिविषयकं शास्त्रं वा तद्विहितो नरकादिरूपः परलोको वा न हीयत इत्यर्थः । पञ्चाङ्गनाशेऽप्यमावास्या न नश्यतीति लोकोक्तिरप्यत्रानुसन्धेया । यद्वा—**मुष्टिशब्दः** गृहीतग्रहणपरः

दृढमुष्टिरित्यादिव्यपदेशात् । अतोऽयं दृढग्रहणवशात् स्वगृहीतार्थानेव कथयन् अन्यदीयार्थविशेषान् असाम्प्रदायिका इति परित्यजन् भ्रमतु नाम । किमनेन नभः क्षुभ्यत इति पूर्ववत् योजना ।

तदेवमसूयादिवशादन्यदीयसमीचीनार्थविशेषाग्रहणाय नयनश्रवणादिसुदृढपिधानेऽपि भास्कराद्युपमानां सुप्रसिद्धार्थानामपहारो न कदापि भवेदिति स्वोपगतार्थ एव सम्यङ्गिति दर्पो न कार्य इति फलितम् । एवं 'निमीलयतु लोचने' इत्यादिवचनपद्धत्या योऽयं लोचननिमीलनमात्रेण भास्करतिरस्करणक्षमः स एवैतादृशदर्पोक्त्यर्हः ; न तु त्वादृशः केवलदृप्त इति भावः । अनेन महाप्रभावानां समयविशेषे दर्पोक्तेरदोषत्वमाविष्कृतम् । यथा पूर्वोक्तं जरत्कारुवचनम्, 'शक्तिरस्ति न वामोरु मयि सुप्ते विभावसोः । अस्तं गन्तुं यथाकालमिति मे हृदि वर्तते ॥' इति । तद्वत् योऽयं भास्करशङ्करादिमतग्रन्थान् अखिलान् अनिशमालोड्य तदीयैकैकोक्तेः शतदूषणीकरणनिपुणः स एव, 'कथं कथकमानी स्यात् कश्चिदन्यो मयि स्थिते' 'वादाटोपमुपेयुषः प्रतिभटान् असेतुहेमाचलं तुलायापि तृणाय वा न च तुषच्छेदाय मन्यामहे' इत्यादिदर्पोक्तिक्षमः । अदोषत्वं चास्य भगवद्भाष्यकारैरप्यङ्गीकृतमेव । "श्रुतिसिद्धान्तशूरस्य तद्विरुद्धान् निरुन्धतः । वल्गितं वावदूकस्य कृतिनः किं न शोभते" इति । न तु पुनः 'विदुषामपि मोहमावहन्तो वितथैतिह्यसहस्रवर्णनेन । विनयाभिनयात् खलाः किलामी विजयन्ते कपटालया जगन्ति ॥' इत्यादिभवादृशपद्धत्या जगद्विजयमानस्य दर्पोक्त्यवकाशलेश इति फलितम् ।

एवमत्र प्रथमार्धेन वैडालव्रतिकबकवृत्तीनां अपरार्धेन मत्तोन्मत्तानां च चर्याभिधानात् 'पाषण्डिनो विकर्मस्थान् वैडालव्रतिकान् शठान् । नास्तिकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत् ॥' इत्यादिश्लोकार्थोऽत्र प्रत्यभिज्ञापितः । तथा हि—बिडालजातीयो हि अनवरतं नेत्रे निमीलयति । स च तावन्मात्रात् सूर्योऽस्तमेतीति मन्यत इति लोकप्रवादः । तद्वदयमपि सूर्यतिरस्कारं नाभिमन्यतामित्यर्थः । एवं बकोऽप्यनिशं मत्स्यजिघृक्षया स्वनयने निमीलयतीति ध्येयम् । तथा बिडालजातीयः दूरस्थपक्षिग्रहणाय त्वरितमनुधावन्नपि परकीयश्रवणमाच्छादयति ; यथा स्वपदशब्दमपि परे न शृण्वन्ति, तथा सञ्चरतीत्यर्थः । एवं सुरापानादिमत्तः उन्मत्तो वा स्वं असकृत् भ्रमति । मदोन्मादतो वृथा मुष्टिप्रहारमनवकाशप्रदेशे सृजति च । अतोऽयमुक्तवचनात् वाग्वादस्याप्यनर्ह इति भावः ।

तदेवमुक्तपद्धत्या केवलदर्पादिवशतः अभिजनविद्याचारादिसम्पन्नमहापुरुषनिरीक्षण-तदीयकीर्तिश्रवणाद्यसहनेन स्वयमपि तथा बुभूषया वा तत्तिरश्चिकीर्षया वा तदीयवेषभाषाद्यारोपेण तत्प्रत्यर्थितया प्रत्यवस्थानं केषांचित्पात्रपरिहास्यतापदमधिरोहतीत्ययमर्थो बहुप्रकारदृष्टान्तकथादिभिः समर्थित इति सुधीभिर्विभावनीयम् । पृथ्वीवृत्तम्—'जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः' इति लक्षणात् ॥ १२ ॥

इति सुभाषितनीवीव्याख्यायां हृद्यार्थदीपिकाख्यायां

दर्पपद्धतिर्द्वितीया ।

நிமீலயது லோசநே ந ஹி திரஸ்க்ருதோ பாஸ்கர:
ச்ரவ: ஸ்த்தகயது ஸ்த்திரம் பரப்ருத: கிமு த்வாங்க்ஷதி.
ஸ்வயம் ப்ரமது பாலசோ ந கலு பம்ப்ரமீதி க்ஷிதி:
கதர்த்தயது முஷ்டிபி: கதய கிம் நப: க்ஷுப்யதே.

1 ஒருவன் சூரியனொளியைக் கண்டு அஸூயையினால் கண்ணை மூடிக் கொள்ளட்டும். (காணவில்லையே என்று கூறட்டும்) அதனால் சூரியன் குறை பெறான். இலனாகான். குயில் குரல் கேளாதபடி காதை மூடிக் கொள்ளட்டும். குயில் காக்கையாகாது. (குயிலின் குரல் கேளாதபடி காக்கையின் காது மூடப்பட்டால் பின்னையும் பல நாள் குயில் அதனால் போஷிக்கப்படலாம், அவ்வளவேயன்றி குயில் காக்கையாயிடாது.) முட்டாள்பயல், நான் பூமியைச் சுற்றடிக்கிறேனென்று கூறி, தான் சுற்றட்டும். யாரும் இசையும் படி பூமி சுற்றாது. ஒருவன் கையை முஷ்டியாக்கிக் கொண்டு வானத்தில் குத்துகின்ற வண்ணம் ஆடினாலும் வானம் கலக்கப்படாது.

द्वितीयपादस्य-पिकभरणप्रवृत्तस्य काकस्य तत्कूजितश्रवणनिरोधाय श्रोत्रस्य स्थिरस्थगनेपि परभृतः पुनःकतिचित् दिनानि भृतो भवेदित्येतावदेव, न तु तावता पिकः काको भवेदिति वा भावः। पुरुषस्य भास्करवत् प्रकाशः कोकिलवत् कण्ठः भूमिवत् स्थैर्यं गगनवत् सुप्रवेशत्वञ्चावश्यकमिति सूच्यते।

2 ச்லோகத்தில் நஹி, கிம் என்ற சொற்களை விட்டுவிட்டுப் பார்த்தால் வேறொரு பொருள் தோற்றுமென்றார் உரைகாரர். அதாவது. பகவான் கண்ணை மூடினால் சூர்யன் அஸ்தமிப்பான். அவனுக்கு சூர்யனே கண்ணாதலின். ச்ரவஸ் என்றால் ச்ரவணம்; நல்ல உபதேசம் கேட்பது. பீமஸேனாதிகளுக்கு பகவான் நல்ல உபதேசம் பெறுவிக்காமலிருந்தால் அவர்கள் ராஜ்யத்தில் பேராசை கொண்டிருப்பார்கள். த்வாங்க்ஷதாதுவுக்கு பேராசை பொருள். பகவான் சிறு பிள்ளையாய் சுற்றும்போது பூமியும் சுற்றும். உலகெல்லாம் சுற்றும். எல்லாம் அவனது வயிற்றிலுள்ளதே. பகவான் ஒரே முஷ்டியாயிருந்து இந்த்ர பூஜையை நிறுத்தி தேவர்களுக்கு அச்சத்தைக் கொடுத்தான். அதே கதர்த்தனம் அதனால் ஆகாசமே கலங்கிற்று என்றவாறு.

3 வேறு பொருள்—ஜரத்காரு என்ற ரிஷி வாஸுகியின் பெண்ணான தம் மனைவியின் தொடைமேல் தலை வைத்து உறங்கினார். ஸூர்யாஸ்தமய வேளையில், பொழுது போயிற்றென்று அவள் எழுப்பினாள். அப்போது சொன்னார். நான் படுத்திருக்கும் போது ஸூர்யனாவது அஸ்தமிப்பதாவது என்று. அதனால் அவர் உறங்குவதால் ஸூர்யனைத் திரஸ்காரம் செய்தாரென்றதாம். ஸ்ரீராமபிரான் தனது புகழ்ச்சியை மறைத்திருந்தால் அதாவது அவதாரம் செய்யாமலிருந்தால் வால்மீகி கோகிலமானது காக்கையாயிருக்கும். ஸ்ரீமத்ராமாயணம் பிறந்திராது. மங்கணரென்ற ப்ரஹ்மசாரி தவம் புரிகின்றவர் (ஆரண்ய தீர்த்தயாத்ராபர்வ) தம் கையில் தர்ப்பம் குத்தின போது ரத்தத்திற்கு ப்ரதியாகக் கீரைச்சாறு பருகக் கண்டு தவம் பலித்ததென்று களித்து குதித்தாராம். பூமியும் சுற்றுமளவுக்கு அவர் குதித்துச் சுற்றினது மூன்றும் பாதத்தின்

பொருளாம். ரகு என்னும் அரசன் பணமில்லாமல் கௌத்ஸமஹர்ஷிக்கு தானம் செய்ய தேவலோகத்தில் குபேரனோடு போர்புரிய வேண்டுமென்று வானத்திலே முஷ்டிகளை நீட்டினான், ஆகாயமே கலங்கிற்றென்பது நாலாம்பாதத்தில் கருதப்பெறும்.

நம் ஸித்தாந்தத்தில் ச்ரத்தையுள்ள சிலர், 'பிற மதத்தினருக்குப் பாண்டித்யத்தினால் த்ருப்தி பெறுவிக்கவே வந்தன ஸ்ரீபாஷ்யாதிகள், அவற்றால் நமக்கென்ன' என்று புறக்கணித்துப் பேசுவர். இப்படி பிற மதத்தை தூஷிக்கத் தெரியாமல், அவர்கள் சொல்வதைக் கேளாமல் க்ரந்தங்களைக் காணாமல் கண்ணை மூடிக்கொண்டால் அதனால் பாஸ்கராசார்யரை கண்டித்ததாகுமா. ச்ருத ப்ரகாசிகையில் பரே, பரே என்று எங்கும் எடுக்கப்பட்ட சாங்கர மதத்தினர், நம் காதை யடைத்து கொண்டதாலேயே பொருளின்றி கத்தும் காக்கையாயிடுவரா. இந்த ஏகதேசிகள் தாங்கள் சில ஐதிஹ்யம் கட்டி ப்ரமித்தால் பூலோகமே ப்ரமித்து விடுமா. கையில் சரக்கில்லாமல் வீணே மூடிக் கொண்டு ஏதோ வைத்திருப்பதாக அப்ரபத்தியை ப்ரபத்தி யாக்கி வஞ்சனையாகப் பேசி வந்தால் வானம் போல் விசாலமான பண்டிதர்களின் ஹ்ருதயம் கலங்கி விடுமா. அர்த்தமில்லாமல் செய்யும் வீண் வாதம் இதென்றே அறியலாகும். ஆகையால் வீண்கர்வத்தை விட்டுப் பூர்வாசார்யர்களைப் போலே தம் மதம், பிறமதமெல்லாம் ஆராய்ந்து பிறமதத்தைத் தெளிந்து புறக்கணித்துத் தம் மதச்சிறப்பை வெளியிட்டு ப்ராமாணிகமானவற்றிலே தூஷணநோக்கை விட்டு ஒழுங்காக நடந்து கொள்ள வேண்டும்.

த்ருப்தபத்ததி முற்றும்.

सुभाषितनीव्यां खलपद्धतिः ३.

परचित्ते(न्तै[1])कनिरताः पुत्रादिष्वप्यसङ्गिनः ।
योगिनामनुकुर्वन्ति विशृङ्खलधियः खलाः ॥ १ ॥

तदेवं प्रथमपद्धत्या महाजनावमाननादिहेतुभूतमविवेकाख्यमज्ञानं प्रथममुपपाद्य, तत्प्रसूतेर्ष्यासूयादिमूलकं दर्पविशेषं महापुरुषविडम्बनादिपर्यन्तायुक्ततमकार्यकरं प्रायशोऽप्रस्तुतार्थप्रशंसयैव विपुलं निराकृत्य तत्प्रसङ्गात् तादृशदर्पविशेषसहकृतामर्षणवशात् स्वीयमत्यन्तनैच्यमवबुद्ध्यापि ये तावन्निर-

1 चिन्तेति प्राच्यपाठः साधीयान् । विवक्षितार्थः तदा स्फुटः, परविषयकचिन्तैव सर्वदेति । योगिपरार्थानुगुणश्च । चित्तपदे तु वक्ष्यमाणमनश्चिदाद्यर्थलोभः । परेषु चिद् ज्ञानं येषां ते परचितः तद्भावः परचित्ता । तदेकरता इति वा ।

पराधानपि परान् परिदूषयन्ति, पीडयन्ति च बहुधा। तदीयदौर्जन्यं खलत्वापरपर्यायमुपालब्धुकामः स्वार्थनिरपेक्षपरानर्थैककारितास्वभावरूपं खलत्वलक्षणं सदृष्टान्तमुद्घाटयति **परेति**। पूर्वपद्धतौ हि स्वोत्कर्षादिसम्पादनाय परविडम्बनादिकं दुष्टलक्षणं निरूपितम्; इह तु स्वकार्यलेशमनपेक्ष्य परोपद्रवकारित्वं निरूप्यत इति विशेषः। एवमप्रस्तुतप्रशंसैव पूर्वपद्धतौ बहुशः। अत्र तु समासोक्तिरेव प्रायः, उपमाऽपि क्वचिदिति विवेकः।

परेषां अन्येषां, यत् **चित्तं** इदमद्य कार्यमित्यादिनिश्चयः। तत्रैव निरताः स्वबुद्ध्या कार्याकार्यादिकमनिश्चित्य परे यत् यत् कार्यं परोपद्रवार्थमाचरन्ति, तत्र तत्र स्वयमप्रयायिनो भवन्तीत्यर्थः। 'मूढः परप्रत्ययनेयबुद्धिः' इति न्यायात् स्वानर्थपर्यवसायिनमपि परपीडादिकं सहसैव समाचरन्तीति भावः। एकशब्दोऽवधारणार्थः। **परवित्तैकनिरता** इति पाठे तु विदो भावो **वित्ते**ति विग्रहेण, भावे क्ताश्रयणेन वा ज्ञानार्थकत्वं प्रसाध्य परज्ञानानुयायित्वार्थबोधोऽवसेयः। यद्वा परेषां **वित्तं** धनादिकं स्वं तत्रैव निरताः तदीयवित्तहरणाय समयान्वेषणपराः। यद्यपि परस्वहरणे स्वस्यापि वित्तलभोऽवश्यम्भावी, तथाऽपि न तत्रैषामुद्देशः, किंतु वित्तादिहरणेन परस्य दुःखोत्पादनमात्र एव। अत एव केचित् परवित्तहरणलोलुपा अन्येभ्योऽपि ददत्यपहृतानि। परशब्दबलात् स्वभिन्नेषु सर्वेष्वपि प्रतिकूलाचरणकुतूहलित्वमभिप्रेतम्। तेन चात्र स्वभिन्नसामान्यानुगतो न कश्चिदपराधलेशः सम्भवी। परं तु स्वस्वभावकौटिल्यमेवास्य मूलमिति द्योत्यते। नितरां रता इत्यनेन स्वार्थसम्पादने एषां न किञ्चिदप्यासक्तिरिति सूचितम्।

तर्हि स्वपुत्रभ्रात्रादीनामतथास्वभावानां विरोध एव सम्भवेदित्यतः तद्विरोधोऽप्यकिञ्चित्कर इत्याह **पुत्रे**ति। आदिपदेन भ्रात्रादिपरिग्रहः। **असङ्गिनः** वाञ्छारहिताः स्वीयचरित्रासहनेन पुत्रादिबन्धुभिः स्वपरित्यागेऽप्यनाकुलचित्ताः; स्वकार्यविरोधिपुत्रादिसङ्गमपि स्वयमेव परित्यजन्त इति वा। यथा रावणेन स्वकार्यविरोधिविभीषणबहिष्करणं कृतमिति। अपिशब्देन पुत्रादिलाभाय लोके बहुशः प्रयत्नदर्शनेऽपि पुत्रादित्यागेऽपि प्रयतन्तेऽमी इति विरोधो द्योत्यते। यद्वा पुत्रादिभिः समयविशेषे स्वोपकारसम्भवज्ञानेऽपि तात्कालिकविरोधाचरणप्रत्यूहभिया तत्र वाञ्छां तत्सङ्गमेव वा परित्यजन्त इत्याशयः। अतश्च स्वानर्थमप्युपेक्ष्य परानर्थैकपरत्वावसायात् 'मृत्वाऽप्यन्नं वमयति नृणां मक्षिका कुक्षिगामि' इति न्यायगोचरताऽवगम्यते। **विश्रृंखलधियः** श्रृंखलाशब्दितप्रतिबन्धकरहिता विश्रृंखलाः तथाविधा धियः बुद्धयो येषां ते। स्वबुद्धिपथपरिलग्नार्थस्य श्रुतिस्मृत्यादिरूपेश्वराज्ञा वा राजाज्ञा वा महाजनादिभीतिर्वा न काऽपि निवारयित्रीत्यर्थः। सर्वत्र निर्भयं स्वेच्छयैवाचरन्ति दुर्जना इति भावः। **खला** दुष्टाः। 'पिशुनो दुर्जनः खलः' इत्यमरः। **योगिनामनुकुर्वन्ति** योगिन इवाचरन्ति। 'तदस्यानुकरोतीति शब्दाः सादृश्यवाचकाः' इति हि दण्डी। योगितुल्या भवन्तीत्यर्थः। अत एवात्र उपमालङ्कारः। मातुः स्मरतीतिवत् सम्बन्धमात्रविवक्षया षष्ठी। **योगिनाम नु कुर्वन्ती**ति च पदच्छेदः। नुः खल्वर्थे। योगिनां व्यासवसिष्ठशठकोपादीनां यन्नाम तदपि वहन्त ईदृशदुष्कर्मकारिण इति विस्मयः खेदो वाऽनेन द्योत्यते। 'तदेव गृध्नतां नाम' इति श्लोके छागादिभिस्त्रिमूर्तिनामवहनेऽपि न तावता कोऽपि बाधस्त्रिमूर्तीनामित्यभिहितम्;

इह तन्नामवहनमात्रेण न कोऽपि लाभो दुर्जनानामित्युच्यत इति विभागः। परवित्तैरत्यादिदोषदुष्टतया वस्तुतो निरपराधच्छागादितोऽपि निहीनताऽनेन सूच्यते। छागादीनां नामवहनं कथञ्चिल्लाभहेतुरपि भवेन्नाम; अदुष्टत्वात्; न तथैषामिति भावः।

योगिपरत्वे त्वेवमर्थः। परस्मिन् ब्रह्मणि **चित्तैकनिरताः** चित्तेन एकनिरताः। **एकशब्दो** मुख्यपरः क्रियाविशेषणम्। तथा च मुख्यतमासक्तिमन्त इत्यर्थः। **परवित्तेति** पाठे परं वेत्ति विन्दति वेति विग्रहभेदेन परब्रह्मवेदनलाभादिप्रवणता बोध्यते। **पुत्रादिष्वप्यसङ्गिनः** पुत्रादिलिप्सारहिताः तत्सत्त्वेऽपि तत्रासक्तिसम्बन्धादिरहिता इति वाऽर्थः। योगिशब्दस्य संन्यस्तपरत्वे त्याग एवासङ्गशब्दार्थः। **विशृंखलधियः** अनभिसंहितफलसत्कर्माचरणमृदितकषायतया निरर्गळविसरद्बुद्धयः विप्रकृष्टनिखिल-वस्तुसाक्षात्करणसमर्था इत्यर्थः। यद्वा **विशृंखलधियः** शृंखलाशब्दः सम्बन्धिपरम्परापरः। अतश्च प्रसक्तानुप्रसक्तविषयतामन्तरेण परब्रह्मण्येव विलीनबुद्धयः इत्यर्थः। योगस्य तथास्वरूपत्वादिति भावः। खे लीयन्त इति खलाः। लिङः (लीङः ?) कर्तरि डः। 'प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म' इत्युक्ते ब्रह्मणि विलीनचित्ताः योगान्तर्गतपरमाकाशरूपप्राप्यस्थानचिन्तनपरा वा। उक्तविशेषणत्रयेण परब्रह्मण्येवासक्तिस्तदन्याचिन्तनं तत्रैव लयश्चाभिधीयत इति न पौनरुक्त्यम्। पूर्वपद्धतौ जातिगुणादिन्यूनानां दर्पवशादुत्कृष्टजातीयसाम्यसम्पाद-नाय तत्समवेषता दूषिता। इह तु बहुदोषशालिनां दौर्जन्यमात्रात् परावमाननरूपं खलत्वं निरस्यत इति उभयोरदूरविप्रकर्षात् तत्स्मृतेः प्र[सङ्ग]सङ्गतिर्बोद्धव्या।

(2) एवं पक्षिपरतयाऽपि कश्चिदर्थः। खे लीयन्त इति **खलाः** पक्षिणः **परचित्तैकनिरताः** परस्य कस्य चित् पक्षिणो यच्चित्तं तत्रैव निरताः। पक्षिणो हि प्रातः समुत्थाय परस्परसङ्केतमन्तरेणैव कस्यचिदा-हारार्थं प्रतिष्ठमानस्य पक्षिणः पश्चादन्यः तस्य पश्चादन्य इति गतानुगतिकतया सञ्चरन्ति; न तु स्वबुद्ध्या कञ्चिदर्थमवधार्य सर्वे ससङ्केतम्। द्रष्टॄणां तावदेकसङ्केता इव लक्ष्यन्त इति प्रसिद्धमेव। तथा च पुरोयायी न निरर्थकं चरेदिति बुद्ध्या स्वयमपि तदनुयानपरा इत्यर्थः। **पुत्रादिष्वप्यसङ्गिनः** तादृश-सुदूरप्रयाणसमये स्वपोतादिकमप्युत्सृज्य गच्छन्त्यासायमिति प्रसिद्धेः। विशृंखलधियः उक्तरीत्या परस्पर-सङ्केतरहितबुद्धयोऽपि। योगिनामनुकुर्वन्ति—श्रेणीबन्धेन सञ्चारात् ससङ्केतमनस इव लक्ष्यन्ते। योगो मनःसंयोगः। स्थानभेदोद्देशेन प्रस्थिता अप्येकस्थानार्थयायिन इवाऽऽभान्तीत्यप्यर्थो बोद्धव्यः।

(3) एवं **खलेकपोतन्यायोऽप्यत्र** बोध्यते। खलशब्दो धान्यमर्दनस्थानपरः। 'व्रीह्याद्याघट्टनस्थाने खलं धूर्ते त्वयं त्रिषु' इति रत्नमाला। तत्र च प्रकीर्णतमधान्यकुलावलोकीनि खतलचारीणि कपोतकुलानि युगपदेव तत्स्थले निपतन्ति। अनन्तरं चैकमुख्येन सुमृष्टं भक्षयन्ति धान्यजातानि। अयमेव न्यायोऽ-नुसृतः प्राचीननैयायिकै**रभिहितान्वयवादे**। आहुर्हि—'वृद्धा युवानः शिशवः कपोताः खले यथाऽमी युगपत् पतन्ति। तथैव सर्वे युगपत् पदार्थाः परस्परेणान्वयिनो भवन्ति' इति। पदजातैर्बोधिताः पदार्था एव वाक्यार्थावबोधका इति तत्पक्षः। **अन्विताभिधाने** तु अयं क्रमः। प्रथमं वाक्यघट-

कसकलपदानां क्रमशः श्रवणम्। अनन्तरं सर्वैरपि पदैः स्वस्वार्थस्मारणम्। अथ च तत्तत्समभिव्याहारादिपरामर्शात् स्मृततत्तत्पदार्थानां क्रियाकर्मभावादिरूपसम्बन्धेनान्वयकल्पनम्। ततः परस्परसम्बद्धनिखिलपदार्थविषयकविशिष्टवाक्यार्थबोध इति। यथाऽऽहुः—'पदजातं श्रुतं सर्वं स्मारितानन्वितार्थकम्। न्यायसम्पादितव्यक्ति पश्चाद्वाक्यार्थबोधकम्' इति। नवीनाः पुनरनेनैव न्यायेन प्रथमं विशेष्ये विशेषणमिति रीत्या निखिलपदार्थान्वयः, अनन्तरं विशिष्टवाक्यार्थबोध इति वदन्ति। तत्र चायं वाक्यार्थः—खलशब्देन खलेकपोतन्याय उच्यते; खलवृत्तान्तस्य तच्छब्देन बोधनात्। यथा सुभगाभिक्षुकन्याय इत्यादौ सुभगाभिक्षुकयोर्यो वृत्तान्तः प्रवृत्तः, तद्बोधो भवति—तद्वत्। अत एव खलशब्दस्य पुलिङ्गताऽपि; शब्दपरत्वात्। यद्वा नामैकदेशग्रहणात् तत्परता, न्यायपरतया पुलिङ्गता[1] चेति। ते च न्यायाः परचित्तैकनिरताः परशब्देन तात्पर्यविषयीभूतार्थ उच्यते। तत्पर इत्यादिव्यवहारात्। तद्विषयकं यच्चित्तं स्मरणम्। चित्तशब्देन स्मरणहेतुभूतमनोवस्थाविशेषवाचिना स्मरणमेवात्र लक्षणादिना बोध्यते। श्रूयते हि—'चित्तं चित्तेन स्मृतिं स्मृत्या स्मारं स्मारेण विज्ञानं विज्ञानेन' इति। तत्रैव निरताः तदवबोधकाः तात्पर्यविषयीभूतार्थस्मरणमात्रबोधकाः (?)। न्यायानां तद्ज्ञापकत्वं दृष्टान्तविधयेति। वित्तेति पाठस्त्वभिहितान्वयपक्षानुकूलः; प्रथममेवार्थबोधनस्य तन्मतसिद्धत्वात्। **पुत्रादिष्वप्यसङ्गिनः पुत्रादि**शब्देन पुत्रपौत्रस्थानीयाः युवानः शिशवश्च कपोता उच्यन्ते। तेन च तत्समानानि द्वितीयतृतीयादिपदानि लक्ष्यन्ते। 'वृद्धा युवानः शिशव' इत्यादिभिः पदैः पूर्वापरत्वादिसाधर्म्यात् प्रथमद्वितीयतृतीयादिपदानि ज्ञापनीयानीति संप्रदायात्। **तेष्वसङ्गिनः** सम्बन्धबोधनरहिताः परस्परासम्बद्धसकलपदार्थबोधका इत्यर्थः। **विश्रृंखलधियः** विश्रृंखलोपस्थितिजनकाः प्रथमतस्तत्तत्पदार्थानां विशेष्ये विशेषणमिति रीत्यैवान्वय इति तन्मतत्वात्। **योगिनामनुकुर्वन्ति।** अनुपदमेव परस्परसंयोगिविषयकविशिष्टवैशिष्ट्यावगाहिबोधजनका भवन्ति। **योगशब्द**स्तत्तत्सम्बन्धपरः। **अनुकरणं** च पश्चात्करणम्। सम्बन्धसामान्यविवक्षया षष्ठी।

(4) एवमेवात्राद्वैत्यभिमतमहावाक्यार्थबोधपरतयाऽपि बोधः। तत्र तत्त्वमस्यादिपदसमुदाया विशेष्यतया विवक्षिताः। ते च **परचित्तैकनिरताः** परस्य या चित्ता चिद्रूपत्वं तत्रैव निरताः। **अहं ब्रह्मास्मीति** परब्रह्मचितोरभेदबोधस्य तन्मतसिद्धत्वात्। यद्वा— **परस्ता**त्पर्यविषयीभूतः **चित्** चैतन्यं येषां ते, तेषां भावः परचित्तेति विग्रहात् शुद्धचैतन्यमात्रतात्पर्यका इत्यर्थः। तत्त्वमादिपदैः सर्वज्ञत्वाल्पज्ञत्वादिविशिष्टचैतन्यार्थकैः तत्तद्विशेषणबहिष्कारेण शुद्धचैतन्यमात्रबोधोत्पादस्य तैरङ्गीकारात्। अत एव पुत्रादिष्वप्यसङ्गिनः त्वंशब्दवाच्येषु श्वेतकेत्वादिरूपेषु पुत्रादिष्वपि असङ्गिनः। तत्र च सद्विद्यायां छान्दोग्ये, 'उद्दालको हारुणिः श्वेतकेतुं पुत्रमुवाच' इत्यारभ्य प्रवृत्तपितापुत्रसंवादान्ते तत्त्वमसीत्यभिधानेन पुत्रादिपरत्वंशब्दादिषु शाब्दबोधसम्बन्धविरहिता इति वाक्यार्थः। तत्रत्यत्वंपदस्य पितृप्रयुक्तस्य पुत्रार्थकत्वात्। आदिपदेन

---

1 खलशब्दात् अर्शआद्यचि खलवन्तः खलन्यायवन्तः शब्दाः खलपदेन सुवचाः।

तत्पदासिपदार्थाद्यर्थी अपि परस्परानन्वयिनो बोध्यन्ते। विशृंखलधियः परस्परवैशिष्ट्याद्यविषयकनिर्विकल्पकबोधजनकाः। शृंखला च सम्बन्धिपरंपरेत्युक्तमेवाधस्तात्। खलाः ब्रह्ममात्रे लीनाः; अन्ततःशुद्धमात्रविषयकबोधोदयात्। योगिनामनुकुर्वन्ति—एतादृशासम्बद्धबोधपरत्वेऽपि प्रकृतिप्रत्ययकर्तृक्रियापदादिनिर्देशात् सम्बन्धादिविषयकवाक्यार्थावबोधकपदसमुदायवदवभासन्त इति अमीषामपि खलत्वविवक्षयाऽत्र तत्सूचनम्।

(5) एवं कुलटाजनदासीजनपरतयाऽपि कश्चिदर्थः। **खलाः** खे इंद्रिये लीनाः कुलटाजनाः। '**इतो** बहिः पञ्च पराञ्चि खानि' इत्यादिप्रयोगात् खशब्दस्येन्द्रियपरता। **परचित्तैकनिरताः** परपुरुष एव चित्तेन एकनिरताः; न तु स्वभर्तरि। दासीजनपक्षे परकीयचित्तग्रहणलोलुपाः। **वित्ते**ति पाठस्तदर्थे स्वरसः। **पुत्रादिष्वप्यसङ्गिनः**। परपुरुषसक्तानां स्त्रीणां कदाचिद्बहिर्निर्गमनादिसम्भवात् पुत्रादित्यागमपि तदाऽभ्युपगच्छन्तीत्यर्थः। दासीनामपि पुत्रयामेव प्रीतिः न तु पुत्रपौत्रभ्रात्रादाविति प्रसिद्धमेव। सामान्यतो दासीजनपरत्वविवक्षया पुंलिङ्गता। **विशृंखलधियः** अप्रतिबद्धबुद्धयः। स्वबुद्धिसञ्चारस्य गुरुजनादिना प्रतिबन्धकरहिताः तद्वार्ताद्युल्लङ्घिनः अन्यत्र यथेच्छबुद्धयश्च। योगिनामनुकुर्वन्ति—गार्हस्थ्ययोगिनः कुलस्त्रीजना इव गृह एव स्थित्वा सांसारिकचरितमाचरन्ति। 'स्त्रीणां च चित्तं पुरुषस्य भाग्यं देवो न जानाति कुतो मनुष्य.' इति न्यायेन पतिव्रताकुलटयोः वैषम्यग्रहणस्याशक्यत्वादिति भावः। अन्यत्र, मनोयोगिन इवाचरन्ति। दासीनां वस्तुतः प्रीतिलेशविरहेऽपि आन्तरप्रीतियुक्तवत् नटनदर्शनादिति भावः। **खलाः** नीचाः 'क्रूरे नीचेऽधमे खलः' इति विश्वः।

(6) एवं खलशब्दमुख्यार्थभूतदुर्योधनदुःशासनकर्णशकुनिरूपदुष्टचतुष्टयपरतयाऽप्यर्थबोधः। ते हि सर्वे परचित्तैकनिरताः। स्वगोष्ठीनिष्ठस्य यस्य कस्यचित्परोपद्रवमाचरतः सहायीभवन्त्येवापरे; न तु स्वबुद्ध्या कार्याकार्यविवेकपूर्वकमिति प्रसिद्धमेव। यथा द्रौपदीपरिभवादिप्रवृत्तस्य दुर्योधनस्यानुगामिनोऽभवन्नन्ये। न तु पूर्वमेवैवं कर्तव्यमिति विमृश्य प्रवर्तन्त इति भावः। परवित्तेति पाठे 'सूच्यग्रं न प्रदास्यामि' इत्युक्त्वा तद्ग्रहणैकसक्ताः इत्यर्थः। पुत्रादिष्वपि कर्णस्य पुत्रस्थानीयेषु, दुर्योधनस्य पितृस्थानीयेष्वपि धर्मपुत्रादिषु सर्वथा प्रीतिरहिताः। यद्वा पुत्रशब्दो भामादिवत् नामैकदेशग्रहणात् धर्मपुत्रपर इति द्रष्टव्यम्। खलाः दुष्टा वा नीचा वा। योगिनामनुकुर्वन्ति। कुरूणामन्ति **कुर्वन्ति**। **अन्तिशब्दः** अन्तिकार्थकः। 'यो मेऽन्ति दूरेऽरातीयति तमेतेन जेष'मित्यादौ यो मम समीपे दूरे वा शत्रुत्वमिच्छतीति व्याख्याकरणात्। तथा च अनुकुर्वन्ति—कुरुक्षेत्रसमीपमनुसृत्यापि। 'योगिनाम्' इत्यस्य कुरुक्षेत्रेऽन्वयात् योगिनिवासभूतकुरुक्षेत्रार्थकतालाभः। विशृंखलधियः—कार्याकार्यविवेकभयलेशविरहितं वस्त्रापहरणादिरूपात्युत्कटमहापापकरणप्रवृत्तेर्निरर्गळबुद्धयः। योगिनामित्यनेन समीपस्था योगिनोऽपि स्ववार्तोल्लङ्घनभिया न निवारयन्त्येतानिति द्योत्यते। तथा च स्वप्रयोजनलेशमनपेक्ष्य परोपद्रवैकप्रवृत्तिरूपस्य खललक्षणस्यात्र समन्वयो बोद्धव्य इति।

(7) एवं विभीषणादिपरतयाऽपि। ते च **परचित्तैकनिरताः** स्वजनं रावणादिकमुपेक्ष्य परस्मिन् विजातीये श्रीरामे विलग्नचित्ताः **पुत्रादिष्वप्यसङ्गिनः** 'त्यक्त्वा पुत्रांश्च...राघवं शरणं गतः' इत्युद्घोषेण तेष्वनासक्ताः **विशृंखलधियः** धनादिपरित्यागेऽप्यकलुषबुद्धयः। **खलाः** खे लीनाः 'खस्थ एव व्यतिष्ठत', 'गगनस्थं महीस्थास्ते ददृशुर्वानरोत्तमाः' इत्युक्तत्वादिति भावः। योगिनामनुकुर्वन्ति—महायोगिवदव्यवधानेन भगवन्तं भजन्ते। बहुकालानुष्ठितयोगमहिम्ना यदेव योगिनः पदं गच्छन्ति तदेवोपायलेशमन्तरेण प्राप्तवन्त इत्यर्थः। यद्वा **पूर्वयोगिनः** सुग्रीवादय इव सुसङ्गता भवन्ति। 'विभीषणेनाशु जगाम सङ्गमं पतत्रिराजेन यथा पुरन्दरः' इत्युक्तत्वात्। बहुवचनात् तदनुगताश्चत्वारो राक्षसा विवक्षिताः। तेषां विभीषणचित्तानुयायित्वात् परचित्तैकनिरतत्वं सुव्यक्तम्।

(8) एवं स्वर्गिपरतयाऽपि। केचित् क्रत्वनुष्ठायिनः पुत्रपश्वादिरूपदृष्टफलकामनायामास्तिक्यभङ्गमभिमन्यमानाः स्वर्गरूपं केवलपारलौकिकफलमेव परमप्रयोजनतया स्वीकुर्वन्ति। तद्विषयोऽयं श्लोकः। पुत्रादिष्वसङ्गिनोऽपीत्यन्वयः। **खलाः खे** स्वर्गे लीनाः तत्रैव सुखभूयस्त्वबुद्ध्या नित्यनिवासकुतूहलिनः, **परचित्तैकनिरताः** 'यथा पशुरेवं स देवाना'मिति श्रुत्युक्तक्रमेण कस्यचिद्देवगणस्येच्छानुगुणं तत्किङ्करतामातिष्ठमानाः। **विशृंखलधियः** ईदृशशृंखलाबन्धेऽपि सुखलवानुभवमात्रेण विशृंखलत्वेनात्मानमवबुद्ध्यमानाः। विशृंखल इति धीर्येषामिति विग्रहः। 'कारागृहे कनकशृंखलयाऽपि बन्ध' इत्युक्तेः। **योगिनामनुकुर्वन्ति** पारलौकिकफललाभमात्रेण उपासकवत् परमपुरुषार्थलब्धार इति मत्वा पुनर्निवृत्तिं नावेक्षन्ते। तथा च दृष्टक्षुद्रफलाद्यलोलुपा अपि अदृष्टक्षुद्रफलेषु निर्लज्जं मज्जन्तीत्यर्थः। तदेतदभिसन्धायोक्तं प्रबोधचन्द्रोदये—'शान्तेऽनन्तमहिम्नि निर्मलचिदानन्दे तरङ्गावलीनिर्मुक्तेऽमृतसागराम्भसि मनाङ्मग्नोऽपि नाचामति। निस्सारं मृगतृष्णिकार्णवजले श्रान्त्या विमूढः पिबत्याचामत्यवगाहतेऽभिरमते मज्जत्यथोन्मज्जति' इति।

(9) एवमन्योऽपि[1] मनश्चिदाद्यग्निचित्परः। तत्र हि—वाजसनेयकेऽग्निरहस्ये समाम्नातम् मनश्चितो वाक्चित इत्यादि। मनसैव चयनोपकरणादिकं परिकल्प्य तत्र मनसैव चीयमानोऽग्निर्मनश्चित्। एवं वाक्चिदादयोऽपि। तत्र मनश्चिदाद्यग्नयः विद्यामयस्य कस्यचित् क्रतोरङ्गभूता विद्यारूपा इति निर्णीतं **गुणोपसंहारपादे** (3-3)। ते हि परं चिन्वन्तीति व्युत्पत्त्या परब्रह्मैवाधिकृत्य चयनात् परचित्तैकनिरताः। यथैवेष्टकचितेनाग्निना तत्तद्देवतामाराधयन्ति फलाय तथैवेमे केवलं मनसैव परब्रह्मोद्देशेन चिन्वन्ति। तत्र मुक्तिरेव फलं फलान्तरानिच्छायाम्, अन्यथा चेत्, ऐच्छिकं सर्वमपि फलम्। उक्तं हि श्रुतप्रकाशिकायाम्—'फलकामनया कृतं चेत्, तत्फलप्राप्तिः, अन्यथा चेन्मुक्तिः फलम्' इति। तथाचैते पुत्रादिषु क्षुद्रफलेष्वनासक्ता अपि **विशृंखलधियः** किं वा फलमपेक्षणीयमिति व्यवस्थाबन्धरहितबुद्धयः।

---

1 मनश्चिदादिशब्दः तकारान्तः, न त्वकारान्तः। अतः श्रीभाष्यकोशे इवात्रापि लेखकप्रमाद इति स पाठ उपेक्ष्यते। शुद्धरीत्यालिख्यते। एवमुपरि सर्वत्र वाक्येऽपि।

'बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम्' इत्युक्ताव्यवस्थितबुद्धयः। खलाः खलं असारं फलमेषामिति खलाः। 'खलं भूस्थानकल्केषु' इति विश्वः। अर्शआद्यचा मत्वर्थता। एवंभूतासारफलगामिनोऽपि योगिनामनुकुर्वन्ति—विद्यारूपकत्वनुष्ठानात् दहराद्युपासकतुल्या भवन्तीत्यर्थः। फलेच्छाविरहमात्रेण करस्थामपि मुक्तिं बुद्धिमान्द्यादेव किञ्चित् फलमभिलष्य परित्यजन्त्येत इति[1] विशिष्टार्थः। उपमासमासोक्त्यादिकं यथायथमनुसन्धेयम् ॥ १ ॥

கலபத்ததி 3.

தன் பெருமைக்காகப் பிறரின் வேஷம் கொண்ட த்ருப்தனைப் பற்றியது முன்பத்ததி. தனக்குப் பலனின்றி பிறரை உபத்ரவிக்கின்ற கலனைப் பற்றியது இது.

பரசித்தைகநிரதா: புத்ராதிஷ்வப்யஸங்கிந:।
யோகிநாமநுகுர்வந்தி விச்ருங்க்கலதிய:க்கலா:—1

1 கலர்களை துஷ்டர்களை யோகிகளென்னலாம். அடைமொழிகள் சிலேடையில் இருவருக்கும் ஒத்துளன. இருவரும் பரசித்தஏகநிரதர். பிறர்மனதில் என்ன நோக்கமிருக்கிறதென்பதை உபத்ரவத்திற்காக கவனிப்பவர் கலர். யோகிகள் பரமாத்மாவை அறிந்தவராயிருப்பதிலேயே நோக்கு உள்ளவர்கள். இருவரும் தங்கள் கார்யத்திற்கு விரோதமுண்டாகில் புத்ரபௌத்ராதி பந்துக்களிடமும் பற்றில்லாதவர். விச்ருங்கலதிய:-கட்டுக்கு அடங்காதவர்கள். ஒரு பலனையும் வேண்டாமல் ஸத்கர்மாநுஷ்டானத்தால் தடையின்றி புத்தியின் விகாஸமுடையவர் யோகிகள்.

2 கலா:-பக்ஷிகள், கம் ஆகாசம், அதில் இருக்கின்றவை. ஒன்றின் மனத்திற்கு இணங்கி மற்றொன்று செல்லும். ஒன்று புறப்பட்டால் எல்லாம் புறப்படும். காலையிற் புறப்பட்டவை மாலை வரையில் குட்டிகளையும் விட்டுத் திரியும். அதது பிரிந்து செல்லும்.

3 கலேகபோதந்யாயமென்பது ஒன்று உண்டு. கலமாவது களம்-தானியம் சீர் செய்யுமிடம். களத்தில் இறைந்த தானியங்களைப் பொறுக்க புறாக்கள், பெரியன சிறியன எல்லாம் ஒரே ஸமயத்தில் வந்து நிற்கும். அது போல் வாக்யத்திலுள்ள சொற்களின் பொருளெல்லாம் முன் பின் என்பதின்றி ஒரேஸமயத்தில் நினைவுற்று, சேரவேண்டும் மற்றொரு சொல்லின் பொருளோடு சேரும். இதையொட்டி இந்த ச்லோகத்தின் பொருளாவது-கலேகபோதந்யாயமானது, முக்கியமானதோர் அர்த்தத்தில் நோக்காய், முன்பதம், பின்பதம் என்ற வாசியின்றி விச்ருங்கலமாய் தனித்தனியே பொருளை நினைப்பூட்டிப் பிறகு (யோகிநாம்) ஒன்றோடொன்று சேர்த்து ஓர் முக்யார்த்தத்தைக் காட்டும்,

4 அத்வைதி மஹாவாக்யமாகவும் சொல்லலாம். தத்த்வமஸி என்ற மஹாவாக்யம் பிள்ளையான ச்வேதகேதுவைப் பார்த்து உத்தாலகர் சொன்னது. அதில் தத் என்பது காரணமாய் ஸர்வஜ்ஞமாய் ஸர்வசக்த

---

1 परशब्देन स्वाभाविकैषणकात्यागेन तदतिरिक्तमनोवागादिग्रहणम्। परचित्पदं मनश्चिदादिपरम्। तस्य भावः चित्ता, तदेकनिरताः पुरुषाः इति व्याख्येयम्।

மான ப்ரஹ்மத்தையும், த்வம் என்பது பிள்ளையாய் அறியாதவனுய் ஸம்ஸாரியான ச்வேதகேதுவையும் சொல்வதாலும், முடிவில் எல்லா வற்றையும் விட்டு, அகண்ட ப்ரஹ்மமான சித்தே அதன் பொருள் என்பர் அத்வைதிகள். ஆக பரமான சித் என்றதொன்றிலே நோக்காய், பிள்ளையான ச்வேதகேது, காரணமான ஸகுண ப்ரஹ்மமெல்லாவற்றை யும் விட்டு, விச்ருங்கலமான - ஒரு பொருளோடு சேர்ந்த மற்ருெரு பொருள்விஷயத்தை யறிவிக்காத நிர்விசேஷஞானத்தையே உண்டு பண்ணும். பார்த்தால் யோகியைப் போல்--பலபொருள்களைச் சொல்லும் வாக்யம் போல் தோன்றும்.

5 பதிவ்ரதையல்லாத ஸ்திரீவிஷயமாகலாம். பிறபுருஷன் மனத்திலே நோக்குள்ளவள், பிள்ளைகளையும் விட்டுத்திரிகிறவள், ஓரிடத்தில் நிலைத்த புத்தியற்றவள், பதிவ்ரதையான (யோகியான) வளைப்போல் நடிப்பவள்.

6 துர்யோதநதுச்சாஸநாதி கோஷ்டியிலிருப்பவர், தம் கோஷ்டியிற் சேர்ந்த பர-பிறருடைய சித்தத்திற்கு இணங்கி, மகன், உடன்பிறந்தவன் என்ற பந்துத்வத்தையும் விட்டு, யோகிகளின் குரு - அந்தி - அநு - குருக்ஷேத்ர ஸமீபத்திலேயே, அடங்காத மனம் உடையவர்களாவர்கள்.

7 விபீஷணன்விஷயமுமாம்-பரன் பரமபுருஷன் ஸ்ரீராமன். அவனிடம் மனம் வைத்தவன், புத்ராதிகளை விட்டவன், யோகத்தினுல் வரும் மோக்ஷபலனை யோகமின்றி சரணுகதியால் பெற்றவன், ஸம்ஸார பந்தமற்ற மனம் உடையவன். கலன் ஖லன். ஆகாசத்திலே நின்று அருள் எதிர்பார்த்தவன்.

8 ஸ்வர்க்கம் வேண்டுபவன்விஷயமுமாம். உயர்ந்த தேவர்களின் சித்தத்திற்கு இணங்கி ஸ்வர்க்கத்திலிருக்க விரும்பி இம்மைப்பயனை புத்ராதியை விட்டவன் மஹாயோகியைப் போலிருப்பவன்.

9 சதபதப்ராஹ்மணத்தில் அக்னி ரஹஸ்யமென்ற பாகத்தில் இஷ்ட கைகளை (செங்கல்களை) கொண்டு அக்னி ஸ்தானம் செய்து யாகம் செய் வது போல் மனஸ் வாக் முதலான இந்திரியங்களின் வ்யாபாரங்களைக் கொண்டே சயனம்-அக்னிஸ்தானம் செய்வதை நினைத்து மானஸமான யாகம் செய்யலாமென்று ஓதப்பட்டுள்ளது. ஆக மனச்சிதாதிகள் இஷ்டகசிதத்துடன் ஸமமாய் யாகத்திற்கு பரப்ரஹ்மஜ்ஞானிகளால் கொள்ளப்படும். அவர்கள் புத்ராதி பலன்களை விரும்பாமலுமிருப்பர். மோக்ஷத்திற்கான உபாஸனம் செய்கின்றவர் போல் இவர்கள் மநோ வ்யாபாரமுடையவர், இவர்கள் ஖லர்கள். மனம் வாக்கு முதலான இந்திரியங்களின் வ்யாபாரங்களிலே லயித்தவர்—மனம் சென்றவர். (1)

आत्मार्थं युक्तचित्तानां मित्रमण्डलभेदिनाम् ।
अतिलंघितलोकानां न बन्धः केनचित् क्वचित् ॥ २ ॥

पूर्वश्लोके खलानां योगिसाम्यप्रस्तावात् प्रकारान्तरेणापि योगिसाम्यमारुयास्यन् स्वचित्तैकनिरता अपि केचन खलाः पूर्वोक्तादत्यन्तकुटिलाः सन्तीति तद्वैषम्यं दर्शयति आत्मेति । आत्मार्थं आत्मप्रयो-

जनार्थमेव। तच्च परानर्थ एव। **युक्तचित्तानां** प्रयुक्तमनस्कानाम्। पूर्वश्लोकोक्तखलाः खलान्तरवचनमनुसृत्य परानर्थे प्रवृत्ताः; एते पुनः स्वबुद्ध्यैव तत्र प्रयतन्त इति विशेषोऽवसेयः। तन्निषेधकानि मित्राण्यपि त्यजन्तीत्याह-**मित्रे**ति। मित्रशब्दः आपत्परित्रातृपरः। तेषां **मण्डलानि** सङ्घाः तानपि भिन्दन्ति, अधिक्षेपादिभिर्निराकुर्वन्तीति तथोक्तानाम्। स्वकार्यलेशाय त्रैकालिकोपकारकर्तॄनपि परित्यजन्तीत्यर्थः।

यद्वा **मित्रमण्डलानि** परस्परमित्रसङ्घाः तान् **भिन्दन्ति** पैशुन्यादिना विरुद्धमनस्कान् कुर्वन्तीति ताच्छील्यार्थकणिनिना तदेकशीलता प्रतीयते। एवं सर्वमित्राणि परित्यज्य परानर्थाचरणे लोकविरोधः स्यादित्यत्राह **अती**ति। **अतिलङ्घिताः** तद्भावयाचनादरेण तिरस्कृताः **लोकाः** महाजना यैः तेषां **केनचित्** मित्रादिना राजादिना वा **क्वचित्** कस्मिंश्चिदपि देशे काले वा, **न बन्धः** न व्यवस्थेत्यर्थः। खला अपि केचित् कस्यचित् कार्यविरोधे प्रवर्तमाना अपि तन्मित्रादिमुखेन समाधानकरणाद्वा राजाज्ञादिमुखेन भीषणाद्वा निवर्त्यन्ते। अमी पुनः सर्वानपि तान् उल्लङ्घ्य स्वकार्यमेव निर्वर्तयन्तीति विशेष उक्त इति। यद्वा **बन्धः** सम्बन्धः। एतादृशमित्रलोकादित्यागिनां केनचिदपि न सम्बन्धः। मित्रमण्डलेभ्योऽपि द्रुह्यतां केन वा मनोबन्धः सम्भाव्यत इति हृदयम्। क्वचिदित्यनेन आपत्समयेऽपि परोक्तिश्रवणमेषां न सम्भवतीति सूचितम्। स्वात्ममात्रसाहाय्येन परानर्थकरणमेषां लक्षणमिति फलितम्।

(2) अन्योऽपि योगिपरतयाऽर्थः। **आत्मार्थं** परमात्मदर्शनार्थम्। "आत्मन्येवात्मानं पश्येदिति श्रुत्युक्तक्रमेण स्वात्मन्येवान्तर्यामितयाऽवस्थितं परमात्मानं साक्षात्कर्तुमित्यर्थः। **युक्तचित्तानां** योगमार्गे सम्यगवतीर्णमनस्कानाम्। चित्तशब्दः स्मृतिसन्तानजनकमनोवस्थाविशेषवाची। युक्तशब्देन यतमानसंज्ञाद्यवस्थाविशिष्टात् युञ्जानाद्व्यावृत्तिः। युक्तता च सिद्धिसमयनिष्ठः परिपाकविशेषः। अनेन फलसिद्धेः प्रतिबन्धविरहो बोद्ध्यते। **मित्रमण्डलभेदिनां** सूर्यमण्डलान्तर्मार्गेण परमव्योमाधिरूढानाम्। भेदश्चात्र तदन्तःप्रवेश एव। 'ऊर्ध्वमेकस्थितस्तेषां यो भित्त्वा सूर्यमण्डलम्। ब्रह्मलोकमतिक्रम्य तेन याति परां गतिम्' इति प्रमाणानुरोधात् भेदशब्दः। यद्वा **भेदः** सम्भेदः सङ्गतिरित्यर्थः। 'भिन्नः स्यात् त्रिषु दारिते। सङ्गतेऽन्यत्र फुल्ले च' इति मेदिनी। **अतिलङ्घितलोकानां** अर्चिरादिमार्गेणातिक्रान्तब्रह्मादिसकललोकानां **केनचित्** कर्मादिप्रतिबन्धकवर्गेण वा ब्रह्मादिदेवगणेन वा, **क्वचित्** प्रकृतिमण्डले वा परमपदे वा, **न बन्धः** 'इमान् लोकान् कामान्नी कामरूप्यनुसञ्चरन्' इति सर्वलोकसञ्चारेऽपि न तेषां कर्मबन्धसम्बन्ध इत्यर्थः। केनचिदित्यनेन परमपुरुषेणापि नास्य पुनर्निवर्तनं सुशकमिति भावः प्रतीयते।

(3) अन्योऽपि हनूमत्परोऽर्थः। **आत्मार्थं** आत्मतृप्त्यर्थमेव **युक्तचित्तानाम्** भगवद्योगे प्रवर्तमानमनस्कानाम्। तथा ह्युच्यते-'स्वकलितरघूद्वहप्रघनकेलिगाथाशतप्रयुक्तिपथशिक्षणप्रवणसिद्धबृन्दान्वितः।' इति। यद्वा स्वात्मतृप्त्यैव सुग्रीवसाचिव्यादियोगे प्रवृत्तमानसानाम्। 'योगः सन्नहनोपायध्यानसङ्गतियुक्तिषु' इत्यमरः। वालिमर्यादितस्य सुग्रीवस्य उपायावधारणादिसाहाय्यमाचरन् अयं न पुनर्वालिनः सुग्रीवाद्वा

भयात् प्रववृते ; अपि तु सुग्रीवगुणादिपर्यालोचनेन तस्य स्नेहपात्रतामवबुद्ध्येति भावः । यद्वा सीतान्वेषणादिसमये स्वकार्यबुद्ध्यैवानेकविधोपायावधारणमाचरितवान् अयम् , न पुनः परकार्यधियेति प्रसिद्धमेव तत्प्रकरणे रामायणे । मित्रमण्डलं सूर्यमण्डलं भिनत्ति भेत्तुमुद्युक्त इति तथोक्तश्च । कुम्भकारादिशब्दवत् भेदनसामर्थ्यसद्भावमात्रेण प्रयोगो वा । प्रसिद्धमेवेदं शैशव एवायं परिपक्वफलधियोद्यन्तमादित्यं भेत्तुमुद्यत इति । यद्वा भेदः सम्भेदः सङ्गतिः सूर्यमण्डलसन्निधावेवायं स्थित्वा तस्मादध्यगीष्ट सकलागमशास्त्राणीति पुराणप्रसिद्धेः । अतिलङ्घितलोकानाम्—प्रथमतो लङ्काप्रवेशार्थं अथ सञ्जीवनीलताहरणार्थं अनन्तरं पट्टाभिषेकार्थतोयानयनार्थं चानेकधाऽस्य अन्तरिक्षादिलोकातिलङ्घनदर्शनात् । केनचित् क्वचिदपि न बन्धः उक्तसमयेष्वनेकविधरत्यूहावतरणेऽपि सर्वमपि तन्निर्धूय स्वकार्यनिर्वर्तनात् नास्य कुत्रचिदपि बन्धनं मनसाऽपि शक्यशङ्कमित्यर्थः । [1]क्वचिदित्यनेन क्वचिदेव बन्धः केनचित् ब्रह्मास्त्रेणेत्यप्यर्थो बोद्धयते । तथा च सर्वत्र न बन्धः किंतु केनचित् क्वचिदित्यन्वयः । यद्वा केन ब्रह्मणा तदभिमतास्त्रेणेत्यर्थः । चिच्छब्द एवकारार्थकः दिवश्चिदित्यादिप्रयोगात् । यद्वा चित् चैतन्यविशिष्टः बन्धः क्वचिदिति बोधः । ब्रह्मास्त्रसम्भावनाय तद्बन्धो बुद्धिपूर्वकमनेन सोढः ; न पुनश्चैतन्यभङ्ग इत्यर्थः । स्वेच्छाकारित्वं नास्य दोषायेति भावः ।

(4) अन्योऽपि सुग्रीवपरतया । आत्मार्थं आत्मजीवनार्थमेव युक्तचित्तानां उपायचिन्तनेषु प्रवृत्तमनस्कानाम् । वालिनाऽभिद्रुतो हि सुग्रीवः सर्वद्वीपसमुद्रान् अतिलङ्घ्य लोकालोकपर्वतान्तमधावदिति व्यक्तं श्रीमद्रामायणे । अन्ततः ऋश्यमूकाक्रमणमपि कश्चिदुपायविशेष एवेति भावः । मित्रमण्डलभेदिनां स्वपलायनकाले हनूमज्जाम्बवदादिस्वमित्राणि स्वमण्डलानि सर्वाण्यपि त्यक्त्वा सहसाऽभिद्रवणात् भेदिनां वियुक्तानाम् , अतिलङ्घितलोकानां । लोकशब्देन नामैकदेशनिर्देशतो लोकालोकग्रहणात् तत्प्युल्लङ्घितवतामित्यर्थः । केनचित् क्वचिदपि न बन्धः बन्धनं सुशकम् ? निखिलमित्रबन्धुत्यागिनां केन सम्बन्ध इति भावः ।

(5) एवं मुनिवाहनमुनिपरतयाऽपि । ते च आत्मार्थं परमात्मार्थमेव युक्तचित्ताः सदा योगैकनिष्ठमानसाः । मित्रमण्डलात् स्वपोषकादन्त्यजनवर्गात् भेदिनां विभिन्नानां पोषणप्रयुक्ततत्सधर्मतादिसम्भावनालेशविधुराणाम् , स्वजनविरुद्धभगवद्धर्मैकसक्तानामिति यावत् । अतिलङ्घितलोकानां लोकशब्देन नामैकदेशग्रहणतो लोकसारङ्गनामकः कश्चन विप्र उच्यते । स च तीर्थमाहरन् भगवते, मद्ध्येमार्गं ध्यानैकसक्तचित्तम् अनपगच्छन्तममुं मुनिमन्त्यजत्वेन सम्भाव्याधिचिक्षेपेति सांप्रदायिकाः । अतस्तमतिलङ्घितवतां केनचिदपि हेतुना क्वचिदपि स्थले न बन्धः न निर्बन्धः । वस्तुतस्तस्यायोनिजत्वात् । यत्र कुत्रापि कुलेऽवतीर्णानामपि मुक्ततुल्यानाममीषां 'तेषां तेजोविशेषेणे'ति न्यायेन जातिधर्माद्युत्क्रान्तत्वाच्च न केनापि शास्त्रेण निर्बन्धः समुचित इति भावः । क्वचिदित्यनेन साक्षात् भगवद्धर्म-

---

1 केनचित् क्वचिदिति पृथग्वाक्यम् ।

गेहेऽपि नास्य निर्बन्ध इति प्रतीयते । यतस्तं लोकसारङ्गो भगवदाज्ञया सद्य एव स्वांसोपरि निवेश्य भगवदालयं प्रविश्य तत्साक्षात्कारमचीकरदिति । अनेन चेदृशविशेषेण विशिष्टानामेव न बन्ध इत्युक्त्या अद्यतनानां केषांचित् खलानामवरजातीयानां स्वयमेवात्मानं भगवद्भक्ततयोद्घोषयतां जातिव्यवस्थातिलङ्घनविषये मुनिवाहनमेव स्वस्य दृष्टान्तीकुर्वतां दन्तभङ्ग एव फलित इति हृदयम् ।

(6) एवं विशिष्टाद्वैतिपरतयाऽपि । तथाहि–**आत्मार्थं** अन्तरात्माराधनार्थमेव **युक्तचित्तानां** कर्मज्ञानादियोगेषु प्रवृत्तचित्तानाम् ; 'आत्मेति तूपगच्छन्ति ग्राहयन्ति च' इति सूत्रात् तदर्थावगतेः । न अद्वैतादितन्त्रेष्वीदृशमनुसन्धानमनुशिष्यते । किं तु स्वाभिन्नत्वेनैव, शरीरात्मभावस्य जीवपरयोर्विशिष्टाद्वैतिमात्रसम्मतत्वात् । **मित्रमण्डलभेदिनां** स्वतुल्यजीवात्मवर्गभेदमभ्युपगच्छताम् । 'वक्त्रं वारिजमित्रम्' इत्यादौ मित्रशब्दस्य तुल्यार्थे प्रयोगदर्शनात् । **मण्डल**शब्देन सङ्ख्याबाहुल्यं विवक्षितम् । यद्वा **मित्रमण्डलं** परमात्मनः सुस्निग्धमण्डलम् । तद्भेदमुपगच्छतां, 'सवयस इव ये नित्यनिर्दोषगन्धाः' इति ह्युक्तम् । अथ वा मित्रमण्डलं मित्रवत् सन्निकृष्टाः, **भेदिनः** भेदवादिनो नैयायिकादयः येषामिति विग्रहात् 'तत्सन्निकृष्टमपि वा मतमाश्रयन्तः' इत्युक्तः सन्निकर्षविशेषो विवक्षित इति भावः । **अतिलङ्घितलोकानां** लोकशब्देन लोकायतमतं वा तदन्तर्गतलोकशब्दवाच्यप्रत्यक्षमात्रप्रामाण्यवादो वा विवक्षितः । द्विविधा हि लोकायताः प्रत्यक्षमात्रवादिनः कचित् अनुमानानुमन्तारश्च । **लोक**शब्देन प्रत्यक्षमा**यत**शब्देनानुमानं च विवक्षितमित्यावेदितं **सर्वार्थसिद्ध्यादौ** । तत्र केवलप्रत्यक्षवादिमतमनेकयुक्तिमार्गैरतिलङ्घितवतामित्यर्थः । उक्तं हि, 'दृष्टेऽपह्नुत्यभावादनुमितिविषये लाघवस्यानुरोधात् शास्त्रेणैवावसेये विहतिविरहिते नास्तिकत्वप्रहाणात् । नाथोपज्ञं प्रवृत्तं बहुभिरुपचितं यामुनेयप्रबन्धैस्त्रातं सम्यग्यतीन्द्रैरिदमखिलतमःकर्शनं दर्शनं नः ॥' इति । अद्वैतिनां तु 'सांख्यसौगतचार्वाकसङ्करच्छाङ्करोदयः' इत्युक्तेश्चार्वाकसख्यमावश्यकमिति भावः । **न बन्धः**–शास्त्रेण युक्तिवर्गेण वा केनचित् न बन्धः–न समन्वयासामर्थ्यम् । शास्त्रेण बद्धोऽयं वादीत्यादौ समाधानकथनासामर्थ्यमेव हि बन्धशब्दार्थः । स च कुत्रापि वाक्ये नास्तीत्यर्थः । उक्तं हि–"नित्यं हेयगुणावधूननपरा नैर्गुण्यवादाः श्रुतौ मुख्यार्थाः सगुणोक्तयः शुभगुणप्रख्यापनात् ब्रह्मणः । अद्वैतश्रुतयो विशिष्टविषया निष्कृष्टरूपाश्रया भेदोक्तिस्तदिहाखिलश्रुतिहितं रामानुजीयं मतम् ॥" इति ।

(7) एवं कुलटाजनविषयकोऽप्यर्थः । ते चात्मतृप्त्यर्थमेव चित्तानि प्रेरयन्ति स्वेच्छया । सर्वत्र दाक्षिण्यवशात् प्रतिदिनं मित्रमण्डलानि विभिद्यन्ते (भिन्दन्ति ?) । लोकमर्यादां चातिक्रामन्तीति तेषां कचित् केनापि न व्यवस्था कर्तुमुचितेति भावः ।

(8) एवं प्रकृतिमण्डलपरतयाऽपि । **आत्मार्थं**–देहार्थं 'आत्मा देहे धृतौ जीवे स्वभावे परमात्मनि' इति वैजयन्ती । **युक्तचितानां**–युक्ता चिता यत्रेति युक्तचिताः । चितो भावः चित–चैतन्यम् । तथा च देहादिरूपपरिणामसिद्ध्यर्थं चैतन्यसम्बन्धमङ्गीकुर्वतां स्वसहायभूतं मित्रमण्डलं जीवात्मवर्गमपि **भेदयतां** प्रलोभयतां चतुर्दशभुवनान्यप्यतिलङ्घयतां प्रकृतिपदार्थानां **न बन्धः** न वशीकरणं सुशकम् । किन्तु

केनचित् परमात्मसङ्कल्पेनैव क्वचिज्जीवविशेषे बन्धः तद्वशीकारः सम्भवति । सर्पबन्धनं रसबन्धनमित्यादौ बन्धशब्दस्य वशीकारे प्रयुक्तेः । अनयाऽहं वशीभूत इति दशामतीत्य तद्वशीकरणसाधनं दुश्शकमिति भावः ॥ २ ॥

துஷ்டர்களுக்கு யோகிகளோடு ஸாம்யத்தை மற்றொரு விதமாகவும் சொல்லலாம்.

ஆத்மார்த்தம் யுக்த சித்தாநாம் மித்ரமண்டலபேதிநாம்:.
அதிலங்கிதலோகாநாம் ந பந்த: கேநசித் க்வசித்—2

1 தம் நலத்திற்காக மனம் செலுத்துகின்ற சினேகிதர்களின் திரளையும் பிரிக்கிறவர். லோகத்தையே மீறினவர். பெரியோர்களுக்கு அடங்காதவர். அவரை எவ்விதத்தினாலும் எந்த விஷயத்திலும் கட்டுப்படுத்தல் முடியாது என்று துஷ்டர்விஷயத்திலே ச்லோகார்த்தம்.

2 யோகிகள்விஷயத்தில்—பரமாத்மாவைப் பெறுதற்காக மனத்தை யோகத்தில் நிறுத்தினவர். போம்போது சூர்யமண்டலத்தைப் பிளந்து கொண்டு செல்பவர். ப்ராக்ருத லோகங்களையெல்லாம் கடந்து வைகுந்தம் செல்பவர். இவர்களுக்கு நித்யவிபூதியிலோ ப்ரக்ருதி மண்டலத்திலோ எங்கும் எவ்விதமாகவும் ஸம்ஸாரபந்தமென்பது சிறிதுமில்லை. (அங்கே சென்று ஸாயுஜ்யம் பெற்ற பிறகு எம்பொருமானோடு எங்கும் பரமானந்தமாயிருப்பரே.) இப்படி பொருள்கள் வேறானாலும் இவ்விரண்டு விதமான பொருளைக் கூறும் சொல் ஒன்றாயிருப்பதால் ஒருவித சொல்லால் சொல்லப்படுகை என்ற ஒத்துமையே இருவருக்குமுளது.

3 இது ஹநுமான்விஷயமுமாகலாம். தனக்கு உயிரான ஸுக்ரீவனுக்காகவும் ராமனுக்காகவும் கார்யத்தில் மனம் வைத்தவர். பிறந்தவுடனே ஸூர்யமண்டலத்தை உதய காலத்திற் கண்டு பழமாக நினைத்து, விண்டுண்ண வெகுதூரம் சென்றவர். உலகமெல்லாம் சென்றிருந்தவர். ஓஷதிமலை முதலானவற்றைக் கொண்டு வர வெகுதூரம் சென்றவர். இவருக்கு ப்ரஹ்மாஸ்த்ரத்தினாலும் உண்மையில் கட்டில்லை. இந்த்ரஜித்தால் ஓரிடம் கட்டுண்டார். எனினும் கட்டப்படாமலேயிருந்தார்.

4 தன்னைக் காக்க மனம் கொண்டு சினேகிதர்களையும் விட்டு உலகமெல்லாம் கடந்தோடின ஸுக்ரீவனும் பொருளாகலாம்.

5 திருப்பாணாழ்வார் விஷயமுமாம். அவர் எம்பொருனிடமே மனம் செலுத்தியவர், தன் உற்றத்தாரோடு சேர்க்கை யற்றவர். லோக பதத்திற்கு லோகஸாரங்கமுனி என்ற பொருள் கொள்க. லோகஸாரங்க மாமுனி இவரைத் தோளிலே வைத்துக் கோயிலுக்குள் கொணர்ந்தார். ஆகையால் அவருக்கு மேம் பட்டவர் இவர். அவருக்கு ஈனஜாதி என்ற பழியில்லை. இத்தகைய குணமுள்ளவரே சிறந்தவர்.

6 விசிஷ்டாத்வைதிவிஷயமுமாம். பரமாத்மாவுக்கே எல்லாமென்ற மனம் உடையர். ஜீவமண்டலத்திற்கு பேதத்தை யிசைந்தவர். சாஸ்த்ரத்தை விட்டு லோகத்தினரால் கல்ப்பனை செய்யப்பட்ட மதங்களைக் கடந்தவர். இவர்களே முடிவில் ஸம்ஸாரபந்தமில்லாமலிருப்பர்.

7 துஷ்டஸ்த்ரீ விஷயமுமாம். தனக்காகவே பாடுபடுகிறவள். சினேகிதர்களை விட்டு விட்டுப்போகிறவள். உலக வரம்புக்கு அடங்காதவள்.

8 ஜீவாத்மாவின் பலனுக்காக தேஹத்திலே மனமென்ற கருவியைக் கொண்டனவும், மித்ரர்களான ஜீவர்களுக்காக வெவ்வேறான பரிணாமங்களைப் பெறுகின்றனவும், வ்யஷ்டி ஸமஷ்டியெல்லாம் கடந்தனவுமாம் ஸத்துவரஜஸ்தமோகுணங்கள். அவையுள்ள மூல ப்ரக்ருதியை வசீகரிக்க யாராலும் முடியாது. எம்பெருமான் ஸங்கற்பத்தினாலே நீங்குமல்லது வேறு வழியில்லை யெனவும் பொருளாம். (2)

स्नेहः शैत्यं प्रसादश्च कोशत्यागश्च जायते ।
आसन्नपरपीडार्थं निस्त्रिंशस्यासितात्मनः ॥ ३ ॥

उक्ताः खलु खलाः केचित् परविरोधमात्राचरणचणाः । अन्ये च केचित् परविरोधप्रवणास्तदर्थं स्नेहादिकमपि प्रथमं कुर्वन्ति ; तान् प्रत्याह स्नेह इति । **आसन्नपरपीडार्थं**-आसन्नाः समीपस्थाः ये परे स्वभिन्नाः सर्वेऽपि तत्पीडायै उपद्रवकरणाद्युद्देशेन । **असितात्मनः**-अशुद्धमनस्कस्य तत्स्वभावस्य वा । **निस्त्रिंशस्य**-'नृशंसखड्गौ निस्त्रिंशौ' इत्यमरः । **स्नेहः**-अनुरागविशेषः तद्भावनमिति यावत् । घातुकस्वभावस्य वास्तवस्नेहाद्यसम्भवात् । एवमग्रेऽपि । **शैत्यं**-शीतळतरवाक्यप्रयोगः काठिन्यादिरहितोच्चारणमिति यावत् । **प्रसादश्च** मुखविकाससस्मितावलोकनादिकं च । **कोशत्यागश्च**-अगतिकस्थले किञ्चिदर्थप्रदानादिकं च **जायते** स्वयमेवोत्पद्यते ; न तु प्रीत्या ददाति । किंतु पीडार्थमेव सर्वमाविर्भवतीति । स्नेहशैत्यप्रसादत एव सर्वत्र कार्यं साधयन्ति । क्वचित् कोशत्यागत इति विभागद्योतनाय चकारद्वयम् । स्नेहादिकमन्तरेण पीडाकरणमेवैषां स्वाभाविकधर्मः । क्वचित्परमर्मवेदनेन तदन्तश्छिद्रादिसम्पादनाय स्नेहादिभावनमिति हृदयम् । सौनिकशकुन्तिकान्यायोऽत्र द्रष्टव्यः । उक्तं हि-'दुर्जनैरुच्यमानानि वचांसि मधुराण्यपि । अकालकुसुमानीव जनयन्ति भयं नृणाम्' इति । अत्र परशब्देन स्नेहादिकर्ममूतादन्य उच्यत इत्यपि सुवचम् । तथा चान्यपीडार्थमन्यत्र स्नेहादिकं कुर्वन्तीत्यर्थः । स्वमात्रेणाशक्यायां कस्यचित् पीडायामन्यसाहाय्यापेक्षया तत्र स्नेहादिकं कुर्वन्तीति यावत् । यथा कर्णस्य पाण्डवपीडार्थं दुर्योधनादिना स्नेहादिकम् । कोशत्यागश्च सर्वविषयः । स्वकक्ष्यायामेव सर्वे तिष्ठन्त्विति धिया कर्णस्य सर्वत्र कोशदानमिति द्रष्टव्यम् । आसन्नशब्दाच्च—नृशंसस्य स्वस्वभावनिवर्तनाय न स्थलान्तरमन्वेष्टव्यम्, किन्तु समीपस्थे यत्र कुत्रचिदपि तत्करणं पर्याप्तमिति द्योत्यते । न चैतावता दूरस्थजनपीडनं नास्य स्वाभाविकमिति भ्रमितव्यम् ; 'सर्पादिवत् स्वदपराधिषु दूरयाताः' इति न्यायेन दुर्जनदर्शनमात्रेण सुदूरमपसरतो जनान् नैते बाधितुं प्रयतन्ते यथा सर्पादय इत्यर्थस्यैवासन्नशब्देन बोधनात् । दूरस्थजनान् अन्विष्यानन्तरं तद्बाधाकरणे विलम्बक्लेशभयात् सविधस्थ एव स्वकार्यं निर्वर्तयन्तीत्यप्यर्थः । यद्वा **आसन् अपरपीडार्थ**मिति पदच्छेदः । लोके हि स्नेहशैत्यादिकं सर्वत्र जायते । नृशंसस्य तु एते अपरपीडार्थेनेवासन्नित्यन्वयात् दूरस्थजनबाधाऽपि न परिहीयत इति बोध्यम् ।

तथा च नास्य स्नेहादिकमन्वीक्ष्य भ्रमितव्यम् ; किन्तु सुदूरमपसर्तव्यं बुद्धिमद्भिरिति ध्येयम् । अथ वा अनादिसुस्निग्धेऽपि जने खलानां क्रमेण स्नेहादिहानिः अपराधप्रवृत्तिश्च जायत इति । शब्दार्थश्च कोश इवाचरति कोशतीति विग्रहात् मुकुलीभवतीत्यर्थः । तथा च पूर्वस्नेहस्तन्मूलकशैत्यादिकं च कोशति सङ्कुचति आगश्च जायते । सर्वेऽप्येते परहिंसार्थमेवेति । तथा च सुस्निग्धजनेऽप्यस्यापराधप्रवृत्तिरेवान्ततः ; परं तु विळम्बाविळम्बमात्रमेव भेद इति । तथा ह्युक्तं 'मुखं पद्मदळाकारं वाचच चन्दनशीतळा । हृदयं विषसंयुक्तमेतद्धूर्तस्य लक्षणम् ॥' इति ।

(2) अन्योऽपि खड्गविषयतयाऽर्थबोधः । असिता असित्वं, आत्मा स्वभावः, 'स्वभावे परमात्मनि' इति वैजयन्ती । यस्य तस्य खड्गत्वरूपसाधारणधर्माक्रान्तस्येत्यर्थः । निस्त्रिंशस्य स्नुहीदळसदृशातिदीर्घखड्गविशेषस्य, 'स्नुहीदळाभो निस्त्रिंश' इति वैजयन्ती । निर्गतस्त्रिंशतोऽङ्गुळिभ्य इति निस्त्रिंशः त्रिंशदङ्गुळचभ्यधिकदीर्घखड्गः । ततोऽवरस्तु छुरिकादिः । असित्वं च उभयसाधारणम् । तथा चासित्वमात्रमेव भयहेतुः ; तत्राप्यसौ भयातिशयजनक इत्यर्थः । आसन्नपरपीडार्थं आसन्ना या परपीडा-शत्रुयुद्धादिः तदर्थं तत्समय इत्यर्थः । स्नेहः तैलनिषेचनं, शैत्यं शितस्य भाव, तीक्ष्णधारीकरणं प्रसादश्च मुखप्रतिफलनानुगुणफाळफळचविशेषः कोशत्यागश्च अपिधानकोशाद्बहिर्भावश्च जायते । युद्धसमय एव खड्गं तैलादिभिः सेचयन्ति शातयन्ति चेति प्रसिद्धमेव लोके ।

(3) अपरोऽपि श्रीशठकोपमुनिविषयकः । असितात्मनः अबद्धस्वरूपस्य । षीञ् बन्धन इति धातोर्निष्ठायां सितशब्दो बद्धार्थकः । शठकोपमुनिस्तु न कर्मबद्धः ; जन्मकाल एव शठवायुनिधूननात् । निस्त्रिंशस्य परनिरसनानुकूलायुधविशेषरूपस्य । अत एव पराङ्कुश इति नामास्य विश्रूयते । स्नेहः भगवद्विषये अत्यन्तानुरागविशेषः, नायिकाप्रणयादिभावो वा । शैत्यं शार्ङ्गपाणिदशकप्रथमगाथोक्तरीत्या जलमयीभूय द्रवणम् । प्रसादश्च परेपदे भगवत्संश्लेषानुभवात् सुप्रसन्नत्वम् । तच्च प्रसिद्धं सन्तुष्टिगाथासु । कोशत्यागश्च चरमशतकोक्तक्रमेण अण्डकोशान्निष्क्रमणं च । यद्वा— अन्नमयप्राणमयादिपञ्च(?)कोशपरिहरणम् । जायते । किमर्थम् । आसन्नः स्वहृदयाधिष्ठितो यः परमात्मा तस्य पीडा निर्बन्धः तेन । शास्त्रनिर्बन्धाय कर्म करोतीतिवत् हेतोरुद्देश्यताविवक्षा । स्वप्रयत्नमन्तरेण सर्वं परमात्मनिर्बन्धेनैव भवतीति श्रुतमेव चरमशतके । यद्वा पीडा दृढसंश्लेषः । 'पाणिपीडनविधि' 'अन्योन्यसम्पीडनम्' इत्यादौ तदर्थबोधात् । अथवा आसन्नाः आश्रिताः ये परे मधुरकविप्रभृतयः तेषां पीडायै स्वावियोगदुःखदानाय । असकृत परोपदेशार्थगाथोद्गिरणात् समीपस्थानामयत्नतः समुत्तारो भवेत् । तद्वियोगे च पीडैव फलिष्यतीति भावः ।

(4) अन्योऽपि यथाश्रुतमाहिज्यौतिषिकपरः । निस्त्रिंशस्य त्रिंशांशादिसूक्ष्मभागज्ञानरहितस्य, असितात्मनः आवापोद्वापाद्यशक्ततया कलुषितमनस्कस्य । राशिचक्रमात्रावलोकनेन स्थूलतया फलादिकं ब्रुवाणस्येति यावत् । स्नेहः सर्वत्रापि शुभफलोद्घोषणेनानुरागः, शैत्यं समीचीनमिदं जातकमित्यादि-सुस्निग्धवाक्यप्रयोगः, प्रसादः तदुचिताकारणहासादिकम्, कोशत्यागः पुस्तकाद्युद्घाटनं लिखितजातकादि-

कोशदानं वा जायते सर्वमिदमासन्नपरपीडार्थं सन्निहितजनबाधार्थमेव भवति। उच्यते हि—
'ज्योतिश्शास्त्रमहोदधौ बहुविधोत्सर्गापवादात्मभिः कल्लोलैर्निबिडे कणान् कतिपयान् लब्ध्वा कृतार्था इव। दीर्घायुस्सुतसम्पदादिकथनैर्दैवज्ञपाशा इमे गेहं गेहमनुप्रविश्य धनिनां मोहं मुहुः कुर्वते॥' इति। कथाऽपि काचित् श्रूयते—ज्यौतिषिकः कश्चित् कस्यचिद्धनिकस्य पुत्रोत्पत्तिं श्रुत्वा तत्कालफलादिकं विलोक्य रहसि तस्मै कथयामास। शिशावस्मिन् दशदिनं जीवति पितरावस्य सद्यो म्रियेयातामिति। श्रुत्वा च तत् बहुतरमचिन्तयत् पिता स्वपत्न्या। 'किमस्य शिशोर्वधः समुचितः, किं वाऽऽवयोर्मरणं श्रेयः' इति। 'जीवने च नावनेके पुत्राः संभवेयुः ; मरणे च शिशुरप्ययं न जीवेत् रक्षकविरहात्' इति विचिन्त्य कस्याश्चिद् दूत्या हस्ते प्रायच्छदमुम्, हन्यतामसाविति। सा च तथेत्युक्त्वा स्वगृहमागत्य तत्सौलक्षण्यादि-निरीक्षणेन हन्तुमपारयन्ती स्वबन्धवे कस्मैचिभ्यागतायासुताय प्रादात्। स च चिरं तं शिशुं परिपोष्य ज्योतिरादिशास्त्राण्यध्यापिपत्। अष्टादशवर्षश्चासौ स्वयमेव स्वचरितं शास्त्रमुखेन परामृश्य पोषकमपृच्छत्। उच्यतां मम जन्मवृत्तान्त इति। स चास्मै सर्वमपि वृत्तमचकथत्। त्वरितमेव स स्वपितृसमीपमागम्या-पुत्रतया हतपुत्रतया च खिद्यमानयोः पित्रोः स्वात्मानं प्रकाश्य सर्वमपि वृत्तमाचख्यौ। तौ चातीव हृष्टौ पूर्वज्यौतिषिकमानाय्य जातकादिपरामर्शे त्रिंशांशप्राबल्यमवबुद्ध्य न्यग्रहीष्टां दुष्टवञ्चकमिति।

(5) एवमारण्यकचोरसङ्गपरतयाऽपि। तत्र परपीडार्थमिति शब्दात् 'डम्भार्थं परपीडार्थं तन्निरो-धार्थमेव वा। प्रयोजनान्तरार्थं वा कैङ्कर्यं करक इष्यते' इति श्लोकः प्रत्यभिज्ञप्यते। उक्तमेव हि प्रथम-पद्धतौ, 'यत्र पयःप्रभृती'ति श्लोकव्याख्यानावसरे—'चोरा हि केचिदरण्यैकवसतयः तत्रस्थां काञ्चन देवतां समाराधयन्ति स्वस्य मार्गागतपथिकनिर्मथनेन धनागमायेति। तदयमर्थः। असितात्मनः अशुद्धमनस्कस्य क्रूरप्रयोजनापेक्षित्वात्, निस्त्रिंशस्य घातुकस्य चोरस्य आसन्नानां मध्येमार्गं समाग-तानां परेषां पथिकानां पीडार्थं हिंसापूर्वकधनग्रहणार्थं स्नेहः स्वदेवतायास्तैलाभ्यञ्जनं शैत्यं सुशीतळ-तोयैरभिषेचनं प्रसादः अन्नपानादिनिवेदनं कोशत्यागः अरविन्दमुकुळादिसमर्पणं च पूर्वोद्दिष्टधनादि-व्ययश्च। 'कोशोऽस्त्री कुड्मले दिव्ये शस्त्रेऽर्थौघे गृहे तनौ। गुह्येऽण्डवेष्टके पेश्यां पुस्तकासिपिधानयोः॥' इति वैजयन्ती। जायते सम्पद्यते। अतः परपीडार्थकैङ्कर्यमसारमित्यर्थः।

(6) अन्योऽप्यर्थः स्वनिष्ठाभिज्ञपपन्नपरः। तथा हि—आसन्नाः वादार्थमभ्यागताः परे प्रति-कथकाः। तत्पीडार्थं तद्विजयार्थं निस्त्रिंशस्यापि 'असिना तत्त्वमसिने'त्युक्तक्रमेण परमदा(ता)रण्यच्छेद-ननिपुणस्यापि असितात्मनः प्रतिवादिप्रमाणतर्कैरबद्धस्वरूपस्यापि स्नेहः स्वनिष्ठाभिज्ञाने सति 'विप्रं निर्जित्य वादतः' इत्यादिशास्त्रपर्यालोचने सर्वमपि प्रतिवादमवधूय सर्वत्र प्रीतिरेव जायते ; 'समः शत्रौ च मित्रे च' इत्युक्तेः। शैत्यं सर्वत्र मार्दवम् ; न तु पूर्ववत् परिभवोक्तिकौर्यम्। प्रसादश्च कर्मानुरूपप्रवृत्तिनिश्चयात् सर्वत्र प्रसन्नमुखता च। कोशत्यागश्च 'बहुभ्यश्च महद्भ्यश्च' इत्यादिकमवबुद्ध्य सर्वस्यापि शास्त्रग्रन्थस्य परित्यजनं च। उक्तं हि न्यायपरिशुद्धौ—"....ग्रन्थमभ्यस्य मेधावी ज्ञानविज्ञानतत्परः। पलालमिव

धःाार्थी त्यजेत् ग्रन्थमशेषतः इति,' तत् कोशत्यागाभिप्रायम् । न हि मुक्तप्रायात्यन्तनिष्पन्नयोगस्य पुरुषस्य शास्त्रेण किमपि ज्ञातव्यमस्ति । साक्षात्कृतसमस्ततत्त्वार्थत्वात्'' इति । इयमप्यवस्था सुव्यक्तमुक्ता सङ्कल्पसूर्योदये—'कवित्वमदकश्मलं कथकदर्पतिग्मज्वरं विकत्थनमिलद्बहुप्रलपनाभिमानग्रहम् । परप्रतिपदर्पणप्रथनयातनां च स्वयं निवर्त्य निरवग्रहां निभृतवृत्तिमातिष्ठसि ॥' इति ।

(7) एवं भ्रमरपरतयाऽपि कश्चिदर्थः । भ्रमरा हि रात्रौ त्रिंशन्नाडिकावधि मुकुलीभूतपङ्कजादिमध्यनिवासमनुभवन्तः प्रातस्तद्विकसने बहिर्निर्गत्य विकस्वरपुष्पेषु निष्पतन्तीति कविसमयः । तदयं वाक्यार्थः—**निस्त्रिंशस्य** त्रिंशन्नाडिकातो निष्क्रान्तस्य । रात्राविति यावत् । **असितात्मनः** अनवरतनिबद्धशरीरस्य । अरविन्दकारागृहान्मुक्तस्येत्यर्थः । कृष्णवर्णस्य च । शसयोरभेदेन आशितात्मन इति पदच्छेदे रात्रौ सुमृष्टमकरन्दमध्वपतनेन सुतृप्तस्येति वाऽर्थः । आशितो भोजनेन तृप्तः । **स्नेहः** मधुसंग्रहणात् सुस्निग्धांगता ; **शैत्यम्** अत एव शीतळता ; **प्रसादः** सुतृप्तता ; **कोशत्यागश्च** तन्मुकुळपरित्यागश्च जायते । किमर्थम् । तत्प्रत्यासन्नविकस्वरकुसुमान्तरेषु निपत्य तद्दळभ्रंशनाशनादिपीडाजननार्थमेव । अतः कारागृहमुकुळबन्धनमेवास्य श्रेय इति भावः ।

(8) एवं करिकलभपरतयाऽप्यर्थः । तथा हि—**निस्त्रिंशस्य** त्रिंशवयसो निर्गतस्य । 'त्रिंशद्वर्षस्तु कळभः' इत्युक्त्या तदानीं मदविकारारम्भदशा द्योत्यते । तत्पूर्वं शैशवावस्थासम्मिळनान्न तादृशो मदविकार इति भावः । **असितात्मनः** नीलवर्णस्य बन्धुमशवयस्य वा । **स्नेहः** तैलाभ्यञ्जनं मस्तकोपरि । **शैत्यं** यथेच्छं जलावगाहनम् । **प्रसादः** सुमृष्टभोजनात् सन्तोषविशेषः । **कोशत्यागः** जलमज्जनादिकाले कमलमुकुळादिविधूननं दन्तकोशादिभञ्जनं वा जायते । **आसन्नाः** स्वसमीपस्था वृक्षाः पर्वताः पथिकाश्च । तत्पीडार्थम् । मदोद्धतस्यानिबद्धस्य पथिकजनवृक्षपर्वतादिभेदनं स्वदन्तकोशभञ्जनञ्च सुप्रसिद्धमेव । अत एव वक्ष्यतेऽत्रैव—भजतु च तटक्रीडां पीडाभिसन्धिरसौ चिरम् इति । त्रिंशान्निष्क्रान्तस्येत्यनेन तदधिकसंख्यातोऽनिष्क्रान्तस्येति द्योत्यते । अन्यथा तदुक्तिवैयर्थ्यात् । तथा च गजानां शतविंशतिरित्युक्तविशिष्टायुष्पादपरिनिष्पत्तिमत इति विशिष्टार्थः ॥ ३ ॥

ஸ்நேஹ: சைத்யம் ப்ரஸாதச்ச கோசத்யாகச்ச ஜாயதே.
ஆஸந்நபரபீடார்த்தம் நிஸ்த்ரிம்சஸ்யாஸிதாத்மந:—3

1 ஹிம்ஸிக்கிறவனும் அசுத்தமான மனமுடையனுக்கு நெருங்கின பிறர்களைப் பீடிப்பதற்காகவே, அவர்களோடு சினேகம், குளிர்ந்திருக்கை, முகத்தெளிவு, பணமும் அளிப்பதெல்லாம் ஏற்படும். கோசதி ஆக: என்றும், ஆஸந் அபரபீடார்த்தம் என்றும் பிரிக்கலாம். ஸ்நேஹம் முதலானவை, கோசதி - குறையும். ஆக: - குற்றமும் ஜாயதே - வரும். ஸ்நேஹாதிகள் முன்னே பிறரைப் பீடிக்கவே, ஆஸந்-இருந்தன என்று பொருளாம்.

2 நிஸ்த்ரிம்சமாவது 30 விரலளவுக்கு மேலான நீண்ட கத்தி. பொதுவாக அஸி என்ற பெயருமுடைய அதற்கு நெருங்கினவரை

நோக்கி வீசி வதைப்பதற்காக முன்னே வேண்டுவன, தைலப்பூச்சும், (சிதம்-கூர்மையானது) கூர்மையாகத்தீட்டல், பளபளப்பு, உறையை விட்டு வெளிப்படுகை என்றவை.

3 ஆழ்வார்விஷயம். (ஸித - (ஸம்ஸார)பந்தம் பெற்ற) அஸித - சடவாயுவை ஜெயித்ததால் ஸம்ஸாரபந்த மற்றவரும், பராங்குசரென்ற திருநாமத்திற்கேற்ப கத்தி போல் கூர்மையாய் பிறமதத்தை அழிப்பவருமான ஆழ்வாருக்கு எம்பெருமானிடம் காதலும், நீராயுருகும் தன்மையும், அனுபவத்தால் ஸந்தோஷமும், அண்டகோசத்தினின்று செல்லுகையும் எற்பட்டன.

4 சோதிடம் அரைகுறையாக அறிந்தவன் இராகிசக்ரத்தை மட்டும் கண்டு த்ரிம்சாம்சம் முதலான நுண்ணிய விஷயங்களில் விவேகமில்லாமல் பேசினுல், அதை நம்பி மோசம் போகிறவர்களுக்கு அதனுல் பீடையே. தீர்க்ககால ஜீவனமில்லாமையுமாம். பகையாயுமிருக்குமிடத்திலும் சினேகம் முதலானவை ஏற்படும். நல்ல சிசுவின் ஜாதகத்தைக் கண்டு இது அதிக நாள் பிழைத்திருந்தால் பெற்றோருக்கு நஷ்டமென்றவாறு சொன்னுல் குழந்கைக்குச் சிலர் கோசத்யாகத்தை—அந்நமயாதி கோசத்யாகத்தையும் உயிர் மாய்ப்பதையும் செய்வர். இப்படி அரைகுறை ஜோதிடம் கூறுபவனும் கலனே खलः.

5 வழிபறிக்கும் திருடர்கள் நெருங்கினவரை வதைத்துப் பணம் சேகரிக்க அனுகூலமாகத் தம் தேவதைக்கு தைலக்காப்பு, அபிஷேகம், (ப்ரஸாதம்) அன்னநிவேதனம், புஷ்பஸமர்ப்பணம் எல்லாம் செய்வர்.

6 நிஸ்த்ரிம்சம்-கத்தி. அதுபோல் பிறமதங்களைக் கண்டிக்க வல்லனய் பிறரால் கட்டப்படாத சக்தியுடையனுனுலும், மிகவும் சாந்தனுய், மித்ரன் சத்ரு என்ற வேறுபாட்டை விட்டிருப்பவன், தன்னை தூஷிப்பவர், தன் மதத்தை தூஷிப்பவர் என்றெல்லாமானவர்களிடமும், எல்லாம் ப்ரஹ்மத்திற்கு, அதீனம் என்ற தெளிவால் அவனுடைய வஸ்து என்ற அபிமானத்தால் அன்பும் குளிர்ச்சியுமாயிருப்பவனும். ஆக பிறமதத்தினரை வெல்ல முடிந்தவனுக்கும் முடிவில் பரமைகாந்தியாய் எங்கும் சினேகம், குளிர்ச்சி, மலர்ச்சி, 'புத்தகங்களே இனி வேண்டா' என்று விட்டிருக்கை எல்லாம் நேரும்.

7 வண்டுவிஷயமாகவும் உரைக்கலாம். நிஸ்த்ரிம்சமான—இரவு முப்பது நாழிகையும் மூடின தாமரையில் இருந்து கழித்த, (அஸித) கறுப்பான வண்டுக்கு அதன் தேனில் சேர்க்கையால் ஸ்நேஹம்-பிசுக்கும் குளிர்ச்சியும் பசியில்லாமையும், அருகில் இருக்கும் வேறு மலர்களை வதைப்பதற்காக மொட்டுகளை விடுகையும் ஏற்படும்.

8 முப்பது வயதுக்கு மேலான கறுத்த யானைக்கு மண்டையில் எண்ணெய்ப்பூச்சும், நீரில் முழுக்கும், ஆஹாரம் கொண்ட களிப்பும், அருகில் இருக்கும் வேறொன்றை வதைக்க தந்தமொட்டை உடைத்துக் கொள்வதும் ஆம்.

जनित्वाऽपि महावंशे निम्नगा वक्रचेष्टिताः ।
वैपरीत्यं वितन्वन्ति समेषु विषमेषु च ॥ ४ ॥

उक्तश्लोकैः खलानां जन्मसिद्धः स्वाभाविकाकार उक्तः । इदानीं सुकृतविशेषात् ब्राह्मणाद्युत्कृष्टवंशे जातानामपि दुर्जनसङ्गात् तदीयदुश्चरित्रसंक्रम इत्याह **जनित्वेति । महावंशे**, 'जनित्वाऽहं वंशे महति जगति ख्यातयशसां' इत्यादि[षु] उक्ते महाशिष्टवंशे जनित्वाऽपि 'शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते । अथ वा योगिनामेव कुले भवति धीमताम्,' 'महता पुण्यपण्येन क्रीतेयं कायनौस्त्वया ।' इत्यादिप्रमाणगणात् बहुजन्मार्जितसुकृतकूटप्रतिफलतयाऽवतरणं लब्ध्वाऽपि । अनेन सुकृतभागविनाश उक्तः । **निम्नगाः** परिशिष्टदुष्कृतप्राबल्येन नीचजनमाश्रिताः **वक्रचेष्टिताः**, 'संसर्गजा दोषगुणा भवन्ति' इति न्यायेनात्यन्तदौर्जन्यं सम्पाद्य तदुचितविरुद्धाचरणप्रवृत्तिशीलाः **समेषु** स्वस्मिन् हितपरेषु साधुषु **विषमेषु** अहितपरेषु दुर्हृत्सु च **वैपरीत्यं** विपरीताचरणम् **वितन्वन्ति** विस्तारयन्ति । 'तनु' विस्तारे । विषमेषु दौर्जन्यं सहजम् । समेषु तु तद्दोषायेति भावः । विषमेषु यद्दौर्जन्यं करणीयम्, तत् समेष्वपि कुर्वन्तीति दृष्टान्तद्योतनाय विषमशब्दः । अनेन दौर्जन्याचरणस्य स्वस्वभावकौटिल्यमेव हेतुः; न तु परस्वभाव इति फलितम् । 'विषमेष्वपि भावयन् स्वमर्थम्' इति वक्ष्यमाणक्रमेण अहितेष्वपि हितपरस्वरूपमहापुरुषलक्षणप्रत्यनीकतया हितपरेष्वप्यहितत्वरूपं दुर्जनलक्षणमिहोच्यत इति ध्येयम् ॥ **समेषु** वैषम्यं **विषमेषु** समत्वं च भजन्तीत्यप्यर्थः । [1]हितमहितत्वेन अहितं हितत्वेन च बुद्ध्वा तदुचितकर्म कुर्वन्तीत्यर्थः । 'उष्णे शीतलतामुपेत्य शिशिरे प्राप्ते भजन्त्युष्णताम्' इति हि वक्ष्यते । स्वापेक्षयाऽधिकबले भयादनुकूलाचरणं न्यूनबले स्वाभाविकविरोधाचरणञ्च कुर्वन्तीति वा । उच्यते हि—'अहो प्रकृतिसादृश्यं श्लेष्मणो दुर्जनस्य च । मधुरैः कोपमायाति कटुकैरेव शाम्यति ॥' इति ।

(2) उक्तार्थद्वयेऽपि दृष्टान्तोऽर्थान्तरेषु स्पष्टः । तत्र द्वैतीयीकार्थे महानदीदृष्टान्तः । महान् वंशो वेणुकुञ्जो यस्येति विग्रहात् महावंशशब्दः पर्वतविशेषपरः । पर्वत एव वेणुगणप्राचुर्यं लोकवेदयोः प्रसिद्धम् । यथा श्रूयते—'ऊर्ध्वामेनामुच्छ्रयतात्, वेणुभारं गिराविव' इति । 'गुञ्जत्कुञ्जकुटीरकौशिकघटाघूत्कारवत्कीचकस्तम्बाडम्बरमूकमौ[2]कुलिकुलः क्रौञ्चावतोऽयं गिरिः' इति च । तत्र जनित्वाऽपि तमारभ्य प्रवोढुं प्रवृत्ता अपि **निम्नगाः** अधोऽधःप्रदेशत एव निर्गच्छन्त्यः **वक्रचेष्टिताः** निम्नस्थललाभानुगुण्येन कुटिलतरगतयः महानद्यः समेषु स्थानेषु वैषम्यं विषमेषु समत्वञ्च स्वप्रवाहवेगपरिणामेन कुर्वन्तीत्यर्थः । उच्यते हि—'पुरा यत्र स्रोतः पुलिनमधुना तत्र सरिताम्' इति ।

(3) एवमेव मेघपरत्वेऽपि । तत्र महावंशः 'जातं वंशे भुवनविदिते पुष्कलावर्तकानां' इत्युक्तो महामेघवंशः । तत्रावतीर्यापि समुद्रजलपानार्थं निम्नस्थलेऽवतीर्णाः तिर्यगूर्ध्वमितस्ततः पलायनपरतया वक्रचेष्टिताः वृष्ट्यादिभिरभिषिच्य निम्नस्थलं गाधत्वेन गाधं निम्नत्वेन च कुर्वन्तीत्यर्थः ।

---

1 सुजनं सुजनकर्म वा 2 काकेत्यर्थः

(4) एवं दुर्योधनपरतयापि । **महावंशे** (?)व्यासभीष्माद्यवतरणपवित्रिते कुरुवंशे जनित्वाऽपि **निम्नगाः** कर्णशकुन्याद्यपजनसक्ताः अत एव **वक्रचेष्टिताः** वस्त्रापहरणादिकुटिलव्यापारनिरताः दुर्योधनादयः । सामान्योक्तेर्बहुवचनम् । **समेषु विषमेषु च** युधिष्ठिरराजसूयप्रकरणे समविषमस्थलेषु **वैपरीत्यं वितन्वन्ति,** समस्थलं विषमत्वेन विषमस्थलं समत्वेन च संभाव्य पादस्खलनमनुभूय परिहासपदं भवन्ति ।

(5) एवं रावणपरत्वे पुलस्त्यपुलहादिमहायोगिवंशे जनित्वाऽपि नीचपरस्त्रीचौर्यादिवृत्तिमाश्रिताः कुटिलव्यापाररताश्च तत्परित्यागादिरूपहितवक्तृषु विभीषणादिषु अहितत्वबुध्या तिरस्करणं वास्तवाहितवक्तृषु प्रहस्तादिषु हितत्वबुद्धिं च कुर्वन्तीत्यर्थः ।

(6) प्राथमिकार्थे श्रीरामपरो बोधः । महावंशे—'वंशे जातः सवितुरनघे मानयन् मानुषत्वम्' इत्युक्ते जनित्वाऽपि **निम्नगाः** राज्यादिकमवधूय अरण्यवासाद्यपवृत्तिमाश्रिताः **वक्रचेष्टिताः** मृगपृष्ठानुधावनादिकुटिलवृत्तिसक्ताः । स्त्रीवाक्यनिर्बन्धेनानावश्यककार्यप्रवृत्तिरेव बुद्धिकौटिल्यमिति भावः । अथ च महानर्थे सम्भवति कोपवेगवशादखिलजगद्विपक्षादीक्षिताः **समेषु विषमेषु** वास्तवानपराधिषु अपराधिषु च **वैपरीत्यं** विनाशनोद्योगरूपं वितन्वन्ति । उच्यते हि—'नैव देवा न दैतेया न पिशाचा न राक्षसाः । भविष्यन्ति मम क्रोधात् त्रैलोक्ये विप्रणाशिते ॥ निर्मर्यादान् इमान् लोकान् करिष्याम्यद्य सायकैः ।,' 'सदेवगन्धर्वमनुष्यपन्नगं जगत् सशैलं परिवर्तयाम्यहम् ॥' इति । स्वयं कुटिलकार्यं कृत्वा निखिलजगद्विमथनमचतुरकृत्यमिति भावः । उक्तं हि—''मदस्त्रजनिते स्थितः क्वचन लाघवे राघवः'' इति ।

(7) एवं सर्पपरोऽपि कश्चिद्भावार्थः । **महावंशे** कश्यपमहायोगिकुले जनित्वाऽपि प्रथममुत्पन्नापि, **निम्नगाः** देवलोकं हित्वा पाताळमाश्रिताः **वक्रचेष्टिताः** कुटिलतरगमनाः । भुजगगतेर्वक्रतास्वाभाव्यात् । **समेषु** धातुसाम्यवत्सु नीरोगशरीरेष्वपि **वैपरीत्यं वितन्वन्ति** दंशनमात्रेण दर्शनमात्रेण वा सद्यो मरणपर्यन्तां व्यथामुत्पादयन्ति । तत्र हेतुमाह—(विषम् एषु चेति) । एषु च सर्वेषु विषमस्तीत्यर्थः । दृष्टिविषाणां दृष्टौ, अन्येषां दन्ते चेति यावत् ।

(8) अन्योऽपि वेणुपरतया । महान्तो **वंशाः** वेणवो यस्मिन् कुञ्जे स **महावंशः** कीचकनिबिडः कुञ्जविशेषः । तन्मध्ये जनित्वाऽपि केचित् वेणवः **निम्नगाः** ऊर्ध्वप्ररोहमन्तरेण तिर्यक्प्रसारमाश्रिताः । वेणुकुञ्जेषु मध्यस्थवेणव एव ऋजुतया ऊर्ध्वमारोहन्ति । पार्श्वस्थाः पुनः ऋजुमार्गालाभात् तिर्यक्प्रसृता भवन्तीति प्रत्यक्षसिद्धम् । अत एव **वक्रचेष्टिताः** ऋजुमार्गविरहात मध्ये मध्ये भुग्नशरीराश्च सन्तः, **समेषु विषमेषु च** स्थलेषु भुग्नेष्वभुग्नेषु च प्रदेशेषु सर्वत्र **वैपरीत्यं**—विभिः-पक्षिभिः परीतः **विपरीतः** तस्य भावं अनुभवन्ति । तिर्यग्गामिवेणूनां परस्परसंश्लिष्टानां कायमानादिवत् निबिडतमच्छायतया परस्परविरुद्धा अपि पक्षिणस्तत्र नीडादिनिर्माणेन नित्यवासमनुभवन्तीति प्रसिद्धिः ।

यथोक्तम्—गुञ्जत्कुञ्जकुटीरेति काकोलूकसाहित्यम् । यद्वा **वैपरीत्यं** वेणूनां परस्परसंघर्षजनितज्वलनवशेन सर्ववननाशं कुर्वन्ति । ऋजुगतीनां संघर्षविरहेण न दावोत्पादकता ; वक्रगतीनामेव परस्परसंश्लेषात् सेति भावः ।

(9) एवं सूर्यचन्द्रादिग्रहपरोऽपि । महावंश इत्यत्र महौ अंशे इति पदच्छेदः । महिशब्दो भूमिपरः । क्षमाऽवनिर्मेदिमी महिरित्यमरकोशात् । रजन्यवनिभूम्यादेर्ङ्रूप्यमपि दृश्यत इत्यभ्यनुज्ञानाच्च । तथा च भूमौ जनित्वा । स्थितानामिति शेषः । यथा सर्वधर्मान् परित्यज्येत्यत्र स्थित इत्यध्याहारः, तद्वत् । भूलोकजननात् परमेव ग्रहाणां फलदानाधिकारादिति भावः । **अंशे निम्नगाः,** द्वादशांशादिविभजने नीचत्वमाश्रिताः । राशिचक्रे उच्चस्थानादिगता अप्यंशे नीचीभूता इति यावत् । **वक्रचेष्टिताः** । ग्रहा इति गम्यते । केचित् शुभस्थानगता अपि वक्रातिचारादिना अशुभस्थाश्च भूत्वा समेषु विषमेषु च स्थानेषु वैपरीत्यं वितन्वन्ति । अंशे नैच्यात् शुभग्रहाणामशुभप्रदत्वं अशुभग्रहाणामशुभप्रदानशक्तिभङ्गश्च भवति । एवं समस्थानस्थानां वक्रातिचारादिना विषमस्थानगमने तद्राशिफलं विषमस्थानां समस्थानगमने च तथेति वैपरीत्यं ध्येयम् । "अतिचारे च वक्रे च तत्तद्राशिगतं फलम्" इत्युक्तेः ।

(10) एवं महेन्द्रचापपरतयापि वाक्यार्थः । तथा हि–इन्द्रधनुस्तावत् दधीचिनामकमहर्षेः पृष्ठास्थितो निर्मितमिति प्रसिद्धं भारतादौ । तत्र च वंशशब्दः पृष्ठमध्यास्थिपरः । "वंशस्तु पृष्ठमध्यास्थि मूलभागोस्य तु त्रिकम्" इति वैजयन्तीकोशात् । तथाचेन्द्रचापाः दधीचिमहर्षेर्महति स्थूलभूते पृष्ठमध्यास्थिन जनित्वापि तद्विकारा भूत्वापि **निम्नगाः** निम्नं बाणसन्धानार्थं मध्ये रन्ध्रं गच्छन्तीति तथोक्ताः । यद्वा निम्नं भूलोकं गता वा । रावणयुद्धकाले देवलोकात् भूलोकेऽवतरणादिति भावः । उक्तं हि श्रीमति रामायणे, "सहस्राक्षेण काकुत्स्थ रथोऽयं विजया यते । दत्तस्तव महासत्त्व श्रीमन् शत्रुनिबर्हण ॥ इदमैन्द्रं महच्चापं कवचं चाग्निसन्निभम् । शराश्चादित्यसंकाशाः शक्तिश्च विमला शिता ॥" इति । **वक्रचेष्टिताः**—बाणमोक्षणकाले ज्याकर्षणेन कुटिलीभूताः । **समेषुविषमेषु**–समाः स्वसदृशाः स्वाभिमुखस्थिता वा इषवो येषां ते समेषवः तादृशा ये **विषमाः** विषमहृदयाः शत्रवः तेषु स्वसदृशबाणवत्सु स्वाभिमुखेषु शत्रुषु विषये इत्यर्थः । उक्तं हि तत्रैव तुल्यास्त्रत्वम्—स गान्धर्वेण गान्धर्वं दैवं दैवेन राघवः । अस्त्रं राक्षसराजस्य जघान परमास्त्रवित् ॥ इति । **वैपरीत्यं** मरणपर्यन्तविपरीताचरणम् । **विभिः** पक्षिभिर्गृध्रादिभिः **परीतत्वं** वितन्वन्ति । उच्यते हि—"अद्य ते मच्छरैश्छिन्नं शिरो ज्वलितकुण्डलम् । क्रव्यादा व्यपकर्षन्तु विकीर्णं रणपांसुषु ॥ निपत्योरसि गृध्रास्ते क्षितौ क्षिप्तस्य रावण । पिबन्तु रुधिरं तर्षात् शरशल्यान्तरोत्थितम् ॥ अद्य मद्बाणभिन्नस्य गतासोः पतितस्य ते । कर्षन्त्वान्त्राणि पतगा गरुत्मन्त इवोरगान्" इति । हृदयस्य वैवश्यञ्च सदा अयुक्तचिन्तनमेव । अत एव तद्भेद इत्युक्तमनर्घराघवे—'सीतास्तनस्तबककुङ्कुमपङ्कलोपसङ्कल्पपातकिनि वक्षसि रावणस्य । न्यस्तः शरो विबुधकुञ्जरदन्तघातरूढव्रणार्बुदचतुष्टयमध्यवर्ती" ॥ इति ।

(11) एवं शत्रुजितमहाराजपरोऽपि । ते हि महाराजवंशे जनित्वापि राजभोगान् हित्वा वनं प्रति पलायिताः । कचित् **निम्नगाः** शात्रवानुद्रवणभयात् निम्नस्थलेषु निलीनाः कचित् वक्रमार्गाश्च भूत्वा **समेषु विषमेषु च** स्थलेषु पाषाणशर्करादिजटिलेषु **वैपरीत्यं** तत्पर्यन्तानुभूतराजभोगविपरीतं पद्भ्यामनुधावनादिकं **वितन्वन्ति** प्राप्नुवन्तीति ।

(12) एवं मुक्ताहारपरतयाऽपि । **महावंशे** पुण्ड्रेक्षुनामकस्थूलतरेक्षुमध्ये । 'इक्षुभेदास्तु कान्तारवंशपुण्ड्रादयो नारि' इति वैजयन्ती । पुण्ड्रेक्षूणां पुलिनविशदैर्गद्गदा मौक्तिकौघैरिति हंससन्देशे । तत्र जनित्वापि **निम्नगाः** मध्ये रन्ध्रगाः । स्त्रीणां कण्ठधारणकाले केचिदधोमुखीभूता वा । केचित् कुटिलाकृतयश्च । हाराणां कण्ठे धृतानां भुग्नाकृतित्वात् । **समेषु** हृदयोदरादिसमप्रदेशेषु **विषमेषु** स्तनतटादितुङ्गस्थलेषु **च वैपरीत्यं वितन्वन्ति** । मसृणतरोदरादिप्रदेशेषु मुक्ताहारपरिलुठने मासृण्यमपगच्छति । वैषम्यं च जायते । स्तनतटादिषु च हाराणाम[न्तर ?]वस्थितिदौर्घट्यात् पूर्वावस्थावस्थितिरूपं समत्वं निर्बाधमित्यर्थः । वक्ष्यते हि 'मुक्ताहारनिषेविता अपि न तद्वृत्त्यै दिशन्त्यन्तरम्' इति ॥ ४ ॥

ஜநித்வாऽபி மஹாவம்சே நிம்நகா: வக்ரசேஷ்டிதா:.
வைபரீத்யம் விதந்வந்தி ஸமேஷு விஷமேஷு ச—4

1 உயர்ந்த குலத்தில் பிறந்தும் கீழ் நோக்காய் ஒழுங்கற்ற செயல் உடையவர்கள் நல்லவர்களிடமும் கெட்டவர்களிடமும் மாருக நடந்து கொள்ளுகிருர்கள். எல்லோருக்குமே தீம்பு இழைக்கின்றனர். அல்லது நல்லோருக்குத் தீங்கு செய்பவரும், துஷ்டர்களுக்கு நன்மை செய்பவருமாயிருக்கிருர்கள்,

2 பெரிய மூங்கில்களுக்கு இடமான மலையில் உண்டாம் நதிகள், நேராகப் போகாமல் பல விடம் பெருகுகின்றனவாய், மேடு பள்ளங்களை மாற்றிப் பள்ளம் மேடாக்கும்.

3 மேகங்கள் புஷ்கலாவர்த்தமென்ற சிறந்த வகுப்பில் தோன்றியவை கூட கீழ் இறங்கி-கடலில் நீர் கொள்ள இறங்கி, கொண்ட பிறகு வளைந்த கதியுடையனவாகிப் பெய்து மேடுபள்ளங்களை மாற்றுகின்றன.

4 துர்யோதனன் உயர்ந்த குருவம்சத்தில் பிறந்தும், கர்ணுதிகளான நீசர்களை யடைந்து கோணலான செயல்கள் செய்பவனுய் (மனத்தில் த்வேஷம் வைத்திருந்ததால்) தர்மபுத்ர ராஜஸூயயாகத்திற்கு வந்தபோது ஸமமாயும் மேடுபள்ளமுமான இடங்களில், அவற்றின் நிலையறியாமல் ஸமமானதை மேடாகவும், மேட்டைப் பள்ளமாகவும் நினைத்துத் தவருக நடந்துகொண்டான்.

5 இப்படியே ராவணுதிகளையும் கொள்ளலாம்.

6 ஸ்ரீராமபிரானும் 'வம்சே ஜாத: ஸ்விதுராநகே' என்ற ஸூர்ய வம்சத்தில் தோன்றியவன். ஸ்த்ரீயான ஸீதையின் பேச்சுக்கிணங்கி மாரீசமானை உயர்ந்த ம்ருகமாக நினைத்து ஓடி ஸீதையைக் காணுமல்,

கோபமுண்டு, யோக்யன் அயோக்யனென்ற பாகுபாடின்றி எல்லாம் சேர்ந்த உலகையே அழிக்க முதலில் முயன்ருன். 'ஜகத் ஸசைலம் பரிவர்த்தயாம்யஹம்' என்ருனே.

7 ஸர்ப்பசாதி கச்யபவம்சத்திற் பிறந்தும், பாதாளம் போம்; வளைந்து வளைந்து செல்லும். உடலில் தாதுஸாம்யமுள்ளவரையும் பிறரையும் வதைக்கும். 'விஷமேஷு ச'-விஷம் ஏஷு ச. இப்பாம்புகளிடத்தில் விஷமும் உள்ளது.

8 மூங்கில்விஷயமுமாம். பெரிய மூங்கிற் புதரில் உண்டானதும் மேலேயோங்கமாட்டாமல் கீழும் குறுக்குமாகப் படர்ந்து, ஒழுங்கான தன் அங்கத்தில் விகாரத்தைப் பெறும். விபரீதமாம் - வி - பக்ஷிகளால், பரீதமாம்—சூழப்பட்டதுமாகும்.

9 க்ரஹங்கள்விஷயமுமாம். பூமி முதலிய லோகங்கள் உண்டாவதற்கு முன்னமே பிறந்த க்ரஹங்கள் ராசிசக்ரத்தில் சிற்சில இடங்களில் நீசமாயும் வக்ரமாயும் இருந்து கொண்டு சுபபலன் பெறவேண்டுமவர்களுக்கு அசுபபலனையும், அசுபத்திற்கு மாருக சுபபலனையும் அளிக்கும். சில க்ரஹம் வக்ரத்திலும் ஒழுங்கான இடத்திற்போல் பூர்வ ராசி பலனை யளிக்கும். மஹாவம்சே, மஹௌ, அம்சே என்று பிரிக்க, பூமியில் ஜநித்வா - முன்னமே பிறந்து, அம்சத்தில் நிம்நம் - நீசம் பெற்று என்று பொருளாம்.

10 வில்லும் பொருளாம். உயர்ந்த மூங்கிலில் உண்டான வில் அம்பைத் தொடுக்கச் சந்து உடையதாய் வளைந்து வேலை செய்வதாய். ஸமேஷுவிஷமேஷு - ஸம - இஷு - விஷமேஷு. எதிர் நின்று போர்புரிய ஸமமான அம்புகளையுடைய விரோதிகளிடத்தில் அழிவை, வி - பக்ஷிகளால் ஆக்ரமிப்பைச் செய்யும். இந்த்ர வில்லுமாம். அது ததீசி மஹர்ஷியின் மஹா - பெரிய, வம்சே - முதுகெலும்பில் உண்டானது.

11 நல்ல வம்சத்திற் பிறந்தும் காடு சென்று முள்ளும் கல்லுமான இடங்களில் கஷ்டங்களை யனுபவிப்பர் தோல்வியுற்ற அரசர்.

12 மூங்கிலில் உண்டான முத்துக்கள் வட்டமாய் துளை பெற்று ஹாரமாய் கழுத்து மார்பு என்ற மேடுபள்ளமான இடங்களில் பல விதமாய்த் திகழும். (4)

उत्पथादुन्नताः केचित् बहुभङ्गभ्रमाकुलाः ।
तटस्थानपि निघ्नन्ति तरसा भिन्नसेतवः ॥ ५ ॥

अत्र केचिदमार्गार्जितवित्ताः प्रत्यहमकृत्यशतकारिणः प्रतिक्षिपन्ति लोकव्यवस्थाम् । अधिक्षिपन्ति च महाजनान् उदासीनानपि स्वनिग्रहभिया । आरोपयन्ति च दोषान् अदुष्टेष्वपि स्वसाम्यापादनायेति तान् प्रत्याह **उत्पथादिति** । ल्यब्लोपे पञ्चमी । उत्पथं प्राप्येत्यर्थः । उत्क्रान्तः पन्था उत्पथः । लोकशास्त्रोत्तीर्णमार्गादिति यावत् । **उन्नताः** वित्तादिसंपादनेन परिबृढा अपि **बहुभङ्गभ्रमाकुलाः** बहुभ्यो भङ्गाः बहवो भङ्गा वा अनुचितकार्यकरणेन सर्वत्र सर्वविधावमाननानि, तैः भ्रमः कृत्याकृत्यापरिज्ञानादिजनितबुद्धिविपर्यासः उद्भ्रान्तचित्तता वा, तेन **आकुलाः** व्याकुलमनस्काः । **तरसा** वेगेन । सद्य एवेत्यर्थः । **भिन्नसेतवः** भिन्नः विभग्नः सेतुः मर्यादा यैस्तथोक्ताः । सकललोक-

मर्यादामुद्लङ्घन्तः **तटस्थानपि** उदासीनानपि केवलसाधुवृत्तीन् **निघ्नन्ति** वितथदोषारोपणेनाधिक्षिपन्ति । स्वदोषकथनभिया तेष्वसतोऽपि दोषान् आरोप्य विदूषयन्तीत्यर्थः । स्वयमनार्यकार्यकरणं परदोषारोपणञ्चेति द्विविधदोषदुष्टा अतीव वर्जनीया इत्यर्थः ।

(2) यद्वा "गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः । उत्पथं प्रतिपन्नस्य कार्यं भवति शासनम्' इति शास्त्रवत्यभिज्ञानात् तदर्थपरोऽपि भवत्ययं श्लोकः । तथा हि— **उन्नताः** केचिदाचार्यादयः पितृमातुलश्वशुरादयो वा गुरुस्थानीयाः पूज्यतमाः, बहुना **भङ्गेन** मनोव्याधिमुखेन **भ्रमाकुलाः** उद्भ्रान्तचित्तास्सन्तः **उत्पथात्** लोकोत्तीर्णमार्गमाविश्य तटस्थानपि निघ्नन्ति । आचार्यत्वादिजनितानन्यशास्यत्वावलेपात् प्रामाणिकानप्युदासीनान् कार्याकार्यमूढतया विजिघांसन्ति **भिन्नसेतवः** लोकमर्यादामतिक्रामन्तस्सन्तः । तेपि शिक्षणीयाः । उपेक्षणीयाश्च । अन्ततोऽप्यनिवृत्तौ शिष्यादिना वर्जनीयाश्चेति भावः । खलकोटिप्रविष्टा एवैतेऽपीत्याशयः ।

(3) सुरापायिसमाधिरप्यनेन द्योत्यते । **उन्नताः** केचित् धनादिबहुलाः अधिकारिपुरुषा वा **उत्पथात्** सुरामद्यादिमदकरद्रव्यपानात् मत्ताः बहवो **भङ्गाः** मार्गपतनात् करपादादिभङ्गाः... **भ्रमः** पुनश्चोत्थाने शिरोभ्रमणादिकं तेन आकुलाः **तरसा** मदवेगेन **भिन्नसेतवः** उच्चावचवचनरचनादिभिरतिक्रान्तव्यवस्थाः **तटस्थानपि** मध्येमार्गं यदृच्छयागतान् अनपराधानपि जनान् **निघ्नन्ति**— स्वीयमदविकारेणाधिक्षिपन्ति तर्जयन्ति ताडयन्ति चेति । न केवलं धनमदादिमात्रेणापरांस्तर्जयन्ति अधिक्षिपन्ति च ; अपि तु तज्जनितसुरामदादिभिरप्यबुद्धिपूर्वमिति भावः ।

(4) एवमत्र नदीप्रवाहपरतयापि बोधः । **उत्पथात्** गिरिशिखराद्युन्नतप्रदेशात् **उन्नताः** जलैर्विन्ध्यादूर्ध्वमुखतया निर्गच्छन्तः, बहवो **भङ्गाः** तरङ्गाः **भ्रमाः** आवर्ताश्च **तैराकुलाः** कलुषितजलाः, **तरसा** वेगेन **भिन्नसेतवः** वृक्षसैकतादिसेतुबन्धानपि नि(वि ?)घ्नानाः केचित् नदीप्रवाहाः **तटस्थानपि** तीरस्थवृक्षानपि **निघ्नन्ति** समूलमुत्पाटयन्ति । स्वपरिमाणाभ्यधिकजलागमात् ऊर्ध्वमुत्थितास्तीरेऽभिव्याप्य तत्रस्थानपि द्रुमान् उन्मूलयन्तीत्यर्थः ।

(5) एवं दुर्वादिपरतयाप्यर्थः । **उन्नताः** शास्त्रपरिश्रमादिभिः पण्डितोत्तमा अपि केचित् **उत्पथात्** समयविशेषे स्वोक्तस्थापनार्थं वितण्डादिदुर्वादमाश्रिताः अत एव बहवो **भङ्गाः** स्ववाक्यव्याघातआगमबाधादयः, **भ्रमाः** अन्यथाप्रतिपत्तयश्च दुरभिनिवेशकृताः, **तैराकुलाः** क्रान्तचित्ताः । उच्यते हि, 'अभिनिवेशवशीकृतचेतसां बहुविदामपि संभवति भ्रमः' इति । **तरसा** तत्क्षणमेव **भिन्नसेतवः** समयबन्धादिव्यवस्थामपि लङ्घयन्तः **तटस्थानपि** मध्यस्थभावमाश्रितान् विशेषज्ञानपि **निघ्नन्ति** स्वविरुद्धभाषणे तानप्यधिक्षिपन्ति । पक्षपातमारोपयन्ति च । उक्तं हि 'पण्डितो यदि तत्रैव पक्षपातोऽधिरोप्यताम्' इति ।

(6) अन्योपि सुग्रीवादिपरोऽर्थः । केचित् समुद्रतीरे निबद्धगोष्ठीकाः सुग्रीवादयो वानराः उत्पथात् ऊर्ध्वमार्गमालोक्य विभीषणागमसमये ऊर्ध्वमुखतया स्थिताः उन्नताः तद्ग्रहणार्थमूर्ध्वोत्पतनलोलुपाः । कुतः । बहूनां वानराणां भङ्गः भञ्जनं तस्य भ्रमेण—वानरान् बहूनिमे निहन्युरिति भ्रान्त्या आकुलाः मनोवैयाकुलीमातिष्ठमानाः तरसा क्रोधवेगेन भिन्नः विधूनः सेतुः सेतुवत् व्यवस्थापकः श्रीरामः, तद्वाक्यं वा 'सूक्ष्ममप्यहितं कर्तुं,' 'अङ्गुल्यग्रेण तान् हन्याम्' इत्यादिकं यैस्तथोक्ताः, तटस्थानपि समुद्रतीरे जोषमासीनानपि तान् विभीषणादीन् निघ्नन्ति, 'सालानुद्यम्य शैलांश्च' इत्युक्तक्रमेण निहन्तुमुद्युञ्जते । श्रीरामप्रभावज्ञा अपि स्नेहातिशयकलुषचित्ताः तद्वाक्यमप्युद्धूय विरुद्धकार्यप्रवृत्ता भवन्तीति ।

(7) एवं श्रीरामपरोपि । उन्नताः, 'गुणैर्विरुरुचे रामः, क्षमया पृथिवीसमः' इत्युक्तनिखिलगुणपौष्कल्यसमृद्धोऽपि, केचित् श्रीरामः, बहवो भङ्गाः 'राज्याद्भ्रंशो वने वासः सीता नष्टा द्विजो हतः' इत्यादिमनःक्लेशाः, भ्रमाः तज्जनितमनोमोहा वा सीतान्वेषणाय इतस्ततः पर्यटनानि वा, तैः अकुलाः गृहादिरहितः नित्यपर्यटनेन एकवासस्थानरहितः तरसा शोकवेगजनितक्रोधवेगेन भिन्नसेतवः, 'कर्ता लोकस्य मर्यादाम्' इत्युक्तोपि निखिलजगद्व्यवस्थामुद्धूय 'अमर्यादानिमान् लोकान् करिष्याम्यद्य सायकैः' इति तद्भेदनाय प्रयतमानः तटस्थानपि निघ्नन्ति उदासीनान् निरपराधानपि हन्तुमुद्युङ्क्ते । 'सदेवगन्धर्वमनुष्यपन्नगं जगत् सशैलं परिवर्तयाम्यहम्' इत्युद्घोषणात् । क्रोधस्वभाव ईदृश इति भावः । अत एवोक्तं तात्पर्यचन्द्रिकायाम्, 'कामात् क्रोधोऽभिजायते' इत्यत्र 'कामे वर्तमाने विषये चासन्निहिते संनिहितान् पुरुषान् प्रति एभिरस्मदिष्टं विहतमिति क्रोधो भवती'ति भाष्यव्याख्यानावसरे "न केवलं कामप्रतिबन्धकानेव पुरुषान् प्रति क्रोधः ; अपि तु कृत्याकृत्याविवेकान्धतया तस्यां दशायामुपलभ्यमानान् प्रत्यपीति द्योतनाय सन्निहितानित्युक्तम् । ईश्वरोपि क्रोधवेगमभिनयन् कस्मिंश्चिदेव रक्षसि द्रुह्यति, सदेवगन्धर्वमनुष्यपन्नगं जगत् सशैलं परिवर्तयाम्यहमित्याह" इति । अतश्चेदृशक्षमादिगुणपुष्कलानामप्युद्वृत्तचर्याप्रवृत्तौ किमुत मितम्पचानां खलानामित्युक्तार्थद्वयपर्यवसानं बोध्यम् । उक्तार्थद्वयेऽपि वर्तमाननिर्देशात् तदुद्योगपर्यन्तार्थविवक्षा समुचितेति भावः ।

(8) एवं रामबाणपरोपि । उत्पथादुन्नताः सागरापराधसमये 'चापमानय सौमित्रे शरांश्चाशीविषोपमान्' इति धनुस्सज्जीकरणेन ऊर्ध्वमुखमुत्पतिष्णवोऽपि रामबाणाः । के जले चिद्बहुभङ्गभ्रमाकुलाः सागरशोषणे चितां बहूनां चेतनानां तत्रस्थानां भङ्गः पीडा स्यादिति भ्रमेण मनोवस्थाविशेषेण श्रीरामगतेन आकुलाः एकसागरापराधमात्रात् किमिति वृथाऽनन्तजीवान् विघातयेयमिति क्रोधवेगनिरोधनेन निर्व्यापारतामाश्रिताः, तरसा भिन्नसेतवश्च रावणवधानन्तरं सेतुपथाद्राक्षसागमनभिया तद्बन्धमुद्धूतवानाः । स्वकलितं सेतुबन्धमपि धनुर्बाणैर्बिभेदेति पौराणिकप्रसिद्धेः । तटस्थितानप्यनपराधान् सागरशत्रून् कतिपयान् निघ्नन्ति विनाशयन्ति । अपां पत्युरशत्रूनित्युक्त्या तद्वधार्थमारोपितैस्तच्छत्रुवधादिति भावः । संहितानां वैयर्थ्यायोगात अनेकभङ्गात् वरमल्पभङ्ग इति न्यायेन तच्छत्रुप्रयोग इति भावो बहुशब्देन विवृतः ।

(9) एवं रावणपरोपि । उत्पथात् शास्त्रविरुद्धबलात्काराहरणादिमार्गात् उन्नताः उत्कृष्टभोगादिशालिनः यद्वा के शिरसि उन्नताः दशत्वसङ्ख्यावन्तः उत्पथात् उन्मार्गात् चितां चेतनानां बहूनां भङ्गाय यो भ्रमः सकललोकपर्यटनं तत्र आकुलाः सदा हिंसैकलोलुपाः तरसाय मांसाय आभिन्नाः सम्यङ्निहताः सेतवः लोकमर्यादास्थापकाः स्मृतिकर्तारो मुनयो यैस्तथाभूताः। 'ऋषिमांसानि खादन्तम्' इत्युक्तेः। तटस्थान् मध्यस्थवृत्त्या हितवक्तॄनपि विभीषणादीन् निघ्नन्ति अधिक्षिप्यावमन्यन्ते। विशेषणमहिम्ना रावण इति फलितम्।

(10) एवं भीष्मपरोऽपि। उन्नताः बलशौर्यादिभिः सर्वोत्कृष्टा अपि केचित् भीष्मः। बहुभिः अर्जुनविसृष्टैरनन्तबाणैः यो भङ्गः निर्घातः तेन भ्रमः कृत्याकृत्यविवेकान्धता। तेन आकुलाः। प्रकारान्तरेण तत्परिहारकरणासमर्था इति यावत्। उत्पथात् उन्मार्गमाश्रित्य भिन्नसेतवः युद्धार्थमभिमुखा एव निहन्तव्या इत्यादिधर्मयुद्धव्यवस्थामप्युद्धूय तरसा सद्य एव तटस्थानपि रथतटे, आयुधं न ग्रहीष्यामीति प्रतिज्ञापूर्वकमवस्थितमपि श्रीकृष्णं निघ्नन्ति बाणमोक्षैः प्रहरन्ति। महतामपि मर्यादालङ्घनं समयविशेषे संभावितमिति किमुत क्षुद्राणामिति भावः। सर्वत्र बहुवचनं पूजायाम्, सामान्योक्तिमहिम्ना वेति ध्येयम्।

(11) एवं वामनभूमिकापरोऽपि बोध्यः। उत्पथादुन्नताः प्रथमं वामनवेषमाश्रित्य याचिते पदत्रयपरिमिते भूतले बलिना प्रदत्ते सद्य एव वञ्चनमार्गादत्युन्नतवेषपरिग्रहभाजः, अत एव बहुभङ्गभ्रमाकुलाः ऊर्ध्वोत्क्षिप्तस्य पादस्य बहुषु दिग्भित्तिषु भङ्गः प्रतिघातः भ्रमः एकत्र पादप्रसारणप्रतिघाते तत्परिसरेष्ववकाशलिप्सया इतस्ततः पर्यटनम् तेन आकुलाः अन्ततः कथञ्चिदपि स्थानविशेषमलभमानाः तरसा भिन्नसेतवः अत्युदारोऽयं न मर्दनीय इत्यादिव्यवस्थामप्युद्धूय तटस्थानपि निघ्नन्ति महागुणशालिनमनपराधमपि बलिं च वञ्चनमार्गेण विमथ्नन्तीत्यर्थः। तच्छिरसि पादं वि(नि ?)क्षिपन्तीति यावत्।

(12) एवं परशुरामपरोऽपि। उन्नताः तपश्चर्यादिषूत्कृष्टा अपि उत्पथात् तादृशब्राह्मणपथविरुद्धक्षत्रियादिमार्गात्, बहूनां क्षत्रियजातीनां भङ्गः भञ्जनम् भ्रमः इतस्ततः क्षत्रियजात्यन्वेषणाय परिभ्रमणम्, तेन आकुलाः तदेकव्यापारसक्ताः, तरसा भिन्नसेतवः तपस्विनां परहिंसानिषेधकशास्त्रव्यवस्थामवधूय तटस्थानपि स्वस्वमातृउदरतटस्थानपि गर्भरूपान् क्षत्रियशिशून् निघ्नन्ति, तन्मातृध्वंसपूर्वकं शिशूनपि विमथ्नन्ति। उक्तं ह्यनर्घराघवे 'वारान् आसन्नविंशान् विशसितविषमक्षत्रजातिप्ररोहः क्रोधादुत्कृत्तगर्भामिषरुधिरवसाविस्रगन्धिः कुठारः' इति। कार्तवीर्यनाम्नि एकस्मिन् द्रुह्यति उदासीनसर्वक्षत्रियजातीनामागर्भकृन्तनमनुचितमेवेति हृदयम्। क्रोधाग्निस्वभाव एतादृश इति द्योतनायैव भगवता तादृशाभिनयः कृतः। उक्तं हि प्रबोधचन्द्रोदये क्रोधवाक्यम्—'आगर्भं यावदेषां कुलमिदमखिलं नैव निश्शेषयामि स्फूर्जन्तः क्रोधवह्नेर्न दधति विरतिं तावदङ्गे स्फुलिङ्गाः' इति।

(13) अन्योऽपि मोक्षगामिचेतनपरः । केचित् श्रीवैकुण्ठगमनायोद्यताः उत्पथात् उन्नामकस्य सूर्यमण्डलमध्यवर्तिभगवतो मार्गात् 'तस्योदिति नाम' इति आदित्यमण्डलान्तर्गतमधिकृत्य श्रुतेः । तन्मार्गेण उन्नताः ऊर्ध्वमुत्क्रममाणाः, बहवो भङ्गाः अर्चिरादिभागभेदाः । भङ्गशब्दस्य भागार्थकता काव्यादिभागसमाप्तौ प्रथमद्वितीयादिभङ्गव्यपदेशादुपलभ्यते । 'विद्युद्भिभङ्गः....स्फुरितानि वायोः इत्यादि-प्रयोगाच्च । तत्र यो भ्रमः भ्रमणं सञ्चारः तेन आकुलाः सत्वरभगवत्प्राप्तिविलम्बात् तदेकोत्सुकाः भिन्नः सङ्गतः सेतुः 'एष सेतुर्विधरणः' 'एतं सेतुं तीर्त्वा' इत्यादिनिर्दिष्टो भगवान् यैस्तादृशाः 'सङ्गतेऽन्यत्र फुल्ले च' इति विश्वः । परमतस्सेतून्मानेति सूत्रे सेतुशब्दस्य देशान्तरप्रापकपरतया व्याख्यानेन एतत्प्रकरणे तत्पदनिर्देशः सुसङ्गत इति भावः । तरसा क्षिप्रं तटस्थानपि विरजातीरस्थितानपि भूतसूक्ष्मान् सूक्ष्मशरीरारम्भकान् । तत्पर्यन्तानुयायिनोऽपीति यावत् । निघ्नन्ति निवर्तयन्ति, मनसैव विरजातरणश्रवणादिति भावः ।

(14) एवं प्रपन्नपरतयाऽप्यर्थः । बहवो भङ्गाः आध्यात्मिकादिदुःखानुभवाः तैर्यो भ्रमः इतस्ततः पर्यटनम्, तेन आकुलाः व्याकुलचित्ताः प्राप्तनैराश्या इति यावत् । अथ च उन्नताः उन्नामके आदित्य-मण्डलान्तर्गते भगवति नताः विनताः नमनञ्चात्र प्रपत्तिरेव । 'नमस्कारात्मकं यस्मै विधायात्मनिवेदनम्' इत्युक्तत्वात् । 'य एष आदित्ये पुरुषः स परमेष्ठी ब्रह्मात्मा' इत्यारभ्य 'ओमित्यात्मानं युञ्जीत' इति न्यासविद्याविधानेन उन्नाम्नि नता इत्युक्तम् । अथ च उत्पथात् उन्नतपथमाश्रित्य । 'उन्नतानामव-नतिर्नतानां यत्र चोन्नतिः' इत्युक्तेः । भिन्नसेतवः पुण्यपापानां फलमवश्यं प्रदातव्यमितीश्वरव्यवस्थामपि भञ्जयन्तः तटस्थानपि फलप्रदानानुन्मुखान् उदासीनानपि सञ्चितपुण्यपापकूटान् तरसा प्रपत्तिक्षण एव निघ्नन्ति विनाशयन्ति । प्रारब्धमात्रपरिशेषणादिति भावः ॥ ५ ॥

உத்பதாத் உந்நதா: கேசித் பஹுபங்கப்ரமாகு(லி)லா:
தடஸ்த்தாந் அபி நிக்நந்தி தரஸா பிந்நஸேதவ:—5

1 வழி மீறிச் சென்றே விசேஷமான பதவி பெற்றவர்கள் வெகு விதமான அவமானங்கள் நேரவே திகைத்தவராய் அறவரம்பை யழிப்பவராய், ஒன்றிலும் கலப்பின்றி ஒதுங்கி யிருப்பவரையும் ஒரு காரண மின்றி வதைக்கின்றனர்.

2 சிலர் இயற்கையிலே சிறந்தவராய் ஆசார்யாதிகளாயிருப்பினும் (பூர்வஜந்ம வசமாம்) சில கேடுகள் நேர்ந்ததால் மனம் கலங்கி வழிமீறிச் சென்று சாஸ்த்ர நெறியை யழித்து வெறுமனே யிருப்பவரையும் பழிக்கின்றனர்.

3 கையில் பணம் பெற்றவர்கள் குடி முதலானவற்றைச் செய்து தலை கால் தெரியாமல் சுற்றி விழுந்து செல்லுகின்றவராய் கண்டவரை யெல்லாம் அடிப்பவரும் அழிப்பவருமாகிறார்கள்.

4 மலையருவிகள் மலைப்புறங்களினின்று மேலெழுந்து வெள்ள மிட்டு வெகு திரைகள் புரளக் கலங்கி யோடி அணைகளையும் அழித்துக் கொண்டு இருகரைகளிலிருக்கும் மரம் முதலியவற்றையும் ஒழிக்கின்றன.

5 படிப்பைப் பெற்றுப் பெரியவராகியும் சிலர் துர்வாதம் செய்து தங்களுக்கு பங்கம் ஏற்படினும் ப்ராந்தியும் ஆக்ரஹமும் உடையராய் மார்க்கத்தை மீறி, மத்யஸ்த்தராய் உண்மை சொல்லுகின்றவரையும் மிரட்டுகின்றனர்.

6 ஸுக்ரீவாதிவானரர்கள் விபீஷணன் மேலே வரும்போது நிமிர்ந்து வானரர்களுக்கும் ராமனுக்கும் அவனால் வெகுவாக பங்கம் விளையும் என்று வீணே ப்ரமம் கொண்டு சரணாகதரக்ஷணமென்கிற சாஸ்த்ரத்தை மீறி உண்மையில் யோக்யரான விபீஷணாதிகளையும் ஹிம்ஸிக்க முயன்றனர்.

7 கல்யாண குணங்களுக்கே கொள்கலமான ஸ்ரீராமபிரானும். அரசு துறப்பு, அரண்யவாஸம், காதலியைக் காணமை முதலான கஷ்டங் களுக்கு உள்ளான போது திகைத்து குற்றம் செய்தவரை மட்டும் கண்டிப்பதென்ற வழியை விட்டு உலகெல்லாம் அழிக்கப்புறப்பட்டான்.

8 இராமபாணங்கள் முதலில் கடலை வற்றச் செய்ய எழுந்தவைகள் பிறகு, கே-ஜலத்திலிருக்கும்-சித்-சேதநங்களுக்கு, பங்கம்-அழிவு வருமே என்று அதனைவிட்டு, எங்கோ கரையில் இருந்தவர்களை, ஸமுத்ர ராஜ னுக்கே அனுகூலம் செய்வதற்காக வதைத்தன. போர் எல்லாம் முடிந்து அயோத்திக்கு வருவதற்கு முன் கட்டின ஸேதுவைச் சிறிது பிளந் தெறிந்தன அரக்கர் மீண்டும் வராமலிருக்க வேண்டுமென்று.

9 ராவணன், கே-தலையில் பெருத்தவன்-பத்துத் தலையுடையவன், அக்ரமமாக வெகுஜனங்களை பங்கப்படுத்த எங்கும் ப்ரமணம் செய்கின்றா னாய், தரஸ-மாம்ஸம் காரணமாக, ஆபிந்நஸேது—ஸாதுவான ரிஷிகளை யும் அழித்தான். (அது போல் சிலராகிறார்.)

10 பெரியவரான பீஷ்மரும் அர்ஜுனன் விட்ட வெகு பாணங் களால் பங்கப்பட்டுக் கோபம் அடைந்து வழி மீறி, ஆயுதம் எடேன் என்று வெறுமனே இருந்த கண்ணனையும் கண்டபடி அடிப்பவரானார்.

11 வாமநாவதாரமெடுத்து பகவானும் சிறிய அடியைக் காட்டி மூவடி கேட்டு, உலகெங்கும் புகுந்து தடைபட்டு அலையும்படியான உருவமெடுத்து, இரண்டே அடிகளால் அளந்து நிரபராதனான மாவலி யையும் காலைத் தலைமேல் வைத்துப் பாதாளம் புகுவித்தான்.

12 பரசுராமர் தவம் புரிந்திருக்க வேண்டியிருக்க ஒருவனுக்காக வெகு க்ஷத்ரியர்களை வதைக்க முடிவு செய்து (வயிற்றிலுள்ள சிசுக்களை யும் கொன்றாரென்னும்படி) க்ரூரமாக நடந்தார்.

13 बहुभङ्गभ्रमेत्यत्र भङ्गार्हनश्वरनानालोकभ्रमणेन प्राक् व्याकुला इत्यर्थो युक्तः । மோக்ஷம் போகிறவர்கள் உத் என்னப்படும் சூர்யபகவானின் வழி யாக மேலே சென்று, பல பங்கங்களை அதாவது அழியும் விஷயங்களைக்

கடந்து விரஜாநதிக் கரையில் நிற்க வேண்டிய சரீரேந்த்ரியங்களை ஒழித்து விடுகிறார்கள். அவர்களுக்கு ஸேதுவான ஸர்வேச்வரன் துணையாகையால் ஸேதுவின்றியே விரைவில் நதியைக் கடத்தலாம்.

14 பலவகையான ஸம்ஸாரங்களால் கலங்கி உத் என்ற எம்பெருமானிடம் நதா:-ப்ரபத்தி செய்தவர், கர்ம பலன் அனுபவிக்க வேண்டுமென்கிற வ்யவஸ்தையை மீறி, தம்மிடம் பலன் அளிக்காமல் தடஸ்த்தமாயிருந்த ஸஞ்சித புண்ய பாபங்களையும் தரஸா-ப்ரபத்தியின் பலத்தாலே அழிக்கிறார்கள். இது உத்பதம்-உயர்ந்த வழி.

(இந்த ச்லோகத்தில் उत्पथा दुर्नदाः என்று ப்ராசீந பாடம். துஷ்டநதங்கள் ஆறுகள். கேசித் - சில துஷ்டர்கள், இவர்களுக்கும் துர்நதங்களுக்கும் ஒத்துமை. துஷ்டநாதம் உடையர் துர்நதர் என்னலுமாம்.)

केनचिद्दान्तकृत्येन कुलगोत्रविमर्दिनम्(ना) ।
मदेन बहुधा भिन्नं मातङ्गं मन्यते जनः ॥ ६ ॥

केचिदद्य खलाः विशिष्टपुरुषपरिबुभूषया तद्वेषधारिणोऽपि, 'अन्तर्दुष्टो बहिश्शान्तो ब्रह्मविद्वेषतत्परः' इत्युक्तरीत्या अन्तरतीव कुटिलाः कुलगोत्रविनाशिदुश्चरित्रप्रवणा दुर्मत्ताश्च वर्तन्ते । ते तु चाण्डालवत् दूरपरित्याज्या इत्याह **केनचिदिति दान्तकृत्येन ।** तपश्चर्यायां प्रवर्तमानाः तत्क्लेशमसहमानाश्च दान्ताः । 'दान्तस्तु दमितेपि स्यात् तपःक्लेशासहे त्रिषु' इति मेदिनी । तेषां **कृत्यं** वेषादिकं जटामण्डलधारणादिरूपं तेन **कुलगोत्रविमर्दिनम् । कुल**शब्देन प्रवर उच्यते । प्राथमिकपरम्परेत्यर्थः । गोत्रञ्च प्रसिद्धम् । यद्वा **कुलं** कुटुम्बः जनपदो वा । 'कुलं जनपदे गोत्रे सजातीयगणेष्वपि' इति मेदिनी । **तत् विमर्दयति** पीडयतीति तथोक्तम् । ब्राह्मण्यलोपाद्यापादकस्वैरदासीगमनादिदुश्चरित्रप्रवणम् । **मदेन बहुधा भिन्नम्** धनमदादिना बहुप्रकारेण कलुषितम् । तेन जगद्विरोधभयनिवृत्तिर्द्योत्यते । महाजनभयमतीवोपेक्ष्य लोकविरुद्धकर्मकारिणं बहिश्शान्तवेषमित्यर्थः । **भिन्न**शब्दस्य सङ्गतार्थकता वा विभक्तार्थकता वा बोध्या । मदेन हेतुना जगतो विभक्तमित्यर्थः । सज्जनासंसृष्टमिति यावत् । **जनः** निखिलोऽपि जन्तुः-**मातङ्गं मन्यते** चण्डालं मन्यते । साधारणपतितदर्शनेऽपि युगमात्रापसरणविधानात् ईदृशमहापतितसन्निधाने युगचतुष्टयपरिहरणावश्यकतया चण्डालतुल्यं जानातीत्यर्थः । उक्तं हि—"युगं युगद्वयं चैव त्रियुगं च चतुर्युगम् । चण्डालसूतिकोदक्यापतितानामधःक्रमात्" इति । विपरीतक्रमादित्यर्थः । अत एवोच्यते, "चण्डालाः प्रत्यवसिताः परिव्राजकतापसाः । नैष्ठिकानां वनस्थानां यतीनां चावकीर्णिनाम् । शुद्धानामपि लोकेऽस्मिन् प्रत्यासत्तिर्न विद्यते" इति । दान्तपदस्य यतिपरत्वे तु कुलगोत्रं परित्यज्य यत्याश्रमधारणेऽपि दुश्चर्याप्रवृत्तौ यत्याश्रमभ्रंशेन सह कुलगोत्रविनाशोऽपि फलितोऽभवदिति भावोऽवसेयः ।

(2) एवं मत्तगजपरोऽप्यर्थः । केनचित् **दान्तेन** दन्तसंबन्धिकृत्येन वप्रक्रीडाख्येन कण्डूतिशमनार्थं स्वदन्तघाततो गिरिभेदनरूपेण । उक्तं हि—'आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं वप्रक्रीडापरिणत-

गजप्रेक्षणीयं ददर्श' इति । **कुलगोत्रविमर्दिनं** कुलाचलानपि भिन्दानं **मदेन बहुधा भिन्नं** मदवशात् बहुप्रकारेण विभ्रान्तचित्तं भिन्नदन्तं वा सन्नतं वा । 'भिन्नः स्यात् त्रिषु दारिते । सन्नतेऽन्यत्र फुल्ले च' इति मेदिनी । तादृशजन्तुविशेषं जनो मातङ्गं मन्यते । गज इति निश्चिनोति इत्यर्थः ।

(3) एवं रावणपरोपि । केनचित् **दान्तकृत्येन** सन्न्यासिवेषधारणेन **विमर्दिनं** श्रीराम-कळत्रपीडकम्, **विं** जटायुषं मर्दयतीति तथोक्तं वा । **मदेन** शौर्यमदेन बहुधा**भिन्नम्** उद्भ्रान्तचित्तं स्वविजयमेव सुदृढं निश्चित्य सीताप्रदानानुत्सुकं **कुलगो** जनः तत्कुटुम्बान्तर्गतो विभीषणादिः **मातङ्गं मन्यते ।** चण्डालवत् परित्यज्य प्रत्यर्थिगोष्ठीमेवाऽऽतिष्ठते । उक्तं हि, 'यान्ति न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायताम् । अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति' इति ।

(4) एव**मुतङ्कवृत्तान्तपरो**ऽप्यर्थः । तथा **ह्याश्वमेधिकपर्वणि** कथा श्रूयते । भारतयुद्ध-समापनानन्तरं द्वारकां प्रति प्रस्थितः श्रीकृष्णः मध्येमार्गं मरुकान्तारे तपस्यन्तमुतङ्कनामानं कञ्चन महर्षिं पश्यन् यथाक्रमं च पूजयन्, तेन च मुनिना 'कुरुपाण्डवसन्धिकरणाय गतः श्रीकृष्णः' इति विजानता तादृशसन्धिनिर्वर्तनवृत्तान्तमनुपृष्टः कथयंश्च यथाक्रमं तेषां सन्धिकरणाशक्यतां युद्धादिप्रवृत्तिं मरणं च कुरूणाम्, तदाकर्णनजनितक्रोधेन तेन मुनिना शक्तस्याप्यस्य सन्ध्यकरणात् शापप्रयोगोद्यतेनाधि-क्षिप्तः, निखिलजगद्रक्षणार्थं स्वस्यावतरणं कालवशेन लोकसंहरणादिकं चोपदिश्य प्रदर्श्य च विश्वरूपं परितोषितेन तेन मरुकान्तारे तीर्थतोयविरहात् परितप्यमानेन संप्रार्थितः, यदा यदा तोयार्थं स्मरसि माम्, तदा तदा दिव्यं तीर्थं तव समीपे प्रादुर्भविष्यतीति तस्मै वरं प्रदाय द्वारकां प्रविवेश । स च मुनिस्तत्रैव तपश्चरन् कदाचित् तृष्णार्दितः कृष्णमनुस्मरन्, तत्क्षणमेव भगवता अमृतमस्मै प्रदेहीत्यादिष्टेन शतक्रतुना मर्त्यस्यास्यामर्त्यार्हामृतप्रदानमनीहमानेनापि भगवन्निर्बन्धवशात् कथंचिदभ्युपगच्छता स्वयं चण्डाळवेषं प्रधार्य श्वभिः परिवारितेन चर्मदृतावमृतं प्रपूर्य तदन्तिकमागतेन तीर्थमिदं परिगृह्णीष्वेति संप्रार्थितोऽपि चण्डाळत्वधिया तमधिचिक्षेप । अधिक्षिप्तश्च स सद्य एव द्युतोकमाचक्रामेति । अथ भगवान् साक्षादागत्यास्य यथावृत्तं कथयन् कांश्चन मेघान् यथेच्छवर्षुकान् अस्यादिश्य स्वपुरीमगमदिति। ततश्चायमर्थः—**दान्तः** तपस्वी उतङ्कः तत्सम्बन्धिना केनचित् **कृत्येन** उदकाहरणादिरूपेण । यद्वा **चिता** ज्ञानेन भगवदुपदिष्टेन **दान्तः** दमितः निवृत्तदर्पः **चिद्दान्तः** तस्य यत् कृत्यं तेन । कीदृशेन, **केन** जलरूपेण, जलाहरणरूपमुनिविषयककर्मणेत्यर्थः । अथवा चिच्छब्द एवकारार्थः । जलरूपेणैव कर्मणेत्यर्थः । **कुलगोत्राः** कुलाचलाः । अद्रिगोत्रगिरिग्रावेत्यमरः । तेषां **विमर्दिनं** विभेत्तारं **मदेन** मदनाम्ना च्यवनप्रयुक्तेन केनचिदसुरेण । वक्ष्यते चानुपदं तद्वृत्तान्तः । **बहुधा भिन्नं** बहुप्रकारेण विभीषितं देवेन्द्रमित्यर्थः जनः उतङ्कादिः मातङ्गं मन्यते । चण्डाळं मत्वा सुदूरमपयाति । तादृशजलाहरणकृत्येन मातङ्गं मन्यत इत्यन्वयः । 'ततो दिग्वाससं धीमान् मातङ्गं मलपंकिलम् । अपश्यत मरौ तस्मिन् श्वयूथपरिवारितम् ॥' इति श्लोकानुसारकोऽत्र मातङ्गशब्दः । **मदवृत्तान्तश्चानुशासनिके प्रसिद्धः ।**

कदाचिदश्विनोर्भिषक्कर्मकरतया स्वेन सह तयोस्सोमपानमसहमानो देवेन्द्रः च्यवनाख्येन महर्षिणा अश्विदेवाश्रितेन स्वाश्रितयोरश्विनोरिन्द्रेण सह सोमपानं कारयामीति प्रतिज्ञातवता सद्य एव स्वं सर्वदेवतासहितमाहूय, अद्यैव त्वमश्विभ्यां सह सोमपानं कुर्वित्यादिष्टोऽपि ताभ्यां सह न सोमं पास्यामीति प्रतिक्षिपन् प्रक्षिपंश्च वज्रमपि तदुपरि ततो महाक्रोधाविष्टेन तेन मुनिना तीर्थप्रोक्षणमात्रेण सवज्रमिन्द्रं संस्तम्भयता प्रतिप्रयुक्तं मदनामानमाहुतिमयं कञ्चिदसुरं महाघोरदर्शनमालोक्य परित्रस्तः च्यवनं शरणमागम्याश्विभ्यां सहैव सोममपिबदिति । मदलक्षणं चोक्तं तत्रैव, "मदं नामाऽऽहुतिमयं व्यादितास्यं महामुनिः । तस्य दन्तसहस्रं तु बभूव शतयोजनम् । द्वियोजनशतास्तस्य दंष्ट्राः परमदारुणाः । हनुस्तस्याविशद्भूमिमेकाऽन्या न्यविशाद्दिवम् । जिह्वामूले स्थितास्तस्य सर्वे देवाः सवासवाः । तिमेरास्यमनुप्राप्ता यथा मत्स्या महार्णवे ॥" अन्यत्र चाश्वमेधिकपर्वणि मरुत्तोपाख्याने, इन्द्रं प्रत्यभिवाक्ये, 'ततो रोषात् सर्वतो घोररूपं सपत्नं ते जनयामास भूयः । मदनामानमसुरं विश्वरूपं यं त्वं दृष्ट्वा चक्षुषी संन्यमीलः । हनुरेका जगतीस्था तथैका दिवं गता महती दानवस्य । सहस्रं दन्तानां शतयोजनानां सुतीक्ष्णानां घोररूपं बभूव। वृत्ताः स्थूला रजतस्तंभवर्णा दंष्ट्राश्चतस्रो द्वे शते योजनानाम् । स त्वां दन्तान् विदशन्नभ्यधावत् जिघांसया शूलमुद्यम्य घोरम् । तस्माद्भीतः प्राञ्जलिस्त्वं महर्षिमागच्छेथाः शरणं दानवं च' इति ।

(5) एवमेव दुर्मत्तलुब्धप्रभुपरतयापि । केनचित् दान्तकृत्येन दन्तसम्बन्धिकटकटात्काररूपकृत्येन, कुलगोत्रविमर्दिनं कुलगोत्रादिकमपरामृश्य स्वदर्शनार्थमागतान् महाकुलीनान् अवजानन्तम् मदेन घनमदेन बहुधा भिन्नं हृदयभेदनौपयिकोष्मविशेषशालिनं दुर्मत्तहृदयमिति यावत् । जनः अर्थिजनः महाजनश्च मातङ्गं मन्यते । चण्डालं मत्वा सुदूरमपसरति । अत एव निर्विण्णमनेकधा कविभिः, 'तदिदमरुन्तुदं यदुत बह्ववधाय भिया घनमदमेदुरक्षितिभृदङ्गणचंक्रमणम् ,' 'मीलच्चक्षुषि, वेल्लितभ्रुणि मुहुर्दत्तावमानाक्षरे भीमे कस्यचिदाढ्यकस्य वदने भिक्षाविलक्षां दृशम् ,' सक्षेपं भ्रुकुटीकटाक्षकुटिलं दृष्टं खलानां मुखम्, तृष्णे देवि यदन्यदिच्छसि पुनस्तत्रापि सज्जा वयम् ,' 'फलं स्वेच्छालभ्यं प्रतिवनमखेदं क्षितिरुहां पयः स्थाने स्थाने शिशिरमधुरं पुण्यसरिताम् । मृदुस्पर्शा शय्या सुललितलतापल्लवमयी सहन्ते सन्तापं तदपि धनिनां द्वारि कृपणाः' इति ।

(6) एवं मतङ्गोपाख्यानपरोऽपि कश्चिदर्थः । तथा ह्यानुशासनिके महाभारते, 'क्षत्रियो यदि वा वैश्यः शूद्रो वा राजसत्तम । ब्राह्मण्यं प्राप्नुयात् येन तन्मे व्याख्यातुमर्हसि ॥ तपसा वा सुमहता कर्मणा वा श्रुतेन वा । ब्राह्मण्यमथ चेदिच्छेत् तन्मे ब्रूहि पितामह' इति युधिष्ठिरप्रश्नमुपक्षिप्य, 'ब्राह्मण्यं तात दुष्प्रापं वर्णैः क्षत्रादिभिस्त्रिभिः । परं हि सर्वभूतानां स्थानमेतद्युधिष्ठिर । बह्वीस्तु संस(स ?)रन् योनीः जायमानः पुनः पुनः । पर्याये तात कस्मिंश्चित् ब्राह्मणो नाम जायते' इत्येकजन्मनि जातिद्वयमेळनासम्भवमुक्त्वा तत्प्रमाणतया मतङ्गगर्दभीसंवाद उपाख्यातः । तथाहि–'द्विजातेः कस्यचित् तात तुल्यवर्णः सुतस्त्वभूत् । मतङ्गो नाम नाम्ना वै सर्वैस्समुदितो गुणैः । स यज्ञकारः कौन्तेय पित्रोत्सृष्टः

परन्तप। प्रायाद्गर्दभयुक्तेन रथेनाप्याशुगामिना। स बालं गर्दभं राजन् वहन्तं मातुरन्तिके। निरविध्यत् प्रतोदेन नासिकायां पुनःपुनः। तत्र तीव्रव्रणं दृष्ट्वा गर्दभी पुत्रगर्धिनी॥ उवाच मा शुचः पुत्र चण्डालस्त्वधितिष्ठति। ब्राह्मणे दारुणं नास्ति मैत्रो ब्राह्मण उच्यते। आचार्यः सर्वभूतानां शास्ता किं प्रहरिष्यति। अयं तु पापप्रकृतिर्बाले न कुरुते दयाम्। एतच्छ्रुत्वा मतङ्गस्तु दारुणं रासभीवचः। अवतीर्य रथात्तूर्णं रासभं प्रत्यभाषत। ब्रूहि रासभि कल्याणि माता मे येन दूषिता। कथं मां वेत्सि चण्डालं ब्राह्मण्यं येन नाश्यते। तत्त्वेनैतत् महाप्राज्ञे ब्रूहि सर्वमशेषतः। गर्दभ्युवाच। ब्राह्मण्यां वृषळेन त्वं मत्तायां नापितेन हा। जातस्त्वमसि चण्डालो ब्राह्मण्यं तेन तेऽनशत्' इति। अथ च मतङ्गो दुःखपङ्कनिमग्नो ब्राह्मण्यप्राप्तीच्छया सुचिरं तपस्तप्यमानः स्वतपोवेगेन देवगणांस्तापयामास। असहमानश्च तत् तपः साक्षादागत्य महेन्द्रः वरं ददामि यथेच्छं वृणीष्वेति वदन् तेन च ब्राह्मण्यमेव मे देहीति प्रत्युक्त उवाच—'मतङ्ग दुर्लभमिदं विप्रत्वं प्रार्थ्यते त्वया। अप्राप्यं प्रार्थयानो हि न चिरात् विनशिष्यति' इत्यारभ्य, 'बह्वीस्तु संविशन् योनीः जायमानः पुनः पुनः। पर्याये तात कस्मिंश्चित् ब्राह्मण्यमिह विन्दति' इति। अतश्चानेकसंवत्सरसहस्रं सुतीव्रतपश्चरणेपि दुष्प्रापमेवाभूत् तेन विप्रत्वमिति समापितम्। तथा चायमर्थः—केनचित् दान्तकृत्येन तपश्चर्यादिरूपेण कुलगोत्रविमर्दिनं स्वीयजातिविनाशाय प्रयतमानं **मदेन** ब्राह्मण्यमदेन बहुधा **भिन्नं** वियुक्तं गर्दभ्युपदेशतो निवृत्तं(त्त ?)ब्राह्मण्यमद(दं ?)। वास्तवस्वजातिमवबुध्यमानमिति यावत्। **जनः** इन्द्रादिः **मन्यते** तं **मतङ्गं** चण्डालमेव मन्यते। अपूर्वजात्यनाविर्भावात् यथापूर्वं चण्डालमेव जानाति। मतङ्ग एव मातङ्ग इति विग्रहात् मतङ्गमेव जानातीत्यपि कश्चिदर्थः। अनेन चोपाख्यानेन पाशुपतवैष्णवैकदेशिमतमपि निर्धूतम्। तथा हि, 'दीक्षाप्रवेशमात्रेण ब्राह्मणो भवति ध्रुवम्। कापालं व्रतमास्थाय यतिर्भवति मानवः॥' इति पाशुपततन्त्रप्रसिद्धव्रतविशेषेण ब्राह्मण्यादिप्राप्तिमभिमन्यन्ते शैवाः। अपरे चास्मन्मतैकदेशिनः, 'न शूद्रा भगवत्भक्ता विप्रा भागवतास्स्मृताः' इत्यादिप्रमाणानामन्यथाऽर्थकथनेन भागवतत्वादिगुणविशेषेण ब्राह्मण्यावाप्तिमभिदधति। तत्रापि सुतीव्राभिनिविष्टाः केचन सर्वजातिविनाशं भागवतत्वादिजातिविशेषाविर्भावं च वर्णयन्ति। तेषां कण्ठेगडूयत इदमुपाख्यानमिति द्रष्टव्यम्। अतश्चायमर्थः केनचित् **दान्तकृत्येन** दीक्षाप्रवेशादिरूपेण। कृत्यशब्दो गुणविशेषस्याप्युपलक्षकः। तादृशगुणप्रयुक्तकैङ्कर्यादिकृत्यपरो वा। **कुलगोत्रविमर्दिनं** प्राचीनकुलगोत्रादिविनाशमुद्दिरन्तं **मदेन बहुधा भिन्नम्**—कुत उत्कृष्टा विप्राः अहमपि भागवतो ब्राह्मणोऽभूवमित्यादिदुरहङ्काराभिनिविष्टं **मातङ्गं मन्यते** मतङ्गमतप्रविष्टमेव मन्यते। तद्वत् परिभवभाजं जानातीत्यर्थः। यद्वा **जनः** कवितार्किकसिंहः स्वस्य कबलभूतं कलभमेव जानातीति वा अर्थः। **प्रमावव्यवस्थाधिकारे** विपुलं विदूषितत्वादिति।

(7) तर्हि मुनिवाहनमुनेः नात्यन्तरोत्पन्नस्य कथं भगवता स्वालयान्तस्समानयनमिति चेत्—तत्राप्युत्तरमेतच्छ्लोकलभ्यम्। तथा हि—**कुलगोत्रविमर्दिनं** अयोनिजतया वस्तुतः कुलगोत्रविरहितं

केनचिद्दान्तकृत्येन उपलक्षितं 'शान्तो दान्त उपरतस्तितिक्षुस्समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्येत्' इत्युक्तक्रमेण सदा भगवद्ध्यानैकनिरतं **बहुधा** प्रायशो **भिन्नं** निखिलजनगोष्ठीभ्यः विभक्ततयैव तिष्ठन्तम् 'विभिन्ना भ्रातरः' इत्यादिप्रयोगवशात् भिन्नशब्दस्य विभक्तार्थकता। **प्रायश इत्यनेन** योगानुभवदशाव्युदासः। **जनः** लोकसारङ्गादिः। **मदेन** स्वब्राह्मण्यदर्पेण **मातङ्गं मन्यते**। मातङ्गपोषणमात्रेण तज्जातीयमभिमत्याधिक्षिपतीत्यर्थः। वस्तुतो मातङ्गस्यापि महाभागवतस्याधिक्षेपो महापचाराय। किमुतायोनिजस्येत्यर्थः। अतश्च आत्मगुणविरहिणां जातिमात्रब्राह्मण्यमप्यकिञ्चित्करमिति प्रदर्शनायैव भगवता तद्दहनरूपं प्रायश्चित्तं लोकसारङ्गायोपदिष्टमिति द्रष्टव्यम्।

(8) एवं सततविष्णुद्वेषिमहावीरपाषण्डपरतयाऽप्यर्थः। **केनचित्**, 'ब्रह्मा शिवः शतमखः परमः स्वराडित्येतेऽपि यस्य महिमार्णवविप्रुषस्ते' इति भगवन्महिममहासमुद्रे एकजलबिन्दुतायं विलीनेन रुद्राख्यचेतनविशेषेण। कथमिदमवगम्यत इत्यत्र आह **दान्तेति**। **दान्ता** भगवता दमिता **कृत्या** रुद्रवरप्रसादलब्धा काशीराजप्रयुक्ता काचन पिशाचिका यस्य तथाविधेन, पौण्ड्रकवासुदेवसहायभूतस्वपितृवधामर्षितेन काशीराजेन द्वारकादलनार्थविमुक्तायां रुद्रवरप्रसादलब्धायां कस्याश्चित् पिशाचिकायां रुक्मिण्या साकमक्षक्रीडासक्तेन भगवता अनादरेण मुक्तः श्रीसुदर्शनः सद्य एव तां कृत्यां तं च काशीराजं तत्पुरीं वाराणसीं च युगपत् भस्मीचकारेति **श्रीभागवते। अतिमानुषस्तवेऽपि** "अक्षेषु सक्तमतिना च निरादरेण वाराणसी हरपुरी भवता विदग्धा" इति। बदरिकाश्रमे श्रीमन्नारायणेन सह युद्धमारभ्य इषीकास्त्रेण पराजयप्राप्तिवृत्तान्तः केवलमुनिजनमात्रविदित इति तमुपेक्ष्य प्रसिद्धकाशीपत्तनपरिप्लोषणवृत्तान्त उपक्षिप्त इति ध्येयम्। यद्वा कृत्यशब्द एवात्र 'काशीवृकान्धकशरासनबाणगङ्गासंभूतिनामकृतिसंवदनाद्युदन्त'परः। तथा च तत्तद्वृत्तान्तेषु दमितेनेत्यर्थः। तादृशपुरुषमधिकृत्येति यावत्। **कुलगोत्रविमर्दिनम्। कुलं** स्थानविशेषः श्री वैकुण्ठादिः **गोत्रं** नारायणादिनामविशेषः। गोत्रं कुलाख्ययोरिति मेदिनी। तद्विमर्दिनं तद्विपरिवर्तनलोलुपं वास्तवपरमपुरुषस्थानं तन्नाम च विपरिवर्त्य कैलासाख्यंस्थानं शंभ्वादि नाम च परमपुरुषस्यारोपयन्तं यद्वा विशेषेण **मर्दिनं** निरुक्तादिनिर्वचनमुपेक्ष्य एकाक्षरनिघण्ट्वादिप्रसिद्धैरप्रसिद्धैरक्षरार्थैः नारायणादिनामानि निर्दयं मर्दयन्तम् 'न हि नारायणादीनां नाम्नामन्यत्र संभवः। ऋते तमेकं पुरुषं वासुदेवं सनातनम्' त्यादिप्रमाणात्। अवधूय तेषां शिवपरत्वमाचक्षाणमित्यर्थः। तत्र हेतुमाह **मदेनेति** मीमांसापरिचयमदेन सर्वमप्यर्थं यथेच्छं साधयेमेति दुरभिनिवेशेन। **बहुधा भिन्नं** तत्तद्वादिभिः अनेकशः परिभूतं देशान्तरेषु पलायितं वा। 'भिक्षौ केचित् सुराजंभवमभिदधत' इति सूक्तिप्रकारेण लक्ष्मीपतेः पुण्डरीकाक्षस्य पीताम्बरस्य किरीटिनः पुरुषोत्तमस्य निखिलजगदाधिराज्यकथनं समुचितमुपेक्ष्य विरूपाक्षस्य भिक्षोः श्मशाननिलयस्य कपालिनः तद्व्यवस्थापयितुमुद्युञ्जानं दुराग्रहग्रहिलचित्तमित्यर्थः। **जनः** प्रामाणिकजनः **मातङ्गं मन्यते**—'यः पुत्रः पितरं द्वेष्टि तं विद्यादन्यरेतसम्। यस्तु नारायणं द्वेष्टि तं विद्यादन्त्यरेतसम्' इति प्रमाणानुसारात् चण्डालमेव जानातीत्यर्थः।

अत एव वेदान्तकौस्तुभे, नारायण परं ब्रह्मेत्यत्र नारायणात् परमिति विग्रहकथकं दुष्कथकं प्रति उक्तम, नारायणः परं ब्रह्मेति सविसर्गपाठः श्वपचस्य जिह्वां छिनत्तीति। अन्यत्र च, 'अहो भगवद्द्वेषाग्निदग्धस्य श्वपचस्यानिबद्धः प्रलापः' इत्यादिकम्। तथाच अनन्यपरनिर्बाधपरिपठ्यमानबहुश्रुति मन्वाद्याप्ततमानेकस्मृतिविततिं पञ्चरात्र श्रीरामायण हरिवंश भारत भागवत पाद्म वैष्णव नारदीय वाराह वामन मात्स्य गारुड मार्कण्डेय ब्रह्माण्ड ब्राह्म नारसिंह-इतिहाससार आथर्वणकल्प कल्पसूत्र शिल्पशास्त्र श्रीविष्णुधर्म आयुर्वेद योग ज्योतिष जितन्तादिसर्वाभ्युपगतशिष्टपरिगृहीतसुप्रसिद्धसात्त्विकोपबृंहणगणविरुद्ध-भ्रमविप्रलंभसंभवाशिष्टपरिग्रहबहुल-परस्परव्याहत-पूर्वापरविरुद्ध-प्रनष्टकोशबहुविधप्रक्षेपोद्धापादिशङ्काकलङ्कित-लिङ्गमाहात्म्यादिप्रश्नानुमिततन्मतदुरभिनिविष्टचित्तरञ्जनमात्रपर्यवसान – मात्स्यादिमध्यस्थपुराणोद्घुष्टतमोमूलकत्वनिर्धारणाप्रमाणतमपुराणान्तर्गतश्लोकगणोद्घोषेण मूढजनान् विमोहयतः, सावित्रीघटकसकारान्तनपुंसकभर्गश्शब्दस्य तेजोवाचिनः अकारान्ततादिपरिकल्पनक्लेशेन निजाव्युत्पत्तिकाष्ठामेवोद्घटयतः, हरिकेश इत्यत्र हरिकयोरीश इति विग्रहकरणेन पदपाठापरिज्ञानमेव प्रकाशयतः, एको हवै नारायण आसीन्न ब्रह्मा नेशान इत्याद्यनन्यपरनिर्बाधश्रुतीनां ब्रह्मेशानादिनिखिलेतरगलहस्तिकापदानपूर्वकं नारायणस्यैव कल्पाद्यकालिकावस्थानबोधिनीनाम् एकस्तिष्ठति विश्वात्मेति महाभारतोपबृंहणमवधीर्य धैर्यमात्रात् किमपि शशश्रृङ्गायमाणं परमशिवाभिधानं परब्रह्म परिकल्प्य सौबालबह्वृचबृहदारण्यकादिश्रुतिशतसिद्धम् अद्वारकं सद्वारकञ्च शिवस्य भगवत्सृज्यत्वकर्मवश्यत्वादिकमहृदयमेव कार्यशिवशिरसि समारोप्य पञ्चम्यन्तपरमशिवादिति-स्थूलपदाध्याहारतः सर्वलोकपरीहासगोचरतामापद्यमानस्य अनभीष्टब्रह्मान्तरं वा विपरिकल्प्य तस्य सर्वोत्कर्षस्थापनेन प्रसिद्धपुरुषोत्तमोत्कर्षापलापमात्रलोलुपतयाऽस्य जगत्पितृविदूषकस्य श्वपाकपदपट्टाभिषेक एव समुचितः प्रतिकार इति भावः।

(9) एवं परशुधरमुनिवरपरतयाऽप्यपरोऽर्थबोधः। केनचित् दान्तकल्पेन 'जटां धत्ते मूर्ध्ना परशुधनुषी बाहुशिखरं प्रकोष्ठे रौद्राक्षं वलयमिषुदण्डानपि करः' इत्युक्तयोगिवेषपरिग्रहेणेत्यर्थः। कुलगोत्रविमर्दिनं 'वारान् आसन्नविंशान् विशसितविषमक्षत्रजातिप्ररोहः' इत्युक्तसर्वक्षत्रकुलविमर्दनदीक्षितम्। यद्वा चरुव्यत्यासादिभिः ब्राह्मणक्षत्रियजातिसाङ्कर्येण एककुलगोत्ररहितमित्यर्थः। एकजातीयत्वेन निर्देशानर्हमिति यावत्। मदेन, 'रे काकुत्स्थाः कथं वः श्रुतिविषयमयं नागमद्भार्गवीयः' इत्यादिदुर्मदोक्त्या बहुधा भिन्नं बहुप्रकारेणोद्भ्रान्तहृदयं परशुरामं जनः मातङ्गं मन्यते। 'सैंहीं वृत्तिमधिष्ठितेऽपि हि मयि' 'सविधमुपसरन् समूलकाषंकषितनृपान्वयमद्य मां विनोषि। हरिमिव करिकुम्भकूटकोटिप्रकटकठोरनखाङ्कुरं कुरङ्गः' इति स्वस्य सिंहत्वमारोपयन्तमपि मध्यस्थजनो राघवसिंहेन दम्यमानं मत्तगजमेव मन्यत इत्यर्थः॥ ६॥

கேநசித் தாந்தக்ருத்யேந குலகோத்ரவிமர்திநம்(நா.)
மதேந பஹுதா பிந்நம் மாதங்கம் மந்யதே ஜந:—6

1 அடக்கமுள்ளவனின் செயலான ஜடைதரித்தல் ஸந்யாஸம் முதலான சில செயல் மாத்திரம் கொண்டு, குலம் கோத்ரம் எல்லாம் அழிக்கின்றவனும், உயர்ந்த குலம், சிறந்த பணம், மிகுந்த கல்வி யென்ற வாறுன மதத்தினுல் பிறரைவிட வேருனவனுமான புருஷனை சண்டால னென்று ஜனங்கள் நினைப்பர்.

2 தந்தத்தைச் சார்ந்த தொழிலால்-மண்ணைப் பெயர்ப்பதால் குல மலையையும் அழிக்கின்றதும் மதஜலம் வெகு அங்கங்களினின்று பெருக இருப்பதுமான ஜந்துவை யானை யென்பர். (மாதங்கம் - யானை.)

3 ராவணன்விஷயமாம். குலகோத்ர விமர்திநம் என்றவிடத்தில் குலக:, அத்ர, விமர்திநம் எனப் பிரிக்க. ராவணன் இந்த்ரிய நிக்ரஹம் செய்து தாந்தனென்னப்படுபவனின் வேஷமான ஸந்நியாஸத்துடன் வந்தவன். ஸீதைக்காக விமர்த்திநம்-(வி - பக்ஷி) ஜடாயுஸ்ஸை அழித்த வனும், மதம் பிடித்தவனுமான ராவணனை, குலக: - அவன் குலத்தை யடைந்த விபீஷணனும் சேரத் தகாதவனுக நினைத்திருப்பான்.

4 உதங்கரென்ற மஹர்ஷியின் வரலாறும் சொல்லப்படும். ஆச்வ மேதிக பர்வாவில் இரண்டு கதைகள் உள்ளன. ஒன்று உதங்கரைப் பற்றி யது. மற்றென்று மதனென்ற அஸுர விஷயம். இரண்டும் இந்த்ரனுக்கு ஸம்பந்தப்பட்டவை. அவற்றை இங்குச் சேர்க்க வேண்டும். கண்ண பிரான் பாரதப் போரை முடித்துக் கொணடு த்வாரகை எழுந்தருளும் போது நடுவிற் கண்ட உதங்கர், ஏன் ஸந்தியை சரியாய் நடத்தாமல் எல்லோரையும் கொன்றீர் என்று வெறுத்த போது பகவான் விச்வரூபம் காண்பித்து யுக்தாயுக்தம் நாமே அறிவோமென்று தெரிவிக்க பிறகு, மஹர்ஷி அடங்கி நமஸ்காரம் செய்து தாம் உள்ளவிடத்தில் தண்ணீர் கஷ்டமிருப்பதைப் போக்க வேண்டினர். வேண்டும்போது என்னை நினைப்பீராகில் நீர் கிடைக்குமென்று பகவான் மறுமொழி யளித்தான். ஒரு சமயம் இவர் பகவானை அதற்காக நினைத்தபோது பகவான் இந்திரனைக் கூப்பிட்டு மஹர்ஷிக்கு அமுதம் அளிக்க ஆஜ்ஞையிட்டான். இந்த்ரன் அளிக்க மனமிராமல் சண்டாள வேஷம் பூண்டுதோற்பையில் அமுதம் நிரப்பி, பல நாய்கள் சூழச் சென்று இதைப் பெற வேணு மென்றுன். மஹர்ஷி அவனைச் சண்டாளனுக நினைத்து மறுத்து விட்டார். பிறகு பகவான் மேகங்களையே ஏவி அவருக்குத் தீர்த்தம் குறையாதபடி செய்தான். இது உதங்க வரலாறு. மதவரலாருவது— இந்திரன் அச்விநி தேவதைகளுக்கு ஸோமரஸம் அளிக்க மறுத்தான். அவர்கள் ச்யவந மஹர்ஷியை சரணமடைந்தனர். அச்விநிகளோடு ஸோமரஸம் அருந்த இந்திரனுக்கு அவர் ஆஜ்ஞையிட்டார். இந்த்ரன் கேட்கவில்லை, உடனே ஹோமத்தினின்று மதன் என்ற அசுரனை

உண்டுபண்ணி இந்திரன் அஞ்சி சரணமடையும்படி செய்தார். அந்த மதனுக்கு வாய் கீழ்ப்புறம் பூமியிலும் மேற்புறம் வானத்திலுமாக மிகவும் நீண்டு பயங்கரமான பல பற்களோடு இருந்து இந்திரனுக்கு பயமுறுத்தியது என்பதாம். ஆக ச்லோகத்தின் பொருள் என்னவெனில்-

சித் - கண்ணன் அளித்த ஞானத்தால், தாந்த-அடக்கப்பட்ட உதங்கரின், க்ருத்யேந - ப்ரார்த்தனை யென்ற செயல் உடைய—ப்ரார்த்திக்கப் பட்ட, கேந - தண்ணீர் காரணமாக, ஜநः-உதங்கர், குலகோத்ர விமர்த்திநம் - குல மலையையும் பிளக்க வல்லனும், தாந்தக்ருத்யேந - கோரமான பற்களுடையதான செயல் உடைய, கேநசித் - ஒரு, மதேந - மதனென்ற அசுரனால், பஹுதா - பலவிதமாக, பிந்நம் - புத்தியில் பிளக்கப் பட்டவனுமான தேவேந்திரனை, மாதங்கம் - (அவன் தீர்த்தம் கொண்டு வந்தபோது) சண்டாளனாக. மந்யதே - எண்ணினார் என்றதாம்.

5 கொழுத்த உலோபிவிஷயமுமாம். தாந்தக்ருத்யம் (தந்தம் - பல்) பற்களால் கடகடவென்கை. அதனால் குலம் கோத்ரம் உள்ள பெரியோர்களான யாசகர்களை விரட்டுகிற மதம் பிடித்த தனவானைச் சண்டாளனாக ஸாதுஜநம் நினைக்கும்.

6 மதங்கனென்ற ஓர் அந்தணச் சிறுவன் கழுதை கட்டின வண்டியிலேறி கழுதையை மூக்கில் வ்ரணம் உண்டாம்படி அடித்து ஓட்டின போது அக் கழுதையின் தாய் அவனை அந்தணனல்லன் என்ன, அவன் அது மூலமாக, தன்னை, ப்ராஹ்மண ஸ்திரீயினிடம் ஓர் அமட்டனுக்குப் பிறந்தவனாகத் தெரிந்து, அந்தணனாவதற்காக உக்ரமான தவம் புரிந்தான். உக்ரமான தவம் இருந்தாலும் நீ சண்டாளனென்று இந்த்ராதிகள் அவனை நிந்தித்தனர். ஆக, தாந்தனுடைய, தவம் புரிகின்றவனுடைய செயலாலே குலகோத்ரம் அழித்து அந்தணன் ஆக முயன்றவனாய் மதம் ஏறின மதங்கனை தேவகணம் சண்டாளனாக நினைத்ததென்றதாயிற்று. இவ்வாறே கீழ் ஜாதியிலிருப்பவன் பாசுபத சாஸ்த்ரம் சொன்ன வழியாலோ, பாகவதனாய் விட்டால் சூத்ரனும் ப்ராஹ்மணனாவான் என்றாற் போன்ற புராணவாக்யங்களின் உண்மையான பொருளை யறியாமையாலோ தன் குலத்தைப் போக்க மதம் பிடித்தானேயாகில் அவன் சண்டாளனென்றே நல்லோர் நினைப்பரென்றும் பொதுவாகச் சொன்னதாம்.

7 சண்டாளன்போல் தோன்றினாலும் சிலரைச் சண்டாளராக நினைக்கலாகாதென்பதும் இதன் பொருளாம். எவ்வாறெனில்—அயோநிஜராய்ப் பிறந்ததால் குலகோத்ரமில்லாதவராய், தம்மை வளர்க்கும் சண்டாள வகுப்பினின்று தனியே வெகு வகையில் பிரிக்கபட்டவராய், தாந்தனாய் சமதமாதிகள் உடையனாயிருக்குமவன் செயலான பகவத் பஜனத்துடன் கூடியவருமான திருப்பாணாழ்வாரை, லோகஸாரங்க முனி போன்ற சாதாரண ஜனமே, மதத்தால் கர்வத்தால் சண்டாளனாக நினைக்கும்.

8 தான் தனியாகவும், பௌண்ட்ரக காசிராஜ பாணாஸுராதிகளுக்குத் துணையாகவும் செய்த போர் முதலியவற்றிலே எம்பெருமானாலே அடக்கப்பட்ட செயலையுடைய ஒருவனால்-அதாவது சிவனைக் கொண்டு-சிவனை ப்ரதான புருஷனாக்கி, அல்லது-தாந்த - அடக்கப்பட்ட சிவனின் - க்ருத்யேந - உபதேசமான, கேநசித் - சைவாகமத்தினால் எம்பெருமானின் (குலம்) இடம், பெயர் முதலானவற்றை இகழ்வாக தூஷித்து, விபரீத ஜ்ஞானத்தை மெய்ஞானமாகக் கருதி மதித்தவனை, அதனால் பலரால் பரிபவிக்கப்பட்டவனை கர்மசண்டாளனாக அறிஞர் நினைப்பர்.

9 தாந்தனான-சமதமகுணமுள்ளவனான யோகியின் செயலுடன் கூடியே, க்ஷத்ரியகுலம் கோத்ரமெல்லாம் அழிக்கின்றவரும் ஸ்ரீராமன் எதிரில் வந்து, 'த்வந்த்வயுத்தம் ப்ரதாஸ்யாமி' என்று மதம் பிடித்துப் பேசினவருமான பரசுராமரை, ராமனென்ற ரகு சிங்கத்தின் எதிரில் ஒரு யானையாக நினைப்பர். (மாதங்கம் - யானை.)

अनेकमुखपापात्मा छद्मसंदर्शिताश्रमः ।
कर्बुरप्रकृतिः कश्चित् कापेयकलहोचितः ॥ ७ ॥

पूर्वश्लोके यत्यादिवेषं परिगृह्य प्रतिनिवृत्तौ दोष उक्तः । अत्र च आश्रमधर्मान् अविमुच्यैव गूढपापरतानां रीतिं प्रतिक्षिपति **अनेके**ति । **अनेकमुखानि** अनेकप्रकाराणि यानि **पापानि** महापातकातिपातकोपपातकसंकलीकरणमलिनीकरणादीनि तानि **आत्मा** स्वरूपनिरूपकधर्मो यस्येति तथोक्तः । पापीत्येव व्यवह्रियमाण इत्यर्थः । तान्यात्मनि अन्तःकरणे यस्येति वा । सदा पापमेव मनसि चिन्तयन्नित्यर्थः । **छद्मना** कपटेन **संदर्शितः** प्रकाशितः **आश्रमः** ब्रह्मचर्यसन्न्यासादिः येन सः । **कर्बुरप्रकृतिः** कलुषस्वभावः । 'चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे' इत्यमरकोशेन कर्बुरशब्दस्य अनेकसंकीर्णपरत्वावसायात् रजस्तमस्साङ्कर्यबोधकता वा अनुसन्धेया । यद्वा, 'कर्बुरः पापरक्षसोः' इति मेदिनीकोशात् पापोपादानक इत्यर्थः । इहजन्मनि पापकृत्त्वं पापात्मेत्यनेन विवक्षितमिति न पौनरुक्त्यम् । **कश्चित्** गूढपापः पुरुषः **कापेयकलहोचितः** कपेर्भावः **कापेयम्** । कपिज्ञात्योर्ढगिति भावे ढक् । कपिधर्म इत्यर्थः । तथाच कपिस्वभावो यः **कलहः** अत्यल्पचापलजनितपरस्परतिरस्कारः तस्योचितः । कामक्रोधादिबाहुल्यात् वञ्चनार्थवेषपरिग्रहाच्च वित्तादिलोभेन तद्विघातकैः स्वदोषख्यापकैरसकृत् कलहायत इत्यर्थः । उक्तं हि–'काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् । व्यसनेन तु मूर्खाणां निद्रया कलहेन वा' इति । उक्तं हि दिवाधूर्तचरितम्, 'वेश्यावेश्मसु शीधुगन्धललनावक्त्रासवामोदितैर्नीत्वा निर्भरमन्मथोत्सवरसैरुन्निद्रचन्द्राः क्षपाः । सर्वज्ञा इति दीक्षिता इति चिरप्राप्ताग्निहोत्रा इति ब्रह्मज्ञा इति तापसा इति दिवा धूर्तैर्जगद्वञ्च्यते' इति ।

(2) अन्योऽपि रावणपरोऽर्थः—**अनेकमुखश्चासौ पापात्मा** चेति विग्रहात् दशमुखः पापस्वरूपश्चेत्यर्थः । **छद्मना** सीताहरणार्थकपटेन **संदर्शितः** प्रकाशितः **आश्रमः** यतिवेषः येन सः ।

कर्बुरप्रकृतिः राक्षसजातीयः। कर्बुरो यातुरक्षसी इत्यमरः। कश्चित् रावणः। कापेयकलहोचितः कपिसम्बन्धियुद्धार्ह इत्यर्थः।

(3) अन्योऽपि दुर्वादिपरः—अनेकमुखं विविधं यत् पापं तत्स्वरूपः। अनेन च, पापं प्रज्ञां नाशयतीत्युक्तः प्रज्ञाविरहः सूचितः। 'भक्त्या शास्त्राद्वेद्मि जनार्दनम्' इति शास्त्रज्ञानोपयोगिभगवद्भक्तिविरहोऽप्यनेन क्रोडीकृतः। अत एव भाषितं श्रीभाष्ये—'परमपुरुषवरणीयताहेतुगुणविशेषविरहिणाम् अनादिपापवासनादूषिताशेषशेमुषीकाणाम्' इत्यादि। अतश्चैवमर्थानवबोधेऽपि पुस्तकमात्रं सर्वदा अवलोकयति परवञ्चनार्थमित्याह छद्मेति। छद्मना कपटेन सन्दर्शिताश्रमो यस्य सः; सन्दर्शी पुस्तकावलोककः तस्य भावः सन्दर्शिता, तया यः श्रमः। अर्थबोधं विना व्यर्थावलोकनात् श्रम एव फलमिति भावः। परवञ्चनाय सदा पुस्तकद्रष्टेत्यर्थः। कर्बुरप्रकृतिः कलुषितहृदयः यथावस्थितैकार्थानवबोधात् सदा संशयकलुषितचित्तः, कश्चित् परमदुर्वादी कापेयकलहोचितः, उच्चैरुद्घुष्य जेतव्यमित्यादिशास्त्र(?)विषयो भवति। तत्त्वनिर्णयार्थं वादानवतारात् परवञ्चनार्थं जल्पारम्भे मध्यस्थस्याप्यवशीभावात् कपिकलहवत् दैवादेव निवारणमित्यर्थः। उच्यते हि—'हंहो सभ्यान् असभ्यस्थपुटमुखपुटा दुर्जना निर्जयन्ति' इति। एवम् "अतत्तदिति वा न तत्तदिति वा वृथोद्यत्कथाकनत्कथककत्थनक्रमविकल्पितप्रक्रमा। जगद्विपरिवर्तिनी जनपदेषु जोघुष्यते कुतर्कशतशर्करानिकरकर्कशा पद्धतिः" इति च।

(4) यादवप्रकाशपरोऽपि—अनेकमुखं यत् पापं, अचेतनगतः स्वरूपविकारः चेतनगतस्वभावविकारश्च, तत् आत्मनि परमात्मनि यस्य सः। षष्ठ्यर्थोऽभिमतत्वम्, 'मीमांसकस्य वायुः प्रत्यक्षः' इतिवत्। तथा च चिदचिद्रूपजगतः सद्रूपब्रह्मपरिणामत्वोक्त्या जगद्गतदोषाणां परमात्मन्येव पर्यवसानमित्याशयः। यद्वा अनेनैव मुखेन पापात्मा पापस्वरूप इत्यर्थः। अत एव पापीयान् पक्ष इति वेदार्थसंग्रहे विदूषितोऽयं पक्षः। अतश्च ब्रह्मण एव स्वरूपनाशादिपर्यवसानान्नास्तिकोऽप्ययमास्तिकपदमभिनयतीत्याह छद्मेति। छद्मना-वञ्चनाय सन्दर्शितः आश्रमः यतिवेषः त्रिदण्डधारणादिः येन सः। "असमीक्षितदशापरित्यक्तब्रह्मसूत्रैः यादवप्रकाशैः समीक्ष्य सञ्जातानुशयैः" इत्यादिशतदूषणीसूक्त्या प्रामाणिकवदुपवीतादिधारणभावनात् कपटो व्यज्यत इत्यर्थः। यद्वा सन्दर्शितः यतिधर्मसमुच्चये प्रपञ्चित आश्रमः यत्याश्रमधर्मः येन सः। आश्रमस्वीकार इत्यादाविव आश्रमशब्दो यत्याश्रमपर इति भावः। वस्तुनो नास्तिकस्यैतादृशग्रन्थनिर्माणं कपटायैवेत्याशयः। कर्बुरप्रकृतिः आसुरप्रकृतिः, 'कर्बुरं हेम्न्यघे तोये दैत्ये ना शबळे त्रिषु' इति रत्नमाला। 'नैवासुरप्रकृतयः प्रभवन्ति बोद्धुम्' इत्युक्तप्रकृतिविशेषवत्त्वात् यथावस्थितार्थावबोधाक्षमतया श्रुतीनामपार्थकरणशील इत्यर्थः। कश्चित् यादवप्रकाशः। कापेयः कपिशब्दसम्बन्धी यः कलहः असङ्गतार्थकथनेन श्रीभाष्यकारमनःखेदजननरूपः, तस्योचितः। 'तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी इत्यत्र सूर्यपरस्य कपिशब्दस्य वानरपरत्वकथनादेव परित्यक्तः श्रीभाष्कारैरिति कथा प्राचाम्।

(5) एवं शनिग्रहपरोऽपि कश्चित्—अनेकमुखेन बहुप्रकारेण पापात्मा पापफलप्रदायि-

तात्स्वभावः, 'आत्मा जीवे धृतौ देहे स्वभावे परमात्मनि' इति वैजयन्ती। भूयसांन्यायेन पापफलदानमेवास्य स्वभाव इति निश्चितेऽपि क्वचित् छद्मना कपटेन सन्दर्शितः आश्रमः यत्याश्रमरूपमोक्षोपयोगिशुभफलप्रदानं येन तथोक्तः। उक्तं हि—"नवमस्थाने सौरो यदि स्थितः सर्वदर्शनविमुक्तः। नरनाथयोगजातो नृपोऽपि दीक्षान्वितो भवति" इति शनेरेकस्यैव सन्न्यासाश्रमदायित्वम्। अत्र नरनाथेत्यादिसन्दर्भवशात् राज्यभ्रंशादिकरण एव शनेः कुतूहलम्, न तु मोक्षप्रदानादावित्यर्थसूचनात् छद्मेत्युक्तम्। **कर्बुरप्रकृतिः** पापारम्भकः आसुरप्रकृतिर्वा, हिंसैकस्वभावत्वात्। **कश्चित्** शनिः। **कपेः** सूर्यस्य सम्बन्धी यः **कलहः** स्वपित्रा सूर्येण सह सदा शत्रुभावः। उक्तं हि, 'सौरेः सूर्यसितावरी' इति। कं जलं पिबतीति **कपिः** सूर्यः। कपयोऽर्कभवानरा इति च रत्नमाला।

(6) अन्योऽपि मेघपरः—**अनेकमुखश**ब्देन सर्वतोमुखशब्दार्थो जलं विवक्षितम्। तत् पिबतीत्य**नेकमुखपः**। अनेकमुखेन समुद्रजलं पिबतीति वा तदर्थपरता। अत एव **आपात्मा** जलसङ्घातस्वरूपः। अपां समूह **आपम्**। अनेकमुखपश्चासौ आपात्मा चेति कर्मधारयः। **छद्मना** मायया, सन्दर्शिताः आश्रमाः ऋष्याश्रमोद्यानादिविविधाकारा गन्धर्वनगरशब्दिताः येन तथोक्तः, 'गगन इव गन्धर्वनगरम्' इत्युक्तत्वात्। शान्तमिदमाश्रमपदमिति निर्देशानुगुण्येन विविक्तशीतत्वादिगुणद्योतनात् गन्धर्वनगरेऽप्याश्रमसाधर्म्यमभिहितमिति ध्येयम्। **कर्बुराणां** जलानां **प्रकृतिः** स्रष्टा जनिकर्तुः प्रकृतिरिति सूत्रप्रयोगात् प्रकृतिशब्दस्य उपादानपरता स्पष्टा। **कश्चित्** मेघः। **कपीनां** गजानां सम्बन्धी, 'कपयोऽर्कभवानराः' इत्युक्तम्। यः **कलहः** स्वकरैर्मेघाकर्षणरूपः, तस्य उचितः। जलरुचीनां दिङ्नागानां मेर्वादिसञ्चरिष्णूनां मेघाकर्षणपेषणादिकुतूहलसद्भावादिति भावः। उक्तं हि मेघसन्देशे, 'अद्रेःशृङ्गं हरति पवनः किंस्विदित्युन्मुखीभिर्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः। स्थानादस्मात् सरसनिचुळादुत्पतोदङ्मुखः खं दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान्॥' इति। यद्वा **कपिः** सूर्यः तत्सम्बन्धि**कलहश्च** तदाच्छादनमेव, तदानीं सूर्यस्यापि कोपोदयस्य कविना वर्णितत्वात्। तथा हि तत्रैव, 'प्रालेयास्रं कमलवदनात् सोऽपि हर्तुं नलिन्याः प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः' इति। वस्तुतः सूर्याच्छादने व्रीहिशोषायुत्सुकानामाक्रोशोदयः प्रात्यक्षिक एवेति भावः।

(7) एवं वामनभूमिकापरोऽपि—अनेकमुखं पातीत्यनेकमुखपः, देवान् मनुष्यांश्च साक्षात् तच्छत्रुनिग्रहाद्वा अदुष्टशत्रोः वञ्चनादिमार्गेण निराकरणाद्वा रक्षति भगवानिति प्रसिद्धमेव। उच्यते हि, "दैत्यौदार्येन्द्रयाच्नाविहतिमपनयन् वामनोऽर्थी त्वमासीः" इति। **अपात्मा** अपगतशरीरः, 'अशरीरं शरीरेषु' 'न भूतसङ्घसंस्थानो देहोऽस्य परमात्मनः' इत्याद्युक्तत्वात्। **छद्मने** कपटाय सन्दर्शितः **आश्रमः** ब्रह्मचर्यरूपो येन तथोक्तः। देवेन्द्रराज्यमपहरतोऽप्यत्युदारस्य वधादिनिग्रहासम्भवात् याच्ञयैव तत् सम्पादयितव्यमिति कपटवटुवेषः परिगृहीत इत्यर्थः। 'त्वन्निर्मिता जठरगा च तव त्रिलोकी किं भिक्षणादियमृते भवता दुरापा' इति श्लोकेनापि कपटभावना व्यज्यत इति बोद्धव्यम्। **कर्बुरप्रकृतिः** विचित्रस्वभावः, अतिवामनस्य सद्य एव सर्वोन्नताकारावलम्बनात्। **कश्चित्** वामनः, **कापेयकलहः**

भत्यल्पव्यापारजनितः स्वाश्रितस्य प्रह्लादस्यापि अतृप्तिजनकः बलिपक्षीयैः कलहः, तस्योचितः ; भगवताप्येवं वञ्चनं कृतमिति सर्वत आक्रोशोदयादिति ।

(8) एवं प्राकृताण्डकोशपरोऽपि—अनेकमुखं यत् पापं पुण्यरूपं पापरूपं च येषां [ते ?]। पुण्यस्यापि बन्धकत्वाविशेषात् तथात्वम्, तद्विशिष्टा आत्मानः जीवाः यस्मिन्; पुण्यपापरूपकर्मविशिष्टजीवात्मगणनिबिड इत्यर्थः । छद्मना स्वमायया सन्दर्शितः अश्रमः श्रमविरहः येन सः, प्रत्यक्षदुःखात्मकपदार्थेष्वपि स्वमायया भोग्यताबुद्धिमुत्पाद्य सुखभ्रमजनक इत्यर्थः । स्वविषयायाश्च भोग्यबुद्धेर्जननीमिति ह्युक्तम् । कर्बुरप्रकृतिः तदण्डमभवद्धैममित्युक्तसुवर्णगोळस्वरूपः । हिरण्यं हेम कर्बुरमित्यमरः। कश्चित् अण्डकोशः[1] । कापेयः सूर्यसम्बन्धी यः कलहः तत्सादृश्यापादनरूप, तस्योचितः ; सहस्रांशुसमप्रभ इत्युक्तत्वात । 'कलहायितकुन्तलं कलापैः' इत्यादौ सादृश्यापादनेऽपि कलहशब्दः प्रयुक्त इति भावः । यद्वा कर्बुरा अजामेकां लोहितशुक्लकृष्णामित्युक्तक्रमेण चित्रवर्णा प्रकृतिः मूलप्रकृतिः यस्येति । प्रकृतिमण्डलान्तर्गत इत्यर्थः । कापेयकलहोचितः सर्वरक्षकेण भगवता सह 'त्वं मेऽहं मे' इत्यादिकलहकरणस्य समुचितस्थानमित्यर्थः ।

(9) एवं सुमेरुपरतयापि—अनेकमुखा ये पापाः असुरराक्षसादयः ते आत्मनि शरीरे यस्य, 'आत्मा जीवे धृतौ देहे' इति कोशात् । 'मेरोरधस्तात्तिष्ठन्ति निखिला दैत्यदानवाः' इति पुराणप्रसिद्धेः । अच्छद्मनां निष्कपटानां ऋषीणां सन्दर्शिताः आश्रमा तद्वासयोग्याः पर्णशालादयः येन सः कर्बुरप्रकृतिः सुवर्णारब्धशरीरः कश्चित् सुमेरुः कपेः दिग्गजस्य संबन्धी यः कलहः गण्डदन्तादिभिः भेदनरूपः तस्य उचितः । वक्ष्यते हि 'विबुधमहिते मेरावैरावणः करटी मुहुः कषतु करटं कण्डूलं स्वं क्षरन्मदकर्दमम् । भजतु च तटक्रीडां पीडाभिसंधिः' इति । कपीनां दिग्गजानां वनगजानाञ्च परस्परकलहोचित इति वा । तदप्युक्तम्, 'स्पर्धन्तां सह जातिकुञ्जरतया दिक्कुञ्जरैः कुञ्जराः' इति ।

(10) एवमुतथ्यवृत्तान्तपरोऽप्यर्थः—तथाह्यानुशासनिके-उतथ्यो नाम कश्चिन्महर्षिः भद्रां नाम सोमस्य कन्यामुद्वह्य गार्हस्थ्ये तिष्ठन् ताञ्च कदाचित् यमुनायां क्रीडन्तीं पूर्वानुरक्तेन वरुणेनापहृत्य स्वपुरीं प्रापय्य षट्सहस्रशतह्रदे यथेच्छमनुभुक्तां नारदमुखादुपश्रुत्य पुनश्च नारदमेव स्वभार्यामोचनाय वरुणान्तिकं संप्रेष्य, नाहमेनामुत्सृजामि पूर्वानुरक्तः प्रियतमामिति वरुणेन प्रतिसन्दिष्टः क्रोधप्रज्वलिताननः स्वतेजसा निखिलजगत्स्थितनदनदीसमुद्रादिनिखिलजलजातमपि निपीय अन्ततः षट्सहस्रशतह्रदमपि मरुकान्तारीचकार । अतः सर्वेषु स्ववासगेहेषु संशोषितेषु, जगति च बाध्यमाने सन्तापोष्मणा, वायावपि

---

1 छान्दोग्ये 3. 19. "आदित्योब्रह्मेत्यादेश" इत्यारभ्य "आण्डंनिरवर्तत. तन्निरभिद्यत । ते आण्डकपाले रजतञ्च सुवर्णञ्चाभवताम । रजतं पृथिवी, सुवर्णं द्यौः । अथ यज्जायत स आदित्यः । तं जायमानं घोषा उलूलवोऽनूदतिष्ठन्" इति । उलूलवः—उरुरवाः । अत्र अण्डकोशः सुवर्णरजतप्रकृतिः सूर्योदयतन्मूलपक्ष्यादिघोषात्मककलहोचित इत्यर्थो लभ्यते ।

यत्र कुत्रचिन्निलीयमाने, वरुणस्तामादाय भद्रां सद्य एव शरणमुपजगाम महर्षिमिति । अतश्चायमर्थः— अनेकमुखं जलं पिबतीत्यनेकमुखपः आपात्मा जलसंघातभरितविग्रहः छद्मना स्वमायया संदर्शितः अश्रमः सर्वजलपानेऽपि परिश्रान्त्यभावः येन तथोक्तः । अश्रमादेव सकलं जलं पिबन्नित्यर्थः । कर्बुरप्रकृतिः परभुक्तभार्यापेक्षणेन क्रोधातिशयवशीभावेन च रजस्तमःकलुषस्वभावः कश्चित् उतथ्यः कापेयकलहः के जले विषये अपेयमिति यः कलहः तस्य उचितः निखिलजलविलयात् सर्वेपि कलहायन्त इत्यर्थः । यद्वा कपिकलहः वालिसुग्रीवकलहः परस्परभार्यापकर्षणप्रयुक्तः तस्योचितः । परभुक्तभार्यार्थं जगद्विध्वंसनारम्भणादिति भावः ।

(11) एवं गायत्रीपरतया तदभिमन्त्रिताघ्र्यजलपरतया चार्थः—कर्बुरप्रकृतिः प्रातर्मध्याह्नसायंकालभेदेन रक्तश्वेतकृष्णरूपवर्णत्रयविशिष्टः अन्यत्र जलरूपः । अनेकमुखस्सन् मुक्ताविद्रुमहेमनीलधवळच्छायैर्मुखैरित्युक्तमुखपञ्चकविशिष्टस्सन्, पापात्मनां प्रागुपनयनात् यथेच्छपापचारिणां अच्छद्म निष्कपटं संदर्शितः आश्रमः ब्रह्मचर्यरूपः येन सः । अर्घ्यजलपक्षे अनेकमुखस्सन् शतमुखशब्दितवज्रायुधरूपस्सन् इत्यर्थः । अन्यत् पूर्ववत् । श्रूयते हि—'गायत्रियाऽभिमन्त्रिता आप ऊर्ध्वं विक्षिपन्ति ता एता आपो वज्रीभूत्वा' इति । कश्चित् पदार्थः कापेयः सूर्यसम्बन्धी यः कलहः मन्देहनामकरक्षोयूथकृतः तस्य उचितः प्रतीकार इत्यर्थः । 'मशकाय धूपः' इतिवत् कलहशब्दस्तन्निवारणरो वा । अतो गायत्री तदभिमन्त्रिताघ्र्यजलं वा सूर्यकलहनिवारणोपाय इत्यर्थः । तथा च श्रुतम्—'तानि हवा एतानि रक्षांसि गायत्रियाभिमन्त्रितेनाम्भसा शाम्यन्ति' इति ॥ ७ ॥

அநேகமுகபாபாத்மா ச்சத்ம ஸந்தர்சிதாச்ரம:-
கர்புரப்ரக்ருதி: கச்சித் காபேயகலஹோசித:—7

1 பலமுகமான பாபங்களையே செய்வதால் அவையே வடிவானவன் கபடமாக அந்தந்த ஆச்ரம தர்மங்களை எண்பிக்கிறவன், ஸத்வரஜஸ் தமோகுணங்களின் மாறுபாட்டால் ஒரே விதமாகாத ஸ்வபாவமுடைய வன் குரங்குக்கு உரிய காமக்ரோத கலஹத்திற்கு அதிகாரியாகிறான்.

2 பல(பத்து)முகங்களையுடைய பாபியான ராவணன் கபடமாக ஸந்நியாஸியாச்ரமத்தை ஏற்றுக் கொண்டவன் காமத்தினாலே கலங்கிய மனம் உடையவன் முடிவில் வாநரங்கள் நடத்திய போருக்கு ஆளானான்.

3 பலவிதமான பாபமூலமான வாதங்களை யுடையவன் கபடமாக ஆதாரங்களைக் காண்பிப்பதில் ச்ரமம் கொண்டவன் தத்துவஞான நிலை யற்றவன் முடிவில் குரங்கைப் போல் கத்தியே வெல்லப் பார்ப்பான்.

4 யாதவப்ரகாசரென்கிற அத்வைதி, ப்ரஹ்மமே அசேதநமாகவும் ஜீவர்களாகவும் மாறுகின்றதென்பாராய் அனேகவிதமான தோஷங் களைப் பரமாத்மாவினிடமே இசைந்தவர் முதலில் பலரால் கபடமாகக் காண்பிக்கப்பட்ட ஸந்நியாஸாச்ரமம் உடையராய், (அதாவது தப்பான

ஏகதண்டி ஸந்நியாஸத்தை முதலில் கொண்டவராய்) உபநிஷத்தில் 'கப்யாஸம் புண்டரீகம் என்கிற விடத்திலே கபிசப்தத்தின் பொருள்வி ஷயமான கலஹத்திற்கு ஆளாகி, ஸ்ரீபாஷ்யகாரரை த்ரோஹிக்கும் மனம் உடையராகி (முடிவில் ஸ்ரீபாஷ்யகாரருக்கு பவ்யப்பட்டு) அச்சத்ம ஸந்தர் சிதாச்ரம:-மாயையின்றி உண்மையான ஆச்ரமத்தை-த்ரிதண்டி ஸந்யா ஸத்தைக் கொண்டு, யதிதர்ம ஸமுச்சயமென்ற க்ரந்தம் எழுதி அதனு லும் அதனை விளங்கக் காண்பித்தவரானுர்-ஆனுலும் முதலில் வேறுவித மான கொள்கையால் கலஹத்திற்கு ஆளாயிருந்தார். एतदनुरोधेन एवं योजना स्यात्। अन्ततः अच्छद्मसंदर्शिताश्रमः—यथावत् यतिधर्मसमुच्चये स्थापिताश्रमतत्त्वः यादवप्रकाश-एव प्रथमतः अनेकमुखचापाश्रयतया परमात्मस्थापकः कपिशब्दार्थ विषयकलहप्रवृत्तः श्रीभगवद्रामानुजविषये गङ्गायात्राव्याजेनानर्थचिन्तनात् कर्बुर आसीदिति। सर्वथा तद्दूषणं नातीवोचितमिति च शतदूषण्यादितोऽपि ज्ञेयम्।

5 சனியென்கிற க்ரஹத்தைக் கூறுவதுமாம். பலவித பாபங்களைச் செய்விப்பவன், ஒன்பதாவது வீட்டில் இருந்தால் அரசனுக்கும் ராஜ்ய ப்ரம்சம் செய்விப்பதற்காகக் கபடமாக ஸந்நியாஸத்தைப் பெறுவிப்ப வன், பாபக்ரஹம், கபி என்ற சூர்யனுடன் பகையுள்ளவன்.

6 மேகத்தையும் கூறும். ஸர்வதோமுகமென்று நீருக்குப் பெயர். அதே அனேக முகமெனப்படுகிறது. (கடலினின்று) நீரை உட்கொள்வ தால் அநேகமுகபம். ஜலமயமாயிருப்பதால் ஆபாத்மா. தன் உருவில் கபடமாக ஆச்ரமம், வீடு, நகரம், ப்ராணி முதலிய (கந்தர்வ நகரமென் கிற) தோற்றங்களைச் செய்யும். புகை தீ நீர் காற்று எல்லாமாய் கலப்பான உருவமுடையது. சூர்யனை மறைத்துச் செல்லும். கபி-சூர்யன்.

7 வாமநாவதார விஷயம் - அநேகமுகர்கள்-பலவிதமான தேவா சுரர்கள். அவர்களை யெல்லோரையும் காப்பவன் அநேகமுகபன், அபா த்மா - ப்ராக்ருதமான சரீரமற்றவன். கபடமாக ப்ரஹ்மசாரிவேஷம் கொண்டவன், விசித்ரமான ஸ்வபாவமுடையன், கபி ஸ்வபாவமான நமுசி முதலானுரின் கலஹத்திற்கு இடமளித்தான்.

8 ப்ரஹ்மாண்டத்தைச் சொல்வதுமாம்—பாபம் பலவிதம்; புண்ய மும் உண்மையில் பாபமாகிற படியால். பலவிதமான பாபம் செய்யும் ஸம்ஸாரிகளுக்கு இடமாய் உண்மையில் துக்க மயமாயிருந்தாலும் கபட மாக அச்ரமத்தை-களைப்பு துக்கமெல்லாமில்லாமையை - ஸுகமாயிருப் பதை ப்ரஜைகளுக்குத் தன் விஷயங்களைக் கொண்டு காண்பிப்பதாய், எல்லா தோஷங்களும் கலந்ததாய், கபி என்ற சூர்யமண்டலம் போலே ப்ரகாசமாயிருக்கும் ப்ரஹ்மாண்டம். கலஹமாவது போட்டி; ஸாம்யம்.

9 மேருமலையுமாம். தாழ்வரையில் பல அசுரர்களைக் கொண்டது. அச்சத்ம - கபடமில்லாமல் ரிஷிகளுக்கு ஆச்ரமங்களைக் காண்பிப்பது, கர்புரமாவது பொன். பொன்மயமாகிறது, கபிகள் - யானைகள் - திக்கஜங் களால் தந்தங்களால் பெயர்க்கப்படும் இடங்கள் உள்ளது.

10 முதல் பத்ததியில் ஸ்த்தலபரிசேஷித என்ற (7) ச்லோகத்தில் உதத்ய ரிஷியின் வரலாறு சொல்லப்பட்டிருப்பது காண்க. சதஹ்ரதம் முதலான மடுவின் ஜலத்தையும் பருகி ஆபம்-ஜலமெல்லாம் ஆத்மாவில்-வயிற்றில் உள்ளவராய், அதனால் அச்ரமத்தை-ச்ரமமில்லாமையைக்காண்பித்தவராய், தம் பார்யையை வருணனிடமிருந்து கொள்ள கலங்கிய மனம் உடையராய், கம்-ஜலம்-அபேயம். இப்படி குடிக்கத் தகாததென்று பிறர் செய்யும் கலஹத்திற்கு ஆளானார்.

11 காயத்ரீ விஷயம் - காயத்ரி தேவதை முத்து பவளம் முதலான பல வர்ணமான முகங்களையுடையது. தர்மாநுஷ்டானமில்லாமல் பாபியாம் வர்ணங்களுக்கு (அச்சத்ம) கபடமில்லாமல் ப்ரஹ்மசர்யாச்ரமத்தைக் காண்பித்து, சூர்ய ஸம்பந்தியாய் மந்தேஹாசுரர்கள் செய்த கலஹத்திற்குத் தக்க பரிஹாரமாயிருக்கும் காயத்ரி. இப்படியே அர்க்க்ய ப்ரதானத்தையும் பொருளாக்கலாம். அதுவும் - அனேக முகபம்-ஜலத்தை உட்கொள்வதாம். ('பாபாத்மாச்சத்ம' என்று பூர்வார்த்தம் ஒரே பதம்.)

छलिनं सत्कथानर्हं स्वात्मोपहतजातिकम् ।
न निगृह्णाति यः काले सोऽपि सभ्यैर्निगृह्यते ॥ ८ ॥

एवं खलानां विधाभेदमुक्त्वा तैः संवासादिकं सुदूरपरिहार्यमिति स्थापयिष्यन्, 'दूरेऽस्तु संवासः ; यः खलु खलानां निग्रहशक्तोऽपि तान् न निगृह्णीयात्, सोपि 'तत्संयोगी च पञ्चमः' इति न्यायेन निग्रहीतव्य एव' इत्याह **छलिन**मिति ।

(1) नित्ययोगे मत्वर्थीयः । कपटैकजीवितमित्यर्थः । सदा करणत्रयवैरूप्यशालिनमिति यावत् । **सत्कथायाः** साधुकथायाः सतां कथाया वा **अनर्हं** सत्कथाप्रस्तावसमये स्मरणस्याप्यनर्हमित्यर्थः । यद्वा असूयया सत्पुरुषकथाश्रवणमप्यसहमानमित्यर्थः । उक्तं हि, "मृगमीनसज्जनानां तृणजलसन्तोषविहितवृत्तीनाम् । लुब्धकधीवरपिशुनाः निष्कारणमेव वैरिणो जगति" इति । **स्वात्मोपहतजातिकं** स्वस्य आत्मा स्वात्मा **स्व**शब्दो देहविशिष्टजीवात्मपरः । **आत्म**शब्दः शरीरपरः अन्तःकरणपरो वा । **तेन उपहता** विनाशिता **जातिः** ब्राह्मण्यादिः यस्य तम् । जातिभ्रंशकरमहादोषदूषितान्तःकरणमित्यर्थः । तथा च मनुः, 'शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिम् । समुत्पाद्य सुतं तस्यां ब्राह्मण्यादेव हीयते' इति । तथाविधं **काले** प्राप्तकाले **यो न निगृह्णाति** यजनयाजनादिसमये पङ्क्तिभोजनादौ वा यो न निवर्तयति, **सोऽपि** यजमानोऽपि **सभ्यैः** यागार्थं भोजनार्थं चागतैः महाजनसंघैः **निगृह्यते** परिह्रियते । **काल** इत्यनेन महोत्सवादिसङ्कव्युदासः । अत एवोच्यते, 'त्यज दुर्जनसंसर्गं भज साधुसमागमम्' इत्यादि । तदीयपर्यन्तत्यागोऽत्र विवक्षित इति भावः । यद्वा **स्वात्मे**ति पृथक्पदम् । एतादृशं पापशीलं यः स्वात्मा न निगृह्णाति । 'स्वतः सतां ह्रीः परतोपि गुर्वी' इति न्यायेन स्वस्मादेव विलज्ज्य यस्तादृश-

कृत्यं न निवारयति, सः **सभ्यैः** अन्यैर्महाजनैः **अपि निगृह्यते** निगृह्यते किमित्यर्थः । अपि दृष्टः शिशुः' इत्यादाविव **अपि**शब्दः किमर्थकः । स्वबुद्धिपूर्वकत्याग एव श्लाघ्यतम इत्यर्थः ।

(2) अन्योऽपि नैयायिकादिसमयसिद्धोऽर्थः । तथा हि—कथा तावत् त्रिविधा । वादजल्पवितण्डाभेदात् । तत्र तत्त्वनिर्णयार्थकथा वादः ; विजयार्थकथा जल्पः ; स्वपक्षस्थापनाहीना परपक्षविदळनमात्रप्रयोजना वितण्डा । एवं त्रिधा विभक्तायाः छलजातिनिग्रहस्थानादिकं दोषः । तत्र **छलं** नाम अर्थान्तराभिप्रायेण प्रयुक्तस्यान्यार्थं परिकल्प्य दूषणम् । स्वव्याघातकमुत्तरं **जातिः ।** वादिनोऽपजयहेतु**र्निग्रहस्थानम् ।** तच्च प्रतिज्ञाहान्यादिकमनेकधा विभज्यते । तत्र पर्यनुयोज्योपेक्षणं नामैकं निग्रहस्थानम् । तच्च परगतनिग्रहस्थानस्य प्राप्तकालेऽनुद्भावनमिति । तथा चायमर्थः—**छलिनं** छलोक्तिमन्तम्, अत एव **सत्कथानर्हम् ।** कथायां सत्त्वं नाम छलादिरहितत्वे सति तत्त्वनिर्णयैकफलत्वम् । तादृशकथाया **अनर्हं** वितण्डादिनिरतमित्यर्थः । स्वात्मना **उपहता** व्याहता जातिः यस्य सः ; स्वव्याघातकजात्युत्तरवन्तमिति फलितम् । यद्वा स्वस्य **आत्मा** अन्तःकरणं स्वसिद्धान्त इत्यर्थः ; तेन व्याहतं स्वकीयमुत्तरमिति स्वसिद्धान्तविरुद्धोत्तरकारिणमिति फलितम् । तथाविधं प्रतिवादिनं **यो** वादी **काले** वादसमये **न निगृह्णाति** निग्रहहेतुभूतं छलजातिनिग्रहस्थानाद्युद्भावनं न करोति, **सोपि** तादृशनिग्रहस्थानानुद्भावकोऽपि **सभ्यैः** तादृशवादसभास्थैः मध्यस्थादिभिः पण्डितैः निगृह्यते । 'त्वमेवाद्य निगृहीतः, परकीयनिग्रहस्थानानुद्भावनात्' इति [तं प्रति ?] कथयन्तीत्यर्थः ।

(3) एवं पितृगुर्वादिपरोप्यर्थः । जातिभ्रंशकरपापैर्जुष्टं दुष्टकुमारशिष्यादिकं तत्तत्काले यः पिता गुर्वा **न निगृह्णाति** न वारयति, सोपि सभ्यैः प्रायश्चित्तविधानार्थं संगतैः पारिषदैः निगृह्यते । तदर्थप्रायश्चित्तगोचरीक्रियते । 'अनाचाररतान् दृष्ट्वा यः शक्तो न निवारयेत् । तत्पापादर्धमाप्नोति यदोपेक्षापरायणः' इति स्मृतिवचनादिति भावः ।

(4) एवं महाजननियमितराजपरोपि । सन्ति हि क्वचिद्राज्येषु प्रजानियमिता राजानः । तत्र प्रजासंघैः व्यवस्थापितस्य राज्ञः वञ्चनार्थकार्यकरणपरस्त्रीबलात्कारादिप्रबलतरानर्थकारिणां तत्तत्कालेष्वशिक्षणे सति सोपि राजा सभ्यैः स्वनियामकैः पारिषदैः निगृह्यते । राज्याधिकारान्निवर्त्यते इत्यर्थः । तं नृपं परिहृत्यान्यो जनो नृपतया स्थाप्यत इति यावत् ।

(5) एवमन्यो दुर्ज्यौतिषिकपरः । **छलिनं** केवलकपटशालिनं ज्यौतिषज्ञानशून्यत्वेपि तदभिज्ञवत् नाटयमानं **सत्कथानर्हं** नक्षत्रकथाया अनर्हं नक्षत्रगणनामप्यविजानन्तं **स्वात्मना** स्वमनसा, केवलस्वबुद्धिमात्रेणेत्यर्थः । **उपहतानि** विरुद्धं लिखितानि **जातिकानि** जातोद्देशेन कृतानि जातकशब्दितानि येन तथाविधम् । यथास्वबुद्धि किञ्चिज्जातकं विलिख्य समर्पयन्तमित्यर्थः । जातशब्दात् 'तस्य निमित्तम्' इति विहितः ठञ्वा तस्मै प्रभवतीति विहितः ठञ् वा कार्यः । निमित्तं च शुभाशुभसंबन्ध एव । तद्बोधकशब्दपर्यन्तमिह विवक्षणीयम् । **जातकशब्दस्तु तदपभ्रंश एवे**ति ध्येयम् । तादृशं ज्यौतिषिकं

यः पुमान् काले विवाहोपनयनादिशुभमुहूर्तदर्शनावसरे **न निगृह्णाति** न दूरीकरोति, सोऽपि **सभ्यैः** तद्बन्धुजनसंघैः **निगृह्यते,** अधिक्षिप्यते । मुहूर्तदोषनिरूपणेन विदूष्यत इति यावत् ।

(6) एवं कर्णपरोप्यर्थः । **छलिनं** जननमारभ्य वञ्चनमार्गैकप्रवणं जतुगृहनिर्माणद्यूतकपटादि-सहायभूतत्वात्, **सत्कथानर्हं** दुष्टचतुष्टयान्तर्भूततया सद्व्यपदेशानर्हम् । **स्वात्मना** स्वदेहेन । तत्पोषणे-नेत्यर्थः । उपहता **जातिः** क्षत्रियत्वादिः यस्य तथाविधम् । सूतपरिपोषणात् सूतपुत्र इति व्यवह्रिय-माणमित्यर्थः । **यः** अर्जुनः **काले** ब्राह्मणशापात् कर्णस्य युद्धकाले भूमौ रथचक्रमज्जनसमये **न निगृह्णाति** बाणमोक्षं न करोति, **सोऽपि** अर्जुनोऽपि **सभ्यैः** तत्सभामध्यस्थेन भगवता । पूजायां बहुवचनम् । **निगृह्यते** पिशाचानां पिशाचभाषयैवोत्तरस्य देयतया आदित आरभ्य पाण्डवगणहननाय परश्शतवञ्चन-मार्गकरणेनाधर्मैकनिरतस्य समये प्राप्ते येन केनापि प्रकारेण वध एव समुचितो धर्म इत्युपदिश्य तद्वधाय नियुज्यत इत्यर्थः । अत एव दयावीरस्य श्रीरघुनन्दनस्य विश्रमाय रावणमोक्षणं लोकप्रसिद्ध-गुणेष्वनन्तर्भूतं दुर्वचमेवेति चिन्तीयन्ते **श्रीवत्साङ्कमिश्राः,** 'यस्तादृशागसमरिं रघुवीर वीक्ष्य विश्रम्यतामिति मुमोचिथ मुग्धमाजौ । कोऽयं गुणः कतरकोटिगतः कियान् वा' इति ।

(7) एवं पाण्डुपरतयापि । **छलिनं** वसन्तोत्सवार्थं बहुविधकपटवेषपरिग्रहात् वसन्तश्छली । वसन्तस्य शृङ्गारप्रियत्वात् साधुकथानर्हश्च सः । 'असभ्यपरिपाटिकामधिकरोति शृङ्गारिता' इत्युक्तेः । **स्वात्मना** स्वस्वभावेन । स्वभावे परमात्मनीति वैजयन्ती । **उपहता** निवर्तिता **जातिः** जातिकुसुमं येन तम्, "जातिरहिते वसन्ते" इत्युक्तेः । तथाविधं वसन्तकालं यः पाण्डुः **काले** सति मृत्यौ सन्निहिते-ऽपि **न निगृह्णाति** तद्वैचित्र्यपरामर्शजनितकामोद्रेकवशात् माद्रीं निवर्तयितुमक्षमः तामनुभुङ्क्ते, **सोऽपि** पाण्डुः **सभ्यैः** यमसभास्थैः देवसभास्थैर्वा **निगृह्यते,** नितरां गृह्यते । शिशुक्रन्दयमसभेति पाणिनिसूत्रात् यमस्यापि सभाऽस्तीत्यवगम्यते । देवसभा च प्रसिद्धा सुधर्माख्या । तथा च वसन्ता-निग्रहात् पाण्डुर्मृत इति भावः ।

(8) एवं भीष्मपरोपि । **छलिनं** द्यूतकर्मादिवञ्चनप्रवणं **सत्कथायाः अनर्हं** 'असत्कीर्तन-कान्तारपरिवर्तनपांसुलाम् । वाचं शौरिकथालापगङ्गयैव पुनीमहे' इति सत्कथाया अप्यसत्कीर्तनरूपता-पादकम् । **स्वात्मना** स्वस्वभावेन उपहता **जातिः** स्वजातिः येन तम्, स्वापराधमात्रेण स्वजातीयान् सर्वानपि विनाशयन्तं यः भीष्मः **काले** वस्त्रापहरणादिसमये **न निगृह्णाति** निवारणशक्तोपि सभामध्ये न निवार-यति, **सोऽपि** भीष्मोपि **काले** युद्धकाले **सभ्यैः** तत्सभानिष्ठैः पाण्डवैरेव **निगृह्यते** शिखण्डिनं पुरस्कृत्य विजीयते । **काल** इत्यस्य देहलीदीपवदुत्तरत्रापि संबन्धः ।

(9) एवमेव कुम्भकर्णादिपरोपि । **छलिनं** सन्न्यासिवेषपरिग्रहेण वञ्चनया सीतापहरम् । उच्यते हि—'शूरोऽहमिति चात्मानमवगच्छसि दुर्मते । नैव लज्जाऽस्ति ते सीतां चोरवत् व्यपकर्षतः ॥ यदि मत्सन्निधौ सीता धर्षिता स्यात् त्वया बलात् । भ्रातरं तु खरं पश्येस्तदा मत्सायकैर्हतः' इति ।

सत्कथानर्हं असच्छब्दव्यपदेश्यम्, **स्वात्मना** स्वस्वभावेन उपहता **जातिः** ब्रह्मर्षिकुलप्रसूतत्वादिः येन तं **रावणं यः** कुम्भकर्णादिः **काले** मन्त्रणादिसमये **न निगृह्णाति** अयुक्तमिदमिति न बोधयति, न निवारयति वा, **सोऽपि** तादृशो मन्त्रिगणोपि **सभ्यैः** वानरसभानिष्ठैः सैनिकैः **निगृह्यते** निहन्यते । यो न निगृह्णाति सोऽपि निगृह्यत **इत्यपि**शब्देन यो निगृह्णाति विभीषणः सोऽपि कपिभिः, 'सालान् उद्यम्य शैलांश्च' इत्युक्तक्रमेण प्रथमं तिरस्क्रियत इति ध्वनितम् ।

(10) एवं कथानधिकारिप्रच्छन्नसौगतादिपरोऽप्यर्थः । उक्तं हि **शतदूषण्याम्**, "सौगतानामिव प्रच्छन्नसौगतानामपि कथायामनधिकारः" इति । **वेदार्थसंग्रहे** चैतद्विशदमनुभाषितम्, "सर्वशून्यवादिनो ब्रह्मव्यतिरिक्तसर्ववस्तुमिथ्यात्ववादिनश्च स्वपक्षस्थापकप्रमाणपारमार्थ्यानभ्युपगमादभियुक्तैर्वादानधिकार एव प्रतिपादितः" इति । अत एव **श्रीभाष्ये तदिद**मित्यद्वैतिमतमनूद्य, "न्यायानुगृहीतवाक्यप्रत्यक्षादिसकलप्रमाणवृत्तयाथात्म्यविद्भिरनादरणीयम्" इति शिष्यान् प्रत्येवोपदेशः क्रियत इति । तदयमर्थः—**छलिनं** वस्तुतस्सौगततुल्यत्वेऽपि वेदवादेन प्रच्छन्नत्वात् कपटिनम् । 'कथाहवमसौ गतान् कपटसौगतान् खण्डयन्' इति ह्युच्यते । **सत्कथायाः** तत्त्वनिर्णयार्थं वादस्य अनर्हं वास्तवप्रमाणादिव्यवहारानभ्युपगमात् । उक्तं हि—'वेदोऽनृतो बुद्धकृतागमोऽनृतः प्रामाण्यमेतस्य च तस्य चानृतम् । बोद्धाऽनृतो बुद्धिफले तथाऽनृते यूयं च बौद्धाश्च समानसंस(वि)दः' इति । **स्वात्मनि** स्वस्वरूपे उपहता **जातिः** आत्मत्वजातिः यस्य तम्, सर्वात्मनामैक्यवर्णनात् व्यक्तेरभेदेन आत्मत्वस्याजातित्वादिति भावः । निर्विशेषत्वकथनाद्वा निर्धर्मकत्वमिति बोद्धव्यम् । तादृशमद्वैतिनं **काले** वादकाले **यः** मध्यस्थादिः **न निगृह्णाति** वास्तवप्रमाणाद्यनुपगमात् त्वं वादानर्ह इति न बहिष्करोति, **सोऽपि** तथाविधो मध्यस्थोऽपि **सभ्यैः** सभास्तारैः **निगृह्यते** माध्यस्थ्यात् परिह्रियते । पक्षपातिनस्तथात्वायोगादिति भावः । एवं **खण्डनकारो**प्यनेन निर्धूतः । **छलिनं** प्रत्यक्षदृश्यमानवस्तुनोऽप्यसत्तारोपकच्छलोक्तिबहुलं वादस्य सर्वथा अनर्हं प्रत्यक्षविरुद्धस्वव्याघातकयुक्तिकूटोद्गारिणम्, "न याति न च तत्रासीत् अस्ति पश्चान्न चांशवत्" इत्यादिदुर्युक्तिभिर्घटत्वादिजातिं विमथ्नन्तं खण्डनकारं वादसभामध्येऽपि न प्रवेशयेदिति बोध्यम् ।

(11) एवं भागवतवेषधारिदुष्टशूद्रपरतयापि । केचिदिदानीं शूद्रदुर्जनाः पद्माक्षमालादिकं गळे निक्षिपन्तः, 'न शूद्रोऽहं भागवतः' इत्युद्घोषयन्तो ब्राह्मणगोष्ठीषु यथेच्छं विहरन्ति । विप्रा अप्यर्थलोभात् तत् विषहन्ते । तांश्चोपालभते **छलिनमिति** । केवलकपटवेषधारिणमित्यर्थः । **सत्कथायाः अनर्हं** कायान्तस्थलशुद्ध्यादिवितथैतिह्यकथनेन मोहयन्तमित्यर्थः । **स्वात्मना** स्वस्वभावेन वेषधारणमात्रेण **उपहता** विनष्टा **जातिः** शूद्रत्वादिः यस्य तम्, तथाभिमन्यमानमित्यर्थः । तादृशं शूद्रं **यः** ब्राह्मणः **काले** गोष्ठीसभादिसमये **न निगृह्णाति** मध्ये प्रवेशं न निरोधयति । सोऽपि ब्राह्मणस्तत्सहायभूतः, **सभ्यैः** तद्गोष्ठीनिष्ठैः **निगृह्यते** शूद्रतुल्यतया तिरस्क्रियते ॥ ८ ॥

ச்சலிநம் ஸத்கதாநர்ஹம் ஸ்வாத்மோபஹதஜாதிகம்.
ந நிக்ருஹ்ணுதி ய; காலே ஸோபி ஸப்யைர்நிக்ருஹ்யதே—8

1 கபடமாகவே நடக்கிறவனும், நல் வார்த்தைக்குத் தகாதவனும், தன்னுலேயே அழிக்கப்படும் ஜாதியு (பிறப்பு)மானவனை ஸமயம் நேர்ந்த போது எவன் தண்டிக்காமலிருக்கிருனே, அவனையும் சபைக்கு உரியவர்கள் சிக்ஷிப்பார்கள். அதற்கு உதாரணம்—

2 தர்க்கசாஸ்த்ரத்தில் ச்சலம் ஜாதி நிக்ரஹஸ்த்தானமென்ற மூன்று விதமான தோஷங்கள் பேச்சில் வரும் என்றும் பேச்சும் மூன்று விதம் என்றும் சொல்லப்படும். பேச்சு-கதை-அதாவது வாதம், ஜல்ப்பம், விதண்டை யென்பன. உண்மை யறிவதற்காக யோக்யர்கள் செய்யும் சர்ச்சை வாதம். அதே ஸத் கதை. பிறரை ஜெயிக்க நினைத்துச் செய்யும் கதை ஜல்ப்பமும் விதண்டையும். அவை அஸத் கதைகள். அவற்றில் முன் சொன்ன மூன்று தோஷங்களும் நேரும். அவற்றில் சலமாவது ஓர் அபிப்ராயத்தோடு சொன்ன பேச்சை வேறு அபிப்ராய மாகத் தானுகக் கல்ப்பனை செய்து தூஷிப்பது. ஜாதியாவது-சொல்லும் தோஷம் தனக்கும் வரும்படி பேசுவது, மூன்ருவது, சொல்ல வேண்டும் அளவில் சொல்லாமல் குறைவாகவும் அதிகமாகவும் அஸம்பத்தமாகவும் சொல்வதெல்லாம். இந்த தோஷம் நேர்ந்த போது எதிர் கக்ஷிக்காரன் இதை எடுத்துக் காட்டி அடக்க வேண்டும். விட்டால் சபையோர். எடுத்துக் காட்டாமையை ஒரு தோஷமாக்கி இவனை சிக்ஷிப்பார். இந்த விஷயத்தையும் இந்த ச்லோகம் சொல்லுகிறது. சலமும், தன் ஸ்வரூபத் தாலேயே கெட்ட, அதாவது பிறரை தூஷிக்கவாகாத ஜாதிப் பேச்சும் உடையவன், ஸத் கதைக்குத் தகாதவன், அவன் தோஷத்தைக் காட்டி அவனை சிக்ஷிக்காதவன் சபையோராலே சிக்ஷிக்கப்படுகிருனே, அது போலென்க.

3 சிஷ்யன் மகன் போன்ருரை சமயத்தில் சிக்ஷிக்காத ஆசார்யன், தந்தை முதலானுரையும் குறிக்கும் இது.

4 அரசனுயிருந்து ஒழுங்காக நடக்காமலிருந்தால்-அயோக்யர்களை சிக்ஷிக்காமலிருந்தால் அந்த அரசனை ப்ரஜைகள் தள்ளுவார்.

5 ஸத் என்ருல் நக்ஷத்ரம். ஜாதிகமாவது ஜாதகம். நக்ஷத்ர வரலாறு அறியாதவனும், ஜாதகக் குறிப்பின் ஸ்வரூபமே கெடும்படி செய்பவனுமான கபடியான சோதிடம் கூறுபவனை ஸமயத்தில் சிக்ஷை செய்யாததும் தவருகும்.

6 அரக்குமாளிகையிற் புகுவித்து அழிக்கப் பார்த்தது முதலான கபடங்களே செய்து வந்தவனும், நல்லோர்கள் நடுவில் பேசவாகாதவ னும் சாதி கெட்டு ஸூதபுத்ரனுமான கர்ணனை, அவன் போரில் தேர் அழுந்தி திண்டாடும்போதும் அடிக்க வேண்டுமென்று கண்ணன் கூறி அடிக்காமலிருக்க நினைத்த அர்ஜுனனை அவர் வைததும் காண்க.

7 நல்லோர் நடவடிக்கையை விட்டுக் காம வார்த்தைக்கு உரிய தும் அதற்கான வியாஜங்களை விளைவிப்பதும், ஜாதிபுஷ்பம் என்பதை

உண்டாக்கவாகாததுமான வஸந்த காலத்துக்கு வசப்பட்டு, அதனை நிவர்த்திக்காமல் மாத்ரியென்ற மனைவியோடு புணர்ந்து கெட்ட பாண்டு என்ற அரசனை யமலோகத்திலும் நிந்திப்பர்.

8 த்ரௌபதியின் துகிலுறித்த காலத்திலே குலத்தையே கெடுக்கும் துர்யோதநாதிகளை சிக்ஷிக்காமலிருந்த பீஷ்மரை அதற்காக சமயம் வந்த போது போரில் சிகண்டியென்றவனைக் கொண்டு பாண்டவர் அழித்தனர்.

9 அயோக்யனாய் குலத்தையே அழிக்க முன் வந்த ராவணனை சிக்ஷிக்காமல் அனுகூலமாய் நடந்த கும்பகர்ணனைக் கொலை செய்தனர்.

10 ஒரு ப்ரமாணத்தையும் உண்மையாக இசையாமல் வாதத்திற்கு வருமவனை—பொய்வாதம் செய்கின்றவனை, மத்யஸ்த்தர்கள் நீ அநதிகாரி என்று விலக்க வேண்டும். இல்லையேல் சபையோர் மத்தியஸ்த்தரை சிக்ஷிப்பர். அவ் அநதிகாரிகளில் கண்டன க்ரந்தம் எழுதினவனும் (ஸ்ரீஹர்ஷன்) ஒருவனாவான்.

11 வைஷ்ணவனென்று வேஷம் போட்டுத் தன்னை உயர்ந்த ஜாதியிலிருப்பதாக நினைத்து ஜாதியை யழிக்குமவன் நல்லோருடன் பேச்சுக்குத் தகாதவனென்று தெரிந்தவர் சிக்ஷிக்காமலிருந்தால் இவர்களும் நிந்திக்கப்படுவர்.

अकिञ्चित्कारिणां दीनैराक्रु(क्रु)ष्टगुणकर्मणाम् ।
अघाय गतसत्त्वानां दर्शनस्पर्शनादिकम् ॥ ९ ॥

तदेवमुक्तरूपाणां खलानां निग्रहशक्तस्य तन्निग्रह एव प्रथमं कार्य इति प्रसाध्य, निग्रहाशक्तानां दुर्बलानां तत्संसर्गोऽवश्यपरिहरणीय इत्याह **अकिञ्चि**दिति । **किञ्चित्कारिणः** यत्किञ्चिदनुकूलव्यापारकर्तारः । "यत्किञ्चिदपि कुर्वाणो विष्णोरायतने वसेत्" इत्युक्तत्वात् । **तद्विरुद्धाः** अपकारिणः, विरोधार्थे नञ् । **दीनैः** तदपेक्षया दुर्बलतमैः, ततोऽपकृतैः **आक्रुष्टानि** अनन्यगतिकतया उच्चैरुद्घुष्टानि गुणाः कर्माणि च स्तुतिव्यञ्जकानि येषां ते, तैर्विमथिताः । तदीयगुणकर्माण्यभिलप्य विलपन्तीत्यर्थः । तदसंनिधानस्थले वास्तवासद्गुणकर्मादिकमुद्घुष्य दूषयन्तीति वा । तादृशहिंसाकरणे हेतुः **गतसत्त्वाना**मिति । **गतम्** अविद्यमानं नष्टं वा **सत्त्वं** सत्वगुणः सत्पुरुषधर्मो वा येषां तेषाम् । रजस्तमोभिभूतसत्त्वगुणानामिति यावत् । **दर्शनस्पर्शनादिकं** दृष्टिस्पृष्ट्यादिकम् । **आदि**शब्दात्, 'आसनात् शयनात्' इत्युक्तसर्वविधसंसर्गपरिग्रहः । **अघाय** दुःखाय पापाय वा भवति । 'संक्रामन्ति हि पापानि तैलबिन्दुरिवाम्भसि' इत्यनुशासनात् पापजनकत्वं सुव्यक्तम् । पापिनां नृशंसानां दर्शने सति तेषामप्येतद्दर्शनावश्यम्भावात् ततोऽपकारः कश्चिदवश्यं पर्यवस्येदिति भावः । यद्वा दर्शनस्य **स्पर्शनं** दानम् । 'स्पर्शनं प्रतिपादनम्' इत्यमरकोशात् । अतः स्वदर्शनप्रदानमपि दुःखायेति न दोषः । तथा च परस्परदर्शनपरिहारोऽवश्यकर्तव्य इति फलितार्थः । 'अंहोदुःखव्यसनेष्वघम्' इत्यमरः ।

(2) एवमेव लुब्धशिरोमणिपरतयाऽप्यर्थः—**गतसत्त्वानाम्** अमनस्कानाम्। 'प्राणे बलेऽन्तःकरणे' इति कोशात् सत्त्वशब्दस्य मनःपरत्वम्। द्रविणसम्पन्नत्वेऽपि तत्कणिकामप्यदित्सूनां लुब्धानाम् **अकिञ्चित्कारिणां** परोपकारविरहिणां निष्प्रयोजनपुरुषाणां **दीनैः** दरिद्रशिरोमणिभिः **आक्रुष्टानि** उच्चैरुद्घुष्टानि गुणकर्माण्यारोपितानि येषां तेषाम्। दरिद्राणां धनिकसामान्ये त्वमिन्द्रश्चन्द्र इत्यादि-स्तोत्रकरणमानुभाविकमिति भावः। कदाचिदयमपि यत्किञ्चित् दद्यादिति भ्रान्तिरेवात्र मूलमिति द्रष्टव्यम्। तेषां दर्शनं स्पर्शनं च **अघाय** दुःखाय पापाय वा। तेषां दर्शने च याच्ञादिप्रवृत्त्युदयात् तद्विघाते च दुःखजननमवश्यम्भावि। पापं च तद्दर्शनादौ लुब्धानामन्नदानादिकं विना स्वमात्रभोजनेन, 'गृहस्थधर्मो यो विप्रो ददातिपरिवर्जितः। ऋषिभिर्धर्मतत्त्वज्ञैरपचः परिकीर्तितः' इति अपचत्वावसायात् 'परपाकनिवृत्तस्य परपाकरतस्य च। अपचस्य च भुक्त्वाऽन्नं द्विजश्चान्द्रायणं चरेत्' इत्युक्तप्रत्यवायप्राप्त्या तेषां पापित्वं तावत् अवर्जनीयम्। पापिनां दर्शनस्पर्शनादिसम्पर्कस्य पापापादकत्वं प्रसिद्धमेवेति। श्रूयते हि पापित्वं केवलादिनः श्रुतावपि, 'नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी' इति। केवलादी—स्वमात्रं भुञ्जानः। स केवलं पापी भवतीत्यर्थः। अत एवोच्यते, 'धनवन्तमदातारं दरिद्रमतपस्विनम्। कण्ठे बध्वा शिलां गुर्वीं सिन्धुमध्ये विनिक्षिपेत् ॥' इति। यद्वा **अघानां** पापानां **आयेन** प्राप्त्या **गतसत्त्वानां** विनष्टमनस्कानाम्। 'पापं प्रज्ञां नाशयति' इत्युक्तेः दर्शनस्पर्शनादि, **कं** प्रतीत्यन्वयः। कं पुरुषार्थमुद्दिश्येत्यर्थः। निष्फलपुरुषदर्शनं किमर्थमिति यावत्। अथवा **स्पर्शनं** दानम्। अमनस्कात् प्रतिग्रहोऽपि दोषाय। समनस्कस्य तूष्णींभावस्ततोऽपि श्लाघ्य एवेति वक्ष्यते।

(3) एवं मृतपरतयाऽप्यर्थः--**गतसत्त्वानां** नष्टप्राणानां, 'द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु' इत्यमरः। **अकिञ्चित्कारिणां** हस्तपादादिचलनाभावात् उन्मेषनिमेषादिस्वभावजकर्मकरणस्याप्यनर्हाणां **दीनैः** विलपद्भिर्बन्धुवर्गैः **आक्रुष्टानि** उच्चैर्घुष्यमाणानि गुणाः कर्माणि च पूर्वानुभूतानि येषां तेषाम्। मृतपुरुषस्तुतेः सर्वत्र दृष्टत्वात्। तेषां दर्शने स्पर्शनेप्यघं भवति—आशौचं जायते। तथाच स्मृत्यन्तरम्, उह्यमानं शवं दृष्ट्वा स वासा जलमाविशेत्,' 'अलंकृतं शवं दृष्ट्वा सचेलस्नानमाचरेत्' 'आचम्य(?)केवलं प्रेतं दृष्ट्वा काष्ठवदाचरेत्' **काष्ठवदाचरणं** जलावगाहनम्। मनुश्च, 'असपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत्। विशुद्ध्यति त्रिरात्रेण मातुराप्तांश्च बान्धवान्'। वसिष्ठोऽपि, 'मानुषास्थि स्निग्धं स्पृष्ट्वा त्रिरात्रमाशौचम्; अस्निग्धे त्वहोरात्रम्' इति। तथा च स्नानादिप्राप्त्या आशौचसत्त्वमवर्जनीयमिति भावः।

(4) एवमेव अबलपरतयापि बोधः। तत्र च, 'प्राणे बलेऽन्तःकरणे' इति कोशात् सत्त्वशब्दो बलपरः; तथा च गतबलानां दीर्घरोगिणामासन्नमरणानां उत्थानगमनादिकार्यकरणेऽप्यक्षमाणां, **दीनैः** आर्तस्वरैः **आक्रुष्टानि** दूषितानि, **गुणानां** पाचकादीनां कर्माणि यैः, तेषाम्। अरोचकादिपीडिताः पाचकादिषु दोषमारोपयन्तीति प्रसिद्धमेव। तेषां दर्शनमपि दुःखजनकं मुमूर्षुत्वात्। स्पर्शने च देहपीडासम्भवादतिव्यसनमवश्यंभावीति भावः।

(5) एवं सत्त्वशब्दस्य जनपरतया महाव्याध्यादिना विनष्टजनानां नगराणां दर्शनं स्पर्शश्च महादुःखायेत्यप्यर्थः। तेषु च जनप्रचार-विपणिवीथिकाव्यवहरणादिकिञ्चित्कारो नास्ति। अवशिष्टजनैर्दीनैः पूर्वमृतगुणकर्माण्याक्रुश्यन्त इति च।

(6) एवं **गतसत्त्वानां** प्राप्तजन्तूनां गर्भिणीजनानामित्यपि बोधः। "गतश्रीः प्रतिष्ठाकामः" इत्यत्र प्राप्तश्रीरित्यर्थकरणात्। अत्रश्चाऽऽसन्नसत्त्वानां यत्किञ्चिदपि गृहकृत्यादिकं कर्तुमसमर्थानाम्, दीनस्वरैराक्षिप्तानि **गुणानां** स्वशेषभूतानां दासजनानां कर्माणि यैस्तेषाम्। स्वकार्यालस्यात् शश्वत् परिजनाधिक्षेपो भवतीति भावः। दर्शने च तेषाम्, कथमियमशक्ता सुखं प्रसूय स्वस्था भविष्यतीति, स्पर्शे, च गात्रपीडा भवेदिति दुःखजननमवश्यम्भावीति भावः। केषांचित् क्रूरदृष्टीनां दर्शनं दोषाय च भवतीति वा पूर्णगर्भस्त्रीविषये इति बोध्यम्।

(7) एवमेव दुष्टजन्त्वाक्रान्तपिशाचाद्याविष्टपरोऽप्युन्नेयः—'सत्त्वोऽस्त्री जन्तुषु क्ली तु व्यवसाये पराक्रमे। आत्मभावे पिशाचादौ द्रव्ये सत्ताखभावयोः' इति वैजयन्तीकोशात्। ते च स्वशक्त्या स्वबुद्ध्या वा किञ्चित् कार्यं कर्तुमसमर्थाः, दीनस्वरैः उच्चैरुद्घोषयन्ति च पुरोवर्तिनां गुणकर्माणि। पिशाचग्रस्ताः मान्त्रिकादिताडने स्वगुणकर्माणि च कथयन्तीति प्रसिद्धमेवेति बोध्यम्।

(8) एवं सत्त्वशब्दस्य व्यवसायपरत्वे—'व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन' इत्युक्तएकबुद्धिरहिताव्यवस्थितचित्तपरोऽप्यर्थः। ते च शश्वत् पिशुनजनकलहात् किञ्चिदप्यनुकूलं कर्तुमशक्ताः। किञ्चित्क्षणानुकूल्यादौ आचरितसद्गुणकर्माणि दीनजनाः प्रतिपदं कीर्तयन्ति उपकारलाभार्थमिति। तेषां दर्शनादिकमपि 'अव्यवस्थितचित्तस्य प्रसादोऽपि भयङ्करः' इति न्यायेन दुःखजनक इत्यर्थः।

(9) एवमसत्पदार्थपरतयाप्यर्थः—असत्पदार्थाश्च शशशृङ्गमरीचिकाजलादयः। तत्रासत्ख्यातिपक्षे असतां ज्ञानविषयत्वं पक्षान्तरे विकल्पादिवृत्तिविषयत्वं चाभ्युपेयत इत्यन्यदेतत्। सर्वत्र तेषामर्थक्रियाकारित्वविरहात् अकिञ्चित्कारित्वं सुव्यक्तम्। तृष्णार्तानां मरीचिकादर्शने जलभ्रान्त्या तत्समीपानुधावनम्, तत्र जलानुपलम्भेन विसंस्फुलतरतरङ्गसङ्कुलो जलप्रवाहोऽद्य मया दृष्ट इत्याक्रोशश्च तद्गुणकर्मणामानुभाविक एव। अतश्च तद्दर्शनतद्देशस्पर्शनादिकं दुःखायैव भवतीदृशायेति ध्येयम्।

(10) एवमकालग्रहणविषयपरोऽपि—ते च **अकिञ्चित्कारिणः** किञ्चिदपि स्नानदानादिकं न कारयन्तीति तथोक्ताः। अकालग्रहणे स्नानाद्यविधानात्। दीनैः मन्दीभूतैः सूर्यसम्पर्कादृश्यरूपैः राह्वादिभिः **आकृष्टः** आच्छादितः **गुणः** औष्ण्यादिः कर्म तेजोविसरादि च येषां तेषां **गतसत्त्वानां** प्राप्तराह्वादिजन्तूनां, दर्शस्य अमावास्यायाः **नस्पर्शनं** स्पर्शाभावः। नसमासः। आदिना पौणमास्यसंस्पर्शो गृह्यते। अघाय अनिष्टायैव भवति। 'अपर्वणि ग्रहो यत्र तमसा चन्द्रसूर्ययोः। अमेघे जलवर्षं च रात्राविन्द्रधनुस्तथा। वाल्मीनांश्च सन् दृष्ट्वा तं देशं परिवर्जयेत्' इत्युत्पातगणेषु परिगणनादिति भावः।

(11) एवमसद्ग्रहपरश्च कश्चिदर्थः—**गतसत्त्वानां** दुष्टनीचादिग्रहसम्बन्धात् षष्ठाष्टमाद्यव-

स्थानात् तत्तदाधिपत्यादेश्च विनष्टसाधुभावानां बुधजीवादीनाम् । उच्यते हि शुभग्रहाणामपि पापत्व-मुक्तनिमित्तेषु ; स्वफलप्रदानाशक्तिश्च, 'क्षीणेन्द्वर्कार्किभूपुत्राः पापास्तत्संयुतो बुधः' इत्यादिषु । 'मन्द-सौम्यसिताः पापाः शुभौ गुरुदिवाकरौ । न शुभं योगमात्रेण प्रभवेच्छनिजीवयोः ॥ परं तु तेन जीवस्य पापत्वमपि सिद्ध्यति' इति च जातकचन्द्रिका । **अकिञ्चित्कारिणां** स्वफलप्रदानासमर्थानां **दीनैः** नीचीभूतैः दुर्बलग्रहैः **आकृष्टानि** आक्षिप्तानि । साक्रोश एवेति प्रयोगदर्शनात् ; **गुणाः** उच्चस्वस्थानादयः **कर्माणि** च तत्तत्फलप्रदानरूपाणि येषां तेषां तादृशशुभग्रहणामपि **दर्शनं** वीक्षणं **स्पर्शनं** एकस्थानसम्बन्धः । **आदि**पदात् एकांशसम्बन्धादयो गृह्यन्ते । **अघाय** दोषायैव भवति । अनिष्टफलाधायकत्वादिति भावः ।

(12) एवं लुब्धवैदिकपरोऽपि—**गतसत्त्वानाम्** आत्मभावशब्दितश्रद्धाशून्यानां **अकिञ्चित्—कारिणां** लोभादिना किञ्चिदपि प्रधानकर्म ज्योतिष्टोमदर्शपूर्णमासादिकं कर्तुमनिच्छूनां **दीनैः** दुर्बल-कारणैरित्यर्थः । यागादिकरणस्य समीचीना ऋत्विजो न लभ्यन्ते, निर्दुष्टद्रव्यादिकं च दुर्लभमित्यादि-व्याजोक्तिभिरन्ततः कार्यारम्भं परिहरतामित्यन्वयः । अत एव **आकृष्टानि** निरस्तानि **गुणकर्माणि** अप्रधानकर्माणि येषां तेषाम् । प्रधानकर्मणोऽकरणे गुणकर्मशब्दिताङ्गकर्मणां स्वतो निरासादिति भावः । तेषां **दर्शनस्पर्शनादिकं** सदा सिद्धान्तग्रन्थपठनादिकम् **अघाय** दोषायैव वेदाध्ययनकल्पसूत्रपारायणा-दीनां क्रत्वनुष्ठानैकफलकत्वात्, इष्ट्वा च विविधैर्यज्ञैर्मनो मोक्षे निवेशयेदिति विधानाच्च तदभावे शास्त्रस्पर्शो निन्दाया एवेति भावः ।

(13) एवं **गतसत्त्वानां** शुद्धसत्त्वशून्यानां प्राकृतपदार्थानां **दर्शनम्** अनुभवः **स्पर्शनं** संसर्गः **आदि**शब्देन तदुपासनादिश्च **अघाय** कर्मणे भवति । भगवत्सङ्कल्पत एव तस्य निरसनीयत्वात् । ते च पदार्थाः यत्किञ्चित् अनुकूलं कर्म कर्तुमशक्ताः **दीनबुद्धिभिः** अविवेकिभिः आकृष्टानि, प्रफुल्लतर-तरुषण्डादिमण्डितवन्तोद्यानवापिकादिदर्शने उच्चैरुद्घुष्टानि तदीयगुणकर्माणि येषां तथोक्ता इति च । तथा च मूढजना एव प्रकृतिसंसर्गे मोमुह्यमानाः सुखायन्ते । विवेकिनस्तु सर्पसहवासवत् नित्यं तच्चिन्तने दुःखायन्त एवेति भावः ।

(14) एवं जैनबौद्धविश्वखण्डकादिपरोऽपि कश्चिदर्थः— **गतसत्त्वानम्** । सत्त्वं नाम व्यवस्था । सन् स्थिरः तस्य भाव इति व्युत्पत्तेः । तच्च **गतं** विनष्टं जैनानाम् । तन्मते हि सर्वत्र सप्तभंगयवतारात् सर्वेषा-मपि पदार्थानां सत्त्वमसत्त्वं सदसत्त्वं सदसद्बहिर्भूतत्वमित्यादयः परिगृहीता इति नैकस्वरूपता केषामपीति भावः । तदुक्तम्, "भक्ष्याभक्ष्यस्वपरविजयस्थापनादूषणादिष्वैकान्त्यं ये जहति, विहतिं क्वापि नैते विदन्ति" इति । तुरीयबौद्धाश्च सर्वशून्यवादाश्रयणात् सत्पदार्थानभ्युपगमात् **गतसत्त्वाः** । अन्येऽपि विज्ञानमात्रसत्यत्ववादेऽपि तस्य स्थैर्यरूपसत्त्वानुपगमेन गतसत्त्वा एव । विश्वखण्डकोपि दुर्युक्तिभिः सर्वमपि वस्तु दुर्निरूपमिति वदन् गतसत्त्व एव । ते सर्वेऽप्य**किञ्चित्कारिणः**—केवलवैतण्डिकत्वेन

स्वपक्षे किञ्चिदपि स्थापनमकुर्वाणाः। दीनैः दुर्बलतर्कैः। स्वव्याघातकत्वात् प्रत्यक्षागमादिविरोधाच्च दुर्बलत्वम्। आक्रुष्टानि निरस्तानि गुणाः कर्माणि च यैस्तथोक्ताश्च। विश्वखण्डकेन गुणादीनां द्रव्यात् भेदे अभेदे च दूषणोद्गारात्, माध्यमिकैर्वस्तुस्वरूपानभ्युपगमात्, जैनैश्च गुणसमुदायरूपमेव द्रव्यमिति उपगमाच्चेति भावः। एवं वाङ्मात्रेण निरस्यन्ति गुणादीन्। स्वस्य केनचिच्चपेटाहतौ च, तदानीं नीलवर्णोऽयं पुरुषो मामताडयदिति तद्गुणकर्माणि राजादिसन्निधावुच्चैराक्रोशन्ति दीनस्वरैरिति चार्थः। अतश्च प्रत्यक्षस्वानुभवविरुद्धोऽयं दुर्वाद इति भावः। अत एवोच्यते—"परस्परविघट्टनत्रुटितर्कशस्त्रच्छटातिरस्कृतचमत्कृतिः स्वयमखण्डि वैतण्डिकः" इति। तेषां दर्शनादिकमपि दोषायैव। अत एवोक्तं विवेकमहाराजेन—"सेनापते, आः कष्टममीषामालोकनम्। उत्सार्यन्ता मेते दृष्टिगोचरात्" इति। यद्वा तेषां दर्शनस्य शास्त्रग्रन्थस्य स्पर्शनादिकं हस्तस्पर्शपठनादिकमपि प्रत्यवायैवेति भावः॥ ९॥

சிக்ஷிக்கமாட்டாதவர் சேராமல் விலகியிருக்க வேண்டும். இல்லையேல் குற்றமாகுமென்கிறார்—

அகிஞ்சித்காரிணும் தீநை ராக்ருஷ்டகுணகர்மணும்.
அகாய கதஸத்வாநாம் தர்சநஸ்பர்சநாதிகம்—9

1 சிறிதும் உபகாரமின்றி அபகாரம் செய்கிறவர்களும், கதியற்றவர்களாலே புகழப்பட்டும், கஷ்டப்பட்டவர்களாலே நிந்திக்கப்பட்டுமுள்ள குணமும் செயலும் உடையவர்களும் நல்ல தன்மையற்றவர்களுமானவரைக் காண்பதோ தொடுவதோ ஸஹவாஸமோ எல்லாம் பாபத்திற்கேயாகும்.

2 உலோபிவிஷயமுமாம். ஸத்துவமாவது மனம். கொடுக்க மனமில்லாதவர்களும், யத்கிஞ்சித் என்று சிறிது கூட அளிக்காதவரும் கொடுப்பான் என்று ப்ரமிக்கும்படி நடப்பதாலே பிறரால் வீணே புகழப்படுகின்றவருமான உலோபிகளுடைய தர்சனம் முதலியன துக்கத்திற்கேயாம். अघायगतसत्त्वानाम् என்று ஒரே பதமுமாம். அக-பாபங்களின், ஆய-வரவினுல் சேர்க்கையால், ஸத்துவகுண மற்றவரென்று பெருளாம். ஸ்பர்சனம் என்பதற்கு கொடை என்ற பொருளும் உண்டு. அவர்கள் பார்ப்பதும் கொடுப்பதும் கூட நமக்குப் பாபத்திற்கே. அவர்கள் திரவ்யத்தைப் பெறலாகாதென்றபடி.

3 பிணத்தைப் பற்றியதுமாம். கண் கை கால் அசைக்கவுமாட்டாத, 'ஐயோ குணசாலி, பல நன்மை செய்தவன் போயிட்டானே' என்று போன பிறகு புகழப்படுகிற, அப்போதும் வையும்படியிருக்கிற, உயிரற்ற உடல்களைப் பார்ப்பது தொடுவது எல்லாம் அசுத்திக்கு இடமாகும்.

4 தாங்கள் ஒன்றும் செய்யமாட்டாதவரும் தங்களுக்கு குணமாக நடப்பவரின் செயல்களையும் தீனஸ்வரங்களுடன் பழிக்கின்றவர்களுமான பலஹீனர்களைப் பார்ப்பது தொடுவதெல்லாம் துன்பத்திற்கேயாம்,

5 ஸத்வம் ப்ராணி. கொடிய நோய் முதலானவற்றால் ப்ராணிகளெல்லாம் அழியவாகி, கடை முதலிய வியாபாரங்களுமில்லாமல் பலவிதம் பழிக்கும் படியான ஊர்களைக் காண்பது புகுவதெல்லாம் கேடென்க.

6 கத என்பதற்கு பெறப்பட்ட என்ற பெருளாய், ஸத்வம் ப்ராணியாய், கதஸத்வராவார் ஆபந்நஸத்வர், கர்பிணிகள். பூர்ண கர்ப்பிணிகள் பலமற்று, தங்களுக்குத் துணையாய் எல்லாம் செய்கின்றவர்களையும் சக்திக்குறைவினால் ஏதேனும் சொல்லி வருத்துகின்றவர்கள் தங்களை யாராவது கண்டாலும் தொட்டாலும் ஆயாஸப்பட ஆவர்.

7 பிசாசு பிடித்திருக்க சுயமாக ஒன்றும் செய்யாமல் மாந்த்ரிகரைக் கண்டாலும் கூச்சலிட்டு ஆர்பாட்டம் செய்யும் ஜனங்களைக் காண்பது தொடுவது கூடாததாம்.

8 கதஸத்வராவார் புத்தி வ்யவஸ்த்தையற்றவர். ஒவ்வொரு நிமிஷம் ஒவ்வொரு விதமாயிருப்பவர். பிறர் பழிக்கும் படியான குணம் செயல் உடையவர். அவர்களுடைய ப்ரீதியும் நன்மைக்கே யென்னவாகாது.

9 கதஸத்வங்கள்-உண்மைக்கு மாறானவைகள். பாம்பைக் கயிறாகவும் கானலை நீராகவும் நினைத்து நெருங்கினால் அவை கார்யத்திற்கு உபயோக்கப்பட்டா. அவை செயய்யும் செயல் ஆபத்துக்குமாகும். அவற்றைக் காண்பது கொள்வது தகா.

10 அகாலக்ரஹண விஷயம்:—ராகு முதலான க்ரஹணம் பெற்ற சூர்யாதிகள் நன்மை என்றும் செய்யாதவை. தர்ச - அமாவாஸ்யை போன்றவற்றை, நஸ்ப்ர்சனம் தொடாமலிருக்கை, (பர்வகாலம் தவிர மிகுதியானவற்றில் வரும் க்ரஹணத்தால்) அந்த தேசத்திற்குக் கேடாம்.

11 துஷ்டக்ரஹ விஷயம்:—துஷ்டக்ரஹம், நீசக்ரஹம் இவற்றோடு ஸம்பந்தப்பட்ட குரு போன்ற சுபக்ரஹங்களும் நன்மை செய்யா. அதனால் அவற்றின் குணம் செயல் இவற்றிற்குத் தடையேற்படலாம். அவற்றின் தர்சனம் முதலானவையால் நன்மையில்லை, தீமையே.

12 லோபியான வைதிகர் விஷயம். கதஸத்வராவார் ச்ரத்தையில்லாதவர். ப்ரதானமான கர்மாக்களைச் செய்யாதவர். அவற்றின் குணகர்மாக்களிலே அதாவது அங்கங்களிலே ஏதேனும் குறையைத் தாம் செய்யாமைக்கு வியாஜமாக்குகிறவர். இப்படிப்பட்ட உலோபிகளைக் காண்பது தகாது.

13 ஸத்துவ குணச்சிறப்பற்று, ஸம்ஸார பந்தத்திற்கான குணங்களும் செயல்களும் பெற்றிருப்பதால் புகழப்பெற்று விளங்கும் பராக்ருதங்களான விஷயங்கள் பாபத்திற்கேயாம்.

14 அநேகாந்த வாதிகளான ஜைனருக்கு. ஸத்துவம் நிலை ஒரு வ்யவஸ்தையில்லை. இப்படியுமிருக்கலாம் அப்படியிருக்கலாமென்று எல்லா விதமாகவும் கொள்ளுகிறவர். த்ரவ்யம் குணம் கர்ம என்றாற்போன்ற பேதங்களை ஆக்ஷேபிக்கிறவர். அவர்களுடைய தர்சனமான சாஸ்த்ர க்ரந்தங்களைத் தொடுவது கூட தீமைக்காம்.

निगिरन्तो जगत्प्राणान् उद्गिरन्तो विषं मुखैः ।
दूरतः परिहर्तव्या द्विजिह्वा जिह्मवृत्तयः ॥ १० ॥

तदेवमुक्तश्लोकैः दुर्जनसंसर्गस्य दृष्टादृष्टप्रत्यवायभूयिष्ठत्वमुपपाद्य सर्वप्रयत्नेन तत्संसर्गः परिहरणीय इत्याह **निगिरन्त** इति । जगतां प्राणान् असून्, बलानि वा, 'अर्था बहिश्चराः प्राणाः' इत्युक्तान् धनादिरूपान् वा **निगिरन्तः** भक्षयन्तः, अन्यदीयवस्तून्यपहृत्य यथेच्छं भक्षणेन तत्प्राणादीनां विनाशो भवतीति भावः । **मुखैः** अनेकप्रकारैः । मुखभेद इत्यादिप्रयोगात् । **विषं** विषतुल्यं क्रूरकर्म **उद्गिरन्तः** असकृदुत्पादयन्तः । मरणान्तव्यापारकरणलोलुपा इति यावत् । उक्तं हि—'तक्षकस्य विषं दन्ते मक्षिकायाः शिरो विषम् । वृश्चिकस्य विषं पुच्छे सर्वाङ्गे दुर्जने विषम् ॥' इति । यद्वा **मुखैः** स्वमुखैः बहुवचनं व्यक्तिभेदेन; विषतुल्यं क्रूरवचनम् **उद्गिरन्तः** उच्चैर्घोषयन्तः । उक्तं हि—"अहमेव गुरुः सुदारुणानामिति हालाहल मा स्म तात दृप्यः । ननु सन्ति भवादृशानि भूयो भुवनेऽस्मिन् वचनानि दुर्जनानाम्" इति । अथवा साक्षाद्विषमेवोद्गिरन्तः; तदप्युक्तम्—'प्रागर्णवस्य हृदये, वृषलक्ष्मणोऽथ कण्ठेऽधुना वससि वाचि पुनः खलानम्' इति कालकूटं प्रति केनचित् कविना । **जग**च्छब्देन स्वभिन्न सर्वप्राणिबोधनात् तत्समुदायानुगतस्यापराधस्य कस्यचित् दुर्निरूपत्वाच्च खलानामेव सर्वसंहरण[1]स्वभावता द्योत्यते । **जिह्मवृत्तयः** कपटव्यापाराः । 'जिह्मस्तु कुटिलेऽलसे' इत्यमरः । तादृशान्तर्विषादिसत्त्वेऽपि वञ्चनार्थमस्मत्सन्निधिमवर्जयन्तः इति यावत् । उक्तं हि—'आजन्मसिद्धं कौटिल्यं खलस्य च हलस्य च' इति । **द्विजिह्वाः** पिशुनाः; 'द्विजिह्वौ सर्पसूचकौ' इत्यमरः । जिह्वाशब्दस्तन्मूलकवाक्यविशेषपरः । 'रामो द्विर्नाभिभाषते' इतिवत् द्विशब्दस्य परस्परविरुद्धार्थकवाक्यद्वयमर्थः । इदं च बहूनामप्युपलक्षणम् । अतः पुरुषभेदेन कलहार्थं विरुद्धोक्तीः प्रयुञ्जाना इति पर्यवसितार्थः । अत्र च द्विजिह्वशब्देन "कस्तूरिकामृगाणामण्डात् गन्धगुणमखिलमादाय । यदि पुनरहं विधिस्स्यां खलजिह्वायां निवेशयिष्यामि" इति वक्तुः कवेः खलस्यैकजिह्वादर्शनेनैव महाभयोदये किमुत जिह्वाद्वयदर्शन इति भावः सूचितः । अतश्च सर्वदा कलहप्रियत्वं फलितम् । तदाहुः—'काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् । व्यसनेन तु मूर्खाणां निद्रया कलहेन च' इति । अतस्तत्सान्निध्यं सुदूरपरिहार्यमित्याह **दूरत** इति । खलनिवासभूत देशग्रामादिपरिहार एव प्रथमं श्रेयान् । असम्भवे तद्वीथिकागृहादिकं वा परिहरणीयमित्यर्थः । तदुक्तम्—'खलानां कण्टकानां च द्विविधैव प्रतिक्रिया । उपानहा मुखे भङ्गः दूरतो वापि वर्जनम्' इति । तव्यप्रत्ययः प्रयत्नपूर्वककरणीयतां द्योतयति । यद्वा **दूरत** इत्यस्य परम्परयापीत्यर्थः । अतस्तत्सहचारिसहचारिपरम्परापि परित्याज्येति फलितम् । आहुश्च—दुर्जनः परिहर्तव्यो विद्ययाऽलङ्कृतोऽपि सन् । मणिना भूषितः सर्पः किमसौ न भयङ्करः इति ।

(2) अतः सर्पपरतयापि कश्चिदर्थः—**जगत्प्राणान्** वायून् **निगिरन्तः** स्वाहारतया स्वीकुर्वन्तः,

---

1 संहरणं स्वभावप्रयुक्तम्, न तु तदपराधप्रयुक्तमिति ।

'समीरमारुतमरुज्जगत्प्राणसमीरणाः' इत्यमरः । मुखैः स्वीयवक्त्रैः । पञ्चशीर्षनागादिविवक्षया बहुवचनम्, सैषा पञ्चमुखी तुष्टिः शेषसृष्टिरिवापरेत्यन्यत्रोक्तेः ; विषं गरळम् उद्गिरन्तः वमन्तः । द्विजिह्वाः एकैकमुखे जिह्वाद्वयवन्तः जिह्मवृत्तयः कुटिलगमनाः । 'अरालं वृजिनं जिह्मम्' इत्यमरः । सर्पगतेर्वक्रतास्वाभाव्यात् । तथाविधसर्पाः तद्वासादिस्थानसुदूरमार्ग एव परिहर्तव्याः परित्याज्याः । उक्तं हि—'सर्पादिवत् त्वदपराधिषु दूरयाताः' इति । कालियादिसर्पपरत्वे तु जगतां पशुमनुष्यादीनां प्राणान् भक्षयन्तः, तत्र हेतुः उद्गिरन्त इति । मुखैः पञ्चभिः विषं जलेषु प्रक्षिपन्तः तद्ध्रूदमात्रस्य विषजलप्रायतामापादयन्तः तद्वायुसम्बन्धभयेन भगवता सुदूरदेशे प्रक्षेप्तव्या इति भावः ।

(3) अन्योऽपि श्लिष्टकाव्यपरो बोधः—जगतां प्राणाः प्राणस्थानीयत्वेनाभिमताः ध्वनयः ; रसा वा । 'ध्वनिः काव्यस्य जीवितम्', रस एवात्र जीवितम्' इति मतभेदात् । तान् निगिरन्तः अप्रकाशयन्तः । निगीर्याध्यवसानमित्यादौ विषयाप्रकाशबोधनात् । ध्वन्यादिशून्या इत्यर्थः । विभज्यते हि त्रेधा काव्यपद्धतिः, 'काव्यं ध्वनिर्गुणीभूतव्यङ्ग्यं चित्रमिति त्रिधा' इति । तत्र ध्वनिरसादिप्रधानं काव्यमुत्तमम् । ....केवलशब्दवैचित्र्यमात्रप्रधानं चित्रकाव्यमधममिति । ततश्च शब्दश्लेषप्रधानस्य श्लिष्ट-काव्यस्य प्रायशो ध्वनिरसादिदवीयस्त्वं सुव्यक्तमिति । मुखैः बहुविधपदविच्छेदप्रकारैः विषं मनोमोह-जनकं गूढार्थभेदं बोधयन्तः । जिह्मवृत्तयः अलसशक्त्यादिवृत्तयः । आलस्यं च अर्थबोधनविलम्ब एव । 'जिह्मस्तु कुटिलेऽलसे' इत्यमरः । प्रायशः श्लिष्टकाव्येष्वर्थबोधनविलम्ब आनुभविक इति भावः । द्विजिह्वाः । पिशुनपरत्व इवात्रापि जिह्वाशब्दोऽर्थबोधपरः । स चात्रोभयविध इति एकस्य पदस्यार्थद्वय-बोधनात् द्विजिह्वत्वमिति बोध्यम् । तथाविधाः श्लिष्टकाव्यभेदा दूरतः परिहर्तव्याः । तादृशकाव्यकरण-श्रवणादिकमनावश्यकमिति भावः । अत्र च द्विजिह्वशब्देनार्थद्वयमात्रबोधककविराक्षसीयादयो गृह्यन्त इति बोध्यम् । अत एव नात्र स्वग्रन्थव्याघातः, स्वग्रन्थस्यास्यानेकार्थपरिपुष्टत्वात् ध्वनिरसादिबहुळयाच्च । तद्विरहितकेवलक्लिष्टार्थपरश्लिष्टकाव्यगोचर एवायं श्लोक इति न दोष इति ध्येयम् ।

(4) एवम्, "स्वपुरुषमभिवीक्ष्य पाशहस्तं वदति यमः किल तस्य कर्णमूले । परिहर मधुसूदन-प्रपन्नान् प्रभुरहमन्यनृणां न वैष्णवानाम् ॥ कमलनयन वासुदेव विष्णो धरणिधराच्युत शङ्खचक्रपाणे । भव शरणमितीरयन्ति ये वै त्यज भट दूरतरेण तान् अपापान्" इति श्लोकद्वयार्थोऽप्यत्रानुसार्यते । तथा हि—जगत्प्राणान् निगिरन्त इत्यनेन मृत्यव उच्यन्ते । कल्पभेदेन भेदात् बहुवचनम् । ते च विषं स्वपुरुषं प्रति, मुखैः साक्षात् स्ववक्त्रैः, एवमुद्गिरन्तः वदन्तस्सन्तीत्यन्वयः । विषमित्यत्र शषयोरभेदात् विशमिति विपरिणामः ; कोशः कोष इतिवत् । यद्वा षकारान्तोऽपि विट्शब्दो नैघण्टुकसम्मतः । अत एव विश्वमेदिन्योः षकारान्तप्रकरणेऽपि विट्शब्दः परिगण्यते । स च जनार्थ-कोऽपि ; विड्वैश्ये जनेन षण्णिति (?) वैजयन्तीकोशात् ; 'विट् पुंसि मनुजे वैश्ये' इति मेदिनीकोशाच्च । प्रयोगोऽपि 'यथा राजा विशाम्, विशांपतिरित्यादिर्वेदलोकयोः । अतश्च विषमित्यनेन स्वपुरुषशब्दार्थो

विवृतः । पुरुषान्तरमुखेन कथने अषट्कर्णताविरोधात् मुखैरित्युक्तम् । एतेन तच्छ्लोकपूर्वार्धार्थ उक्तः । अथोत्तरार्धार्थमनुवदन् मृत्युवाक्यप्रकारमाह--दूरत इति । दूरत इत्येतत् कमलनयनेति श्लोकगतदूरतरेणेति पदार्थानुवादः । **परिहर्तव्या** इत्येतत् **परिहर त्यजे**त्यनयोः श्लोकद्वयगतयोः । द्विजिह्वा इत्यनेन द्वयजिह्वाः शरणागता उच्यन्ते । द्वौ अवयवौ अस्येति विग्रहाद्धि द्वयशब्दोऽवयवद्वयविशिष्टं मन्त्रमभिधत्ते । तदेवावयवद्वयमत्र द्विशब्देनोच्यत इति द्वौ जिह्वायां मन्त्रखण्डौ यस्येति विग्रहो बोध्यः । 'सकृदुच्चारः संसारतारको भवति' इत्युक्तसकृदुच्चारणं वा, 'सकलं कालं द्वयेन क्षिपन्' इत्युक्तसदाकीर्तनं वाऽत्र द्विजिह्वशब्देनोच्यत इत्यवसेयम् । यद्वा 'सततं यस्य जिह्वायां हरिरित्यक्षरद्वयम्' इति वचनप्रत्यभिज्ञानात् द्विशब्देन तादृशाक्षरद्वयमेवोच्यत इति नामकीर्तनपरा बोध्यन्त इति बोध्यम् । कथमत्र मृत्युपुरुषप्रसक्तिरिति चेत्—तत्राह जिह्मेति । **जिह्मवृत्तयः** अलसव्यापाराः वृत्तिक्लेशादिना यत्किञ्चित् गौणकृत्यमनुतिष्ठन्त इत्यर्थः । अत्र 'सर्वं जिह्मं मृत्युपदमार्जवं ब्रह्मणः पदम्' इति महाभारतोक्तेः श्रीवैष्णवानामपि जिह्मवृत्तीनां मृत्युपदत्वमस्तीति तेषामभिप्रायः । तान् प्रति जिह्मवृत्तयोऽपि प्रपन्ना दूरतः परिहरणीया इति मृत्यवो वदन्तीति इतिशब्दपूरणेनान्वयबोध उन्नेय इति बोध्यम् । अथवा **परिहर्तव्यादिति** छेदः । **विजिह्वाः** । विः पक्षिपरमात्मनोरिति भट्टभाणः (बाणः ?) । सः जिह्वायां येषां ते । कमलनयनादिपरमात्मवाचिशब्दोच्चारयितारः **परिहर्तव्यात् दूरतः** दूराद्दूरतरमितिवत् अत्यन्तपरिहर्तव्या इत्यर्थः । इति मृत्यवो वदन्तीत्यन्वयः ।

(5) एवं लुब्धदुष्प्रभुपरोपि । ते च **द्विजिह्वाः** धिग्धिक् जाल्म, जाल्म, गच्छ गच्छेति द्विरुक्तिजिह्वाः ; एकशब्दस्य द्विवारमुच्चारयितारः कोपवेगादित्यर्थः । **जगतां प्राणान् निगिरन्तः** प्राणत्यागपर्यन्तमानभङ्गमुत्पादयन्तः । उच्यते हि—नवीनदीनभावस्य याचमानस्य मानिनः । वचोजीवितयोरासीत् पुरो निस्सरणे रणः इति । तथा च मानिनां याच्ञाप्रवृत्तिरेव प्राणनिस्सरणहेतुः ; याच्ञाभङ्गस्तु सुतरामिति भावः । **मुखैः** विषतुल्यान् दुर्जल्पान् उद्गिरन्तः **जिह्मवृत्तयः** धनमदादलसव्यापाराः तद्दर्शनमेव विलम्बलभ्यमिति भावः । **दूरतः परिहर्तव्याः** । 'लुब्धद्वारदुरासिकापरिभवैस्तोषं जुषेथा मनः' 'दुरीश्वरद्वारबहिर्वितर्दिकादुरासिकायै रचितोऽयमञ्जलिः' इति दत्तजलाञ्जलिप्रक्षेपं तद्गृहद्वारसम्बन्धोऽपि परिहरणीय इति यावत् ।

(6) एवं मेघपरतयापि । **जगतः प्राणान्** । **प्राण**पदं पञ्चवृत्तिप्राणतुल्यत्वनिर्देशात् बहुवचनम् । विषं जलं **निगिरन्तः** समुद्रादौ अवतीर्य भक्षयन्तः **मुखैः** मुखस्थानीयैः पार्श्वभागैः **उद्गिरन्तः** उद्वमन्तश्च **द्विजिह्वाः** पार्श्वद्वये जिह्वासदृशविद्युद्विशिष्टाः **जिह्मवृत्तयः** इतस्ततः कुटिलं पर्यटन्तः मेघाः **दूरतः परिहर्तव्याः** । वर्षणसमये मेघावृतदेशादन्यत्रापसरणं कर्तव्यमिति भावः । अन्यथा वृष्टिवज्रादिपातः स्यादिति । यद्वा **परिहर्तव्यादिति** पदच्छेदः । **विजिह्वाः** विविधविद्युज्जिह्वाः । जिह्वामन्तरेण निगिरन्त उद्गिरन्तश्चेति विरोधाभासो वा । अत एव कपटवृत्तयः ऐन्द्रजालिकवत् **परिहर्तव्यात् दूरतः** उपद्रवकारिणोऽप्यपेक्षणीया एव ।

(7) एवं जैनादिपरतयापि। **जगतः प्राणान्**—प्राणो ब्रह्मेत्युक्तं परं ब्रह्म, प्राणस्थानीयान् वेदान् वा **निगिरन्तः** अपलपन्तः **विषं** विषतुल्यं विरुद्धवाक्यम्—स्यादस्ति, स्यान्नास्तीत्यादिकम् उद्गिरन्तः। अत एव **द्विजिह्वाः** जिह्वाशब्दविवक्षितवाग्द्वयशालिनः सर्वेषु सत्त्वमसत्त्वं च स्थापयन्तः **जिह्मवृत्तयः** इन्द्रजालादिकपटव्यापारनिरताः। उक्तं हि, "शिथिलोदयसप्तभङ्गिशिक्षाविषमोपन्यसनव्यथाविलक्षाः। मलिनास्त इमे मयूरपिञ्छभ्रमणैरेव विलोभयन्ति मन्दान्" इति। ते च **दूरतः परिहर्तव्याः**। 'बुद्धरुद्रादिवसतिं श्मशानं शवमेव च। अटवीं राजधानीं च दूरतः परिवर्जयेत्' इति शास्त्रविधानादिति भावः। उक्तं हि सङ्कल्पसूर्योदये—"अमीषामादित्यस्तम्भनपाषाणस्फोटनप्रतिमाजल्पनादिविप्रलम्भोपायानां भवत्प्रसाद एव प्रतिक्षेपकर्ता....उत्सार्यन्तामेते दृष्टिगोचरात्" इति।

(8) अत एव रुद्रपरोपि बोधः। ते च संहाराधिकृतत्वात् जगत्प्राणान् प्रळयेषु भक्षयन्तः **मुखैः** स्वकण्ठैः विषं **उद्गिरन्तः** प्रकाशयन्तः। नीलकण्ठत्वात् विषं भुक्तमेभिरिति ख्यापयन्त इत्यर्थः। **द्विजिह्वाः** रुद्रो वा एष यदग्निस्तस्यैते तनुवौ। घोराऽन्या शिवाऽन्या। यच्छतरुद्रीयं जुहोति यैवास्य घोरा तनूस्तां तेन शमयति। यद्वसोर्धारां जुहोति, यैवास्य शिवा तनूस्तां तेन प्रीणातीत्युक्तदेहद्वयवत्त्वात् जिह्वाद्वयविशिष्टाः। जिह्वाग्रहणमत्र जगद्ग्रसनाधिकृतत्वात् त्याज्यतानिमित्तं द्योतयति। **जिह्मवृत्तयः** अतिक्रूरव्यापाराः; रुद्रो वै क्रूर इत्याद्युक्तेः। **दूरतः परिहर्तव्याः** तदीयपर्यन्तं दूरपरित्याज्याः। उक्तं हि—शैवान् प्रति सङ्कल्पसूर्योदये, 'एते च नैगमिकधर्मकळमोपमर्दिनः कडंकरीया इव दूरतः परिहरणीयाः' इति।

(9) एवं प्राकृतपदार्थपरतयापि। ते च जगति स्थितान् **प्राणान्** जीवात्मनः **निगिरन्तः** स्वस्मिन् अन्तर्भावयन्तः प्रकृतौ लीनतां गमयन्तः **मुखैः** मुखभेदैः **विषमुद्गिरन्तः** फलपुष्पपल्लवादिकं बन्धकत्वादिना वस्तुतो विषरूपमपि सुखभेदेन भोग्यतारूपेण जगति प्रकाशयन्तः। 'स्वविषयाश्च भोग्यबुद्धेर्जननीम्' इत्युक्तत्वात्। **द्विजिह्वाः** रजस्तमोरूप जगद्ग्रसनसाधनपदार्थद्वयवन्तः **जिह्मवृत्तयः** 'माया जगन्मोहिनी' इत्युक्तमोहनैकव्यापारवन्तः **दूरतः परिहर्तव्याः** भगवत्प्रपदनाद्युपायवशेन विरजातीरपर्यन्तं गत्वापि तत्रैव परित्याज्याः। दूरं गत्वेति (त्यर्थे ?) ल्यब्लोपे पञ्चमी। प्रकृतिसंबन्धस्य बन्धरूपत्वादिति भावः।

(10) एवमेव ऋतुलिङ्गपरतयाऽप्यर्थः। **परिहर्तव्या** इत्यत्र, परि हा ऋतव्या इति पदत्रयम्। **ऋतव्याः** ऋतुव्यापाराः। ऋतुभ्यो हिता इत्यर्थे, उगवादिभ्यो यदिति यत्प्रत्ययः। ते च **जगतां प्राणान् भक्षयन्तः** स्वपरिक्रमणक्रमेण निखिलजगत्प्राणसंहरणदीक्षिताः।

उक्तं हि 'अहोरात्राणि गच्छन्ति सर्वेषां प्राणिनामिह। आयूंषि क्षपयन्त्याशु ग्रीष्मे जलमिवांशवः॥ नन्दन्त्युदित आदित्ये नन्दन्त्यस्तमिते रवौ। आत्मनो नावबुद्ध्यन्ते मनुष्या जीवितक्षयम्' इति। आरुणकेतुके च श्रूयते-'विशेषणं तु वक्ष्यामः। ऋतूनां तन्निबोधत। शुक्लवासा रुद्रगणः। ग्रीष्मेणावर्तते सह। निदहन् पृथिवीं सर्वाम्। ज्योतिषाऽप्रतिख्येन सः' इति। अस्यार्थः—ग्रीष्मेण

ऋतुना सह **रुद्रगणः** संहारदेवतासंघः **शुक्लवासाः** आतपरूपशुक्लवस्त्रोपेतस्सन् **आवर्तते** परिभ्रमति। किं कुर्वन्। **अप्रतिरूपेण ज्योतिषा** अनिर्वचनीयतेजसा। सः रुद्रगणः पृथिवीं सर्वां निदहन् इति।

विशं जनं प्रति **मुखैः** मुखशब्दितैर्मासपक्षादिभिः **उद्गिरन्तः** उच्चैर्घोषयन्तः। तदपि श्रूयते-'ऋतुर् ऋतुना नुद्यमानः। विननादाभिधावः। षष्टिश्च त्रिंशका वल्गाः। शुक्लकृष्णौ च पार्ष्णिकौ' इति॥ एकः ऋतुः अन्येन ऋतुना **नुद्यमानः** प्रेर्यमाणः, अव्यवधानेन प्रवर्तमानत्वात्। **अभिधावः** आभिमुख्येन धावन् **विननाद**—उच्चैर्घोषं चकार। लोकस्थजनं प्रत्युद्घोषयति। तत्र त्रिंशन्मुहूर्तसहिताः षष्टिर्दिवसा **वल्गाः** सैनिकाः। शुक्लपक्षकृष्णपक्षौ अनुगामिनाविति। मुखशब्दार्थश्च तत्रैव श्रूयते, 'एकꣳ हि शिरो नाना मुखे। कृत्स्नं तदृतुलक्षणम्' इति। ऋतोः शिरएकम्। मुखेनाना द्वे ते च मासावेवेति एकस्य ऋतोः मुखद्वयम्। व्यक्तिभेदात् बहुवचनमिति बोध्यम्।

यद्वा **मुखैः** प्रकारभेदैः। **विषं** प्राणिहननसाधनमायुधं उद्गिरन्तः प्रक्षिपन्तः। 'शस्त्रं तु विषमायुधम्' इति वैजयन्ती। तथा च वसन्तादिकालिकफलपुष्पपल्लवादिप्रदर्शनमुखेन जनमनोमोहजनकमायुधविशेषमेव कमपि प्रयुञ्जाना इत्यर्थः। फलपुष्पादीनां भोग्यबुद्धिमुत्पाद्य बन्धकत्वात्, तद्दर्शनादिमुग्धानामविदितस्वायुरवसानानां 'वृथैव महती याता' इत्युक्तक्रमेण क्लेशजननाच्च जनाकर्षणसाधनायुधविशेषत्वमेवेति भावः। तथा हि श्रूयते—'अभिधून्वन्तोभिघ्नन्त इव। वातवन्तो मरुद्गणाः। अमुतो जेतुमिषुमुखमिव। सन्नद्धास्सह ददृशेह' इति। हेमन्तऋतौ सञ्चरन्तो वायुगणाः जगदिदं जेतुमिषुमुखमिव स्थित्वा सन्नद्धा दृश्यन्त इत्यर्थः। अन्यत्र च, "यत् क्रीडथ मरुत ऋष्टिमन्त आप इव सध्र्यञ्चो धवध्वे। पर्वतश्चिन्महिवृद्धो बिभाय दिवश्चित् सानुरेजत स्वने वः" इति। अत्र भाष्यम्—'हे मरुतः **ऋष्टिमन्तः** वज्रायुधवन्तो यूयं यदा क्रीडां कुरुथ तदानीं वः **स्वने** गर्जने सति **पर्वतश्चित् बिभाय**—पर्वतोऽपि बिभेति। कीदृशः। अत्यन्तं महान्। ऊर्ध्वप्रवृद्धः पर्वतसानुरपि कंपत इति।

द्विजिह्वाः मासद्वयस्य मुखद्वयरूपतायाः, एकꣳ हि शिरो नाना मुखे इति प्रागुक्तश्रुतिसिद्धत्वेन तदग्रभागस्य जिह्वास्थानीयत्वमिति बोध्यम्। **परीत्ये**तदुपसर्गप्रतिरूपकमव्ययम्। परित इत्यर्थः। प्रयुज्यते च 'आघ्रातं परिचुम्बितं परिमुहुर्लीढम्' इति। प्रदक्षिणवृत्त्या इति यावत्। **जिह्मवृत्तयः**। 'एवं नानासमुत्थानाः। कालः संवत्सरꣳ श्रिता' इत्युक्तरीत्या परस्परविरुद्धनानाप्रकारव्यापारभाजस्सन्ति इत्यर्थः। **हेति** खेदे। सुखहेतुवदुपलभ्यमाना अपि अन्ततो दुःखहेतव एवासन्निति विषादद्योतकः।

(11) अथात्र श्रौतप्रक्रियामात्रप्रसिद्धमर्थचतुष्टयम्। तथा हि-(11) अग्निचयनार्थं गरुडाद्याकृतितया कल्प्यमानासु चितिषु तत्तन्मन्त्रसाध्यमिष्टकोपधानमनेकधा विधीयते। तत्र ऋतव्यानामिकाः काश्चन इष्टका मधुश्च माधवश्चेत्यादिमन्त्रकलापसाध्याः। ताश्चैवं विधीयन्ते, 'ऋतव्या उपदधात्यृतूनां क्लृप्त्यै। द्वन्द्वमुपदधाति तस्माद्द्वन्द्वम् ऋतव' इति। तत्र 'मधुश्च माधवश्चेति द्वे ऋतव्ये (!) समानतया देवते' इति कल्पसूत्रविधानात् मन्त्रद्वयेन सकृदेवेष्टकोपधानमिति स्पष्टमन्यचितिवैलक्षण्यम्।

ततश्चायमर्थः—ऋतव्याः ऋतव्यानामका इष्टकाबन्धाः । अत एव पुंलिङ्गता । ते च द्विजिह्वाः । इष्टकाया जिह्वासादृश्यात् इष्टकाद्वयस्य एकदैवोपधानाच्च द्विजिह्वता । तत्रापि परि परितः द्विजिह्वा इत्यन्वयः ; मध्यमचितेश्चतुर्जिह्वत्वात् । श्रूयते हि—'द्वंद्वमन्यासु चितिषूपदधाति, चतस्रो मध्ये धृत्यै' इति । जिह्मयुत्तयः प्रथमं प्राच्यां अथ दक्षिणायां अथ मध्यमे, अथ प्रतीच्यां अथोदीच्यामिति क्रमविधानात् भुजङ्गवत् कुटिलगतयः ।

जगत्प्राणान्, 'प्राणा वा अग्नयः प्राणानेवावरुन्धे' इति विहितान् चित्याग्नीन् निगिरन्तः स्वान्तर्निक्षिपन्तः । तदपि श्रूयते, 'समास्त्वाग्न ऋतवो वर्धयन्त्वित्याह समाभिरेवाग्निं वर्धयति' इति । ऋतवः प्रवर्तमानाः संवत्सरमुखाग्निधारणेनाग्निं वर्धयन्तीति तद्भाष्यम् । ऋतव्याश्च ऋतूनां स्थानम् । 'एतद्वा ऋतूनां प्रियं धाम यदृतव्याः' इति । अतश्च ऋतव्यानां ऋतुद्वाराग्निधारणं सुव्यक्तम् । ऋतूनामपि वा प्राणप्रदत्वात् जगत्प्राणत्वं बोध्यम् । यद्वा, 'प्राणं मे पाहीति पञ्च प्राणभृत ऋतव्या अनूपधाय' इति कल्पसूत्रविधानात् प्राणभृत उपदधाति, ऋतुष्वेव प्राणान् दधाति' इति श्रुतिविधानाच्च ऋतव्योपरि प्राणभृदुपधानस्य साक्षात् ऋतव्यानां प्राणभरणफलकत्वकीर्तनात् सुस्पष्टमेव जगत्प्राणभरणमृतव्यानाम् । उक्तं हि सायणीयभाष्ये, 'ऋतव्योपधानादूर्ध्वं प्राणभृत उपधाने सति ऋतुष्वेव प्राणान् स्थापयति' इति । अथवा जगत्प्राणशब्दितो वायुरेव ; तादृशवायुरूपान् प्राणभृन्नामकान् इष्टकाबन्धान् स्वोपरि धारयन्त इत्यर्थः । तदपि श्रूयते, 'एष वै वायुर्यत् प्राणः । यदृतव्या उपधाय प्राणभृत उपदधाति, तस्मात् सर्वान् ऋतून् अनु वायुरावरीवर्ति' इति । अतो जगत्प्राणभरणम् ऋतव्यानामनेकधा सूपपादमिति ।

मुखैः मुखभागैः । अत्र भागैरित्यर्थः । विषं जलं शैवालं वा । उद्गिरन्तः वमन्तः । तथा हि श्रूयते, 'अवकामनूपदधात्येषा वा अग्नेर्योनिः ; स योनिमेवाग्निं चिनुते' इति । तत्र भाष्यम्, 'उदकजन्यां शैवालापरपर्यायाम् अवकाम् उपर्युपदध्यात् । आपो ह्यग्नेः स्थानम् । अवका च जलस्य कार्यत्वात् जलवदग्नेर्योनिः' इति । तथा च ऋतव्यानामग्रभागे शैवालजलादिवमनं सुव्यक्तमिति बोध्यम् । अत्र च विषशब्दस्य बिसशब्दाभासतामभिमन्यमाना उदीच्याः मृणालशैवालादिपरत्वमप्याचक्षते । अन्ये तु जलाभेदेनोपलम्भात् जलकार्यत्वाद्वा तद्वाचिशब्दाभिधानमिति । तथाविधा ऋतव्येष्टकाबन्धाः दूरतः अस्माकमतिदूरस्थाः । साधरणाग्निसाध्याग्निहोत्राद्यनुष्ठानमप्यस्माकमतिदूरे ; ईदृशमहाग्निचयनेनाग्निनिष्पादनं त्वस्माकं मनसाऽप्यचिन्त्यमिति भावः ।

(12) एवमृतुग्रहपरोऽपि कश्चिदर्थबोधः । तत्र चाग्नौ होष्यमाणानां सोमरसानां ऐन्द्रवायवादिनामसु ग्रहाख्यदारुपात्रेषु तत्तन्मन्त्रेण प्रथमं ग्रहणं विधीयते । तत्र च ऋतुग्रह एवं विहितः, 'यदृतुग्रहा गृह्यन्ते सुवर्गस्य लोकस्य प्रज्ञात्यै' इति । ते च ऋतुग्रहाः ऋतुभ्यो हिता ऋतव्याः । 'षट्कृत्व आह षड्वा ऋतव ऋतूनेव प्रीणाति' इत्युक्तेः । एवं द्विजिह्वाश्च । 'सह प्रथमौ गृह्येते सहोत्तमौ । तस्मात्

द्वौ द्वावृतू उभयतोमुखमृतुपात्रं भवति' इति ऋतुग्रहाणामुभयतोमुखत्वविधानात् मुखद्वयेन च सकृदेव सोमरसग्रहणविधानाच्च । रसग्रहणसाधनत्वात् मुखद्वये **जिह्वा**शब्दव्यपदेश इति बोध्यम् । **जिह्मवृत्तयः** । प्रथमं षट्कृत्वः अथ चतुः अथ द्विः, अथ षट्कृत्वः अथ चतुः अथ द्विः इत्येवं क्रमेण मन्त्रानुवचन विधानात् कुटिलवृत्तयः । **जगत्प्राणान्** जगतां प्राणवत् रक्षणीयान् अमृतत्वरूपत्वात् प्राणप्रदान् वा **अविषम्** अमृतत्वरूपं सोमरसं, 'अविषं नः पितुं कृणु' इति मन्त्रे नः **पितुं** अन्नं **अविषं कृणु** अमृतं कुर्विति भाष्ये व्याख्याकरणात् । **मुखैः** स्वमुखैः **निगिरन्त** उद्गिरन्तश्च, प्रथमं ग्रहणकाले स्वान्तर्निगिरणम् अनन्तरं होमकाले उद्गिरणं च कुर्वन्तः सोमरसस्यामृतत्वरूपत्वञ्च कद्रूब्राह्मणे प्रसिद्धम् । "आनीतां तु निजाक्षरैः" इत्यत्राभिप्रेतश्च । ते च ऋतुग्रहाः अस्माकं **दूरत** एव अग्निष्टोमादिसंस्थाप्रवृत्तेरतीव विरलत्वात् । **हेति** खेदे । तत्तन्मन्त्राणामध्ययनमात्रविश्रान्तेः ; अनुष्ठानपर्यन्ताप्रवृत्तेश्चेति ।

(13) एवमाश्विनग्रहपरतयापि बोधः—स चैवं विधीयते, 'यदाश्विनो गृह्यते यज्ञस्य निष्कृत्यै' इति । ते चाश्विनग्रहा द्विजिह्वाः जिह्वाद्वयपातव्याः ; अश्विन्याख्यदेवताद्वयमुद्दिश्य सकृदेव सोमरसग्रहणस्य सहैव पानस्य च विधानात् । अत एव तन्मन्त्र एवमाम्नायते—'या वां कशा मधुमत्यश्विना सूनृतावती । तया यज्ञं मिमिक्षतम्' इति । अस्यार्थः—हे **अश्विना** अश्विनौ **वां** युवयोः या **कशा** कशातुल्या जिह्वा **मधुमती** मधुना पूर्णा **सूनृतावती** यथार्थवचनविशिष्टा, **तया** जिह्वया **यज्ञं मिमिक्षतं** सेक्तुमिच्छतमिति । प्रत्येकविवक्षया कशाशब्दे एकवचनप्रयोगः । ते चाश्विनग्रहाः **दूरतः परिहर्तव्याः** भक्षणकाले दूरात् प्रदक्षिणीकर्तव्याः । **परिहरणं** च प्रदक्षिणीकरणम्, परितो हरणमिति व्युत्पत्तेः । वेदे चैतदसकृत प्रयुज्यते । 'अनुपरिहारं सादयति' इत्यादौ । तथा च शिरोवेष्टनेन तदीयरसा भक्षयितव्या इत्यर्थः । तच्चैवं विधीयते । 'पुरस्तादैन्द्रवायवं भक्षयति ; तस्मात् पुरस्ताद्वाचा वदति । पुरस्तान्मैत्रावरुणम् ; तस्मात् पुरस्ताच्चक्षुषा पश्यति । सर्वतः परिहारमाश्विनम् ; तस्मात्सर्वतश्श्रोत्रेण शृणोति' इति । भाष्ये चैवं व्याख्यातम् । '**पुरस्तात्** अग्रतः यथागृहीतमेवेत्यर्थः । **सर्वतः परिहारं** शिरः प्रदक्षिणीकृत्येत्यर्थः' इति । तथा चाश्विनग्रहस्य शिरःप्रादक्षिण्येन कुटिलतया भक्षणीयत्वात **जिह्मवृत्तित्वम्** । **वृत्तिः** आहारः **कुटिलाहार** इत्यर्थः । **जगत्प्राणान् निगिरन्तः** स्वान्तःकुर्वन्तः । **स्वान्तःकरणं** च संहरणरूपं धारणरूपञ्च । तच्चैवमाम्नायते । "प्राणा वा एते यद्द्विदेवत्याः ; पशव इडा ; यदिडां पूर्वां द्विदेवत्येभ्य उपह्वयेत, पशुभिः प्राणान् अन्तर्दधीत ; प्रमायुकः स्यात् । द्विदेवत्यान् भक्षयित्वेडामुपह्वयते–प्राणानेवात्मन् धित्वा पशूनुपह्वयते" इति । सर्वत्र सोमरसभक्षणात् पूर्वमिडोपाह्वानं विहितम् । द्विदेवत्यस्थले तु नैवं क्रमः । द्विदेवत्यानां प्राणरूपत्वात् ; इडायाश्च पशुरूपत्वात् । द्विदेवत्यभक्षणात् पूर्वमिडोपाह्वाने तु पशुव्यवधानेन यजमानस्य प्राणा अन्तर्हितास्स्युः । अतो यजमानो म्रियेत । पश्चादिडोपाह्वाने च नायं दोषः । किं तु प्राणानन्तर्निधाय स्वात्मनि संस्थाप्य पशूनुपह्वयत इति । उद्गिरन्त इत्यादेः पूर्ववदेवार्थ इति ।

(14) एवमाघाराख्यहोमविशेषपरतयाप्यर्थः—तत्र चैवं विधीयते—'ऋजुमाघारयति । ऋजुरिव हि प्राणः । सन्ततमाघारयति ; प्राणानामन्नाद्यस्य सन्तत्या अथो रक्षसामपहत्यै । यं कामयेत

प्रमायुकः स्यादिति जिह्मं तस्याघारयेत् प्राणमेवास्माज्जिह्मं नयति ताजक् प्रमीयते' इति । तत्र चार्जवेन सान्तत्येन च आघारणं प्राणादिसन्तत्यै भवति । यं यजमानम् अयं मृतस्स्यादिति अध्वर्युः कामयेत स जिह्मं कुटिलं तस्याघारयेत् । तथा सति यजमानप्राणानां वक्रीकरणात् सद्य एव यजमानो मृतो भवतीत्यर्थः । अतश्च **जिह्मवृत्तयः** जिह्माघारकारिण ऋत्विजः यजमानेन दूरतः परिहर्तव्या इत्यन्वयः ।

सा च जिह्मवृत्तिरभिचाररूपत्वादग्नेर्जिह्वाद्वय एव कार्या । द्वे च ते जिह्वे च **द्विजिह्वे** । तयोर्जिह्मवृत्तय इति विग्रहः । तथा चोक्तं दक्षस्मृतौ, 'हिरण्या कनका रक्ता कृष्णा चैवाथ सुप्रभा । अतिरक्ता बहुरूपा सप्त जिह्वाः प्रकीर्तिताः ॥ हिरण्या पश्चिमे जिह्वा कनका मध्यमे स्थिता । रक्ता चैवोत्तरे जिह्वा कृष्णा दक्षिणदिक्स्थिता ॥ सुप्रभा चैव पूर्वायां अतिरक्ताऽग्निदिक्स्थिता । बहुरूपा च शार्वायां जिह्वास्थानं प्रकीर्तितम् ॥ विवाहे पश्चिमा जिह्वा जातकर्मणि मध्यमा । उत्तरा चोपनयने पितृकार्ये तु दक्षिणा ॥ सर्वकर्मसु पूर्वायामभिचारेऽग्निदिक्स्थिता । शान्तिकर्मणि शार्वायां स्थानकर्म समीरितम् ॥' तति । स्मृतिरत्ने तु–'विवाहे वारुणी जिह्वा मध्यमा यज्ञकर्मसु । उत्तरा चोपनयने दक्षिणा पितृकर्मसु ॥ पूर्वदिक् सर्वकामेषु आग्नेयी शान्तिकर्मसु । ऐशानी चोग्रकार्येषु एतद्धोमस्य लक्षणम् ॥ अज्ञानात् सप्तजिह्वासु होमं यः कुरुते द्विजः । होमो निष्फलतां याति होता च नरकं व्रजेत् ॥'' इति ।

तदेवं स्मृतिरत्नाकरस्मृतिमुक्ताफलोदाहृतस्मृतिद्वयवचनावगतोग्रकार्याधिकाराग्नेय्यैशानीरूपजिह्वाद्वये ये जिह्माघारकर्तार ऋत्विजः ते यजमानेन सुदूरपरिहार्याः । जिह्वान्तरेषु जिह्मवृत्तेर्निष्फलत्वोक्त्या अप्रयोजकत्वात् । ते च **जगतां प्राणान् निगिरन्तः** यं यमुद्दिश्यैवंविधजिह्मवृत्तिः क्रियते तत्तत्प्राणान् संहरन्तः **मुखैः** स्ववक्त्रैः **विषं** विषमन्त्रं **उद्गिरन्तः** उच्चारयन्तश्च । विषमन्त्रोच्चारणमाम्नातम् , 'यद्यभिचरेदमुं जह्यथ त्वा होष्यामीति ब्रूयात् । आहुतिमेवैनं प्रेप्सन् हन्ति यदि दूरे स्यात आतमितोस्तिष्ठेत् । प्राणमेवास्यानुगत्य हन्ति । यद्यभिचरेत्, अमुष्य त्वा प्राणे सादयामीति सादयेत् । असन्नो वै प्राणः प्राणमेवास्य सादयति' इति । तदेवमुक्तमन्त्रैः होमसादनयोः कृतयोः होमात् पूर्वं पश्चाच्च प्राणवियोगकरणावगमात् ईदृशमन्त्रोच्चारयितारः पूर्वोक्तजिह्मवृत्तयः जगत्प्राणनिगरणात् दूरतः परिहर्तव्या इति पर्यवसितार्थः ।

(15) एवं सोमरसाहर्तृगरुडपरोऽपि—**जगत्प्राणान्** अमृतस्वरूपत्वेन जगतः प्राणप्रदान् **अविषं** सोमरसामृतम् 'यं जीवमश्नवामहै न स रिष्यति पूरुषः' इति वचनेन सोमरसपायिनां मरणाभावश्रवणात् । मुखैः निगिरन्त इत्यन्वयः । तत्र श्रुतं गरुडरूपाया गायत्रीदेवतायाः सोमाहरणसमये 'पद्भ्यां द्वे सवने समगृह्णात्, मुखेनैकम् । यन्मुखेन समगृह्णात्, तदधयत्' इति । तत्र पद्भ्यां सोमरसभागद्वयं मुखेन तद्भागमेकञ्च गृहीत्वा, निर्याणसमये मुखस्थितो यो भागस्तमभक्षयदित्यर्थः । **उद्गिरन्तश्च** गूढतया स्थितं सोमरसं प्रकाशयन्तश्च । साधारणगरुडपरत्वे तु जगति स्थितानां भिल्लपल्लीजनानां प्राणान् भक्षयन्तः **विषं** विषवत् अन्तरुष्णायमानं विषमेकम् **उद्गिरन्तः** वमन्तश्चेत्यर्थो बोध्यः । **द्विजिह्वैः** सर्पैः । **अजिह्मा** अनल्पा संपूर्णेति यावत् । 'जिह्मस्तु कुटिलेऽलसे' इत्यमरः । **वृत्तिः** आहारः येषां ते ;

'सुपर्णः पन्नगाशन' इत्युक्तत्वात् । ते दूरतः दूराद्दृष्ट्वा । पूर्ववत् पञ्चमी । परिहर्तव्याः प्रदक्षिणीकर्तव्याः । गरुडदर्शने प्रदक्षिणीकरणविधानादिति भावः ।

(16) एवमाचार्यादिपरतयापि । स्मर्यते हि "प्रासादं देवदेवीयमाचार्यं पाञ्चरात्रिकम् । अश्वत्थं च वटं धेनुं सत्समृद्धि गुरोर्गृहम् । दूरात् प्रदक्षिणीकुर्यात् निकटे प्रतिमां हरेः ॥" इति । अतस्ते दूरतः प्रदक्षिणीकर्तव्या इत्यर्थः । ते च, द्विजिह्वाजिह्मवृत्तय इत्येकं पदम् । द्वयोर्जिह्वयोस्समाहार इति द्विजिह्वम् ; तेन अजिह्मवृत्तयः—अन्तर्जिह्वाबहिर्जिह्वाद्वयेऽप्यकपटवृत्तयः अन्तर्जिह्वापदेनान्तःकरणमेव विवक्षितम् । यद्वा द्विजिह्वेषु पिशुनेष्वप्यकपटवृत्तयः । उक्तं हि, 'शुनि चैव श्वपाके च पण्डिताः समदर्शिनः' इति । ते च जगतः प्राणभूतं परब्रह्म निगिरन्तः स्वान्तःकुर्वन्तः अनुभवन्तो वा ; 'सोऽश्नुते' इत्युक्तेः । अविषं यथा तथा अन्तर्विषरहितं यथा तथा, मुखैः स्ववक्त्रैः उद्गिरन्तः 'सिद्धे महति पाण्डित्ये सनिर्वेदश्चतुर्विधे । प्रणवद्विचतुष्काद्यैः प्रशान्तैरेव मोदते ॥' इत्युक्तक्रमेण सदा-प्रणवाष्टाक्षरादिजपशीलाः । परवञ्चनार्थतामन्तरेण स्वात्मतृप्त्येकप्रयोजनता अविषशब्दविवक्षिता । ते प्रदक्षिणीकार्या इत्यन्वयः । यद्वा विषं व्यापकमन्त्रं सर्वव्यापकं भगवन्तं वा उद्गिरन्त इत्यर्थः । विष्लृ व्याप्तावित्यस्मात् कर्तरि क्विप् । 'विड् व्यापके च विष्ठायां' इति च विश्वमेदिन्यौ ।

(17) एवमर्धचन्द्रबाणपरोऽपि— ते हि जगत्प्राणान् संहरन्तः मुखेषु विषदिग्धत्वात् विषमुद्गिरन्तश्च अग्रद्वययुक्तत्वात् द्विजिह्वाः । प्राणनिगिरणसाधनत्वादग्रभागस्य जिह्वात्वम् । अर्धचन्द्रवत् वक्राकृतित्वात् जिह्मवृत्तयश्च । ते दूरतः तादृशनाराचप्रक्षेपस्थलादतिदूरत एव परिहर्तव्या इति ॥ १० ॥

ஸர்ப்பங்களைப் போன்ற இவர்களை வெகுதூரத்தில் விலக்க வேண்டுமென்கிறார்—

நிகிரந்தோ ஜகத்ப்ராணாந் உத்கிரந்தோ விஷம் முகை:,
தூரத: பரிஹர்தவ்யா: த்விஜிஹ்வா ஜிஹ்மவ்ருத்தய:—10

1 உலகின் உயிர்களையே விழுங்குகின்றவரும், பல முகங்கள் வாயிலாக விஷத்தைக் கக்குகின்றவரும், இரு நாக்கு உடையரும், கோணலான நடத்தை யுடையருமான துஷ்டர்கள் தூரத்திலே விலக்கப்பட வேண்டியவர்.

2 உதாரணம்—உலகின் ப்ராணனை வாங்குகிறவைகளும் தங்கள் வாயினால் விஷத்தைக் கக்குகின்றனவும் வளைந்து வளைந்து செல்லுகின்றனவுமான இரு நாக்கு ஜந்துக்களான ஸர்ப்பங்கள் தூரத்திலேயே விலக்கப்படுமே.

3 ச்லிஷ்ட காவ்யம். அதாவது பல பொருள்களைக் கூறும் சொற்களாலான காவ்யம். இப்படி சப்த சித்ரமாக மட்டும் அமைந்த காவ்யத்தை தூஷிப்பதுமாம். காவ்யத்திற்கு உயிராகும் த்வனி. அதாவது வ்யங்க்யமான பொருள். ரஸமும் உயிராம். உலகில் அறிஞர் இசைந்த இந்த உயிரான அம்சத்திற்கு ஆகாமல், சொற்றிறமைகளால் ஸ்வாரஸ்ய

மில்லாத பல பொருள்களைக் கூறுகின்றனவும், சொல்ல வேண்டும் பொருளை நேர்முகமில்லாமல் சுற்றிச் சுற்றி யறிவிக்கின்றனவுமான இரு பொருட் சொற்களாலான காவ்யங்கள் ஒதுக்க வேண்டியவை. த்வனியோ ரஸமோ முக்கியம். அதில்லாத சப்தசித்ரம் பயனற்றது.

4 உலகின் ப்ராணன்களை அபஹரிக்கிற யமலோகாதிகாரிகள் தங்கள் முகங்களாலே தங்கள் வேலைக்காரர்களைக் குறித்துக் கூறு நிற்கின்றனர். என்னவெனில், த்வயத்தை அதாவது த்வய மந்த்ரத்தை, அல்லது ஹரி என்றுற் போன்ற சொல்லை நாக்கில் உடையவர்கள். கோணலான, ஒழுங்கற்ற செயல்கள் உடையரேனும் வெகுதூரத்திலேயே விடப்பட வேண்டியவர். அவர்களுக்கு நாம் அதிகாரிகளல்லோ மென்று. இப் பொருள் தெளிவதற்காக, விஷம் என்பதை விசம் என்று கொள்க. தன் ஜனத்தை வேலைக்காரனையென்றபடி. உத்தாரர்தத்தில் இதி என்ற சொல்லைச் சேர்க்க வேண்டும். விசம்-வேலைக்காரரைக் குறித்து இதை உத்திரந்த:. சொல்லுகிறுர்கள் என்றதாம்.

5 யாசகர்களின் உயிரை வாங்குகிறவர்கள்விஷயமான பேச்சுக்களைப் பேசுகிறவர்கள் இரு நாக்கு உடையவர்களாய் ஏமாற்றுகிறவர்கள். பணம் சேகரிக்கும் நோக்காலும் பணக்கொழுப்பினுலும் ஒழுக்கமின்றி பல செயல் உடையவர் உலோபிகள். அவர்களை விட்டு விலகுக.

6 உலகுக்கு உயிரானவை மேகங்கள். பல முகமாக விஷத்தை அதாவது ஜலத்தைப் பெய்கின்றன. கீழிருந்து மேலுக்குச் சென்று கீழ் இறங்கி வளைந்து செல்லும் அவை, பல நாக்குப் போன்ற மின்னல்கள் உடையவை. அவற்றைக் கண்டு விலக வேண்டும், மழையில் அகப்படாமைக்காக. அல்லது परिहर्तव्यात् என்று பிரித்து, பரிஹர்த்தவ்யாத் தூரத:-பரிஹரிக்கப்படுமவையில் சேராதவை யென்னலாம்.

7 உலகுக்கு உயிரான வேதங்களை அழிக்கிறவர், இந்த்ரஜாலம் முதலான மாயச்செயல்களைச் செய்து உலகை வஞ்சிப்பவர். த்விஜிஹ்வர் அநேகாந்தவாதிகள் ஜைனர்கள் விலக்கப்படத் தக்கவர்.

8 உலகுக்கும் ஸம்ஹாரம் செய்யும் ருத்ரர் நீலகண்ட்டராய் கழுத்தில் விஷம் தெரியும்படி யிருப்பவர் கோரம் சிவம் என்ற இருவகை மூர்த்தியுடையர். ஸம்ஹாரத்திற்கான செயல் செய்பவர் வெகுதூரத்திலே விலக்கப்பட வேண்டியவர். அதாவது (ப்ரளய) ஸம்ஹாரத்தில் அவர் கையில் அகப்படும்படி ஸம்ஸாரத்தில் நீடிக்காமல் மோக்ஷத்திற்குப் போகவேண்டும். அதற்கு ஏகாந்தி பரமைகாந்தி என்ற நிலை வேண்டும்.

9 ப்ரக்ருதி மண்டலத்திலுள்ள விஷயங்களைப் பற்றியுமாம். ஸம்ஸாரத்திலுள்ள சப்தாதி விஷயங்களாம் வஸ்துக்கள் எல்லா ஆத்மாக்களையும் தங்களுக்குள்ளாக்கி பலபடியாக ஸுகாபாஸங்களாம் விஷத்தை வெளியிட்டு வக்ரமான வழிகளாலே ரஜஸ்ஸு தமஸ்ஸு என்கிற இரண்டு கொடிய நாக்குகளாய், கண்டவற்றையும் உட்கொள்ளக் கருவிகளான வற்றையும் பெற்றவை எவ்வளவு தூரம் சென்றவிடத்திலும் எவ்வளவு உயர்ந்த பதவியிலும் விடத்தக்கவையே.

दूरतः परिहर्तव्या इत्यस्य प्राजापत्यप्रभृतिविभव प्राप्तावपि परिहर्तव्या एवेत्यर्थोऽपि भवेत् ।

10 பரிஹர்த்தவ்யா:-என்றவிடத்தில் பரி ஹா ரிதவ்யா என்று பிரிக்க. ऋतव्याः வஸந்த ருது முதலானவற்றின் வ்யாபாரங்கள் ஜகத்தி லுள்ள ஜீவர்களின் ஆயுளைப் போக்குகின்றனவாய், உண்மையில் விஷ மாய் மேலுக்கு அமுதான சில பலன்களை யளிப்பனவாய், இரண்டு மாஸங்களான பிரிவையுடையனவாய் பலவிதமான செயல்களுக்கும் காரணமாகின்றன. அவற்றைக் கொண்டாடாமல் வைராக்யம் பெற வேண்டும்.

இனி வேதத்திற் சொன்ன சில விஷயங்களை யெடுத்து நான்கு விதமாக உரைக்கலாம்.

11 வைதிகமான அக்னிக்கு ஆதாரமாக கருடாதிகளின் உருவில் இடம் அமைப்பது உண்டு. அதைச் சயனமென்பர். அதற்குப் பலவித மான செங்கல்கள் பல மந்த்ரங்களைக் கொண்டு வைக்கப்படும். அவற் றில் ரிதவ்யா என்னப்பட்ட செங்கல்கள் உண்டு. ஆக ருதவ்யா:-அச் செங்கல்களின் வைப்புக்கள் த்விஜிஹ்வங்கள். இரண்டிரண்டு கல்களாக வைக்கப்படுவதால். ஜிஹ்ம வ்ருத்திகள் கிழக்கு தெற்கு. நடு, மேற்கு, வடக்கு என்றபடி வளைவாக வைக்கப்படுவதால், இவை ஜகத்ப்ராணங் களைத் தமக்குள் கொண்டவை, ருத்வ்யங்களான செங்கல்களை வைத்த பிறகு அதன் மேல் ப்ராண ப்ருத் என்னப்படும் செங்கல்களை வைப்ப தால். அதனுல் அதை ப்ரணதாரணமாக வேதமே ஓதிற்று. இவை விஷத்தை வெளியிடுவனவுமாம். விஷமாவது ஜலம். ஜலத்துடன் சேர்ந்த பாசி. அதன் மேல் பாசியை வைக்க வேண்டுமென்று வேதத்தில் ஓதப்பட்டுள்ளது. இப்டிப்பட்ட செங்கல் அமைப்பும் தூரவே யிருப்பவை. இவற்றை யெல்லாம் செய்ய நமக்கு சக்தி ஏது. அற்ப வைதிக கார்யமே செய்யப்படவில்லையே யென்றபடி. (சயனமில்லாமலும் யாகம் செய்யலா மாகையால் காம்யமான சயனங்கள் ஏன் என்றும் பொருள் ஆகலாம்.) பரி-ஹா-ருதவ்யா: என்று இங்கும் பிரிக்க மேலேயும் இவ்வாறே)

12 ஸோமரஸங்களை வைப்பதற்குச் சில பாத்ரங்கள் உண்டு. அவற்றில் க்ரஹங்கள் சில. அவற்றில் சிற்சில தேவதைக்கென்று ஸோம ரஸம் க்ருஹிக்கப்படும். அவற்றில் ருது க்ரஹங்கள் சில. அவை ரிதவ்யங் கள். முதலிலும் முடிவிலும் இரண்டிரண்டு பாத்ரமாகச் சேர்த்து ஸோமரஸம் க்ரஹிப்பதால் த்விஜிஹ்வங்கள். மந்த்ரங்கள் ஆறுதடவை, நாலுதடவை, இரண்டு தடவை என எண்மாற்றிச் சொல்லப்படுகிறபடி யால் ஜிஹ்ம விருத்திகள். ஸோமரஸமே ப்ராணம். அதைப் பாத்திரம் கொள்வதால் நிகிரந்த: என்றது. உத்கிரந்த: அவிஷம் என்று பதப் பிரிவாம். அவிஷமாவது அமுதம் ஸோமரஸமே. அதை ஹோமகாலத்தில் விடுவதால் உத்கிரந்த: என்றதாம். அடுத்த அர்த்தத்திலும் உத்கிரந்த: பஎன்தற்கு இதே பொருளாம். இவைகளும் தூரத்தில். யார் இக் காலத்தில் இவற்றை யெல்லாம் அனுஷ்டிக்கிறவர்?

13 இப்படி ருதுக்ரஹம் போலே ஆச்விநக்ரஹ்த்தையும் கூறலாம். அது அச்விநீதேவதைகளைக் குறித்தானபடியால் அவர்கள் இருவராகை யால் இருநாக்குகளால் அருந்தக் கூடியதென, த்விஜிஹ்வமாம். அங்கே மந்த்ரத்தில் கசா என்ற சொல்லால் நாக்கு நவிலப்பட்டுள்ளது. அது தூரத: ப்ரிஹர்தவ்யம். இங்கே பரிஹரணமாவது ப்ரதக்ஷிணமாக்குகை. இவ்வர்த்தத்தில் இதற்கு வேதத்தில் ப்ரயோகம் உண்டு. ஸோமரஸத் திற்கு கடைசியில் பக்ஷணம் (அருந்துகை) ஓதப்பட்டுள்ளது. ஆச்விந க்ரஹஸோமரஸத்தை சிரஸைச் சுற்றி ப்ரதக்ஷிணமாகக் கொண்டு வந்து பக்ஷிக்கவேண்டுமென விதி யுண்டு. அதைச் சொன்னதாம். நேருக்கு நேராக எதிரிலே பக்ஷிக்மாமல் சுற்றிக்கொண்டு வருவதாலே ஜிஹ்மவிருத்தியெனப்படும். இரு தேவதைகளுக்கான வஸ்துவை ப்ராணனென்று சொல்வதால் ஆச்விநக்ரஹஸோமரஸமே ப்ராணம். அதை உட்கொள்வதாவது இடோபாஹ்வானமென்ற கார்யத்திற்கு உட்படுத்துவது. அதாவது மற்றவிடம் போலன்றி இடோபாஹ்வானம் செய்வதற்கு முன் ஆச்விநக்ரஹரஸத்தை புசிப்பது.

14 आघार மென்கிற ஹோமத்தைப் பற்றியதுமாம். நெய் எடுத்து இந்த ஹோமம் செய்யும்போது நேருக்கு நேராக வக்ரமாக்காமல் செய்ய வேணும். யஜமானன் மரணமடையவேணுமென்று நினைக்கும் அத்வர் யுவே கோணலாக ஹோமம் செய்வான் என்று ஓதப்பட்டது. அந்த எண்ணத்துடன் செய்பவனுக்கு அக்னியின் ஜ்வாலைகள் ஏழில் சுப கார்யத்திற்கான ஐந்து போக, ஈசான்யத்திலும் ஆக்நேயத்திலுமிருக்கும் இரண்டு நாக்கு (ஜிஹ்வை) அந்த ஹோமங்களுக்கு இடமாகும். அக்னி க்கு ஏழு ஜ்வாலைகள் உண்டு. அவற்றில் ஐந்து நான்கு திக்குகளிலும் நடு விலுமிருப்பவை. ஒவ்வொரு ஜ்வாலையிலே ஒவ்வொரு ஸந்தப்ர்பத்தில் ஹோமம் தக்ஷஸ்ம்ருத்யாதிகளில் சொல்லப்பட்டது. ஜசான்யதிக்கிலும் ஆக்னேயதிக்கிலுமான ஜ்வாலைகள் இரண்டு. சூன்யம் வைப்பது போன்ற கெட்ட கார்யத்திற்காம். அதனால் आघार ஹோமம் கொடிய தாகச் செய்ப்படும் போது த்விஜிஹ்வமாம். இதற்குத் தக்கவாறு மந்த்ர மும் விஷம் போன்றது சொல்லப்படும். இப்படி சொல்லிக் கொடிதாக ஹோமம் செய்கின்ற ப்ராண ஹாரிகளான ஆட்களை யஜமானன் தூர விலக்கவேண்டுமென்று ச்லோகத்தின் பொருளாம்.

15 நான்கு வைதிக விஷயமான உரைகள் ஆயின. கருடன்விஷய முமாம். கருடன் காயத்ரியைச் சொல்லி ஸோமரஸத்தை அபஹரித்த போது இரு கால்களால் இருபாகங்களையும் முகத்தால் ஒரு பாகத்தையும் எடுத்தது. ஸோமரஸமே ப்ராணம். முகத்தால் எடுத்ததை உண்டு விட்டது. அவிஷமென்று பிரிக்க. அவிஷமான அதை யாரும் காணும்படி வெளிப்படுத்தியது. இருகால்கள் இரண்டு நாக்குப் போலும். அவ்வமு துக்காக மேலே வானத்தில் சுற்றியதால் ஜிஹ்ம வ்ருத்தி. அப்படிப்பட்ட கெருடனை தூரத்தினின்றே ப்ரதக்ஷிணம் செய்ய வேண்டும். அதே பரிஹரணம்-பரித: ஹரணம்.

16 ஆசார்யவிஷயமுமாம் இங்கு த்விஜிஹ்வா ஜிஹ்மவ்ருத்தய: என்று ஒரே பதமாம். இரு நாக்கு உள்ளவரிடத்திலும் அஜிஹ்மமான-கபடமற்ற, நன்மைக்கேயான நடத்தையுடையர்-ஜகத்ப்ராணனான பரமாத்மாவை உட்கொண்டவர். அவிஷம்-அமுதமான வாக்கை முகங்களால் வெளியிடுபவர். அவர்களை ப்ரதக்ஷிணம் செய்க.

17 அர்த்த சந்த்ரமென்ற நாராசபாண விஷயமுமாம். அது ப்ராணனை யபஹரிக்கும், விஷம் பூசப்பட்டிருப்பதால் அதைப் பெருக்கும். இரு முனையுடையதாகையால் த்விஜிஹ்வமாம். வக்ரமாக உடலில் புகும். அதை விலக்க வேண்டும்.

अधिकोन्नतैरपि सुदारुणान्वितैरसकृद्भ्रमत्पशुगणांघ्रिपीडितैः ।
विधिसिद्धनैकगुणसस्यसम्पदां विरसैः स्वभावकठिनैरलं खलैः ॥ ११ ॥

तदेवं खलानां सर्वप्रकारपरिहरणं विधाय स्वस्य तैः धनादिबहुलैः कदाचिदुपकारादिसंभवाद्या-शङ्कायां तदर्थं तत्कालमात्रसंसर्गे को दोष इत्याशङ्क्य तादृशोपकारसंबन्ध एव माऽस्तु ; क्षणमात्रमपि दुष्टैस्संबन्धे पश्चान्महान् अनर्थ एव भवेदित्याह **अधिके**ति ।

(1) **अधिकमुन्नतैरपि** धनविद्यादिबहुलैरपि **सुदारुणेन** अत्यन्तक्रूरकर्मणा क्रूरजनेन वा **अन्वितैः** अनुसृतैः । स्वयं क्रूरत्वात् क्रूरजनसङ्गाच्च धनविद्यादिकमप्रयोजकं विपरीतावहं चेति भावः । **असकृत् भ्रमन्तः** स्वपार्श्वे पर्यटन्तः ये **पशुगणाः** मूढजनसङ्घाः तैः स्वभृत्यशिष्यादिरूपैः **अङ्घ्रौ** पादे **पीडितैः** आश्रितैः । तेषां स्वपादपतनमनुभवद्भिरित्यर्थः । **विरसैः** सदा कलहप्रियत्वेन 'परस्परतिरस्कृतिं परिचिनोति वीरायितम्ः' इत्युक्तरीत्या ऐकरस्यानुभवविरोधिभिः । तत्र हेतुः **स्वभावकठिनै**रिति । 'स्वभावो दुरतिक्रमः' इति भगवता गीतत्वात् कदाप्यपरित्याज्यकठिनभावैरित्यर्थः । स्वस्य **भावे** हृदये **कठिनै**रिति वा । केचिद्वाचा मृदुलं जल्पन्तोऽप्यविश्वसनीया इति भावः । उक्तं हि—'स्वभावकठिनस्यास्य कृत्रिमां बिभ्रतो नतिम् । गुणोऽपि परहिंसायै चापस्य च खलस्य च' इति । **खलैः** दुर्जनैः **अलं** पर्याप्तम् । तत्सम्बन्ध एव माऽस्त्वित्यर्थः । कथञ्चित् तैः स्वस्योपकारसम्भवे किं कर्तव्यमित्यत्राह **विधी**ति । **विधिना** दैववशात् अदृष्टवशाद्वा **सिद्धाः** स्वयं प्राप्ताः **नैकगुणाः** अनेकप्रकाराः **सस्यसम्पदः** धान्यादिसम्पदः येषां तेषाम् । तथा च यत्किञ्चित्कृष्यादिकमाश्रित्य कर्षणादिव्यापार एव श्रेयान् खलमुखदर्शनादित्यर्थः । तथा ह्युक्तं केनचित् कविना अनवरतराजसेवापरिश्रान्तेन .... । यद्वा विधिसिद्धाः नैके ये **गुणाः** आत्मगुणाः तद्रूपाः **सस्यसम्पदः** धान्यसम्पदः येषामिति । तथा च 'आत्माराम आत्मरतिरात्मक्रीडः' इत्युक्तस्वानुभवैकप्रधानानां अन्यजनसंसर्गलभ्यं किमपि वस्तु नास्तीत्यर्थः । अथवा सस्यसम्पत् आमिति पदच्छेदः । भगवत्कटाक्षसिद्धगुणसम्पदेवालमित्यर्थः । तत्सत्त्वे हि, 'अभिलषितदुरापा ये पुरा कामभोगा जलधिमिव जलौघास्ते विशन्ति स्वयं नः' इत्युक्तनीत्या सर्वेऽपि पुमर्थाः स्वयमागच्छन्ति ; न तदर्थं खलादिमुखमवलोकितव्यमिति भावः ।

(2) अन्योऽपि सस्यमर्दनस्थानपरः । विधिसिद्धाः नैकगुणाः बहुविधा सस्यसम्पदः व्रीहि-यवादिधान्यस्तम्बाः येषां तेषां पुरुषाणां तादृशधान्यपृथक्करणार्थम् अनेकानि खलान्यपेक्षणीयानि । 'व्रीह्याद्याघट्टनस्थाने खलं धूर्ते त्वयं त्रिषु' इति रत्नमाला । अतस्तैः अलं पर्याप्तम् । बहुवचनात् बहुत्वावगमः । तानि चाधिकोन्नतानि सस्यादिस्थानापेक्षया अत्युन्नतप्रदेशस्थानि सुदारुणा तन्मध्यस्थेन स्थूलतरमेधि-दण्डेन अन्वितानि संयुक्तानि असकृत भ्रमन्तः पलालसंश्लिष्टधान्यलेशविश्लेषणार्थं तदुपरि परिभ्राम्यन्तः ये पशुगणाः वृषभसङ्घाः तेषामङ्घ्रिभिः पीडितानि विभेदितानि च, विरसानि दृढकुट्टिमरूपतया आर्द्रतारहितानि अत एव स्वभावतः कठिनस्पर्शानि च तथाविधैः खलाख्यस्थानैः अलं पर्याप्तमित्यन्वयः । तदपेक्षा आवश्यकीति भावः ।

(3) एवं कृतघ्नोपाख्यानगतगौतमाख्यखलविशेषपरतयापि बोधो दृष्टान्तार्थमादरणीयः । तद्वृत्तान्तश्च कथितः पूर्वम् एधान् दहन्तीति (1-10)श्लोके । तदयमर्थः-अधिकं ब्राह्मण्यादिजात्या उत्कृष्टैरपि सुदारुणेन अतिभयङ्करेण प्रत्यहं चक्राङ्गादिपक्षिगणमर्दनतद्भक्षणादिकृत्येनान्वितैः असकृद्भ्रमद्भिः महारण्येषु पर्यटद्भिः तत्रस्थानां पशुगणानां दुष्टमृगाणां अङ्घ्रिणा पादेन करस्थानीयेन पीडितैः नखादिभिः विक्षताङ्गैः । व्याघ्रादीनां करावपि पुरोवर्तिनौ पादव्यपदेशभाजावेव, 'चतुष्पादः पशवः' इत्युक्तेरिति भावः । विरसैः—विषु पक्षिषु रसः-प्रीतिः येषां तैः, सर्वदा पक्षिमांसैकलोलुपैः स्वभाव-कठिनैः । महारण्यपरिभ्रमणात् परिश्रान्तस्य घनदोहळिनः समुचितभक्ष्यभोज्यादिजातं मुक्तावज्रमणि-वयादिकूटञ्च समर्प्य शीतबाधापरिहारार्थं अङ्गारराशिं च यथेष्टमुद्दीप्य तत्स्वापसमये स्वयमतिजाग-रूकतया निरीक्ष्य [स्थितं ?] पुनश्च (?) तत्प्रबोधानन्तरं स्वयं क्षणसुप्तं बकराजं नालीजङ्घाख्यमनेकधा स्वपरित्रायिणं पाथेयार्थं निहत्याग्नौ प्रदीप्ते प्रक्षिपतो महाकृतघ्नस्य किमिति वक्तव्यं भावकाठिन्यमनन्य-सामान्यमिति भावः । तादृशैः खलैरलम् । तत्स्मरणमपि महापातकापादकमिति यावत् । केषाम् ? विधिसिद्धैः नैकैः अनेकविधैः आत्मगुणैः परिपूर्णानां नाळीजङ्घादीनाम् । तमपि कृतघ्नं पुनरपि जीवितो बकः समरक्षदितोऽप्यधिकधनादिदानेनेति शान्तिपर्वणि कथाश्रवणादिति भावः ।

(4) एवं 'खराः रुद्राग्निरासभाः' इति कोशवशात् रुद्रादिपरोऽपि कश्चिदर्थः । रलयोरभेदात् खलाः रुद्राः । बहुवचनम् तदवतारभेदप्रदर्शकम् । तैरलम् तदाश्रयणादिकं मा भूत । केषाम् । भगवत्कटाक्ष-सिद्धात्मगुणादिफलसमृद्धानाम् । सस्यं फलम् । वृक्षादीनां फलं सस्यमित्यमरः । सात्त्विकशिरोमणीनां तामसदेवताश्रयणं निष्फलमेवेति भावः । कीदृशैः । अधिकोन्नतैः त्रिमूर्तिघटकतया अत्यन्तमुत्कृष्टैः ; अधिकं शिरसि उन्नतैः ; पञ्चाननतया शिरोधिकैरिति वा । सुदारुणैः भूतगणैः अनुसृतैः ; भूतपति-त्वात् । असकृत् भ्रमन्तः ये पशुगणाः चतुष्पाज्जन्तवः तैः अंघ्रौ पीडिताः । 'अहमेव पशूनामधिपति-रसानि' इति वरप्रदानलब्धपशुगणाधिपत्याः इति यावत् । तादृशैः विरसैः संहाराधिकृतत्वेन 'रक्षिलक्ष-जयचण्डचरिते पुंसि विश्वसिति कुत्र कुमारी' इति न्यायेनाविश्वसनीयैः । स्वभावम् । भवस्येदं भावम् ।

तस्येदमित्यण् । स्वस्य यत् भावं—रौद्रं कर्म तेन कठिनैः । तच्चोक्तं श्रुतिषु, 'रुद्रा वै घातुकाः, रुद्रो वै क्रूरः, रुद्र एव भूत्वाग्निरनूत्थाय हन्यात् । स ईश्वरो रुद्रो भूत्वा प्रजां पशून् यजमानस्य शमयितोः । नमस्ते रुद्र मा मा हिंसीः' इत्यादिषु । एतादृशैः खरैः रुद्रैरलम् ।

(5) एवं पर्वतपरोऽप्यर्थः । **अधिकोन्नतैः** अत्यन्तमुच्चतरैः । अनेन दुरारोहता द्योतिता । **अपिः** समुच्चये । **सुदारुणैः** अतिक्रूरैः, व्याघ्रादिभिः अन्वितैः । अनेन भयस्थानत्वमुक्तम् । **असकृद्भ्रमन्तः** आहारार्थं सञ्चरन्तः ये **पशुगणाः** धेन्वजादयः, तेषामङ्घ्रिभिः **पीडितैः** पाषाणादिभेदनात् दर्दुरीभूतैः । अनेन विषमसञ्चारतोक्ता । **विरसैः** कूपतटाकादिजलाधाररहितैः । अनेन तृष्णादिशमनाभाव उक्तः । **स्वभावकठिनैः** पाषाणमयत्वात् कठिनस्पर्शैः **खरैः** एवंविधक्रौर्यशालिभिः **पर्वतैरलम्**—पर्वतमारुह्य जीवनेनालम् । पर्वताग्रे जीवनं महते क्लेशाय । तच्च मास्तु । केषाम् । विधिसिद्धाः दैवतः प्राप्ताः, अनेकप्रकाराः याः सस्यसंपदः भूपदेशस्थसस्यसमृद्धयो येषां तेषाम् । समप्रदेशवर्तिसस्यवतां पुंसां विषमप्रदेशेषु सस्यादिनिष्पादनेन जीवनम् अनावश्यकमेवेति भावः । श्रूयते हि—'अनसा वहन्त्यपचितिमेवास्मिन् दधाति । तस्मादनोवाह्यं समे जीवनम् । यत्र खलु वा एतं शीर्ष्णा हरन्ति तस्माच्छीर्षहार्यं गिरौ जीवनम्' इति । सोमलतारूपं राजानं शकटेनाऽऽनयेयुः । तदा तस्मिन् पूजा कृता भवति । अत एव समप्रदेशे जीवनं शकटवाह्यम् धान्याद्यानयनसौकर्यात् । शीर्षेण सोमलतां वहति चेत्, गिरौ जीवनमिवापत्प्रदम् । गिरौ भूमिगतपदार्थानयनस्य भूमौ गिरिपदार्थानयनस्य च शीर्षेणैव वाह्यत्वात् (कार्यत्वात् ?) । अतश्च समजीवनशालिनां गिरिजीवनं महाक्लेशायेति भावः ।

(6) एवमेव श्रीमद्धस्तिशैलवृषशैलयदुगिरिप्रभृतिपरतयापि बोधः । क्वचित् भगवत्सेवार्थं पर्वतारोहणमपि श्रेयस्करमेवेत्याह **अधिकेति** । **अधिकोन्नतैरपि** आरोहणसौकर्यहीनैरपि **सुदारुणा** भगवद्रूपेण कल्पवृक्षेण अन्वितैः, 'द्विरदशिखरिसीम्ना सन्नवान् पद्मयोनेः....कलशजलधिकन्यावल्लरीकल्पशाखी', 'भद्रायास्तु मुकुन्दकल्पविटपी शेषाद्रिसङ्गी स नः' इति तत्र तत्रोक्तेः । **असकृत् भ्रमतां** भगवत्सेवार्थमारोहतां **पशुगणानाम्**, 'पशवः पाशिताः पूर्वं परमेण स्वलीलया । तेनैव मोचनीयास्ते नान्यैर्मोचयितुं क्षमाः ॥' इत्युक्तानां जीवात्मसङ्घानाम् अङ्घ्रिभिः **पिडितैः** असकृदारोहणात् विमर्दितैः **विरसैः** । विः पक्षिपरमात्मनोरिति भट्टबाणवचनात् विशब्दः परमात्मवाची । तेन रसः प्रीतिः येषु तैः, भगवत्सम्बन्धवशात् प्रीतिविषयीभूतैः । स्वभावकठिनैः पर्वतैः **अलं** पर्याप्तम् । तादृशपर्वतारोहणमप्यवश्यकर्तव्यम् । केषाम् । **विधिना** ब्रह्मणा सिद्धं यत् **नैकगुणं** अनन्तमहागुणशालि, **सस्यं** महाफलं श्रीमद्वरदरूपम्, तत्सम्पदामिति बहुव्रीहिः, यद्वा विधिना सिद्धैश्च **नैकगुणं** अनेकगुणविशिष्टं 'स्वयमुदग्निनस्सिद्धाद्याविष्कृताश्च शुभालयाः' इत्युक्तप्रकारेण सिद्धादिप्रतिष्ठया महोत्कर्षशालि यत् सस्यं फलम् 'जीमूताय चतुर्मुखाध्वरफलीभूताय तस्मै नमः' इत्युक्त भगवद्रूपफलम्, तच्छालिनाम् । तथा च भगवत्सेवार्थं पर्वतारोहणं कर्तव्यमेवेति फलितम् । अथवा शसयोरभेदात् **शस्या** प्रशस्ता सम्पत् 'अस्ति

मे हस्तिशैलाग्रे वस्तु पैतामहं धनम्' इत्युक्तं महाधनम्, तद्वताम्; 'अबिन्धनधनञ्जयप्रशमदं धनं दन्धनम्' इति न्यायेनान्येषामत्यल्पधनत्वावसायात् धनञ्जयविवर्धनं धनमित्युक्तमेव धनं प्रशस्ततममित्यर्थः।

(7) अन्योऽपि कुम्भकर्णपरतयाऽप्यर्थः। स च **अधिकोन्नतः** आकाशपर्यन्तोन्नतमहाकायः, अत एव कुम्भकर्णकुलगिरिदळनदम्भोळिभूतेत्यन्यत्र कीर्तितम्। यं दृष्ट्वा हि सर्वेऽपि वानरा महाभूतभ्रमात् पलायांचक्रिर इति भावः। **सुदारुणेन** अतिक्रूरहृदयेन रावणेनान्वितः, अनुगन्ता, संयुक्त इत्यर्थः। प्रथमं निषेद्धापि अन्ततो रावणोक्तिमेव शरणीचकारेति। न त्वयं विभीषणवदेकान्तनिषेधनिष्ठ इत्यर्थः। असकृत **भ्रमन्तः** स्वनिद्राभञ्जनाय स्वदेहोपरि परिभ्रमन्तः ये **पशुगणाः** अजादयस्तीक्ष्णखुराः तेषामङ्घ्रिभिः **पीडितः** विघट्टितः, **विरसः** विभीषणवत् भगवत्संश्लेषरसानभिज्ञः, स्वभावतः कठिनदेहश्च। तादृशेन क्रूरेण कुम्भकर्णेन भाग्यवशसिद्धमहागुणसमृद्धफलसम्पदां 'भवद्गतं मे राज्यं च जीवितं च सुखानि च' इति सकलभोग्यवस्तुसमुदायत्वेन भगवन्तमध्यवस्यतां विभीषणादीनाम् **अलम्**। तत्सम्बन्ध एव माऽस्त्वित्यर्थः। अतिदारुणरावणसम्बन्धमपरित्यजता भ्रात्रापि किं कार्यमित्यर्थः।

(8) एवं काणादादिकुतर्कपरोऽप्यर्थः। **खरैः** अतिक्रूरैः असारैर्वा-खलं भूस्थानकल्केष्विति विश्वः। कुतर्कैः। कीदृशैः। **अधिकोन्नतैरपि** अष्टादशविद्याभ्यर्हिततमामान्वीक्षीकीं प्रणिनायेति उत्कृष्टतया पठितैरपि। **सुदारुणान्वितैः** दुरवगाहप्रमेयबहुळैः। उच्यते हि-'गदाधरविनिर्मिता कठिनतर्कदुर्गाटवीनवीनपदवी' इति। अत एव असकृत् **भ्रमन्तः** भ्रान्तिमन्तः ये **पशुगणाः** मूढजनाः न्यायशास्त्रे अप्रविष्टबुद्धयः तेषाम**ङ्घ्रिपीडितं** परस्परपादप्रहारः येषु तैः। तच्छास्त्राभ्यसनस्य परस्परतिरस्कार एव फलमिति भावः। उक्तं हि-'कनत्कथककत्थनक्रमविकल्पितप्रक्रमा जगद्विपरिवर्तिनी जनपदेषु जोघुष्यते' इति, 'वदन् शुष्कं तर्कं परपरिभवार्थोक्तिभिरसौ नयत्यायुः सर्वं निहतपरलोकार्थयतनः' इति च। अत एव **विरसैः** रसविधुरैः; 'नमः प्रामाण्यवादाय मत्कवित्वापहारिणे' इत्युक्तरीत्या काव्यादिसर्वरसविरोधिभिरिति वा। उक्तं हि-'कर्कशतर्कविचारव्यग्रः किं वेत्ति काव्यहृदयानि। ग्राम्य इव कृषिविलग्नश्चञ्चलनयनाकटाक्षवलितानि' इति। स्वभावतः **कठिनैः** कठोरतरैः, दुश्श्रवशब्दबहुळैः, 'कुतर्कशतशर्करानिकरकर्कशा पद्धतिः' इत्युक्तेः; 'घटः पट इतीतरे कटु रटन्ति नैयायिकाः' इति च। विश्वगुणादर्शेऽपि, 'प्रयत्नैरस्तोकैः परिचितकुतर्कप्रकरणाः परं वाचो वश्यान् कतिपयपदौघान् विदधतः। सभायां वाचाटाः श्रुतिकटु रटन्तो घटपटान् न लज्जन्ते मन्दाः स्वयमपि तु जिह्रेति विबुधः॥' इत्युक्तविशेषणपौष्कल्यमुक्तं तर्कशास्त्रे। तादृशैः कुतर्कैरलम्; तदभ्यसनं मा भूत। केषाम्। दैववशसिद्धशमदमादिफलसम्पदाम्, शमदमादयो हि शास्त्रफलम्। 'शमार्थं सर्वशास्त्राणि' इत्युक्तेः। अतः शमविरोधि परस्परपादप्रहारफलं शास्त्रं महापचारावहत्वात् स्वस्वरूपविरुद्धमित्यर्थः।

(9) एवं स्वर्गादिप्राकृतफलसाधको वेदभागोऽप्यनेन व्याख्यातः। तथा हि—वेदभागाः 'वेदाक्षराणि यावन्ति' इत्युक्तात्युत्कृष्टवेदराशिघटका अपि **सुदारुणैः** अतिक्रूरैरर्थैरन्विताः। तदेवाह

असकृदिति। **असकृत् भ्रमतां** इतस्ततः सञ्चरतां पशुगणानां अजघेऽवादीनां **आङ्घ्रि** पादपर्यन्तं सर्वावयवविशसनं येषु तथोक्ताः। न केवलं पशूनां यथेच्छप्रचारभङ्गमात्रं क्रियते, किंत्वामूलाग्रं विशसनमनुशिष्यत इति भावः। अत एवाह उपरिचरः—'पशुयज्ञैः कथं हिंस्रैः मादृशो यष्टुमर्हति' इति। अत एव **विरसैः** वैरस्योत्पादकैः रसरूपब्रह्मकथाविधुरैर्वा, स्वभावतः **कठिनैश्च** पूर्वमीमांसापरिश्रममन्तरेण दुरवगाहसूक्ष्मप्रमेयैः। एतेन स्वल्पाङ्गवैकल्येऽपि 'पशुबधपरिशेषान् पण्डितो नामयज्ञान्' इत्युक्तप्रत्यवायबाहुळ्यं दुष्परिहरमिति सूचितम्। **खलैः** असारभागैः **अलं** पर्याप्तम्। केषाम्। भगवत्कटाक्षलब्धशमदमादिरूपकर्मफलसमृद्धानां 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः' इत्यादिभिः अनभिसंहितफलमनुष्ठितानां कर्मणां शमदमाद्युत्पादनद्वारेण ज्ञानयोगोपयोगिताप्रतीत्या तादृशशमदमादि फलशालिनां कर्मभागोऽकिञ्चित्कर एवेति भावः। अतस्तेषामुत्तरभागाभ्यसनमात्रं भवत्विति फलितार्थः।

(10) एवं स्वर्गादिपरतयापि। **अधिकं** सुखे। कशब्दः सुखवाची। **उन्नताः** उत्कृष्टाः 'यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतं तत् स्वर्गाख्यं परमं सुखम्' इत्युक्तेः। **तैः**, **सुदारुणा** सर्वफलप्रदेन कल्पवृक्षेण अन्वितैः, असकृत् भ्रमन्तः घटीयन्त्रवदारोहावरोहपरम्परामनुभवन्तः। यद्वा **रसकृदिति** पदच्छेदः। रसकृत्सु रसबुद्धिकारिषु, नन्दनोद्यानादिषु भ्रमन्तः पर्यटन्तः ये पशुगणाः 'यथा पशुरेवं स देवानाम्' इति श्रुतिप्रतिपन्नदेवगणभारवहनादिकार्यलब्धपशुनामभाजः स्वर्गगामिपुरुषाः तेषामङ्घ्रिणा **पीडिताः** विमर्दिताः **तैः**, **विरसैः** 'स्वर्गेऽपि पातभीतस्य क्षयिष्णोर्नास्ति निर्वृतिः' इत्युक्तपतनकालस्मरणजनितदुःखभूयिष्ठैः स्वभावतः **कठिनैः** 'निर्धूतेतरपारतन्त्र्यनिरयाः' इत्युक्तेतरपारतन्त्र्यदुःखबहुळैः। आदित आरभ्य दुःखात्मकत्वमनेनोक्तम्, कालक्रमेण रसहानिः विरसैरित्युक्तमिति(क्तेति ?) न पौनरुक्त्यम्। **खलैः** खे लीयमानैः स्वर्गादिभिः असारैर्वा 'नाथे नस्तृणमन्यदन्यदपि वा' इत्यनेन तृणप्रायतोक्तेः। तादृशैः स्वर्गादिलोकै**रलम्**। केषाम्। विधिसिद्धात्मगुणविवेकादिशालिनाम्। नित्यानन्दमहापुरुषार्थे अल्पयत्नसिद्धे परिमितसुख-दोषहुळस्वर्गाद्यपेक्षाऽनुचितैवेति भावः।

(11) एवं नवग्रहपरतयापि। **अधिकोन्नतैरपि** परमोच्चस्थानस्थितैरपि, **सुदारुणेन** क्रूरतरेण पापग्रहेण अन्वितैः—सम्बद्धैः, असकृत **भ्रमन्तः** गगनतले पर्यटन्तः ये पशुगणाः मेषवृषभादयः। छत्रिन्याये[न] पशुघटितसमुदायाः **पशु**शब्देन बोध्यन्ते। तेषां **अङ्घ्रिषु** सपादनक्षत्रद्वयरूपतत्तद्राशिघटकपादेषु **पीडितं** सम्बन्धो येषां तैः तत्तद्राशिसङ्क्रमशालिभिरित्यर्थः। **विरसैः** परस्परशात्रवादिमद्भिः। स्वस्य **भावः** स्थानं तेन कठिनैः। स्वयं शुभा अपि स्वाधिष्ठानस्थानभेदात् पापफलप्रदा अपि जायन्त इत्युक्तमेव पूर्वम्। तादृशैः **खलैः** गगनचारिभिः ग्रहैरलम्। केषाम्। **विधिना** पूर्वकर्मवशेन सिद्धाः प्राप्ताः **नैकगुणाः** अनेकप्रकाराः सस्यसम्पदः फलसम्पदः येषां तेषां तत्तत्कर्मानुगुणफलसम्भवज्ञानवताम्। तथा च सर्वं कर्मानुगुणमेव फलतीति निष्कृष्टज्ञानवतां बहुविधोत्सर्गापवादादिबहुळनवग्रहादिविचारोऽनावश्यक एवेति भावः। अत एव वेदान्तिनः शुभाशुभप्रसङ्गेषु भगवत्सङ्कल्पविभवमेवोद्गिरन्तीति ॥११॥

அதிகோந்நதை ரபி ஸுதாருணைர்வீதை-
ரஸக்ருத் ப்ரமத்பசுகணைங்க்ரிபீடிதை:.
விதிஸித்தநைகருணஸஸ்யஸம்பதாம்
விரஸை: ஸ்வபாவகடிநைரலம் க்கலை:—11

1 (பணத்தினாலோ படிப்பினாலோ) உயர்ந்த பதவியிருலிப்பவரா யினும் மிக பயங்கரமான தொழிலுடன் கூடியவரும், தாங்களை எப்போ தும் சுற்றிக் கொண்டிருக்கும் மூட ஜனங்களாலேயே காலில் வணங்கப் பட்டவரும், ப்ரீதியளிக்காதவரும், இயற்கையில் கொடியருமான முரடர் களின் ஸஹவாஸம் பாக்ய வசத்தினால் பற்பல ஆத்ம குணம் தான்யம் தனமெல்லாம் பெற்றவருக்குத் தகாததாம். (ஸஸ்ய என்பதை சஸ்ய எனவும் படிக்க. கொண்டாடத்தக்க என்றபடி.)

2 இதற்கு உதாரணம்-கலமாவது களம். நெல் சாகுபடி செய்யும் இடம். அதில் தாட்களிலொட்டிய நெல்லைப் பிரிக்க புணைகட்டி மாடு களைச் சுற்றடிக்கும் இடங்களும் உண்டு. அவை மிக மேடாகவும் இடை யில் கயிறு கட்டவான கொம்பு நடப்பெற்றும், வட்டமாகச் சுற்றி வரும் எருதுகளின் திரளின் கால்களால் மெதிக்கப்பட்டும். ரஸம்-ஜலம்) ஈரமில்லால் உலர்ந்தும் உரப்பாகவுமிருக்கும். பாக்யத்தால் பன்மடங்கு அதிகமான தானியம் பெற்ற சொந்தக்காரர்களுக்கு அவை வேண்டும். இல்லையேல் சாகுபடியாகாதே. (அன்றி, அவை வேண்டா. தாட்களை வேலைக்காரர்களுக்கே கொடுத்து விடலாமாகையால் அங்கே கவனிக்க வேண்டியதொன்றுமில்லை யென்னலாம். அலம் என்பதற்கு நிறையும் என்ற பொருளானல் வேண்டுமென்றதாம். வேண்டா என்ற பொருளை யே கொள்வதாம்.) अलमित्यस्य निषेधपरत्वं सुवचमिहापि । अधिकधान्यादिभाजां किं पशुगणमर्दनलभ्यधान्येन, भृत्येभ्य एव तत्त्यागस्य युक्तत्वात् । विशेषणांशे निषेधः ।

3 1-10 ச்லோகத்தில் நாளீஜங்கோபாக்யானம் வரையப் பெற் றுள்ளது காண்க. பணப்பேராசையால் பல இடம் திரிந்து களைத்த கௌதமனென்ற பிராமணனுக்கு நாளீஜங்கனென்ற கொக்கு ஒரு ராக்ஷஸன்மூலம் பொன்மணி முத்தெல்லாம் அளித்து அவனுக்குப் பனிக்குளிர் போகத் தணல் மூட்டி உதவி அவன் உறங்கும்போது பாது காத்திருக்க, அந்த பிராமணன் அதே கொக்கை அது உறங்கும் போது தனக்கு வழியில் ஆஹாரமாக்க அதனை நெருப்பில் பொசுக் கினான். தெய்வ வசமாகக் கொக்கு மீண்டும் உயிர் பெற்றது. பிராம்மண ஜன்மமெடுத்ததால் உயர்ந்தவனாயிருந்தும் கொடிய செயல் உடையனும் காட்டில் ஆஹாரமில்லாமல் பல ப்ராணிகளிடம் தொகையுண்டும் மனத் தில் ஈரம் தயையில்லாதவனும், வெகு நெஞ்சுரப்பு உடையனுமான கௌதமனாலென்ன பாக்ய மூலமாய் எல்லாம் நிறைந்த அந்த நாளீ ஜங்கனுக்கு ? நன்மையே கெட்டவர் விஷயத்தில் தீமையாகும்.

4 கம்-தலை, ஐந்து தலைகள் உண்டாகையால் அதிகம் தலையுடை யரும், ஸம்ஹார கார்யம் செய்வதால் த்ரி மூர்த்தியில் ஒருவரானவரும்,

பயங்கரமான வேஷம் உடையரும், பூத பிசாசகணங்களால் வணங்கப் பட்டு தயையற்று கடினமாயிருப்பவருமான ருத்ரர்கள் பாக்யவசத்தால் சமதமாதிகுணங்களுடன் பகவானை யனுபவிப்பதாம் செல்வம் உடையருக்கு வேண்டா.

5 வயல்வெளிகளில் நன்கு தான்யம் சேகரிக்க பாக்ய முள்ளவர் களுக்கு, மிகவும் உயர்ந்தனவும், பயங்கரமான துஷ்ட மிருகங்களைக் கொண்டனவும், எப்போதும் ஆடு மாடுகளால் மெதிக்கப்பட்டனவும், நீர் இல்லாதவையும், கரடுமுரடமாயுமுள்ள மலைகளாலென்ன ? மலைவாஸம் வேண்டா. (அதனால் தான் சோள தேசத்தில் மலையில்லை போலும்.)

6. மலைகள் வேண்டுமெனவும் பொருளாம். அத்திகிரி, யதுகிரி, அஞ்சனகிரி (வேங்கடமலை) போன்றவை மிகவும் சிறந்தவை, சிறந்த கலப்பவிருட்சமான பகவானைப் பெற்றவை. ஸம்ஸாரிகளான பசுக்க ளெனப்படும் ஜீவர்களால் குழாமாகக் கூடி ஏறப்பட்டவை. விசேஷ ப்ரீதிக்கு இடமாய் உரப்பான அம்மலைகள் பகவத்குணுனுபவம் பண்ணு கிறவர்களுக்குப் பாங்கான இடங்களாகும்.

7 கும்பகர்ணன் மிகப்பெரிய சரீரமுடையவன். பயங்கரமான ஹ்ருதயம் உள்ளவன். தான் உறங்கும் போது எழுப்புவதற்காக ஆடு மாடு யானை முதலானவற்றால் மெதிக்கப்பட்டவன், விபீஷணனைப் போலன்றி விரஸமானவன். அப்படிப்பட்டவன்யோக்யரான விபீ ஷணாதிகளுக்கு இஷ்டமானவனாகான்.

8 இது அஸாரமான தர்க்கக்ரந்தங்கள்விஷயமுமாம். கலமாவது அஸாரம். 'ப்ரதீப: ஸர்வவித்யாநாம்' என்றபடி எல்லாவற்றிற்கும் வேண்டியதாகையால் தர்க்கம் உந்நதமே. ஆனாலும் எளிதிற் ப்ர வேசிக்கப்படமாட்டாமல் பயங்கரமான பரிஷ்காரங்கள் நிறைந்தவை; சாஸ்த்ர ப்ரவேசமில்லாத, விபரீத ஞானமுடைய மூடர்களின் திரளால் மெதிக்கப்பட்டவை. (ஒருவரோடொருவர் சண்டையிடுவதால் வளர்க்கப்பட்டவையென்றபடி.) ரஸானுபவமற்றவை (சுஷ்கதர்க்கம்). சொற்களிலும் கடினமானவை. சமதமாதி குணங்களோடு சேர்ந்து பகவானை அனுபவிக்கும் மஹான்களுக்கு இவை எதற்கு?

असकृद्भ्रमत्पशुगणांघ्रिपीडितैः। अंघ्रिपीडितं पादपीडनं गतिच्छेदः। भ्रान्तवादिगतिच्छेदनमात्रोपयुक्तैः इत्यर्थोपि स्यात्। सदर्थनिर्णयाय एतावत्तर्कापेक्षा नास्तीति तात्पर्यम्।

9 அஸாரமான கர்மகாண்ட பாகம் வேதமென்ற சிறந்த ப்ரமாணத் திலுள்ளதானாலும் பயங்கரமானது. பல ப்ராணி ஹிம்ஸை யுள்ளதாகை யால் (अंघ्रिपीडितम्-தலையிலிருந்து கால் வரையில் ஹிம்ஸை); பலனும் ரஸமானதல்ல; செய்யவும் கடினமாம். அங்குச் சொன்னவை தவம் யாகம் போன்றவை. मैत्रो ब्राह्मण उच्यते என்றபடி ஜபங்களைக் கொண்டே ஸித்தி பெறலாமாகையால் இவை வேண்டா.

10 ஸ்வர்கலோகங்கள் கலங்கள். அதிகம்உயர்ந்த ஸுகமே ஆனாலும், ஸுதாரு-நல்ல மரமான கல்பவிருட்சமிருந்தாலும், போனவர்

களெல்லாம் தேவதைகளுக்கு மாடுகள் போல் உழைத்துக் காலொடிந்திருக்க வேண்டுமே. அப்படி ஊழியராயிருக்கை மிகவும் கடினம். அங்குச் சென்றபோது கீழே விழப் போவதும் தெரியுமாகையால் அந்த ஜீவனம் விரஸமே. அவை வேண்டா-(ரஸக்ருத்-ஆனந்தகரமான இடத்தில்).

11 நவக்ரஹவிஷயமுமாம்-அவை உச்சஸ்த்தானத்திலிருப்பவையும் க்ரூரக்ரஹத்தோடு சேரும். பசுகணமாவது மிருகங்கள் சேர்ந்த கூட்டமாய் மேஷவ்ருஷபாதிகளாம். அங்கு இரண்டே கால் இரண்டே கால் நக்ஷத்ரங்களோடு ஸம்பந்தப் படுமவை பாவங்களாலும் பெரும்பாலும் கடினமாகின்றவையாம். அவற்றிற்கு அத்தன்மைகளை விதித்த ஸர்வேச்வரன்மூலமே ஸித்தித்த குணங்களும் பலனும் ஐச்வர்யமும் உடையவர்களுக்கு அந்த க்ரஹங்கள் கேடு விளைக்கா.

विधिः ग्रहादीनामधिकारादिविधायको भगवान् । तत्कृतविशेषविधिर्वा । तन्मूलसिद्धाः गुणाः, तथा फलानि, संपदश्च येषां तेषां महतां ते ग्रहाः न प्रतिकूलाः । विप्रसंघाशीर्वादविधावपि सति ग्रहाः न प्रतिकूला इत्यप्यर्थः स्यात् । (11)

मुक्ताहारनिषेविता अपि न तद्वृत्त्यै दिशन्त्यन्तरं
बन्धे गाढविमर्दनेऽपि न जहत्यन्योन्यसंपीडनम् ।
उष्णे शीतलतामुपेत्य शिशिरे प्राप्ते भजन्त्युष्णतां
कामान्तःपुरचेटिकाकुचतटीकाठिन्यवन्तः खलाः ॥ १२ ॥

इति कवितार्किकसिंहस्य......सुभाषितनीव्यां खलपद्धतिस्तृतीया ।

उक्तं हि पूर्वश्लोके **स्वभावकठिनै**रिति । तत्प्रकारं च सदृष्टान्तं विशदयति-मुक्तेति । **मुक्ताहारं यथा तथा** परित्यक्तभोजनादिव्यापारं यथा तथा **निषेविता अपि,** अहोरात्रं कैश्चित् समाश्रिता अपि **तद्वृत्त्यै** तेषां जीवनाय **अन्तरम्** अवकाशं न **दिशन्ति** न प्रयच्छन्ति । यद्वा तेषां **वृतिः** आवरणम्, तस्यै **अन्तरम्** अधोवस्त्रमपि न दिशन्ति, 'अन्तरं बहिर्योगोपसंव्यानयोः' इति सूत्रेण तदर्थलाभात् । तथा च भोजनार्थमाहारम् आच्छादनार्थमधोवस्त्रमपि वा न ददतीत्यर्थः । अथवा तेषां **वृतिः** वरणं इष्टप्रार्थनम्; तस्यै अवकाशं न ददति । बहिर्द्वारे अहोरात्रं निषेविता अपि तेषां स्वसेवामपि न प्रयच्छन्तीत्यर्थः । अन्तः प्रवेशमपि नानुमन्यन्त इति यावत् । तत्र हेतुः मनःकाठिन्यमेवेति भावः । तर्हि तेषां निर्बन्धकरणेन पीडाभिसंधिः परित्याज्यतामित्यत्राह **बन्ध** इति । बन्धनश्च कारागृहादौ निर्बन्धकरणम्; गाढविमर्दनं च सम्यक् प्रहरणादिकम्; तस्मिन् कृतेऽपि **अन्योन्यसंपीडनं** परस्परपीडां न जहति । साधुगुणो न जायत इत्यर्थः । 'किं मर्दितोऽपि कस्तूर्या लशुनो याति सौरभम्' इति न्यायात्; 'व्यसनेन तु मूर्खाणां निद्रया कलहेन वा' इत्युक्तेश्च । तत्रापि विशेषमाह **उष्णे** इति । **उष्णे** क्रूरपुरुषे प्राप्ते सति **शीतलतामुपेत्य** तद्भयात् मृदुलस्वभावतामधिगत्य **शिशिरे** साधुपुरुषे प्राप्ते सति उष्णतां भजन्ति । तत्रैव स्वक्रौर्यं सर्वं प्रकटयन्ति । समाधानकरणेपि न शाम्यन्तीत्यर्थः । उक्तं हि, 'अपूर्वः कोऽपि कोपाग्निः सज्जनस्य खलस्य च । एकस्य शाम्यति स्नेहात् वर्धतेऽन्यस्य वारितः ॥'

इति । 'अलकाश्च खलाश्चैव मूर्धभिः सुजनैर्धृताः । उपर्युपरि सत्कारेऽप्याविष्कुर्वन्ति वक्रताम् ॥' इति च । तत्र च शीतलताया न दुर्गुणत्वम्, अपि तूष्णताया एवेति सूचनाय शीतलताया अनुवादतया उष्णतायाश्च विधेयतया निर्देशः ; न तु व्युत्क्रमेणेति द्रष्टव्यम् । तादृशाः **खलाः** दुर्जनाः **कामस्य** मन्मथस्य **अन्तःपुरे** अवरोधे याः **चेटिकाः** अल्पचेट्यः तासां **कुचतटी** स्तनप्रदेशः तत्र यत् **काठिन्यं** कठिनस्पर्शः कौर्यञ्च तद्वन्तः । कुचतटीशब्देन तद्गतकाठिन्यं लक्ष्यते । कुचतटीव(वत् ?) काठिन्यमिति विग्रहात् तादृश-काठिन्यसदृशकाठिन्यवन्त इत्यर्थो लभ्यत इति । यद्यपि काठिन्यमात्रे कुचतटीसादृश्यमनेन प्रतीयते ; न तु पादत्रयोक्तार्थेषु । तथापि पादत्रयार्थानां उक्तकाठिन्यविवरणरूपतया सर्वत्र तल्लाभ इति बोध्यम् । यद्वा काठिन्यवन्त इति पृथक्पदम् । ततश्च काठिन्यवन्तः खलाः कुचतटीरूपा इत्यन्वयात् मुखं चन्द्र इतिवत् तत्तुल्यतालाभः पादत्रयार्थेष्विति द्रष्टव्यम् । अत्र च नीळातुङ्गस्तनगिरितटीति गिरिसादृश्योक्ति-महिम्ना तुङ्गत्वविपुलत्वकाठिन्याद्यवगमः कुचतटीषु प्रसिद्धः । तत्रापि चेटिकाकुचतटीनामनवरतकरमर्दनादि-विरहात् काठिन्यातिशय इति केचिदाचक्षते । ज्योतिश्शास्त्रपरामर्शे तु स्तनमार्दवस्य शुभग्रहफलताप्रती-तेरुत्कृष्टस्त्रीणां मृदुस्पर्शतैव स्तनतटीनामवगम्यते । यथोक्तम् ....। तथा च तत्किङ्करीस्तनतटसादृश्यं सम्यगुक्तमिति ध्येयम् ।

अतश्चैवमर्थः—**मुक्ताफलमयैः** हारैः **निषेविता अपि** विभूषिता अपि **तद्वृत्त्यै** तादृशमुक्ता-हारस्थित्यै **अन्तरं** स्थानं न दिशन्ति । 'अनयोरनवद्याङ्गि स्तनयोर्जृम्भमाणयोः । अवकाशो न पर्याप्तस्तव बाहुलतान्तरे' इति स्वस्यैवावकाशालाभात् खिद्यमानयोः स्तनयोः 'स्वयं तरितुमक्षमः' इति न्यायेनान्या-वकाशदानं कथं युज्यत इति भावः । 'मृणालसूत्रमपि ते न संमाति स्तनान्तरे' इति ह्युक्तम् । बन्धे कञ्चुळिकादिभिर्दृढबन्धने गाढं **विमर्दनेऽपि** कराभ्यां निपीडनेऽपि **अन्योन्यसंपीडनं** वैपुल्यात् परस्परोपमर्दनं **न जहति** न त्यजन्ति । **उष्णे** ग्रीष्मादिसमये शीतलतां शीतस्पर्शवत्ताम् **उपेत्य** प्राप्य **शिशिरे** हेमन्तादिकाले प्राप्ते सति **उष्णताम्** ऊष्मलतां **भजन्ति** प्राप्नुवन्ति । 'शीतकाले भवत्युष्ण-मुष्णकाले च शीतलम् । कूपोदकं वटच्छाया नारीणां कुचमण्डलम् ॥' इति । वरवर्णिनीनां तु सर्वाङ्गेष्वेतदनुशिष्यते, 'शीते सुखोष्णसर्वाङ्गी ग्रीष्मे तु सुखशीतला । भर्तृरक्ता तु या नारी सा भवेद्वरवर्णिनी ॥' इति । **खलाः** असाराः । अत्र च खलानामतिनीचानाम् उत्तमस्त्रीकुचसादृश्यकथन-मप्यधिकोपमा भवेदिति भिया तत्किङ्करीकुचतटसादृश्यमुपवर्णितमिति द्रष्टव्यम् । एवं सामान्यतः स्त्रीजनहृदयमेवातिक्रूरम् ; तत्रापि कौमारकालदुर्मृतकामान्तःपुरस्त्रीहृदयम् ; ततोऽपि तादृश-भर्तृधनादि-हीनतत्पत्नीजनसविधकिङ्करत्वकृत-नित्यपरतन्त्रतादुःखभागिचेटिकाहृदयमत्यन्तक्रूरतममित्यर्थोऽप्यनेन ध्वन्यत इति बोध्यम् ।

अत्र चोष्णे शीतलतामित्यादिभिः क्षणे क्षणे खलानां स्वभावविपर्यासोपवर्णनात् सर्वत्रैक-रूपत्वमेव सत्पुरुषलक्षणं प्रतीयते । तच्च समुद्रे दृश्यत इति समुद्रवदेकरूपतया स्थातव्यं महद्भिरित्यर्थोऽपि

प्रतिपाद्यत इति ध्येयम् । ततश्चात्र नञ्पदपूरणेन तत्सत्त्वस्थले तत्परित्यागेन च समुद्रपरोऽपि बोधो भवति । तथा हि—**मुक्ताहारैः** मुक्ताफलपंक्तिभिः **निषेविताः** सर्वत्र व्याप्ता अपि **तद्वृत्त्यै** तादृशमौक्तिकगणावस्थित्यै **अन्तरं** पूर्णावकाशं **दिशन्ति** प्रयच्छन्ति । **बन्धे** सेतुपथबन्धने **गाढविमर्दने** मन्दराद्रिमन्थेन विमथने च **अन्योन्यसंपीडनं** जलानां परस्परसुसंश्लेषं **जहति**—मध्ये सेतुपर्वतादिव्यवधानेन विभक्तजला भवन्ति । **उष्णे** ग्रीष्मकाले शीतलतामुपेत्य स्थिताः शिशिरकाले प्राप्ते उष्णतां न भजन्ति । सर्वदा शीतलस्वभावत्वात् । पल्वलाद्यल्पजलानां शीतकाले शीतता उष्णकाले उष्णता च दृष्टा । समुद्रादिजलानां तु सर्वदा शीतस्वभावतैव । वैपरीत्यं तु खलानां विस्मयावहमेवेति हृदयम् । एवं तटीकाठिन्यवन्तोपि न । तटाकादीनामपि कठिनतीरवत्त्वमस्ति । समुद्राणां तु न तदपीत्यर्थः ।

(1 क.) एवमत्र विशेषणमहिम्ना पञ्चभूतधर्माः खलेष्वतिदिश्यन्ते । तेन च खलानामचेतनतुल्यतैव ; न तु चिद्धर्मः (र्म ?) ज्ञानादिलेश इति सूचितम् । तथाहि—मुक्ताहारादिनिखिलद्रव्यसंयुक्तमपि गगनं तद्वृत्त्यै तदीयस्थित्यै आधेयतारूपायै अवकाशं न दिशति । गगनस्य सर्वद्रव्यानाधारत्वात् । यद्यपि गगने गच्छति शकुनिरिति प्रयुज्यते—तथापि न तस्य गगनमाधारः, अपि तु पक्षाभिघातोपनीतो वायुरेव । अन्यथा पक्षाभिहतिमन्तरेण गगनगमनप्रसङ्गात् । यद्वा तस्मिन् वृत्तिस्तद्वृत्तिः । मुक्ताहारादिपदार्थानामुपरि गगनसत्त्वेऽपि न तस्य तत्तत्पदार्थवृत्तित्वमित्यर्थः । गगनस्यावृत्तित्वात् । तथा चाकाशधर्मोऽत्राभिहितः । अथ वायुधर्ममाह—बन्ध इति । वायूनां भस्त्रिकादिषु निर्बन्धकरणे व्यजनादिना विमर्दनेऽपि अन्योन्याभिघातं न जहति । स्वतस्सञ्चरिष्णूनां निर्बन्धकरणे परस्पराभिघातस्यावश्यकत्वात् । उष्णे शीतलतामुपेत्येति जलधर्मः, भजन्त्युष्णतामिति तेजोधर्मश्च, काठिन्यवन्त इति च पृथिवीधर्मोऽवगम्यत इति वैचित्र्यविशेषो द्योत्यते ।

(2) एवं सस्यघट्टनस्थानपरोऽप्यर्थः । तत्र च 'व्रीह्याद्याघट्टनस्थाने खलं धूर्ते स्वयं त्रिषु ।' इति नपुंसकलिङ्गतानिर्देशेऽपि खलमत्रास्तीति विग्रहात् अर्शआद्यच्करणेन खलवत्प्रदेशपरतया पुंलिङ्गतोपपत्तिर्बोध्या । तथा च खलवन्तः प्रदेशाः **मुक्ताहारं** वक्त्रबन्धनादिभिः परित्यक्तपलालादिभक्षणं यथातथा गवादिभिर्निषेविता अपि **तद्वृत्त्यै** परस्परासंमर्देन गवादीनां स्थित्यै अवकाशं न ददति । सर्वतः पलालभारप्रकीर्णत्वात् निबिडतमावकाश एव धान्यानां विमथनादिति भावः । एवं **बन्धे सति** सस्यबन्धेषु विद्यमानेष्वपि **गाढविमर्दनेपि** केषांचिद्विघट्टनानन्तरमपि च अन्योन्यं पलालजालानां **संपीडनं** उपमर्दं न जहति । सर्वत्र सस्यबन्धपलालादिनैबिड्यस्य चिरानुवृत्तत्वादिति भावः । **उष्णे** ग्रीष्मकाले **शीतलतामुपेत्य** सर्वतः प्ररूढतृणदूर्वादिशीतवल्लिकामासाद्य तदानीं सस्याद्याघट्टना[भावाद ?] नावश्यकतया तृणादिनिर्मथनेनखलतलपरिष्करणाकरणात् इति भावः । 'वसन्ते सर्वसस्यानां जायते पत्रशातनम्' इति हि श्रूयते । **शिशिरे प्राप्ते** हेमन्तशिशिरादिशीतकालप्राप्तौ सत्याम् उष्णतां भजन्ति । **सर्वत्र** ऊष्मलतरनूतनपलालभारप्राचुर्यात् शीतव्यथाविमोचनक्षमा इति भावः । तटीकाठिन्यवन्तश्च **खलतलेषु** सर्वतो मृत्स्नादिविधूननेन स्थलकाठिन्यकल्पनादिति भावः ।

(3) एवमत्र खलानां कपिस्वभावातिदेशोऽपि गम्यते। तथा हि—मुक्ताहारेण कण्ठे विभूषिता अपि कपयः तादृशमुक्ताहारस्य क्षणं स्थित्यै अवकाशं न प्रयच्छन्ति। अपि तु सद्य एवावच्छिद्य भूमौ प्रक्षिपेयुरिति लोकवादः। वर्ण्यते हि कविना केनचित्, "आघ्रातं परिचुम्बितं परिमुहुर्लीढं पुनश्चर्वितं त्यक्तं वा भुवि नीरसेन मनसा तत्र व्यथां मा कृथाः। हे सद्रत्न तवैतदेव कुशलं यद्वानरेणाऽऽदरादन्तस्सारविलोकनव्यसनिना चूर्णीकृतं नाश्मना॥" इति। एवं बन्धे-शृङ्खलादिभिः कट्यादिषु बन्धने गाढविमर्दनेऽपि-कशादिभिरसकृत् प्रहरणेपि अन्योन्यसंपीडनं एकस्थाने बद्धैस्सह परस्परकलहायितमुपरिपतनादिकञ्च न त्यजन्ति। क्षणमपि कलहं विना न तूष्णीं तिष्ठन्तीति यावत्। तथा उष्णे दण्डादिधरे क्रूरपुरुषे सन्निहिते सति शीतलामुपेत्य मृदुलस्वभावतां शिरोनमनादिरूपां प्राप्य शिशिरे स्त्रीबालादिभीतजने प्राप्ते सति उष्णतां तदुपरि कुंकारादिकं भजन्तीति। एतदेव कापेयकलहोचित इत्यस्य (3. 7.) पूर्वोक्तस्य विवरणमिति बोध्यम्।

(4) एवं कपिकुलपतेर्हनूमतोऽप्यत्र वर्णनं परिस्फुरति। तथा हि-मुक्ताहारेण 'प्रदेहि सुभगे हारं यस्य तुष्टाऽसि भामिनि' इति दिव्यदम्पतिपारितोषिकलब्धेन विभूषिताः। पूजायां बहुवचनम्। तस्य वृत्त्यै स्थिरतया प्रकाशाय अन्तरं वस्त्रमपि न दिशन्ति वस्त्रेण नाच्छादयन्ति। 'हनूमांस्तेन हारेण शुशुभे वानरर्षभः। चन्द्रांशुचयगौरेण श्वेताभ्रेण यथाऽचलः॥' इति ह्युच्यते। एवं बन्धे ब्रह्मास्त्रबन्धे गाढं राक्षसैः प्रहरणे च तेषाम् अन्योन्येन संपीडनं एकेनान्यस्य प्रहरणं तदुपरि प्रक्षेपणरूपं न जहति। एवं उष्णे अग्निदाहे सत्यपि शीतलतां 'शीतो भव हनूमतः' इति सीताप्रसादलभ्याम् उपेत्य स्वयं शीतलदेहो भूत्वापि शिशिरे शीतलतरे अशोकवनिकादौ प्राप्ते उष्णतां दाहकतां भजन्ति। हनूमद्विषये शीतलीभूतोऽप्यग्निरतिशीतलमशोकवनं ददाहेति विरोधप्रतीतिरत्र बोध्या। यद्वा शिशिरे प्राप्तेऽपि, 'शिशिरस्येव सम्पातो लाङ्गूलाग्रे प्रतिष्ठितः' इत्युक्ततुहिनाविर्भावेऽपि उष्णतां शत्रुविषये ऊष्मलतां भजन्ति। यथोच्यते—'तं दृष्ट्वा वानरश्रेष्ठं हनूमन्तं महाकपिम्। कालाग्निरिति सञ्चिन्त्य सर्वभूतानि तत्रसुः॥' इति। एवं काठिन्यवन्तश्च। 'क इत्थमुपसर्पति स्थिरकठोरवीरव्रणः कपिः कदलिकावनं कनकशैलशृङ्गाकृतिः' इति। खलाः आकाश एव लीयमाना इति च। युद्धादिसमय इति भावः।

(5) एवमद्वैतमतसिद्धजीवन्मुक्तपरतयाऽपि कश्चिदर्थः। मुक्ताः जीवन्मुक्ताः। ते च सदेहताकाल एव निवृत्ताविद्यातत्कार्याः। निवृत्तमपि तत्कार्यं बाधितानुवृत्त्या देहानुवृत्तिपर्यन्तमनुवर्तत इति तेषां सम्प्रदायः। निवर्तकतत्त्वज्ञानमात्रं जीवन्मुक्तिकाल एव निष्पन्नमिति। तदेवाह हारेति। हरतीति हारः सर्वजगद्धरणदीक्षितं ब्रह्मज्ञानम्। तेन निषेविता अपि तद्वृत्त्यै तादृशान्तःकरणवृत्त्यै अन्तरम् अवकाशं न दिशन्ति। बन्धनिवृत्तिसाधनमपि ब्रह्मज्ञानमन्ततो विनाशयन्त्येव; ब्रह्मभिन्नत्वात्। यद्वा तद्वृत्त्यै तादृशतत्त्वज्ञानावच्छेदकान्तःकरणपरिणामरूपवृत्त्यै अन्तरं न ददति। अन्तःकरणवृत्त्यवच्छिन्नचैतन्यस्यैव ज्ञानरूपतया तादृशचैतन्यमात्रपरिशेषेऽपि प्रळये तदवच्छेदकवृत्तिनाशाभ्युपगमात्।

बन्धे सति--जीवन्मुक्तिदशायां बन्धेऽनुवृत्तेऽपि, **गाढविमर्दनेऽपि** संस्कारादिरूपसर्वकार्यनिवृत्तिरूपविदेह-कैवल्यदशायामपि **अन्योन्यसंपीडनं** तत्त्वज्ञानेन अविद्यानिवृत्तिः तया तत्कार्यसकलजगन्निवृत्तिः तया च तत्त्वज्ञाननिवृत्तिः अविद्यानिवृत्त्यादीनां निवृत्तिश्च इत्यादिप्रक्रियया परस्परोपमर्दं न जहति । बन्धदशायां स्थूलजगन्निवृत्तिःसंस्कारादिरूपेण तु जगदनुवर्तते ; अनन्तरं तु संस्कारादिरूपस्यापि निवृत्तिः इति तैरुच्यमानत्वादिति भावः । एवं 'मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः । आगमापायिनो नित्यास्तांस्तितिक्षस्व भारत ॥ यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ । समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥' इति गीतानुशासनात् जीवन्मुक्तानां शीतोष्णादिव्यथाविधूननावगमात् **उष्णकाले शीतल-**देहत्वं औष्ण्यासम्बद्धस्वरूपं **शीत**काले तदसम्बन्धरूप**मौष्ण्यञ्च** भजन्तीत्यर्थः । **काठिन्यवन्तः** मनो-दार्ढ्यवन्तश्च । खे ब्रह्मणि लीनाश्च । यद्वा देहादिविशिष्टाः जीवन्मुक्ता देहेन्द्रियान्तःकरणादिमिथ्या-वस्तुपरम्परोपहितत्वात् स्वयमपि मिथ्याभूताः, "यथा गन्धर्वनगरगोपुरकलशोपरिस्थितेन बन्ध्यासुतेन" इत्यादिचूर्णिकोक्ताः सर्वेऽपि मिथ्यात्वदार्ढ्याय परस्परसम्बद्धतया उपवर्ण्यन्ते, तद्वत् । तथा काम एव विदेहतया असद्भूतः । तस्यान्तःपुरं तु सुतराम् । तत्र चेटिकाश्च सुतमाम् । तासां कुचतटी तत्र काठिन्यञ्चेत्यादिकासम्बद्धपरम्परा मिथ्याभूतेति तत्तुल्या एवेत्यर्थः । अत्र च 'प्रज्ञाचक्षुरवेक्ष्यमाण-बधिरश्राव्याः किलाकीर्तयः । गीयन्ते स्वरमष्टमं कलयता जातेन वन्ध्योदरात् मूकानां प्रवरेण कूर्म-रमणीदुग्धोदधे रोधसि' ॥ इतिवत् मिथ्याध्यवसितिरलङ्कारःउपमालङ्कारेण सङ्कीर्यत इति विवेकः ।

(6) एवमत्र सरोभूतवेतालरूपप्राथमिकमुनित्रयपरतयाऽपि बोधः । मुक्तानां आहारः **मुक्ताहारो** भगवान् । [1]**'एतदेवामृतं दृष्ट्वा तृप्यन्ति'** इत्यादिश्रुत्या मुक्तभोग्यत्वावसायात् । तेन **निषेविता अपि** स्वसमीपे संश्लिष्टा अपि तस्य **वृत्त्यै** स्थित्यै स्वेन सह एकवितर्दिकायामवस्थानाय अवकाशं न ददति । पूर्वमुनयो हि गोपपुरे कुत्रचित् गृहदेहल्यां स्थित्वा भगवद्योगपराः स्वमध्ये आगत्य संश्लिष्टेन भगवता सह विमर्दनं प्राप्य सन्तमसबहुले तत्र परस्परमुखावगमविधुराः स्वभक्तिस्नेहादिकृतं कञ्चन मानसदीपमुद्दीप्य स्वमध्ये श्रीमन्तं भगवन्तं साक्षादकार्षुरिति सम्प्रदायविदः । तदेवाह—**बन्ध** इति । **बन्धे** परस्परसंश्लेषे **गाढविमर्दनेऽपि** दृढतरविघट्टनेऽपि अन्योन्यसंपीडनं परस्परदेहपीडाकरणं न जहति ; सर्वेषामपि तदानीं पीडाजननात् । **उष्णे** उष्णरूपे कस्मिंश्चित् दीपे आरोपिते सति **शीतलतामुपेत्य** भगवत्साक्षात्कारेण तत्कटाक्षपातलाभात् 'अभिवर्षति हर्षमार्द्रभावं तनुते ते वरदैष दृष्टिपातः' इत्युक्तार्द्रतारूपशीतमनस्कतां प्राप्य, **शिशिरे प्राप्ते** 'एष ब्रह्म प्रविष्टोऽस्मि ग्रीष्मे शीतमिव ह्रदम्' इत्युक्तातिशीतलतरब्रह्मसंश्लेषे सति उष्णतां सर्वविधमनस्सन्तापं **भजन्ति** विभजन्ति । भागविभागशब्दौ समानार्थकावेवानेकत्र प्रयुक्तौ । अतो भजधातोर्विभागार्थकत्वमप्यविवादमेवेति बोध्यम् ।

---

1 आदित्यरूपदेवमधुविषयमिदं मधुविद्यायाम् । साक्षान्मोक्षविषयकं तु वाक्यमन्य दुपलक्ष्यम् ।

यद्वा शिशिरे प्राप्ते, 'कासारपूर्वं-कविमुख्यविमर्दजन्मा पण्णातटेक्षुसुभगस्य रसो बहुस्ते'।...(7), स्वच्छन्दविक्रमसमुन्नमितादमुष्मात् स्रोतस्त्रयं यदभवत् तव पादपद्मात्। वेतालभूतसरसामपदिश्य वाचं प्रायेण तत्प्रसवभूमिमवाप भूयः' (16) इत्युक्तक्रमेण भगवत्संमर्दजनितेक्षुरसप्रवाहरूपे तत्पादोदक-त्रिपथगाप्रवाहरूपे वा दिव्यप्रबन्धे प्रथमद्वितीयतृतीयशतकरूपे प्रसृते सतीत्यर्थो बोध्यः।

तदेवं खलानामतिधूर्तस्वभावानामत्यन्तपरित्यागस्य विपुलतरं निरूपणात् तद्गुणतत्सङ्गाद्यसंक्रमेण जागरूकैर्वर्तितव्यं विवेकिभिरित्युपदेशोऽत्र फलित इति मन्तव्यमिति दिक्॥

इति श्रीपट्टप्पास्वाम्याख्याविख्यात-श्रीनिवासताताचार्यविरचितायां
सुभाषितनिवीव्याख्यायां हृद्यार्थदीपिकायां खलपद्धतिः।

முக்தாஹாரநிஷேவிதா அபி ந தத்வ்ருத்யை திசந்த்யந்தரம்
பந்தே காடவிமர்த்தநேऽபி ந ஜஹத்யந்யோந்யஸம்பீடநம்.
உஷ்ணே சீதலதாம் உபேத்ய சிசிரே ப்ராப்தே பஜந்த்யுஷ்ணதாம்
காமாந்த:புரசேடிகா குசதடீ காடிந்யவந்த: க்கலா:—12

1 மன்மதனுடைய அந்தப்புரத்தின் வேலைக்காரிகளின் முலைத்தடம் போலே கடினமானவர்கள் துஷ்டர்கள். இரண்டினுடைய கடினத் தன்மைக்கும் ஒத்துமை எவ்வாறெனில்—பெரும்பாலும் சொல்லொத்து மையால் இதைக் கொள்ள வேண்டும். முலைத்தடத்திற்கு முக்தாஹார ஸேவனம் உண்டு. இது துஷ்டர்களுக்கும். ஆகிலும் தங்க இடம் அளிப் தில்லை இரண்டும். முத்துமாலைகளை யணிந்தால், மேலே அவை யிருக்குமே யல்லது இரு முலைகளுக்கும் இடையில் புகா. ஒரு முத்துகூட புக முடியாதபடி முலை பருத்திருப்பதால். துஷ்டர்கள் ,வெகுநாள் ஆஹாரத் தை விட்டுப் பட்டினி கிடக்குமவர் வந்து ஸேவித்தாலும் ஊணோ உடையோ கொடுக்குமளவுக்கு இடம் தருவதில்லை. இதொன்று, மற்றொன்றுவது - எவ்வளவு கட்டிப் போட்டாலும், பலமாக நசுக்கினு லும், ஒன்று மற்றொன்றை (ஒருவர் மற்றொருவரை) பீடிக்கும் தொழிலை விடுவதில்லை. தளர்ச்சி பெறுமல் முலைத்தடங்களும் மூர்க்கர்களும் இதைச் செய்துவருவதாம். மேலும், உஷ்ணத்தில் சீதமாய் சீதத்தில் உஷ்ணமாயிருப்பதுமொன்று. உஷ்ண காலத்திலே குளிர்ந்திருக்கும் ஸ்தனம், குளிர்ந்த காலத்தில் உஷ்ணமாயிருக்கும். மூர்க்கர் தங்தள் மேல் கோபமுண்டு உஷ்ணமாயிருப்பவரிடம் அடங்கி நின்று, அஞ்சினவர் களிடத்தில் ஆர்பாட்டம் செய்வர். உஷ்ணமாயிருப்பவரிடம் அடங்குவது கூட தோஷமோ என்னில், அங்குப் போல் நல்லோரிடம் அடங்கவில்லை யென்பதற்காகச் சொன்னதத்தனை. அன்றி, பொல்லாதவர்களிடத்திலும் உஷ்ணமாயிருந்தால் பரிபவப்படுவார்கள் ; அதனால் நல்லோருக்குச் சில ஸமயம் நன்மை நேரலாம். அவர்களிடம் அடங்கி அவர்களால் தங்களுக்கு வாதை யிராமல் பார்த்துக்கொண்டு நல்லோரை நன்கு

ஹிம்ஸிக்கின்றனர். அவர்களுடைய சீதத்தன்மை பிறரை ஹிம்ஸிக்கவே யாகிறபடியால் தோஷமே. மன்மதஸ்திரீகளை விட்டு வேலைக்காரிகளென்று ஏன் சொல்ல வேண்டுமெனில், ஸ்த்ரீகளில் வேலைகாரிகளின் ஸ்தனத்திற்கு ராணியான ஸத்ரீகளைவிட உரப்பு அதிகமென்றதனால். (அல்லது உலகிலுள்ள லக்ஷணம் வாய்ந்த ஸத்ரீகளெல்லோருமே ரதிதேவிக்குச் சேடிமார் என்று ஸங்கல்ப்பஸூர்யோதயக்ரந்தத்தினின்று தெளியலாம். स्त्रीलक्षणपूर्णाः कामोद्दोपनप्रवणाः सर्वा अपि योषितो रतिदेवीचेटीत्वेन भाव्यन्ते इति संकल्प सूर्योदयादिदृष्ट्या सुवचम् ।) நல்லோர்கள் நேர்மாறுவார்.

(1. க) இங்கே மூர்க்கர்களுக்கு பஞ்சபூதங்களான அசேதனஸ்வ பாவங்களையும் சொன்னதாம். ஆகாசத்தில் ஆதாரமில்லாத இடத்தில் ஒரு வஸ்து தங்கவாகாது. காற்றை ஒன்று சேர்த்தாலும் கலைத்தாலும் ஒன்றோடொன்று மோதும். ஜலம் சீதலம். அக்னி உஷ்ணம், பூமி கடினம். ஆக இத் தன்மையெல்லாம் இவர்களுக்கும் உண்டே.

2 बद्धमुखतया ये मुक्ताहाराः गावः तैर्निषेविता अपि तेषां वृत्त्यै क्षणमपि भ्रमणं विना स्थित्यै अवकाशं न प्रयच्छन्ति । सर्वदा गोबृन्दभ्रमणवन्तः । प्रथमतो लवनानन्तरमेव सस्यानां बन्धने, ततो भूमौ प्रहारेण धान्यपृथक्करणात् गाढविमर्दने च जातेऽपि, पुनः गोभ्रामणेन पलालानां धान्यानां च गोखुरैरन्योन्यसंपीडनं न त्यजन्ति इति पूर्वार्धार्थः। शीतलतामित्यत्र शीतां लतामिति च विग्रहः।

வாய் மூடப்பட்டு நிரஹாரமாக்கினதோடு, நிமிஷங்கூட நிற்காத படி மாடுகளை தாள்மெறிப்பதற்காக, சுற்றுவிக்க இடமாகின்றன. தாள்களைக் கட்டுவதும் தானியத்தை அடிப்பதும் ஏற்கனவே யான பிறகும் தாளால் நெல்லுக்கும் நெல்லால் தாளுக்கும் பீடை வரும்படி சேர்த்து மிதிப்பதை மாடுகள் மூலம் நடத்துகின்றன. மணலின்றி கெட்டித்தரையாய் கொடிகளும் படர்ந்திருப்பதால் கோடையில் குளிர்ந்தும், பயிர்அறுவடைகாலத்தில் ஈரமிராமல் பாதுகாக்கப்பட்டுமிருக்கும் களத்து மேட்டுப்ரதேசங்கள்.

3 இங்குக் குரங்கின் ஸ்வபாவமும் குறிக்கப்பட்டதாகும். குரங்கு களுக்குக் கழுத்தில் முத்துமாலை யிட்டால், அலங்காரமென்று அங்கே அந்த ஹாரத்திற்கு அது இடம் அளிக்குமா. உடனே எடுத்து அறுத்து முகந்து நக்கிக் கடித்து உமிழ்ந்திடும். கயிற்றால் கட்டினாலும் அடித்தாலும் அந்நிலையிலும் ஒன்றோடொன்று குரங்கு சண்டையிட்டே வரும். தண்டிப்பவன் சுடச்சுட சினத்துடன் ஏதேனும் செய்யும்போது அவனுக்கு அடங்கும், மற்ற ஸ்த்ரீ புருஷ பாலர்களுக்கு பயமுறுத்தும். இது கலபுருஷ ஸ்வபாவம்.

4 ஆஞ்ஜநேயரையும் நினைப்பதாம். அந்தரமாவது வஸ்த்ரம். ஸ்ரீராம பட்டாபிஷேகஸமயத்திலே பெருமாளும் பிராட்டியும் அளித்த ஹாரத்தை யணிந்து அது எல்லோரும் காண விளங்கும்படி அதன்மேல் ஆடையிட்டு மறைக்காமலிருந்தார். அசோகவனத்தில் ப்ரஹ்மாஸ்த்ரத்தினால் கட்டுண்டு அரக்கர்களால் அடிக்கப்பட்ட போதும் பகைவரை ஒன்றைஒன்றின் மேலெறிந்து பீடிப்பதை விடவில்லை. வாலில் நெருப்பு

வைத்தபோதும் ஸீதாதேவியின் அருள்பெற்றுத் தாம் குளிர்ந்திருந்தே, குளிர்ந்திருந்த வீடுகளையெல்லாம் எரித்தொழித்தார். அந்தப்புர ஸ்த்ரீ காடின்யத்தை யனுபவிக்க நின்ற ராவணனுக்கு அடிமையாயிருந்த தால் அதற்கு ஒத்த ஹநுமானின் காடின்யம் அரக்கர்களால் அனு பவிக்கப்பட்டது. (இது முக்கியப் பொருளன்று. தானே தோன்றும்.)

5 ஜீவந்முக்திவாதம் சொல்லப்படலாம். முக்தா: ஹார நிஷேவிதா: என்று பிரிக்க. ஜீவந்முக்தர்களாய், உலகத்தையே இல்லையாக்கும் தத்துவஜ்ஞானத்தாலே அடையப்பட்டவராயினும் அந்த ஞானமெனப் படும் வ்ருத்திஜ்ஞானத்தையும் நிறுத்தாமல் அழிக்கின்றனர்; ப்ரஹ்மம் தவிர எல்லாம் தொலைவதால். ஜீவந்முக்தி காலத்தில் சிறிது ஸம்ஸ்கார ரூபமாக ஸம்ஸார பந்தம் தொடரும். அதனை யழிக்கும் தத்துவஜ்ஞான மும் இருக்கும். ஆனாலும் அவித்யை தத்துவஜ்ஞானத்தினால் தொலையும். அவித்யை ஒழிந்ததால் தத்துவ ஜ்ஞானமும் போம். அவித்யா நிவ்ருத்தி என்பதும் ஓர் அவித்யையானதால் அதுவும் தத்வஜ்ஞானத்தால் போம். இப்படி ஒன்றுக்கொன்று அழிக்கும் கருவியாம். சமதமாதிகள் இருப்ப தால் சீதோஷ்ணங்களைப் பொறுப்பதால் உஷ்ண சீதவாதையில்லை யப்போது. இவர் ப்ரஹ்மத்தில் யிருப்பவர். கம் ப்ரஹ்ம.

6 பாட்டுக்குரிய பழையவர் மூவரான முதலாழ்வார்கள்விஷயமு மாம். முக்தாஹாரன் - ஆஹாரமற்றவன் அல்லது முக்தர்களை போக்ய மாகக் கொண்டவன் பகவான். அவனாலே ஓர் இடைகழியில் சேர்க்கப் பட்டவர் பொய்கைமுனி பூதத்தார் பேயாழ்வார் என்ற மூவர். ஆயினும் அவன் உள்ளே புகுந்து நெருக்கவே இடமற்றவரானார். நெருக்குண்ட தால் அசையமாட்டாமல் ஒருவரையொருவர் பீடிப்பவர் போலாயினர். உஷ்ணமெனப்படும் ஞானச்சுடர் ஏற்றினர். பிறகு அவர்கள் மனம் குளிர்ந்தது. அப்படி ப்ரஹ்மானுபவத்தில் ஆழ்ந்து குளிர்ந்தபோது தாபத்ரயமெல்லாவற்றிற்கும் காரணமான பாபங்களெல்லாம் தீயினில் தூசாகுமென்ற படியாக வேண்டும் உஷ்ணமும் பெற்றனர். இவை யெல்லாம் சொல்லமைப்பில் தோன்றும் பொருள்கள். மூர்க்கர்களின் தன்மையை விளக்குவதே இங்கு முக்கியமாம்.

மூன்றும் பத்ததி முற்றும்.

÷÷*

ஸ்ரீ உ. வே. ஸர்வஜ்ஞ ஸ்ரீபட்டப்பாஸ்வாமியுரை இம் மூன்று பத்ததிகளோடு நிற்கும். இனிச் சுருக்கமாக ஒன்பது பத்ததிகளுக்கும் வேறு வுரைகளை யாராய்ந்து உரையாம். ஸ்ரீ:

अस्मिन् सुभाषितनीव्याख्ये काव्यरत्ने अन्यापदेश—अनेकश्लेषार्थगर्भे द्वादशपद्धत्यात्मनि तिसृणामेव पद्धतीनां श्रीपट्टप्पास्वामिप्रणीता हृद्यार्थदीपिकाख्या व्याख्या प्रागुद्यानपत्रिकायां मुद्रिता। तदधिकानुपलम्भात् तावानेव भाग इह तेषां व्याख्यातॄणां दौहित्रेण आयुष्मता मरुत्वान्गाड्यभिजनेन श्रीमता वरदार्येण सादरार्पितं व्याख्यातृस्वहस्तलिखितकोशमेव साक्षादवलोक्य यथावन्मुद्रि। इतः परं प्राचीनश्रीशैलकुलतिलकवेंकटार्यसोमसुत्सूनुश्रीनिवासार्यव्याख्यानादि निरीक्ष्य यथोचितसंयोजनेनावशिष्टभागमुद्रणं करिष्यते। अत्र एतासु तिसृषु पद्धतिषु तद्व्याख्यातः प्रकृतमुद्रितविस्तृतव्याख्यायां दृश्यमानाः पाठभेदाः वाचकेभ्यो विवेकाय प्रदर्श्यन्ते।

पाठभेदाः

	हृद्यार्थदीपिकायाम्	अन्यत्र
श्लोकसंख्या.	2 सहृदयहृदयैः	सहृदयहृदये
	परगुण	पटुगुण
	5 भिषज्यतु	भिषज्यति
	6 शुद्ध्या	शुद्धः
	वहति	सहति
	तदपि	भवति
	8 एधान् दहन्ति शान्तान्	तान् घ्नन्ति हन्त शान्तम्
	प्रकाशैः	प्रणाशैः
	11 चटसा	चटका
	12 गुणस्पष्टा	गुणे स्पष्टा
	मुधा(दा)	मुधा
	17 अगस्त्यस्य	अगस्त्येन
	18 सत्पथे	सत्पथं
	20 सत्कार्यगुण	सत्कार्येगुण
	23 अभिटीकेत	अभिटंकेत
	मशके किं नरपतेः	मशकः किं नरपतिः
	वैधर्म्यनियमम्	वैधर्म्यनियमः
	25 परचिन्तैक	परचित्तैक
	26 युक्तचित्तानां	युक्तवित्तानां
	28 महावंशे	महागोत्रे
	29 उत्पथादुन्नताः	उत्पथा दुर्नदाः
	भ्रमाकुलाः	भ्रमाविलाः
	30 विमर्दिनम्	विमर्दिना
	33 34 श्लोकयोः पौर्वापर्य व्यतिक्रमः	
	33 आकुष्ट	आकृष्ट
	35 विरसैः स्वभाव	विरसस्वभाव

पूर्वव्याख्यायां स्थिता अर्थभेदाः प्रायोऽत्रातिविशदव्याख्यायामन्तर्गता एव। आवश्यकत्वे पश्चात् तद्विचारो भवितुमर्हति।

शुभमस्तु

श्रीः

सुभाषितनीव्यां दुर्वृत्तपद्धतिश्चतुर्थी ४.

गुणजालप्रकर्षेऽपि धीवरत्वेऽपि जन्मतः ।
सर्वतीर्थावगाहेऽपि नीचवृत्तिर्न शस्यते ॥ १ ॥

अथ अभिनवदेशिक वात्स्य वीरराघवाचार्य व्याख्या-

श्रीहयवदनपरब्रह्मणे नमः

प्रथममुजनमीड्यं देशिकं वेंकटेशं
प्रणमति जन एष प्रार्थितैतत्प्रसादः ।
अकृत सदसदर्थस्पष्टसंवित्तये यः
सरसवचननीवीं साधुबह्वर्थगर्भाम् ॥

नानार्थप्रतिभावित्तपट्टप्पास्वामिनिर्मिता ।
पद्धतित्रयविश्रान्ता व्याख्या, येयं प्रकाशिता ॥
श्रीशैल श्रीनिवासार्य मुख्यव्याख्यार्थसंयुता ।
नवानां पद्धतीनां तु नवा व्याख्या विधीयते ॥

वर्णितः प्रथममनिपुणो विज्ञानसामर्थ्यविकलः । अथानिपुणत्वेऽपि निपुणम्मन्यो दृप्तः । ततस्तावत्यनु-सरन्य परद्रोहप्रवणः खलः । इदानीं बाह्यवृत्तमपि दुष्टं येषाम्, ते वर्ण्यन्ते तुरीयपद्धतौ ॥ "आचारहीनं न पुनन्ति वेदा यद्यप्यधीताः सह षड्भिरङ्गैः । छन्दांस्येनं विजहत्यन्तकाले नीडं शकुन्ता इव जातपक्षाः", 'न विद्यया केवलया तपसा वाऽपि पात्रता । यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रचक्षते", "सर्वागमानामाचारः प्रथमं परिकल्प्यते (कल्पितः)", "कुलमाचारकर्मणा" इत्यादिभिर्वृत्तस्याऽऽवश्यकत्वमभिप्रेत्याह—

गुणेति । **जन्मतः**—जन्मप्रभृति **गुणजालानां** गुणसमूहानां प्रकर्षे सत्यपि, **धीवरत्वेऽपि** बुद्ध्या श्रेष्ठत्वेऽपि, **सर्वतीर्थेषु अवगाहेऽपि** सर्वपुण्योदकेषु स्नानेऽपि सर्वगुरुसंनिधिषु च आगममूल-मर्थग्रहणेऽपि । 'निपानागमयोस्तीर्थमृषिजुष्टजले गुरौ' इत्यमरः । **नीचवृत्तिः** निकृष्टाचारः पुरुषः **न शस्यते** न स्तूयते । सर्वं तस्य स्थितमतिशयावहं न भवतीत्यर्थः ।

2. कैवर्तपराऽपि व्याख्या—गुणयुक्तानाम् आनायानामाधिक्येऽपि । गुणाः सूत्राणि । 'जालं समूह आनायः' इत्यमरः । जन्मतः—जात्या धीवरत्वेऽपि कैवर्तत्वेऽपि, सर्वतीर्थेषु–जलावतारस्थानेषु अवगाहनेऽपि नीचवृत्तिः अधोजलान्तस्स्थमत्स्यग्रहणरूपनिकृष्टाचारः तदर्थं निम्नदेशस्थितश्च न शस्यते ।

नन्वस्मिन्नर्थे अपिशब्दकृत्यं किम् । न ह्यानायादेरुत्कर्षप्रयोजकत्वशंकाप्रसक्तिरिति चेत्-नैवम् । निकर्षापादकानाम् आनायधीवरत्वादीनां सद्भावेऽपि सा नीचवृत्तिस्त्यक्ता चेत्-पुरुषः शस्त इति तात्पर्यात् ।

नीचेषु वृत्तिः जीविका यस्येति चार्थः । दृष्टमेतत् विभीषणादौ । अनेन दुराचारस्य कैवर्तसाम्यं ध्वनितम् । एवमर्थद्वयस्थले सर्वत्र यथार्हं ग्राह्यम् ।

துர்வ்ருத்தபத்ததி 4.

குணஜாலப்ரகர்ஷேऽபி தீவரத்வேபி ஜந்மத: |
ஸர்வதீர்த்தாவகாஹேऽபி நீசவ்ருத்திர் ந சஸ்யதே || 1 ||

பிறவிமுதல் பிறப்பிடத்திற்கேற்ற சிறந்த குணங்களும் புத்தியும் பெற்றிருப்பினும், எல்லா தீர்த்தங்களிலே ஸ்நானமும் ஆசார்யர்கள் அனைவரை அண்டிய சாஸ்த்ரங்களெல்லாம் கற்றிருப்பதும் உண்டேயாகிலும் சாஸ்த்ரஸம்மதமான ஆசாரமில்லாதவன் நீசத்தொழிலுடையவன் ச்லாகிக்கத்தக்கவனாகான்.

ஜாதியில் சம்படவன் நூலால் செய்யப்பட்ட வலைகள் உடையவன், மீன் பிடிப்பதில் புண்யம் உண்டோ? அப்பிறவியிலும் அத்தொழிலை விடுவதே நலம். ஜாதித்தொழிலாகையால் குற்றமில்லையென்பது இரண்டாவது பக்ஷம். அது பரோபகாரமான ஜாதித்தொழில்விஷயமுமாம்.

द्विजराजाङ्कसंस्थोऽपि सन्मार्गाचा(का)रवानपि ।
विशुद्धिरहितः कश्चिन्न विन्दत्यकलङ्कताम् ॥ २ ॥

1. अथ न सदाचाराभावमात्रं नीचवृत्तिमात्रं वा दोषः, निषिद्धाचरणमपीत्याह द्विजेति । द्विजराजस्य त्रैवर्णिकश्रेष्ठस्य ब्राह्मणस्य उपनयनफलभूतसांगवेदाध्ययनसंपन्नस्य वा अंके समीपे संस्था स्थितिर्यस्य सः । 'अंकः स्थानान्तिकामर्षरूपकोत्संगलक्ष्मसु' इति विश्वः । यद्वा द्विजराजाङ्के संतिष्ठत इति संस्थः । सुपिस्थ इति कः । यद्वा ब्राह्मणलक्षणभूतयाजनाध्यापनादिमानपि । सन्मार्गाचारवान् शास्त्रविहितधर्माचरणमतिशयेन प्राप्तः । अतिशायने मतुप् । स्वयमतिशयेन यजनादिमानपि विशुद्धिः निषिद्धान्निवृत्तिः तद्रहितः अकलङ्कताम् अपवादराहित्यम् । 'कलङ्कोऽङ्कापवादयोः' इत्यमरः । न विन्दति । उक्तविधस्याविशुद्धिर्झटित्यपवादहेतुः, न त्वन्यादृशे इवोपेक्ष्यते इति भावः ।

2. चन्द्रकलङ्कपरमर्थान्तरम्—द्विजराजस्य चन्द्रस्यांकरूपेण संस्था स्थितिः तद्वानपि, अत एव सतां नक्षत्राणां मार्गे आकाशे चन्द्रेण सह चरन् कश्चित् शशो वा मृगो वाऽन्यो वा पदार्थः विशुद्धेः धवलिम्नो विरहात् कलंकमित्यां न विन्दति । कलंक इति निन्द्यते । द्विजराजस्य चन्द्रस्य अंके उत्संगे स्थितोपीति वा ।

सन्मार्गाकारवानपि इति पाठे सतां यो मार्गः—अनुष्ठानम् , आकारः वेषः तदुभयवानपीत्यर्थः । द्वितीयपक्षे सन् समीचीनः मार्गः मृगसंबन्धी आकारः अङ्कसंस्थानम् ; तद्वानपीत्यर्थः । मृगांक इति प्रसिद्धेः ।

3. भगवत्परोऽपि—**द्विजराजः** पक्षिराजो गरुत्मान् तस्यांके स्थितः यद्वा गरुडचिह्ने गरुडध्वजे रथे स्थितः । **सन्मार्गः** नक्षत्रपथ आकाशः, तद्रूपनीलाकारवान् । **विशुद्धिभिः** विगतशुद्धिभिः **अशुद्धैः** राजसतामसैः रहितः **अकलङ्कतां** सपापताम्, वस्तुतस्तु श्रीवत्सचिह्नराहित्यं न विन्दति । श्रीवत्सः स्वाभाविकत्वात् सर्वदा ; गरुडारूढत्वं नीलवर्णत्वं अशुद्धपुरुषासंगश्च कदाचिन्न स्यादपीति भावः ।

4. ब्रह्मरुद्रपरोऽपि—**द्विजराजः** हंसः तदङ्कसंस्थोऽपि तमारूढोऽपि । ब्रह्मापीति यावत् । **सन्मार्गः** आकाशः तदाकारवान् ...अष्टमूर्तित्वादाकाशमूर्तिकः । उत्कृष्टमृगविशिष्टोपीति वा । सन् **मार्गः** मृगसंबन्धी आकारः यत्र सः चन्द्रः तद्वान् चन्द्रशेखरोऽपीति वा । विशुद्धिरहितत्वात् रजस्तमोमिश्रत्वात् कामक्रोधवत्त्वात् अकलङ्कत्वं न प्राप्नोति ।

5. रावणपरोऽपि—**द्विजराजः** ब्राह्मणः **तदङ्कसंस्थः** ब्राह्मणचिह्नवान् । विश्रवसः पुत्रो हि सः । याजनाध्यापनादिमांश्च, सन्-सदुपदेशकः यद्वा स्वर्णरत्नमयत्वात् उत्कृष्टः **मार्गाकारः** मृगसंबन्ध्याकारः मारीचः तद्वान् । मारीचेन हितमुपदिष्टः, मारीचेनैव सहाऽऽगतश्च, सीतापहारात् विशुद्धिरहितः, वौ जटायौ शुद्धिरहितः द्वेषवानिति । अथवा **विशुद्धिः** शुद्धिहीनः । **अहितः** न हितः विरोधीति वा । स रावणः अका सुखरहिता लंका यस्य सः अकलंकः दुःखमय-दुष्टभूयिष्ठलंकानगराधिपत्यवत्तां न विन्दति । ब्राह्मणत्व-मारीचोपदेशादिमत्त्वेऽपि लंकाधिपत्यहानिर्विशुद्धिराहित्यात् ।

6. चन्द्रपरोऽपि— द्विजराज इति चन्द्रस्य नाम । तादृशोत्कृष्टनामवानपि सतां नक्षत्राणां मार्गे आकाशे रात्रौ नक्षत्रापेक्षया आकारवानपि अतिशयिताकृतिरपि । **अहितः** । अहिशब्दात् पञ्चम्यास्त-सिल् । राहुतः राहुग्रस्ततया विशुद्धिः प्रकाशरहितः **अकलङ्कतां न विन्दति** सकलङ्क एव भवति ।

7. सूर्यपरोऽपि— **द्विजराजः** चन्द्रः **अङ्कस्थः** समीपस्थो यस्य । वासरेषु सूर्यवासरः चन्द्र-वासरसंनिकृष्टः । इतरापेक्षया प्रकाशाधिक्यादिना चन्द्र एव संनिकृष्टः । **सतां** अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुरिति श्रुत्या ब्रह्मविदां यो **मार्गः** अर्चिरादिः तत्र आकारवान् । एतन्मण्डलभेदेनैव तेषां गन्तृत्वात् । नित्यसंनहितभगवद्रूपतया त्रयीमयतया चास्य श्रैष्ठ्यम् । एतादृशस्यापि **अहितः** राहुबलात् विगतशुद्धित्वं सकलङ्कत्वं—राहुग्रासहेतुभूतपापवत्त्वञ्च ।

8. **अथवा द्विजराजाङ्कसंस्थः** जराबलात् जातौ अंकौ द्वौ पलितत्वं देहदौर्बल्यञ्च । तद्विशिष्ट-तया स्थितोऽपि अतिवृद्धोऽपीति यावत् । सतां यो **मार्गः** आचारः **आकारः** वेषः तदुभयवानपि **विशुद्धिरहितः** यौवनदशायां कृतानां पापानां निष्कृतिरहितः साम्प्रतं पापानाचरणेऽप्यकलङ्को न भवति ।

த்விஜராஜாங்க ஸம்ஸ்த்தோऽபி ஸந்மார்க்காசா(கா)ரவாநபி |
விசுத்திரஹித: கச்சித் ந விந்தத்யகளங்கதாம் || 2 ||

1. *நீசமான தொழிலைப் போல் நிஷித்தமானதைச் செய்வதும் தகா தென்கிறார். பிராஹ்மணனுக்கு ஏற்பட்ட அத்யாபனம் (கற்பித்தல்) முதலான செயலுடையனேயாயினும், அநுஷ்டானம் வேஷம் எதுவும்*

நல்லதாயினும், பாபம் செய்யாமை யென்பதில்லாதவன், செய்த பாபத்திற்குப் பரிஹாரம் செய்யாதவன், பாபமில்லாதவனுகான்.

2. சந்திரகளங்கம் விஷயமாக—சந்திரனின் இடையில் இருந்தாலும், ஸந்மார்கமான வானத்தில் மேலே தன் உருத் தோற்ற இருந்தாலும் வெண்மையின்றி கறுப்பாயிருப்பதால் களங்கமாகவேயாம்.

3. விஷ்ணுவிஷயமாம்—பக்ஷிராஜனுன கருடனை த்வஜமாகவுடையனும், ஆகாசம் போன்ற நீலமேனியுடையனும், விசுத்தி—சுத்தியற்ற ப்ரஜைகள் அணுகவாகாதவனுமான பிரானும் என்றும் ஸ்ரீவத்ஸம் என்ற மறுவில்லாமலிருக்கவாகான். கெருடன் இல்லாமலும், நீலநிறமில்லாமலும் அசுத்தர் அணுகவுமிருப்பினும் மறுவின்மையுடையனுவதில்லை. அது இன்றியமையாதது.

4. பக்ஷிச்ரேஷ்டம் ஹம்ஸம்—அதை வாஹனமாகவுடைய பிரமனுனுலும், அஷ்ட மூர்த்தியானபடியாலே ஸந்மார்கமென்ற ஆகாசத்தை மூர்த்தியாகவுடையனும் ஸந்மார்காகாரனுன மானை இடையிலுடையனுன சந்திரனை அணிந்தவனுமான ருத்ரனுனுலும் ரஜோகுணதமோ குணமூலமான அசுத்தியுடையனுனபோது அகளங்கனுகான்.

5. ராவண விஷயமாக—பிராமண வம்சத்திற் பிறவிக்குரிய படிப்பு முதலியன இருப்பினும், ரத்ன ஸுவர்ணமயமான மானுருவம் கொண்ட மாரீசனுடன் வந்து ஸீதையை யபஹரித்து பாபியானவன் (அகம்—ஸுகமில்லாத) ஸுகப்படாத அரக்கரிடமான லங்கைக்குக் கூட அரசனுய் நீடிக்காதபடியானுன்.

6. சந்திரன் விஷயமாக—த்விஜராஜன் என்ற பெயருடையனேயாயினும், நக்ஷத்ரங்களின் மார்க்கமான வானத்திலே அவற்றிற்கு மேலான உருவுடையனுமானுலும், அஹியென்ற ராகுவினுல் பிடிக்கப்பட்டு அசுத்தனுமாகிறுன், களங்க முள்ளவனுமாகிறுன்.

7. ஸூர்ய விஷயமாக—சந்திரன் அருகிலிருப்பவன் என்றபடியிருப்பவனும் மோக்ஷம் போகின்ற ஸத்துக்கள் நெருங்கும்படி பெருமையுடையனுமான சூரியனும் ராகுவினுல் பிடிக்கப்படுவதால் அதற்குத் தக்க பாபம் செய்தவனேயாவான்.

8. த்வி-ஜரா-ஜ-அங்க எனப் பிரிவாம். ஜரையாவது மூப்பு. அதற்கு அடையாளமானவை நிரைத்த மயிரும் உடல்மெலிவும். இவ்விரண்டும் உள்ளவனுகிலும் இந்நிலையில் ஒழுக்கம் வேஷம் எல்லாம் நல்லதேயாயினும் இதற்கு முன் இளமையில் செய்த பாபத்திற்கு ப்ராயச்சித்தம் பண்ணுதவன் பாபமற்றவனுகான்.

प्राचीन महाजनवृत्तत्यागो न युक्त इत्याह—

अवक्रस्तारकाधीशः परिपूर्ण[ः]प्रियोदयः ।
प्राचीं दिशमतिक्रम्य पतनं प्रतिपद्यते ॥ ३ ॥

1. **अवक्रः** ऋजुबुद्धिः। **तारकाणाम्** उत्तारकाणां परापन्निवर्तकानामधीशः। **परिपूर्णः प्रियाणामुदयः**-उत्पत्तिर्यस्य येन च सः। स्वयं प्रियपूर्णः परेषां प्रियकरश्च। एवम्भूतोऽपि **प्राचीं पूर्वपुरुषाद्दतां दिशम्** आचरणप्रकारमतिक्रामति चेत्, **पतनं प्रतिपद्यते** पतितो भवति।

2. चन्द्रः **तारकाणां** नक्षत्राणामधीशः परिपूर्णत्वादेवावक्रः, **प्रियः** सर्वजनेष्टः **उदयः** उत्पत्तिर्यस्य तादृशः परिपूर्णश्चासौ प्रियोदयश्चेति कर्मधारयः। यावत् प्राच्यां दिशि, तावत् उपर्युपरि उच्छ्रायं लभते। अर्धरात्रात् परं तदतिक्रमे क्रमेण प्रतीच्यां पततीत्यर्थः।

3. **तारक**मन्त्रः प्रणवः तदुपासकः **अवक्रः** यथावत् तदर्थज्ञः मन्त्रबलात् सर्वाभीष्टसंपन्नः **प्राचीं दिशमतिक्रम्य** सर्वापेक्षया प्राक्तया कारणभूतपरमपुरुषोपासनमतिक्रम्य त्रिमात्रप्रणवोपासनमकृत्वा अर्वाचीनविषयैकैकद्व्यमात्रोपासकश्चेत् पतनं प्रतिपद्यते। च्यवनार्हफलमात्रप्राप्तेः। तदुक्तं प्रश्नोपनिषदि।

4. **तारकाधीशः** तारकासुररूपः, **अधियः** बुद्धिरहिताः **असुराः** तेषामीशः असुरेशः, तारकः अधीशः नाथः यस्य त्रिपुरासुरवर्गस्य स इति वा; त्रिपुरासुराणां तारकपुत्रत्वात्। प्रथमं स्वयमुपासनकाले अवक्रः ततो वरादिना परिपूर्णेष्टप्राप्तिश्च सन्; **प्राचींदिशमतिक्रम्य** परहिंसारूपनवीनमार्गं देहात्मवादीष्टं स्वीकृत्य स्वादृतप्राच्यमार्गत्यागेन **पतनं** नाशं देहपातं प्रतिपद्यते॥

பண்டைய ஆசாரத்தை விட்டால் கேடு என்கிறார்—

அவக்ரஸ்தாரகாதீச: பரிபூர்ணப்ரியோதய: |
ப்ராசீம் திசம் அதிக்ரம்ய பதநம் ப்ரதிபத்யதே || 3 ||

1. நேர்புத்தியுடையனுய் பிறர்க்குக் கஷ்டம் விலக்குமவர்களில் ச்ரேஷ்ட்டனுய் தானும் இஷ்டம் நிறைந்து பிறருக்கும் இஷ்டத்திற்குக் காரணமாகின்றவனும் பழைய மார்க்கத்தை விட்டு விலகினுல் கீழே விழுகிறுன்.

2. சந்த்ரன் நக்ஷத்ரங்களெல்லாவற்றிற்கும் நாயகன், பர்வத்தில் நிறைந்தபோது கோணலாகாமல் முழு வட்டமாயிருப்பவன், அவனுடைய தோற்றம் எல்லோருக்கும் ப்ரியமாகும். அப்படிப்பட்டவன் கிழக்கு திக்கில் இருக்கும் போது மேன்மேலேறுகிறுன். அதை விட்டு மேல் கடந்தால் படிப்படியாக விழுகிறுன் பாதி இரவுக்கு மேல்.

3. ப்ரணவம் என்ற தாரகத்தின் பொருளை நன்ருகத் தெரிந்து ஜபிப்பவன் இஷ்டமெல்லாம் பெறலாம். பண்டைய நால்படி மூன்று மாத்திரையாக ஜபித்து மூல தெய்வமான வேலவண்ணனை மேவினுல் மோக்ஷம், அவ்வாறின்றி ஒன்று இரண்டு மாத்திரையுடன் ஜபித்தால் இம்மை மறுமைப் பலன்கள் பெறலாம்; அப்போது மீண்டும் ஸம்ஸாரத்தில் வீழ்ச்சியே.

4. தாரகாஸுரன், அதீசன்—அதீ—புத்தியற்றவர்; அசுரர். அவர்களுக்கு அரசன். அவனை நாயகனுக உடைய த்ரிபுராஸுரவர்க்கமுமாம் எல்லாம் வக்ரபுத்தியிராமல் முதலில் தெய்வ வழிபாடு செய்து

தனக்குப் பிரியமானதைப் பெற்றும், பிறகு பழையபடி இராமல் பிறரை வாதிப்பதிலே நோக்காக இழிந்ததால் அடிபட்டு தேஹம் கீழ் விழுந் தொழியும்படி யாயிற்று.

वर्णोत्कर्षो दुष्टानामनर्थायेत्याह—

पततां हन्त केषाञ्चित् भजते मलिनात्मनाम् ।
विशुद्धवर्णयोगोऽपि विपरीतनिमित्तताम् ॥ ४ ॥

1. **मलिनात्मनां** दुर्वासनादूषितमनसां **पततां** द्विजातिकर्महीनानां स्वर्णस्तेयादिपातककारिणाञ्च मध्ये केषाञ्चित् **विशुद्धवर्णयोगः** उत्कृष्टब्राह्मणजातियोगः **विपरीतं** प्रति अधिकपापं प्रति निमित्ततां भजते । **विशुद्धवर्णयोगः** वेदाध्ययनादियोगश्च । "विदुषोऽतिक्रमे दण्डभूयस्त्वम्" इति गौतमस्मृतेः ।

2. **मलिनात्मनां** श्यामाकृतीनां **पततां** पक्षिणां काकानां सताम्, केषांचित् काकानां **विशुद्धवर्णयोगः** शुक्लरूपवत्त्वं जगदनिष्टनिमित्ततां भजते । "पुच्छनक्षत्रमण्डूकं श्वेतवर्णञ्च वायसम् । रात्राविन्द्रधनुर्दृष्ट्वा तद्राष्ट्रं परिवर्जयेत" इति संहिताविशेषे ।

3. **मलिनात्मनां** श्यामानां **पततां** पक्षिणां काककोकिलानां मध्ये केषाञ्चित् **विशुद्धवर्णयोगः** काकेति विना कुहू इति विस्पष्टविभिन्नवर्णयोगः **विपरीतस्य** विरोधस्य निमित्तं भवति । परभृत काकः । परभृतः कोकिलः । कोकिलाण्डं काको रक्षति । शिशुमुत्पद्यमानं स्वकीयत्वेन मन्यते, यावत् कुहू इति शिशुर्न नदति । तन्नादे उत्पन्ने विजातीयत्वबुद्ध्या बाधते चेति ।

4. एवं काकानां **विशुद्धवर्णयोगः** 'वि' इति एकवर्णविशिष्टो योगः । वियोग इति यावत । **परीतस्य** **विभिः** पक्षिभिः परीतत्वस्य । परीतमिति भावे क्तः । **निमित्ततां भजते** । **काके** मृते बहवः काकाः परीत्य शब्दायन्ते ।

5. **मलिनात्मनां** तामसमनसां पातकिनामुत्कृष्टजातियोगः बुद्धिसामर्थ्यातिशयेन सर्वेषामपि जनानां सद्वृत्तभ्रंशादिहेतुतां **भजते** । कुयुक्तिभिः सर्वेषां मनो विपरीते योजयन्ति । अतस्तत्सहवासस्त्याज्यः ।

6. **मलिनात्मनां** तामसशरीराणां **पततां** नीचजन्मवृत्तानां **विशुद्धवर्णयोगः** उत्कृष्टशास्त्राभ्यासः **विपरीतनिमित्ततां** स्वानर्थ—शास्त्रसदर्थक्षोभादिहेतुतां भजते ।

7. **मलिनात्मनां** श्यामानां **पततां** वृक्षात् पतनं भजतां पर्णानां विशुद्धवर्णयोगः शोषणात् धवलवर्णप्राप्तिः **विपरीतस्य** जीर्णतायाः निमित्तम् ।

8. **पततां** लम्बमानतया स्कन्धादौ पातं भजतां **मलिनात्मनां** नीलानां केशानां विशुद्धवर्णयोगः धवलरूपं पलितत्वं **विपरीतस्य** जरामरणादेर्ज्ञापकः ।

9. **पततां** लक्ष्ये पातार्थं गच्छतां तृणशरादीनां **मलिनात्मनां** तृणत्वकार्ष्ण्यायसत्वादिना श्यामानां केषांचित **विशुद्धवर्णयोगः** स्वरमात्रादिभ्रेषरहिततया मन्त्रवर्णयोगः **विपरीतस्य—विः**

पक्षी ; तं काकासुरादिकं प्रति परीतस्य लोकत्रयसंपरिक्रमणेऽपि परितो गमनस्य निमित्तं भवति । मन्त्रबलात् सर्वत्र गमनमिति । तथा विपरीतस्य—पश्चात् तूणीरं प्रति तन्निवृत्तिं प्रति च स वर्णयोगः कारणं भवतीति । मन्त्रबलात् शरः स्वस्थानमायातीति ।

10. केषाञ्चित् पापिनां प्रायश्चित्ताधीनशुद्धिरेव पुनः पापकरणे कारणं भवति ; मलिनात्मतया पापं निवर्तनार्हमिति धैर्यात् ।

பததாம் ஹந்த கேஷாஞ்சித் பஜதே மலிநாத்மநாம் |
விசுத்தவர்ணயோகோऽபி விபரீதநிமித்ததாம் || 4 ||

1. மனம் கெட்டு, செய்யவேண்டுமதைச் செய்யாமையாலும் பாபங்களைச் செய்வதாலும் பதிதர்களாகின்றவர்களுக்கு உயர்ந்த ஜாதியில் பிறப்பு அதிகமான பாபத்திற்கும் தண்டனையின் மிகுதிக்கும் காரணமாகும்.

2. கறுப்பான உடலுடைய பக்ஷிகள் (காக்கைகள்) இருக்க, சில காக்கைகளுக்கு வெண்ணிறச் சேர்க்கையானது உலகின் அநிஷ்டத்திற்குக் காரணமாகும். வெள்ளைக் காக்கை புகுந்த தேசம் பாழாகுமே.

3. கறுத்த பக்ஷிகளான காக்கை குயில் இவைகளுக்கு ஸ்பஷ்டமாக காகா, குஹூ என்று கத்தும் தன்மை கேட்டுக்கு ஆகிறது. காக்கை குயில் முட்டையைக் காத்துவரும். அக் குஞ்சு குஹூ என்று கத்தாமலிருந்தால் காக்கை என்று நினைத்துக் காக்கப்படும். குஹூ என்பதால் குயில் இது எனவறிந்து விடப்படுகிறது.

4. காக்கைகளில் சில விழுந்து உயிரிழந்தால் அவற்றின் வியோகம் (வி என்ற எழுத்தோடு யோக என்பது சேரத் தோன்றும் பொருள்) பிரிவு மற்ற காக்கைகளால் சூழப்படுவதற்குக் காரணமாம்.

5. தாமஸபுத்திகள் பாவிகள் உயர்ந்த குலத்திற் பிறந்தால் தங்கள் புத்திஸாமார்த்தியத்தினால் மற்ற ஜனங்களுக்கும் துர்புதி துராசாரங்களுக்குக் காரணமாகின்றனர்.

6. தாமஸமான உடலால் நீசகுலப்பிறவியிலிருப்பவர் சிலர் உயர்ந்த சாஸ்த்ரங்களைப் படிப்பது தங்கள் கேட்டுக்கும் சாஸ்த்ர வரம்புகளை அழிப்பதற்கும் காரணமாகும்.

7. கறுப்பாய் அல்லது பச்சையான இலைகள் மரங்களினின்று விழவாகி வேறு நிறம்—வெண்ணிறம் பெறல் அவை அழிவதற்குக் காரணமாம்.

8. நீண்டு வளர்ந்ததால் தோளிலும் கீழும் விழும்படி தொங்குகின்ற தலைமயிர்கள் நிரைத்து வெண்ணிறம் பெறுவது, மூப்புக்கும் இறப்புக்கும் நெருக்கத்தைக் குறிக்கும்.

9. குறியைக் குறித்துச் செல்லும் புல் அம்பு முதலியவற்றிற்கு மந்த்ரயோகம் ப்ரஹ்மாஸ்த்ராதிகளைப் போலாக்குவதால் காகாசுரன் என்ற பக்ஷி போன்றவை போகுமிடமெல்லாம் சுற்றவும், திரும்பித் தன்னிடம் வந்து சேரவும் காரணமாகிறது.

10. சில பாபிகளுக்கு ப்ராயச்சித்தத்திஞல் ஏற்படும் சுத்தியே மீண்டும் பாபத்தில் துணிவுக்குக்காரணமாகும். தீர்க்க முடியுமென்ற துணிவிஞல்.

पतनानन्तरं कृच्छ्रात् प्ररूढः शुद्धिमानपि ।
द्विजः संछाद्यते कश्चिदधरेणापि रागिणा ॥ ५ ॥

1. **द्विजः**— त्रैवर्णिकः **पतनानन्तरं** पापकरणसमनन्तरमेव **कृच्छ्रात्** कृच्छ्रचान्द्रायणादिप्रायश्चित्तकरणात् **शुद्धिमान्** प्राप्तशुद्धिरपि **प्ररूढोऽपि** प्रसिद्धोऽपि, **अधरेण** नीचेन **रागिणा** पापानुरक्तेन **संछाद्यते** शुद्धिच्छादनेन पापित्वेनैव घोष्यते । तस्मात् प्रथमतः पापाकरणमेव श्रेयः ; न तु कृत्वा तत्परिहरणम् ।

2. **द्विजः** दन्तः पतनानन्तरं एकदन्तपातपश्चात्काले प्ररूढोऽपि जातोऽपि शुद्धिमानपि नव्यत्वात् ताम्बूलादिरागाभावाच्च धवलोऽपि **रागिणा** रक्तवर्णेन **अधरेण** रदच्छदेन संछाद्यते । तस्मात् अस्य दन्तो न जात इवेति लोको मन्यते ।

3. **प्ररूढः** उत्तमाश्रमं संन्यासमारूढः **कृच्छ्रात्** दुर्गतिवशात् **पतनानन्तरं** तस्मादाश्रमात् भ्रंशानन्तरं **शुद्धिमानपि** अन्यादृशदोषरहितोऽपि, शुक्लवस्त्रधरश्च भवन्, **रागिणा** तस्मिन् अनुरक्तेनापि **अधरेण** नीचवृत्तिनाऽपि पत्नीपुत्रशिष्यादिनाऽपि **संछाद्यते**-स्वसंबन्धित्वेन नाविष्क्रियते ॥

4. **शुद्धिमान् प्ररूढः**—शुद्धिमत्त्वेन प्रसिद्धः द्विजः कश्चित् **पतनानन्तरमपि** पतितत्वप्राप्त्यनन्तरमपि **कृच्छ्रात्** अतीव श्रमेण **अधरेण** दोषाविष्करणार्हनैच्यवतापि जनेन संछाद्यते, परमशुद्धोऽयमिति प्रशंसनेन । तत्र हेतुः **रागिणेति** । तस्मिन् रागोऽस्ति तन्मूलधनादिप्राप्तिप्रत्याशया ।

5. **द्विजः** पक्षी शुकशावकादिः वृक्षादधः पतित्वा कथञ्चित् पुनर्वृक्षमारूढः सम्यक्सुखी वर्तमानोऽपि पुनर्दैवात् केनचित् तद्ग्रहणपरेण **छाद्यते** पञ्जरादौ बध्यते ।

பதநாநந்தரம் க்ருச்ச்ராத் ப்ரரூட: சுத்திமாநபி |
த்விஜ: ஸஞ்ச்சாத்யதே கச்சித் அதரேணுபி ராகிணு || 5 ||

1. பாபம் செய்தவுடனே க்ருச்ரம் போன்ற ப்ராயச்சித்தத்தாலே பரிசுத்தஞகி ப்ரஸித்தஞயிருப்பவனும், பாபத்திலே பற்றுள்ள நீசஞலே மறைக்கப்படுகிருன். இவன் செய்த பாபத்திற்கு ப்ராயச்சித்தம் செய்ததை இல்லையென்கிருன். (ஆகையால் முதலில் பாபம் செய்யாமலிருப்பதே நலம்.)

2. (த்விஜ என்ற சொல்லுக்கு உபநயனப் பிறவியுடைய த்ரைவர்ணிகன் என்ற பொருள்போல் பல் என்ற பொருளும் உண்டு) பல் விழுந்த பிறகு பிரயாசையால் ஒழுங்காக முளைத்து வெளுத்திருந்தாலும் சிவந்த உதடானது அதை மறைக்கின்றது. (மீண்டும் பல் முளைத்ததா என்று ஐயத்திற்கு இடமுண்டாகிறது.)

3. ஸந்நியாஸாச்ரமம் ஏறினவன் ஏதோ கஷ்டத்தினுலே அதனின்று கீழிறங்கினுல், மற்ற குற்றமொன்றுமில்லாமலிருப்பினும், அவனிடம் பற்றுள்ள பத்னீ புத்ரன் சிஷ்யன் முதலானவர்களாலும் மறைக்கப் படுகிருன். அவனைச் சார்ந்தவர்களாகத் தங்களை அவர்கள் சொல்லிக் கொள்ள மாட்டார்கள்.

4. மிகவும் புனிதனென்றே பேர் பெற்ற அந்தணன் சில பாபங்களாலே பதிதனுனுலும், அவனிடம் பாபத்தைச் சொல்லும்படி நீசனுயிருப்பவனும் அதை ச்ரமப்பட்டு மறைக்கிருன். அதற்குக் காரணம் அவனிடத்தில் அன்பும் அவன்மூலமாகப் பணம் பெருமை யெல்லாம் பெறலாமென்கிற நோக்கும்.

5. (த்விஜமென்று பட்சிக்கும் பெயராம்—) கிளிபோன்ற பட்சிக் குட்டி கீழே விழுந்து பிரயாசைப்பட்டு மரமேறி நிம்மதியாயிருப்பினும் அதைக் கண்ட நீசன் அதனிடம் பற்றினுல் அதை. தாய் காணுதவாறு மறைத்துக் கொள்ளுகிருன்.

पक्षिप्रस्तावात् बकलक्षणमाह—

जोषमेकपदे स्थित्वा संनिकृष्टान् क्षणात् घसन् ।
बहिर्दर्शितसंशुद्धिर्बकव्या(कोप्या)हारमर्हति ॥ ६ ॥

1. अतिविरक्त इव आहारनिरपेक्ष इव ध्यानपर इव **जोषं** मौनेन **एकपदे** एकस्य स्थाने एकान्ते यद्वा **एकपदे** पदमेकं भूम्यस्पृष्टं कृत्वा एकमेव पदं भूमौ निक्षिप्य तन्मात्रधृततया स्थित्वा तपस्यन्, अहो महान् अयमाराधनीय इति भ्रान्त्यद्भिर्जनैरर्प्यमाणान् अपश्यन्निव स्थितः **संनिकृष्टान्** अतिसमीपमागतान् उपहारान् **क्षणात्** अनेन भुक्ता इति यथा न ज्ञायेरन् तथा वेगेन **घसन्** भक्षयन् स्नानाचारादिना बहिर्दर्शितस्वात्मशुद्धिः, अयमिमान् पदार्थान् न गृह्णीयादिति विस्रम्भेण कैश्चित् केषुचिदुत्कृष्टेषु वस्तुषु समीपे निक्षिप्तेषु तेषु च गतेषु तेषामागमनात् प्राक् क्षणेन गृह्णन् भक्षयन् , अयमेवैतद्ग्राहीति यथा न ज्ञायेत तथा बहिरभिनयन् यो वर्तते, स बक इति नाम्ना व्याहारमर्हति । एतादृशपुरुषं मनसिकृत्यैव, "बकवृत्तींश्च वर्जयेत्" इति मनुनोक्तम् । क्षणशब्दस्य व्यापारोपरतिरप्यर्थः । निर्व्यापारतयेत्यर्थः । तेन अव्याप्रियमाण इव सन् इत्युक्तं भवति। स्वल्पविषये वैराग्याभिनयात् निर्व्यापारता ; अधिकप्राप्तौ घसनम् ।

2. अयं हि बकपक्षिणः स्वभावः यत् **बहिर्दर्शितसंशुद्धिः** अतिधवलवर्णतया दृश्यमानः, अस्य मनोऽपि सात्त्विकमिति भ्रमोत्पादकः । **जोषं** निश्शब्दम् **एकपदे** पदमेकमेव निक्षिप्य कच्छप्रदेशे स्थित्वा अतिसंनिकृष्टान् मीनादीन् क्षणात् घसन्—भक्षयन्नास्ते । **क्षणा**दित्यनेन स्वल्पेषु मीनेष्वागतेषु तत्राव्याप्रियमाणतोच्यते । तेन साधुत्वाभिनयः ।

3. बको नामासुरः **एकपदे** एकशब्दघटितनामबोध्ये एकचक्रनगरे जोषं सुखं स्थितः प्रतिदिनमेतावदस्मै भक्ष्यतया देयमिति व्यवस्थायाः कृतत्वात् तदनुसारेणार्पितान् संनिकृष्टान् घसन् आसीत् ।

तस्य वधो भीमसेनेन कृत इति भारते कथा । **क्षणात्** प्रतिदिनदत्तादधिकस्याग्रहणेनेत्यर्थः । अयमसुरो बकनामक इति श्लोकार्थः । **व्याहारमर्हति**—नाममात्रशेषः ।

4. **घसन्** भक्षकोऽपि श्रीकृष्णभक्षणार्थं गोवत्सावतरणस्थले जलप्रान्ते बकवेषेण स्थितोऽसुरः **एकपदे** स्थित्वा स्थलान्तरमगतः वत्सेषु तोयपानार्थं प्रान्तमागतेषु **क्षणात्** अप्रवृत्त्या संनिकृष्टान् तान् प्रति बहिर्दर्शितशुद्धिरासीत् । स भगवता श्रीकृष्णेन बकोऽयमित्युक्तो हत इति ।

बकव्याहारमित्यत्र बकोऽव्याहारमिति पाठं कृत्वा, बकवेषधरोऽपि तत्स्वरूपज्ञानात् प्राक् आहारप्रदानेनोपचरणीय इति व्याख्यान्ति । तत्त्वस्थितेस्तथात्वेऽपि न तस्यार्थस्य प्रकृतसंगतिः । काकाश्रयणेन बकोऽपि किमाहारमर्हति, न स वामात्रेणाप्यर्च्य इति मनूक्तरीत्या तदा व्याख्येयम् ।

ஜோஷம் ஏகபதே ஸ்த்தித்வா ஸந்நிக்ருஷ்டாந் க்ஷணாத் கஸந் |
பஹிர்தர்சிதஸம்சுத்தி: பகவ்யாஹாரமர்ஹதி || 6 ||

1. மௌனமாக ஒற்றைக் காலால் நின்றுகொண்டு அருகில் நெருங்குமவற்றை யெல்லாம் நொடியில் உட்கொண்டு பார்ப்போருக்கு மிகவும் ஸாத்விகன் போல் தன்னை எண்பிக்கின்றவனை, வஞ்சனை செய்கின்ற படியால் பகனென்று சொல்ல வேண்டும். பகமாவது கொக்கு.

2. கொக்கானது நீர்க் கரையோரத்தில் ஒற்றைக் காலில் நின்றுகொண்டிருக்கும். அருகில் வரும் மீன்முதலானவற்றை ஒரு நொடியில் உட்கொள்ளும். பார்ப்பதற்கு வெள்ளைவெளேலென்று இருப்பதால் மிகவும் ஸாது போல் தோன்றும், இப்படி வஞ்சனை கொக்கினிடமுண்டு.

3. பகன் என்ற அசுரன் ஏக சக்ர நகரத்தில் ஸுகமாக, அந்நகரத்தார் ஒருவித ஏற்பாட்டுடன் தினந்தோறும் அனுப்ப அதன் மூலம் நெருங்கிய ஆஹாரங்களை உட்கொண்டிருந்தவன் வேறு ஒருவரையும் வதைக்காமலிருந்ததால் யோக்யன் போல் தோன்றினவன் என்பதும் தோன்றும். இவன் பீமஸேனனால் கொல்லப்பட்டான்.

4. பகாஸுரன் கொக்காக வுரு எடுத்து மடுவில் நீரோரத்தில் இருந்துகொண்டு கன்றுகளை மேய்க்கும் கண்ணன் அருகில் வரும் போது அவரை விழுங்குவதற்காக கன்றுகளையோ வேறு இடைப் பிள்ளைகளையோ மூக்கால் கொள்ளாமல் யோக்யன் போலே காணப் பட்டிருந்தான் என்பதும் பொருளாம். அவனைக் கண்ணன் கிழித்தெறிந்தார். க்ஷணாத் - வியாபாரமின்மையால் என்பது எங்கும் சேரும்.

मुखान्तरेण बकप्रसंग.—

द्विजस्य सितपक्षस्य कवेरपि निरस्यते ।
न(अ)हंस इति साजात्यं गतिशब्दितवृत्तिभिः ॥ ७ ॥

हंसबकयोः पक्षिणोः कतिपयांशसाम्येऽपि साजात्यनिरासो भवतीत्युच्यते । बकस्य **द्विजस्य** मातृगर्भादण्डाच्च जायमानतया द्विजत्वविशिष्टस्य **सितपक्षस्य**, श्वेतगरुतः, **कवेः** । कं जलम्, विः पक्षी ।

जलचरपक्षिण: एवमंशत्रयेण साम्यवतोऽपि हंससाजात्यं **न हंस इति**-नायं हंस इति वाक्येन निरस्यते। कस्मात्। गतिः हंसस्य गगने वेगेन बहुदूरम्; न तथा बकस्य। **शब्दितं** ध्वनिः उभयोर्विलक्षणः। हंसध्वनिराकर्षकः। **वृत्तिः** पद्मे अमेघस्थले च; क्षीरनीरविवेकश्च हंसस्य। बकस्तु अन्यादृशाहारः मेघस्याधस्तात् सञ्चारप्रियः। उक्तं हि, "गर्भाधानक्षणपरिचयात् नूनमाबद्धमालाः" इति।

2. तथा पुरुषस्य द्विजत्वं सितपक्षत्वं कवित्वमिति हंसपक्षिसाम्यं स्यात्। श्लेषवशात् साम्यम्। पुरुषे द्विजत्वं गायत्रीमूलकद्वितीयजन्मवत्त्वम्। सितपक्षत्वम् अवसितस्वाभिमतत्वम् इदमिदमेवमिति निश्चयवत्त्वम्, कवित्वं कान्तदर्शित्वं ग्रन्थकर्तृत्वमित्यर्थमात्रभेदः। एवमपि पक्षिपुरुषयोः गतिः वाक् कार्यञ्च भिन्नमित्यर्थः।

3. **सितपक्षः** शुक्लवस्त्रधरो गृहस्थः सिते आदरवान्। **पक्षः** आदरः। तस्य द्विजत्व सात्विकपक्षग्राहित्वादिसत्त्वेऽपि, **हंसेन** संन्यासिना न साजात्यम्। ग्रामैकरात्रसंचारी उपनिषन्मात्रवाक् भैक्षजीवी परपोषणव्यापाररहितश्च संन्यासी। गृहस्थस्तु अन्यथा।

4. यद्वा **हंस इति** अयं संन्यासी इति यत् साजात्यं तत् गृहस्थे क्वचित् न निरस्यत इत्यन्वयः। यो द्विजः सात्विकपक्षः, प्राप्यं प्रापकञ्च परतत्त्वमेवेति अवसितपक्षः रजस्तमस्संगरहितः, **कविः** ज्ञानी च—तस्य संन्यासिनश्च गतिः वाक् चर्या सर्वमप्येकरूपम्; ऐश्वर्यादिविरक्तत्वादिति।

5. **अहंस इति** पाठेऽपि न हंस इत्यर्थो भवितुमर्हति। द्विजत्वकवित्वादिसत्त्वेऽपि अहं सः इति एकस्यान्यत्वं न भवति। **कवेः** शुक्राचार्यस्य द्विजत्वादिमतः अहं स इति बृहस्पतिसाम्यं न भवति; असुरगुरोः सात्त्विकत्वाद्यभावात्।

6. **सितेषु** सात्त्विकेषु **पक्षः** प्रीतिः तद्वान्, कान्तदर्शी, द्विजः-द्वा सुपर्णा सयुजा सखाया इति पक्षित्व-एकवृक्षस्थितत्वादिनोक्तः। भगवानपि द्वाभ्यां—चेतनान्तर्यामितया, अचेतनान्तर्यामितया च जायते। अनेकजन्मा च। इत्येवं जीवपरयोः कतिपयाकारसाम्येऽपि अहं स इति परमपुरुषसाजात्यं जीवे निरस्यते; सर्वान्तर्यामित्व-सर्वशब्दवाच्यत्व-जगद्व्यापारादिधर्मभेदात्।

த்விஜஸ்ய ஸிதபக்ஷஸ்ய கவேரபி நிரஸ்யதே |
நஹம்ஸ(அஹம்ஸ) இதி ஸாஜாத்யம் கதிசப்திதவ்ருத்திபி: ‖ 7 ‖

1. தாய்வயிற்றினின்றும் முட்டையினின்றுமாக இரு பிறவியுடைமை. வெண்மையான சிறகு உடைமை. ஜலத்தில் நடமாடும் பக்ஷியாகை என்ற படிகளால் ஒத்திருந்தாலும் கொக்கு ஹம்ஸமாகாது. வானத்தில் பறந்து செல்வதிலுள்ள விதம், த்வனி, ஆஹாரம் முதலியன வேறுகையால்.

2. அன்னத்திற்கும் படித்தவனுக்கும் சில அம்சங்கள் ஒத்திருக்கலாம். படித்தவனும் த்விஜன்—காயத்ரீ மூலமான இரண்டாம் பிறவியுடையவன். ஸித - முடிவாக்கப்பெற்ற பக்ஷ - இஷ்டத்தையுடையவன்

கவி-கவனம் செய்கின்றவன். இப்படி சொல்லில் வேறுபாடில்லையாகை யால். ஆனாலும், நடை, பேச்சு ஜீவனம் எல்லாம் இவனுக்கும் அன்னத் திற்கும் வேறு.

3. வெண்ணுடை உடுக்கும் க்ருஹஸ்த்தன் த்விஜன், ஸாத்விகன், கவி ஆனாலும் ஹம்ஸன் என்ற ஸன்னியாஸியாகான். ஸன்னியாஸி, தினம் ஒரு க்ராமமாகச் செல்லுகிறவன், உபநிஷத் ஒன்றையே சொல் பவன், பிக்ஷையால் ஜீவிப்பவன். இவன் அவ்வாருகான்.

4. அல்லது ஹம்ஸன்-ஸந்நியாஸி என்று பரமைகாந்தி க்ருஹ்ஸ்த் தனுக்கு ஸாம்யம் தள்ளப்படுகிறதில்லை. இருவருக்கும் ப்ராப்யம் ஒன்றே என்ற புத்தி. ப்ரஹ்ம விஷயமான பேச்சே, எம்பெருமானுக்கு நிவே தனம் செய்தே உண்கை. செயல் எல்லாம் அவனுக்காகவே.

5. அஹம்ஸ: என்ற பாடமுமாம். ஒருவருக்கொருவர் அஹம் ஸ: நான் அவன் என்று எண்ணலாகாது. த்விஜத்வம் முதலான தன்மை கள் ஸமமாயிருப்பினும் அவனவன் போக்கு பேச்செல்லாம் வெவ்வேரு கும். எனவே சுக்ராசார்யரென்ற கவியும் ப்ரஹஸ்பதியாகமாட்டார். அஸுரபுரோஹிதருக்கு ஸாத்விகத்தன்மையில் வாசியுண்டு.

6. ஸிதராவார் ஸாத்விகர். அவர்களிடம் பக்ஷம் அன்பு. எட்டாத வஸ்து எட்டியதாலான கவித்வம் எல்லாம் த்விஜனுக்கு இருந்தாலும் ஹம்ஸனென்ற பரமாத்மாவாகான். எங்கும் பரவி, எல்லா சொற்களா லும் சொல்லப்பட்டு உலகெல்லாமும் படைத்து இருப்பவனும் இவனும் பூர்ணமான ஸாம்யம் பெறலாகுமோ?

दुर्वृत्तकृताया आशिषोऽप्यग्राह्यत्वमाह—

अव्यवस्थितवृत्तानामभिन्नश्रुतिचक्षुषाम् ।
अधर्मार्जितभोगानामाशीरप्यहितोचिता ॥ ८ ॥

1. **अव्यवस्थितम्** एकरूपत्वाभाववत् **वृत्तं** चर्या येषाम् , नास्तिक्यात् अपेक्षितकार्यानुसारा-च्चानेकरूपता । **श्रुतिः** श्रोत्रं **चक्षुः** नेत्रञ्चाभिन्ने । चक्षुर्ग्राह्यमेव श्रोत्रग्राह्यशब्दबोध्यमस्ति । चक्षुरग्राह्यं शब्दोक्तं लोकान्तरादिकं नेष्यते इति वादिनस्ते । तथा भिन्नं चर्मचक्षुर्विलक्षणं श्रुतिरूपं वेदरूपं चक्षु-र्येषां न विद्यते । **अधर्मैरार्जितः** संपादितः **भोगः** सुखानुभवो यैः तेषां दुर्वृत्तानां कदाचित् भवन्ती **आशीरपि** अनुकूलकरणमपि अग्राह्यम् । सा **अहितस्य** अनर्थस्योचिता स्यात् ; हितस्योचिता न स्यात् । तद्दत्तवस्तुग्रहणेन जीवनं शास्त्रनिषिद्धत्वात् अहिताय भवति । अव्यवस्थितवृत्तत्वोपपादनं वा विशेषण-द्वयेन । वेदरूपं चक्षुरभिन्दन्तः चर्मचक्षुस्तुल्यं कल्पयन्त एवमधर्मेण भोगमर्जयन्ति । तस्मात् वृत्तव्यवस्था नेति ।

2. **अविषु** पर्वतेषु अवस्थिताः गुल्मादयः तत्र वृत्तानाम् स्थितानाम् । **अव्यवस्थिताश्च ते वृत्ताश्च** मण्डलाकाराः चतुष्कोणत्वादिरहिताश्चेति वा । वृत्तं कुण्डलभावः अव्यवस्थितं असार्वकालिकं येषामिति वा । सर्पाणां वल्मीकादौ कुण्डलीभावः, गमनकाले दीर्घतेति । तेषां **श्रुतिरेव-श्रोत्रमेव चक्षुः** ।

अतोऽभिन्नश्रुतिचक्षुषः । अधर्मेण पापेनार्जितः भोगः सर्पशरीरं येषां तेषां आशीः दंष्ट्रा । 'आशीरुरगदंष्ट्रायाम्' इत्यमरः । अहितायाः अहिः सर्पः तद्भावस्योचिता । दंष्ट्रायां हि विषम् । तेन सर्पस्य सर्पता । आशीपदमाशीःपदमुभयं विषाश्रयसर्पाङ्गवाचि ।

3. अहिः वृत्रासुरः तत्परत्वमपि । चित्रकेतुः नारदकृतसंकर्षणमन्त्रजपबलादास्तिकतमः विद्याधरो भवन् भगवद्भक्तः कैलासे पार्वतीभोगलालसं परमशिवं हसन् , असुरोभवेति निगृहीतो वृत्रासुरोऽभूत । तदाऽपि भगवत्पारम्यवित् इन्द्रेण युध्वा वज्रहन्यमानतामतीक्षो देहं त्यक्त्वा मुक्त इति श्रीभागवते । तदयमर्थः-अकारवाच्ये विष्णौ व्यवस्थितं तदेकपरं वृत्तम् अनुष्ठानं यस्य तादृशस्य । बहुवचनं पूजायाम् । श्रुतिःवेदः तद्रूपं चक्षुः येनाभिन्नं न नाशितम् किंतु रक्षितम् तादृशस्य । अधर्मेण पार्वतीशविषयहसनेन संपादित बहुदु खस्य आशीरपि नारदकृतोऽनुग्रहोऽपि अहितायाः वृत्रत्वस्योचिताऽभूत् । अथवा अहिता वृत्रताऽपि आशीरसीत् । तत्र तस्य मुक्तिलाभात् ।

सर्पस्येव वृत्रस्य अव्यवस्थितवृत्तत्व—अभिन्नश्रुतिचक्षुष्ट्व-अधर्मार्जितभोगत्व-आशीर्वत्त्वसत्त्वात् अहिशब्दवाच्यता युक्तेत्यप्यर्थः ।

4. सुदर्शनो नाम विद्याधरो रूपद्रविणसंपदा दृप्तः विरूपान् अङ्गिरसो हसन् तैः अजगरो भवेति शप्तः अम्बिकावने नन्दं भोक्तुं जग्राह । श्रीकृष्णपादाम्बुजस्पर्शेन पूतः स्वरूपं प्रतिपेदे इति श्रीभागवते । "स चुक्रोशाहिना ग्रस्तः कृष्णकृष्णेति नन्दः। अम्बिकावनेऽपि सेव्यं शिवं देवं विहाय कृष्णमेवाऽऽजुहाव । तदहिपरत्वपक्षस्य श्लोकस्य—अङ्गिरआदिमहर्षिवत् व्यवस्थितवृत्तरहितस्य अभिन्नश्रुतिचक्षुषः श्रुतिप्रमितस्य महर्ष्यनुभूयमानस्यानन्तधनस्य, चक्षुर्दृश्यस्य स्वानुभूयमानस्य द्रविणस्य च भेदं श्रौते उत्कर्षम् अज्ञातवतः, महर्षिपरिहासरूपाधर्मेण भोगम् उरगशरीरं प्राप्तस्य अहिता सर्पत्वम् आशीरपि, श्रीकृष्णपादस्पर्शपर्यवसानात् । यद्वा आशीरपि भगवत्स्पर्शरूपगुणहेतुरपि अहिता सर्पता दुःखानुभवार्हजातिता उचितेति । अतो दुर्वृत्तानां दुर्जन्म निश्चितमिति ॥

5. आदिशेषपरोऽपि । अस्य विष्णोः यः विः पक्षी गरुत्मान् , तस्मिन् अवस्थितं वृत्तं सुचरितं येषाम् । गरुत्मति स्निग्धानाम् । सर्पस्य गरुडस्नेहो हि दुर्लभः । अभिन्नश्रुतिचक्षुषाम् वेदरूपं चक्षुर्येनामभिन्नम् – अनाशितं किंतु रक्षितम् । विज्ञानबलोभयधामत्वात् बहुमुखं वेदरक्षकोऽयम् । अस्य विष्णोः धर्मतया शेषतया परिकल्पितः भोगः स्वशरीरं येषां तेषां विषये । अवतारविग्रहानेकत्वविवक्षया आदिशेषस्य बहुत्वम् । आशीरपि भगवदनुग्रहोऽपि अहितोचिता अयं शय्याभावोचितसर्वगुणान्वयी सर्प एव सर्वदाऽस्त्वित्येवंरूपैव भवति ॥

அவ்யவஸ்த்திதவ்ருத்தாநாம் அபிந்நச்ருதிசக்ஷுஷாம் ।
அதர்மார்ஜிதபோகாநாம் ஆசீரப்யஹிதோசிதா ॥ 8 ॥

1. நிலையற்ற நடவடிக்கை யுடையவரும் வேதமென்கிற கண்ணுக்கு உள்ள வேற்றுமையை அறியாதாரும் அதர்மங்களைச் செய்து லாக

வாழ்க்கையை நடத்துகின்றவர்களுமான துஷ்டர்கள் செய்யும் நன்மையைப் பெறுவதும் கேட்டுக்கே யாகும்.

2. மலையிற் புதர்களில் இருப்பனவும், திரண்ட உரு உடையனவும், அல்லது வட்டமாகத் தம் உடலைச் சுற்றிக் கொள்வதென்பதை நிலையாகக் கொள்ளாதனவும், இவற்றிற்குக் காதும் கண்ணும் ஒன்றே என்னப்பட்டனவும், முற் பிறவியில் செய்த பாபத்தினால் இந்தப் பாம்பு உடல் பெற்றனவுமான ஜந்துக்களுக்குப் பல்லும் பாம்பென்ற ஜாதிக்குப் பொருந்தியதேயாகும், விஷமுள்ளதாகையால்.

3. வ்ருத்ராஸுரன் சித்ரகேது என்ற வித்யாதரனாயிருந்து அகரத்தின் பொருளான விஷ்ணுவினிடம் நிலைத்த—அவனுக்கு ஆராதனமான அனுஷ்டானமுடையவன் வேதமென்கிற கண்ணை அழிக்காதவன், கைலாஸத்தில் பார்வதி பரமசிவர்களைப் பார்த்துச் சிரித்த அதர்மத்தினால் அசுரபோகம் பெற்றான். அவனுக்கு நாரதர் செய்த நன்மை அதாவது முதலில் மந்த்ரோபதேசம் வ்ருத்ராஸுரனாகைக்குக் காரணமாயிற்று. அவன் வ்ருத்ராஸுரனானமையும், தக்க அனுக்ரஹமுமாயிற்று. இந்த்ரன் வஜ்ராயுதம் எறியும்படி போர் செய்து உடலைக் கழித்து உயர்கதி பெற்றானே. ஆயினும் அசுரன் தானே.

4. ஸுதர்சனன் என்ற வித்யாதரன் ஒழுங்கான நடத்தை யற்றவன், வேதம் அறிவிக்கும் வஸ்துவுக்கும் கண் காண்பிக்கும் வஸ்துவுக்குமுள்ள ஏற்றத் தாழ்வை யறியாதவன், வேத மூலமான மேன்மையுடைய அங்கிரஸ் ரிஷிகளை கர்வப்பட்டுச் சிரித்ததால் பாம்புடல் பெற்றான். அப் பாம்பு அம்பிகாவனத்தில் நந்தகோபரை ஹிம்ஸிக்கத் தொடங்கியதால் அதை மீட்கக் கண்ணபிரானின் திருவடிஸ்பர்சம் கிடைத்ததாயினும் பாம்பாகிப் படவாயிற்றே.

5. அகாரவாச்யனான பகவானின் பட்சியான கருத்மானிடத்தில் விரோதமின்றி நன்றாக நடந்துகொள்பவனும் வேதமென்கிற கண்ணைத் தன் ஜ்ஞான பலங்களாலே காப்பவனும் அகாரவாச்யனான பகவானுக்கு சேஷமான மூர்த்தியுடையனுமான ஆதிசேஷனுக்கு எம்பெருமானின் அனுக்ரஹமானது என்றைக்கும் பாங்கான பாம்பாகவே யிருக்கும்படியே யாகும்.

वस्तुतो दुर्वृत्तत्वाभावेऽपि तदारोपस्याप्यवकाशो न देय इत्याह—

दुष्टैरारोपितः कश्चिदनर्थक्रिययाऽन्वितः ।
असत्कारेण गृह्येत विरुद्धाकारवेदिभिः ॥ ९ ॥

1. **दुष्टैः** दोषयुक्तैर्विरोधिभिः **अनर्थक्रियया** नरकादिहेतुपापकर्मणा **अन्वित आरोपितः** युक्तत्वेन कल्पितः कश्चित् वस्तुतोऽपापोऽपि **विरुद्धाकारवेदिभिः** न स पापीति जानद्भिरपि **असत्कारेण** सत्कारं संमानं विना गृह्येत ; न सत्क्रियेत ।

2. **दुष्टैः** नेत्रादिदोषवद्भिः **कश्चित्** शुक्त्यादिः पदार्थः **आरोपितः** रजतत्वादिरूपेण गृहीतः, **अनर्थक्रियया**—अर्थक्रियाऽभावेन—वास्तवरजतादिसाध्यफलनिष्पादकत्वाभावेनान्वितः । रजतादिकार्यकरत्वाभावादिति यावत् । **विरुद्धाकारवेदिभिः** शुक्तित्वादितद्धर्मज्ञानं पश्चात् प्राप्तैः **असत्कारेण** मिथ्यात्वेन रजतादिभिन्नत्वेन गृह्येत ।

3. अद्वैतमतरीत्याऽर्थः—**कः** सुखविशिष्टः ; सुखरूप इति यावत् । **चित्** ज्ञानस्वरूपं ब्रह्म **दुष्टैः** अविद्यादोषदूषितैः **आरोपितः** जीवजडरूपेण कल्पितः **अनर्थक्रियया** दुःखहेतुसांसारिकव्यापारेणान्वितः **विरुद्धाकारवेदिभिः** तत्त्वमस्यादिवाक्याधीनाद्वितीयब्रह्मज्ञानवद्भिः **असत्कारेण** नेति नेतीति बुद्ध्या गृह्येत ।

4. दुष्टैः लोकक्षेममजानद्भिः स्वार्थपरैः **कश्चित्** अविवेकी वेनादिः **आरोपितः** महत्स्थाने निवेशितः **अनर्थक्रियया** सर्वजनबाधकेन कार्येणान्वितः **विरुद्धाकारवेदिभिः** तद्गतदोषदर्शिभिः **असत्कारेण** । न सत्कारः असत्कारः अमान्यत्वेन गृह्येत ।

5. कश्चित् युधिष्ठिरादिः **दुष्टैः** शकुनिप्रभृतिभिः **आरोपितः** द्यूतसमर्थत्वमारोप्य श्लाघितः अत एव **विरुद्धक्रिययाऽन्वितः** युक्तायुक्ताविचारेण सर्वं कलहं कलयन् **विरुद्धाकारवेदिभिः** भीष्मद्रोणादिभिः **असत्कारेण** कञ्चित् कालं पापफलानुभवितृत्वेन गृह्येत ।

6. **चित्** ज्ञानस्वरूपः ज्ञानगुणकश्च जीवात्मा **दुष्टैः** दोषैः, कर्मभिः आरोपितः देहादिरूपेण गृहीतः नानाविधानर्थक्रियान्वितः **कः** सांसारिकसुखवान् **विरुद्धाकारवेदिभिः** अपहतपाप्मत्वभगवच्छेषत्वादितदाकारवेदिभिः **असत्कारेण** । सन्—ब्रह्मवित् । अब्रह्मवित्त्वेन गृह्येत ।

துஷ்டைராரோபித: கச்சித் அநர்த்தக்ரியயாऽந்வித: |
அஸத்காரேண க்ருஹ்யேத விருத்தாகாரவேதிபி: || 9 ||

1. யோக்யனும் துஷ்டர்களாலே குற்றம் செய்தவனுகப் பழிக்கப் பட்டால் அது உண்மையன்றெனத் தெரிந்தவர்களுக்கும் அவன் மதிக்க வாகான்.

2. கண்ணில் தோஷம் உடையரால் கயிறு பாம்பாக நினைக்கப் பட்டாலும் அது பாம்பின் செயலைச் செய்யவாகாதிருப்பதால் உண்மை யறிந்தவர்கனால் பொய்யென்றே கொள்ளப்படும்.

3. அத்வைதப்படி-சைதன்யஸ்வரூபமாய் ஆனந்த ஸ்வரூபமுமான ப்ரஹ்மம் அவித்யையென்ற தோஷமுள்ளவர்களாலே பல ப்ரபஞ்சமாக நினைக்கப்படும். அதனால் ஸம்ஸாரத்தில் அநர்த்தங்களுக்கான செயல் களும் ஏற்படும். வேதாந்த மஹாவாக்யம் மூலமாக உண்மை யறிந்தவர் அந்தவிதமாக அதில்லையென்றே நினைப்பர்.

4. உலக க்ஷேமத்தை யாராயாமல் தம் நலமே பார்க்கும் துஷ்டர் களால் ஒருவன் ராஜபதவியில் ஏற்றப்பட்டாலும், அவன் பல கேடு களைச் செய்கின்றவனுகில் அவனிடம் உள்ள துர்குணம் அறிந்தவர் களால் மதிக்கப்படமாட்டான்.

5. தர்மபுத்ரர் சகுனி முதலானவர்களாலே சூதாட்டத்தில் தோர்ந்தவராகத் துதிக்கப்பட்டு, தகும் தகாதென்று ஆராயாமல் எதையும் பணயமாக வைத்து ஆடினதால் அச்செயல் தவறென்று அறிந்த பீஷ்மாதிகளால் அவரும் சில நாள் ராஜபோகமிராமலிருப்பது தகுமென நினைக்கப்படவானார்.

6. ஜ்ஞானஸ்வரூபனாய் ஜ்ஞானத்தை குணமாகவுடைய ஜீவாத்மா பல துஷ்ட செயல்களால் தேஹமே ஆத்மாவென்று நினைக்கப்பட்டு பல அதர்மங்களால் ஸம்ஸார ஸுகமேயுடையதாகிறது. அதனால் அதற்குள்ள உண்மையுரு அறிந்தவர்களால் அந்தந்த ஜீவன் ப்ரஹ்மஜ்ஞானமில்லாதவனாக நினைக்கப்படுவான்.

दण्डनाभावे दुर्वृत्तो न विरमेदिति तदावश्यकत्वमाह—

तमस्स्वभावमलिनं वृत्त्यालोकोज्झिताश्रयम् ।
दण्ड्यं मित्रेण राज्ञा च दृष्टदोषान्वयं विदुः ॥ १० ॥

1. **तमसा** तमोगुणवत्त्वेन स्वभावतो **मलिनं** ज्ञानरहितं **वृत्त्या** दुष्टकार्यहेतोः **लोकोज्झितः** साधुजनवर्जित एव **आश्रयः** अवलम्बभूतो यस्य तं प्रबलदुष्टसाहाय्येन सपापचर्यं पुरुषं **मित्रेण** तस्य स्निग्धेन योग्येन, तदभावे **राज्ञा च** दण्डनीयत्वेन **विदुः** । कथम् ? **दृष्टदोषान्वयम्** । तस्य दोषसंबन्धं सम्यक् साक्षाद्वा साक्षिमुखेन वा दृष्ट्वा । दुष्टोऽपि दोषनिरूपणानन्तरमेव दण्ड्य इति ।

2. **तमः** इति इदानीं पृथक्पदम् । तमोगुणम्, स्वभावतो **मलिनम्** अज्ञानहेतुम्, **वृत्तिः** प्रवृत्तिः क्रिया रजोगुणकार्यम्, **आलोकः** ज्ञानं सत्त्वगुणकार्यम्, तदुभयरहित एव आश्रयो यस्य तादृशम् । **दृष्टदोषान्वयम्** अज्ञान-विपरीतज्ञानहेतुतया अधर्माचरणात् दोषसंबन्धयुक्तम्, **मित्रेण** मैत्री-करुणामुदितादिगुणहेतुना जीवात्ममित्रेण सत्त्वेन, **राज्ञा** रागजनकेन रजोगुणेन च **दण्ड्यं** तदभिवृद्ध्या न्यूनीकार्यं विदुः ।

3. '**तमः** परे देव एकीभवती'त्युक्तं मूलप्रकृतिभूतम्, स्वभावतः **मलिनम्** अचेतनम्, **वृत्तिः** व्यापारः **आलोकः** धर्मभूतज्ञानप्रसरः उभयोज्झितः जीवसमष्टिभूत-सूक्ष्मदशापन्नजीवतत्त्वसमुदायः **आश्रयः** चेतनत्वात् 'ययेदं धार्यते जगत्' इत्युक्तरीत्या आधारो यस्य तत् । **दृष्टदोषान्वयम्** नानारागद्वेषमोहरूपदोषहेतुं **मित्रेण** मित्रभावप्राप्तरक्षकेण प्रपन्नरक्षकेण, **राज्ञा** रञ्जकेन भक्तरक्षकेण च भगवता । यद्वा **मित्रेण** जीवनिष्ठमित्रभावेनेति यावत्; **राज्ञा** भगवदाज्ञयेति । **दण्ड्यं** मोक्षप्रदानकाले निवर्तनीयं विदुः ।

4. **तमः** राहुं स्वभावतः **मलिनं** श्यामं **वृत्त्या** स्वकृतावरणेन आलोकोज्झितौ निष्प्रभौ चन्द्र-सूर्यौ आश्रयौ यस्य तादृशं विदुः । कीदृशम् । अमृतविनियोगकाले असुरपंक्तित्यागेन सुरमध्येनिवेश-रूप दोषस्यान्वयः यस्मिन् **मित्रेण** सूर्येण **राज्ञा** चन्द्रेण च दृष्टः, तादृशं दण्ड्यं भगवता चक्रेण द्विधा-कृतम् अत एव तदुभयग्रासप्रवृत्तं विदुः ।

5. **तमः** अन्धकारम् , स्वभावतः **मलिनं** नीलम् । **वृत्तिः** चाक्षुषज्ञानम् । **आलोकः**-प्रकाशः । उभयोज्झितो देशः आश्रयो यस्य । तमःपरीतो देशो हि चाक्षुषज्ञानाविषय एव । **दृष्टदोषान्वयश्च,** दोषाशब्दोऽव्ययं रात्रिवाची । आकारान्तस्त्रीलिङ्गोपि ; "ततः कथाभिः समतीत्य दोषामारुह्य सैन्यैस्सह पुष्पकं ते" इति भट्टिप्रयोगादित्याहुः । तमसो रात्रिसंबन्धः सर्वत्र दृश्यते । तादृशस्य दण्डनं च सूर्यचन्द्राभ्यामिति ।

தமஸ்ஸ்வபாவமலிநம் வ்ருத்யாலோகோஜ்ஜிதாச்ரயம் |
தண்ட்யம் மித்ரேண ராஜ்ஞா ச த்ருஷ்டதோஷாந்வயம் விது: || 10 ||

1. தமோகுணமுள்ளவனுகையால் அறிவில்லாதவனும், தன் செயல் காரணமாக உலகத்திலுல் விடபட்ட துஷ்டர்களையே அண்டுகின்றவனுமானவன் அவனிடமுள்ள தோஷத்தைக் காணும்போதே அவனுடைய சிநேகிதரால், இல்லையேல், அரசனுல் தண்டிக்கப்பட வேண்டுமென்பர்.

2. தமோகுணமானது அஜ்ஞானத்திற்குக் காரணம், ரஜோகுணத்திலுலாம் செயலும் ஸத்துவ குணத்திலுலாம் அறிவுமில்லாத அறிவற்ற சோம்பேறியை இடமாகவுடையது, பல தோஷங்களைச் செய்யவாகிறபடியால் அவற்றின் ஸம்பந்தம் காணவாகின்றது. அதை மித்ரமான, ஆத்மாவுக்கு சிநேகமான ஸத்துவ குணத்திலுலும் ராகத்திற்குக் காரணமான ரஜோகுணத்திலுலும் குறைக்க வேண்டுமென்பர்.

3. தமஸ்ஸென்ற மூல ப்ரக்ருதியானது இயற்கையில் அசேதநம்; ஒருவித வ்யாபாரமும் ஜ்ஞான விகாஸமுமில்லாத ஸூக்ஷ்ம ஜீவஸமஷ்டியோடு சேர்ந்திருப்பது; ஸம்ஸார தோஷங்களுக்குக் காரணமாகையால் அவற்றின் ஸம்பந்தமுடையது; அது நமது மித்ரபாவத்திலுலும் அதன் மேலான ராஜாதிராஜனின் ஸங்கல்ப்பத்திலுலும் விலக்கப்பட வேண்டும்.

4. தமஸ்ஸாவது ராஹு, ராகு இயற்கையில் கறுப்பு. தான் மறைப்பதால் ஒளியற்ற ஸூர்ய சந்த்ரர்களைச் சார்ந்திருப்பது. ஏனெனில்—கடலிற் கடைந்த அமுதை எம்பெருமான் மோஹினி வடிவமாகி இட்டு வரும்போது அசுரத்திரளை விட்டு தேவத்திரளில் புகுந்து உட்கார்ந்ததென்ற தோஷத்தை ஸூர்யனும் சந்த்ரனும் கண்டு கூறவே, பகவானுல் சக்ரத்திலுல் தண்டிக்கப்படவாயிற்று. அதனுல் கோபித்து அவ்வாறு அவர்களைப் பிடிக்கிறதென்பர்.

5. தமஸ்ஸாவது இருள். இயற்கையில் கறுப்பு. கண்ணுற் காணவான வெளிச்சமில்லாத இடத்திலிருப்பது. இரவில் எங்கும் காணவாகின்றது. ஸூர்யனுலும் சந்திரனுலும் விலக்கக் கூடியது.

शिक्षिता अपि दुर्वृत्ता निर्लज्जा दुष्कृते वर्तन्ते इत्याह—

जातिमात्रशरणा बहिष्कृताः केचिदादृतजघन्यवृत्तयः ।
रोषणा विपरिधाविनो मुधा हेपयन्ति जनमुज्झितह्रियः ॥ ११ ॥

1. केचित् दुर्वृत्ताः **जातिमात्रशरणाः** उत्कृष्ट ब्राह्मणत्वादि जाति मात्रमपि स्वरक्षकत्वेन भावयन्तः अतिघोरपापकरणेऽपि ब्राह्मं तेजः सर्वनिरासकमिति भ्राम्यन्तः, तथा पापदर्शनेपि परैः ब्राह्मणत्वादि-जातिं पुरस्कृत्याहिंसनेनोपेक्षिताः, **बहिष्कृताः** साधुभिः सर्वविधसंबन्धानर्हाः कृताः । **आदृताः** आदरेण गृहीताः **जघन्यवृत्तयः** हेयव्यापाराः यैस्ते । एवं न युक्तं कर्तुमिति वदतः प्रति **रोषणाः** क्रोधयुक्ताः । **मुधा** व्यर्थमेव **विपरिधाविनः** नानास्थलसञ्चारशीलाः, **उज्झिता** त्यक्ता **ह्रीः** अकार्यकरणे, परैः स्वकृताकार्यदर्शने च सत्यपि, लज्जा यैस्ते **जनं** साधुलोकं **ह्रेपयन्ति** ह्रीयुक्तं कुर्वन्ति । अकार्यकारि-तद्दर्शने साधूनां लज्जा भवति ; न तु तेषाम् । तथा धृष्टा इति ।

2. उक्तानां दुर्वृत्तानां शुनकसाम्यद्योतनाय तत्परतयाऽपि योजना । केचित् श्वानः **जाति-मात्रशरणाः जातिः** भस्माद्याभासवस्तुराशिः तन्मात्रं, **शरणं** वासस्थानं येषाम्, **बहिष्कृताः** सद्भिः गृहान्तः अप्रवेश्यमानाः बहिरेव स्थापिताः **रोषणाः** नूतनदर्शने रोषाविष्टाः **मुधा** सर्वत्र पुनः पुनर्धावन्तः **उज्झितह्रियः** लज्जां विनैव **आदृतजघन्यवृत्तयः** सर्वदृष्टिविषयीभूयैव मिथुनीभूय जघनप्रदेश-संबन्धिव्यापारादरवन्तः सन्तः द्रष्टॄन् **ह्रेपयन्ति** लज्जायुक्तान् कुर्वन्ति ।

3. छलजातिनिग्रहस्थानेति परिगणितदोषान्तर्गता जातिरप्यत्र विवक्ष्येत । प्रामाणिकमर्थ-माक्षेप्तुमिच्छन् कश्चित् जात्या प्रत्यवतिष्ठते । जातिर्नाम असदुत्तरं-स्वव्याघातकमुत्तरम् । ये स्वव्याघात-कतर्कप्रयोक्तारः, श्रुतिप्रमाणे प्रदर्शिते तत्र मुख्यवृत्तिं परित्यज्य जघन्यवृत्त्याख्यया लक्षणया गौण्या वा तन्निर्वाहमपि विदधते । यथा तत्त्वमस्यादावपि । केवलाभिनिवेशवतस्तान् परिहसतीत्यपि भाव्यम् ।

ஜாதிமாத்ரசரணா: பஹிஷ்க்ருதா: கேசித் ஆத்ருதஜகந்யவ்ருத்தய: |
ரோஷணா: விபரிதாவிநோ முதா ஹ்ரேபயந்தி ஜநம் உஜ்ஜிதஹ்ரிய:||

1. சிலர் தங்கள் ஜாதி உயர்ந்திருப்பதொன்றைக் கொண்டே ஐயோ பாவம் என்று காக்கப்படுகின்றவர்களாய், தங்களோடு சேர்க்காமல் பெரியோர்களால் விலக்கப்பட்டவர்களாய் நீசமான தொழிலிலேயே இழிந்தவர்களாய் எப்போதும் கோபிப்பவர்களாய் கண்டவிடம் காரண மின்றி திரிகின்றவர்களாய் வெட்கமின்றி எதையும் செய்பவர்களாய் பார்ப்போர் வெட்கப்படும்படியிருக்கின்றனர்.

2. நாய்கள், (ஜாதி—குப்பை) குப்பையையே படுக்க இடமாக உடையன; வீட்டுக்குள் புகாதபடி வெளிப்படுத்தப்பட்டவை. புதிய வரைக் கண்டால் கோபமுள்ளவை, எங்கும் வீணே திரிகின்றவை, வெட்கமின்றி பலர் காண ஆணும் பெண்ணும் சேர்ந்து பார்ப்பவருக்கு வெட்கத்தை விளைவிப்பவை. (இப்படி ஒருவகையான சொல்லால் நாய்க்கு ஸமமாக துஷ்டசர்யை யுடையரை யறிவித்ததாம்.)

3. ஜாதியாவது தனக்கும் தோஷம் அது வரும்படியான யுக்தியைக் கொண்டு வாதிப்பது. ஜகந்யவ்ருத்தியாவது—சொற்களுக்கு முக்யமான வ்ருத்தி என்கிற சக்தியை விட்டு லக்ஷணை, கௌணீ என்ற வ்ருத்திகளைக்

கொண்டு இயற்கையான சொற்பொருளை மாற்றுவது. இப்படி குதர்க்க வாதமும் ப்ரமாண வசனங்களுக்கு ருஜுவான பொருளைவிட்டு வேறு வழி புகுவதும் செய்கின்றவர்கள் வேறு மதத்தைச் சார்ந்தனர். அது சரியில்லையே என்று கூறினால் உடனே கோபித்துக்கொள்ளுகிறார்கள். ஸாத்விகர்கள் இசையாத வாதம் அது என்றதாயிற்று.

परजिघांसाप्रवृत्तस्य यथावस्थितज्ञानं सर्वात्मना नश्यतीत्येतद् दृष्टान्तेनोपपादयति—

आलोकावधि यद्वशेन सुगतिं विन्दन्ति भूतान्यसौ
दृष्टिः स्नेहविशेषतो वितनुते वंशे भुजङ्गभ्रमम् ।
दक्षा भोगिषु केषुचित् विषमिता(तां) दृष्टिं निहन्तुं क्षणात्
तामप्याशु विनाशयेत् क्षणरुचिः काचित् क्षणस्फूर्जथुः ॥ १२ ॥

1. अत्र श्लोके **स्नेहवशेन सा, विषमिताम्**, तानपि इति स्थलत्रये पाठभेदः । **यद्वशेन** यस्याः दृष्टेः नेत्रस्य **वशेन** बलेन **आलोकावधि** सूर्यादिप्रकाशो यावति देशे वर्तते तावत्पर्यन्तं **भूतानि** प्राणिनः **सुगतिं** सम्यक् संचारं **विन्दन्ति** प्राप्नुवन्ति, **असौ दृष्टिः** तदेव यथार्थदर्शनकारणं नेत्रं **स्नेहविशेषतः** मण्डूकवसाञ्जनवशात् **वंशे** वेणौ **भुजङ्गभ्रमम्** अयं सर्प इति भ्रान्तिं **वितनुते** जनयति । सैव दृष्टिः **भोगिषु केषु चित्** कतिपयसर्पेषु विद्यमाना विषम् इता प्राप्ता सती **दृष्टिं** मनुष्याणां **दृष्टिं** दर्शनं **क्षणात् निहन्तुं** नाशयितुं **क्षमा** शक्ता भवति। **तामपि** सविषसर्पदृष्टिमपि **क्षणस्फूर्जथुः** क्षणिकवज्रनिर्घोषविशिष्टा **क्षणरुचिः** विद्युत **आशु** शीघ्रं नाशयति ।

2. **अर्थान्तरम्—आलोकावधि** लोकेषु अवधिभूतः काष्ठां गतो यो लोकः तत्पर्यन्तं **सुगतिं** सुकृतफलप्राप्तिं **भूतानि** प्राणिनः **यद्वशेन** यादृशमहापुरुषकटाक्षवशेन **विन्दन्ति, असौ** महनीयदृष्टिरपि, कदाचित् स्त्रीजने **स्नेहविशेषतः** अधिकप्रीतिमालक्ष्य **वंशे** उत्कृष्टपुरुषेऽपि **भुजङ्गभ्रमम्** अयं विटः स्यादिति भ्रान्तिं **वितनुते** । महनीयदृष्टीनामपि कदाचिदेवं कतिपयेषु भ्रान्तिर्जायते । सा दृष्टिः **भोगिषु**-सुखानुभाविषु **विषमिता** विषमीकृता दृष्टिं तेषां प्रीत्या दर्शनं निहन्तुं क्षमा । **तामपि** तादृशदृष्टिमपि **क्षणरुचिः** परहिंसायामाशा । **क्षणो** हिंसा । 'हिंसा-व्यापारवैकल्य-परतन्त्रत्व-पर्वसु' इति भट्टबाणः । **क्षणस्फूर्जथुः** एकक्षणस्फुरितापि **विनाशयेत्** । सद्गतिप्रापकदृष्टिविघातोऽपि परहिंसाभिलाषात् भवतीत्यर्थः ।

विषमितामिति पाठे तु प्रथमयोजनायाम्. **असौ** मनुष्यदृष्टिरित्यनेन गरुडमन्त्रादिसिद्धिमत्पुरुषदृष्टिग्रहणेन सा **भोगिषु** सर्पेषु **केषुचित्** स्थितां विषम् **इतां** प्राप्तां दृष्टिमपि **निहन्तुं क्षमा** । सा मान्त्रिकदृष्टिरपि विद्युन्नाश्येति भाव्यम् ।

3. एवमहल्यादृष्टिविषयता—या अहल्यायाः पतिव्रतायाः दृष्टिः लोके भक्तानां सुगतिप्रदा, **सा स्नेहविशेषतः** अनुरागविशेषात् **वंशे** ऋषिवंशेऽपि **भुजङ्गभ्रमं** विटभूतेन्द्रसञ्चारं **वितनुते** ।

भोगिषु परदारभोगपरेषु इन्द्रादिषु स्थितां **विषमितां** विषमीकृतां दृष्टिं निहन्तुं **दक्षा** गौतमादिदृष्टिः **क्षणस्फूर्जथुः** उत्सवविषये संतोषविषये वज्रनिर्घोषरूपा । तद्बाधिकेति यावत् । **क्षणे** अहल्याया निर्व्यापारतायां **रुचिः** अभिलाषो यस्यास्सा सती, **तामपि** तादृशाहल्यादिदृष्टिमपि नाशयेत् , तया अहल्यायाः पाषाणीकरणात् ।

4. श्रीकृष्णदृष्टिविषयताऽपि—यद्वशेन यादृशश्रीकृष्णदृष्टिवशेन सर्वाणि भूतानि सर्वत्र सुगतिं विन्दन्ति, सा दृष्टिः गोप्यादिषु पतिता वंशे गोपादिवंशे स्थितानां **भुजङ्गभ्रमम्** अयं विट इति भ्रमं वितनोति । **भोगिषु** भोगप्रवृत्तेषु कतिपयगोपीजनादिषु स्थितां **विषमितां** मुमुक्षां विहाय भोगप्रावण्यरूपवैषम्यं प्रापितां दृष्टिं निहन्तुं दक्षा, तदनुरागविपर्यसनक्षमा, तस्यैव **क्षणरुचिः** क्षणिकः संकल्पः, भोगरुचिविपरीता निर्व्यापारत्वरुचिः, मोक्षणरुचिर्वा श्रीकृष्णदृष्टिं तामपि आशु नाशयेत् । प्रथमं गोपीः अनुरागेण पश्यन्नपि स पश्चात् ता मोक्षं प्रापिपयिषुः तां दृष्टिं स्वसंकल्पनैव निवर्तयतीत्यर्थः ॥

आपाततदृष्ट्या सर्वान् दुर्वृत्ततया मन्तुमयुक्तमिति भावः ॥

ஆலோகாவதி யத்வசேந ஸுகதிம் விந்தந்தி பூதாந்யஸௌ
த்ருஷ்டி: ஸ்நேஹவிசேஷதோ விதநுதே வம்சே புஜங்கப்ரமம் |
தக்ஷா போகிஷு கேஷுசித் விஷமிதா(தாம்)த்ருஷ்டிம் நிஹந்தும் க்ஷணாத்
தாமப்யாசு விநாசயேத் க்ஷணருசி: காசித் க்ஷணஸ்ப்பூர்ஜது: || 12 ||

1. எந்தக் கண்ணைக்கொண்டு ப்ராணிகள் வெளிச்சம் படும் இடமெல்லாம் ஸஞ்சாரம் செய்கின்றனரோ, அந்த நற்பார்வைக்குக் காரணமான கண்ணே, தவளையுடல்நீராலான மையின் பூச்சினுல் மூங்கிலில் பாம்பென்ற விபரீதபுத்தியை விளைவிக்கும். அதே சில பாம்புகளிடத்தில் விஷத்தைப் பெற்று மற்றவரின் கண்ணைப் பறிக்கும். விஷமுள்ள பாம்பின் கண்ணை மந்த்ரவாதியின் கண் அழிக்குமென்னலுமாம். அந்தக் கண்ணையும் ஒரு நொடியில் இடியோடு உண்டாம் மின்னல் அழிக்கும்.

2. எல்லா லோகங்களைப் பிறர்க்கு அளிக்கவல்ல பெரியோர்களின் பார்வைகூட, சிலர் ஸ்த்ரீகளிடத்தில் சினேகமாயிருப்பதை மட்டும் கொண்டு இவர்கள் பரஸ்த்ரீயனுபவத்தில் நோக்குள்ள புருஷர் என்று ப்ரமத்தை உண்டுபண்ணும். பெரியோர்களும் இப்படி ப்ரமிப்பர்கள். இப்படி வரும் பார்வையானது விபரீதமாக்கப்பட்டதால் ஸுகம் அனுபவிப்பவர்கள் இவர்களை ப்ரீதியோடு பார்ப்பதை விலக்கும். அந்த நல்ல கதிக்குக் காரணமான பார்வையையும் பரஹிம்ஸையிலுள்ள ருசியானது இடி போல் வாதை செய்து அழிக்குமென்க.

3. பதிவ்ரதையான அஹல்யையின் பார்வையானது பலருக்கு நல்ல கதிக்குக் காரணமாயிருப்பதே. காதல் என்றதோடு சேர்ந்து மஹர்ஷி வம்சத்திலும் இந்த்ரன் விடனுக நடமாடக் காரணமாயிற்று. அவளோடு போகத்திலே நோக்குள்ளாரின் கெட்ட பார்வையை அழிக்க

வல்ல அம் மஹர்ஷியின் பார்வையானது ஒரு நொடியில் இடி போலுண்டாகி, அவளை ஒன்றும் செய்யவாகாதபடியாக்குவதில் நோக்குண்டு அவளைக் கல்லாக்கி அவள் பார்வையை யழித்தது.

4. கண்ணபிரானின் கடாக்ஷ விஷயமுமாம். எந்த கடாக்ஷத்தினால் அந்தந்த உலகில் ப்ராணிகள் பலன்களைப் பெறுகின்றனரோ, அதே கடாக்ஷம் இடையர்வம்சத்திலிருப்பவருக்கு, இவன் விடன்—பரஸ்த்ரீ விஷயம் பற்றுடையன் என்ற விபரீத புத்தியை விளைவித்தது. போகானுபவத்தில் நோக்கால் மாறின ஸ்த்ரீ த்ருஷ்டியையும் நற்புத்தி யளித்து அழிக்கும் அவனுடைய வேறு விதமான ருசியே, போகத்திற்கு இடி போன்றதாகி முன்னிருந்த தன் (ஸ்ரீகிருஷ்ணனது) த்ருஷ்டியை யழிக்கும்.

சிலர் துர்வ்ருத்தர்கள் போல் தோன்றினாலும் அவர்களுடைய ஸ்வபாவத்தை ஆய்ந்து அறிய வேண்டுமென்க. (12)

इति दुर्वृत्तपद्धतिः

अथ असेव्यपद्धतिः (५)

एवं दुष्टानामनिपुणत्व-दृप्तत्व खलत्व-दुर्वृत्तत्वैरुत्तरोत्तरातिशयितं दोषं प्रतिपाद्य तेषामसेव्यत्वमभिप्रयन् असेव्यान् आह—

कठिनः कृशमूलश्च दुर्लभो दक्षिणेतरः ।
कश्चित् कल्याणगो(गा)त्रोऽपि मनुष्यैर्नोपजीव्यते ॥ १ ॥

1. **कठिनः** अनार्द्रमनस्कः दयारहितः **कृशमूलः** कारणं विनैव द्वेषित्वात् मूलरहितः अभिवृद्धिहेतुधनरहितश्च **दुर्लभः** परैरुपसर्तुमशक्यः, **दक्षिणेतरः** दाक्षिण्यलेशेनापि हीनः **कल्याणगोत्रोऽपि**—शुभवंशप्रसूतोऽपि व्यर्थत्वात् मनुष्यैः **नोपजीव्यते** नाश्रीयते ।

2. **कश्चित्** अद्वितीयः **कल्याणगोत्रोऽपि** स्वयं सुवर्णपर्वतोऽपि । कल्याणमक्षये स्वर्णे इति विश्वः । अद्रिगोत्रगिरिग्रावेत्यमरः । **कठिनः** मृदुस्पर्शरहितः **कृशमूलः** मेरोर्मूलस्थानं स्वल्पपरिमाणमिति पुराणप्रसिद्धिः । **दुर्लभः** लब्धुमशक्यः । **दक्षिणेतरः** । "सर्वेषामेव वर्षाणां मेरोरुत्तरतः स्थितिः" इति वचनात् । मेरुं प्रदक्षिणीकुर्वन् सूर्यः सञ्चरति । तदुदयदेशः सर्वः प्राच्यो भवति । एवञ्च मेरुरुत्तर एव सर्वेषामिति । देववास्तव्यशिखरकूटमपि अदृश्यत्वान्न मनुष्यास्तमुपजीवन्ति ॥ गात्रेति पाठान्तरम् ।

அஸேவ்யபத்ததி 5.

அணுகத்தகாதவரை அறிவிக்கும் பத்ததி இது.

கடிந: க்ருசமூலச்ச துர்லபோ தக்ஷிணேதர: |
கச்சித் கல்யாணகோத்ரோऽபி மநுஷ்யைர் நோபஜீவ்யதே || 1 ||

1. நெஞ்சுரப்புடையவனும் மூலதனம் ஸ்வல்ப்பமாயிருப்பவனும் பெறமுடியாதவனும் தாக்ஷிண்யமற்றவனுமானவன் நல்ல வம்சத்திற் பிறந்தவனாயினும் மனிதரால் ஆச்ரயிக்கப்படமாட்டான்.

2. மேருமலை பொன்மலையாயினும், உரப்பானது; அடிபாகம் காணவாகாதபடி குறுகியது, பெறப்படமாட்டாதது. எங்கிருப்பவருக்கும் மேரு தக்ஷிணமாகாது. வடதிக்கிலேயேயிருக்கும். யாவரும் அதை வடக்காகக் கொண்டே திக்குகளை அமைப்பர். அதற்குத் தக்கவாறே ஸூர்யோதயமாகின்றபடியாலே, அது உச்சியில் தேவதைகள் இருக்க இடமானாலும் மனிதர்கள் நெருங்கும்படியாகாது.

दृष्टपङ्का प्रतिपदं स्यादल्पसरसस्स्थितिः ।
काले घनरसैर्योगेऽप्यसेव्या जीवितार्थिभिः ॥ २ ॥

1. **अल्पसरसः** पल्वलप्रायस्य **स्थितिः** मर्यादा स्वरूपम् **प्रतिपदम्** एकैकपदन्यासेऽपि **दृष्टः पंकः** कर्दमः यत्र सा । अतः वर्षाकाले **घनरसैः** मेघोदकैर्**योगे**ऽपि–संबन्धेऽपि **जीवितार्थिभिः** पानीयापेक्षैः **असेव्या** भवति । पदन्यासमात्रेऽपि कालुष्यात् ।

2. **अल्पेन** बुद्धिबलधनादिना अल्पभूतेन जनेन सह **सरसा** सानन्दा स्थितिः **प्रतिपदं** क्षणेक्षणे **दृष्टपंका** दृष्टपापा । पापहेतुः । अतः **काले** कदाचित् **घनैः** निबिडैः **रसैः** श्रेष्ठवस्तुभिः सारभूतैः तस्य, तन्मूलं स्वस्य च **योगे**ऽपि युक्तत्वसंभवेऽपि **जीवितार्थिभिः** वृत्तिसापेक्षैरपि **असेव्या** अनादरणीया ।

த்ருஷ்டபங்கா ப்ரதிபதம் ஸ்யாத் அல்ப்பஸரஸஸ்ஸ்த்திதி: |
காலே கநரஸைர் யோகேப்யஸேவ்யா ஜீவிதார்த்திபி: || 2 ||

1. சிறிய குளத்தின் இருப்பு ஒவ்வோரடியிலும் சேறு காணவாகின்றது. எனவே கார்காலத்தில் மேகநீரின் சேர்க்கையிருப்பினும் தண்ணீர் வேண்டுமவரால் அணுகவாகாததாம்.

2. அல்ப்பஸ்வபாவனுடன் ஸரஸமான இருப்பு அடிக்கடி பாவம் காணக் காரணமாகும். சில ஸமயம் அதிகமான த்ரவ்யம் பெறவாகின்றதானாலும் வாழ்க்கையை விரும்புகின்றவரால் அச்சேர்க்கை கொள்ளத்தகாததாம்.

स्वत(सत)स्सत्त्वविहीनानां सत्तयैवापराध्यताम् (तः) ।
कथङ्कारं प्रतीकारः कल्पकोटिशतैरपि ॥ ३ ॥

1. श्लोकोऽयं संकल्पसूर्योदयेऽपि । तत्रास्मद्व्याख्यानमत्रानूद्य अन्यदप्युच्यते । **स्वत** इत्यत्र **सत** इति उपरि **अपराध्यत** इति च पाठः । **स्वतः** स्वरूपेण । साक्षादिति यावत् । **सत्त्वविहीनानां** तेजसा सह तिमिरस्येव अन्येन सह साक्षात्स्थितिमलभमानानाम् । औष्ण्यस्य जल इव परम्परया स्थितिः स्यान्नाम । साक्षात्तु न स्थितिः । **सत्तयैव** स्वसत्तामात्रेण **अपराध्यताम्** अन्यस्थितिमसहमानानाञ्च वस्तूनां कथं **प्रतीकारः** विरोधपरिहारः । कस्यचिदधिकरणे स्वयमसतां स्वाधिकरणे तद्रहितानाञ्च, परस्परव्यधिकरणाना-

मिति यावत्। **कथं** सामानाधिकरण्यमिति । कथङ्कारमित्यस्य कथमित्येवार्थः । अन्यथैवं कथमित्थमिति कथमि उपपदे कृञः स्वार्थे णमुल् ।

2. ये स्वयं न संगच्छन्ते, परस्य स्वसंगतमपि न सहन्ते, ते कथं समाधेया इति ।

3. अन्योऽप्यर्थः-**सत्त्वेन** सज्जनत्वेन हीनानाम् -असज्जनानाम् , **सत्तयैव** अन्यगतसज्जनत्वमेव हेतूकृत्य **अपराध्यतां** तद्बाधकानां **कथं स्वतः प्रतीकारः**? प्रबलहेतुना विना स्वभावतो वारणं न भवतीति।

4. **सतः अपराध्यतः** इति पाठे **सत्त्वविहीनानाम्** असात्त्विकानां राजसतामसपुरुषाणाम् , तान् प्रति यः सत्तयैवापराध्यति—यस्य सात्त्विकस्य स्थितिमात्रमपि स्वविषये कृतमपराधं तेमन्वन्ते इत्यर्थः । तस्य **सतः** सत्पुरुषस्य **कथं प्रतीकारः** दोषोन्मोचनं न भवतीत्यर्थः ।

5. **स्वतस्सत्त्वविहीनानां** पारमार्थिकसत्तारहितानां मायाविद्यादीनां **सत्तयैव** व्यावहारिकसत्तामात्रेण **अपराध्यतः** दोषं प्राप्नुवतः **सतः** सच्छब्दवाच्यस्य पारमार्थिकसत्ताविशिष्टस्य **कथं प्रतीकारः** । अद्वैतमते एतावत्पर्यन्तमितोऽतःपरमपि कदापि मुक्तिर्न भवति । अविद्याया दुरुच्छेदत्वादिति भावः । सत्त्वविहीनसत्तयेत्यनेन मायाविद्यादेर्दुर्वचत्वमपि ज्ञाप्यते। अविद्यानानात्वपक्षमादृत्य बहुवचनम् ।

6. **सत्त्वं** बलम् । स्वतः सत्त्वहीनानां बलरहितानां जनानां **कथं अपराध्यतां प्रतीकारः** सापराधजनविषये प्रतिकर्तव्यकारित्वं सत्तयैव स्वरूपमात्रेण भवेत् । प्रतिकर्तुर्बलमपेक्षितमिति भावः ।

7. **सत्त्वं** जीवः चित्तं वा । तद्रहितानां सत्तयैव—स्वरूपेणैव **अपराध्यतां** बाधकव्यापारवतां विषयन्त्रादीनां स्वरूपनाशनमन्तरा कथं सत्ताकाले प्रतीकारः । चेतनाधीनव्यापारत्वे निरोधः सुकरः, नान्यथेति ।

8. **स्वतस्सत्त्वम्**—अनादित्वम ; तद्रहितानाम् , **सत्तया अपराध्यतां** प्रतियोगिविरोधिनाम् । ध्वंसानामिति यावत । **प्रतीकारः कथम्** । निवृत्तिः कदापि नेत्यर्थः । प्रागभावः प्रतियोगिविरोधी अनादिः कार्ये उत्पन्ने निवर्तते । ध्वंसस्तु सादिर्न निवर्तते । घटध्वंसनिवृत्तौ घटोन्मज्जनप्रसंगादिति ।

ஸ்வத(ஸத)ஸ் ஸத்வவிஹீநாநாம் ஸத்தயைவாபராத்யதாம் (த:) |
கதங்காரம் ப்ரதீகார: கல்பகோடிசதைரபி || 3 ||

1. ஒன்றோடு சேர்ந்திருப்பைக் கொள்ளாதவையும் தம்மோடு அதன் இருப்பைப் பொறாதவையுமான வஸ்துக்களுக்குச் சேர்த்தி என்பது எந் நாளுமில்லை.

2. தாமும் சேர இஷ்டப்படாமல், பிறர் தம்முடன் சேர்வதைப் பொறுக்காமலுமிருப்பவரை சரிப்படுத்தல் ஏது?

3. ஸாத்விகராகாத ஜனங்களுக்கு, பிறர் ஸாத்விகராயிருப்பதையே காரணமாக்கிக் குற்றம் செய்கிறவர்களுக்கு, ஏதேனும் பலமான காரணமின்றி அடக்கம் தானே வாராது.

4. ஸத: அபராத்யத: என்ற பாடத்தில்—ஸாத்விகராகாத ஜனங்களுக்கு எந்த ஸத்புருஷனுடைய இருப்பே குற்றமாகிறதோ. அப்படி குற்றவாளியானவனுக்கு அதற்கு விலக்கு ஏது?

5. உண்மையாக இல்லாத மாயை அவித்யை என்றவற்ருல் ஸத்தான ப்ரஹ்மத்திற்குக் கேடு உண்டாகில், இதற்கு என்றும் பரிஹாரம் கிடையாது. கேடே உண்டாகாது. உண்டாகில் மாயை மாய வழியில்லை.

6. ஸத்துவமாவது வலிவு. வலிவற்றவர்களுக்கு குற்றம் செய்கின்றவர்கள்விஷயமாக ப்ரதியாகச் செய்ய சக்தி ஏது?

7. ஸத்துவமாவது ஜீவன் அல்லது புத்தி. புத்தியுள்ள வஸ்துவை யுக்தாயுக்தம் சொல்லி மாற்றலாம். அசேதநமாய் யந்த்ரம் போல் வேலை செய்வதை உபதேசத்தால் மாற்றவாகுமோ.

8. தார்க்கிகர்கள், ப்ராகபாவம், த்வம்ஸம் என்ற இரண்டை இசைந்தனர். அவற்றில் ப்ராகபாவமென்பது வஸ்துவை உண்டு பண்ணிஞல் தானே தொலையும். த்வம்ஸம் என்றைக்கும் போகாது. வந்தது வந்ததே. ஸ்வதஸ் ஸத்வமாவது அஞுதியாயிருக்கை. அதில்லாத அபாவம் த்வம்ஸமாகும். அதுநீங்காது.

अपि संतापशमनाः शुद्धाः सुरभिशीतलाः ।
भुजङ्गसङ्गाज्जायन्ते भीषणाश्चन्दनद्रुमाः ॥ ४ ॥

1. चन्दननामानो **द्रुमाः** वृक्षाः **संतापशमनाः** औष्ण्यनिवर्तकाः **शुद्धाः** श्वेताः **सुरभयः** स्वाभाविकगन्धविशिष्टाः **शीतलाः** शैत्ययुक्ताश्चापि उपसर्पणीया न भवन्ति, किं तु **भीषणाः** भयङ्करा भवन्ति । कस्मात् ? **भुजङ्गानां** सर्पाणां संगात् । चन्दनवृक्षेषु सर्पा वसन्तीति प्रत्यक्षप्रसिद्धिः । "मुखेन गरलं मुञ्चन् मूले यदि महोरगः । फलसंदोहगुरुणा तरुणा किं प्रयोजनम्" इति चोच्यते ।

2. **चन्दनद्रुमाः** चन्दनद्रूणां चन्दनवृक्षाणां मा लक्ष्मीः संपत् येषां ते चन्दनवृक्षतुल्याः पुरुषा अप्येवं तापहराः, **शुद्धाः** सात्त्विकाः, **सुरभयः** सर्वत्र प्रसृतयशोविशिष्टाः, **शीतलाः** शान्त्यादिसमृद्धवाङ्मयाश्च । अथापि **भुजङ्गानां** विटप्रायाणां सहवासे सति भीषणा भवन्ति । अत एव गौतमः भीषणः शशाप ।

அபி ஸந்தாபசமநா: சுத்தா: ஸுரபிசீதளா; |
புஜங்கஸங்காஜ் ஜாயந்தே பீஷணுச் சந்தநத்ருமா: || 4 ||

1. சந்தனமரங்கள் தாபத்தைப் போக்கும். வெண்மையானவை. மணம் வீசும், குளிர்ந்திருக்கும். ஆயினும் பாம்புகள் கூடியிருப்பதால் பயங்கரமானவையே, அணுகவாகா.

2. சந்தனம் போன்ற மஹான்கள் தாபமெல்லாம் தீர்ப்பராயினும் ஸாத்விகராயினும் மணம் வீசப்பெற்றவராயினும் (பெரும் புகழ் உடையராயினும்) குளிர்ந்த மனமுடையராயினும் துஷ்ட ஸங்கம் நேரும் போது பயங்கரமாவார்கள்.

नीचानुसरणान्मन्ये निसर्गपरिशुद्धयोः ।
गतिः कुटिलतां याति गङ्गायमुनयोरिव ॥ ५ ॥

1. नीचसेवाया अनर्थकरत्वमाह नीचेति। स्वभावतः शुद्धस्यापि संसर्गवशाद्दोषो भवतीत्येतावति वक्तव्ये परिशुद्धयोरिति द्विवचनं किमर्थम्। 'संसर्गजा दोषगुणा भवन्ति' इति रीत्या एकैकपुरुषग्रहणेनैव सामान्यतो वक्तव्यत्वादिति चेत्—शुद्धोभयनिष्ठायाः गतेः कौटिल्यापादनमत्र विवक्षितम्। यथा द्वौ पुरुषौ राजानौ अन्यौ वा गुणशालित्वान्मित्रभूतौ केनचिन्नीचेन संसर्गे तत्कृतपैशुनादिना मिथो द्विष्टौ भवतः। उभपुरुषानुसरणे तु कुटिलयोरप्यार्जवं भवेदिति। शब्दार्थस्तु-निसर्गेण स्वभावेन परिशुद्धयोः निर्मलमनसोरपि द्वयोः, नीचानुसरणात् निकृष्टपुरुषसहवासमूलम्, तद्वशतया, गतिः ज्ञानं कुटिलतां मिथो विरोधविषयकतां याति प्राप्नोति। मिथ एवं भवतीति ज्ञापनाय द्विवचनम्। गङ्गायमुनयोरिति दृष्टान्ते शुद्धत्वं निर्मलत्वम् ऋजुतया प्राग्दिग्गामित्वञ्च। नीचानुसरणं निम्नदेशगमनम्, नीचाख्यस्थलविशेषसंबन्धो वा। गतिः प्रवाहगमनम्। तत्कुटिलता 'क्रोशं कुटिला नदी' इत्यादिप्रयोगात् किञ्चिद्दूरं दिगन्तरसंबन्धः।

2. एवं स्त्रीपुरुषद्वयमपि ग्राह्यम्। द्वयोः स्त्रीपुरुषयोः स्वभावतः शुद्धयोः निष्कामयोरपि नीचानुसरणात् सकाममिथुनसंदर्शनादिना, यद्वा नीचेन्द्रियपारवश्यात् क्रमेण गतिः दशा। "गतिस्तु गमने मार्गे दशायां बुद्ध्युपाययोः" इति कोशात्। कुटिलतां कामपरीततां याति।

3. शुद्धयोरपि ग्रहयोः नीचस्थाननिवेशात् गतिः कुटिला भवति; स्वशक्तिहानेः।

நீசாநுஸரணஸம்பவே நிஸர்கபரிசுத்தயோ: |
கதி: குடிலதாம் யாதி கங்காயமுநயோரிவ || 5 ||

1. இயற்கையில் தூய மனம் உடையர்களான இருவருக்குங்கூட நீசனுடைய சேர்க்கையால் அவன் சொல்லுக்கும் செயலுக்கும் இணங்குவதால் ஒருவருக்கொருவர்விஷயமாக புத்தியில் மாறுதல் விரோத மனப்பான்மை உண்டாகிறது. அரசர்கள் இருவர், சிநேகிதர் இருவர் என்றவாறு இருவரைக் கொள்வது. (பொதுவில் மனிதனுக்குக் கெட்ட ஸஹவாஸத்தால் மனம் கெடுவதுமட்டும் இங்கே கருதப்படுவதாகில் த்விவசனம் வேண்டா. ஆகையால் அதற்கு இணங்கக் கருத்தாம்.)

'கங்கைக்கும் யமுனைக்கும் போல' என்றதால் அவை எங்கும் நேராகப் போகின்றவை, நீசமான இடத்திற் சேர்ந்ததால் அவற்றின் கதிக்கு திக்குச் சிறிது தூரம் மாறுகிறது.

2. ஸ்த்ரீ புருஷவிஷயமாகவுமாம். ஒரு ஸ்த்ரீயும் புருஷனும் பல நாள் பரிசுத்தமான மனத்துடன் காமவிகாரமின்றியே பழகியிருந்தும் முடிவில் நீசமான பழக்கமென்றவுலகியற்கைக்கு உட்பட்டு நீசமான இந்திரியத்திற்கு வசப்பட்டு புத்திமாற்றம் காமவிகாரம் பெறுகின்றனர்.

3. சுபக்ரஹங்கள் இரண்டு நீச இடத்திற் சேர்ந்து வக்கரமாகின்றன. (5)

मित्रे भवति वैमुख्यं मैत्री दोषाकरेण च ।
अपि तीर्थप्रसूतानां कैरवाणां रजोभृताम् ॥ ६ ॥

1. **तीर्थप्रसूतानां** शुद्धकुले उत्पन्नानां परिशुद्धमातापितृजनितानां सदाचार्यमूलज्ञानजन्मनां वा **कैरवाणां** अवदातवत्दृश्यानामपि पुरुषाणां **रजोभृतां** रजोगुणभूयिष्ठमनस्कानां **मित्रे** हितोपदेष्टरि पुरुषे **वैमुख्यं** विषयस्तमुखत्वं तद्दर्शनानिच्छा भवति । तथा **दोषाकरेण** दोषाणामाकरेण दोषराशि-मता पुरुषेण सह **मैत्री** स्नेहश्च भवति । अतो रजो वर्ज्यम् । कैरवशब्दः शठमूर्ख पर्यायः ।

2. **तीर्थे** शुद्धजले **प्रसूतानाम्** उत्पन्नानां **रजोभृतां** पुष्परजोविशिष्टानां **कैरवाणां** कुमुदानां **मित्रे** सूर्ये **वैमुख्यं** संकुचिताग्रभागत्वम्, **दोषाकरेण** दोषा-रात्रिः तद्धेतुना चन्द्रेण सह (दोषाणामाकरेणेत्यर्थान्तरम्) **मैत्री** स्नेहः भवति । कैरवाणि सूर्ये सति निमीलन्ति, चन्द्रे चोन्मीलन्ति ।

மித்ரே பவதி வைமுக்யம் மைத்ரீ தோஷாகரேண ச |
அபி தீர்த்த ப்ரஸூதா நாம் கைரவாணும் ரஜோப்ருதாம் || 6 ||

1. சுத்தமான குலத்தில் சுத்தரான தாய்தந்தைகளிடம் பிறந்தவரும் ஸதாசார்யமூலமாக ஞானப்பிறவி பெற்றவரும் சுத்தமான தோற்ற முடையருமான புருஷர்களும் துஷ்டராய் ரஜோகுணம் உள்ளவராகில் அவர்களுக்கு சிநேகிதனிடத்தில் முகநோக்கில்லை. முகம் மாறிடும். தோஷங்களுக்குக் கொள்கலமானவனோடு சிநேகமுமுண்டாகும்.

2. நல்ல தண்ணீரிற் பிறந்த ஆம்பல்கள் தாதுகளை தூட்களை நிறையப் பெற்றவை. சூரியன் இருக்கும்போது அவற்றிற்கு மலர்ச்சி யில்லை. இரவுக்கான சந்திரனோடு சினேகம். (மித்ரன்—சூரியன்— தோஷா—இரவு. அதை விளைவிப்பவன் அதில் விளங்குகின்றவன் சந்திரன்.) (6)

मित्रत्याग-दुष्टस्नेहरूपबाह्यांशाभावेपि जितेन्द्रियत्वाभिनयनशीलः मनसा विषयसेवी च यः, सोऽपि असेव्य इत्याह—

अपि निर्मुक्तभोगेन स्वान्तस्थविषयेक्षया ।
असद्भावाय जायेत जिह्मगेन सहाऽऽसिका ॥ ७ ॥

1. **निर्मुक्तः** बहिः स्पष्टं परित्यक्तः जुगुप्सितो निन्दितश्च **भोगः** कामभोगः येन तादृशेनापि । पुरुषस्यात्यर्थं भोगनिन्दापरत्वेऽपीति यावत् । **जिह्मगेन** वक्रगामिना आर्जवरहितेन । बहिर्वदस्थितमनसा, 'मनस्यन्यत् वचस्यन्यत्' इति रीतिजुषा पुरुषेण सह **आसिका** उपवेशः-तत्सहवासः । **स्वान्तस्थविषये-क्षया** । स्वान्तं मनः तत्र स्थिताः विषयाः अनुभाव्यस्त्रीप्रभृतिवस्तूनि, अथवा स्वस्य **अन्ते** समीपे स्थिताः विषयाः, तद्विषयकेक्षा तच्चिन्ता तस्यास्तीति हेतोः **असद्भावाय असन्** दुष्टः, तत्त्वाय जायेत । मनसाविषयचिन्तापरपुरुषसहवासे दुष्टत्वमेव भवेदिति ।

2. **निर्मुक्त** मुक्तकञ्चुकः **भोगः** शरीरं यस्य तेनापि निर्मोकदशा प्रयुक्तेषदशक्तिमतापि **जिह्मगेन** सर्पेण सह स्थितिः पुरुषस्य **स्वान्तस्थविषया** स्वस्यान्तर्वर्तमानविषयुक्तया **ईक्षया** सर्पकर्तृकसविषदर्शनेन हेतुना **असद्भावाय**-सद्भावः स्थितिः तदभावाय नाशाय स्यात्। कञ्चुकनिर्मोक एव हि सर्पस्य ; न तु विषनिर्मोकः।

அபி நிர்முக்த போகேந ஸ்வாந்தஸ்த்த விஷயேக்ஷயா |
அஸத்பாவாய ஜாயேத ஜிஹ்மகேந ஸஹாऽऽஸிகா || 7 ||

1. ஸ்த்ரீஸங்கத்தை நன்கு விட்டவனுகத் தோன்றினுலும் கபடமாய் நடந்துகொள்கின்றவன் வெளியில் ஒன்று சொல்லி மனத்தில் வேறு நினைப்பவனுனுல் அவனேடு சேர்ந்து இருக்கை கெட்டவனுகைக்குக் காரணமாம். அவனுடைய மனத்தில் அருகிலிருக்கும் விஷயங்களைப் பற்றிய நோக்கு இருக்கின்றதாதலின்.

2. தோல் உரித்த உடல் உடையதாயினும் பாம்பின் அருகில் இருக்கலாகாது. அது அழிவுக்குக் காரணமாகும். விஷமுள்ள பார்வை அதற்கு இருப்பதால். (ஸ்வாந்த:ஸ்த்தவிஷயா ஈக்ஷயா என்று இரு பதங்களாகப் பிரிக்க.) (7)

मानयन्नपि विरोधी न सेव्यः ; "न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत्। विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति" इत्युपदेशादित्याह—

मण्डूकराविणं सर्पं गोमुखश्च मृगादनम्।
असुहृत्त्वेन मन्येत मानयन्तश्च वैरिणम् ॥ ८ ॥

1. **मण्डूकः** मेकः ; तद्वत् रौतीति मण्डूकरावी ; तादृशं सर्पम्। सर्पेषु मण्डूकवन्नदति कश्चित्। तच्छ्रवणे अयं मण्डूक एवेति मण्डूकादयः समीपमागच्छेयुः। तदा ते तेन आहारत्वेन गृह्येरन्। गोः मुखमिव मुखं यस्य सः ; तादृशं **मृगादनं** व्याघ्रम्। 'तरक्षुस्तु मृगादनः' इत्यमरः। अयं गौरिति मत्वा मृगः समीपमिशत ; तेनाद्येत। तथा **मानयन्तं** श्लाघमानं मित्रवत् अभिनयन्तं वैरिणञ्च। इमान् त्रीनपि **असुहृत्त्वेन** सुहृद्भिन्नत्वेन। न सुहृत् असुहृदिति विग्रहः। तथा असून् प्राणान् हरतीति असुहृत् प्राणहरत्वेन मन्येत। तत्र विश्वासो न कार्यः।

மண்டூகராவிணம் ஸர்ப்பம் கோமுகஞ்ச ம்ருகாதநம் |
அஸுஹ்ருத்த்வேந மந்யேத மாநயந்தஞ்ச வைரிணம் || 8 ||

1. தவளைபோல் கத்தும் ஒருவகைப் பாம்பையும், பசுமுகம்போன்ற முகம் கொண்ட புலியையும், நம்மைக் கொண்டாடுகின்ற பகைவனையும் நன் மனம் உண்டென நாம் நினைக்கலாகாது; உயிரை வாங்குமென்றே நினைக்கவேண்டும். (8)

घोरास्त्यक्तमिथोवैराः सौकर्यवदुपद्रवे।
दण्डेनापि न भज्येरन् पापकुण्डलि(मण्डलि)मण्डलाः ॥ ९ ॥

1. **घोराः** भयङ्कराः **पापाः** पापिनः **कुण्डलिनः** सर्पवत् वेष्टनवन्तः अत एव मण्डलभृताः **सौकर्यवदुपद्रवे**—सुकरस्य भावः **सौकर्यं** सुखेन कर्तुं शक्यत्वम् । तद्वान् । सुकर इति यावत् । तादृशः उपद्रवः यस्य विषये तस्मिन् । यः पुरुषः सुखेन पीडयितुं शक्यः तद्विषये । पीडनार्थमेव **त्यक्तमिथोवैराः** अन्योन्यवैरं स्थितमपि त्यक्त्वा प्रवृत्ताः **दण्डेनापि** शिक्षायां कृतायामपि **न भज्येरन्** न भङ्गं प्राप्नुवन्ति । पुनःपुनरुपद्रवन्त्येवेत्यर्थः । "मण्डलं त्रिषु बिम्बे स्यात् बृन्दे द्वादशराजके" इति वचनात् मण्डलशब्दो व्यूहार्थे पुंलिङ्गोऽपि ॥

2. **घोराः** घोषात्मकेन भषणेन भयङ्कराः **पापाः** पापजन्मानः **कुण्डलिनः** मिलिताः **मण्डलाः** श्वानः । "स्यान्मण्डलं द्वादशराजके च देशे च बिम्बे च कदम्बके च । दुष्टपभेदेऽप्युपसूर्यके च भुजङ्गभेदे शुनि मण्डलः स्यात्" इति कोशात् । **सौकर्यवदुपद्रवे** सूकरस्य भावः **सौकर्यम्** वराहत्वम् तद्वान् वराहः । तस्योपद्रवे विषये । तदुपद्रवार्थं **त्यक्तमिथोवैराः** परस्परद्वेषमपि परित्यज्य प्रवृत्ताः **दण्डेनापि** दण्डघाते कृतेऽपि **न भज्येरन्** । भषन्त एव स्युरिति ।

3. **मण्डलशब्देन** सामन्तराजदेशग्रहणे पापाः कुण्डलिमण्डलाः परितस्स्थतदेशाधिपतयः सामन्तनृपाः **सौकर्यवदुपद्रवे** सार्वभौमस्योपद्रवे सुकरे सति तदर्थं त्यक्तमिथोवैरास्सन्तः **दण्डेनापि** सामदानभेददण्डरूपेषूपायेषु दण्डोपाये कृतेऽपि **न भज्येरन्** न शान्ता भवन्ति । सार्वभौमेन सर्वदा दुष्करोपद्रवेण भाव्यम् ।

4. कुण्डलिशब्दस्य सर्पार्थकत्वात् सर्पसमूहाः **सौकर्यवद्भिः** सूकरैः वराहैः **उपद्रवे** वल्मीकानां भेदे सुखेन क्रियमाणे त्यक्तमिथोवैराः वराहेण सह वैराभावेऽपि निस्सरन्तीत्यप्यर्थः । वराहैर्वल्मीकोपद्रवकरणमस्ति । अतोऽयमप्यर्थो ग्राह्यः । मण्डलीति पाठे **मण्डलिनः** श्वानः "मण्डली श्वा रविः शक्रो मार्जारो भुजगो नृपः" इति भट्टबाणः । मण्डलशब्दस्यापि श्वार्थकत्वात् **कुण्डलिमण्डलाः** सर्पाः श्वानश्चेति द्वन्द्वोऽपि भवेत् ॥

கோராஸ் த்யக்தமிதோவைரா: ஸௌகர்யவதுபத்ரவே |
தண்டேநாபி ந பஜ்யேரந் பாபகுண்டலிமண்டலா: || 9 ||

1. பயங்கரராய் பாபிகளாய் ஸமயத்தில் கூட்டமாகச் சேருமவர்கள் ஒருவனை ஹிம்ஸிப்பது ஸுகமாக நடக்குமாகில் உடனே ஒருவருக்கு ஒருவரோடு இருக்கும் பகையையும் விட்டுச் சேருவர்கள். ராஜசிக்ஷையில் கூட அடங்கமாட்டார்கள்.

2. பயங்கரமான நாய்கள் பாபப்பிறவி பெற்றவை பன்றியைப் பரிபவிக்க வேண்டும்போது ஒன்றோடொன்றுக்குள்ள பகையையும் விட்டுச் சேரும். தடியெடுத்து அடித்தாலும் விடா (ஸௌகர்யவத் என்பதற்கு ஸௌகரம் பன்றி என்ற பொருளாம்.)

3. சுற்றுப் பக்கங்களில் இருக்கும் சிற்றரசர்கள் பேரரசனுக்கு ஹிம்ஸை செய்வது எளிதிலாகக் கூடியதாகில், ஸாமதான பேத தண்டங்களில் தண்டோபாயத்திலும் அடங்காமல் கிளர்ச்சி செய்வர்.

4. குண்டலி என்ற சொல்லுக்கு பாம்பென்ற பொருளும் உண்டு. பன்றிகள் புற்றை இடிக்கும் போது பாம்புகள் எல்லாம் அடித்தாலும் நிற்காமல் மேலே எழும் என்ற பொருள் கொள்வதாம். குண்டலி என்ற விடத்திலே மண்டலி என்ற பாடம் காண்கிறது. மண்டலி என்பதற்கு நாயென்ற பொருள் உண்டு. மண்டல என்ற சொல்லுக்கும் அப் பொருள் இருப்பதால் குண்டலி மண்டல என்பதற்கு பாம்புகளும் நாய்களும் என்று பொருள் கொள்ளலாம். (9)

अनेकान् असेव्यान् युगपद्दर्शयति—

अनाकलितमानुष्याः क्षमासंस्पर्शवर्जिताः ।
प्रतिबुद्धैर्न सेव्यन्ते पूर्वदेवविरोधिनः ॥ १० ॥

1. **मानुष्यं** मनुष्यभावः **अनाकलितम्** अगणितं यैः ते । दुर्लभं मानुषं जन्म ; तत्राऽऽत्मक्षेमकरमनुष्ठेयमिति विवेकरहिताः । मृगमनुष्यजन्मनोर्यो भेदः शास्त्रवश्यत्वावश्यत्व–कृत्याकृत्यविवेकाविवेकादिरूपः तमप्यविमृशन्तः । **क्षमा** क्षान्तिः तल्लेशेनापि हीनाः पिचाचप्रायाः । **पूर्वे** पूर्वपुरुषाः मातापितृमातुलादयोऽधिकवयस्काः सर्वे ; तेषां विरोधिनः ; दैवविश्वासाभावात् देवविरोधिनश्च । ईदृशा नास्तिकाः **प्रतिबुद्धैः** शास्त्रार्थविद्भिर्महाजनैः **न सेव्यन्ते** । तेषां धनादिकमस्तीति हेतुनापि तदुपसर्पणं न कुर्वन्ति महान्तः ॥

2. **अनाकलितमानुष्याः** मनुष्यत्वानाश्रया इति वा अनादृतमनुष्यगणा इति वा । **मानुष्यं** मनुष्यसमूह इति । स्वार्थयज्ञादिविधापनेन मनुष्यान् स्वपशूकर्तुमिच्छन्तः । "यथा पशुरयं स देवानाम्" इति श्रुतेः । **क्षमायाः** भूमेः संस्पर्शवर्जिताः । न भुवं पादेन स्पृशन्ति देवाः हेयत्वबुद्ध्या । **पूर्वदेवविरोधिनः** । पूर्वदेवाः सुरद्विष इति कोशात् असुराः पूर्वदेवाः । तेषां शत्रवः । पूर्वमेवाह महाऽऽसमित्यादिना पूर्वत्वेनावधारितः, 'दिव्यो देव एको नारायणः' इति निरुपाधिकदेवत्वाश्रयश्च भगवान् । तस्य विरोधिनः । मोक्षप्रवर्तनरूपतदभिप्रायविरोधित्वात् । "भक्तिमुद्वहतां नृणां संसारन्यूनताभीतास्त्रिदशाः परिपन्थिनः" इत्युक्तेः । ते ब्रह्मरुद्रेन्द्रादयः **प्रतिबुद्धैः** भगवत्पारम्यवेदिभिः परमैकान्तिभिर्ज्ञानिभिः **न सेव्यन्ते** नाराध्यन्ते । "ब्रह्माणं शितिकण्ठञ्च याश्चान्या देवताः स्मृताः । प्रतिबुद्धा न सेवन्ते यस्मात् परिमितं फलम्" इति भारतम् । "नान्यं देवं नमस्कुर्यात् विष्णुपादाब्जसंश्रयः", "देवर्षिभूतात्मनृणां पितॄणां न किङ्करः" इति च स्मर्यते ।

3. **अनाकलितमानुष्याः** मनुष्यधर्मभूत वैलक्षण्य–वस्त्रधारणादिरहिताः क्षमैः स्वमतप्रवेशक्षमैः सर्वैः **सहासंस्पर्शवर्जिताः**–सर्वान् स्वमते प्रवेशयन्तः सर्वेषामुत्तमवर्णभावनया स्पृश्यास्पृश्यवर्जिताः । **पूर्वो देवः** सर्वापेक्षया प्रथमः श्रीमान् । "यत्र पूर्वे साध्याः सन्ति देवाः" इति श्रुताः अनन्तगरुडविष्वक्सेनादयो नित्यसूरयश्च **पूर्वदेवाः** । तद्विरोधिनः विष्णुपारम्यानभिमतेः । ते दिगम्बराः **प्रतिबुद्धैः**–

वेदान्तार्थविद्भिः द्वैताद्वैतविशिष्टाद्वैतमतप्रविष्टैः सर्वैरपि न सेव्यन्ते नाद्रियन्ते । तदिदं प्रबोधचन्द्रोदयादौ विष्णुभक्त्यावश्यकत्वस्थापकाद्वैतादिमतेऽपि द्रष्टव्यम् ॥

அநாகலிதமாநுஷ்யா: க்ஷமாஸம்ஸ்பர்சவர்ஜிதா: |
ப்ரதிபுத்தைர் ந ஸேவ்யந்தே பூர்வதேவ விரோதிந: || 10 ||

1. மனிதத் தன்மைக்கேற்றது என்ன என்பதை கவனிக்காதாரும் பொறுமையென்பதுமில்லாதாரும் முன்னோர்களுக்கும் பெரியோர்களுக்கும் தேவர்களுக்கும் விரோதிகளுமான நாஸ்திகர்கள் விவேகிகளால் அண்டப்படமாட்டிலர்.

2. மனுஷ்யத் தன்மையைச் சிறப்பாக நினையாதாரும், பூமியைக் காலால் மிதிக்காதவரும், பூர்வதேவர்களென்ற அசுரர்களுக்குப் பகைவர்களுமான தேவதைகளை வேதாந்தத்தின் மூலம் பரம்பொருள் திருமாலே என்று திடமாகக் கண்டு அவன் தொண்டே செய்கின்றவர்கள் ஆராதிக்கமாட்டார்கள்.

3. மனிதத் தன்மைக்குத் தக்கவாறு துணியணிதல் முதலானவை யற்றவரும் தம் மதம் புகுந்தால் எல்லாம் ஒரே ஜாதி என்பாரும் திருமாலை தூஷிப்பவருமான திகம்பர சைவரை த்வைத—அத்வைத—விசிஷ்டாத்வைத மதத்தினர் யாரும் சேர்த்துக் கொள்வதில்லை. (10)

बहुदृष्टान्तप्रदर्शनेन शत्रुषु विश्वासस्य त्याज्यत्वमाह—

अमित्रे विश्वासः श्वपचकरके सौमिकरसः
कपाले गङ्गाम्भः खलपरिषदङ्के सुजनता ।
परिक्षीणाचारे श्रुतमनुपनीते च निगमः
स्वतस्सिद्धां शुद्धिं त्यजति विपरीतश्च फलति ॥ ११ ॥

1. **अमित्रे** शत्रौ विश्वासः अस्माभिः क्रियमाणः **स्वतस्सिद्धां** विश्वासस्य स्वभावसिद्धां शुद्धिम् उद्देश्यपूरकत्वं त्यजति । नैवमिष्टासिद्धिमात्रम् ; **विपरीतश्च फलति** अनिष्टमपि जनयति । अमित्रे विश्वासपूर्वकं तत्समीपस्थितौ हि तस्यानिष्टोत्पादनं सुकरं भवति । अत्र दृष्टान्तान् बहून् समुच्चिनोति **श्वपचे**ति । **श्वपचः** श्वभक्षकजातिविशेषः ; तस्य **करके** पात्रविशेषे स्थितः **सौमिकरसः** सोमयागावशिष्टहुतद्रव्यम् । चतुर्थपादे सर्वस्यान्वयः । **शुद्धिः** पुरुषपवित्रीकरणम् । **विपरीतं** निषिद्धाश्रयगतद्रव्यग्रहणमूलं पापम् । एवं कपाले गङ्गाम्भ इत्यत्रापि । **खलानां** परद्रोहिणां परिषदः **अङ्के** समीपे **सुजनता** असत्प्रदर्शितं सौजन्यम् । यद्वा खलपरिषन्निवेशार्हजननिष्ठ सुजनत्वम् । तस्य खलपरिषत्प्रवेशकत्वेन साधुविरोधित्वात । **परिक्षीणाचारे** । 'आचारहीनं न पुनन्ति वेदाः' इत्युक्ते **श्रुतम्** वेदार्थज्ञानम् । अनुपनीतेनाधीतो वेदश्च । सर्वस्येष्टासाधकत्वमनिष्टसाधकत्वञ्चेति तद्वत् अमित्रे विश्वासोपि न युक्त इति न स सेव्यः ।

11. சத்ருவினிடத்தில் நம்பிக்கை வைப்பதும், நாய்மாமிசம் தின்பவனின் பாத்திரத்தில் வைத்த ஸோமயாகஹவிஸ்ஸும், மண்டையோட்

டில் வைத்த கங்காதீர்த்தமும் துஷ்டரின் திரளருகில் ஸஜ்ஜனனுக இருப்பும் ஆசாரமற்றவனிடமுள்ள கல்வியும் உபநயநம் செய்துகொள் ளாமல் ஓதின வேதமும் தங்களுக்கு இயற்கையாகவுள்ள குண மற்றவையாவதால் நற்பலனுக்காகா; கெட்ட பலனையும் விளைவிக்கும்.

पुरुषस्य धनाशा न युक्ता ; तस्यां सत्यामपि धनिकगृहे तदर्थं स्थितिरत्यन्तानर्थायेत्याह—

तरतु विवित्सयाऽब्धिमधिरोहतु शैलतटं
धमतु च धातुवर्गमधिगच्छतु शस्त्रमुखम् ।
तदिदमरुन्तुदं यदुत बह्ववधाय भिया
धनमदमेदुरक्षितिभृदङ्गणचंक्रमणम् ॥ १२ ॥

1. **विवित्सया** । विद्लृ लाभे । ततः सन् ; लिप्सया । धनलाभेच्छाऽस्ति चेत् , तया सर्वमिदं कामं करोतु । किं तत् ; तदाह पूर्वार्धे । **अब्धिं** समुद्रं **तरतु** लंघयतु । वाणिज्येन द्वीपान्तरं गच्छतु । **शैलस्य** पर्वतस्य **तटं** भूमिमधिरोहतु निधिखननाय । **धातुवर्गं** क्षुद्रलोहादिसमूहं—यं कञ्चिद्धातुमग्नौ निक्षिप्य सुवर्णीकरणाय पुटपाकप्रवृत्त. **धमतु** फूत्कारं कुर्वन्नस्तु । **शस्त्रमुखं** बाणादिकम् **अधिगच्छतु** अभ्यस्यतु, जित्वा राज्यं ग्राह्यमिति । इदं सर्वं कथञ्चित् सह्यम् , इदं वक्ष्यमाणं तु **अरुन्तुदं** मर्मवेधकम् आत्महानिकरम् । किं तत् । तदाह **यदि**ति । **उत**शब्दः पूर्वोक्तप्रकारैः सह वैकल्पिकत्वेन लोकाभिमतत्वं दर्शयति । **बहु अवधाय** अत्यन्तावधानेन ईषदपि प्रमादं विना, **भिया** निष्कारणकोपोऽपि यदि भवेत् , किं कार्यमिति भीत्या च **चङ्क्रमणं** संचारः । कुत्र? धनमस्माकमस्तीति मदेन **मेदुराणां** व्याप्तानां **क्षितिभृतां** भूपालकानाम् **अङ्गणे** गृहान्तःप्रदेशे । क्षितिभृत्सेवैव न युक्ता । नतरां राजधान्याम् ; नतमां तद्गृहाङ्गणे । संनिकर्षे पुनःपुनस्तद्वीक्षणप्रवृत्त्या अपराधस्य झटिति ग्रहणात् ; गृहे चौर्याद्यारोपणाच्चानर्थाधिक्यात् । अतोऽब्धितरणादिस्वतन्त्रकार्यापेक्षया सेवामूलधनेप्सा न युक्तेति नियतमसेव्या धनिन इति ॥

12. பணம் அவசியம் வேண்டுமானல் கடலைக் கடக்கலாம் ; (புதையல் பறிக்க) மலை யேறலாம் ; லோஹங்களை நெருப்பில் வைத்துப் பொன்னுக்க ஊதலாம்; அம்பு முதலியன கற்றுப் பெறலாம். வெகு ஜாக்கிரதையாக அச்சத்துடன் பணக்கொழுப்பேறின ப்ரபுக்களின் வீட்டில் நடமாடுவதென்பது யாது, அது மர்மத்தைப் பிளந்து மாய்ப்பதாகும். அதனுல் அத்தகையவர் அணுகத் தக்கவரல்லர் பணத்திற்காக. (12)

அஸேவ்ய பத்ததி முற்றும்.

महापुरुषपद्धतिः षष्ठी (६)

एवमसद्विषयपद्धतयः पञ्च गताः । अथ सद्विषयाः प्रवर्तन्ते । तत्र वृत्तज्ञानाद्यधीनमहत्त्वविशिष्टान् पुरुषान् अधिकृत्य सुभाषितप्रसादौ—

सतामेव खपुष्पत्वं येषां यत्सदसत्त्वयोः ।
न जातु तस्य तत्ताभ्यामिति तेषां स विश्वदृक् ॥ १ ॥

1. सतां बहूनां मध्ये यो विश्वदृक् स सत्तमो महापुरुषो भवति । स क इत्यत्रोपपाद्यते— येषां सतामेव स्थितानामेव साधूनामेव वा खपुष्पत्वं यत्सदसत्त्वयोः यस्य सत्त्वे चासत्त्वे च । यत्पुरुषसत्त्वप्रयुक्तं यत्पुरुषासत्त्वप्रयुक्तञ्चेत्यर्थः । साधूनामपि सतां यस्य ज्ञानिनोऽसत्त्वे ज्ञानसंपत्तिमार्गाभावात् मतान्तराभिमानिभिः परिभूयमानतया च खपुष्पत्वम्—असत्प्रायत्वम् । ज्ञानिनः सत्त्वे तु ज्ञानादिलाभप्रयुक्तविशेषसत्त्वेऽपि तत्सत्त्वादेवैषामप्रसिद्धतया अविद्यमानप्रायत्वमेव खपुष्पत्वम् । तस्य ज्ञानिनस्तु तत् खपुष्पत्वं ताभ्यां तत्सन्निष्ठसदसत्त्वाभ्यां जातु कदापि न भवति । इति अनेन हेतुना सः ज्ञानी तेषां तान् प्रति विश्वदृक् सर्वज्ञः । अत्र तत्ताभ्यामित्येकमेव पदं कृत्वा तेषां ताभ्यां तत्ताभ्यामिति विगृह्य सत्पुरुषनिष्ठसदसत्त्वाभ्यामित्यर्थं वर्णयन्ति । तदा खपुष्पत्वमिति पदस्यैवोत्तरार्धेऽप्यनुषङ्गः । यद्यपि ज्ञानिनोऽपि तदपेक्षयाऽतिशयितज्ञानिसंनिधौ खपुष्पत्वं स्यात्—अथापि न पूर्वोक्तसज्जनसत्त्वप्रयुक्तं तत् । अतस्तदपेक्षया तस्याधिकज्ञत्वमस्त्येव । अत एव तेषां स विश्वदृगित्युक्तम् । रैकस्य ज्ञानकर्मणोरन्तर्गतमन्येषां ज्ञानं कर्म चेति प्रशंसा उपनिषदि ।

2. विश्वदृक् जगच्चक्षुः सूर्यः । येषां सतां नक्षत्राणां खपुष्पत्वम् अविद्यमानतुल्यत्वं यत्सत्त्वे यस्य सूर्यस्य सत्त्वे ; खपुष्पत्वं खे आकाशे पुष्पवत् प्रकाशमानत्वं यस्य सूर्यस्यासत्त्वे च । रात्रौ नक्षत्राणां सम्यक् प्रकाशात् । सूर्यस्य तु खपुष्पत्वं नक्षत्रसत्त्वासत्त्वप्रयुक्तं न भवति । अतः तेषामपेक्षया सूर्य एव जगच्चक्षुर्भवति । आपेक्षिकमेवास्यापि जगच्चक्षुष्ट्वम् ; जगति सूर्यप्रकाश्योपरितनलोकतद्वर्तिपदार्थसत्त्वात् ।

3. यच्छब्देन ज्ञानस्य मनसः आत्मनो वा ग्रहणे यस्य सत्त्वे सतां पदार्थानां खपुष्पत्वम् इन्द्रियालंकारत्वम् , तद्ग्राह्यत्वात् । खम् इन्द्रियमिति । यस्य सत्त्वे सतामपि अविद्यमानतुल्यतया खपुष्पत्वम् । न तु पदार्थसदसद्भावाभ्यां ज्ञानमनआत्मनां खपुष्पत्वम् । स ज्ञानादिः विश्वदृक् सर्वग्राहीत्यप्यर्थः ।

மஹாபுருஷபத்ததி 6.

ஸதாமேவ கபுஷ்பத்வம் யேஷாம் யத்ஸதஸத்வயோ: |
ந ஜாது தஸ்ய தத்தாப்யாம் இதி தேஷாம் ஸ விச்வத்ருக் || 1 ||

1. எந்த மஹாபுருஷன் இருந்தால் ஸத்துக்களாயிருப்பவருக்கும் ப்ரஸித்திக் குறைவோ, எவன் இராமற் போனலும் அவர்கள் பிறரால் பரிபவிக்கப்பட்டு ஆகாயத்தாமரை போல் இல்லையென்னப்படுவார்களோ, அவர்களுடைய இருப்போ இல்லாமையோ, எவனுக்கு ப்ரஸித்திக் குறைவாகாதோ, அவன் அவர்களை விட அதிகம் அறிந்தவன், மேலானவன் ; அதனல் மஹான் என்னப்படுவான்.

2. விச்வத்ருக் என்ருல் ஜகச்சக்ஷு: என்றபடி. ஸூரியனுக்கு ஜகச்சக்ஷு: என்று பெயராம். அவன் எதிரில் நக்ஷத்ரங்கள் இல்லை

போலாகின்றன. அவன் இராத போது வானத்தில் பூத்திருக்கின்றன. அவற்றின் இருப்பினாலும் இல்லாமையினாலும் சூரியனுக்கு ஏற்றமோ குறைவோ இல்லை. எனவே அவன் சிறந்தவன்.

3. இருக்கும் வஸ்துக்கள் தோன்றுவதும் தோன்றாமையும் மனம் அறிவு ஆத்மா என்றவற்றால். எனவே அவை எதையும் உணரும். தன்னால், தான் தோன்றும்.

अस्खलितस्ववर्णाश्रमाचारो महापुरुष इत्याह—

सन्नियोगेन शिष्टानां वर्णादीनां स्वसूत्रतः ।

प्रवृत्तिश्च निवृत्तिश्च न भिन्द्यात् साधुशब्दवि(व)त् ॥ २ ॥

1. **साधुशब्दवित्** । विदिर्लाभे । अयं साधुरिति व्यवहारं प्राप्तः ; शिष्टतया व्यपदिष्ट इति यावत् । **संनियोगेन** 'ये तत्र ब्राह्मणाः संमर्शिनः...यथा ते तत्र वर्तेरन्' इत्येवं सतां वृत्तानुवर्तनविषये वेदविधिसत्त्वेन, **वर्णादीनां** विप्रादिवर्ण-ब्रह्मचर्याद्याश्रम-सामगयाजुषादीनाम् **स्वसूत्रतः** आपस्तम्बादितत्तत्सूत्रेषु **शिष्टानाम्** उपदिष्टानां कार्याणां विषये **प्रवृत्तिं निवृत्तिं,** इदं कर्तव्यमिति प्रवृत्तिः, इदं मा भूदिति निवृत्तिः, तां न भिन्द्यात् । तत्तत्सूत्रानुसारेणैव सर्वान् स्वाचारोपदेशाभ्यां स्थापयेदित्यर्थः । एवम्भूतो महापुरुष इति भावः ।

2. **साधु** सम्यक् **शब्दवित्** शब्दशास्त्रज्ञः **स्वसूत्रतः** पाणिनिसूत्रानुसारेण **संनियोगेन** समित्येकीकारे । समुच्चायकविधिना **शिष्टानां वर्णादीनाम्** अक्षरादीनां प्रवृत्तिं निवृत्तिश्च न भिन्द्यात् । 'संनियोगशिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः' इति विमृश्य द्वयोर्मध्ये एकतरस्य प्रवृत्तिमन्यतराप्रवृत्तिश्च न कुर्यात ; तथा एकतरनिवृत्तिमन्यतरानिवृत्तिश्च न कुर्यात् । यथा धीवन्शब्दात् वनोरचेति सूत्रेण अन्तादेशतया रेफे ङीप्प्रत्यये च विहिते उभयप्रवृत्तिं कृत्वा धीवरी इति रूपं साधयेत् । नाऽन्यतरमात्रप्रवर्तनेनान्यथारूपम् । एवं बहुव्रीहौ बहुधीवरीत्यत्र विकल्पविधानात् निवृत्तिपक्षे ङीपं रञ्च युगपन्निवर्तयेत् । तदा च बहुधीवेति राजवत् रूपं स्त्रीलिङ्गेऽपि । डाबुभाभ्यामिति डाप्पक्षे तु बहुधीवेत्येव आकारान्तं रूपम् । द्विवचने भेदो गृह्येत, बहुधीवर्यौ इतिवत् बहुधीवानौ बहुधीवे इति भावात् ॥ **साधुशब्दव**दिति पाठे द्वितीयस्यार्थस्य दृष्टान्ततया विवक्षा ।

3. **साधुशब्दवित्** अयं साधुः अयमपभ्रंश इति भेदज्ञः **संनियोगेन** "एकः शब्दः सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुक् भवति" 'न म्लेच्छितवै नापभाषितवै" इत्यादिविधिनिषेधविमर्शेन, **शिष्टानां वर्णादीनां** गावी गोणीत्यादौ साधुशब्दान्तर्गतवर्णातिरिक्तवर्णमात्रादीनां प्रवृत्तिं साधुशब्दस्थओकारादीनां निवृत्तिश्च निरूप्यमाणां स्वसूत्रतो न भिन्द्यात् पाणिनिसूत्रमादाय न वारयेत । अपाणिनीयाधिकवर्णप्रवृत्तिरियुक्तौ वर्णनिवृत्तिरपाणिनीयुक्तौ च कृतेऽपि सूत्रमानाय्य तद्भेदनेन साधुत्वस्थापनयत्नं न कुर्यादिति यावत् ॥ गोशब्दो व्यवहर्तव्य इति प्रवृत्य प्रमादेनान्यथाप्रयोगवशादापतितमपभ्रंशं साधुं कर्तुं न यतेतेति भावः ।

ஸந்நியோகேந சிஷ்டாநாம் வர்ணாதீநாம் ஸ்வஸூத்ரத: |
ப்ரவ்ருத்திஞ்ச நிவ்ருத்திஞ்ச ந பிந்த்யாத் ஸாதுசப்தவித் ‖ 2 ‖

1. ஸாதுசப்தவித்—ஸதாசாரசீலன் என்று பேர் பெற்றவன் சாஸ்த்ரத்திற்கிணங்கி, அந்தந்த வர்ணாச்ரம வேதகோத்ராதி தர்மங்களுக்கு ஏற்பட்ட க்ருஹ்ய ஸூத்ராதிகளிற் சொன்னபடி அவரவர்களின் ப்ரவ்ருத்தியையோ, அவற்றில் வேண்டா என்று சொல்லப்பட்ட நிவ்ருத்தியையோ மாற்றலாகாது.

2. வ்யாகரண சாஸ்த்ரம் அறிந்தவன் அதில் ஒரு சப்தத்திற்கு இரண்டு அம்சங்களை ஒரு ஸூத்ரத்தில் விதித்திருந்தால் அவற்றில் ஒன்றைக் கொள்வதும் மற்றொன்றை விடுவதும் செய்யாமல் சேர்த்தே கொள்ள வேண்டும். விடுவதாகில் இரண்டு அம்சங்களையும் விட வேண்டும்.

3. வ்யாகரணாதி சாஸ்த்ர மூலமாக, இது ஸாது சப்தம், இந்த சப்தம் ஸாதுவன்று, அபப்ரம்சம்—பின்னால் ஜனங்களின் தவறுதலாலேற்பட்டது என்ற பிரிவு இருப்பதைப் பார்த்து, தவறான சப்தங்களில் சில எழுத்துக்கள் போனதையும் புது எழுத்துக்கள் புகுந்ததையும் தவறாகவே நினைக்கவேண்டுமல்லது ஏதேனும் வ்யாகரணஸூத்ரத்தைக் கொண்டு ஸ்த்தாபித்தலாகாது.

श्रीवैष्णवस्वरूपं विशेषं महापुरुषेष्वाह—

मुक्तानुगुणवृत्तानां भजतां पावनीं गतिम् ।
नित्यं विष्णुपदे सक्तिस्तारकाणां सितात्मनाम् ॥ ३ ॥

1. **मुक्ताः** संसारान्मुक्ताः परमपदे भगवत्कैंकर्यपराः तेषामनुगुणं सदृशं **वृत्तम्** अनुष्ठानं येषाम् ; भगवत्प्रीत्यर्थमेव सर्वमनुतिष्ठताम् । **पावनीं** पूतत्वसंपादिकां सर्वबन्धनिवर्तनीं **गतिम्** ज्ञानं भक्तिप्रपत्त्यादिरूपं **भजतां** प्राप्नुवताम् , **सितात्मनां** शुद्धसात्त्विकमनसाम् । षिञ् बन्धने । **सितः** नियमितः **आत्मा** मनः येषां विरक्तानाम् । एवं वृत्तज्ञानवैराग्यशालित्वमुक्तम् । **तारकाणाम्** आश्रितजनोत्तारणकारिणाम् । **तारः** प्रणवः । कै शब्दे । प्रणवादिमन्त्रोच्चारणवताञ्च महापुरुषाणां नित्यं **विष्णुपदे** भगवत्पादारविन्दे **वृतिः** वर्तमानता ; तदेकपरतेति यावत् । भवतीति शेषः ।

2. नक्षत्रपरता—**मुक्ताः** मौक्तिकानि । तदनुगुणं तत्तुल्यं **वृत्तं** वर्तुलभावः येषां तेषाम् **अनुगुणवृत्तेत्यत्र** श्लेषोपि । मुक्ताः स्वानुप्रविष्टे गुणे सूत्रे हि वर्तमानाः । **पावनीम्** । पवनः-वायुः तत्संबन्धिनीम् । विष्णुपुराणाद्युक्तरीत्या ध्रुवायत्तमरुत्प्रभेदकृतसंचाराधीना हि ग्रहनक्षत्रगतिः । **गतिं** भ्रमणं भजतां **सितात्मनां** धवलवर्णाकृतीनां **तारकाणां** नक्षत्राणाम् । "कनीनिकायां नक्षत्रे तारकं तारकाऽपि च" इति विश्वप्रकाशकोशात् क्लीबेऽपि नक्षत्रादिपरत्वात् भजतामित्युपपन्नम् । नित्यं **विष्णुपदे** गगने **स्थितिः**, आकाश एव सञ्चारः ।

3. कणीनिकापरत्वे— **मुक्तं** त्यक्तं स्वानुगुणं वृतं बाह्यनीलपीतादिविषयदर्शनरूपं यैस्तेषाम् । **अनुगतरूपादिगुणानि** वस्तूनि **अनुगुणानि,** तत्संबन्धत्यजामिति वा । **पावनीं गतिम्** । "यस्यानुभवपर्यन्ता **बुद्धिस्तत्त्वे** प्रतिष्ठिता । तद्दृष्टिगोचराः सर्वे मुच्यन्ते सर्वकिल्बिषैः" इत्युक्त्या अन्यपुरुषदोषमोचकं सञ्चारं भजतां **सितात्मनां** नियमितमनस्कानां **तारकाणां** कनीनिकानां नित्यं **विष्णुपदे वृत्तिः** भगवद्दर्शने, 'आपीठान्मौलिपर्यन्तं पश्यतः पुरुषोत्तमम् । पातकान्याशु नश्यन्ति किंपुनस्तूपपातकम्" इत्येवंरूपे वर्तमानता ।

முக்தாநுகுண வ்ருத்தாநாம் பஜதாம் பாவநீம் கதிம் |
நித்யம் விஷ்ணுபதே வ்ருத்திஸ் தாரகாணும் ஸிதாத்மநாம் || 3 ||

1. மோக்ஷம் பெற்ற ஜீவாத்மாக்களைப் போன்ற நடத்தையுடைய ராகையாலே பகவத் கைங்கர்யமே செய்கின்றவரும் சுத்தமான மனம் உடையராய் விரக்தரும் பிறர் துக்கத்தினின்று விடுபட முயல்பவருமான வருக்கு எப்போதும் விஷ்ணுவின் திருவடியிலே மனத்தின் இருப்பாகும்.

2. முத்துப் போல் வட்டமாயிருப்பனவும் (த்ருவன் ஏவின) காற்றின் போக்கிலான ஸஞ்சாரம் பெற்றனவும், வெண்மை யுருவு மான நட்சத்திரங்களுக்கு விஷ்ணுபதமென்ற வானத்திலே எப்போதும் இருப்பாகும்.

3. வெளிவஸ்துக்கள் பல குணங்கள் உள்ளவை. அவற்றில் புகுவதை விட்டு இருக்கின்றனவும், தாம் பட்ட மட்டிலே பிறரின் பாவத்தைப் போக்க வல்லனவும், கட்டுப்பட்ட மனத்தைச் சார்ந்தன வுமான மஹாபுருஷரின் கருவிழிகளுக்கு எம்பெருமானை யனுபவிப்ப திலேயே எப்போதும் பற்றிருக்கும்.

महापुरुषाः सेतुतुल्या इत्याह—

धर्मसेतुनिविष्टानामचलानां गरीयसाम् ।
दक्षिणोत्तरवृत्तीनां दृष्टिः पापनिवर्तनी ॥ ४ ॥

1. धर्मविषये **सेतुः** मर्यादा असांकर्याय कृता व्यवस्था । तत्र **निविष्टानां** यथावद्धर्ममनुतिष्ठताम् । **अचलानां** बुद्धिचाञ्चल्यरहितानां तदेकव्यवसायिनाम् । **गरीयसाम्** । 'गुशब्दस्त्वन्धकारः स्यात रुशब्दस्तन्निरोधकः । अन्धकारनिरोधित्वात् गुरुरित्यभिधीयते' । अत्यर्थमज्ञाननिरोधकानां **दक्षिणोत्तरवृत्तीनां दक्षिणानां** सरलानाम् शास्त्रोक्तोत्कृष्टजीवनवृत्तिमतांच पुंसां **दृष्टिः** तत्कर्तृका वा तत्कर्मिका वा पापं निवर्तयति ।

2. इष्टप्रापकत्वानिष्टनिवर्तकत्वाभ्यां धर्मत्वेन कथनीये **सेतौ** श्रीरामनिर्मिते नलसेतौ **निविष्टानां गरीयसां** भाराधिक्यात् गुरुतराणां **दक्षिणोत्तरवृत्तीनाम्** समुद्रोत्तरतीरादारभ्य दक्षिणस्थलंकापर्यन्तं कृतस्थया दक्षिणोत्तररूपस्थितिमतां **दृष्टिः** तद्विषयकदर्शनं द्रष्टृणां सर्वपापप्रणाशनी । "सेतुं दृष्ट्वा समुद्रस्य ब्रह्महत्यां व्यपोहति" इति, "एतत् पवित्रमतुलं महापातकनाशनम्" इति च स्मृतेः ।

3. **धर्मसेतुः** "कृष्णं धर्मं सनातनम्", "अमृतस्यैष सेतुः" इत्युक्तभक्त्यादि रूपसाध्योपायस्थानापन्नः सिद्धोपायभूतः श्रीमन्नारायणः। तत्र **निविष्टानां** तमेव प्रपन्नानाम् **अचलानाम्** उपायान्तरप्रत्याशारहितानां **गरीयसाम्**, "नार्हन्ति शरणस्थस्य कलां कोटितमीमपि" इत्युक्तगौरवातिशयभाजां **दक्षिणोत्तरवृत्तीनाम्** उत्तरदक्षिणोभयदेशवासिनाम् उभयवेदान्ताचार्याणां कलद्वयान्यतरप्रवचनकारिणां श्रीवैष्णवानां दृष्टिः पापनिवर्तनी ॥

4. **धर्मसेतुना** "रामो विग्रहवान् धर्मः" इत्युक्तेन श्रीरामेण **निविष्टानाम्** आश्रितानाम् अत एव भगवतोऽप्युपदेशकरणात् **गरीयसाम्** गुरुतराणाम् **अचलानाम्** स्वाभिप्रेतस्थापनविषये बद्धपरिकराणाम्, दक्षिणोत्तरवृत्तीनां—दक्षिणदेशोत्तरदेशसञ्चारिणाम् अगस्त्यविश्वामित्रादीनां दृष्टिः पापनिवर्तनी। प्रसिद्धं हि स्वाभीष्टसाधनात्युग्रतपश्चरणादिकं विश्वामित्रादौ। अगस्त्यमाहात्म्यञ्चानन्तम्।

5. दक्षिणाभूतद्रव्यग्रहणेनापि कश्चिदर्थः—श्रीहरिवंशे एकोनषष्ट्यधिकशततमाध्यायोक्तत्वेन कश्चिद् वृत्तान्तः श्रीविष्णुचित्तदिव्यसूरिद्रमिडदिव्यप्रबन्धे 416 आमैयाय् इति गाथायामनूदितोऽस्ति। तत्प्रतिपादकश्चायं श्लोकः। स वृत्तान्तस्तावत्—युधिष्ठिरराजसूये समुदितैः सर्वैः पार्थिवैः श्रीद्वारवत्यां श्रीकृष्णस्याद्भुतं वैभवमाकर्णितवद्भिस्तद्दिदृक्षया पाण्डवकौरवैस्सह तां पुरीं गतैः श्रीकृष्णे सेव्यमाने, श्रीनारदो महर्षिरन्तः प्रविश्य व्याजिज्ञपत्, "आश्चर्यः खलु देवानामेकस्त्वं पुरुषोत्तमः। धर्मश्चासि महाबाहो लोके नान्योऽस्ति कश्चन" इति। तत्र भगवान् प्रत्यब्रवीत्, "ओम्, अहमेव दक्षिणया सहाऽऽश्चर्यो धन्यश्च" इति। सद्य एव नारदः, "मज्जिज्ञासितं ज्ञापितवानसि, प्रतिष्ठे" इत्युक्त्वा प्रतस्थे। तदा तत्रत्या राजानः सर्वे तदनवबुद्धवन्तः, 'किमिदम्? कथनीयम्" इति श्रीकृष्णं प्रार्थयामासुः। स च, भवानेव ब्रूतामिति नारदमेव न्ययुङ्क्त। अथ स वेदयामास, "भो राजानः! अहं चिरात् गंगास्नानपरः कदाचित् तत्रैव सर्वदास्थितं कूर्ममेकमवेक्ष्य, "आश्चर्यः खलु धन्यस्त्वम् कोऽन्योऽस्ति सदृशस्तव" इत्यवोचम्। सोऽब्रवीत, मादृशानेकमज्जनगोचरो गङ्गैव धन्येति। अथ तत्रतत्र गतेन मयैवमुक्ते गङ्गया समुद्रः, समुद्रेण पृथिवी, पृथिव्या पृथिवीधरः, पृथिवीभृता सर्वस्रष्टा चतुर्मुखः, चतुर्मुखेन मुखस्थो वेदः, वेदेन यज्ञः, यज्ञेन महापुरुषश्च धन्यत्वेनाश्चर्यत्वेन प्रदर्शिताः। तच्छ्रुत्वा महापुरुषमिममुपसद्यैवं मया न्यवेदि। अयं मदाशयमालक्षितवान् यज्ञादाधिक्यं स्वस्याभ्युपगच्छन् दक्षिणया साहित्यं प्रत्यबोधयत। अतो निवृत्तसंदेहोऽहं निवर्ते" इति। तदिदमाश्चर्यं श्रुत्वा तत्र सर्वे धन्याः श्रीकृष्णमस्तुवन्। **ईदृशकथाज्ञानमस्माकं पापनाशकमिति अत्रोच्यते।** तदयमर्थः-**धर्मसेतुनिविष्टानाम्** यज्ञाराध्यतया उपायभूतयज्ञस्यापि स्थापकतया सिद्धोपायतया च सेतुभूतश्रीकृष्णपर्यवसितानाम् **अचलानां** हरिवंशात् निस्संदेहमवगतानाम् **गरीयसाम्** उत्तरोत्तरं गुरुभूतानाम् **दक्षिणोत्तरवृत्तीनां** दक्षिणा उत्कृष्टतया वर्तमाना येषां मध्ये तादृशानां कूर्मगङ्गासमुद्रपृथिवीपर्वतचतुर्मुखवेदयज्ञानां **दृष्टिः** ज्ञानं नारदकृता पापनिवर्तनी; दक्षिणावश्यकत्व—भगवत्पारम्योभयसाधकत्वात्। तदयं संग्रहः—कूर्मगङ्गाब्धिभूम्यद्रिवेधोवेदक्रतूत्तरः। सदक्षिणो हरिः साक्षादाश्चर्यो धन्य ईरितः इति ॥

தர்மஸேதுநிவிஷ்டாநாம் அசலாநாம் கரீயஸாம் |
தக்ஷிணோத்தரவ்ருத்தீநாம் த்ருஷ்டி: பாபநிவர்த்தநீ || 4 ||

1. சாஸ்த்ரங்களில் வகுத்த தர்மங்களின் கட்டுப்பாட்டை இசைந்தவரும் அது விஷயமாக புத்தியில் ஸம்சயம் ஒன்றுமில்லாதவரும் சிறந்த ஆசார்யர்களும் ஸுலபமானவர்களும் சாஸ்த்ரம் இசைந்த ஜீவிகையைப் பற்றினவர்களுமான மஹான்களின் தர்சனம் பாபங்களைப் போக்கும்.

2. ஸநாதநதர்மம் என்ற பெயர் பெற்ற ஸ்ரீராமனால் நிருமிக்கப் பெற்ற ஸேதுவிலே புகுந்து தெற்கும் வடக்குமாக அமைந்துள்ள மிகவும் பெரியனவான மலைகளுடைய தர்சனம் பாபமெல்லாம் போக்கும்.

3. ஸித்தோபாயமாய் மோக்ஷமளிக்கின்றவனும், பக்தி முதலான தர்மங்களின் ஸ்த்தானத்திலிருப்பவனுமான பகவானை சரணமாகப் பற்றியவரும், வேறு உபாயம் செய்வோமா என்ற புத்தி சஞ்சல மற்றவரும், விரைவில் மோக்ஷபதம் செல்வதால் நாமதித்துச் செல்லுகின்றவர்களை விட மிகப் பெரியவர்களாகப் புகழப்பட்டவரும் தெற்கு வடக்கு தேசங்களிலிருப்பவரும், தென்மொழி வடமொழி என்ற உபய வேதாந்தங்களுக்கு ஆசிரியர்களுமான இருகலையார்களான ஸ்ரீவைஷ்ணவர்களின் தர்சனம் பாபங்களைப் போக்கும்.

4. ஸ்ரீராமபத்ரனாலே ஆச்ரயிக்கப்பட்டு அவருக்கும் உபதேசம் செய்ததாலே பேராசிரியர்களாய், தாங்கள் நினைத்ததை முடிப்பதில் அசையாதவர்களாய் தென்தேசம் வடதேசம் என்ற இடமெல்லாம் ஸஞ்சாரம் செய்துழவந்த அகஸ்த்ய விச்வாமித்ராதி மஹர்ஷிகளுடைய தர்சனம் பாபங்களைப் போக்கும்.

5. தர்மமாவது யஜ்ஞம். அதற்கும் ஆராத்யனாய் ஸேதுவான பகவான் வரையிலாய், ஒன்றின் மேல் ஒன்று உயர்ந்தனவாய் தக்ஷிணையை எல்லாவற்றிற்கும் மேலாக இருப்பதாகக் கொண்டனவுமான வஸ்துக்கள் (ஹரிவம்சத்தில் கண்டபடி நாரத மஹர்ஷியினால் கூறப்பட்டவை) யாவை, அவற்றின் விரிவான அறிவு பாபத்தைப் போக்கும். இந்த வரலாற்றைத் தெரிவிக்கும் பெரியாழ்வார்திருமொழி. 416

"ஆமையாய்க் கங்கையாய் ஆழ்கடலாய்
அவனியாய் அருவரைகளாய்
நான்முகனாய் நான்மறையாய்
வேள்வியாய் தக்கணையாய்த் தானுமானான்
சேமமுடை நாரதனார் சென்று
சென்று துதித்திறைஞ்சக் கிடந்தான் கோயில்
பூமருவிப் புள்ளினங்கள் புள்ளரையன்
புகழ் குழறும் புனலரங்கமே"

विरक्तेषु केषु चित् विभूतेरबाधकत्वमाह—

अनङ्गीकृतकामानामनुमानार्हवर्ष्मणाम् ।
धृतनिर्मलतीर्थानां भूतिलेपो विभूषणम् ॥ ५ ॥

1. **अनंगीकृताः** अनपेक्षिताः **कामाः** काम्यफलानि पशुपुत्रादीनि यैस्तेषाम् ; फलार्थं कर्माकुर्वतामिति यावत् । **अनुमानार्हवर्ष्मणाम्** अनु ज्ञानभक्त्यादिगुणाश्रयमात्मस्वरूपमनुसृत्य तद्वदेव **मानार्हं** सत्कारार्हं **वर्ष्म** विग्रहो येषां तेषाम् । ध्यानार्चनस्तवनाद्यर्हरूपाणाम् । अनुकल्पभूतं मानार्हंवर्ष्म परमात्मदिव्यरूपमपि यदपेक्षया तेषामिति वा । "अनुकल्पभूतमुरभित्पदं सताम्", इत्याद्यनुसारात् । वर्ष्मशब्देन अङ्गवाचिना परिजनानामपि ग्रहणात् अनुबन्धिपर्यन्तं मानार्हत्वमपि सुवचम् । अनुमानार्हम् इमे महापुरुषा इत्युल्लेखार्हं तेजोमयं 'ब्रह्मविद इव ते सौम्य मुखं भाति' इत्यतोऽप्यतिशयितं वर्ष्म येषामिति वा । **धृतानि** अवधृतानि **निर्मलानि तीर्थानि** शास्त्राणि तदर्थाश्च यैस्तेषाम् । "अहिंसन् सर्वा भूतान्यन्यत्र तीर्थेभ्यः" इत्युक्त्या शास्त्रीयकर्मण्यपि तीर्थानि । "तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिषु" इत्युक्तेषु यावत्संभवं ग्राह्यम् । ईदृशानां कुटुम्बिनां ज्ञानानुष्ठानपराणां निष्कामानामपि **भूतिलेपः** संपत्संबन्धः **विभूषणम्** अलङ्कार एव ; न तु अनादरणीयः । कुचेलादीनामिव भगवदनुग्रहवशात् संभवन्ती विभूतिः भगवद्भागवताराधनाभिवृद्धय एव भवतीति ।

2. साङ्ग एव **अनङ्गः** अङ्गरहितः कृतः **कामः** मन्मथः यैस्तेषाम् । **अनुमा** । उमा पार्वती ; तद्भिन्ना स्त्री अनुमा । तस्याः **नार्हम्** अनर्हम् । अर्हशब्दस्य नञर्थकेन नशब्देन समासः नगनैकादिवत् । वर्ष्म शरीरं येषाम् । शिवशरीरं पार्वत्या एवार्हम् । अन्यस्त्रीपरिग्रहस्तेन नाद्रियत इति भावः । अथवा उमायाः न अर्हम् उमानार्हम् । उमानार्हं न भवतीति अनुमानार्हम् । शिवरूपं किमपि उमानार्हं न भवति । रूपवेषादिकं शिवस्य घोरमघोरं वा यादृशं तादृशमस्तु । सर्वं तस्या अत्यन्ताभिमतमिति भावः । अतिकोमलतनुरियं कथं वपुर्विरूपाक्षं परिणयेदित्यादि न चिन्त्यमिति च । एवमनेकवर्ष्मसद्भावादेव मूर्तिभेदाद्बहुत्वोपपत्तिः । प्रसिद्धाश्चैकादश रुद्राः । भगवद्वर्ष्म अप्राकृतत्वात् अचिन्त्यमनुमानानर्हम् । रुद्रवपुषः प्राकृतत्वादनुमानार्हता । किञ्च रुद्रस्य बद्धत्वात् वर्ष्म विना संकल्पमात्रेणापि कार्यकृत्वायोगात् तस्य वर्ष्मसद्भावोऽनुमानार्ह इत्यप्यर्थः । **धृतनिर्मलतीर्थानाम्** । तीर्थं गङ्गा निर्मला सर्वपापहरा शिरसा धृता यैस्तेषां रुद्राणां **भूतिलेपः** भस्मलिप्ताङ्गत्वं भूषणमेव । अथर्वशिरसि उपासनविशेषनिष्ठविषये भस्मधारणस्य विहितत्वात् ॥ मृदादिना पुण्ड्रधारणं न त्यक्तं भवति रुद्रेण, भस्मलेपस्य मृदूर्ध्वपुण्ड्रधारणस्य चाविरोधादिति चेत्—अस्तु कामम् । **भस्मलेपोऽपि भूषणम्** इत्यपि पाठः । तत्र अपिशब्दः अभूषणस्यापि हेयस्यापि भूषणत्वगमकः । ऊर्ध्वपुण्ड्रसमुच्चायको वा ।

அநங்கீக்ருதகாமாநாம் அநுமாநார்ஹ வர்ஷ்மணாம் |
த்ருதநிர்மலதீர்த்தாநாம் பூதிலேபோ விபூஷணம்: || 5 ||

1. காமத்தை யிசையாதவரும் அதாவது இம்மை மறுமைப் பலன்களை வேண்டாதவரும், எம்பெருமானைப் போலவும் ஜ்ஞானியான

ஜீவாத்மாவைப் போலவும் கௌரவிக்கத் தகுந்த திருமேனி யமைப்பு உடையரும், புண்யதீர்த்தம் யாகம் சாஸ்த்ரம் ஆசார்யர் போன்ற தீர்த்தங்களை யெல்லாம் விசேஷமாகப் பற்றினவருமான குசேலரைப் போன்றார்க்கு ஒரு ஸமயம் ஐச்வர்ய ஸங்கம் ஏற்பட்டால் அதுவும் பூஷணமாகும், அவர்கள் செய்யும் ஆராதனங்களுக்கே அது முழுமையும் பயன்படுமாதலின்.

2. மன்மதனை (நெற்றிக் கண் நெருப்பால்) உடலில்லாதபடி யாக்கினரும் உமையென்ற பார்வதிக்குத் தகாததென்னவாகாத மேனி யுடையரும், தெளிவான தீர்த்தமாம் கங்கையை ஜடையில் தரிப்பவருமான பரமசிவனார்க்கு விபூதியைப் பூசிக் கொள்வதும் அலங்காரமாகும்.

निष्कामानामपि बहुविधसुखसंपत्तिरस्तीत्याह—

अनन्तख्यातिसंपन्नः शुद्धसत्त्वः सधीबलः ।
धत्ते बहुमुखं भोगं श्रुतिदृष्टिस्थिराशयः ॥ ६ ॥

1. **अनन्ता** असंख्याता अविनाशिनी **ख्यातिः** ज्ञानानुष्ठानादिमूला प्रसिद्धिः ; तत्समृद्धः । **शुद्धसत्त्वः** रजस्तमोरहितसत्त्वगुणकः । **धीः** ज्ञानं **बलम्** अनुष्ठानार्थशक्तिः; उभयसहितः । **श्रुतिः** वेद एव **दृष्टिः** चक्षुः कृत्याकृत्यदर्शनसाधनं यस्य, **स्थिरः** व्यवसायात्मकः **आशयः** बुद्धिश्च यस्य, सः महापुरुषः **बहुमुखं** नानाविधम् उक्ततत्तदाकारसमृद्धिमूलकं **भोगं** सुखानुभवम् , 'भोगांश्चैवानुषङ्गिकान् ', 'श्रोत्रियस्य चाकामहतस्य' इत्युक्तम् , भगवतो भोगाधायकनैवेद्योपकरणादिकञ्च धत्ते ।

2. आदिशेषः अनन्त इति, "नान्तं गुणानां गुणानां गच्छन्ति तेनानन्तोऽयमुच्यते" इति विष्णुपुराणोक्तरीत्या ख्यात्या प्रसिद्ध्या युक्तः । **शुद्धसत्त्वः** । सत्त्वा स्वरूपम् । शुक्लवर्णत्वात् अवदात-स्वरूपः । भगवच्छय्याशरूपत्वात् सत्त्वं स्थिरत्वम् असञ्चारित्वं शुद्धं यस्येति वा । **सधीबलः** "विज्ञान-बलैकधामनि" इति गुणद्वयवत्त्वेन प्रसिद्धः ; संकर्षणांशत्वात । **श्रुतिः** श्रोत्रमेव **दृष्टिः** नेत्रं यस्य । सर्पा हि चक्षुश्श्रवसः । **स्थिराशयः** स्थिरायां भूमौ शयानः । बहूनि सहस्रसंख्यानि मुखानि यस्य तादृशं **भोगं** सर्पशरीरं धत्ते । भोगशब्दः सर्पशरीरवाची । अत एव सर्पाः भोगिनः ।

3. अनन्त इति ख्यात्या संपन्न अनन्तसूरिः **शुद्धसत्त्वः** सात्त्विकाग्रेसरः **सधीबलः** "नाना-सिद्धान्तनीतिश्रमविमलधियोऽनन्तसूरेः" इति प्रशंसनीयसर्वशास्त्रार्थनिष्कर्षः । **श्रुतिदृष्टिस्थिराशय** इत्येकं पदम् । **श्रुतिदृष्टिः** शेषः तत्स्थिरेति शेषाद्रिभूमिरुच्यते । तत्र शयितवान् स्वप्नमनुभूय स्वस्मिन् अवतीर्णश्रीनिवासरूपस्सन् बहुविधं बहुजनमान्यत्वादिरूपं सुखमनुभवतीति स्वतातचरणविषयतयाऽपि योजनाऽभिमता । एवं पादुकासहस्रेऽपि, "सृष्टां भूमावनन्तेन" इति श्लोके ॥

4. आनन्दमयब्रह्मपरश्च । सत्यं ज्ञानमनन्तं ब्रह्मेति तत्र श्रुतिः । तत्र अनन्तशब्दः त्रिविध-परिच्छेदराहित्यरूपयोगार्थ—श्रीविष्णुरूप रूढ्यर्थोभयपरः । अत आनन्दमयः अनन्त इति ख्यात्या संपन्नः ।

शुद्धसत्त्वः निर्विकारो निरुपाधिकसत्ताश्रयः अयं सत्यशब्दार्थः। ज्ञानशब्दो नित्यासंकुचितनिरुपाधिक ज्ञानवानित्यर्थकः। अत उक्तं **सधीबल** इति। **धत्ते बहुसुखं भोगम्**। ‘युवा स्यात् साधुयुवाध्यायकः” इति विद्याबलादिविग्रहप्रयुक्तानन्दोपक्रमात्, “स एको ब्रह्मण आनन्द ... यतो वाचो निवर्तन्ते” इत्युक्त स्वरूप रूपगुणविभूतिसामग्रीप्रयुक्तनिरतिशयानन्द इत्यर्थः। **श्रुतिदृष्टिः** एवं तैत्तिरीयबृहदारण्यकादिश्रुत्यधीनदर्शनः। ‘यो वेद निहितं गुहायाम्,’ ‘स यश्चायं पुरुषे’ इत्युक्ततया **स्थिरः** अचञ्चलवासस्थानभूतः **आशयः** मनुष्यादिहृदयं यस्य सः। हृदये उपास्यमान इति यावत्। उपासकानुग्रहे स्थिर इति वा॥

5. भृगुमहर्षिपरोऽपि। भृगोः ख्यात्यां समुत्पन्ना लक्ष्मीः। अतः सः **अनन्तः** अपरिच्छिन्नमहिमा, **ख्यात्या** देव्या संपन्नश्च। **शुद्धसत्त्वः** विष्णुपारम्यवेदित्वात् रजस्तमोरहितसत्त्वगुणाश्रयः। **सधीबलः**। सैषा भार्गवी वारुणी विद्येत्युक्तविद्यां पितुर्वरुणस्य सकाशात् सामान्यतो गृहीत्वा तपस्तप्त्वा अन्नप्राणमनोविज्ञानातिरेकेण आनन्दमेव ब्रह्मेति व्यजानात् खल्वयम्। अतो धीबलमधिकम्। महर्षिपरिषत्प्रेरितश्च जातु कैलाससत्यलोक विष्णुलोकान् गत्वा रुद्रं ब्रह्माणञ्चानीश्वरत्वेन विष्णुमेव च सर्वेश्वरत्वेन निश्चिकायेत्यपि धीर्बलञ्चास्य। अस्याशयः सर्ववेदार्थश्रवणात् साक्षात् परमार्थस्य दर्शनाच्च स्थिर आसीदिति श्रुति-दृष्टिस्थिराशयः। लक्ष्मीजनकत्वात् विष्णुना लक्ष्म्या च मानितत्वात् महर्षिभिरभिष्टुतत्वात् आनन्दमयविद्योपासकत्वाच्च बहुसुखं भोगमेव धत्ते॥

அநந்த க்யாதி ஸம்பந்ந: சுத்தஸத்வ: ஸதீபல: |
தத்தே பஹுமுகம் போகம் ச்ருதித்ருஷ்டிஸ் ஸ்த்திராசய: || 6 ||

1. ஜ்ஞானம் அனுஷ்டானம் முதலானவற்றால் அளவற்ற புகழ் பெற்றவரும், ஸத்துவ குணமே சுத்தமாக உடையரும், புத்தி, பலம் இரண்டும் உள்ளவரும், வேதத்தையே கண்ணாகக் கொண்டவரும் எம்பெருமானுக்கே எல்லாமென்கிற வியவஸாயத்தினாலே ஸ்த்திரமான மனம் உடையருமானவர். ‘ச்ரோத்ரியஸ்ய ச அகாமஹதஸ்ய’ என்ற வெகுவிதமான போகம் பெறுவர்.

2. அநந்தன் என்கிற பெயருடையனும், சுத்தமான—வெண்மை யான உருவமுடையனும், ஜ்ஞானம் பலம் இரண்டையும் சிறப்பாகப் பெற்றவனும், காதையே கண்ணாகக் கொண்டவனும் பூமியில் உடல் பரப்பிப் படுத்திருப்பவனுமான ஆதிசேஷன் ஆயிரமானபடியாலே பலவான முகங்களையுடைய பாம்புடலைப் பெற்றிருக்கிறான்.

3. ஸ்ரீதேசிகனின் திருத்தமப்பனார் அனந்த ஸூரி என்ற திரு நாமம் உற்றவர். ஸத்துவ குணமே நிறைந்தவர். சாஸ்த்ரங்களை யெல்லாம் கற்றாராய்ந்து அவற்றின் குணகுணங்களை ஆய்ந்து முடிவு செய்தவர் காதையே கண்ணாகவுடைய ஆதிசேஷனென்ற சேஷாத்ரியாம் மலையில் சயனித்து எம்பெருமான் சொப்பனத்தில் கண்டையுடன் (மணியுடன்) எழுந்தருளிச் சேர்ந்ததாலே பலவிதமான போகங்களைப் பெற்றார்.

4. தைத்திரீயத்தில் ஸத்யம்என்றும் ஜ்ஞானமென்றும் அனந்த மென்றும் சொன்ன ப்ரஹ்மம் ஹ்ருதய குகையில் த்யானம் பண்ணக் கூடியது ஆனந்த மீமாம்ஸையில் ஓதினபடி ஸ்வரூபரூப குணவிபவங்க ளால் பூர்ணானந்தமாயிருக்கும்.

5. விசேஷமஹிமையுடையர், க்யாதி என்ற மனைவியோடு கூடிய வர், ஸத்துவகுணம் நிறைந்தவர், வருணனென்ற தமப்பனாரிடம் வாருணி வித்யைப் பெற்று ஆனந்த மயமே ப்ரஹ்மமென்று ஆராய்ந்த வர். கைலாஸம் ஸத்யலோகம் விஷ்ணுலோகமெல்லாம் சென்று தமப்ப னாரிடம் வேதமூலம் கேட்ட பொருளைக் கண்ணாலும் கண்டு திருமாலே ஸர்வேச்வரன் என்று ஸ்த்திரமான மனம் பெற்றவர் ப்ருகு மஹர்ஷி. இவர் பிராட்டியைப் பெண்ணாகப் பெற்றவருமானமையாலும் கீழ்க் கூறிய காரணங்களாலும் பலவிதமான ஸுகானுபவம் பெற்றிருக்கிறார்--

महापुरुषाणां सेव्यत्वमाह—

अहार्यः सर्वमध्यस्थः काञ्चनद्युतिमुद्वहन् ।
सत्प्रदक्षिणयोग्यत्वमुपयाति सदो(महो)न्नतः ॥ ७ ॥

1. **अहार्यः** हर्तुमशक्यः मतान्तरस्थैः कूटयुक्तिभिरपहर्तुं ज्ञान. कर्तुमशक्यः स्वायत्तीकर्तुमशक्यः, सर्वेषां-मित्रेष्विव शत्रुप्रभृतिष्वपि **मध्यस्थः** पक्षपातरहितः । शत्रुमित्रयोर्विवादविषयनिर्णये प्रार्थितोऽपि शत्रुसंमतपक्षस्यैव न्याय्यत्वे तमेव स्थापयेत् । शास्त्रार्थः क इति विचारे सत्तर्कप्रमाणानुरोधिनमेव स्वीकुर्यात् । **काञ्चन** अनिर्वचनीयां **द्युतिं** ज्ञानं तेजश्च **उद्वहन्** सम्यक् दधानः, **सदा** सर्वदा **उन्नतः** उत्कृष्टः पापकरणतत्परिहरणरूपनिकर्षप्रसक्तिरहितः । **महोन्नतः** इति पाठे अतीवोत्कृष्ट इत्यर्थः । **सद्भिः** साधुभिः **प्रदक्षिणस्य** प्रदक्षिणीकरणस्य योग्यो यः तद्भावमुपयाति प्राप्नोति । प्रदक्षिणीकर्तव्य इत्यर्थः ।

2. **अहार्यं** इति पर्वतनाम । "महीध्रशिखरिक्ष्माभृदहार्यधरपर्वताः" इत्यमरः । अत्र मेरुपर्वतो गृह्यते । सः **अहार्यः** सुवर्णत्वेऽपि हर्तुमशक्यश्च ; दुर्लभ इति । **सर्वमध्यस्थः** भूमध्ये मेरुरित्युक्तेः भूमिस्थानां सर्वेषां मध्यदेशेऽस्तीति । **काञ्चनं** सुवर्णम् तस्य द्युतिमुद्वहन् । तस्य स्वर्णमयत्वात् । **सदोन्नतश्च** ; शिखरस्य देवानामावासभूतत्वात् । सः सदा **सतां** नक्षत्राणां प्रदक्षिणीकरणयोग्यः ग्रहनक्षत्राणि हि मेरुशिखरप्रादक्षिण्येन परिभ्रमन्त्येवोदयास्तमयौ लभन्ते । **प्रदक्षिणं** नाम प्रदक्षिणीकरणम् । यद्वा प्रकृष्टो दक्षिणः प्रदक्षिणः । दक्षिणदिग्वर्ती । भावप्रधाननिर्देशात् दक्षिणदिग्वर्तित्वमित्यर्थः । **सतां** भूस्थानां सर्वेषां वर्षाणां यत् मेर्वपेक्षया दक्षिणत्वं तद्योग्यो मेरुः । "सर्वेषामेव वर्षाणां मेरोरुत्तरतः स्थितिः" इति वचनात् ।

3. भगवत्परोऽपि । स हि महापुरुषः । "वेदाहमेतं पुरुषं महान्तम्" इति श्रुतेः । सः **अहार्यः** केनापि संहर्तुमशक्यः ; तेनैव सर्वेषां हार्यत्वात् ; "भवानेकः शिष्यते शेषसंज्ञः" इति तस्य प्रलयेपि शिष्टत्वात् । सर्वेषां **मध्यस्थः** "अंगुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति" इति श्रुतोऽयमन्तर्यामी ।

यद्वा तत्तत्कर्मानुगुणफलप्रदत्वात् पक्षपाताभावात्, "देवानां दानवानाञ्च सामान्यमधिदैवतम्" इति मध्यस्थः । **काञ्चनद्युतिस्तस्य** "अमृतो हिरण्मयः", "हिरण्मयः पुरुषो……सर्व एव सुवर्णः" इति श्रुतेः। यद्वा काञ्चनद्युतिः हिरण्यवर्णामित्युक्ता लक्ष्मीः । तां वक्षसोद्वहन् । अवतारेषु तां परिणयन्नपि तत्पतित्वं दर्शयति । उद्वाहः विवाहः । **सदोन्नतश्च** स्वाभाविकमहत्त्वाश्रयत्वात् । यद्वा उत् नत इति पृथक् । **उत्** "सर्वेभ्यः पाप्मभ्य उदितः" इति अपहतपाप्मत्वेनोक्तस्य उदिति नाम । सः सर्वदा **नतस्सन्** प्रणामविषयीकृतस्सन् प्रदक्षिणस्यापि योग्यः । **सत्** इति क्रियाविशेषणम् । **सत्** यथातथा शास्त्रोक्तरीत्या नतस्सन् सत् प्रदक्षिणार्हश्चेति ।

4. **अहार्यः** हार्यं श्वशुरात् अपहार्यं धनं तद्रहितः ; वरदक्षिणानपेक्षीति यावत् । यद्वा । **अहेत्य**व्ययम्, प्रसिद्धयर्थे, "नाहखल्वयमेवं संप्रत्यात्मानं जानाति" इति श्रुतिप्रयोगात् । **आर्यः** सद्वृत्तः काञ्चन कन्यामुद्वहन् परिणयन् विवाहकाले **सर्वमध्यस्थः** बन्धुजनबृन्दमध्ये स्थितः **उन्नतः** जामातृत्वेन लब्धातिशयः महतां धुर्यपि आसने उपवेशितत्वात् उन्नतश्च । **महोन्नतः** इति पाठे महेन विवाहोत्सवेन **उन्नतः** उत्कर्षं प्राप्त इति । बन्धुस्त्रीभिः दीपफलताम्बूलाद्युपकरणधारिणीभिः प्रदक्षिणीक्रियमाणो भवति । तथा सत्प्रदक्षिणीकरणं कर्तुमर्हति । तेनाग्निर्महान्तश्च प्रदक्षिणीकर्तव्याः इति । **सन्तः** वर्तमानाः **प्रदक्षिणाः** प्रकृष्टदक्षिणाविशिष्टाः एतद्दीयमानदक्षिणाग्राहिणः **योग्याः** पात्रभूताः यस्य तादृशत्वमर्हतीति वाऽर्थः ।

5. **सर्वमध्यस्थः**—मध्ये तिष्ठतीति (7-1) वक्ष्यमाणरीत्या परिषन्मध्ये स्थितो गरुत्मान् **काञ्चनद्युतिं** स्वर्णछायां वहन् यद्वा भगवन्तं श्रियञ्चोद्वहन् **उन्नतः** आकाशे उपरिगतः सत्प्रदक्षिणस्य, समीचीनप्रदक्षिणपरिभ्रमणस्य योग्यो भवति । **अहार्यः** अपरिभवनीयः ।

அஹார்ய: ஸர்வமத்யஸ்த்த: காஞ்சநத்யுதிம் உத்வஹந் |
ஸத்ப்ரதக்ஷிண யோக்யத்வமுபயாதி ஸதோந்நத: ‖ 7 ‖

1. மஹாபுருஷன் ஒருவருடைய சூழ்ச்சிக்கு உட்படமாட்டான். குயுக்திகளால் கலக்கப்படவாகாதவன். விரோதிகளிடத்திலும் ந்யாய மிருந்தால் ஒப்புக் கொள்ளுகிறவன். பக்ஷபாதமான தீர்ப்பு செய்யாத வன், ஒப்பற்ற புகழ் உள்ளவன். எப்போதும் பெருமை வாய்ந்தவன் நல்லோரும் ப்ரதக்ஷிணம் பண்ணும்படி யிருக்கிறுன்.

2. அஹார்யமென்ருல் மலையாம், மேருமலையானது பூமியில் எல்லா ப்ரதேசங்களுக்கும் நடுவில் இருப்பது. பொன்மயமானபடியால் பொன்னெளியைச் சிறப்பாகக் கொண்டது. அதன் கொடுமுடியில் தேவர்களும் வஸிப்பதால் உயர்ந்தது. எப்போதும் நக்ஷத்ரங்களால் ப்ரதக்ஷிணம் பண்ணப்படுகின்றது.

3. ஸர்வேச்வரன் ஒருவரால் அழிக்கவாகாதவன், எல்லோர் உடலிலும் இடையில் ஹ்ருதயத்தில் இருப்பவன். அந்தர்யாமி. பொன் னெளி யுடையவன், பொன்னிறமான பெரிய பிராட்டியைத் திருமார்

பில் கொண்டவன். எப்போதும் நன்கு வணங்கப்பட்டு ப்ரதக்ஷிணம் செய்யப்படத் தகுதி யுறுகிருன்.

4. ஆர்யன் சாஸ்த்ரப்படி நடப்பவன் பந்துக்களின் இடையில் இருந்து ஓர் அழகுள்ள பெண்ணை மணந்து கொள்கிறவன். மருமகனை படியாலே மதிக்கப்பட்டு உயர்ந்தவன். மணையில் உட்கார்ந்திருப்பதாலும் உயர்ந்தவன். விவாஹத்தில் ஸ்த்ரீகளால் ப்ரதக்ஷிணம் செய்யப் பெறுகிருன் நல்லோர்களைப் பிறகு ப்ரதக்ஷிணம் செய்பவனுமாகிருன்.

5. ஒருவராலும் பரிபவிக்கப்படாதவர். ஸூரிகோஷ்டியில் நடுவில் இருப்பவர். பொன்னொளி பொருந்தியவர். பெருமாளை வஹிப்பவர். வானமேறி வட்டமிடுகிறவராவர் பெரிய திருவடி.

महापुरुषाणां प्रदक्षणीकरणमुक्तम् । प्रणन्तव्यत्वं स्पष्टमाह—

पुण्यगन्धाः सुमनसः प्रबुद्धाः समयागमे ।
शिरसा परिगृह्यन्ते सादरं त्रिदशैरपि ॥ ८ ॥

1. पुण्यमेव **गन्धः** परिमलवत् भोग्यं सर्वत्र प्रसृतश्च येषां ते । "यथा वृक्षस्य संपुष्पितस्य दूराद् गन्धो वात्येवं पुण्यस्य कर्मणो दूराद् गन्धो वाति" इति श्रुते । **सुमनसः** ज्ञानिनः शुद्धमनसः । **समयागमे । समयः** सिद्धान्तः । तत्तन्मतप्रतिपादकशास्त्रेषु प्रबुद्धाः अतिशयितज्ञानाः । तेन भगवत्पारम्य-वेदनात् प्रतिबुद्धाः परमैकान्तिनः **त्रिदशैरपि** देवैरपि सादरं **शिरसा परिगृह्यन्ते** प्रणम्यन्ते, "सर्वेऽस्मै देवा बलिमावहन्ति", "द्रवन्ति दैत्याः प्रणमन्ति देवताः" इत्यादिवचनात् ।

2. **सुमनसः** पुष्पाणि । "स्त्रियः सुमनसः पुष्पं प्रसूनञ्च" इति कोशात् । ताः **समयागमे** तत्तत्पुष्पोचितवसन्तादिकालसमागमे सति **प्रबुद्धाः** जातविकासाः **पुण्यगन्धाः** घ्राणभोग्यगन्धविशिष्टाः **त्रिदशैरपि** बाल्यकौमारयौवनरूपदशात्रयविशिष्टैरपि जनैः शिरसा परिगृह्यन्ते । वार्धके केशन्यूनत्व-पलितत्वादिना परिष्कारानपेक्षणात् **समयागमे** उत्सवाद्यवसरप्राप्तौ **त्रिदशैः** अर्चामूर्तिभूतदेवैरपीति च ॥

3. **सुमनसः** देवाः "त्रिदशा विबुधाः सुराः" इति कोशात् । **पुण्यगन्धाः** पुण्यकर्माणि स्वाराधनभूतान्येव तत्प्रसिद्धिकरत्वात् गन्धो येषां ते । यद्वा तेषां शरीरेषु स्वाभाविको गन्धोऽप्यस्तीति तथा । **समयागमे** तत्तद्देवताह्वानकालप्राप्तौ । तथा यागस्य **मा** लक्ष्मीः यागमा । **समा** सर्वा **यागमा** यागसंपत् यत्र तत्र देशे, **प्रबुद्धाः** आहूततया अनेकशरीरपरिग्रहेण हविर्ग्रहणाय जागरूपकाः, **त्रिदशैरपि** धर्मपरैरर्थपरैः कामपरैस्त्रिविधैरपि **शिरसा परिगृह्यन्ते** सेव्यन्ते ।

4. **पुण्यगन्धाः** स्वागमनमात्रेण सुबहुसंवत्सरक्षामभूतेऽपि देशे वर्षप्रापणौपयिकविशिष्टपुण्याः **सुमनसः** ऋश्यशृंगादयः समयागमे पुत्रकामेष्ट्यादिविधानानुगुणाथर्ववेदादौ प्रबुद्धाः **त्रिदशैरपि** नयशीलचक्रवर्तित्व-राजर्षित्व-वसिष्ठप्रायसदाचार्यवत्त्वरूपांशत्रयवद्भिरपि दशरथादिभिः शिरसा परिगृह्यन्ते ।

5. **सुमनसः** दयादिगुणभरिताः **समयागमे** तत्तदर्थव्यवस्थापरशास्त्रमार्गे प्रबुद्धाः **त्रिदशै-रपि** ऐश्वर्यकैवल्यापवर्गाकांक्षत्वरूपदशात्रयवद्भिरपि **शिरसा परिगृह्यन्ते** आचार्यतया स्वीक्रियन्ते ।

6. **पुण्यगन्धाः** पावनप्रभावाः **सुमनसः** परचित्ताकर्षकमनोविशिष्टाः विद्वांसः **समयागमे** वादकेलिप्रवृत्तैः क्रियमाणा ये नियमबन्धाः, एतत्सिद्धान्तानुरोधेन एतत्प्रमाणस्वीकारेण एवं न्यायप्रयोगेन एतदेतद्दोषोद्भावनावकाशप्रदानेन कथा कार्येति तदातदाकथनाय तदर्थपरग्रन्थे **प्रबुद्धाः त्रिदशैरपि** वादो जल्पो वितण्डेति त्रिविधकथाप्रस्तावदशापन्नैरपि **शिरसा** सुमनस्संमतपक्षेण परिगृह्यन्ते । तिस्रः कथा भवन्ति वादो जल्पो वितण्डेति । वादः तत्त्वनिर्णयमेवोद्दिश्य गुरुशिष्यादिभिरपि क्रियमाणः । अन्यौ तु जिगीषया प्रवर्त्यमानौ । तत्र कृतसमयबन्धातिक्रमे सुमनसः प्रबुद्धा प्रतिबोधका भवेयुः । तेषां सुमनसां गुणविशेषं सामर्थ्यञ्चावेक्ष्य जल्पवितण्डापरा अपि शिक्षिताः स्वपक्षं परित्यज्य सुमनस्स्वीकृत-पक्षादरणेन सुमनस आद्रियेरन्नित्युक्तं भवति । शिरश्शब्दो विकल्पितेषु बहुषु कल्पेषु तत्तत्पक्षवाची । प्रथमं शिरः, द्वितीयं शिर इत्यादिप्रयोगस्य तत्र दर्शनात् । न्यायदर्शने, 'तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे" इति परविजयार्थं जल्पवितण्डादरणस्यापि कथनात् सुमनश्शिक्षितप्रकारेण प्रवृत्तैः वाद-जल्पवितण्डारूपदशात्रयवद्भिः शिष्यैः **शिरसा** स्वपक्षेणैव हेतुना स्वपक्षस्थापनार्थमेव ते देशिकाः सुमनसः परिगृह्यन्ते इत्यप्यर्थः ।

7. **सुमनस** इति स्त्रीलिंगात् स्त्रीणामपि ग्रहणसंभवात् समीचीनमनोविशिष्टाः संमतविवाहाः प्रबुद्धाः विवेकिन्यः **पुण्यगन्धाः** पद्मिन्यादिजातितया भोग्यपरिमलयुक्ताः पराशरमहर्षिणा मत्स्यगन्ध-व्यपोहेन योजनगन्धरूपपुण्यगन्धकल्पनवत् प्रापितश्रेष्ठगन्धा वा समयागमे व्यासतुल्यप्रजोत्पादनाद्यर्थ-श्रेष्ठकालप्राप्तौ **त्रिदशैरपि** धर्मार्थत्व—प्रजार्थत्व—भोगार्थत्वरूपदशायुक्तैरपि **शिरसा परिगृह्यन्ते** मूर्धानं पत्युरारोहेति मन्त्रानुसारेण बहुमानविशेषेण परिग्रहीक्रियन्ते । **परिग्रहः** जाया ।

புண்யகந்தா: ஸுமநஸ: ப்ரபுத்தா: ஸமயாகமே |
சிரஸா பரிக்ருஹ்யந்தே ஸாதரம் த்ரிதசைரபி || 8 ||

1. புண்யவிசேஷம் செய்து ப்ரஸித்தமானவர்கள் சாஸ்த்ரங்களை ஆராய்ந்து திருமாலே ப்ராப்யன் ப்ராபகன் என்ற தெளிவு உடைய வர்கள் பரமைகாந்திகள் தேவதைகளாலும் அன்புடன் வணங்கப் படுகிறார்கள்.

2. ஸுமநஸ்ஸாவண புஷ்பங்கள். சிறந்த மணம் உடைய புஷ்பங்கள் அந்தந்த ருதுஸமயம் வந்தபோது ஜனங்களால் பால்யம் கௌமாரம் யௌவனம்என்ற மூன்று நிலைகளிலும் தலைக்கு அலங்காரமாக்கப் படும். அர்ச்சாமூர்த்திகளாலும் அலங்காரமாகக் கொள்ளப்படும்.

3. தேவதைகள் பூமியில் நடத்தும் புண்யங்களையே தங்களுக்கு மணமாக ஸாரமாகக் கொண்டவர் அழைக்கப் பெற்று எல்லா யாக ஸ்த்தலங்களையும் அறிந்து சேர்ந்து, தர்மம் அர்த்தம் காமம் என்ற பலன்களைப் பெற விரும்புகின்றவர்களாலே வழிபடப் படுவார்கள்.

4. க்ஷாம தேசத்திலும் மழை பெய்யும்படி புண்யச் சிறப்புற்ற ருச்யச்ருங்கர்போன்றவர்கள் புத்ரகாமேஷ்டிமுதலானவற்றைச் செய்ய

மூன்று வேதங்களுக்கு மேலான அதர்வேதாதிகளையும் அறிந்த வர்கள், வீரஸார்வ பௌமன், ராஜர்ஷி. வஸிஷ்டரே ஆசார்யர் என்றுற் போன்ற மூன்று பெருமையுடைய தசரதர் போன்ற மஹான்களாலும் பரிவுடன் ஸேவிக்கப்படுவார்கள்.

5. சுத்தமான மனம் உடையவர்கள் அந்தந்த விசேஷங்களுக்காக ஏற்பட்ட (கீதை 8) சாஸ்த்ரங்களிலே நல்ல தெளிவு உடையவர்கள் ஐச்வர்யம், கைவல்யம், மோக்ஷம் என்ற புருஷார்த்தம் விரும்புகின்றவர் களால் ஆசார்யராகக் கொள்ளப்படுகிறுர்கள்.

6. நற்குணமும் நல்ல மனமும் உடையராய் வாதம் செய்ய வேண்டியதற்காக சாஸ்த்ர முறைகளை நன்கு தெளிந்தவர் வாதம் ஜல்ப்பம் விதண்டை யென்ற வாதங்களைக் கொண்டு வாதிப்போர்களா லும் நியாயமான பக்ஷத்தை இசைந்து போற்றப்படுகிறுர்கள். பிற வாதிகளையும் வெல்ல வல்ல மஹான்கள் என்றபடி. இவர்கள் சொல்படி நடந்து வாதம் ஜல்ப்பம் விதண்டை என்ற வாதமார்க்கங்களைத் தங்கள் ஸித்தாந்தத்திற்காகப் பற்றுகிறவர்களும் உண்டாகையாலே அவர்களாலும் இப் பெரியோர்கள் வணங்கப்படுவார்கள்.

7. ஸுமநஸ் என்பது ஸ்த்ரீலிங்கமாகையால் ஸ்த்ரீகளையும் கொள்ள லாம். பத்மிநீ முதலான ஜாதியில் பிறந்து நறுமணமும் புண்யமும் உடைய ஸ்த்ரீகள் நல்ல தெளிவு உள்ளவர்கள் ஸமயம் வந்த போது, தர்மத்திற்காகவோ, ப்ரஜைக்காகவோ, போகத்திற்காகவோ தலை வணங்கி பார்யைகளாகக் கொள்ளப்படுவார்கள். பராசர மஹர்ஷி மத்ஸயகந்தி என்ற கன்னிகைக்கு அந்த துர்கந்தத்தைப் போக்கி நறுமணம் அளித்துச் சிறந்த பெண்ணுக்கி மணந்து வ்யாஸ மஹர்ஷி யைப் பெற்றுர். அப்படி கொள்ளப்படும் ஸ்த்ரீகள் புண்யவதிகள்.

महत्पुरुषेषु मैत्री परं श्रेयसे इत्याह—

अनुकर्तुमपह्नोतुमतिवर्तितुमीक्षितुम् ।
अशक्ये तेजसां पत्यौ मित्रता नुमतिक्षमा ॥ ९ ॥

1. **तेजसां** ज्ञानशक्त्याद्यधिवयेन तेजोरूपेण मूर्तानां पुरुषाणां **पत्यौ** श्रेष्ठे महापुरुषे **मित्रता** तं प्रति **मित्रता नु** मित्रभाव एव हि **मतिक्षमा** मननार्हा । यद्वा **अनुमतिक्षमा** अस्मदनुमत्यर्हा । मित्रभाव एव संमन्तव्य, न तु अनुकरणादि । कुतः ? तदाह **अशक्ये** इति **अनुकर्तुं** सदृशतयाऽभिनेतुं सदृशीकर्तुं वा सोऽशक्यः, तथा अपह्नोतुम् नायं तेजस्वीति अपलपितुमप्यशक्यः **अतिवर्तितुम्** अतिलङ्घयितुम स्वापेक्षया न्यूनीकर्तुमपि, किं बहुना ; ईक्षितुमप्यशक्यः अस्मद्दृष्टिनिरोधकोग्रतेजो-रूपत्वात् । अतस्तदनुकरणापह्नवातिवर्तनानि परित्यज्य मित्रभावेनानुकूलीकरणमेवोचितम् । उक्तञ्च संवर्गविद्यायां 'जानश्रुते पौत्रायणस्य समं दिवा ज्योतिराततम् । तन्मा प्रसांक्षीः । तत् त्वा मा प्रधाक्षीत् " इति । अत एव अतिवर्तनादेरशक्यत्वमालोच्य सीतया वत्सलतमया मात्रा रावणोऽप्यु-

पदिष्टः, "विदितः स हि धर्मज्ञः शरणागतवत्सलः । तेन मैत्री भवतु ते यदि जीवितुमिच्छसि" इति । रामो हि तेजसां पतिः, "अप्रमेयं हि तत् तेजो यस्य सा जनकात्मजा" इत्युक्तेः । अत सौलभ्याति-शयान्महापुरुषाः मित्रत्वार्हाः श्रेयसे भवन्ति । अनुकरणादिकं त्वशक्यम्; अपराधाय च स्यादिति ।

2. **तेजसांपतिः** सूर्यः । सोऽनुकर्तुमशक्यः, तथा स्फुटप्रकाशं तमपलपितुं कः पारयेत् । सूर्यमण्डलमतिक्रमितुमप्यशक्यम् । उग्ररश्मित्वात् तद्वीक्षणमप्यशक्यम् । तादृशे सूर्ये **मित्रता** मित्र-शब्दवाच्यता **अनुमतिक्षमा** अंगीकार्या; "द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचनः" इति कोशात् । तदौचित्यमप्यस्ति तस्मिन् सूर्ये तिग्मरश्मावपि मित्रता अत्यन्तानुकूलता **अनुमतिक्षमा** पूर्णिमया उचिता । "कलाहीने साऽनुमतिः पूर्णे राका निशाकरे" इति चन्द्रस्यैककलाहीनत्वे पूर्णिमा अनुमतिशब्दवाच्या भवति । पूर्णिमात्वेनानुमन्यते । चन्द्रपूर्णत्वे राकाशब्दवाच्या भवति । अस्मादेवानुमतिशब्दात् चन्द्रो द्रमिडभाषायां मतिशब्दवाच्यो बभूवेव । सूर्यकिरणानां चन्द्रकलापूर्तिहेतुत्वं तत्र सूर्यकिरणानाममृत-भावश्च प्रामाणिकम् । एवं पूर्णत्वापादकत्वात् मित्रत्वं सूर्यस्य युक्तम् । तथा, "तासां शतानि चत्वारि रश्मीनां वृष्टिसर्जने । शतत्रयं हिमोत्सर्गे तावद् घर्मस्य सर्जने । आनन्दनाश्च मेध्याश्च नूतनाः पूतना इति । शतं शतं वृष्टिवहास्ताः सर्वा अमृता....इति यादववचनमुद्धरन्ति । अनेन सूर्यसाम्यं महापुरुष-स्योक्तं भवति । यदाहुः, "यश्चात्मनाऽपत्रपते भृशं नरः सर्वस्य लोकस्य गुरुर्भवत्युत । अनन्ततेजाः सुमनाः समाहितः स्वतेजसा सूर्य इवावभासते" इति । आत्मनाऽपत्रपते इत्यनेन स्वदोषः स्वयमेव दोषत्वेन गृह्यत इति ज्ञापितम् । तेन सम्यक् स्वयंप्रकाशत्वरूपं सूर्यसाम्यम् । **गुरुः** अन्धकार-निरोधीत्यादिसाम्यं स्पष्टम । तथाच महापुरुषः मित्रभूतः सूर्यवत् बहूपकुर्यादिति ॥

அநுகர்தும் அபஹ்நோதும் அதிவர்திதும் ஈக்ஷிதும் |
அசக்யே தேஜஸாம் பத்யௌ மித்ரதா அநுமதிக்ஷமா || 9 ||

1. ஜோதிகளில் சிறந்த சோதியான மஹாபுருஷனை சிநேகிதராக்கிக் கொள்வதே தாம் இசையக் கூடியது; நன்மைக்குமாகும். அவனைப் போல் நடிப்பதோ, அவன்மகிமையை மறைப்பதோ அவனை மீள்வதோ தகாது. கண் எடுத்துப் பார்க்கவும் கூசும்படியான சோதியுடையன் மஹாபுருஷன்.

2. சூரியனைப் போலாகவும் அவனை இல்லையென்னவும் அவனைக் கடக்கவும் காணவுமாகுமா? அவ்வாறுகாத சூரியன் மித்ரனுகை தகும். மித்ரன் என்று சூரியனுக்குப் பெயர். அது பொருந்துமென்பது பூர்ணிமையினுல் விளங்கும். அனுமதி என்று ஒரு பிறை குறைந்த பூர்ணிமைக்குப் பெயராம். பூர்ணிமையில் சந்திரனுக்கு சூரிய கிரணங்களால் நிறைவு ஏற்படுகின்றது. சூரியகிரணங்களே அமுதமயமாகின்றன அப்போது. ஆகையினுல் அவன் மித்ரனென்னலாமே. சூரியனைப் போல் மஹாபுருஷன் உதவுவானுகையாலே அவனை மித்ரனுக்க முயல்க. விரோதித்தல் தகாது.

पुरुषान्तरपरिभवनप्रभूणामपि महापुरुषविषये न प्राभवमित्याह—

अ(आ)हितुण्डिकवृत्तीनामशेषा भोगिनः पदम् ।
न संवर्ताग्निसारथ्ये स्थाता यन्मुखमारुतः ॥ १० ॥

1. **यन्मुखमारुतः** येषां सर्पाणां सरोषाणां मुखतो निस्सरन् वायुः संवर्ताग्नेः प्रलयपावकस्य **सारथ्ये** साहाय्ये न **स्थाता** न स्थास्यति। तदुपकारक्षमो न भवति। शेषाख्यस्य सर्पस्यैकस्यैव मुखमारुतः प्रलयाग्निवर्धकः, नान्येषाम्। ते **अशेषाः** सर्वे, शेषभिन्ना इति च। **भोगिनः** सर्पाः। अहितुण्डिकः व्यालग्राही। **आहितुण्डिक** इति पाठेऽपि स एवार्थः। **अहिः** सविषसर्पः। 'अहयः सविषाः सर्वे निर्विषा डुण्डुमाः स्मृताः' इत्युक्तेः। तद्ग्राहिणो **वृत्तीनां** मन्त्रौषधादिव्यापाराणां ग्रहणबन्धनोत्फणीकरणादीनाम्। **दृष्टीना**मिति पाठे वृत्तयोऽप्युपलक्ष्याः। **पदं** गोचरा भवन्ति। न तु शेषः संवर्ताग्निसारथिमुखमारुत इति। व्यालग्राहिव्यापाराः न शेषसर्पविषये फलन्ति। तद्वत् इतरनिग्रहका अपि न महापुरुषनिग्रहसमर्था इति। श्लोके यच्छब्देन शेषसर्पग्रहणे स इति पदमध्याहृत्य यन्मारुतः सारथ्ये स्थाता। सः अहितुण्डिक वृत्तीनां न पदमिति पृथग्वाक्यं कार्यमिति क्लेशः।

2. **अहिः** दुष्टपुरुषः। हीति परिहासानुकरणम्। अहिः परिहासरहितः इति व्युत्पत्त्या साधुपरत्वेऽपि न दोषः। एवञ्चाहितुण्डिकाः तद्बाधकपुरुषाः। तदीयवृत्तीनां **भोगिनः** सुखानुभवपराः सर्वे **अशेषाः** भगवच्छेषत्वरसिकभिन्नाः विषया भवेयुः। **संवर्तः** प्रलयः। तत्रापि वर्तमानस्य **अग्नेः** अग्रनेतुः सर्वोच्छ्रायप्रदस्य भगवतः **सारथ्ये** दुष्टजनशिक्षणव्यापारसाह्यविधाने **यन्मुखमारुतः** यदीयमुखनिश्वासः **न स्थाता** न वर्तते। भोगिपुरुषाणां सक्लेशो निश्वासो भगवतोपेक्ष्यते। महापुरुषा यदि क्लेशेन किञ्चिन्मुखेन ब्रूयुः निःश्वासमात्रं वा कुर्युः, तदा तदेव निमित्तीकृत्य भगवान् बाधकान् हन्यादिति भावः। अहितुण्डिकस्य व्यालग्राहिणः वृत्तिरिव वृत्तिर्येषां तेषां जनानामिति वाऽर्थः।

அஹிதுண்டிக வ்ருத்தீநாம் அசேஷா போகிநः பதம் |
ந ஸம்வர்த்தாக்நிஸாரத்யே ஸ்த்தாதா யந்முகமாருதः || 10 ||

1. ப்ரளயத்திற்காகப் புறப்படும் அக்னிக்கு ஸஹாயம் செய்ய எந்தப் பாம்புகளின் முகக்காற்று உதவப் போகிறதில்லையோ, அந்த ஸாதாரணமான பாம்புகள்தாம் பாம்பு பிடிக்கின்றவனின் ஸாமர்த்திய செயல்களுக்கு உட்படும். ஆதிசேஷனின் முக விஷக்காற்றினால் ப்ரளய காலத்தில் நெருப்பு எழுகின்றது? அப்பாம்பை வசப்படுத்த பாம்பாட்டியாலாகுமா?

2. பாம்பாட்டியைப் போல் பிறரைப் பீடிக்குமவர்களின் செயல்கள் ஸுகம் அனுபவித்து வரும் பலரை நலிய வல்லனவாம். துஷ்ட சிக்ஷணம் செய்யும் எம்பெருமான், சில பெரியோர் திருவாக்கினால் ஒன்று சொன்னாலும், பிறரைக் கண்டு சிறிது நெடுமூச்சு விட்டாலும் அதையே துணையாகக் கொண்டு சிக்ஷிப்பான் அப்படி துணையாக மாட்டாதாரையே துஷ்டர்கள் நலிவதாம்.

महापुरुषे स्थिता गुणा बहवो दुर्लभाश्चेत्याह—

गरुत्मति सुपक्षतां गिरिधुरन्धरे धीरताम्
उदन्वति गभीरताममृतदीधितौ सौम्यताम् ।
विवस्वति च दीप्ततां विधिरुपादधा(दा)नश्चिरात्
अनर्घगुणचित्रितं किमपि चित्रमासूत्रयत् ॥ ११ ॥

1. चतुर्मुखः एकैकगुणनिवेशनेन सृष्टिकरः सर्वगुणसमावेशमेकत्र चित्रे व्यधात् । तदेव महापुरुषात्मना प्रथते इत्यर्थः । तान् गुणान् आह **गरुत्मतीति** । अत्र श्रीरामो महापुरुषः कवेर्मनसि स्थितः । पक्षशब्दः श्लिष्टः गरुद्वाची अभिमतार्थवाची च । उभयोरूर्ध्वगतिसाधनत्वमविशिष्टम् । शोभनौ पक्षौ गरुतौ यस्येति गरुत्मत्पक्षेऽर्थः । प्रामाणिकोत्कृष्टाभिमतार्थवत्त्वं महापुरुषस्य । अभिमतार्थस्य समीचीनत्वं गरुत्मत्यपि सुवचम् । स हि नागपाशबद्धे श्रीरामभद्रे लक्ष्मणे च तज्जप्तमन्त्रसिद्धिबलवत्त्व इव दूरादागत्य प्रत्यक्षीभूय तौ स्पृष्ट्वा प्राह स, "अहं सखा ते काकुत्स्थ प्रियः प्राणो बहिश्चरः । गरुत्मानिह संप्राप्तो युवाभ्यां साह्यकारणात्" (रा. यु. ५०) इति । एतच्छ्लोकस्मारणार्थमेव गरुत्मत्पदप्रयोगः । महापुरुषाणां गुणवत्पक्षपातो वैनतेयेन ज्ञाप्यते । प्राणापायशंकायां प्राण एवाहं प्राप्तोऽस्मीत्याह । पक्षशब्दस्यार्थभेदे सत्यपि एकशब्दोपादानबलादेवाध्यास इति ध्येयम् । धीरत्वगभीरत्वादिरूप वक्ष्यमाण गुणेष्वपि शोभनेऽर्थभेद एव । शब्दैक्यादेव सर्वत्रैक्यं प्रत्येतव्यम् । एवमाकलय्यैव श्रीमति रामायणे वाक्यानि, 'धैर्येण हिमवानिव', 'समुद्र इव गाम्भीर्ये', 'सोमवत् प्रियदर्शनः', 'गुणैर्विरुरुचे रामो दीप्तः सूर्य इवांशुभिः' इति ; यान्यत्र गिरिधुरन्धरे धीरतामित्यादौ अभिसंहितानि । **गिरिधुरन्धरो** हिमवान् । सर्वगिरिभाराधिकभारशालित्वात् । **धीरत्वम्** अशक्यचलनत्वम् । **गभीरता** दुर्ग्रहतलत्वम् । **सौम्यता** प्रियदर्शनत्वम् । **दीप्तता** उग्रप्रकाशत्वम् । **उपादधान** इति पाठे सप्तम्यन्तानामध्यत्रान्वयः । तत्रतत्र कुर्वन्नित्यर्थः । उपेत्यनेन तत्रतत्र कृतानां तेषां महापुरुषस्थगुणापेक्षया न्यूनत्वं ज्ञाप्यते । **उपाददान** इति पाठे, स्थितामिति पदाध्याहारेण सप्तम्यन्तानां द्वितीयान्तेष्वन्वयः । तान् गुणान् तत उपादाय । उपादानं महापुरुषचित्ते निवेशाय विवक्षितम् । **अपारराग** इति पाठो न पेशलः । **चिरात्** बहुकालं विमृश्य । तान् गुणान् शुद्धान् कर्तुञ्च कालविलम्बः । अत एव तेषामनर्घत्वसंपत्तिः । किमपि अनिर्वचनीयं वाचामगोचरं **चित्रम्** । चित्रातिरिक्ते समावेशस्य दुष्करत्वात् । चित्रत्वेन भाव्यमानं महापुरुषम् **आसूत्रयत्** सूत्रतुल्यमकरोत् । सूत्राणां बह्वर्थगर्भत्वात् बहुगुणगर्भत्वात् अत्यन्तादरणीयत्वाच्च । सूत्रस्य यथा मणिधारकत्वं तथा महापुरुषस्य श्रीरामतुल्यस्य जगद्धारकत्वम् । गुण एव हि मूर्तः सूत्रमित्युच्यते । उक्तञ्च भगवता स्वस्य सूत्रत्वम्, "मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव" इति । वस्तुतस्तु आसूत्रण-पदस्य ग्रथनार्थकत्वात् अनर्घगुणरत्नचित्रितं किमपि रत्नहारायमाणं **चित्रम्** आश्चर्यतया **आसूत्रयत्** जग्रन्थ । सोऽयं महापुरुष इत्यर्थः ।

கருத்மதி ஸுபக்ஷதாம் கிரிதுரந்தரே தீரதாம்
உதந்வதி கபீரதாம் அம்ருததீதிதௌ ஸௌம்யதாம். |
விவஸ்வதி ச தீப்ததாம் விதிருபாததாநः சிராத்
அநர்க்ககுணசித்ரிதம் கிமபி சித்ரம் ஆஸூத்ரயத்— || 11 ||

1. தெய்வம் கெருடனிடத்தில் நல்ல பக்ஷத்தையும், இமயமலையில் தைர்யத்தையும், கடலில் ஆழத்தையும், சந்திரனிடம் ப்ரியக் காட்சியையும், சூர்யனிடத்தில் தேசையும் வைத்து நெடுநாள் விசாரித்துச் சேர்த்து, அச்சிறந்த குணங்கள் நிறைந்த ஒப்பற்ற சித்ரஹாரம் அமைத்தது. (அதே மஹாபுருஷனென்பதாம்.)

संपदमनपेक्षमाणाः शमधना एव महापुरुषा इत्याह—

प्रशस्तिं विन्दन्ति प्रशमसुखदिव्यामृतसरित्—
प्रलीनोदन्यानां परिषदि न संपत्तिसरितः ।
अमित्रोपक्षेपक्षणविगलदात्मीयपृतना-
द्दढामर्दत्रस्यद्द्रमिडभटजंघाजवभृतः ॥ १२ ॥

इति महापुरुषपद्धतिः ।

1. **प्रशमः** प्रकृष्टः शमः काम्य-निषिद्धकार्येभ्यः सर्वेन्द्रियनिग्रहः । स एव सुखम् । तद्रूपया दिव्यामृतनद्या **प्रलीनोदन्यानां** शान्ततृष्णानाम् । प्रशमसुखं यावन्नानुभवगोचरीभवति, तावदेव नानाविधा उदन्याः प्रवर्तन्ते । एवं सर्वोदन्याशान्तौ का प्रसक्तिः संपत्त्यपेक्षायाः । संपत्तिसरितामुदन्याशामकत्वद्वासमानानाम् उदन्याभिवर्धकत्वमेव । न केवलं तत्, अतिशीघ्रक्षयित्वादपि न ता मान्या इत्याह **अमित्रेति** । संपत्तिवेगस्य द्रमिडभटवेग उपमानम् । योद्धुं संनद्धाः द्रमिडभटाः शत्रुसमागमवार्ताश्रवणपर्यन्तं शूरा इव लक्ष्यमाणाः यदा शत्रव इति शृण्वन्ति, तदैव, तदुपक्षेपक्षण एव—उपक्षेपो नाम न तत्कृतायुधक्षेपः ; तत्कृतसिंहनादादिर्वा, किं तु यत्किञ्चित्कृतशत्रुशब्दप्रयोगः । तच्छ्रवण एव—धावन्ति । शत्रवः आगच्छन्तीति वा निहता इति वा किं ब्रवीतीत्यप्यनालोच्य तावतैव शत्रुभिः प्रहृतेव द्रमिडसेना अग्रभागे विगलति । तत्कृतं विमर्दं शत्रुकृतं विमर्दमिव मत्वा त्रस्यन्तः पलायन्ते भटाः । तेषां जंघानामिव जवः संपदाम् । "ऐश्वर्यं शत्रुशालिता" इत्युक्त्या संपत्त्या सह शत्रवोऽपि समायान्तीत्यप्यत्र ज्ञाप्यते । तादृश्यः संपत्तयः उक्तपरिषदि **प्रशस्तिं** श्लाघनीयतां न विन्दन्ति । **प्रलीनाः धन्यानां परिषदीति** कश्चित् पाठः। **धन्याः** लब्धशमधनाः। **प्रलीना** इति संपत्तिसरिद्विशेषणम्। तासाममृतसरित्प्रलीनत्वं नाम तदपेक्षयाऽतीव न्यूनत्वमिति ।

ப்ரசஸ்திம் விந்தந்தி ப்ரசமஸுகதிவ்யாம்ருதஸரித்-
ப்ரலீநோதந்யாநாம் பரிஷதி ந ஸம்பத்திஸரிதः.
அமித்ரோபக்ஷேபக்ஷணவிகளதாத்மீயப்ருதநா-
த்ருடாமர்தத்ரஸ்யத் த்ரமிட படஜங்காஜவப்ருதः || 12 ||

1. பகைவர்கள் என்ற சொல் செவியில் விழுந்தபோதே விரைவிற் குலேகின்ற தமிழ்தேசசேனையினலடிக்கப்பட்டு அந்த சேனையிலிருக்கும் சேவகர்களே, பிறரால் அடிக்கப்பட்டவர் போல், அஞ்சி ஓடும் போது அவர்கள் காலில் என்ன விரைவோ அந்த விரைவில் ஓடிப் போகின்றவை செல்வச் சிற்ருறுகள்; சாந்தி ரஸானுபவத்திஞலே தாகமெல்லாம் தணிந்தவர்கள், அவற்றைப் பாராட்டமாட்டார்கள்.

மஹாபுருஷபத்ததி முற்றும்.

समचित्तपद्धतिः सप्तमी (७)

पुंसः कस्यचिदास्थाने द्विजेन्द्रः सूरिसेविते ।
गुणवत्पक्षपातेऽपि मध्ये तिष्ठति मानभृत् ॥ १ ॥

1. अत्र पद्धतौ बह्वर्थकत्वं श्लोकानां प्रायो नास्ति। समचित्तस्वरूपगुणांशमादाय सतो वर्णयति पुंस इति । **कस्यचित् पुंसः** राजादिरूपस्य नियमनशक्तस्याध्यक्षस्य **सूरिभिः** पण्डितैः **सेविते** प्राप्ते **आस्थाने** परिषदि वादे प्रवर्तमाने **द्विजेन्द्रः** ब्राह्मणः **मानभृत्** सर्वप्रमाणेतिवृत्तवेदी **गुणवत्पक्षपातेऽपि** यः पक्षः प्रामाणिकत्वादिगुणविशिष्टः तस्मिन् **पातेऽपि** स्वस्याऽऽस्थायामपि **मानभृत्** वादिप्रतिवाद्युपन्यस्तयुक्तिप्रमाणपरिशीलकः संमान्यमानश्च **मध्ये तिष्ठति**—उभयस्मिन् यतरपक्षसाधकन्यायस्य निर्दुष्टता, तत्र तिष्ठति । यथा ईश्वरस्थापनार्थं प्रवृत्तेन वादिना साधकहेतूपन्यासः क्रियमाणः निरीश्वरवादिना स्वाभिमतयुक्त्युपन्यासेन बाध्यते चेत्, आस्तिकः सेश्वरः आगममूलेश्वरस्थितिवित् ईश्वरस्थितिपक्षमिष्टमपि परित्यज्य निरीश्वरयुक्तेर्बलमप्यनुमोदते कदाचित् । अन्यदा सेश्वरत्वहेतुः सम्यक् चेत्—तमभ्युपगच्छति, मध्यस्थत्वात् । एवं द्रष्टव्यम् । सर्वेष्वपि समं चित्तं येषां ते समचित्ताः ।

2. द्विजानां पक्षिणामिन्द्रः गरुत्मान् **कस्यचित्** अद्वितीयस्य **पुंसः** पुरुषसूक्तप्रसिद्धस्य पुरुषोत्तमस्य **सूरिसेविते** नित्यसूरिनिषेविते **आस्थाने** सभायां परमपदे अवतारस्थले च **मानभृत्** वेदात्मत्वात् मानधारी सूरिभिर्बहुमन्यमानश्च **गुणवत्पक्षपातेऽपि गुणवतां** प्रशस्तगुणानां चलनाभ्यासपराणां वा **पक्षाणां** गरुतां **पातेऽपि** चलने भवितुमर्हेऽपि उपर्यगच्छन् वितत्य पक्षौ विनीततया **मध्ये तिष्ठति** । गोष्ठीमध्ये श्रेष्ठत्वेन विराजते । पक्षिणः पक्षपतनकालेऽपि **स्थितिः**–अडयमानता आश्चर्याय । भगवतः पुरस्तात् पार्श्वद्वयेऽपि सूरिसेव्यतया गरुत्मतः सर्वत्र स्थितिः प्रसिद्धा । शाण्डिलीवृत्तान्तोऽत्र घटयितुं शक्यः—शाण्डिलीं दृष्ट्वा तां श्रेष्ठवासस्थानं नेतुमिष्टवति वैनतेये तस्य पक्षाः शीर्णाः पतिताः । तथा च सर्वप्रकारभक्तप्रावण्यरूपगुणस्येव पक्षाणाञ्च पातेऽपि पश्चात् कस्यचित् पुंसः तन्नेतुर्महर्षेः **आस्थाने** आस्थाबलात् **मानभृत्** तत्क्षामपराधक्षामणेन गौरवं वहन् गरुत्मान् **मध्ये तिष्ठति**, अतिरस्कृतो भगवता गोष्ठीमध्ये आहृतोऽभूदिति । गुणवदिति वतिप्रत्ययः । गुणस्येवेत्यर्थः ।

सुहृदः साधुकृत्याम् द्विषन्तः पापकृत्यामित्यादिश्रवणात् सत्तमानामपि प्रतिकूलाः सन्तीति ज्ञायते। तेषां चित्तवैषम्येऽपि सत्तमाः समचित्ता एवेत्येतत् निदर्शनपुरस्सरं दर्शयति स्म ।

3. **द्विजेन्द्रः** अत्रेर्महर्षेः अब्धेश्च द्वाभ्यां जातत्वात् द्विजश्चन्द्रः । स एवेन्द्रश्च, हरिवंशे (25) सोमोत्पत्त्यध्याये, "ततस्तस्मै ददौ राज्यं ब्रह्मा ब्रह्मविदां वरः । बीजौषधीनां विप्राणामपाञ्च जनमेजय । सोऽभिषिक्तो महाराजो राजराज्येन राजराट्" इत्युक्तेः । अत एव विप्रपतित्वेनापि द्विजेन्द्रः द्विजराजः । एवम्भूतश्चन्द्रः **कस्यचित् पुंसः** बृहस्पतेः **आस्थाने** आस्थाविषयभूते क्षेत्रे तारायाम् । दोषदर्शनानन्तरमपि तेन गुरुणा तस्याः अत्यक्तत्वादास्था स्पष्टा । **सूरिसेविते** । सूरिः बुधो ग्रहः तेन पुत्रेण सेविते **गुणवत्पक्षपातेऽपि**—अतिशयितादरसद्भावेऽपि **मानभृत्** अवमानासहिष्णुतया स्वमानं रक्षन् गुरौ गौरवं वहंश्च **मध्ये तिष्ठति** तारायामादररहित इव वर्तते । **ताराप्रिय** इत्युक्तौ नक्षत्रप्रिय इत्यर्थान्तरकल्पनानुकूलं सप्तविंशतिं ताराः परिणीय वर्तते ।

4. द्विजेन्द्रः संपातिनामा गृध्रराट् **कस्यचित् पुंसः** अगस्त्यस्य आस्थाने तेनाचलतया स्थापिते विन्ध्ये **सूरिसेविते** हनुमदादिपरमाभिज्ञवानरसेविते, **गुणवत्पक्षपातेऽपि** जटायुः पक्षापेक्षयाऽधिकमहिमवतोः पक्षयोः सूर्यकिरणदाहेन पतितत्वेऽपि **मानभृत्** दूरदृष्ट्यादिमत्तया यथावस्थितप्रमाणवान् लंकास्थसीतावृत्तदर्शनं दूरादेव कृतवान् **मध्ये तिष्ठति** स्वयं व्यापरितुमशक्तस्सन् उपदिश्य तूष्णीं स्थितः।

5. **द्विजेन्द्रः** जटायुः एक एव **सूरिसेविते** अनेकमहर्षिपरिवृतेऽपि **कस्यचित् पुंसः** श्रीरामस्य **आस्थाने** जनस्थानसमीपदेशे **गुणवत्पक्षपातेऽपि** रावणरथसारथिबाहुध्वजधनुरादिसर्ववस्तुध्वंसनसामर्थ्यसंपन्नयोः पक्षयोः पातानन्तरमपि **मानभृत्** स्वायुःपरिमाणं बिभ्राणः विशुद्धमनोभृत् यथावस्थितार्थोपदेशरूपं मानं चिकीर्षुः **मध्ये** रामकृतमारीचाभिद्रवण-प्रतिनिवर्तनमध्यकाले **तिष्ठति** प्राणरक्षणेन तस्थौ । न त्वन्ये महर्षय उपकारिण आसन् ॥

பும்ஸ: கஸ்யசிதாஸ்த்தாநே த்விஜேந்த்ர: ஸூரிஸேவிதே |
குணவத்பக்ஷபாதேऽபி மத்யே திஷ்ட்டதி மாநப்ருத் || 1 ||

1. ஸமசித்தபத்ததி இது. இரண்டு பக்ஷங்களில் எது தகுமோ அதனையே கொள்பவர் ஸமசித்தர்—பண்டிதர்கள் சூழ்ந்திருக்கும் ஒரு பேரோலக்கத்திலே ஓர் அந்தணர் அந்தந்த ப்ரமாணங்களை நன்கு எடுத்தாள்பவர் கௌரவிக்கப்படுகிறவர் தம் பக்ஷம் வேறு சிறந்தது உண்டானாலும் இரு வாதங்களில் எவர் சொன்னது சரியானாலும் கொள்பவராய் அதைக் காத்து மத்யஸ்த்தராவர்.

2. த்விஜம்-பக்ஷி. பக்ஷிராஜனென்ற கெருடன் வேதஸ்வரூபியான வர் பரமபதத்திலுள்ள நித்யஸூரிகள் நிறைந்த பரமபுருஷனின் திருவோலக்கத்திலே இறக்கைகள் வீசினபடியிருப்பவரானாலும் நின்றபடி நடுவில் விளங்குகிறார். கெருடன் எம்பெருமானுக்கு எதிரில் நடுவில் இருபுறமும் ஸூரிகள் சூழ விளங்குவர் எங்கும். சாண்டிலியினிடத்தில்

சிறிது அபராதத்தால் சிறகுகளும் நற்குணம்போல் போயினும் மீண்டும் பெற்று விளங்குகிறுரென்னலுமாம்.

3. சந்திரன் புதல்வனுன புதனுல் ஸேவிக்கப்பட்ட ப்ருஹஸ்பதியின் மனைவியான தாரையினிடம் விசேஷமாகக் காதல் உடையனுயிருந்தும் மானம் காப்பதற்காக மத்யஸத்தனுய் விலகி நிற்கிறுன்.

4. ஸம்பாதி (சூர்ய கிரணங்களால் தன் சிறகுகள் விழுந்தபடியால்) அகஸ்த்ய மஹர்ஷியினுல் அடக்கப்பட்ட விந்தியமலையில் நின்றதாகி, ஹனுமான் முதலான மஹான்கள் வந்தபோது தூரப்பார்வையுள்ள தன் கண்ணைக் கொண்டு ஸீதாதேவியுள்ள இடம் கண்டு கூறி தான் பறந்து செல்லமாட்டாமையால் நின்றிருந்தது.

5. பல மஹர்ஷிகள் இருக்கும் ஸ்ரீராமாச்ரம ஸமீபத்தில் ஜடாயு ஒன்றே ராவணனுடைய பலமெல்லாம் ஒழித்த சிறந்த சிறகுகள் அவனுல் அறுக்கப்பட்ட பிறகும் ஸ்ரீராமனிடம் நடந்ததைச் சொல்வதற்காக உயிர் தரித்துத் தெளிவான மனத்துடன் இருந்தது.

चकोरानादरं देवश्चक्रवाकस्य चादरम् ।
विवस्वान् नाभिसंधत्ते विश्वमेतत् प्रकाशयन् ॥ २ ॥

1. चकोरपक्षिणां चन्द्रकिरणभक्षिणां सूर्ये नाऽऽदरः । अहनि मिथस्संगच्छमानानां चक्रवाकपक्षिणां तु तस्मिन् आदरः । स तु देवः दिवि द्योतमानो विवस्वान् सूर्यः विश्वमेतत् जगत् स्वप्रभाभिः प्रकाशं करोति । चकोरस्यापि प्रकाशं दत्ते । अयमस्मासु आदररहित इति न गणयति । नाप्याद्रियमाणेषु पक्षमधिकं करोति । चक्रवाकादयः पक्षवन्तः ; सूर्यस्तु अपक्षपात एव ॥

2. चकोरस्य आहारदः चन्द्रः सूर्यकिरणवशादेव पुष्टिं लभते । स्वोपजीव्यकिरणपोषकः सूर्य इति सूर्ये बहुमाने कार्येऽपि यदि चकोरो न करोति, तावता न सूर्यस्य तस्मिन् वैरस्यम् । भगवदाहितैश्वर्यैरेव देवतान्तरैः तद्भक्तेभ्यः फलेषु दीयमानेषु, ते यदि मूलभूतं भगवन्तं द्विषन्ति, तावता भगवान् तेभ्यो देयं न प्रत्याचष्टे ।

3. सत्पुरुषस्यैकस्य स्थित्या सुभिक्षभूते देशे तत्स्थित्यैव जातया समृद्ध्या संपन्नक्षेमान् उपजीवन्तो जनाः तं सत्पुरुषमज्ञानान्न मानयन्ति चेत्—तावता न विश्वप्रकाशहेतोः तस्य स्वयंप्रकाशस्य तेषु वैमत्यम् ।

4. किं चकोरेण चक्रवाकेन वा । नीचप्रीत्यप्रीती अकिञ्चित्कर्यौ अतिमहद्विषये इति च भावः ।

சகோராநாதரம் தேவ: சக்ரவாகஸ்ய சாऽऽதரம் |
விவஸ்வாந் நாபிஸந்த்தத்தே விச்வமேதத் ப்ரகாசயந் || 2 ||

1. சூரியன் தன் ஒளியால் உலகுக்கெல்லாம் வெளிச்சம் அளிப்பவன், சகோரபக்ஷி (சந்த்ரனின் கிரணங்களைப் பருகும் பக்ஷி) தன்னைப் பாராட்டவில்லையென்பதையும், சக்ரவாகபக்ஷி தன்னிடம் ப்ரீதி கொண்டதையும் பொருட்படுத்துவதில்லை.

2. ஸர்வேச்வரன் பலன் அளிக்க அதைப் பெற்றே இதர தேவதைகள் தம்மை அண்டினவர்களுக்கு வேண்டுவனவற்றை அளிக்கிறார்கள். இதனை யறியாமல் தனக்கு விரோதிகளாகின்றவருக்கு ஈச்வரன் அது விஷயத்திற்கு ப்ரதியாகிறதில்லை.

3. நல்லார் ஒருவர் உளரேல் அவர்பொருட்டு எல்லாருக்கும் பெய்யும் மழை. இதனை யறியாமல் வேறு மூலமாகத் தாங்கள் சிறப்பு உற்றதாக துஷ்டர்கள் நினைப்பினும் நல்லார் அவர்களிடம் கேடு நினைக்கமாட்டார்.

4. உலகெல்லாம் விளங்குவிக்கும் ஸூர்யன் மிக்க தேசு உடையன். சகோரபக்ஷி ஏசுவதாலோ சக்ரவாகபக்ஷி புகழ்வதாலோ அவனுக்கு யாதொன்றுமில்லை. பிறர் ஏசினாலும் புகழ்ந்தாலும் பெரியோர்கள் மனத்தில் ஒன்றும் வேறுபாடு இல்லை. கொள்ளத்துணியினும் கோதென்றிகழினும் எள்ளத்தனைவுகவாது இகழாது எழின்மதி.

इतरजनस्तवन-निन्दनप्रयुक्तं वैषम्यं सत्सु नास्तीत्युक्तम् । सामान्यतो देशकालप्रयुक्तं वैषम्यमेव न भवतीति दृष्टान्तेनोपपादयति—

देशकालविशेषेण विषमत्वं समत्ववत् ।
निशादिवसयोर्दृष्टमहोरात्रस्य न क्वचित् ॥ ३ ॥

1. सर्वत्र देशे सूर्योदयास्तमयौ एकदा न भवतः । अतः अहरारम्भकालस्य राज्यारम्भकालस्य च तत्तत्र विभिन्नत्वात् देशभेदेन वैषम्यं निशादिवसयोः । एवं मेषे तुलायाञ्च प्रायः त्रिंशद्घटिकात्मकत्वमेकैकस्य भवेत्, तद्भिन्नेषु मासेषु उत्तरायणे दिवसेषु नाड्याधिक्यं दक्षिणायने निशासु नाड्याधिक्यमिति वैषम्यम् । एवञ्चैकस्मिन् देशे कदाचित् समत्वं कदाचित् विषमत्वम्, देशान्तरे सर्वदा विषमत्वं तत्र तारतम्यञ्च दृष्टम् । एवमपि अहोरात्रः सर्वत्र देशे सर्वस्मिन्नपि काले षष्टिघटिकात्मक एव । अहोरात्रशब्दः अहश्च रात्रिश्च तयोः समाहार इति समासान्ते अच्प्रत्यये पुंलिंगे च निष्पन्नः तत्तद्देशीय तत्तत्कालगत-एकाहःकाल-एकरात्रिकालद्वयरूपसमुदायवाची । समत्ववत् इत्यस्य यथा समत्वं तथेत्यर्थः । मतुप्प्रत्ययस्वीकारेण समत्वविशिष्टमिति व्याख्याय निशायाः दिवसस्य च विषमत्वं समत्वयुक्तं सममित्यपि व्याख्यान्ति । तथाच सन्तः अहोरात्रतुल्याः कदापि कुत्रापि वैषम्यं न लभन्ते । कस्मिन्नपि जन्तौ वैषम्यं न वहन्तीति, कमपि कालं कमपि देशञ्च न निन्दन्तीति चार्थः । लभ्यमानप्रयोजनानुरूपं पुरुषेषु उपचारतारतम्यं न कुर्वन्ति निरपेक्षत्वादित्यप्यर्थः । न क्वचित् इत्यस्य न कुत्रापि देशे काले चेत्यर्थः ॥

தேசகால விசேஷேண விஷமத்வம் ஸமத்வத் |
நிசாதிவஸயோர் த்ருஷ்டம் அஹோராத்ரஸ்ய ந க்வசித் || 3 ||

1. இரவுக்கும் பகலுக்கும் நாழிகைகள் ஸமமாகவேயிருப்பது ஏதோ சில இடத்தில் சில மாஸத்திலாம். மற்றவிடங்களில் மற்ற மாஸங்

களில் இரவுக்கோ பகலுக்கோ நாழிகை ஒன்றுக்கு ஏறும், மற்ருென்றுக்குக் குறையும். அஹோராத்ரம் என்று மொத்தமாக ஒவ்வொரு நாளையும் எடுத்துக்கொண்டால் அதற்கு எங்கும் எப்போதும் அறுபது நாழிகையே. அதில் வித்யாசமில்லை. அதுபோல் மஹான்களிடத்தில் வைஷம்யமேயில்லை, மற்றவரிடத்தில் வைஷம்யம் உளது. சில தேசங்களில் அவர்களும் ஸமமாக நடந்துகொள்ளலாம். அதனுல் மஹான்களாகமாட்டார்கள்.

"आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत्", "अनन्तं बत मे वित्तं यस्य मे नास्ति किञ्चन" इत्यादिन्यायेन नित्यतृप्तानां क्षुद्रप्रयोजनहरणकरणाभ्यां न वैषम्यमित्यत्र निदर्शनमाह—

प्रतिगृह्णति जीमूते प्रत्यर्पयति वा स्वयम् ।
अपूरणमपां पत्युः पूरणश्च न लक्ष्यते ॥ ४ ॥

1. **जीमूते** मेघे समुद्रात् अपः **प्रतिगृह्णति** स्वीकुर्वति सति **अपां** नद्यादीनां **पत्युः** समुद्रस्य **अपूरणं** पूर्णत्वाभावः-पाथस्स्वीकारप्रयुक्तहानिः न लक्ष्यते । **स्वयं** समुद्रकर्तृकापेक्षां विनैव जीमूते **प्रत्यर्पयति** साक्षात् समुद्रे वर्षणाद्वा अन्यत्र वर्षात्प्रवहदनेकनदीसमागमनद्वारा वा सलिलं समुद्राय ददति सति वा **पूरणं** पूर्णता च न लक्ष्यते । यद्यपि न्यूनताधिक्ये वस्तुगत्या स्तः, अथापि अनपेक्षत्वात् तदनुरूपो विकारः परैर्न लक्ष्यते । तद्वत् महान्तोऽपहरणे प्रत्यर्पणे च निर्विकारा इति ।

ப்ரதிக்ருண்ஹதி ஜீமூதே ப்ரத்யர்பயதி வா ஸ்வயம் |
அபூரணம் அபாம்பத்யு: பூர்ணஞ்ச ந லக்ஷ்யதே || 4 ||

1. மேகம் கடலினின்று நீரைக் கொள்ளும்போது அதனுல் கடலுக்குக் குறைவோ, மீண்டும் பெய்வதால் கடலில் நீர் சேரும்போது நிறைவோ காணப்படுகிறதில்லை. கடல்போலே மஹான்கள் தங்கள் சொத்தைப் பிறர் கொண்டாலும் மீண்டும் சேர்த்தாலும் மனத்தில் ஒரு விகாரமும் பெறமாட்டார்கள்.

अपकारिणामपि उपकार्यविशेषेणोपकारिणो महान्त इतीदं समचित्तत्वं निदर्शनेनाऽऽह—

छिद्रं जनयतां नीचैरच्छिद्रं बिभ्रतामपि ।
त्रासहीनाः सुमणयः स्वभावादुपकुर्वते ॥ ५ ॥

1. शोभनेषु मणिषु केचित् छिद्रमुत्पाद्य सूत्रे ग्रथनेन तान् धारयन्ति । अन्ये छिद्रमनुत्पाद्य स्वर्णादिमध्ये प्रत्युप्य धारयन्ति । शोभनानां मणीनां त्रासाख्यदोषराहित्यं स्वभावः । तत्तदपेक्षितशोभावहत्वमपि स्वभावः । छिद्रमकुर्वन्निति तत्र नान्यथा भावः । नीचैः अधोभागे । एकत्र भागे परं छिद्रकरणेनापि मणयः पंक्तिशः निक्षिप्येरन् ॥

2. **सुमणयः** शोभनाः श्रेष्ठाः पुरुषाः **नीचैः** पुरुषैः निकृष्टपुरुषद्वारा, नीचव्यापारैर्वा छिद्रम् अनर्थकरणावकाशं **जनयतां** कल्पयतां दुष्टानां जनानाम्, **अच्छिद्रं** निरन्तरं सर्वदा **बिभ्रतां** पोषयतां प्रकृष्ट

पुरुषाणाञ्च उपकुर्वते। कथंभूताः? त्रासहीनाः तत्कृतादपकारात् अनर्थो भवेदिति भयहीना', "सुदुष्टो वाऽप्यदुष्टो वा किमेष रजनीचरः" इतिवत्। अनुपकारे इतोऽधिकमपकुर्युरिति भयहीनाः, उपकार्यविशेषमपकारिष्वप्युपकारविधाने उपकारिणः कुप्येयुरिति भयहीनाश्चोपकुर्वते। कुतः? न प्रयोजनं किञ्चिदपेक्ष्य। किंतु स्वभावस्य तादृशत्वात्। उपकरणमेव स्वयं प्रयोजनमिति। "छेदेऽपि चन्दनतरुः सुरभयति मुखं कुठारस्य"।

சித்ரம் ஜநயதாம் நீசை: அச்சித்ரம் பிப்ரதாம் அபி |
த்ராஸஹீநா: ஸுமணய: ஸ்வபாவாத் உபகுர்வதே || 5 ||

1. கீழ்ப்புறம் துளையிட்டு அணிகின்றவர்களுக்கும், துளையிடாமல் அணிகின்றவர்களுக்கும் நல்ல மணிகள் இயற்கையில் அழகை உண்டு பண்ணுமேயல்லது, துளையிட்டதற்காக அழகளிப்பதை மாற்று. அவை த்ராஸம் அற்றவை. மணிகளுக்கு உள்ள தோஷத்தை த்ராஸம்—துவள் என்பது.

2. நல்லோர் மணியைப் போன்றவர். நீசர்களைக்கொண்டு நீசச் செயலால் தங்களுக்குச் சிலர் கேடு விளைக்க இடம் பெறுவிக்கின்றவர்களுக்கும், இடைவிடாமல் அன்புடன் போஷிப்பவர்களுக்கும் உபகாரமே செய்வர். அது இயற்கை. அவர்களுக்கு ஒருவிதமான அச்சமும் கிடையாது. அஞ்சி உபகாரம் செய்கிறாரென்பதில்லை.

महति पुरुषे जगतो विरुद्धोक्तिवैचित्र्यप्रदर्शनमुखेन नन्तव्यत्वमाह—

अनुज्झितसुहृद्भावः सुहृदां दुर्हृदामपि।
सम इत्येव भाव्योऽपि नम इत्यपि भाव्य(त्यभिभाष्य)ते ॥ ६ ॥

1. **सुहृदां** स्वविषये शोभनहृदयवतां **दुर्हृदामपि** दुष्टहृदयवताञ्च, तान् प्रति, **अनुज्झितः** अत्यक्तः सुहृद्भावः—शोभनमनस्कत्वं येन स समचित्तः सुहृदां दुर्हृदामपि समः इति सुहृद्भिर्दुर्हृद्भिश्च **भाव्यः** भावनीयः। (उपरि **भाष्यत** इति पाठे अत्रापि भाष्य इति युक्तम्। अथवा तत्रापि **भाव्यत** इत्येव। शब्दवैरूप्यायोगात्। अत एव अभीति उपसर्गघटनमपि न स्वरसमित्यन्यदेतत्।) एवं भावनीयोऽपि **नम** इति भाव्यते; इदं कथमिति चित्रीयते। अत्रेदमवधेयम्—यद्यत्र विरोधस्फुरणं चिकीर्षितम्, तर्हि समः इत्यभावयन्तः नमः इति भावयन्तीति विरोधो ज्ञापनीयः। तत् कथम्। दुर्हृद्भिर्नमः इत्युक्त्यसंभवात्। सम इत्यत्र स मे इति पदमस्तु इति चेत्—तत् सुहृद्विषयेऽनन्वितम्। तैः न मे इत्युक्त्यप्रसक्तेः। न च नम इतीति द्विविधपदच्छेदोपयोगिसन्धिबलात् यथायथमुभयग्रहणमिति वाच्यम्, सम इत्यत्रोभयाग्रहणे नम इत्यत्र परमुभयग्रहणे विरोधस्फूर्तेः सार्वत्रिकत्वाभावात्। उभयपुरुषविषयेऽप्येकरूपव्यवहारमादाय विरोधोपपादनम् इतिशब्दस्याप्यनुकार्यवाचकत्वनिर्विष्टत्व एव भवति। तदा **सम** इति वक्तृद्वयोऽयमिति भाव्ये सति **नम** इति वक्तृद्वयोऽयमिति भाव्यते इति लेखनीयं स्यादिति चेत्—उच्यते। [पुरुषपदं प्रयुक्तमासीत्। इति

वक्तव्योऽयमिति पूरणं सुज्ञानमिति अनुष्टुप्श्लोके तदुपेक्षा। तथा चोभयविषये वाक्यैकरूप्यम्। तथा च सम इति—सम इति वर्णद्वयघटितवाक्येन भाव्यः, नम इति नम इति वर्णद्वयघटितवाक्येन भाव्यत इति शब्दार्थः। पदविभागस्तु भिन्नः। समे इति वक्तव्ये नमे इति दुर्हृद आहुः; समः इति वक्तव्ये नमः इति सुहृद आहुरिति। नमे इत्यस्य, न मेऽनुकूल इत्यर्थः। नमः इत्यस्य नमस्कारोद्देश्य इत्येतावत्परत्वमिति। अथवा समे इति वक्तव्ये नम इति वदन्तीति विरोधोद्भावनम्। परिहारस्तु नमे इति दुर्हृदो विरुद्धमाहुरिति विरोधकथनमिष्टमेव; सुहृद्विषये तु नमः इत्येव वदन्तीति विरोधपरिहारः। यद्वा समः नमः, समे नमे इत्युभयत्रैकरूप्यमेवास्तुः समः नम इति सुहृद्विषये सुलग्नम्। दुर्हृद्विषये सम इति वक्तव्ये नमः मारहितः दरिद्रः अश्रीक इति वदन्ति; निन्दन्तीत्यर्थः। समे इति वक्तव्ये नमे इति दुर्हृद्वाक्यं युक्तमेव, सुहृदोपि, स मेऽनुकूल इति, न मे प्रतिकूल इति च वदन्ति। तदेकदेशमादाय विरोधप्रदर्शनमिति। नम इत्यपि इति अपिशब्दः सम इत्युक्तिमपि समुच्चिनोति। पूर्वम् एवकारसत्त्वात् तद्व्यावृत्तयेऽयम्। तथा च समः नम इत्युभयथोच्यते, समे नमे इति चोच्यत इति यथायथं ग्राह्यमित्यलम्॥ उभयैरपि स मे अनुकूल इति भाव्यः दुर्हृद्भिः न मेऽनुकूल इति अभिभाव्यते परिभूयते इत्येकमेवार्थमप्याहुः।

அநுஜ்ஜிதஸௌஹ்ருத்பாவ: ஸௌஹ்ருதாம் துர்ஹ்ருதாம் அபி |
ஸம இத்யேவ பாவ்யோऽபி நமஇத்யபி பாவ்யதே || 6 ||

1. நன்மனம் உடையோரிடமும் கெடுமனம் உடையோரிடமும் நன்மனம் உடையனுகவேயிருப்பவனை ஸம என்ற சொல் சேர்த்துச் சொல்லாமல் நம என்று சொல் சேர்த்துச் சொல்லுகின்றனர் எல்லோரும். இது விநோதமே. நல்லோர் கருத்து இவனை நமஸ்காரம் செய்ய வேண்டுமென்றதாம். பிறர் கருத்து, இவன் நமக்கு அனுகூலனல்லன், விரோதியென்றதாம்.

साधकराहित्येऽपि बाधकबहुत्वेऽपि न हीयते महानित्याह—

मरुद्भिः पीड्यमानोऽपि संत्यक्तोऽपि दिवानिशम्।
विषयस्नेहरहितो रत्नदीपः प्रकाशते॥ ७॥

1. लोके दीपः मरुता वायुना चाल्यमानश्चेत्, शाम्येत्। अपेक्षाकाल एव प्रकाश्यते। आरोप्यते। सर्वदा स दीपभाजनं तैलञ्चापेक्षते। रत्नदीपस्तु रत्नमयत्वात् नित्यप्रभाकत्वाच्च न मरुन्नाश्यः, न पुरुषापेक्षाप्रतीक्षः; न च तैलभाजनापेक्ष इति। मरुद्भिः वायुभिः। संत्यक्तोपीत्यस्य प्रकारान्तरेण प्रकाशलाभादुपेक्षितोऽपि, यद्वा प्रकाशनिरोधार्थं चूर्णप्रक्षेपादिविषयीकृतोपीत्यर्थः। मुग्धाः स्त्रियो भोगकाले, दीपो मा भूदिति मन्वानाः रत्नदीपं तैलदीपबुद्ध्या लोपयितुं प्रवृत्य वन्ध्यप्रयत्ना भवन्तीति हि कवयो वर्णयन्ति। यद्वा मरुद्भिरित्यत्र अस्यापि विवक्षाऽस्तु। संत्यक्त इति—आवश्यकत्वदशारहित इति यावत्। दीपस्य हि दशाऽपेक्षिता। दशा वर्तिः। साऽत्र नापेक्षितेति। दशाशब्दप्रयोगे श्लोको

श्लेषो भाव्यः । दिवानिशमित्यस्य प्रकाशत इत्यत्रान्वयः । विषयः दीपभाजनम् । स्नेहः तैलम् । तदुभयरहितोऽपीति अपिशब्दानुषङ्गः ।

2. रत्नदीपः योगी मुमुक्षुः मरुद्भिः भगवद्भक्तिविरोधिभिर्देवैः पीड्यमानोऽपि संत्यक्तोऽपि दिवानिशमदत्ताहारोऽपि विषयेषु स्त्रीप्रभृतिषु स्नेहेन रागेण रहितः आत्मानुभवमयः प्रकाशते ॥ द्वितीयेऽर्थे अपिशब्दासामञ्जस्यात् तृतीयपादे अपिशब्दाप्रयोगः ॥

மருத்பி: பீட்யமாநோऽபி ஸந்த்யக்தோऽபி திவாநிசம் |
விஷயஸ்நேஹரஹிதோ ரத்நதீப: ப்ரகாசதே || 7 ||

1. சாதாரண தீபம் போலன்று ரத்நதீபம். எவ்வளவு காற்று வீசினாலும், மனிதர் வேண்டா என்று விட்டாலும், தைலமும் அதற்குப் பாத்ரமும் வேண்டாமலே பகல் இரவு முழுமையும் ப்ரகாசிக்கும்.

2. தேவதைகள் என்ன விரோதம் செய்தாலும், யாரும் ஆஹாரம் இடாமல் விட்டாலும் யோகி என்ற தீபம் விஷயப்பற்று இராமல் எப்போதும் நன்கு விளங்கும்.

परैः क्रियमाणाः बाधाः न प्रह्लादतुल्यं समचित्तं स्पृशन्तीत्यत्र निदर्शनमाह—

जनयत्यनिले दावं शमयत्यपि तोयदे ।
अभिन्नैः स्थीयते पुण्यैराश्रमारण्यपादपैः ॥ ८ ॥

अरण्यपादपाः वनवृक्षाः द्विविधाः आश्रमीयाः बाह्याश्च । तत्र बाह्येषु **अनिले** वायौ **दावं** वनाग्निं जनयति सत्यपि, अथ तेष्वेव **तोयदे** मेघे दावं **शमयति** विनाशयति सत्यपि । बाह्यानां वृक्षाणां बाधातत्परिहारोभयवश्यत्वे सत्यपीति यावत् । आश्रमीयैः **पुण्यैः** महर्षिसांनिध्यलब्धपुण्यैः तत एव पुण्याद्धेतोः **अभिन्नैः** दावदह्यमानत्व-परिह्रियमाणदाहस्वरूपभेदरहिततयैव स्थीयते । हिरण्यकशिपुना यावद्बलं बाधितुमिष्टोऽपि प्रह्लादो भक्ताग्रेसरः, "सर्वभूतात्मके तात जगन्नाथे जगन्मये । परमात्मनि गोविन्दे मित्रामित्रकथा कुतः" इति परिशुद्धभावः न बाधालेशमप्यन्वभूत् । तथा महान्त इति ।

ஜநயத்யநிலே தாவம் சமயத்யபி தோயதே |
அபிந்நை: ஸ்தீயதே புண்யை ராச்ரமாரண்ய பாதபை: || 8 ||

1. காட்டுமரங்களில் ஆச்ரம மரங்கள் யாவை, அவை மஹர்ஷியின் சேர்க்கையால் புண்யம் பெற்றவை. காடு முழுமையும் காற்றினால் தீ மூண்டாலும், மழை பெய்து அதை அணைத்தாலும், எப்போதும் அவ் ஆச்ரம மரங்கள் யாதொரு தீங்குமின்றி வேறுபாடற்றிருக்கும். அது போல் ஸமசித்தர்களின் இருப்பு.

समचित्तत्वावस्था सार्वत्रिकी मा भूत्नाम । तदेकदेशः क्षमाऽपि महते फलायेत्याह—

अहार्येण कदाऽप्यन्यैरसंहार्येण केनचित् ।
तितिक्षाकवचेनैव सर्वं जयति संवृतः ॥ ९ ॥

अन्यैरपहर्तुमशक्येन, केनापि नाशयितुमशक्येन च—**तितिक्षा** क्षमा परकृतबाधानां परिहरणशक्तौ सत्यामपि प्रतिकरणं विना सहनम्—तद्रूपेण कवचेन यः **संवृतः** आच्छादितस्वरूपः, सः **सर्वं जयति**। सर्वानर्थहेतु-कोपादिकं जयति; सर्वं पुरुषार्थञ्च लभते। यस्तु लोहादिना कृतः कवचः स पुरुषगुणरूपत्वाभावात् स्वनिष्ठत्वात् अन्यैरपहर्तुं पार्यते, नाश्येत च। नाश्यापि तितिक्षा दृढाध्यवसाये सति नैव नाश्या। कवचधारिणः परजयार्थं बलादिकमपेक्षितम्। तितिक्षा तु निरपेक्षैव सर्वं साधयेत्। **केनचिदित्यत्र कैरपीति** पाठान्तरं संकल्पसूर्योदये(8.30)। **केनचिदित्यस्य** केनापि प्रकारेणेत्यर्थे, **अन्यैः, केनापीत्युभयोरुभयत्रान्वयसंभवात्** नान्यतरवैयर्थ्यम्। दुर्योधनादिकृते परिभवे धर्मपुत्रादीनां या तितिक्षा, सा स्वबुद्धिपूर्वद्यूतविहारमुखेन स्वापादितानर्थमूलकत्वात तात्कालिकी। तस्या अपि कार्यकरत्वे स्थिते सर्वदाकोपादिजयहेतोस्तितिक्षायाः सर्वजयहेतुत्वं कैमुत्यसिद्धम्॥

அஹார்யேண கதாऽப்யந்யைரஸம்ஹார்யேண கேநசித் |
திதிக்ஷாகவசேநைவ ஸர்வம் ஜயதி ஸம்வ்ருத: || 9 ||

1. என்றும் பிறரால் எந்த விதமாகவும் கொள்ளைகொள்ள வாகாததும், அழிக்கவாகாததுமான பொறுமை யென்ற சட்டையால் தன்னைப் போர்த்துக்கொண்டவன் எல்லாம் வெல்வான்.

ननु सर्वं सहमानस्याप्यशनाया न सह्या, असह्यतरा च पिपासेत्यत्र तत्परिहारेऽपि व्यवस्थायां दृष्टान्तमाह—

अमृतस्यन्दिनं कश्चित् कृष्णमेघं द्विजः स्मरन्।
उदन्यया न वेशन्तमुदन्वन्तञ्च वीक्षते॥ १०॥

कश्चित् विलक्षणः **द्विजः** पक्षी चातकः। **अमृतं** तोयम्। **तस्यन्दिनं** बिन्दुरूपेण तद्वर्षणशीलं **कृष्णं** नीरपूर्णत्वात् नीलं **मेघं** वारिदं **स्मरन्** मनसा चिन्तयन् तेनैव स्वोदन्याशमनं काङ्क्षन् **वेशन्तं** पल्वलमल्पजलं सकर्दमम्, **उदन्वन्तं** सरितां पतिञ्चामधुरं न वीक्षते। मेघस्य दूरस्थत्वेऽपि विलम्बेन फलप्रदत्वेऽपि सकृद्ग्रहणेन सर्वोदन्याशामकत्वाभावेऽपि तावतैव तृप्यन् चातकः संनिहितमपेक्षिताधिकस्य सकृदेव ग्रहणस्थानमूतं पल्वलं वा पारावारं वा न चक्षुर्गोचरीकरोति; मनसा तच्चिन्तनं तु नतराम्।

2. कश्चित 'याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा' इति विवेकवान् **द्विजः** भक्तिप्रपत्तिरूपोपायज्ञानरूपद्वितीयजन्मवान् **अमृतस्यन्दिनं** मोक्षरसानुभावकं **कृष्णं** श्रीकृष्णं विष्णुमेव स्वरूपरूपगुणविशेषैर्मेघतुल्यं **स्मरन्** उपायेन विषयीकुर्वन् विश्वासपूर्णः **वेशन्तम्** ऐहिकफलप्रदमनुष्यम् **उदन्वन्तं** भूरिदिव्यफलप्रदं देवतान्तरञ्च न वीक्षते। **उदन्यया न वीक्षते** इत्यस्य सत्यामपि फलान्तरकामनायां नान्यत्र तदपेक्षीत्यर्थे उदन्याऽस्तीत्यभ्युपेयम्। उदन्याप्रयुक्तवीक्षणं नास्ति; फलान्तरलिप्सारूपोदन्याऽपि नास्ति; संसारदाहशमनापेक्षत्वात सैका तृषा वर्तते; न तच्छमनमन्यतो भवतीति च तात्पर्यम्॥

3. उत्तङ्को नाम महर्षिः कृष्णं, स्वदेशे तीर्थं कल्पयेति प्रार्थयामास। अपेक्षासमये मां स्मर; तीर्थं भविष्यतीति स प्रत्यब्रवीत्। स कदाचिदस्मार्षीत। कृष्ण इन्द्रममृतं दातुं न्ययुङ्क्त। स

दातुमनिच्छन् चण्डालवेषेण चर्मदृतावमृतं निक्षिप्य श्वभिः परिवृत्याऽऽगत्य गृहाणेत्याह स्म । स न प्रतिजग्राह । इन्द्रो निववृते । उतङ्कः कृष्णं पुनरस्मरत् । तेन निर्मिता मेघाः तदातदा तोयमदुरिति कथा । खलपद्धतौ (6) केनेति श्लोके विस्तरेण व्याख्यातृभिरुक्तेयम् (196 पु) । तदनुसारेणैवमर्थः—कश्चित् द्विजः उतङ्कः कृष्णनियमितं मेघम् अमृतप्रायतीर्थस्यन्दिनं स्मरन् पिपासया, वम्–अमृतम् वेशं अमृतेशमिन्द्रं तं वञ्चकं न वीक्षते ; नापि वरुणस्य तीर्थदेवतात्वात् उदन्वन्तं वरुणमपि वीक्षते इति ।

அம்ருதஸ்யந்திநம் கச்சித் க்ருஷ்ணமேகம் த்விஜ: ஸ்மரந் |
உதந்யயா ந வேசந்தம் உதந்வந்தஞ்ச வீக்ஷதே ‖ 10 ‖

4. சாதகமென்ற ஒருவகைப் பட்சி நீர் பெருக்கும் இருண்ட மேகத்தையே நினைக்கின்றதாய் தாகம் தணிக்கக் குட்டையையும் கடலை யும் காணாது.

2. மோக்ஷம் அளிக்கும் கண்ணபிரானென்ற மேகத்தை நினைத்து வரும் ஞானி தன் தாகம் தணிக்க மனிசரையும் மற்று தேவதைகளையும் நாடமாட்டான்.

3. உதங்கர் என்னும் மஹர்ஷி தமக்கு க்ருஷ்ணன் அனுப்பிய மேகம் அமுதம் போன்ற தீர்த்தம் அளிப்பதால் அதையே நினைப்பர் அல்லது தம்மை வஞ்சித்த அம்ருதத்திற்கு அதிபதியான இந்த்ரனையோ, தீர்த்த தேவதையான வருணனையோ நினையார். இந்த வரலாற்றை விரிவாக கலபத்ததியில் 6வது ச்லோகத்தின் உரையில் (202. ப.) காண்க.

सुजना इव दुर्जना अपि समचित्तस्योपकारिणः, तदभावे समचित्तत्वरूप महागुणसिद्ध्यभावादित्येतत् निदर्शनेनाह—

विदधातु धाम तमसा कृतेन किं यदि वा न वेत्ति न विधिर्न वा वयम् ।
प्रथमोपकारि चरमं यतस्ततः प्रतियोगिनो भवति तस्य सार्थता ॥ ११ ॥

विधिः स्रष्टा **धाम** सूर्यादिकं तेजः । तदालोकमिति यावत् । **विदधातु** सृजतु ; तेन वस्तुज्ञापनपचनादिबहुकार्योपलम्भात् । **कृतेन** विधिसृष्टेन **तमसा** अन्धकारेण **किम्** ? तस्य वाऽस्माकं वा किं फलं भवति । न किञ्चित् । **यदिवेत्यस्य** यद्वेत्यर्थः । **न वेत्ति न विधिः**–स्रष्टा अज्ञ इति न । तस्याभिज्ञत्वात् स्यादेव फलमिति तर्कणीयमिति भावः । विमृश्य ज्ञात्वाऽऽह **न वा वयमिति** । तदुद्दिष्टं प्रयोजनं वयं न विद्म इति वा न । विद्म एवेत्यर्थः । किं तदित्यत्राह **प्रथमेति** । **चरमं** पश्चादुक्तं तमः **प्रथमस्य** पूर्वोक्तस्य धाम्नः **यतः** यस्मात् कारणात् **उपकारि** उपकारकं भवति । आलोककार्यस्य आलोकस्य च कार्यकारणभावो ह्यन्वयव्यतिरेकाभ्यामवसातव्यः । तत्र व्यतिरेकांशोपपादनोपयोगि तमः । **ततः** तस्मात् कारणात् **प्रतियोगिनः** आलोकविरुद्धस्य आलोकासमानाधिकरणस्य तमसः **सार्थता** साफल्यम् । तमो निष्फलोत्पत्तिकम् फलानुपलम्भादित्याक्षेपे, तमः सफलम् आलोकोपकारहेतुत्वादित्यनुमानमुच्यते । अत्र प्रथमोपकारीति वाक्यं तमः आलोकोपकारि तथोपलम्भादिति हेतूपपादकम् ; चतुर्थपादेन निष्फलत्व-

शंकानिरासः । आलोकाभावमात्रं तम इति तार्किकपक्षः । तमो नीलं चलं द्रव्यमिति वेदान्तिनः । तमःकार्यञ्च वस्त्वावारकत्वम् । अतः तमसः अनर्थकरत्वमेव, न त्वर्थकरत्वमिति शंकायाम , तमोविरहे आलोकशक्त्यज्ञानात् तच्छक्तिप्रदर्शकत्वं तमसो महत् फलमिति समाधिः । एवं तेजोमहिमा तमोधीन इत्युक्तम् ।

2. **धाम** अभिज्ञो जनः । तत्सृष्टिर्भवतु । **तमसः** अज्ञस्य वस्तुगुणतिरोधायकस्य दूषकस्य सृष्टिः कुतः इति चेत्-विधिर्विदित्वैव ससर्जेत्युच्यते । विद्वदुपकारकत्वात् मूढस्य । मूढसद्भावादेव ततोऽतिशयो विदुषो ज्ञायते । अतस्तदतिशयावहत्वादेवास्य साफल्यम् । किञ्च अभिज्ञदूषकैः तदीयपापापहरणात् तस्य शुद्धिरेव । 'अस्ति चेत् तुल्यपापः स्यात् नास्ति चेत् द्विगुणीभवेत्', 'शप्यमानस्य यत् पापं शपन्तमधिगच्छति' इत्येवमुक्तेः । ततस्तत्पापापहारित्वमपि फलम् । अतोऽपि सार्थता । "साधुपापविशुद्ध्यर्थं दुर्जनः परिकल्पितः । ग्रामवीथीविशुद्ध्यर्थं सूकरः परिकल्पितः", "हस्त इव भूतिमलिनो यथायथा लंघयति खलः सुजनम् । दर्पणमिव तं कुरुते तथातथा निर्मलच्छायम्" इत्यादिकं भाव्यम् ॥

3. **धाम**शब्दः, 'तद्धाम परमं मम' इत्यादाविव स्वयम्प्रकाशात्मपरः । तथा ज्ञानानन्दस्वरूपपरमपदपरश्च । **तमश्**शब्दः 'तमः परे देव एकीभवति' इत्याद्युक्तमूलप्रकृतिपरः । **विधिः** भगवान् स्वयंप्रकाशं ज्ञानानन्दस्वरूपमात्मादिकम् इदं स्यादिति संकल्पयतु । तमः—प्रकृतिः किमर्थं तेनेष्यते इति चेन्न—अचेतनस्य तमसः परार्थतया स्वप्रयोजनं किमपि नास्ति । न च चेतनानिष्टकरत्वमेव तस्येति सुवचम्, "पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य" इति पुरुषभोगमोक्षोभयहेतुत्वात् बहुप्रकारेण बन्धकपुण्यपापनिवर्तकत्वस्य तत्र भावात् । मोक्षे अनुकूलतया आनन्दावहत्वाच्चेति ।

விததாது தாம தமஸா க்ருதே ந கிம்
யதி வா ந வேத்தி ந விதிர் ந வா வயம் |
ப்ரதமோபகாரி சரமம் யதஸ்தத:
ப்ரதியோகினோ பவதி தஸ்ய ஸார்த்ததா || 11 ||

1. தெய்வம் வெளிச்சத்தைப் படைக்கட்டும். இருளின் படைப்பு எதற்கு? அல்லது தெய்வம் அறியாமலிராது. நாமும் அறியாமலில்லை. பலன் உளதே. இருள் வெளிச்சத்திற்கு உபகாரம் செய்வதால் அதன் பிறப்புக்குப் பயன் உண்டே. (என்ன உபகாரமென்னில்) ஒளியினால் தான் இன்னின்ன கார்யம் ஆகிறதென்பதை இருளில் அக் கார்யம் ஆகாததைக் கொண்டுதானே தெளிய வேண்டும்.

2. நல்லோரைப் படைப்பதற்குப் பலன் உண்டு. மற்றவரை எதற்குப் படைக்க வேண்டுமென்னில், நல்லோரின் பெருமை அவர்களால் தான் வெளியாகின்றது. இவரைக் கொண்டு அவர்களின் வாசியை யறிவதாம். மேலும் நல்லோரை நிந்திப்பதால் அவர்களின் பாபத்தை இவர்கள் பெற்று அவர்களைத் தூயராக்குகின்றனர். எனவே நல்லோருக்கு இவர்களால் நல்ல உபகாரமாம்.

3. தாம என்ற சொல்லுக்கு ஸ்வயம்ப்ரகாசமான வஸ்து என்ற பொருளாம். அது ஜீவாத்மாவும் பரமபதமும். அவ்விரண்டையும் ஈச்வரன்

இசைந்தது தகும். தமஸ் எதற்காக? தமஸ்ஸாவது மூல ப்ரக்ருதி; உலகுக்குக் காரணமான அசேதந வஸ்து. அதனால் ஜீவனுக்கும் பல தொல்லைகள் அல்லவோ என்னில், தெய்வத்திற்கு எல்லாம் தெரியும். மூல ப்ரக்ருதியின் மூலமான உலகால்தான் தம் கர்மபலன்களை யனுபவித்துத் தீர்த்து ஜீவர்கள் மோக்ஷம் பெறவாகிறார்கள். அது இவ்வுலகில் பலவித போகங்களுக்கும் மோக்ஷத்திற்கும் காரணமாகின்றது. உடல் கருவி ஒன்றுமில்லையாகில் ஜீவன் என்ன செய்ய வல்லான். மேலும் மோக்ஷத்தில் இந்த மூல ப்ரக்ருதியும் மிகவும் அனுகூலமாய்த் தோன்றுவதே. ஆகையால் அதனிடம் தோஷமொன்றுமில்லை.

समचित्तसार्वभौमः श्रियः पतिरित्याह—

विभवेष्वपि दोषगन्धहीनः प्रलयेऽपि स्थितिमक्षयां दधानः ।
विषमेष्वपि भावयन् समत्वं पुरुषः कोपि हृदि स्थितः प्रजानाम् ॥ १२ ॥

1. सर्वेश्वरः **विभवेष्वपि** स्वयमेव मत्स्यकूर्ममनुष्यादिलोकदृष्टहेयजातीयविग्रहपरिग्रहेष्वपि **दोषगन्धहीनः** दुःखलेशेनापि रहितः, अजहत्स्वस्वभावत्वात् सर्वेषां वस्तूनां प्रलये जातेऽपि स्वयं न नश्यति । **अक्षयाम्** ज्ञानविकासमहानन्दानुभवह्रासहीनामेव स्थितिं वहन् अस्ति । **विषमेषु** सत्त्वादिगुण—ज्ञानाद्यात्मगुणतारतम्यवत्स्वपि चेतनाचेतनेषु **समत्वं** स्वशेषत्व—स्वानुकूलत्वादिना साम्यमेव गृह्णाति । तथा स्वविषये द्वेषं वहत्स्वपि समत्वं स्वमूलमेव स्वरूपस्थितिप्रवृत्तिमत्त्वं भावयति । औपाधिकमेषां विषमत्वम्, न तु स्वाभाविकमित्यपि मन्यते । ईदृशः पुरुषसूक्तप्रतिपाद्यः **कोऽपि** अद्वितीयः, **मा** लक्ष्मीः तद्विशिष्टः सद्वितीय एव, सर्वासां प्रजानां समत्वसंपादनात् उच्चनीचादिवैषम्यमभावयन् "नास्य जरया एतज्जीर्यति, न वधेनास्य हन्यते" इति शरीरनाशेऽप्यनश्यन् प्रजाभिरुपेक्षितोऽपि प्रजानुग्रहाय हृदि स्थिरमास्ते ॥

2. समचित्तलौकिकपुरुषपरोऽपि—**विभवेष्वपि** ऐश्वर्याधिक्येऽपि न मदमत्तो भवति, न परान् वञ्चयति, न भगवदैकान्त्यं त्यजति । यदृच्छया लब्धानां विभवानां लयेऽपि निर्विकारचित्तो भवति । स्वस्य तद्विभवलयहेतवो ये, ये चान्ये स्वस्यापकारिणः तेषु सर्वेष्वपि उपकारिष्विव मनोभावमेकरूपमेव वहति । ईदृशः पुरुषः प्रजाभिः स्वक्षेमाय सततं चित्तेन धार्यः । प्रातः स्मरणीयमेतादृशस्य नाम ।

इति समचित्तपद्धतिः

விபவேஷ்வபி தோஷகந்த்தஹீந:
ப்ரளயேऽபி ஸ்த்திதிமக்ஷயாம் ததாந: |
விஷமேஷ்வபி பாவயந் ஸமத்வம்
புருஷ: கோऽபி ஹ்ருதி ஸ்த்தித: ப்ரஜாநாம் || 12 ||

1. எம்பெருமான் இவ்வுலகிற் ப்ராணிகளைப் போன்ற பிறவிகள் கொண்டாலும் சிறிதும் குறைவற்றவன் தோஷம் சிறிதுமில்லாதவன்.

எல்லாம் அழிந்தபோதிலும் தன் ஆனந்த நிலைக்குக் குறைவில்லாதவன், நல் ஒழுக்கம் இல்லாதவர்களிடத்திலும் ஸமத்வபுத்தி கொண்டவன். ஒப்பற்றவன். அதனால் ஸமமாக எல்லோருடைய உள்ளத்திலும் வாஸம் செய்கின்றான்.

2. ஸமசித்தராய் எத்தனை ஐச்வர்யங்கள் குவிந்தாலும் கர்வம் பாபம் போன்ற தோஷம் சிறிதுமில்லாதவர், எல்லாம் அழிந்தாலும் முன்போலவே இயற்கையான நிலையில் இருப்பவர், விஷமமாக நடந்து கொள்ளுகிறவரிடத்திலும் சினேகிதரிடத்திற்போல் ஸமமாக நடந்து கொள்ளுகிறவர் கிடைப்பது அரிது. அவரை எல்லோரும் எப்போதும் மனத்தில் நினைத்தேயிருப்பது நன்று.

ஸமசித்தபத்ததி முற்றும்.

अथ सदाश्रितपद्धतिः अष्टमी (८)

स्वयं समचित्तत्वादिरहितोऽपि सत्पुरुषाश्रयणे सति सर्वं श्रेयो लभत इति तद्वर्णनमारभते—

सुवृत्तस्यावदातस्य कलापूर्णस्य सत्पतेः ।
क्षणलेशग्रहेऽपि स्यात् अतीर्थस्यापि तीर्थता ॥ १ ॥

1. **सुवृत्तस्य** शोभनचारित्रयुक्तस्य **अवदातस्य** शुद्धस्य निर्मलहृदयस्य **कलापूर्णस्य** विद्यापारदृश्वनः **सतां** सत्पुरुषाणां ब्रह्मज्ञानिनां पत्युः श्रेष्ठस्य कस्य चित् पुरुषस्य **क्षणलेशग्रहेऽपि** क्षणसंबन्धस्वल्पकालमात्रे ग्रहणे-आश्रयणेऽपि क्षणार्धसत्संगमेऽपि **तीर्थता** आचार्यता पवित्रता **स्यात्**—भवति । कस्य? **अतीर्थस्यापि** अशुद्धस्यापि अत्यन्तपापिनोऽपि । (2.) क्षणलेशावसरे **ग्रहेऽपि** । ग्रहणं दर्शनम् ; तस्मिन्नपीत्यर्थो वा । दर्शनं सत्पुरुषकर्तृकं वा सत्पुरुषकर्मकं वा । 'यस्यानुभवपर्यन्ता बुद्धिस्तत्त्वे प्रतिष्ठिता । तद्दृष्टिगोचराः सर्वे मुच्यन्ते सर्वकिल्बिषैः", "न ह्यम्मयानि तीर्थानि न देवाः मृच्छिलामयाः । ते पुनन्त्युरुकालेन दर्शनादेव साधवः" इति च स्मरणात् । (3.) **क्षणलेशग्रहेऽपि** सकृत् स्नानपानाद्यर्थं स्वीकारेऽपि सत्पुरुषकृते, **अतीर्थस्य** क्षुद्रजलस्यापि तटाकादेः **तीर्थता** गंगादितीर्थतुल्यता भवतीत्यर्थश्च ।

2. **सुवृत्तस्य** । वृत्तं वर्तुलम् । पूर्णत्वात् मण्डलाकारस्य **अवदातस्य** शुक्लस्य **कलापूर्णस्य** षोडशकलस्य **सत्पतेः** नक्षत्रेशस्य चन्द्रस्य क्षणलेशकालं ग्रहे राहुकेतुग्रासेऽपि **अतीर्थस्य** अत्यन्ताशुद्धस्यापि जलस्य **तीर्थता** परिशुद्धता स्नानाद्यर्हता भवति । यदुच्यते, "सर्वं हेममयं दानं सर्वे ब्रह्मसमाः द्विजाः । सर्वं गंगासमं तोयं राहुग्रस्ते निशाकरे" इति । दुष्टस्य पीडनार्थं सत्संबन्धोऽपि क्रमेण क्षेमाय । अत एवोच्यते, "सद्भिर्विवादं मैत्रीञ्च नासद्भिः किञ्चिदाचरेत्" इति । बद्धवैराणि हि भूतानि मनीषिणां शोच्यानि भवन्ति । ततस्तेषां क्रमेणोन्नतिः । राहोरपि मान्यता, बहुतीर्थहेतुत्वात् ।

3. स्नानीयस्य सर्वशुद्धयापादकत्वलम्भनाय सुदर्शनचक्रप्रतिष्ठां कुर्वन्ति । उत्सवावभृथे सुदर्शनं स्नपयन्ति च । तद्विवक्षाऽपि स्यात् । सुवृत्तत्वादिगुणविशिष्टसुदर्शनसंबन्धात् जलस्य सर्वस्य तीर्थतेति ॥

ஸதாச்ரிதபத்ததி 8.

ஸுவ்ருத்தஸ்யாவதாதஸ்ய கலாபூர்ணஸ்ய ஸத்பதே: |
க்ஷணலேசக்ரஹேऽபி ஸ்யாத் அதீர்த்தஸ்யாபி தீர்த்ததா || 1 ||

1. நல்லொழுக்கமும், மனச்சுத்தியும், கல்வியின் நிறைவும் பெற்று நல்லோருக்கு நாதனையிருப்பவனை ஒரு நொடி அணுகுவதும் தர்சனமும், பாபியையும் புனிதனாக்கும். पशुर्मनुष्यः पक्षी वा ये च वैष्णवसंश्रयाः। तेनैव ते प्रयास्यन्ति तद्विष्णोः परमं पदम्।

2. நன்கு வட்டமாகவும் வெண்மையாகவும் கலைகள் நிறைந்தும் இருக்கும் நக்ஷத்ரங்களுக்கு நாதனான சந்திரனுக்கு ஒரு நொடி க்ரஹணம் ஏற்பட்டால் அது சிறந்த புண்ய காலமாய் அப்போது ஆபாஸமான ஜலமும் கங்கை போன்றதாகும்.

தீர்த்தம் பாபங்களைப் போக்க வல்லதாகைக்காக ஸுதர்சன சக்ர ப்ரதிஷ்டை ஸுதர்சநதீர்த்தவாரி செய்வதுண்டு. ஆகையால் வட்டமான சக்கரத்தின் சேர்க்கையால் எதுவும் தீர்த்தமாகும் எனவும் பொருளாம்.

प्रस्तुतं चन्द्रं मुखान्तरेण गृहीत्वा वर्णयन् सदाश्रयणमात्रस्य पर्याप्तत्वेऽपि ऐहिकसम्बन्धकृत्वाय ज्ञानसंपादनमावश्यकम्। तदेव सदाश्रयणमुख्यफलमिति दर्शयति—

प्रतिपत्प्राप्तितः प्रागप्यापदा सत्पदाश्रितः ।
राजा तदितरो वाऽपि नोपरागेण पीड्यते ॥ २ ॥

1. **प्रतिपदः** ज्ञानस्य। "प्रतिपद्ज्ञप्तिचेतनाः" इत्यमरः। **प्राप्तितः प्राक्** लाभात् पूर्वम् **आपदाऽपि** आपदुपलक्षितोऽपि। इत्थम्भूते तृतीया। **सत्पदाश्रितः** सत्पुरुषपदारविन्दसेवी **राजा** धनमदमत्तो वा, **तदितरो वा उपरागेण** अनुवर्तमानेन रागादिना दोषेण न पीड्यते। विषयसौन्दर्या-दिना रागप्रसक्तावपि विवेकेन विद्यालब्धेन तन्निवर्तनात् न बाध्यते। **आपदा**–आपद्वशेन तत्परि-हाराय सत्पदाश्रित इति वा।

2. **उपरागः** राहुग्रहः। सः अमायां सूर्यस्य, पूर्णिमायां चन्द्रस्य च भवति। प्रथमायां प्राप्तायां तु स न तिष्ठति। तदत्रोच्यते। **सतां** नक्षत्राणां **पदं** स्थानम् आकाशः। तदाश्रितः **राजा** चन्द्रः **तदितरः** सूर्यो वा **प्रतिपदः** प्रथमायाः प्राप्तेः प्राक् **आपदा** उपरागेण युक्तोऽपि **प्रतिपत्प्राप्ति** एव कारणात् **उपरागेण** राहुग्रासेन न पीड्यते॥

3. **राजा** देशाधिपतिः **तदितरो वाऽपि** तदन्यो वा **सत्पदाश्रितः** उत्कृष्टं स्थानं प्राप्तः **प्राक्** प्रथमम् **आपदाऽपि** विद्वेषिकृतापद्युक्तो भवन्नपि **प्रतिपत्प्राप्तितः** अयमर्ह इति विश्वासप्राप्ति-रूपहेतुना **उपरागेण** बाधानुवर्तनेन न पीड्यते। प्रथमं क्षोभप्रसक्तावपि योग्यतासमधिगमात् पश्चान्न कश्चिदुपद्रव इति।

4. **प्राक्** प्रथमं **प्रतिपत्प्राप्तितः** विश्वासप्रापणाद्धेतोः सत्पदाश्रितः राजादिः **आपदाऽपि** पश्चात् तत्क्रियमाणापदं हेतूकृत्य **नोपरागेण पीड्यते** न हिंस्यते ; प्रायः प्राथमिकविश्वासस्यानुवृत्तेः ।

पीड्यत इत्यत्र गृह्यत इति पाठेऽपि स एव भावः । द्वितीयपादे पाठान्तरम् **अपातार्हपदाश्रित** इति । पदस्य पातार्हत्वे ये केचित् पातनाय प्रवर्तेरन् । अतादृशत्वे न केनापि किमपि क्रियेतेति ।

5. **अपातार्हं** राहुपातानर्हं राहुसंगमानर्हं **सत्पदम्** आकाशभागः कश्चित् । तदाश्रितः चन्द्रः सूर्यो वा राह्वादिना न पीड्यते **प्रतिपत्प्राप्तितः प्रागपि**-पूर्णिमादावपि ।

6. इष्टिपशुसोमयागाः विकृतिभूताः, "य इष्ट्या पशुना सोमेन वा यजेत, सोऽमावस्यायां पौर्णमास्यां वा यजेत" इति वचनात् पर्वणि क्रियन्ते । तदा **राजा** सोमो राजेत्युच्यमाना सोमलता, **तदितरः** आज्यपश्वौषधरूपद्रव्यं वा **सत्पदाश्रितः** ब्रह्मज्ञानिसत्पुरुषगृहस्थितः **आपदाऽपि**-पीडारूपापद्विशिष्टोऽपि । उपलक्षणतृतीया । **उपरागेण** कामातिशयेन **न पीड्यते**—सोमो नाभिषूयते व्रीह्यादि नावहन्यते । सन्तः स्वगतं सोमादि यागद्रव्यं पूर्णिमायां पीडयन्तोऽपि न फलकामनाबलेन पीडयन्ति । निष्कामत्वात् ।

ப்ரதிபத் ப்ராப்தித: ப்ராகப்யாபதா ஸத்பதாச்ரித: |
ராஜா ததிதரோ வாऽபி நோபராகேண பீட்யதே ‖ 2 ‖

1. அரசனோ மற்றும் சாதாரண மனிதனோ அறிவு பெறுதற்கு முன் ஆபத்துக்கு ஆளானலும் நல்லோரின் தாள் சேர்ந்து அறிவு பெற்ருல் விஷயப் பற்று முதலானவற்ருல் வதைக்கப்பட மாட்டான்.

2. சந்த்ரனோ சூர்யனோ நக்ஷத்ர ஸ்த்தானமான வானத்திலிருப்ப வன் ப்ரதமை என்ற திதிக்கு முன் திதியில் க்ரஹண பீடைக்கு ஆளானலும் ப்ரதமை வந்தவுடனே விடப்படுகிருன்.

3. அரசனோ வேறு மதிக்கத் தக்க மனிதனோ நல்ல பதவியைப் பெற்றவன் முதலில் பகைவரால் சில வாதைகளைப் பெற்ருலும், இவன் தகுதியுற்றவனென்ற நம்பிக்கையைப் பிறர் பெற்ருல் பிறகு வாதை யற்றிருப்பான்.

4. மேற் பதவியைப் பெற்றவன் முதலில் நம்பிக்கை வரும்படி நடந்து கொண்டால் அதனுல் ப்ரஜைகளின் அன்புக்கு இடமாய் விட்ட படியால் பிறகு செய்யும் தீங்கு காரணமாகவும் வதைக்கப்பட மாட்டான். பழைய அபிமானமே காரணம்.

"ஆபதா ஸத்பதாச்ரித:" என்றவிடத்தில் 'அபாதார்ஹ பதாச்ரித:' என்ற பாடமுமாம். விழத்தகாத ஸ்த்தானத்திலிருப்பவனுன சிறந்த வாசார்யனின் திருவடியடைந்தவன் என்ற பொருளாம்.

5. ராகு அருகில் வரவாகாத வான ப்ரதேசத்திலிருக்கும் சந்திர ஞே சூரியனோ ப்ரதமைக்கு முன்னுன பூர்ணிமை அமாவாஸ்யை என்ற திதியிலும் ராகுவினுல் பிடிக்கப் படுகிறதில்லை என்னலுமாம்.

6. தான்யங்களால் செய்யும் இஷ்டிகளும் ப்ராணிகளைக் கொண்டு செய்யும் பசுயாகங்களும் ஸோம யாகங்களும் அமாவாஸ்யை, பூர்ணிமை என்ற திதிகளில் செய்யப்படும். அப்போது அவற்றிற்கான த்ரவயம் சோமக் கொடி நெல் முதலானவை நசுக்கப்படும். ஆனாலும் பரமைகாந்திகளிடமுள்ள அந்த த்ரவ்யங்கள் ஒரு பலனை விரும்பி அதற்காக நசுக்கப்படா.

रागादिर्न भवतीत्युक्तम्, तन्मूलभूतः अहंकारोऽपि निवर्तते विवेकात् महाजनसेवाधीनादित्याह–

विषमो गुणभेदेन विकारान् जनयन् क्रमात् ।
समये महता योगादहङ्कारः प्रलीयते ॥ ३ ॥

1. लोके पुरुषाणाम् **अहंकारः** देहात्मभ्रमः, इतरापेक्षया स्वस्याभिरूप्यादिभ्रममूलो गर्वश्च **गुणभेदेन** अन्यापेक्षया स्वगताभिरूप्यादिविशेषचिन्तया **विषमः** प्रतिकूलस्सन् **विकारान्** परपरिभव-क्षुद्रफलार्थपापकर्मादीन् **क्रमात्** उत्तरोत्तरं **जनयन्** उत्पादयन्नपि, **समये** यदृच्छासुकृतादिपरिपाक-समये **महता** पुरुषेण **योगात्**, तदाश्रयणात् तदनुमहहेतुसंसर्गवशाद्वा **प्रलीयते** नश्यति । तत्वज्ञान-मुदेति, स पापान्निवर्तते । यथा क्षत्रबन्ध्वादिः । **गुणभेदेन विषम** इत्यस्य सत्त्वरजस्तमोगुणभेदेन साम-ग्रीभेदं प्राप्त इत्यप्यर्थः । देहात्मभ्रमवतः पुंसः सुखाभासे उत्कृष्टसुखभ्रान्तिः सत्त्वसंसर्गकृता, 'सत्त्वं सुखे सञ्जयति' इत्युक्तेः । एवं कर्माभासे सत्कर्मत्वभ्रान्तौ रजसः सहकारिता । आलस्यादौ उत्कर्षभ्रमः तमस्सह-कृतेरिति द्रष्टव्यम् ।

2. अहङ्कारो नाम किञ्चिदचित्तत्त्वम् । प्रकृतितो महान् महतोऽहंकार इति तदुत्पत्ति-क्रमः । सोऽहंकारः त्रिविधः सात्त्विकराजसतामसभेदात् । तत्र सात्विकात् सर्वाणीन्द्रियाणि जायन्ते । तान्येकादश । तामसाहंकारात् पञ्च भूतानि । इमानि षोडश, "षोडशकश्च विकारः" इत्युक्त्या **विकार-**शब्दवाच्यानि । लोके स्थिताः विकाराः सर्वे एतत्षोडशाधीनाः । एवं सृष्टौ जगत्स्थैर्ये स्थिते **समये** महा-प्रलयप्राप्तौ अहङ्कारतत्त्वं भूतानामिन्द्रियाणाञ्च स्वस्मिन् प्रलये जाते स्वयं **महता** महत्तत्त्वेन योगात् लयं प्राप्नोतीत्यर्थः । 'भूतादिर्महति लीयते महान् अव्यक्ते लीयते' इत्यादिवचनात् ।

3. महतो योगात् विषमो विकारजनकश्चाहंकारः प्रलीयत इत्युक्त्या अन्योऽहंकारोऽस्तीति व्यज्यते । कोऽसौ इति चेत्—वास्तवे ज्ञानानन्दरूपे आत्मनि अहम्बुद्धिः । देहादौ गुणभेदवत् शुद्धात्मव्यक्तिषु ज्ञानानन्दत्वभगवच्छेषत्वादिना साम्यस्यैव 'पण्डिताः समदर्शिनः' इत्यादिसिद्धतया तत्र वैषम्यं नास्ति । तज्ज्ञाने शान्तेरभिवृद्धया विकारजनकत्वमपि नास्ति । सोऽहङ्कारो महद्योगात् वर्धते । तदुक्तं भूमविद्यायाम् । नारदो हि सनत्कुमारात् अहमर्थं जीवात्मानं विदन्, तदुपासकः स्वोपास्यं वस्तु अतिशयितमिति वदितुमर्हतीति तेन प्रशंसायां कृतायाम्, तावतैवोत्मोपदेशः समाप्त इति तूष्णीमास । तदा कारुणिकः सनत्कुमारः, नैतावता अतिवादी भवितुमर्हति, किं तु सत्ये विदित एवेति प्रतिबोध-

यामास। अथ तस्मिन् नारदेन बुभुत्सिते तत्र सत्यं भूमसुखम् महत् सुखम् स एवात्मा प्रागुक्तसर्वहेतुः, तद्विषयकग्रहणमेव यथावदहङ्कार इत्यादिकमुपादिक्षत्। तेनाहङ्कारे—अहमिति प्रतीतौ महता योगः महद्विषयकत्वमावश्यकमिति प्रतीयते। तथा चाहमित्यस्य स्वान्तर्यामिपरमात्मपर्यन्तार्थकत्वात् तावद्ग्रहणमेव यथावदहङ्ग्रहणम्। अत एव अहं ब्रह्मास्मीति यथावस्थितध्यानादीति तदा अन्याहंकारलयः।

விஷமோ குணபேதேந விகாராந் ஜநயந் க்ரமாத் |
ஸமயே மஹதா யோகாத் அஹங்கார: ப்ரலீயதே || 3 ||

1. தேஹாத்ம ப்ரமமென்றும் கர்வமென்றும் பிரிவான அஹங்காரம் தேஹத்திலுள்ள அழகு முதலிய குணங்களின் வாசியால் பலவிதமாகி, பிறரைப் பழிப்பது பாபங்களைச் செய்வதென்ற கேடுகளை விளைவித்துக் கொண்டிருப்பது, புண்யம் பலிக்கும் தருணத்திலே புருஷனுக்குப் பெரியோருடன் சேர்க்கை நேர்ந்தால் உடனே ஒழிகிறது; தத்துவ ஜ்ஞானம் உண்டாகின்றதாதலின்.

2. ப்ரக்ருதி, மஹத், அஹங்காரமென்ற அடைவிலே தத்துவ ஸ்ருஷ்டியாம். அஹங்காரம் ஸாத்விகம், ராஜஸம் தாமஸமென மூன்றாகும். ஸாத்விகத்தினின்று பதினோர் இந்த்ரியங்களும், தாமஸத்தினின்று பஞ்ச பூதங்களும் உண்டாகின்றன, ராஜஸம் அவற்றிற்குத் துணை. பிறகு ப்ரளயம் வரும் போது தலைகீழாக க்ரமம் மாறுகிறது. இந்திரியங்களும் பூதங்களும் முன்னே அஹங்காரத்தில் லயிக்கின்றன. அஹங்காரம் பூதங்கள் இந்த்ரியங்களென்ற விகாரங்களை உண்டு பண்ணியது அவைகள் தன்னிடம் லயித்த பிறகு தான் மஹத் என்ற தத்துவத்திற் சேர்வதால் அதிலே லயிக்கின்றது, ப்ரக்ருதி மட்டும் நிற்கும் படியாக என்றதாம்.

3 அஹங்காரமாவது அஹம்—நான் என்கிற எண்ணம். இது தேஹத்தை நான் என்றால் தவறாகும். வேறான ஜீவனைக்கொண்டால் உண்மையாகும். மஹத்தான பரமாவாத்மாவையும் அந்தர்யாமியாக்கி அஹம் என்றால் அதே சிறந்தது. அப்போது மற்ற அஹங்காரம் தொலையும்.

सतां पीडनाय प्रवृत्तस्य कदाचित् कार्यविघातः स्वक्षेमाय भवति। अतस्तादृशं सदाश्रयणमपि श्लाघ्यमित्याह—

स्वदृष्टिप्रतिघातोऽपि स्वच्छे क्वचन शोभनः।
तत्र ह्यभिमुखः स्वात्मा झटित्येव प्रकाशते ॥ ४ ॥

1. अत्र **प्रतिघाते** इति सप्तम्यन्तग्रहणेन व्याख्यानमनन्वितं कृतम्। **प्रतिघातः** इति स्वीकुर्वताऽपि न यथावद्व्याख्यातम्। अयमर्थः—**स्वच्छे** निष्कलङ्के अनुग्रहपरे **क्वचन** महापुरुषे यः **स्वदृष्टिप्रतिघातः** स्वविमर्शप्रतिबन्धः स्वोद्दिष्टकार्यापूर्तिः, सः **शोभनः** क्षेमङ्करो भवति। **तत्र हि** तस्यामवस्थायां हि स्वात्मा तद्विरोधार्थं प्रवृत्तस्यात्मस्वरूपम् **अभिमुखः** तद्विरोधं विसृज्याऽऽभिमुख्यं

प्राप्तः **झटिति** तत्क्षण एव **प्रकाशते** यथावस्थितस्वरूपज्ञानवान् भवति। अत्रोदाहरणं श्रीपरकालदिव्यसूरिः। स हि तत्र तत्र द्रव्यापहारेण भागवतसमाराधनव्यापृतः कदाचित् एतदनुग्रहाय भगवन्तं परिणीतया श्रिया सह समायान्तं मार्गे समालक्ष्य तदीयं भूषणादिकमपहरन् अङ्गुलीयकमेकमपहर्तुमपारयन् अहो मन्त्रबलमस्येति व्याहृत्य दंशनेनाऽऽकष्टुं प्रवृत्तः तद्दिव्यमङ्गलविग्रहरसास्वादप्रतिपन्नशुद्धिर्विरोधं विसृज्य प्रपन्नः श्रीमदष्टाक्षरमहामन्त्रं प्रतिलभ्य दिव्यसूरिरासीदिति इतिवृत्तविदः। अतः तदुद्दिष्टकार्यविघातस्य तं प्रति शोभनत्वमिति। तथा श्रीकृष्णचक्रस्पर्शमात्रेण शिशुपालस्योद्दिष्टकार्यप्रतिघातः शुद्धस्वस्वरूपविवेकेन तत्पदप्रप्रवेशायाऽऽसीदिति भाव्यम्।

2. एवं महद्विरोधिनां तत्र तत्र तदाश्रयणमपि द्रष्टव्यम्। तथा च मतान्तरस्थस्य वादे प्रवृत्तस्य **स्वदृष्टिप्रतिघातः** स्वाहतस्य दर्शनस्य सिद्धान्तस्य प्रतिघातः स्वच्छपुरुषकृतः तस्य शोभनो भवति। तं स्वच्छमेवाश्रित्य तद्दर्शनस्वीकारेण स्वात्मोज्जीवनस्य तेन क्रियमाणत्वात् तदात्मा स्वस्वरूपेण प्रकाशत इति।

3. प्रतिबिम्बपरत्वमपि। **स्वच्छे** निर्मले **क्वचन** दर्पणे द्रष्टुः **स्वदृष्टिप्रतिघातः** तन्नेत्ररश्मिप्रतिहतिः न भित्त्यादाविव निष्फलः, किंतु **शोभनः** क्षेमहेतुः। तदा हि तत्र दर्पणे **अभिमुखः** तदाभिमुख्येन स्थितः **स्वात्मा** स्वदेहः **अभिमुखः** विस्पष्टं मुखेन सह प्रकाशते। दर्पणं विना द्रष्टुमशक्याः स्वमुखादयः दर्पणकृतेन चाक्षुषरश्मिप्रतिघातेन परावृत्तचाक्षुषरश्मिसंबन्धं प्राप्य स्पष्टदृश्या भवन्तीति॥ **क्वचन शोभन** इत्यत्र **क च ने**ति वर्णत्रयं पदत्रयमपि भवेत्। स्वच्छे क वा शोभनो न भवति। सर्वत्र शोभन एवेति।

स्वदृष्टिप्रतिघातेऽपीति पाठे स्वदृष्टेः प्रतिघाते सत्यपि स्वयं पुरुषः **शोभनः** प्राप्तमंगल एव भवतीति व्याख्येयम्।

ஸ்வத்ருஷ்டி ப்ரதிகாதோபி ஸ்வச்சே க்வசந சோபந:|
தத்ர ஹ்யபிமுக: ஸ்வாத்மா ஜடித்யேவ ப்ரகாசதே || 4 ||

1. தெளிவான மனத்துடன் அருள் புரிகின்ற ஒரு மஹானிடம் அண்டி, அவருக்கு விரோதம் செய்ய நோக்கினவனுக்கு அந்த நோக்குக் குத் தடை யேற்படுவதும் நன்மையில் முடிகிறது. உடனே அவரது மேன்மையை யுணர்ந்து அவருக்கு அனுகூலனாகித் தன் ஆத்மாவைத் தான் அறிந்து விரோதியும் உய்கின்றானே.

2. ஒரு மதக் கொள்கை யுள்ளவன் பெரியோர்களிடம் வாதப் போர் புரிந்து தன் தர்சனத்திற்குத் தடையைப் பெறுகிறான். அது அவனுக்கு நன்மைக்கேயாம். அவரை அணுகி உண்மையான மதம் அறிந்து அவன் ஆத்மா விளங்குவதாமே.

3. நிழல் விழும்படி நின்மலமான கண்ணாடி போன்ற வஸ்துவில் பார்ப்பவனுடைய கண்ணொளி தடைப்படுகிறது நன்மைக்கே. அதனால் தானே அந்த ஒளி திருமபித் தன் முகம் முதலான இடங்களில் விழுவதால் தன்னை நன்கு அவன் காணவாகிறது.

संसर्गजा दोषगुणा भवन्ति । तत्र सत्संसर्गस्य बहुविधश्रेयस्करत्वमित्याह----

शिक्षके हरिताकारो मेरौ नीलतनुर्द्विजः ।
अपूर्ववर्णवान् भाति सत्यनिष्ठे च कौशिकः ॥ ५ ॥

1. पुरुषस्य सदाश्रयणात् अक्षरास्यत्वं, शरीरे ब्राह्मं तेजः, हेयकुलत्यागेन भक्तकुलसंबन्ध इति त्रयमत्र विवक्षितम् । द्विजे अपूर्ववर्णवत्त्वं विधेयम् । कस्य द्विजस्य कुत्र तथात्वमित्येतदुपपादनेन वाक्यत्रयमत्र । **हरिताकारो द्विजः शिक्षके अपूर्ववर्णवान्** । द्विजः-पक्षी हरितवर्णशरीरः-शुकः, सः स्वं प्रति वर्णपदवाक्यशिक्षको यो भवति तत्समीपे तदुक्तशिक्षणात् अपूर्वाः अकारप्रभृतयः ये वर्णाः अक्षराणि तद्वान् भवति । **नीलतनुः** श्यामाकारः **द्विजः** पक्षी काकः **मेरौ** स्थितः तस्य पर्वतस्य स्वर्णमयत्वात् तच्छायया स्वयम् **अपूर्वः** अलब्धपूर्वो यो वर्णः कान्तिः तद्वान् भवति । **कौशिको द्विजः-**

(1) विश्वामित्रः क्षत्रियः **सत्यनिष्ठे** वसिष्ठे । **अपूर्वः**-न विद्यते पूर्वः यस्मात् सः स्वापेक्षया पूर्ववर्णरहितो वर्णः ब्राह्मणजातिः । अन्येषां वर्णानां ब्राह्मणवर्णापेक्षया निकृष्टत्वात् पूर्वगणनीयोऽयमेव । तद्वान् ब्राह्मण आसीत् । ब्रह्मणा ब्राह्मण्यार्पणेऽपि वसिष्ठवाचा स्वस्य ब्राह्मण्यमुक्तञ्चेत, तदैवाहं विश्वसेयमिति विश्वामित्रेणोक्तम् । तेन वसिष्ठो मिथ्या न ब्रूयात् , सत्यनिष्ठ इति निश्चीयते । ब्रह्मा तु सत्यलोकनिष्ठः ।

(2) द्विजपदस्यात्रापि पक्षिपरत्वे **कौशिकः** उलूको भवेत् । **अपूर्ववर्णो** नाम अकारपूर्वकवर्णशब्दः। अवर्ण इति यावत् । तस्य अपवादः निन्देत्यर्थः । उलूकस्य तन्नादस्य च हेयत्वात् **सत्यनिष्ठेन** शास्त्रोक्तविषयविश्वासशालिना तद्दर्शनशब्दश्रवणादौ स निन्द्यत इति व्याख्येयम् ।

(3) उलूकवेषधारी सन् शिवः कणादाय वैशेषिकं शास्त्रमुपदिदेशेति प्रसिद्धिः । अत एव संकल्पसूर्योदये, "उलूकोपदेशापदेशप्रवृत्तः कथाशेषितोऽसौ कणादप्रणादः" इति ; अस्माभिरपि "अन्धकारपरीतेऽस्मिन् अर्थान् अनधिजग्मुषि । कणादः कल्पयाञ्चक्रे जगत्यौलूकदर्शनम्" इत्युक्तम् । स च कणादः **सत्यनिष्ठः** मिथ्यामतबौद्धादिनिरासकत्वात् । तस्मिन् विषये अपूर्ववर्णवान् इतरोलूकालभ्यवर्णजालः उपदेष्टा आसीदिति ।

(4) **सत्यनिष्ठः** साधुशब्दव्यवस्थापरः। 'असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते' इति **सत्यः** साधुशब्दः । सत्यनिष्ठः पाणिनिः। तद्विषये **अपूर्ववर्णवान्** अइउण् इत्यादिवर्णसमाम्नायवान् भवति महेश्वरः; तद्दर्शको भवति-इत्यपि सुवचम् । परंतु कौशिकपदस्य न तत्र विशेषसंबन्धः। कणादमुन्यर्थं कौशिकद्विजभूतो महेश्वरः ढक्कां नादयन् पाणिन्यर्थे अक्षरसमाम्नायवान् आसीदिति भवतु । एवमर्थ शब्दोभयोपदेशकःसः ।

(5) व्यालग्राहिणोऽपि कौशिकशब्दार्थत्वादेवमर्थः-**कौशिकः** कश्यपादिः व्यालग्राही **सत्यनिष्ठे** मन्त्रवश्यतया सत्यादप्रच्युते सर्पे **अपूर्ववर्णवान्** अद्भुतमन्त्रप्रयोक्ता भवति । तथा (भा.आ.५८) "अपसर्प भद्रं ते गच्छ सर्प महाविष । जनमेजययज्ञान्ते आस्तीकवचनं स्मर" इति मन्त्रवर्णप्रयोक्ताऽपि भवति । एतद्वचनश्रवणेऽपि यः सर्पो न निवर्तते, तस्य शिरः शतधा भिद्यत इत्युक्तत्वात् सत्यनिष्ठः सर्पः । अपसर्प सर्पेत्येव प्राचीनपाठः, न तु सर्पापसर्पेति । कार्यस्य प्रथमं वक्तव्यत्वादपि । अतः अकारपूर्वकत्वमप्यस्य ।

(6) **कौशिकः** इन्द्रोऽपि। तदा द्विजपदस्य नात्रान्वयः। इन्द्रः **सत्यनिष्ठे** गौतममहर्षौ **अपूर्व-वर्णवान्** अहल्यागमनात् गौतममहर्षिकृतशापविषयोऽभूदित्यर्थः ।

(7) अथवा कौशिको विश्वामित्र एव **सत्यनिष्ठे** हरिश्चन्द्रे तत्सत्यवचनभ्रंशनार्थं प्रयस्य अन्ते अपूर्ववर्णवान् अवर्णवान् अकीर्तिमान् अवन्ध्यप्रयत्न आसीदिति । एवमुत्तरार्धमात्रे अर्थभेदाः ।

2. अथ कृत्स्नस्य त्रिमूर्तिपरत्वमपि–**कौशिकः**–कोशः निधिः ब्रह्माण्डादिः तत्संबन्धी **द्विजः**–व्यूहरूपेण पूर्वमवतीर्य ब्रह्माण्डे द्वितीयं जन्म लभमानो नारायणः **शिक्षके** यथावस्थितशास्त्रार्थशिक्षायुक्ते ज्ञानिनि पुरुषे, तद्विषये **हरिताकारः**हरितवर्णरूपः यद्वा **हरिता** हरित्वं विष्णुत्वं यस्मिन् आकारेऽनुभूयते, तद्वान् विष्णुमूर्तिर्भाति । मेरुशब्दो गौण्या स्वर्णपूर्णपरो विभूतिमत्पुरुषमाह । **मेरौ**–विभूतिमत्सु धनाढ्येषु । ऐश्वर्यार्थिष्विति यावत् । **नीलतनुः** नीलं तनौ यस्य स नीलतनुः नीलकण्ठः रलयोरभेदाद्वा **नीलं** नीरं **तनौ** शिरसि यस्य स गङ्गाधरः । शिवमूर्तिरिति यावत् । "क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा" इति क्षिप्रफलप्रदत्वं देवतान्तरेषु। तत्र रुद्रे अधिकम् "अल्पायासं दर्शयित्वा फलं शीघ्रं प्रदर्शय" इति तं प्रति भगवन्नियोगात् । अत एव श्रीभागवतान्ते शिवसेविनामैश्वर्यप्राप्तिः तस्य शीघ्रफलप्रदत्वादिति भस्मासुरवृत्तान्तमुखेन वर्णितम् । एवं मुमुक्षुभिर्विष्णुमूर्तौ ऐश्वर्यार्थिभिः शिवमूर्तौ च सेव्यमानायां चतुर्मुखमूर्तिं को न्वाद्रियते । अत एव लोके तत्सेवकदुर्भिक्षम् । अथापि सत्यलोकनिष्ठाः संनिहितं तं न त्यजन्ति । स हि 'ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसञ्चरे । परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्' इति स्वेन सह चरमसमये तत्रत्यानां मोक्षं प्रति नेतेत्युक्तः । अतः **सत्यनिष्ठे** सत्यलोकस्थजनविषये भगवान् **अपूर्ववर्णवान् भाति** अजो भाति । अः पूर्वो यस्मात् जकाररूपात् वर्णात् सः **अपूर्ववर्णः** । अजशब्द इति यावत् । तद्वान् ब्रह्मा चतुर्मुखमूर्तिर्भाति अजसंबन्धात् तेषां पुनर्जन्माभावः । एवं त्रिमूर्तिता **कौशिकस्य** ब्रह्माण्डाधिपतेः **द्विजस्य,** "द्वा सुपर्णा सयुजा सखाया" इत्युक्तस्य पक्षिणो भगवत इति ॥

3. युगभेदभिन्न भगवद्रूपगतवर्णविवक्षाऽपि——

हरिताकार इति हरितवर्णः शैवालवर्णः । **नीलतनु**रिति नीलवर्णः । **अपूर्ववर्णवा**निति सितवर्णः । कथमिति चेत् –सर्ववर्णसमावेशे शुक्लरूपं भवतीति वैज्ञानिकदृष्ट्या, शुक्लेतरवर्णाः पूर्वे भवन्ति । तन्मेलनात् तदुत्तरो वर्णोऽयमिति अपूर्वत्वम् । यद्वा अकारादयो ये वर्णाः ते इति वाच उक्तत्वात् तन्निर्वाहको हयग्रीवः अपूर्ववर्णवान् । तस्य च शुद्धस्फटिकसदृशत्वात् सितवर्णत्वमिति तन्मुखेन सितरूपसर्वावतारग्रहणम् । यद्वा सितरूपस्य कृतयुगवर्णत्वात् ब्राह्मणवर्णत्वाच्च प्राथम्यात अपूर्वत्वम् ——अन्यपूर्ववर्णराहित्यम् । **कौशिक**पदेन पीतकौशेयवासस्त्वमिति प्रसिद्धपट्टवस्त्रवर्णभूतपीतरूपग्रहणम् । रक्तरूपस्य ग्राह्यत्वेऽप्येषैव रीतिः । शिक्षके मेराविति तदर्हयुगद्वयाभिप्रायेण । सत्यनिष्ठपदेन शिष्टं युगद्वयं ग्राह्यम् ।

4. अथवा **हरिताकार** इति हरिरूपेणावतारो विवक्षितः । अष्टमे हि स्कन्धे श्रीभागवते हरिण्यां हरिमेधसो जातो हरिनामा भगवान् गजेन्द्रं ग्राहान्मोचयामासेति वर्णितम् । इन्द्रद्युम्नो नाम

भक्ताग्रेसर. अगस्त्यशापात् गजेन्द्रो बभूव । एवमगस्त्ये शिक्षके स्थिते हरेरवतारः । गजेन्द्रोऽपि मूल-मूलेत्याहूयास्माकं परतत्त्वशिक्षक इति शिक्षकगजेन्द्रविषये हरिरित्यप्यर्थो भवेत् । हरित्वं हरिशब्दवाच्यता विशिष्य तस्मिन् आकारे। (2) अथवा शिक्षके असुरबालव्यूहशिक्षके प्रह्लादे वात्सल्यात् हरिता सिंहता आकारे यस्य स इत्यर्थः । सत्यनिष्ठे सत्यलोकस्थचतुर्मुखविषये तदनुग्रहाय अपूर्ववर्णवान् श्रीहय-ग्रीवः । एवमवतीर्णः क इति चेत् यो मेरौ नीलतनुः । मेरुः सुवर्णम् । सुवर्णगतनीलरूपविशिष्टविग्रह इत्यर्थः । ''हिरण्मयः पुरुषः'' इति प्रसिद्धं मेरुत्वम् । नीलतोयदनिभत्वञ्च प्रसिद्धम् । उभयाविरोधश्च ''मयूरकण्ठच्छविहेम'' इति वचनमुखेन तात्पर्यचन्द्रिकायां दर्शित इति मेरौ नीलतनुरयम् । विद्यु-न्मण्डलमध्यवर्तिनीलतोयदनिभत्वादपि । अयं ब्रह्माण्डकोशनियन्ता हरिहयग्रीवोपलक्षितानेकावताररूप-कृतमहोपकार इति भावः ॥

சிக்ஷகே ஹரிதாகாரோ மேரௌ நீலதநுர் த்விஜ:|
அபூர்வ வர்ணவாந் பாதி ஸத்யநிஷ்ட்டே ச கௌசிக: || 5 ||

1. மூன்று வஸ்துக்கள் அபூர்வ வர்ணம் பெறுகின்றன, அதாவது—பச்சையுருவான பட்சி (கிளி) அதற்குச் சொற்களைக் கற்பிக்கும் புருஷனிடத்தில் அகரம் முதலான அக்ஷரங்களை சொற்களைப் பெறுகிறது. அபூர்வ வர்ணமாவது அகரம் முதலான சொல்—

கருநிறமான பட்சி (காக்கை) பொன்மயமான மேருமலையில் முன் இராத நிறம் (பொன் நிறம்) பெறுகிறது. மூன்ருவது கௌசிக பதத்தின் பொருள். அதைப் பலவிதமாகக் கூறலாம். கௌசிகன் விச்வாமித்ரன் என்ருல் அவர் மெய்யே சொல்லும் வஸிஷ்ட்டர்வாயால் ப்ராஹ்மணனென்று சொல்லப்பட்டு அதற்கு மேலொன்றில்லை யென்னவான வர்ணம்—ப்ராஹ்மண வர்ணம் பெற்ருர். கௌசிக என்பதற்கு பட்சியே பொருளாக வேண்டுமென்ருல் கோட்டான் என்னலாம். கோட்டானைக் காண்பதும் அதன் ஒலி கேட்பதும் ஸத்யமான சாஸ்த்ரத்தில் நம்பிக்கையுடையவர் வெறுப்பாராகையால் அவர்களிடம் அது அவர்ணத்தை— பழியை—நிந்தையைப் பெறுகிறதென்க. கோட்டான் உருக்கொண்ட சிவபிரானிடத்தில் உலகெல்லாம் ஸத்யம் உண்மையென்கிற கணாத முனிவர் அபூர்வமான தர்க்க சாஸ்த்ரத்தைப் பெற்ருர். வர்ணமாவது வர்ண ராசி; சாஸ்த்ரம். கணாதருக்குக் கோட்டானுக நின்று உபதேசித்தவரே பாணிநி முனிவருக்கு வாத்ய மூலமாக அகரம் முதலான அக்ஷர ஸமாம்நாயத்தை உபதேசித்தாராகையால், ஸத்யமான—ஸாதுவான—இலக்கணத்திற் கிணங்கிய சொற்களிலே நின்ற பாணிநி அதைப் பெற்ருர் என்னலுமாம். பாம்பாட்டியும் கௌசிகன். ஸத்யம் தவருத பாம்பு. ஆஸ்தீகரின் ஆஜ்ஞைக்கு உட்பட்ட பாம்பினிடம் பாம்பாட்டி அற்புதமான மந்தரம் சொல்லுகிருன். கௌசிகன் இந்திரனுக. அஹல்யையைக் காதலுற்ற இந்திரன் ஸத்யத்தில் நின்ற

கௌதம முனிவரால் சாபச் சொல்லைப் பெற்ருன். கௌசிகர் விச்வா மித்ரரே மீண்டும். ஸத்யமே பேசுவதென்ற வ்ரதம் பூண்ட ஹரிச் சந்திரனைக் கெடுக்க முயன்ற விச்வாமித்ரர் அவர்ணத்தை அப கீர்த்தையை அடைந்தார், அவன் உறுதியாய் நின்றதால்.

2. இனி மும்மூர்த்தி விஷயமாம்—ப்ரஹ்மாண்டமென்ற கோசத்தை நிர்வஹிக்கும் பகவான் சாஸ்த்ரப் பயிற்சி நன்ருக உடையனுய் மோக்ஷம் விரும்புகின்றவனுக்குப் பச்சை நிறமான விஷ்ணு மூர்த்தியாய் விளங்குகிருன், மேருவைப் போன்ற பொன் முதலான ஐச்வர்யம் விரும்புகின்றவருக்கு நீலகண்டன் என்ற பரமசிவனுய் தோன்றுகிருன். ஸத்யலோகத்தில் இருக்குமவர்களுக்கு 'அ' என்ற எழுத்தை முன்னுக உடைய அஜ என்ற சொல்லின் பொருளான பிரமனுகத்தோன்றுகிருன்-

3. ஒவ்வொரு யுகத்திலும் ஒவ்வொரு நிறம் வ்யூஹ மூர்த்திக்கு. அதனல் பச்சை நிறமாயும், கறுப்பாயும் வெளுப்பாயும் மஞ்சள் நிற மாயும் தோன்றுவர்.

4. என்றும் பொன்னிறம் கலந்த கருநிறப் பெருமானே ஹரி என்ற அவதாரத்தில் கஜேந்த்ரனுக்கு உதவியவர். ஸத்யலோகத்திலிருக்கும் பிரமனுக்கு ஹயக்ரீவன் என்ற வாக்தேவதையாகத் தோன்றியவர். அபூர்வ வர்ணமாவது அகரம் முதலிய வாக்கு. இனி ஹரி-நரசிங்கமுமாம்.

अपरिहार्ये पापे सत्यपि अद्भुतज्ञानवत्त्वमपि कचिदित्याशयेन एकतः कलङ्के सत्यपि बहुजनाह्लादकस्य तेजसः प्राप्तिर्वृद्धिश्च भवतीत्याह—

कलङ्किनि जले क्वापि सौरं प्रतिफलन्महः ।
तमोपहत्वं तनुते समृद्धिश्च दिनेदिने ॥ ६ ॥

1. **कलङ्किनि** आचारभ्रंशाकृत्यकरणादिना अपरिहार्यपापविशिष्टे । **जले** । लडयोरभेदात् जडे अत्यन्ताज्ञेऽपि **क्वापि** कुतोऽपि हेतोः अव्याजकरुणापात्रभूते पुरुषे । **सौरं** सूरिः विद्वान् तत्संबन्धि सौरं **महः** तेजः ज्ञानं प्रतिफलत् उपदेशादिना संक्रान्तं सत् **तमोपहत्वम्** तस्य, ततः शृण्वताञ्चाज्ञाननिवर्तकत्वम्, **दिनेदिने** प्रवचनादिबलात् **समृद्धिं** ज्ञानवृद्धिम् ऐश्वर्यबहुजनमान्यत्वादिकञ्च **तनुते** विस्तारयति ।

2. **जलशब्दः** जलमयमण्डलवाची । कलङ्कशब्देन पङ्कग्रहणेन सपंकपल्वलादिग्रहणव्यावर्तनाय क्वापीत्युक्तम् । तथा च श्यामरेखाजालवत्प्रतीयमानाङ्कविशिष्टचन्द्रमण्डलग्रहणम् । तत्र **सौरम्** । सूरः सूर्यः तत्संबन्धि **महः** तेजः किरणपुञ्जः । प्रतिफलन् **तमोपहत्वं** **तनुते** चन्द्रस्य अन्धकारनिवारकत्वं करोति । कान्तिरहिते चन्द्रमण्डले जलमये सूर्यकिरणाः मूर्छन्तः उष्णताहीनाः आह्लादनाः अन्धकारनिवर्तकाश्च भवन्ति । शुक्लपक्षे चन्द्रस्य कलावृद्धिश्च प्रतिदिनं तत्र सूर्यकिरणपातप्रदेशाधिक्यनिबन्धनेति ।

3. औषधरसानामग्निपुटपाकवत् सूर्यपुटपाकोऽपि भवति । एवं द्रवादिमिश्रतया कषायतापन्नतया कलङ्किनि जले क्वचित् आतपे बहूनि दिनानि निक्षिप्ते सूर्यतेजः प्रतिफलत् तमोपहत्वम्, तमोगुणकार्यजाड्यनिद्राप्रमादादिनिवर्तकत्वं तस्य जलस्याऽऽपादयति । आरोग्यादिसमृद्धिञ्च ददाति ।

4. सशयोरभेदात् सौरं शौरम् शूरवंशो यदुवंशः । शौरं शौरिसमाख्यं कृष्णाह्वयं तेजः विषमिश्रतया कलङ्किनि यमुनाजले क्वचित् कालियप्रतिकोटितया परिपक्वं सत् तमोगुणप्रधानकालियनिवर्तकत्वं तीर्थगोव्रजादिसमृद्धिञ्च तनुते ।

5. सुरः महादेवः तत्संबन्धि वीर्यरूपम् । यद्वा शूरः देवसेनापतिः षण्मुखः तत्संबन्धि तदुत्पादकं सौरं महः कलङ्किनि जले एतत्पतनवशात् सकलङ्के गङ्गाजले जडे हिमवति च प्रतिफलत् कुमारो भूत्वा तमोपहत्वं सेनापत्यभावाधीनं देवानां तमो वारयति । वर्धते च षण्मुखत्वादिना । वर्धयति च ।

களங்கிநி ஜலே க்வாபி ஸௌரம் ப்ரதிபலந் மஹ: |
தமோபஹத்வம் தநுதே ஸம்ருத்திஞ்ச திநேதிநே || 6 ||

1. பாபமுள்ளவனைப் மூடனையுமிருக்கும் ஒருவனிடத்திலும் (ஏதோ பாக்ய வசத்தால் அவ்யாஜ கருணையால்) மஹா ஜ்ஞானியினுடைய ஞானவொளியானது சேருகிறது. அது அவனுடைய அஜ்ஞானத்தைப் போக்குவதோடு அவன் அமுதப் பெருக்குப் போன்ற செஞ்சொற்களால் பிறரைக் கவர்கின்றவனாக, அதனால் பிறரின் அஜ்ஞானமும் நன்றாகத் தொலைகிறது. மேன்மேல் அறிவும் திறமும் வளர்கின்றது.

2. சந்த்ரமண்டலத்தில் எப்போதும் களங்கம் உண்டு. ஆனாலும் சூர்யனின் ஒளிகள் அதில் விழுவதால் அவ்வொளி நிலாவாகி உலகின் இருளை யெல்லாம் போக்குகின்றது. சுக்ல பக்ஷத்தில் கலைகளும் நில வொளியும் வளர்வது சூரிய கிரணங்களின் சேர்க்கையின் மிகுதியைக் கொண்டே யாம்.

3. சில வஸ்துக்களைப் பிழிந்து சாறு கலந்த நீரைக் காய்ச்சுவது உண்டு. அது போல் சூரிய வெப்பத்தில் சில நாள் வைத்துப் புடம் செய்து மருந்தாகக் கொள்வர். அந்தச் சாறு சேர்ந்து கலங்கிய நீரில் சூரிய வெப்பம் புகுந்து உடலில் தமோகுணத்தினால் ஏற்படும் உறக்கம் ஜாட்யமெல்லாம் போக்கும். மேன்மேல் ஆரோக்யத்திற்கு அபிவ்ருத்தியையும் செய்யும்.

4. ஸௌர என்றால் சூர என்றதே. சூர குலத்திற் பிறந்த சௌரி என்னும் கண்ணனின் திருமேனியே தேசு. அது விஷம் நிறைந்ததால் கலங்கிய யமுனை மடுவொன்றில் காளியனுக்கு ப்ரதியாகத் தோன்றி தமோகுணமே வடிவான காளியனை விலக்கி மேன்மேல் கோகோபீ கோபர்களுக்கு வளம் தந்து வரும்.

5. மஹாதேவனின் வீர்யமாம் தேசு கங்கையிலும் இமயமலையிலும் விழுந்து பிறகு சுப்ரம்மண்யனாய் ஸேநாபதியாகி தேவர்களின் இருளை விலக்கி நன்மை செய்கின்றது.

अज्ञानां पुरुषार्थलाभाय प्रवृत्तयः प्राज्ञसमागममूला इत्याह—

स्वतश्चैतन्यहीनस्य विषय(म)च्छिद्रभागिनः ।
कस्यचित् प्राज्ञमूलाः स्युः पुरुषार्थप्रवृत्तयः ॥ ७ ॥

1. **स्वतः** स्वभावतः स्वकृतकर्मवशाद्वा **चैतन्यहीनस्य** ज्ञानरहितस्य **विषयेषु** आभासविषयानुभवेषु **छिद्रभागिनः** अवकाशं भजतः । तद्व्यापृतस्येत्यर्थः । यद्वा तत्र **छिद्रं** प्रतिहतिं भजतः । विहन्यमानविषयानुभवस्येति यावत् । **विषमे**ति पाठे उच्चावचविघ्नयुक्तस्येत्यर्थः । **कस्यचित्** सत्संगहेतुपुण्यभाजः **पुरुषार्थप्रवृत्तयः** तदपेक्षित तत्तत्फलोद्देश्यकव्यापाराः **प्राज्ञमूलाः** पूर्णचैतन्यपुरुषविशेषकृतोपदेशमूलाः **स्युः** भवेयुः ॥

2. अचेतनद्रव्यपरताऽपि । **स्वतः** साक्षात् **चैतन्यहीनस्य** चैतन्यं कदापि प्राप्तुमनर्हस्य विषयाणां भोग्यनानापदार्थानामुत्पादने **छिद्रम्** अन्तरं भंगं कदाचित् भजतः **विषमस्य** सत्त्वादिगुणवैषम्यवतः **कस्यचित्** अचेतनप्रकृतिद्रव्यस्य **पुरुषार्थे**—जीवानां कृते जीवेषु भोक्तृत्वापादिकाः **प्रवृत्तयः** 'कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते' इत्युक्तक्रियाः महदादिसृष्टयः **प्राज्ञमूलाः** सर्वेश्वराधीनाः स्युः ।

3. देहपरताऽपि । स्वभावतोऽचेतनस्य **विषमच्छिद्रभागिनः** नवद्वारयुक्ततया छिद्राणां विषमसंख्याकतया तथाभूतस्य **कस्यचित्** देहस्य **प्राज्ञमूलाः** जीवचैतन्याधीनाः तत्तत्फलार्थप्रवृत्तय इति ॥

4. चेतनस्य भावः **चैतनी** ज्ञानम् । तया अहीनस्य स्वाभाविकज्ञानशालिनोऽपि **विषमानि** उच्चावचानि **छिद्राणि** प्रमादादिविधायकानि भजतः **कस्यचित्** रुक्मिणीगोदाप्रभृतेः कन्यारत्नस्य **पुरुषार्थे** पुरुषोत्तमलाभार्थं प्रवृत्तयः प्राज्ञमूलाः उत्कृष्टैक ब्राह्मणद्वारा स्युः । रुक्मणी ब्राह्मणं प्राहिणोत् । गोदा स्वताते भरं न्यवेशयत् (गो. प्र. 10. 10) ॥

5. चैतन्यहीनस्येत्यत्र **चैतनी**शब्देन **अहीन**शब्दस्य समासः । **चैतनी** चैतन्यम् । तया सहितस्य अहीनस्येति मध्यमपदलोपिसमासः । स्वतश्चैतनीति बहुव्रीहिर्वा । **स्वत एव** ज्ञानवतोऽपि **अहीनस्य** अहीनां सर्पाणाम् **इनस्य** अधिपस्य शेषस्य **विषयच्छिद्रभागिनः** विषं यन्ति प्राप्नुवन्ति **च्छिद्राणि** भस्त्रिकाप्रायाणि रन्ध्राणि मुखेषु भजतः, **कस्यचित्** नित्यसूरेः **पुरुषार्थप्रवृत्तयः** स्वयं प्रयोजनभूताः निवासशय्यासनपादुकांशुकोपधानवर्षातपवारणादिरूपसाध्याः क्रियाः **प्राज्ञमूलाः** स्युः । **प्राज्ञः** संकर्षणव्यूहः । **माण्डूक्ये** विश्वतैजसप्राज्ञरूपव्यूहत्रयनिरूपणावसरे सुषुप्तस्थान इत्यारभ्य 'आनन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः' इति प्राज्ञशब्देन संकर्षणोक्तेः । **श्रुतौ** च 'प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद, नान्तरम्' इति सुषुप्तिनिर्वाहके प्राज्ञनाम प्रसिद्धम् । आदिशेषस्य संकर्षणाभिमानविशेषात् **विज्ञानबलैकधामत्व**मिति श्रीविष्णुपुराणादौ व्यक्तम् । प्रथमविशेषणं ज्ञानधामत्वपरम्, द्वितीयविशेषणं संहारोपयोगिबलप्रदर्शकं सत् अहीनशब्दविवरणम् ।

6. अथवा ज्ञानं संबोध्य कश्चिद् एवमाह–हे चैतनि। चैतन्य! त्वां प्रार्थये, त्वं विषयच्छिद्र-भागिनः उक्तरीत्या विषव्याप्तमस्त्राविशिष्टान् अहीन् सर्वान् सर्पान् अस्य क्षिप। असु क्षेपे लोण्मध्यमै-कवचनम्। अहिसमीपं मा याहि इत्यर्थः। क्रोधाविष्टानां तेषां ज्ञानहीनत्वमेवमुक्तं भवति॥ कथं तर्हि अहिरेव शेषो मान्यत इति चेत्——तत्राऽऽह कस्यचिदिति। एवमपि अद्वितीयस्य शेषस्य पुरुषार्थं परमपुरुषोद्देशेन याः शय्याभवनादिप्रवृत्तयः, याश्च सर्वजीवोद्देशेन शब्दशास्त्र-वैद्यक-योगानुशास-नादिसद्विषयप्रवृत्तयः, ताः प्राज्ञमूलाः स्युः विशेषकटाक्षणप्रवृत्तभगवदधीना भवितुमर्हन्ति। तथाऽप-वादसत्त्वेऽपि उत्सर्गतः त्वं सर्पान् परित्यजेति॥ अत्र अहीन् इति दुष्टानामपि ग्रहणम्। तेषां सर्पाणाञ्च साम्यं विषयच्छिद्रभागित्वम्। यत्रयत्र विषये छिद्रं दृष्ट्वा परोपद्रवः कर्तुं शक्य, तत्रतत्र जागरूका दुष्टाः। विषं यत्——प्राप्नुवत् छिद्रं सर्पाणाम्। अतो विषयच्छिद्रभाक्त्वमुभयेषां तुल्यम्। विषमच्छिद्रेति पाठेऽपि सर्पाणां नानारूपवल्मीकवासित्वात् विषमच्छिद्रभागिता।

ஸ்வதச்சைதந்யஹீநஸ்ய விஷய(ம)ச்சித்ரபாகிநः |
கஸ்யசித் ப்ராஜ்ஞமூலா: ஸ்யு: புருஷார்த்தப்ரவ்ருத்தய: ‖ 7 ‖

1. தானே அறியவியலாதவன், விஷயானுபவங்களிலே தடை களுக்கு இடம் உடையவன், அனுபவிக்க பாக்யமுள்ளவனுகில் அவ னுக்குப் பலன்களைப் பெற முயற்சிகள் உண்டாவது அறிவாளியான மஹான்கள் மூலமேயாம்.

2. மூலப்ரக்ருதி விஷயமாம்—அதற்கு அறிவென்பதில்லை. அசே தனமாகையால் ஸத்துவாதி குணங்களின் ஏற்றத்தாழ்வுள்ளதும் பல விஷயங்களாக மாறுவதிலே சில ஸமயம் தடையுள்ளதுமான மூலப்ரக்ருதியானது ஜீவர்களுக்குச் செயல்கள் சில செய்யவாகின்ற தென்பது எல்லாம் அறிந்த எம்பெருமான் மூலமேயாகும்.

3. அறிவில்லாத உடல் ஒன்பது ஓட்டையுள்ளது, இது தர்மார்த்த காமமோக்ஷங்களுக்காகப் பாடுபடுவது உள்ளேயிருக்கும் ஜீவாத்மாவின் கருத்திற்கிணங்கவாம்.

4. சைதநீ என்றால் அறிவு பெற்றிருக்கை. என்றும் அறிவு குறை யாமலிருந்தும் தம் நோக்குக்குப் பல இடையூறுகளையடைந்திருக்கும் ருக் மிணி ஆண்டாள் போன்ற உத்தமகன்னிகைகளுக்கு புருஷோத்தமனை கண்ணனைப் பெறவான முயற்சிகள், முடிவாக ஓர் அறிவாளியின் மூலம் பயன் பெறவாகின்றன. ருக்மிணிதேவியார் ஓர் அந்தணனைக் கண்ண ணிடம் அனுப்பிக் கண்ணனை மணந்தாள். கோதைப்பிராட்டியும் தம் பிதாவான விஷ்ணுசித்தர் மூலமே தம் பலனை எதிர்பார்த்துப் பெற்றாள். 'நல்லவென் தோழி! நாகணை மிசை நம்பரர், செல்வர் பெரியர் சிறுமானிட வர் நாம் செய்வதென். விட்டுசித்தர் தங்கள் தேவரைவல்ல பரிசு வரு விப்பரேல், அது காண்டுமே' (நா. 10. 10) என்றனனே.

5. தானே அறிவுடன் கூடி விஷப்பைகளை முகங்களிலும் கொண்ட அரவரையனுக்கு ஸ்வயம்ப்ரயோஜனமாய் (மு. 53) "சென்றால் குடை

யாம் இருந்தாற் சிங்காசனமாம் நின்றால் மரவடியாம் நீள்கடலுள்— என்றும் புணையாம் மணி விளக்காம் பூம்பட்டாம் புல்கும் அணையாம் திருமாற்கு அரவு" என்ற கைங்கர்யங்கள் ப்ராஜ்ஞனென்ற ஸங்கர்ஷண மூர்த்தியின் அபிமானத்தினுலென்க.

6. ஏ சைதநி! அறிவே! உன்னை வேண்டுகிறேன். விஷங்களைக் கொண்ட பைகளையுடைய பாம்புகளை நீ அண்டாதே. 'எல்லா ஸர்ப்பங் களும் அறிவற்றிருக்கவாகுமா; ஆதிசேஷன் அவ்வாறில்லையே' என்னில், அது விலக்கு. அவருக்கு எம்பெருமான் விஷயமான கைங்கர்யங்களும் வியாகரணம், வேதாந்த தத்துவ தர்சனம் (விசிஷ்டாத்வைதம் இராமா னுசனாய் அவதரித்து உபதேசித்ததால்), யோகம் முதலான ப்ரஜை களின் க்ஷேமத்திற்காம் உபதேசங்களும் ஏற்பட்டது தனிப்பட்ட பகவத் கடாக்ஷத்தினுல். பொதுவாக நீ பாம்புகளை விட்டிருக்க வேணும் என்றபடி. அஹீந் என்று துஷ்டர்களையும் சொன்னபடி. அவர்களுக்கும் பாம்புகளுக்குப் போல் விஷயச் சித்ரம் கொண்டிருக்கை ஒப்புமை. எந்த விஷயத்திலும் கேடு செய்யச் சந்து பார்த்திருப்பரே துஷ்டர்கள்.

महदाश्रयणं कुर्वतां महत्साम्यमपि सम्यक् भवतीत्याह—

महान्तं पुरुषं प्राप्य कश्चित् सत्त्वप्रवर्तकम् ।
प्रतिबुद्धो जनस्तेन परमं साम्यमश्नुते ॥ ८ ॥

"वेदाहमेतं पुरुषं महान्तम्" इति, "महान् प्रभुर्वै पुरुषः सत्त्वस्यैष प्रवर्तकः" इति च श्वेताश्वतरोपनिषत् सहस्रशीर्षस्य महापुरुषस्य सत्त्वगुणप्रवर्तकत्वमाह । "यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् । तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति" इति तस्यैव पुरुषस्य ध्यानात् तत्परमसाम्यमाह । **कश्चित्** । अन्यस्य मोक्षपदत्वाभावात् । **प्रतिबुद्धः** विद्वान् ज्ञानी अनुष्ठितमोक्षोपायः **जनः** तेन जन्मसाफल्यवान्, रजस्तमःप्रवर्तकविधिरुद्रविलक्षणं सत्त्वप्रवर्तकं महाविष्णुं श्रियः पतिं **प्राप्य** मुक्तो भूत्वा **तेन साम्यं परमं** प्राप्नोति । **साम्यं** ज्ञाने भोगे च । तत्र पारम्यं परमात्मज्ञानभोगतो न्यूनत्वाभावः । जगत्सृष्टिस्थितिसंहार-मुमुक्षूपास्यत्व-मोक्षपदत्व-सर्वशेषित्व-सरसीरुहवासिनीवल्लभत्वादयस्तस्यासाधरणाः अस्य न भवन्ति । कश्चिदित्यत्र कश्चित् इत्यपि पाठः ।

2. ज्ञानसदाचारात्मगुणशिक्षणेन सत्त्वगुणप्रवर्तकं "अस्ति ब्रह्मेति चेद् वेद सन्तमेनं ततो विदुः" इति ब्रह्मनिष्ठतारूपसत्त्वसंपादकं महान्तं पुरुषमाचार्यं प्राप्य **प्रतिबुद्धः** प्राप्तविद्यो जनः काले तत्साम्यं पुष्कलं तद्वत् आचार्यकादिकं लभते ॥

3. **जनः** अध्ययनपरः कश्चित् श्वेताश्वतरोपनिषदमधीत्य तत्र, 'भरते विश्वमीशः' (1-8), 'एको हि रुद्रो न द्वितीयाय तस्थुः' (3-2), 'विश्वाधिको रुद्रो महर्षिः' (3-4) 'या ते रुद्र शिवा तनूः' (3-5), 'सर्वगतः शिवः' (3-11), 'सर्वस्य प्रभुमीशानम्' (3-17), 'मायिनं तु महेश्वरम्'

(4-10), 'तमीशानम्', 'विश्वाधिको(पो) रुद्रः', 'ज्ञात्वा शिवं सर्वभूतेषु गूढम्' (4-16), 'शिव एव केवलः' (4-18), 'रुद्र यत्ते दक्षिणं मुखम्' (4-21), 'मा नो रुद्र भामितः' (4-22) 'पतय स्तथेशः' (5-3), 'भावाभावकरं शिवम्' (5-14), 'परमं महेश्वरम्' (4-7) इति रुद्रप्रतिपादकानां मन्त्राणां सद्भावमवगम्य परतत्त्वविषये संदिहानः, तत्रैव तृतीयखण्डे पुरुषसूक्तप्रसिद्धमहापुरुषपारम्य-प्रतिपादकान् मन्त्रान् अधीत्य, रुद्रेशानादिपदानां योगव्युत्पत्त्या नारायणपरत्वमेव युक्तमिति प्रतिबुद्धस्सन् तं प्राप्य तेन साम्यं परममश्नुत इत्यप्यर्थः। बोधायनेन च महर्षिणा, "अथातो महापुरुषस्याहरहः परिचर्याविधिं व्याख्यास्यामः" इत्यारभ्य, "महापुरुषं वा महादेवं वा नित्यमाराधयेत्" इति महापुरुषशब्दं श्रीमन्नारायणैकान्तमाह। तत्र वाकारात् एकाराधनं पर्याप्तमित्युक्तं भवति। प्रतिबुद्धाप्रतिबुद्धभेदेन स विभाग इति अत्र प्रतिबुद्धपदेन सूचितम्। प्रतिबुद्धश्च मुमुक्षुः। इमं प्रतिबोधम् आत्मबुद्धिं निर्दिश्य कर्तव्यं श्वेताश्वतरोपनिषदेवान्ते दर्शयति, "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये" इति ॥

மஹாந்தம் புருஷம் ப்ராப்ய கஞ்சித் ஸத்வ ப்ரவர்த்தகம் |
ப்ரதிபுத்தோ ஜநஸ் தேந பரமம் ஸாம்யம் அச்நுதே || 8 ||

1. த்ரிமூர்த்திகளில் ரஜோகுணத்திற்கும் தமோகுணத்திற்கும் ப்ரவர்த்தகர்களான பிரமன் சிவன் என்ற மூர்த்திகளை விட்டு ஸத்துவ குண ப்ரவர்த்தகனை ச்ரிய:பதி என்ற மஹாபுருஷனைத் தெளிந்தவன் அவனை யாச்ரயித்து மோக்ஷம் பெற்று அவனோடு ஸமனைகையை நிரம்பப் பெறுகிறான். ஆனந்தத்தில் தாரதம்யமில்லை.

2. ஸத்துவ குணம் வளரும்படி உபதேசம் செய்து திருத்தும் மஹாத்மாவை ஆச்ரயித்து தத்துவஹித புருஷார்த்தங்களைத் தெளிந்து அதற்கு இணங்க நடப்பவன் தனக்கு உபதேசித்த ஆசார்யனுக்கு முழுமையும் ஈடாகிறான்.

3. ச்வேதாச்வதரோபநிஷத்து, ஈசன், ருத்ரன், சிவன், ஈசாநன், மஹேச்வரன் என்ற சொற்களை அடிக்கடி ப்ரயோகம் செய்வதால் அதைக் கண்டு ஒருக்கால் பார்வதிபதியே பரதெய்வமாகுமோ என்று ஐயப்பாடு உடையவர், வேறு உபநிஷத்து நிற்க, அதே உபநிஷத்தில் மஹாபுருஷன் என்றும், ஸத்துவகுணம் அளிக்கின்றவன் என்றும், புருஷஸூக்தத்திற் சொல்லிய ஸஹஸ்ரசீர்ஷாஸஹஸ்ர ஸாக்ஷ: என்ற வாறான தன்மைகளை யுடையன் என்றும் சொல்லியிருப்பதைப் பார்த்த பிறகு, சிவன் என்றால் மங்களமானவன் என்றும், மஹேச்வரன் என்றால், மற்ற ஈச்வரர்களுக்கெல்லாம் மேம்பட்டவன் என்றும், ஈசானன் என்றால் நியமிக்கின்றவனென்றும் பொருளாகையால் நாராயணனுக்கே அவை பொருந்துமென்று தெளிந்து அவனையே யாச்ரயித்துப் பலன் பெறுவர் என்றும் தோன்றும்.

सदाचार्यमाश्रितस्य प्रतिबुद्धत्वादिना तत्परमसाम्याभावेऽपि गौरवयितव्यत्वं दृष्टान्तेन दर्शयति–

सूत्रं रत्नसमावेशात् चर्म सत्पदसंश्रयात् ।
तदभेदेन गृह्येत तृणमप्यस्त्रमन्त्रणात् ॥ ९ ॥

1. सूत्रं तन्त्वादिना क्रियमाणमपि स्वस्मिन् प्रोतानामनर्घाणां रत्नानां संबन्धात् तैः सह धृत्वा मान्यते । धार्यत्व–मान्यत्वांशे तस्य तदभेद एव । तथा सतां महात्मनां **पदयोः** पादयोः संश्रयात् ताभ्यां धृतत्वात् **चर्म** पादरक्षारूपं तदभेदेन पदतुल्यत्वेन **गृह्येत** मान्येत । **अस्त्रस्य** ब्रह्मास्त्रादेः **मन्त्रणात्** तृणे अभिमन्त्रणात् **तृणमपि तदभेदेन** ब्रह्मास्त्रत्वेन गृह्येत । यथा श्रीराघवेण काकासुरं प्रति प्रयुक्तं तृणम् । तद्वत् सन्तमाश्रितोऽपि तदीय इति मत्या तत्तुल्यं मान्येत ।

ஸூத்ரம் ரத்நஸமாவேசாத் சர்ம ஸத்பதஸம்ச்ரயாத் |
ததபேதேந க்ருஹ்யேத த்ருணமப்யஸ்த்ரமந்த்ரணாத் || 9 ||

1. நூலில் ரத்னங்கள் கோக்கப்பட்டிருந்தால் அவற்றைப் போல் நூலும் கௌரவமாக அணியப் பெறும். பெரியோர்களின் திருவடியால் தரிக்கப்பட்ட பிறகு பாதரக்ஷை திருவடியைப் போல் மதிக்கப்படும். ஒரு புல் கூட ப்ரஹ்மாஸ்த்ரத்திற்கான மந்த்ரம் ஜபிக்கப்பட்ட போது ப்ரஹ்மாஸ்த்ரமேயாகும். அது போல் பெரியோரை ஆச்ரயித்தவர்களை அவர்களைச் சார்ந்தவரென கௌரவிக்க வேணும். (9)

"साक्षान्नारायणो देवः कृत्वा मर्त्यमयीं तनुम् । मग्नान् उद्धरते लोकान् कारुण्याच्छास्त्रपाणिना" इति भगवदभिन्नस्य आचार्यस्य दृष्टिरितरदेवतादृष्ट्यपेक्षयाऽप्यतिशयितेत्याह—

एकयैव गुरोर्दृष्ट्या द्वाभ्यां वाऽपि लभेत यत् ।
न तत् तिसृभिरष्टाभिः सहस्रेणापि कर्हि(कस्य) चित् ॥ १० ॥

1. **गुरोः** अज्ञानान्धकारनिवर्तकस्याऽऽचार्यस्य **एकया** द्वितीयरहितया **दृष्ट्या** । सकृत्कटाक्षेणापीति यावत् । यद्वा एकया तदुपदिष्टविद्यया, अथवा मनसा । अनुग्रहेणेति यावत् । अपिवा गुरोः काणत्वेऽपि गुरुत्वांशे लोपाभावात् एकेनैव नेत्रेण, नेत्रद्वयसत्त्वे च द्वाभ्यां नेत्राभ्यां मनुष्यचक्षुर्द्वयेन वा कटाक्षानुग्रहद्वयेन वा तदनुग्रह–तदनुगृहीतविद्यारूपद्वयेन वा कटाक्षविद्याभ्यां वा यत् फलं लभेत शिष्य, तत् **कर्हिचित्** कदापि **कस्यचित्** गुरुभिन्नस्य कस्यापि, मुमुक्षामनुत्पाद्य संसारसंवृद्धिहेतोः कस्यचित् देवतान्तरस्य तिसृभिः तदधिकसंख्याभिश्च न लभेत । तावद्दृष्टिविषयत्वेऽपि तत् फलं न भवेदिति । रुद्रस्य त्रिणेत्रत्वात्, विधेश्चतुर्मुखतया अष्टनेत्रत्वात्, इन्द्रस्य सहस्राक्षत्वाच्च क्रमेण तत्तद्देवताविवक्षा । तेषामेकैकदृष्टेरकार्यकरत्वं कैमुत्यसिद्धम् । भगवतो मोक्षप्रापणाभिप्रायसत्त्वात् तद्दृष्टेरनुक्तिः ; तस्य गुरुभूतत्वात् । अन्यादृशत्वेऽप्य तुल्यत्वं कामम्स्तु । वैराग्यमुमुक्षादिकं देवतान्तरमूलं न भवेत् । त एव गुरुभूयोपदिशन्ति चेत् — तदवस्थायां ते पूर्वार्धगृहीता एव । सहस्राक्षो भगवानपि । तद्दृष्टयोऽपि गुरुदृष्टिनिरपेक्षं न कार्यकर्यः । अपिना अनन्तदृष्टिग्रहणम् ।

2. उपनिषदुक्ताः काम्याः बह्व्यो विद्याः सन्ति । ताः सर्वास्ततस्ततो गृहीत्वा कश्चिदनुतिष्ठति चेत्-तावदनुष्ठानेऽपि एकया मोक्षार्थविद्यया स्वतन्त्रप्रपत्त्या, अथवा अंगप्रपत्ति-प्रधानभक्तिरूपोपायद्वयेन यत् फलं लभेत, न तत् लभेतेत्यर्थः । तिसृभिरिति आर्तोजिज्ञासुरर्थार्थी इति सूचित-नष्टैश्वर्य नूतनैश्वर्य कैवल्यरूपफलत्रयार्थकाम्यत्रयविषयम् । अष्टाभिरिति सप्तलोकी-कैवल्यरूपफलाष्टकप्रत्येकविषयकविद्याविषयकम् । सहस्रशब्दः आनन्त्यवाची ।

3. यदि कश्चित् उपनिषत्प्रसिद्धोद्दालक-याज्ञवल्क्यादिवत् मोक्षार्थानेकविद्यावेदी स्यात्, तदापि एकया मोक्षार्थविद्यया, प्रपत्तिभक्तिविद्यारूपद्वयेन वा यल्लभेत, न ताभिस्तल्लभेत। अनेकविद्यानुष्ठाने एकस्या अपि पूर्णानुष्ठानाभावात् नैष्फल्यमेवेति भावः । विकल्पितस्थले ह्येक एव कल्प आदरणीयः ।

4. एकया गुरूपदिष्टया कर्मयोगरूपगत्या, उभयाधिकारित्वे कर्मयोग-ज्ञानयोगरूपगतिभ्यां मिलिताभ्यां यत् आत्मावलोकनं लभेत, न तत् अन्यैरनेकैरुपायैः काम्यैर्लभ्यमिति च । कर्मयोगस्य ज्ञानगर्भत्वात् दृष्टित्वम् ।

5. "आचार्याद्धैव विद्या विदिता साधिष्ठं प्रापत्" इति श्रुत्या पूर्वमनाचार्याद् गृहीतत्वेऽप्याचार्यात् पुनर्ग्रहणस्योक्ततया एकया गुरोर्दृष्ट्या यल्लभ्यते, आचार्यस्य प्रथमाचार्यः चिन्तनाचार्य इत्युभयरूपत्वे तद्दृष्टिद्वयेन वा यल्लभ्यते, न तत् अन्येषां तथास्वेनाबहुमतानाम् अर्थान् अम्बरे लानवत् विकिरतामुपन्यासदृष्टिभिरनन्ताभिरपि लभ्यते ।

6. गुरुदृष्ट्या एकया, साक्षाद्गुरु-प्रथमगुरुभगवत्संबन्धिदृष्टिभ्यामिति वा, साक्षाद्गुरुदृष्ट्या तद्दृष्टिमूलभूतप्राचार्यदृष्टिगुरुदृष्टिभ्यां द्वाभ्यामिति वा ।

7. गुरोरेकया दृष्ट्या मोक्षार्थमनुष्ठितया प्रपत्त्या यत् फलं लभ्यते, द्वाभ्यां वा दृष्टिभ्यां बाह्याभ्याम्, "ते पुनन्त्युरुकालेन दर्शनादेव साधवः" इत्युक्तरीत्या यत् पूतत्वादिकं लभ्यते, न तत् अन्याभिरिति । यद्वा द्वाभ्यां गुरोः नेत्ररूपया वेदमन्त्रादिरूपतदुपदिष्टचक्षुषा च यत् लभ्यते मोक्षात् प्रागनुभूयमानं फलम् तदित्यर्थः ।

8. गुरोः निरुपाधिकसर्वगुरुत्वाश्रयस्य भगवतः एकया दृष्ट्या 'तदैक्षत' इत्यादिवत् प्रसिद्धया संकल्परूपया, यद्वा द्वाभ्यां, "विष्णोः कटाक्षम्," "जायमानं हि पुरुषं यं पश्येन्मधुसूदनः" "यश्च रामो न पश्यति" इत्येवं प्रसिद्ध बाह्यदृष्टिभ्यां यत् लभेत, न तत् क्षुद्रदेवतादृष्टिभिः संकल्पवीक्षणरूपाभिर्लभेतेति ।

9. गुरुदत्तया एकया शास्त्रार्थदर्शनरूपया दृष्ट्या द्वाभ्यां तद्दत्तया पूर्वोक्तया तदनुग्रहमात्रलब्धया दिव्यचक्षूरूपया च यत् लभेत, न तत् अन्याभिरिति ।

10. गुरोरिति कस्यचिदिति च कर्मणि षष्ठी । गुरुविषयकबाह्यदर्शनेन, तद्विषयकध्यानबाह्यदर्शनरूपाभ्यां वा दृष्टिभ्यां यत्, न तत् अन्यविषयकदृष्टिभिः बहुश्रवणमननध्यानरूपाभिर्वा, "ग्रहणं धारणं चैव स्मरणं प्रतिपादनम् । ऊहोऽपोहोऽर्थविज्ञानं तत्त्वज्ञानञ्च धीगुणाः" इत्युक्ताष्टविधधीरूप दृष्टिभिर्वा अनन्तशाखाभिर्वा न लभेतेति ॥

11. दृष्टचेत्पादौ तृतीया न करणार्थे, किंतु कर्त्रर्थे इति स्वीकारे एका गुरुदृष्टिः गुरुदृष्टिद्वयं वा यत् बहुजनमहिमापादकस्वरूपं वैशिष्ट्यं लभते, न तत् तिस्रः अन्या वा दृष्टयो लभन्त इति वाक्यार्थः स्यादित्यपि भाव्यम् ॥

ஏகயைவ குரோர் த்ருஷ்ட்யா த்வாப்யாம் வாऽபி லபேத யத் |
ந தத் திஸ்ருபி: அஷ்டாபி: ஸஹஸ்ரேணாபி கர்ஹிசித் || 10 ||

1. த்ருஷ்டியாவது கண். அஜ்ஞானவிருளை விலக்கும் ஆசார்யனின் ஒரு கண்ணினால் அல்லது இருகண்ணினால் என்ன பலன் பெறுவானோ அதை, முக்கண்களாலும் எண் கண்களாலும் ஆயிரங் கண்களாலும் பெற மாட்டிலன். இங்கே ஒரு கண் என்பது ஒரு கடாக்ஷமுமாம், ஒரே கண் உள்ள ஆசார்யனாகில் அந்தவொரு கண்ணுமாம். அவன் உட் கண்ணுமாம். அவன் உபதேசித்த வித்யையுமாம். இரண்டு கண்கள் என்பது நேத்ரங்களுமாம், கடாக்ஷமும் அனுக்ரஹமுமாம், மனமும் கண்ணுமாம், அனுக்ரஹமும் அனுக்ரஹித்த வித்யையுமாம், கடாக்ஷமும் வித்யையுமாம். முக்கண்கள், ருத்ரனுடையவை, எண் கண்கள் நான்முகனுக்கு. ஆயிரம் கண்கள் இந்த்ரனுக்கு. ஆசார்யன் நாராயணனின் அவதாரம். அந்தக் கண்ணுக்குள்ள மேன்மை மற்ற கண் களுக்கு இல்லை. ஆயிரங்கண்ணனான பகவானும் குருவின் கண்ணை முன்னிடாமல் ஒன்றும் செய்யான்.

2. உபநிஷத்துக்களில் காம்யங்களான வித்யைகளும் பல ஓதப் பெற்றன. மோக்ஷத்திற்கான ஒரு வித்யை ஸ்வதந்த்ர ப்ரபத்தி, இரண்டு வித்யை அங்க ப்ரபத்தியும் பக்தியும், இவற்றால் வரும் பலன் ஆயிரக்கணக்கான காம்யங்களால் வாரா.

3. உபநிஷத்தில் ப்ரஸித்தரான உத்தாலகர் யாஜ்வலக்யர் போன்ற பலர் பல மோக்ஷ வித்யைகளை யறிந்தவர் உண்டு. ஆயினும், ஒரு பக்தி வித்யையினால், அல்லது ஜீவாத்ம வித்யை பரமாத்ம வித்யை என்ற குரு உபதேசித்த இரண்டினால் வரும் பலன் பலவற்றைச் சேர்த்தால் வாரா. பல வித்யைகள் சேர்க்கப்படவாகா வாகையினால்.

4. குரு உபதேசித்த கர்மயோகமொன்றாலேயோ, சில அதிகாரி களுக்கான கர்மயோகம் ஞானயோகமென்ற இரண்டினாலுமோ வரும் ஜீவாத்ம தர்சனமென்ற பலன் வேறு பலவற்றைச் சேர்ப்பதால் பெறப்படமாட்டா.

5. ஆசார்ய மூலமாக அறியப் பெற்றால் தான் வித்யை நிறம் பெறு மாகையால் அதை நினைத்துச் சொல்வதுமாம். அதாவது ஒரு குருவின் த்ருஷ்டியினால், அல்லது சிந்தநாசார்யரும் வேறு உண்டாகில் இரு குரு த்ருஷ்டியினால் பெறும் பலன் ஆசார்யராகாத பலரின் த்ருஷ்டியினாலாகா.

6. நேர்குருவின் த்ருஷ்டியினால், அல்லது நேர்குரு, முதல் குருவான திருமால் என்ற இருவரின் இரு த்ருஷ்டியினால் ஆவது வேறு பலவற்றால் ஆகா.

7. மோக்ஷத்திற்காக குரு அனுஷ்டித்த ப்ரபத்தியினாலே, அசுத்தர்களையும் சுத்தமாக்கும் அவருடைய இரு கண்களாலும் பெறுவதை வேறு விதம் பெறலரிது.

8. எல்லோருக்கும் என்றும் குருவான பரமாத்மாவின் ஸங்கல்பமென்ற த்ருஷ்டி யொன்றால், ஜாயமாந கடாக்ஷமென்ற இரு கண்களால் பெறுவது வேறு வழியிற் பெறவாகாது.

9. குரு உபதேசித்த வித்யையினால் சாஸ்த்ரத்தின் பொருளைக் காண்பதாம். அதனால், அல்லது அதனாலும் அவர் அளித்த திவ்ய சக்ஷுஸ்ஸினாலும் பெறுவன வேறு விதம் பெறப்படமாட்டா.

10. குருவை தர்சனம் செய்வதால் அல்லது குருவை தர்சனமும் த்யானமும் செய்வதால் பெறுவதை வேறு வழியில் பெறுவதில்லை.

11. குருவின் த்ருஷ்டி ஒன்றோ இரண்டோ பெறும் மேன்மையை வேறு எக்கண்களும் பெறா. (9)

ज्ञानहीनस्य ज्ञानिसंगमात् शुद्धिरितीदं प्रस्तुतम् । तत्रानेके दृष्टान्ताः प्रदर्श्यन्ते—

रथ्यातोयं त्रिदशसरिता राजनीतिः सुकीर्त्या
काव्यालापस्त्रियुगकथया कायवान् आत्मबुद्ध्या ।
दारप्रीतिः प्रजननधिया जन्तुहिंसा मखेन
प्रज्ञाहीनः परहितविदा संगतः शुद्धिमेति ॥ ११ ॥

रथ्यातोयं वर्षाकाले वीथिषु वर्षात् प्रवहत् कश्मलं जलं **त्रिदशसरिता** गङ्गया संगतं शुद्धिमेति । उक्तं हि, "गङ्गाप्रवाहपतितस्य किमानिव स्यात् रथ्योदकस्य यमुनासलिलाद्विशेषः", "रथ्योदकमिव गङ्गाप्रवाहपातः पवित्रयति" इति च । एवं रथ्यातोयमिति पाठे अनुप्रासौचित्यमर्थौचित्यञ्च ; न तु नद्यास्तोयमिति पाठान्तरे । संगतशब्दे यथायथं लिङ्गविपरिणामेन **संगतः शुद्धिमेति** इत्यस्य प्रत्येकमन्वयः ।

1. **राजनीतिः** राजकार्यराज्यपरिपालनविधा, "एकया द्वौ विनिश्चित्य त्रींश्चतुर्भिर्वशे कुरु । पञ्च जित्वा विदित्वा षट् सप्त हित्वा सुखी भव" इत्युपादिष्टरूपा **सुकीर्त्या** संगता शुद्धिमेति । तदर्थस्तु—**एकया** बुद्ध्या **द्वौ** धर्मार्थौ विनिश्चित्य **त्रीन्** शत्रुमित्रोदासीनान् **चतुर्भिः** सामदानभेददण्डरूपैरुपायैः **वशे कुरु** । **पञ्च** इन्द्रियाणि जित्वा **षट्** संधिविग्रहयानासन द्वैधीभावसमाश्रयान् **विदित्वा सप्त,** 'मृगयाऽक्षाः स्त्रियः पानं वाक्पारुष्यार्थदूषणे । दण्डपारुष्यमित्येतत् महाव्यसनसप्तकम्' इति व्यसनानि **हित्वा** त्यक्त्वा सुखी भवेति । राज्ञां प्रजानुविधेयाचारत्वात् राजभिः सर्वप्रशस्यैर्भाव्यम् । **काव्यालापः** वेदस्मृतीतिहासपुराणेषु पठनीयेषु काव्यानां कथनं **त्रियुगकथया** त्रीणि गुणयुगानि ज्ञानबल-वीर्यैश्वर्य शक्तितेजोरूपाणि यस्य स षाड्गुण्यनिर्विर्व्यूहरूपी भगवान् । तद्विषयवृत्तेन संगततया शुद्धिमेति । भगवत्कथारूपत्वविरहे दोषावहस्य तत्कथारूपत्वे शुद्ध्यापादकत्वम् । **कायवान्** देहभृत्-जीवः **आत्मबुद्ध्या** जीवात्मपरमात्मज्ञानेन संगतः, "न हि ज्ञानेन सदृशं पवित्रमिह विद्यते", "क्षेत्रज्ञस्ये-

श्वरज्ञानाद्विशुद्धिः परमा मता" इत्यादिवचनात् शुद्धिमेति। दारेषु भार्यायां प्रीतिः प्रजननधिया वंशवृद्धये प्रजोत्पादनबुद्ध्या संगता शुद्धिमेति। 'धर्मप्रजार्थं वृणीमहे' इति संकल्प्य विवाहेऽपि आश्रमान्तरेऽपि धर्मसद्भावात्, पत्नीसापेक्षधर्मरूपधर्मविशेषपरत्वेऽपि अशक्त्या प्रजार्थत्वाभावे धर्ममात्रार्थ-विवाहे औचित्याभावात्, 'प्रजायै गृहमेधिनाम्' इत्यादिदर्शनात्, भोगार्थदारप्रीतिविशेषस्य धर्मार्थत्वा-पेक्षया प्रजार्थत्वे औचित्याच्च, विशेषधर्माकरणेऽपि एतावताऽपि विवाहस्य साफल्याच्च प्रजामात्रोक्तिः। जन्तूनां हिंसा मखे यज्ञेन संगता, "अहिंसन् सर्वा भूतान्यन्यत्र तीर्थेभ्यः" इति वचनात् जन्तूनामुत्कट-सुखहेतुतया शुद्धिमेति। यथैवम्, तथा प्रज्ञाहीनः पुरुषः परेषां हितम् आयत्यां क्षेमकरं यत् तद्विदा प्राज्ञेनाऽऽचार्येण संगतस्सन् शुद्धिं प्राप्नोति। 'कायवान् आत्मबुद्ध्या' इति ज्ञानवतो जीवस्योक्तत्वात् प्रज्ञाहीन इतीदं स्वयंज्ञानहीनत्वेऽपि प्राज्ञसंश्रयमात्रेण कृतकृत्यपुरुषपरं मन्तव्यम्। तथा च स्मर्यते "पशुर्मनुष्यः पक्षी वा" इत्यादि॥

அறிவிலி அறிவாளியின் சேர்க்கையால் தெளிவு பெறுகிறுனென் பதற்குப் பல த்ருஷ்டாந்தங்கள் கூறப்படுகிறன.

ரத்த்யாதோயம் த்ரிதசஸரிதா ராஜநீதி: ஸுகீர்த்யா
காவ்யாலாபஸ் த்ரியுககதயா காயவாந் ஆத்மபுத்த்யா |
தாரப்ரீதி: ப்ரஜநநதியா ஜந்துஹிம்ஸா மகே ந
ப்ரஜ்ஞாஹீந: பரஹிதவிதா ஸங்கத: சுத்திமேதி || 11 ||

1. தெருத் தண்ணீர் கங்கையில் கலந்தால் சுத்தி பெறுகிறது. ராஜ்ய பரிபாலன முறை சிறந்த புகழோடு சேர்ந்தால் சுத்தமாகும். காவ்யமியற்றல் படித்தல் பகவானின் வரலாறு விஷயமாகில் சுத்தமாம். உடல் பெற்றவன் உயிரை அறிந்தால் வினைகளெல்லாம் விலகும். சுத்தி பெறுவான். பார்யையினிடம் அன்பென்பது ப்ரஜைகளைப் பெறுவதற்காகில் சுத்தமாம். ப்ராணிகளை வதைத்தல் விதிக்கப்பட்ட யாகம் முதலானவற்றிலே மட்டும் சுத்தமாகும், (இவையெல்லாம் போல்) ஜீவன் தான் அறிவற்றவனுயினும் தனக்கு ஹிதம்—பிற்கால க்ஷேமத்திற்குத் உரிய உபாயம் அனுஷ்டிக்க வல்லானிடம் அண்டினுல் சுத்தி பெறலாம் (எனத் தெளிக.)

एवं सदाश्रितानां जनानां शोभनत्वमुक्तम्। अन्ते सदाश्रितानां हेयवत्प्रतीतानां धर्माणा-मपि शोभनत्वमाह—

विष्णुर्बन्धं प्राप्य व्यतनुत विमुक्तिं व्रजभुवां
स्वतन्त्रोऽसौ दूतः(धूर्तः) स्वयमजनि सूतश्च भजताम्।
प्रतिज्ञां स्वामौज्झत् स्वपदतटिनीसूनुसमरे
महद्योगात् प्रायो वहति महिमानं तदखिलम् (धिकम्)॥ १२॥

इति सदाश्रितपद्धतिरष्टमी।

1. **विभुः** सर्वेश्वरः अबन्ध्यः **बन्धं प्राप्य** नवनीतादिचौर्यहेतोः रज्जुभिरुलूखले **बद्धस्सन्** **व्रजभुवां** गोकुलगतानां तेनानुतप्तानाम्, अन्येषाञ्च संसारान्मुक्तिं यमलार्जुनवृक्षयोः व्रजभुवोः शापान्मुक्तिञ्च **व्यतनुत** व्यधात्। विमोचनशक्तिमत्त्वदशायामेव बध्यमानत्वमिति विशेषद्योतनाय, विभुर्बन्धं प्रापदित्येतावति अनुपरम्य व्यतनुतेत्याद्युक्तिः। **असौ** विभुः **स्वतन्त्रस्सन्नेव** स्वातन्त्र्ये सत्येव **भजतां** स्वस्मिन् भक्तिमतां प्रपन्नानां दूतः **सूतः** सारथिश्च समजनि। पाण्डवदूत्यं पार्थसारथ्यञ्च प्रसिद्धम्। दूत इत्यत्र **धूर्त** इति पाठ एव प्रायिकः। तदा **व्रजभुवां** गोपीनां धूर्त इति व्याख्येयम्। "यत् त्वत्प्रियं तदिह पुण्यमपुण्यमन्यत् नान्यत् तयोर्भवति लक्षणमत्र जातु। धूर्तायितं तव हि यत् किल रासगोष्ठ्यां तत्कीर्तनं परमपावनमामनन्ति" (53) इतीदं धूर्तत्वमपि महिमानं वहत्येव। दूत्यसारथ्ययोरेव सहप्रयोग इत्यपि न; "दूत्ये दुकूलहरणे व्रजसुन्दरीणाम्" इति यथायथं धूर्तत्वस्यापि घटनात्। परं तु महत्सु विद्यमानस्य कतिपयधर्मस्य पश्चात्तैरादियमाणत्वाय कथनमेवेह युक्तमिति परामर्शे धूर्तत्ववचनं नोचितम्। तस्य भगवत्येव मान्यत्वात्। किञ्च विभुत्वे मोचनशक्तत्वे च सति बद्धत्वं चित्रम्, स्वतन्त्रत्वे सति दूतत्वं सूतत्वञ्च चित्रम्; अनन्याधीनत्वरूपे स्वातन्त्र्ये सत्येव अन्याधीनत्वाश्रयणं हि चित्रमेवेति दूत इति पाठे उपपादनवत् धूर्त इति पाठे न भवति। प्रत्युत स्वातन्त्र्यस्य धूर्तत्वपोषकत्वमेव। अतो दूत इति पाठः साधीयानिति भाति। **व्यतनुते**ति भूतकालप्रयोगात् पूर्वार्धे एव व्रजभुवामित्येतदन्वयो घटत एव। तन्मुक्तिप्रदानार्थमेव तदा तद्बद्धत्वमादृतमिति। स्वकृतप्रतिज्ञाभंगं स्वकृतमप्याह **प्रतिज्ञामि**ति। स्वस्य विष्णोः **पदं** पदारविन्दम्; तत्संबन्धिनी **तटिनी** नदी विष्णुपदी। तस्याः सूनुः गाङ्गेयो भीष्मः, तेन सहार्जुनस्य **समरे** युद्धे, नाहमायुधं गृह्णीयामिति स्वकृतां प्रतिज्ञां विभुरौज्झत्। भीष्मकृतं शरप्रहारमसोढवति पार्थे विह्वले स्वयमेव भीष्मं जिघांसुश्चक्रभ्रमणपूर्वकं रथादवततार अवतारपुरुषः। यदाह भीष्मः, "स्वनिगममपहाय मत्प्रतिज्ञाम् ऋतमधिकर्तुमवप्लुतो रथस्थः" इति। तत् पूर्वोक्तं बद्धत्वदूतत्व सूतत्व प्रतिज्ञात्यागरूपं सर्वं महति श्रीकृष्णे योगात् महिमानं वहति।

तदधिकमित्यत्र **तदखिल**मिति पाठ इति स्मर्यते। दृश्यमानस्तु संप्रति **तदधिक**मित्येव। व्याख्याने च तदधिकमित्येव पठ्यते, अर्थस्तु नोक्तः। अत्र पुरुष इति कर्तुरध्याहारस्य तत्र कृतत्वात् **तदि**त्यस्य तस्मादित्यर्थः तैर्वक्तुं शक्यः। पादत्रयोपपादितहेतुना लोके पुरुषः **महद्योगात्** महापुरुषसंबन्धात् **अधिकं महिमानं** वहतीति वर्णनसंभवात्। एवमर्थस्य कवीष्टत्वे **प्राय** इति पदस्थाने कर्तृवाचकं **लोक** इत्यादिपदमेव प्रयुक्तं स्यात्। **अधिक**मिति पदमप्यधिकमेव लक्ष्यते। **प्राय** इति तु श्रीकृष्णकृतस्य सर्वस्य स्वीकार्यत्वं मा भूदिति तत्तदर्हमात्रग्रहणशिक्षणाय। अत्र व्याख्याने अन्योपि कश्चिदपपाठस्तृतीयपादे। **स्वपदतटिनीस्नानविधिना** इति पाठमादृत्य-गङ्गास्नानविधिना स्वप्रतिज्ञात्याग इत्यर्थः, प्रतिज्ञा च 'भक्त्या त्वनया शक्यः' इति भक्तिमात्रान्मोक्ष इति, तद्भङ्गश्च गंगास्नानान्मुक्तिविधानात् कृतो भवतीति विवरणात्। अत्र गङ्गास्नानादेव मुक्तिरिति विवक्षितसाधकप्रमाणे दर्शयितव्ये, "तद्भक्ति-

विप्लवपात् त्वं गङ्गे मां मोचयैनसः'' इति भक्तितुल्यत्वाभावसाधकवचनोपन्यासोऽप्ययुक्तः । भक्तिवत् गङ्गास्नानस्य साक्षान्मोक्षसाधनत्वस्यापसिद्धान्तत्वादपीदमयुक्तम् । अस्माभिस्तु पुरुषपदानध्याहारेण सदाश्रितधर्मविषयतयैव व्याख्यानात् तदुचिततया श्लोकस्यावतारिकाऽप्यन्या दर्शितेत्यलम् ।

விபுர் பந்த்தம் ப்ராப்ய வ்யதநுத விமுக்திம் வ்ரஜபுவாம்
ஸ்வதந்த்ரோऽஸௌ தாத: (தார்த்த:) ஸ்வயமஜநி ஸூதச்ச பஜதாம் |
ப்ரதிஜ்ஞாம் ஸ்வாம் ஔஜ்ஜத் ஸ்வபததடிநீ ஸூநு ஸமரே
மஹத்யோகாத் ப்ராயோ வஹதி மஹிமாநம் ததகிலம் (தததிகம்) ||

1. ப்ரபுவான கண்ணன் கோகுலத்தில் வெண்ணெயைக் களவு கொண்டதால் கட்டுண்டான். அதனால் அப்போதே இரு மருத மரங்களை முறித்து சாபம் தீர்த்தான். கண்டு உருகிய கோபிகளுக்கும் மஹான்களுக்கும் மோக்ஷமும் அளித்தான். மேலும் தான் ஒருவருக்கு அடிமையாகாதவனாயிருந்தே தன்னை நம்பியவர்களுக்குத் தூதனும் தேர்ப்பாகனுமாய் நின்றான். (சிலர் கற்பு அழிப்பவனென்.) தானே ஆயுதமெடுப்பதில்லை என்று ஆணையிட்டிருந்தும் பீஷ்மரோடு போர் புரிந்த போது அதை விட்டான். திருவாழியைச் சுழற்றிக் கொண்டு எழுந்து பீஷ்மரிடம் அணுகினனே. இவை யெல்லாம் பொருந்தாதவையானாலும் பெருமைக்கேயாயின. ஏன்? மஹானான கண்ணனிடம் ஏற்பட்டதால். ஆகையால் மஹான்களைச் சேர்ந்ததெல்லாம் பெரும்பாலும் மதிக்கத் தக்கதேயாகும்.

ஸதாச்ரித பத்ததி முற்றும்.

नीतिमत्पद्धतिर्नवमी (९)

अस्यां पद्धतौ राजनीतेः प्राधान्यम् । अतो नीतिमान् राजा प्रतिपाद्यः । अर्थान्तराण्यपि यथासंभवं ग्राह्याणि । राज्ञां संपदपेक्षत्वात् तत्स्थैर्ये कारणं प्रथममाह—

विक्रमाक्रान्तभुवने समे षाड्गुण्यशालिनि ।
भजति स्थिरतां लक्ष्मीः कस्मिंश्चित् पुरुषोत्तमे ॥ १ ॥

1. **विक्रमेण**—स्वपराक्रमेण आक्रान्तं स्वायत्तीकृतं भुवनं लोकः येन तस्मिन् । यस्य पराक्रमो जगद्विदितः, यश्च पराक्रमेण स्ववशं सर्वमकरोदित्यर्थद्वयमपि यथायथं ग्राह्यम् । **समे**–''द्वेष्योऽपि संमतः शिष्टस्तस्यार्तस्य यथौषधम् । त्याज्यो दुष्टः प्रियोऽप्यासीत् अङ्गुलीवोरगक्षता' इत्यादिरीत्या बन्धवबन्ध्वादिविभागं विना सुगुणदुर्गुणविभागेन निग्रहानुग्रहप्रवर्तके । **षाड्गुण्यशालिनि** संधिविग्रहयानासन द्वैधीभावसमाश्रयरूपान् षड् गुणान् शालति गच्छतीति तथाभूते । **कस्मिंश्चित्** दुर्लभे **पुरुषोत्तमे** श्रेष्ठपुरुषे नरपतौ **लक्ष्मीः** संपत् स्थिरताम् अभङ्गुरत्वं भजते ।

2. अत्र श्रीराम उदाहरणम्—**विक्रमेण** पादसञ्चारेण आक्रान्तं भुवनं दक्षिणदेशो येन, यद्वा वेः पक्षिणः काकासुरस्य क्रमेण लोकत्रयसञ्चारेण आक्रान्तभुवने अहो तृणे कृतब्रह्मास्त्राभि-

मन्त्रणस्य रामस्य प्रभाव इति लब्धवीर्यप्रख्यातौ। अथवा **वेः** पक्षिणो जटायुषः **क्रमेण** 'मया त्वं समनुज्ञातो गच्छ लोकान् अनुत्तमान्' इति रामाज्ञया, "यदतः परो दिवो ज्योतिर्दीप्यते अनुत्तमेषु उत्तमेषु लोकेषु" इति प्रसिद्धानुत्तमलोकरूपपरमपदयानेन आतिवाहिकदेवादिदृष्टेन भुवनव्याप्तपारम्यप्रसिद्धौ, **समे** "भगवति भरद्वाजे भुक्तिस्तथा शबरीगृहे प्रभुरनुसृतो विश्वामित्रः प्लवङ्गपतिस्तथा" (संकल्प. ६. १७) इत्युक्तसाम्यवति वानरराक्षसाद्यविशेषेण राज्यं प्रदाय तत्तत्कुलधर्मस्थापके। **षाड्गुण्यशालिनि** "आनृशंस्यमनुक्रोशः श्रुतं शीलं दमः शमः। राघवं शोभयन्त्येते षड् गुणाः पुरुषोत्तमम्' इति अवतारसमयप्रसिद्धाद्भुतगुणषट्कगौरविते। **पुरुषोत्तमे** 'रामो विग्रहवान् धर्मः' इति मर्यादापुरुषोत्तमे **कस्मिंश्चित्** सकृत्प्रपन्नजनसंरक्षणदीक्षिते **लक्ष्मीः** सीतात्याग-लक्ष्मणत्याग-चराचरमोक्षणादिना सनातनधर्मसंरक्षणसंपत् स्थिरतां भजति।

3. साक्षात् भगवत्परत्वमपि—**विक्रमेण** त्रिविक्रमावतारे पदन्यासेन आक्रान्ताधरोत्तरसर्वलोके, **समे** 'समोऽहं सर्वभूतेषु' इति प्रसिद्धे, अत एव बलिनोऽनुग्रहाय याचनप्रवृत्ते **षाड्गुण्यशालिनि**, 'ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः' इत्युक्तगुणषट्कवति **कस्मिंश्चित्** अद्वितीये चेतनाचेतनविलक्षणे **पुरुषोत्तमे**, "क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते। उत्तमः पुरुषस्त्वन्यः" इति गीते **लक्ष्मीः** श्रीर्देवी **स्थिरताम्** "नित्यैवैषा जगन्माता विष्णोः श्रीरनपायिनी' इत्युक्तामनपायितां भजति ॥

விக்ரமாக்ராந்த புவநே ஸமே ஷாட்குண்யசாலிநி |
பஜதி ஸ்த்திரதாம் வக்ஷ்மீ: கஸ்மிம்ச்சித் புருஷோத்தமே || 1 ||

1. தனது பராக்ரமத்தினால் உலகமெங்கும் பரவினவனும், பந்துக்கள், பிறரென்ற வாசியின்றி தண்டிப்பவரை தண்டிப்பது, குணமுள்ளவருக்கு வெகுமதி செய்வது என்றவாறு எல்லோருக்கும் ஸமமானவனும், இணைதல், போர்புரிதல், புறப்படல், நிற்றல், பிரிதல், அண்டுதல் என்ற ஆறு ராஜகுணங்களைத் தக்கவாறு செலுத்துகின்றவனுமான சிறந்த அரசனிடம் ராஜ்யம் நிலைக்கும்.

2. தன் பராக்ரமத்தினாலும், தென்தேசம் கடந்து ஸஞ்சாரம் செய்ததாலும் காகாசுரனுக்குப் புல்லை ப்ரஹ்மாஸ்த்ரமாக்கியதாலும் ஜடாயுவுக்கு மோக்ஷம் அளித்ததாலும் உலகப்ரஸித்தராய், மஹர்ஷி, சபரி, குரங்கு, அரக்கன், அரசன், வேடன் என்ற வேறுபாடில்லாதவராய், தயை, ஆவாவென்றல், கல்வி, நீர்மை, இந்த்ரியநிக்ரஹம், மனவடக்கம் என்ற ஆறு குணங்களுக்குக் கொள்கலமுமாகித் திகழ்ந்த மர்யாதா புருஷோத்தமரான ஸ்ரீராமரிடம் ஸநாதநதர்மஸ்த்தாபனச் செல்வம் சிறப்பாக நின்றது.

3. த்ரிவிக்ரமாவதாரத்தில் உலகமளந்தானும் அசுரனை மாவலிக்கும் அருள் புரிய ஸமமாக நின்றவனும், ஜ்ஞானம் சக்தி, பலம், ஐச்வர்யம், வீர்யம், தேசு என்ற ஆறு குணங்களின் ப்ரஸித்தி பெற்றவனும் பத்த ஜீவர்கள், முக்த ஜீவர்கள் எல்லோருக்கும் மேம்பட்டவனுமான ஸர்வேச்வரனிடமே, அகலகில்லேன் இறையுமென்று அலர்மேல்மங்கை உறைகின்றாள்.

अत्र पद्धतौ द्वितीयः श्लोकः पार्थिवानामित्येष एव। मध्ये कश्चन श्लोकं शिक्षकपुरुषसंबोधनेन प्रवृत्ततया पूर्वोत्तरविलक्षणमपि केचित् पठन्ति। तथासति इतरपद्धतिवैलक्षण्येन एकः श्लोकोऽधिकः स्यात्। व्याख्याने प्रथमश्लोकोक्तषाड्गुण्यादिविवरणार्थमुपात्तः गहनत्वात् व्याख्यातश्च स श्लोकः पश्चात् कैश्चित् व्याख्यानदर्शनात् पृथक् कृतः स्यात्। श्लोकोऽयं पूर्वपद्धतौ(॥) 'राजनीतिः सुकीर्त्या' इत्यत्रोपादाय अस्माभिर्व्याख्यातः। अर्थान्तरमप्यस्य संभवतीति दिक्प्रदर्शनायात्रापि विलिख्यान्यैरनुक्तमेकमर्थान्तरं वर्ण्यते—

"एकया द्वौ विनिश्चित्य त्रींश्चतुर्भिर्वशे कुरु।
पञ्च जित्वा विदित्वा षट् सप्त हित्वा सुखी भव॥"

एकया लोकानुभवजनितविवेचनबुद्ध्या द्वौ देहं तदतिरिक्तमात्मानञ्च विनिश्चित्य विविक्तत्वेन दृढं बुद्ध्वा अन्येषामात्मक्षेममार्गाणां बाह्यानामाभासमूलकत्वात् त्रीन् वेदान् चतुर्भिः अधीतिबोधाचरणप्रचारणैः वशे कुरु। अथ पञ्च इन्द्रियाणि जित्वा, षट् प्राप्य-प्राप्तृ-प्राप्त्युपाय-फल-विरोधिरूपार्थपञ्चकं भगवता प्रपञ्चस्य शरीरात्मभावसंबन्धञ्च विदित्वा ज्ञात्वा सप्त लोकान् संसारभूतान् हित्वा नित्यविभूतिं प्राप्य सुखी भवेति।

இங்கே சிலர் கீழ்க்கண்டவாறு இரண்டாவது சுலோகம் சேர்க்கின்றனர். ஒவ்வொரு பத்ததியிலும் 12 ச்லோகங்களேயாகையால் இதனைச் சேர்க்கலாகாது. வேறிடத்தில் உள்ள அந்த ச்லோகத்திற்கு உரைகாரர் எழுதிய ராஜநீதி விஷயமான பொருளைக் கூறி அவர்கள் சொல்லாத வேறொரு பொருளும் இங்கே கூறுவம். ஆனால் இது இப் பத்ததியின் ச்லோகமாகாது. அந்த ச்லோகமாவது—

ஏகயா த்வௌ விநிச்சித்ய த்ரீந் சதுர்ப்பிர் வசே குரு |
பஞ்ச ஜித்வா விதித்வா ஷட் ஸப்த ஹித்வா ஸுகீ பவ || என்றதாம்.

1. புத்தியொன்றால் அறம் காமமென்ற இரண்டையும் உணர்ந்து சத்ரு, மித்ரன், உதாஸீநன் என்ற மூவரை ஸாமம், தானம், பேதம் தண்டம் என்ற நான்கு உபாயங்களால் வசமாக்கிக் கொள். ஐந்து இந்த்ரியங்களை வென்று, ஸந்தி விக்ரஹம் யாநம் ஆஸநம்-த்வைதீபாவம் ஸமாச்ரயம் என்ற ஆறு குணங்களை அறிந்து, ஏழு வ்யஸனங்களை விட்டு ஸுகமாக வாழ்க என ராஜநீதி விஷயமான பொருள். இதற்கு வேறு பொருளாவது—உலகத்தின் அனுபவத்தினின்றே உடல் வேறு உயிர் வேறென்று அறிந்து, உயிர் உய்ய வழி வேறொன்றும் சரியில்லையென்று மூன்று வேதங்களையும் ஓதியறிந்து அனுஷ்டித்து ப்ரசாரம் செய்து, ஐங்கருவிகளையும் வென்று அர்த்தபஞ்சகமென்ன பரமாத்மாவுக்கும் மற்றவற்றிற்கும் உள்ள உறவென்ன, இவ் ஆறும் தெளிந்து, ஏழுலகினையும் விட்டு உயர்பதமேறி உயர்ந்த வாழ்க்கையைப் பெறுக என்பதாம்.

अच्छिद्रत्वमावश्यकमिति द्वितीयश्लोकेनाऽऽह—

पार्थिवानां पदार्थानां स्वभूत्या चक्रवर्तिनाम्।
जनयत्यचिराद् भेदं छिद्रेण महताऽन्वयः॥ २॥

1. **पदार्थानां पदं** राजस्थानमुत्कृष्टम् अर्थयमानानाम् , पदं तत् अर्थः-प्रयोजनं येषामिति वा । स्वस्य **भूत्या** संपदा ऐश्वर्यशक्त्या **चक्रं** परिपाल्यदेशं जनचक्रं **वर्तयतां** यथावत् प्रवर्तयतां **पार्थिवानां** राज्ञाम्, **मिथो** मित्रतया सम्यक् स्वदेशपरिपालकत्वेऽप्यधिकापेक्षिणां नृपाणां **महता** दुष्परिहरेण **छिद्रेण** आपत्प्रवेशावकाशेन **योगः** संबन्धः **अचिरात्** अविलम्बेन **भेदं** मिथो विरोधं जनयति ।

2. **स्वभूत्या । भूतिः** उत्पत्तिः । स्वोत्पत्तिहेतुना । प्रयोजनस्य हेतुत्वविवक्षा । अध्ययनेन वसतीतिवत् । **चक्रवर्तिनाम्** कुलालभ्राम्यमाणे चक्रे उत्पत्त्यवसरे पिण्डतत्परिणामरूपेण स्थितानां **पार्थिवानां** मृद्विकाराणां **पदार्थानां** मृत्त्वादेव **पदं** त्राणमपेक्षमाणानां विशरणस्वभावानां घटादिवस्तूनां **महता** कुलालानवधानवशादधिकेन । घटस्य सावयवत्वात् अन्तर्निक्षिप्तेन जलेन बहिरार्द्रभावदर्शनात् अल्पच्छिद्रत्वं सर्वतः सहजम् । तदधिकं तु छिद्रं वस्तुनाशायेत्याशयेन **महते**त्युक्तम् । **छिद्रेण योगः** संबन्धः क्रमेण तेषां **भेदं** भिन्नत्वं जनयतीति ।

3. **पार्थिवानां** पृथिवीत उत्पन्नानां व्रीहितण्डुलादीनां **स्वभूत्या** सु अभूत्या-शोभनाय अभवनाय स्वरूपान्यथाभावाय । एषां भेदनं चूर्णीभावश्च भोज्यवस्तूत्पादनाय भवतीति अभूतेः शोभनत्वम् । तदर्थं भेदनचूर्णनाद्यर्थं **चक्रवर्तिनाम्** चक्रवद्यन्त्रनिक्षिप्तानां **छिद्रेण महता** यन्त्रे धान्यप्रक्षेपस्थानात् चूर्णीभवनपर्यन्तगामिना च्छिद्रेणान्वयः क्षिप्रमेव **भेदं** शकलीभावं जनयेत् ।

பார்த்திவாநாம் பதார்த்தாநாம் ஸ்வபூத்யா சக்ரவர்த்திநாம் |
ஜநயத்யசிராத் பேதம் சித்ரேண மஹதாऽந்வய: || 3 ||

1. மேன்மேல் பதங்களை விரும்புகின்ற அரசர்கள் தம் ஐச்வர்யத்தினல் நன்கு உலகம் ஆள்பவராயினும் விலக்கமாட்டாதபடி விரோதத்திற்கு இடம் உண்டாக, அது ஒருவருக்கொருவர் பிளவுக்குக் காரணமாகும்.

2. தாம் உண்டாவதற்காகக் குயவனின் சக்ரத்தில் ஏறிய மண்ணல் ஆகின்ற குடம் முதலிய வஸ்துக்கள் கவனமாகக் காக்கவேண்டியவை, இயற்கைக்கு மேலாகப் புரசல் உற்ருல் தாமதமின்றி உடைந்து விடும்.

3. பூமியில் உண்டான நெல், கோதுமை, அரிசி முதலான தானியங்கள் ஜனங்களின் நன்மைக்கான தம் நிலைகுலைதலுக்காகச் சக்ரம் கொண்ட யந்திரங்களில் வைக்கப்பட, அவற்றிற்கு அங்கே பெரிய சந்து வழியாக உடைக்கவும் அரைக்கவுமான யந்த்ரத்தில் புகுதல் பலவாகப் பிரிதலுக்கு, ரவை மாவு என்ருற் போலாகைக்குக் காரணமாகும்.

दण्डधरत्वमात्रेण राज्ञामयशो न भवति, सामर्थ्यसाधकत्वात् इति यमदृष्टान्तेनाऽऽह—

सदसन्तौ विचिन्वानः समवर्ती शमप्रदः ।
अपि दण्डधरो नित्यं लोकपालः स दक्षिणः ॥ ४ ॥

1. **समवर्ती समं** निष्पक्षपातं वर्तमानत्वात् समवर्तीति कथ्यमानः **सः** ब्रह्मवित्तया काठकादौ प्रसिद्धः **लोकपालः** दिक्पालकः मृत्युः **सदसन्तौ** सत्पुरुषासत्पुरुषौ, पुरुषगतसद्गुणदुर्गुणौ, धर्माधर्मौ

च विचिन्वानः परिशीलयन्नपि, शमप्रदः मरणप्रदोऽपि, शमप्रदः पापनाशदश्च दण्डधरोऽपि यथायथं यातना अनुभावयन्नपि नित्यं दक्षिण एव, न तु वामो भवति। दक्षिणशब्दे श्लेषः। दक्षिणदिक्पालकत्वात् दक्षिणत्वम्; समर्थत्वाच्च।

2. लोकपालः जनपदजनपालको राजा शमप्रदः क्षोभं परिहृत्य शान्तिं पुष्णन् समवर्ती स्वजनपरजनाविशेषेण सदसन्मानभावनया वर्तमानः असत्सु दण्डधरस्सन्नपि न गर्ह्यते; किंतु दक्षिण एव भवति। अपिशब्दः समुच्चये वा। दण्डधरत्वमपि समवर्तित्वादिवत् दक्षिणत्वलोकपालत्वसाधकमिति। सदक्षिणः येभ्यो दक्षिणा देया, तेभ्यस्तद्दाता च। तथा जनेषु दाक्षिण्यवांश्च भवति।

3. कुटुम्बी गृहस्थ, शिष्यजनपालकः आचार्यो वा सदसन्तौ ब्रह्मज्ञानवान् तद्रहित इति भेदं पश्यन्। मया सहितः समः श्रियः पतिः; तत्र वर्तमानः ब्रह्मनिष्ठः। शमप्रदः स्वानुष्ठानेन सर्वेषां शान्तिगुणसंक्रामकः 'स्खालित्ये शासितारम्' इत्युक्तरीत्या दण्डधरोऽपि रक्षकत्वात् तत्तदात्मक्षेमजागरूकत्वात् दक्षिण एव। सदक्षिणः प्रदक्षिणीकर्तव्यो भवति।

4. सर्वेश्वरः सदसन्तौ नित्यसत्ताश्रयचेतनं तद्भिन्नं परिणामास्पदमचेतनञ्च सत्यञ्चानृतञ्चेति श्रुत्या विष्णुपुराणोक्तरीत्या च सदसच्छब्दवाच्यौ तत्तत्कार्यनिर्वहणाय परिशीलयन् 'समोऽहं सर्वभूतेषु' इति स्थितः समैः स्वतुल्यैः 'सवयस इव ये नित्यनिर्दोषगन्धाः" इत्युक्तैः सह परमपदे वर्तमानश्च, "तानि सर्वाणि संयम्य युक्त आसीत मत्परः" (२. ६१) इति दिव्यमङ्गलविग्रहध्यानेनेन्द्रियनिग्रहप्रदः, सर्वं खल्विदं ब्रह्मेति शान्तिदश्च, दण्डधरोऽपि पापफलप्रदोऽपि सदक्षिणः दक्षिणाविशिष्टः लोकपालो भवति। "सह यज्ञैः प्रजाः सृष्ट्वा" इति यज्ञैः सह सर्वसृष्ट्या यज्ञाङ्गदक्षिणायाः प्राधान्यस्य पूर्वं नारदप्रश्नोत्तरवर्णनावसरे (६. ४. २८४. पुटे) श्रीकृष्णोक्ततया दक्षिणाविशिष्टतया स्वयं मान्यो भवन् सदक्षिणाकयज्ञाराध्यो भवन् लोकान् रक्षति, "एष सर्वेश्वर एष लोकपाल एष सेतुर्विधरण एषां लोकानामसंभेदाय" इति श्रुतेः॥

ஸதஸந்தௌ விசிந்வாந: ஸமவர்த்தீ சமப்ரத: |
அபி தண்டதரோ நித்யம் லோகபால: ஸ தக்ஷிண: || 4 ||

1. குணதுர்குணங்களை ஆராய்கின்றவனும், ஸமமாக நடந்து கொள்கின்றவனும், மரணம் அளிப்பவனும், பாபங்களுக்கேற்ப நரக யாதனைகளைச் செய்கின்றவனுமான யமனென்ற திக்பாலகன் தக்ஷிணனேயாகிறான். வாமன், வக்ரன்—என்று யாரும் சொல்லார். தக்ஷிணனென்றால் யோக்யன் ஸமர்த்தனென்றும் தெற்கில் உள்ளவன் என்றும் பொருளாம்.

2. லோகபாலன்—ஜனங்களைக் காக்கும் அரசன், நல்லவன் கெட்டவன் குணம் தோஷம் எல்லாம் ஆராய்பவனாய், எல்லோரிடமும் ஸமமாக இருப்பவனாய், உலகில் அடக்கம் அமைப்பவனாய், குற்றத்திற்குத் தக்க தண்டனையிடுகின்றவனாகிலும் ஸமர்த்தனேயாவான் தாக்ஷிண்யமுமுள்ளவனேயாவான்.

3. குடும்பம் நிர்வஹிக்கும் க்ருஹஸ்த்தனோ, பல சீடர்களுக்கு ஆசார்யனாயிருப்பவனோ, ப்ரஹ்ம ஜ்ஞானமுள்ள ஸத்துக்கள் மற்றோர் என்ற வகுப்புக்களை ஆராய்ந்து, லக்ஷ்மீ ஸமேதனானபடியால் ஸம என்று சொல்லப்படும் பகவானிடம் நிஷ்டையுடையனாய், பிறர்க்கும் சாந்தி முதலான குணங்கள் பரவும்படி நடந்துகொண்டு, தன்னைச் சார்ந்தாரிடம் தவறு இருக்குமாகில் தடையின்றி தண்டிப்பவனுமாகி எல்லாரிடமும் தாக்ஷிண்யம் உள்ளவனுமாகின்றவன் உலகம் காப்பவனாவான்.

4. சேதநம் அசேதநம் என்ற அந்தந்த ஸத்து அஸத்து என்ற வஸ்துக்களின் நிலையை ஆராய்ந்து எங்கும் ஸமனாய், தன்னையுபாஸிப்போர்க்கு சாந்தி அளிப்பவனாய் பாபங்களுக்கு தண்டனையும் செய்து உலகம் காப்பவனாய், யஜ்ஞங்களை விதித்து அவற்றிற்கு முக்கியமான தக்ஷிணையுடன் அவற்றால் ஆராதிக்கப்படும் தன்னையே உயர்ந்த வஸ்துவாக அறிவித்து விளங்குகிறான். (6-4ல் 285ம் பக்கத்தில் ஸ்ரீக்ருஷ்ண நாரத ஸம்வாத வரலாற்றை இங்குக் கொள்க.)

राजर्षेर्भगवत्तद्भक्तश्रेष्ठतुल्यतां भावयति यमिति । श्लोकमिममष्टमत्वेन च गणयन्ति ।

यमेनोपक्रमे जानन् विश्वाधीशं व्यवस्थितम् ।
सामादिषु च तत्त्वज्ञः स न कः सिद्धिमर्हति ॥ ५ ॥ ६

1. **यं** राजानम् **एनोपक्रमे** एनसां—पापानामपनयने । स्वयं पापास्पर्शे प्राप्तपापपरिहरणे च प्रकृतीनाञ्च तथात्वे **व्यवस्थितं** लब्धव्यवस्थं शास्त्रचक्षुषं तेन हेतुना **विश्वाधीशं** साक्षाद्विष्णुम् , यद्वा सर्वजगदाधिपत्यस्याप्यर्हम् प्रजाः **अजानन्** जानन्तिस्म, सः तथा भावितः **सामादिषु** सामदानभेददण्डरूपोपायेषु **तत्त्वज्ञः** प्रयोक्तव्यक्रमाभिज्ञश्च भवन् कः **सिद्धिं नार्हति** तादृशः सर्वोऽप्यभीष्टसंपन्नो भवतीत्यर्थः ।

2. **सनक** इति वर्णत्रयं पदत्रयं कृतम् । अथैकं पदं सत् सनकाख्यं ब्रह्मपुत्रं योगिनमाह । श्रीभागवते (1-13) सनकादिभिर्हिरण्यगर्भः योगस्य सूक्ष्मां गतिं पृष्टः स्वयमपारयन् भगवन्तं दध्यौ । स हंसरूपेणाविर्भूय सनकादिभ्यः आत्मनो देवादिदेहातिरेकं विषयासङ्गं सर्वात्मसाम्यं स्वस्य ध्येयत्वञ्च यथावदुपदिदेश । तेन सनकादयः सिद्धा आसन् । तदत्रोच्यते—**यमेनोपक्रमे** इत्यत्र **यमेन उपक्रमे** इति च्छेदः । **यमः** सत्यास्तेयाहिंसाब्रह्मचर्यापरिग्रहरूपः । सः यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिरूपाष्टांगयोगे उपक्रमभूतः । **उपक्रमे** प्रारम्भ एव, विवाहादौ प्रवृत्तिं विना योगानुष्ठानार्थं **यमेन** यमरूपप्रथमाङ्गेन **उपक्रमे** योगारम्भकृते योगं तत्त्वं यथावज्जिज्ञासुना सनकेन पितरि पृष्टे, तस्मिंश्च तदर्थं भगवन्तं ध्यातवति, **व्यवस्थितं वौ** हंसे पक्षिणि अवस्थितं तद्वाहनं पितरं **विश्वाधीशं** विश्वसृष्टिव्यापृतं जानन् , तदा आविर्भूय **व्यवस्थितम्**–**विः**–पक्षी हंसः तद्रूपेण अवस्थितञ्च **विश्वाधीशं** विष्णुरूपेण जानन् तदुपदेशबलात् **सामादिषु**–समानां भावः सामम्–समत्वम् , सर्वात्मनां ज्ञानानन्दादिरूपतया साम्यम्–**आदिना** असंग-देहातिरिक्तत्व-फलान्तराल्पास्थिरत्वादिग्रहणम् । तेष्वंशेषु **तत्त्वज्ञः** "असत्त्वादात्मनोऽन्येषां भावानां तत्कृता भिदा" इत्याद्युपदेशबलात् यथावद्ज्ञातवान् **सनकः** योगनिष्पादनप्रावण्यलाभात् सिद्धिमर्हति ।

3. भगवद्विभूतिषु ब्रह्मरुद्रेन्द्रादीनां महिमातिशय उच्यते-सामवेदे छान्दोग्ये मधुविद्यायां वस्वादित्याद्यन्तर्यामितया परमात्मोपासनमुक्तम् ; कौषीतकिब्राह्मणे प्रतर्दनविद्यायामिन्द्रान्तर्यामितया ; अथर्वशिरसि रुद्रान्तर्यामितया । एवं तत्रतत्र । तदयमर्थः-सामादिषु वेदेषु उपासकाः यम् आदित्यमिन्द्रमन्यं वा तं तं देवं विश्वाधीशं व्यवस्थितम् तदन्तर्यामितया स्थिताभिन्नम् एनोपक्रमे अनादिसञ्चितपुण्यपापात्मकसर्वविधपाप्मापहतौ निमित्ते, अजानन् । तत्र व्यवस्थितं सर्वपापविमोचनासाधारणकारणम् विश्वाधीशं भगवन्तं यदन्तर्यामित्वेनोपासते इति वाऽर्थः । सः आदित्यादिः स्वयमपि तत्त्वज्ञः स्वस्य भगवदन्तर्यामिकस्वरूपं तत्त्वमुपासीनः को वा सिद्धिं नार्हति । तदन्तर्यामितयोपासकोऽन्योऽपि मोक्षं लभते चेत्, स एव स्वान्तर्यामितयोपासीनः कथं मोक्षं न लभेत । एवमुपास्यकोटिनिवेशस्तस्यतस्य महिमेति ॥

யமேநோபக்ரமே ஜாநந் விச்வாதீசம் வ்யவஸ்த்திதம் |
ஸாமாதிஷு ச தத்வஜ்ஞ: ஸநக: ஸித்திமர்ஹதி || 4 ||

1. யம்-ஏநோபக்ரமே-அஜாநந் எனப் பதப்பிரிவாம். பாபங்களைப் போக்குவதில் நிலையுற்றவனுன எந்த அரசனை உலகுக்கெல்லாம் நாதனுன விஷ்ணுவாக ப்ரஜைகள் நினைத்தாரோ, அப்படிப்பட்டவன் ஸாம தாநபேத தண்டங்களாம் உபாயங்களின் உண்மை யறிந்தவன் எவன் தான் பலஸித்தியைப் பெருன்.

2. யமேந-உபக்ரமே-ஜாநந் எனப்பதப்பிரிவுமாம். வ்யவஸ்த்திதம் என்பதை வி-அவஸ்த்திதம் எனப்பிரித்து ஸமாஸம். இது ஸநகரென்ற யோகி விஷயம். ஸநகரென்ற யோகி யோகம் தொடங்க யமம் என்பதில் இழிந்து தமப்பனுன பிரமனை யோகதத்துவம் தெரிவிக்க வேண்டினுர். அவன் விஷ்ணுவை நினைத்தான். விஷ்ணு ஹம்ஸமாக அவதரித்து அவர் களுக்கு உபதேசித்தான். யமமாவது—அஷ்டாங்கயோகத்தின் முதல் அங்கம். அதாவது—அஹிம்ஸை, கொள்ளைகொள்ளாமை, உண்மைபேசுதல், ஸத்ரீஸங்கமின்மை, அதிகவஸ்துக்களைப்பெருமை என்ற ஐந்துமாம். இதைத்தொடங்கி, தமப்பன் பக்ஷியான அன்னத்தை வாஹனமாகக்கொண்டு உலகப்படைப்பில் இழிந்தவனெனக் கண்டு, பிரமனின் கோரிக்கையால் அன்னமாக அவதரித்தான் விஷ்ணு என்பதையும் கண்டு, ஸாமாதிகளின் தத்துவம் உணர்ந்தார் ஸநகர். அவர் ஸித்தி பெற உரியவர். ஸாமாதிகளாவன-ஸாமம்-ஸமத்வம்-எல்லா ஆத்மாக்களும் ஸமமாயிருக்கையும். தேஹத்தைவிட வேருகையும்; விஷயங்களின் இன்பம், அற்பம், அஸத்திரம் என்றுற்போன்றவெல்லாமும்.

3. ஸாமவேதம் முதலான உபநிஷத்துக்களிலே மோக்ஷத்திற்காக உபாஸனங்கள் நேராக பகவானை உபாஸிப்பிதுபோல் சூர்யன், இந்திரன், சிவன், பிரமன் என்றுற்போன்ற சில ஜீவர்களின் அந்தர்யாமியாகக்கூட உபாஸிக்க விதிக்கப்படுகின்றன. எந்த சூர்யாதி ஜீவனை அறுதியான எல்லா வினைகளையும் களைவதற்காக நிலைத்த ஸர்வேச்வரனுக—அதாவது ஸர்வேச்வரனை எந்த ஸூர்யாதி தேவதைக்கு அந்தர்

யாமியாக உபாஸிக்கின்றரோ உபாஸ்கர்கள், (அவர்களுக்கே மோக்ஷம் வருகின்றபடியால்) அந்த ஸூர்யாதிகளும் தத்துவஜ்ஞானிகளாகி மோக்ஷம் பெறுதற்குத் தகுதியுற்றவரென்பது சொல்லாமலே விளங்கு மென்றபடி. ஸாமாதிஷு அஜாநந் என்பதற்கு ஸாமவேதம் முதலான வற்றை ஆதாரமாகக் கொண்டு உபாஸிக்கின்றனர் என்ற பொருளாம்.

पूर्वमसाधुवृत्तशतपरीतत्वेऽपि पश्चात् कृत्यपरः प्रशस्यत इत्याह—

तमिस्राचारिणां रोद्धा विजिताक्षो मरुत्प्रियः ।
कपिकृत्यैरपि स्थाने भाति वेलातिलङ्घिभिः ॥ ५ ॥

1. कश्चित् **वेलातिलंघिभिः** मर्यादातीतैः अनन्तैः **कपिकृत्यैः ;** चपलक्रियाभिः निषिद्ध-कर्मभिरुपलक्षितोपि । इत्थम्भूतलक्षणे तृतीया । पश्चात् **विजिताक्षः** जितेन्द्रियः **मरुत्प्रियः** वायुप्रियः प्राणायामतत्परः अत एव देवप्रायाणां प्रियः **तमिस्राचारिणां तमिस्रं** तमः तदधीनविपरीताचार-भूयिष्ठानां **निरोद्धा** वारकः तथाविधाचाररहिततया बाह्यानप्युपदेशेन कुर्वन् **स्थाने** उन्नतस्थाने प्रकाशते । स सम्यग्भातीति **स्थाने** युक्तमिति वा ।

2. **मरुत्प्रियः** वायुपुत्रत्वात् तत्प्रियः हनुमान् **तमिस्राचारिणाम् । तमिस्रा** तामसी रात्रिः । रात्रिञ्चराणां राक्षसानां रोद्धा–निहन्ता । 'हनुमान् शत्रुसैन्यानां निहन्ता मारुतात्मजः' इति ह्याह । **विजि-ताक्षः** रावणकुमारम् अक्षं जितवान् । **वेलातिलङ्घिभिः ।** समुद्रतीरं समुद्रवृद्धिर्वा वेला । तल्लंघनोपयुक्तैः **कपि-कृत्यैः** व्योममार्गगमन-मैनाकदमन-सुरसामुखप्रवेशपूर्वकनिष्क्रमण-सिंहिकामुखप्रवेशपूर्वकहृदयहरण-लङ्का-निर्जयरूपैः तथा **वेलातिलंघिभिः** मर्यादातीतैः मन्दोदर्यां सीताभ्रान्त्या, "आस्फोटयामास चुचुम्ब पुच्छं ननन्द चिक्रीड जगौ जगाम । स्तम्भान् अरोहत् निपपात भूमौ निदर्शयन् स्वां प्रकृतिं कपीनाम्" इत्युक्तैः कृत्यैः, तथा "पृष्ठमारोह मे देवि मा विकांक्षस्व शोभने" इति, "हन्तुमिच्छाम्यहं सर्वाः याभिस्त्वं तर्जिता पुरा" इत्यादिहनुमद्वाक्यैः **कपिकृत्यैः,** "तदेव खलु ते मन्ये कपित्वं हरिपुङ्गव", "कः कुप्येद् वानरोत्तम" इति सीतया संभावनीयैरपि भाति ; भक्त्यतिशयमूलत्वेन तेषां तत्स्थानोचितत्वात् ।

3. श्रीरामः **तमिस्राचारिणां** रात्रिञ्चराणां विराधादीनां **रोद्धा** निषूदनः **विजिताक्षः** "न रामः परदारान् वै चक्षुर्भ्यामपि पश्यति" इत्येवं जितसर्वेन्द्रियः **मरुत्प्रियः** देवानामिष्टः **वेलातिलंघिभिः** समुद्रवृद्धिनिरोधनार्थैः **कपिकृत्यैरपि** सेतुनिर्माणानुबन्धिसर्वव्यापारैः, युद्धे वेलातिलंघिभिः अमर्यादैः अनन्तैः कपिकृत्यैः वृक्षप्रस्तरादिप्रक्षेपादिव्यापारैरपि, तद्व्यापारानपि प्रीत्या उपकारकतया स्वीकृत्य, **स्थाने** सौलभ्यसर्वेश्वरत्वमतिप्रदे स्थाने भाति ।

4. **अक्षशब्दो** नामैकदेशे नामग्रहणमिति हिरण्याक्षपरः । विजितहिरण्याक्षः **मरुत्प्रियः** देवेष्टः **वेलातिलंघिभिः** समुद्रं जानुदघ्नं कुर्वद्भिः **कपिकृत्यैः ।** कपिर्वराहः । वृषाकपिनामनिर्वचने "कपिर्वराहश्रेष्ठश्च धर्मश्च वृष उच्यते" इति कश्यपोक्तेः । वराहावतारानुरूपैः कृत्यैः भूम्याहरणार्थैः पंकलेपनादिभिरपि भाति ।

5. राजा **तमिस्राचारिणां** रात्रौ चरतां परकीयचाराणां चोराणाञ्च **रोद्धा** कार्यरोधकरः **विजिताक्षः जिताक्षाः** अक्षद्युते प्रसिद्धाः विगताः जिताक्षाः यस्मात्—तत्सहवासरहितः **मरुत्प्रियः** देवेष्टः यज्ञादिना पूजनात्, अनन्ताव्यवस्थितकपिकृत्यप्रायकार्यवानपि राजस्थाने सत्पदव्यां भात्येव ।

தமிஸ்ராசாரிணும் ரோத்தா விஜிதாக்ஷோ மருத்ப்ரிய: |
கபிக்ருத்யைரபி ஸ்த்தானே பாதி வேலா திலங்க்கிபி: || 5 ||

1 அளவற்றனவான குரங்கின் சேஷ்டைகள் போன்ற செயல்கள் உள்ளவனுகிலும் பிறகு இந்த்ரியங்களை வென்றவனுய் ப்ராணுயாமம் செய்பவனுய் துராசாரமாயிருப்பவரைத் திருத்துகின்றவனுமானவன் தக்க பதவியில் விளங்குகிறுன்.

2 ஹனுமான் தந்தையான வாயுவுக்கு ப்ரியமானவர் அரக்கர்களை அழித்தவர், அக்ஷன் என்ற ராவணகுமாரனைக் கொன்றவர், கடல் கடத்தல், மைநாகமலையை மதிக்காமை, ஸுரஸையின் வாயிற் புகுந்து வெளியேறல், ஸிம்ஹிகையை ஒழித்தல் என்ற வியாபாரங் களாலும், தான் குரங்கு என்ற தோற்றவான மற்ற (மந்தோதரியை ஸீதை யென்று ப்ரமித்தும், ஸீதையை முதுகிற் கொணர நினைத்தும், ராக்ஷஸ ஸ்த்ரீகளைக் கொல்ல முயன்றும் செய்த) செயல்களாலும் சிறந்தவராகவே விளங்குகிறுர்.

3 தானே அரக்கர்களை அழித்தவரும் இந்திரியங்களை ஜெயித்தவரும் தேவர்களுக்கு ப்ரியருமான ஸ்ரீராமன் கடல் கடக்கக் குரங்குகள் செய்த அணைகட்டல் முதலான செயல்களாலும் ஸௌலப்ய ஸௌசீல்யச் சிறப்புற்றுர்.

4 கபி-வராஹமூர்த்தி; அரக்கர்களை அழிப்பவரும் ஹிரண்யாக்ஷனை வென்றவரும் தேவர்களுக்கு ப்ரியருமான வராஹமூர்த்தி, கடலைக் கடந்து உட்சென்று செய்த செயலால் விளங்கினுர்.

5. இருண்ட இரவில் திரியும் பகைவரின் சார மனிதர்களையும் கள்ளர்களையும் தடுப்பவன், இந்த்ரிய ஜெயமுடையவன், சூதாட்டம் ஆடுபவரோடு சேராதவன், தேவர்களைப் பூசிப்பவன் சில செயல் குரங்கு சேஷ்டை யென்னும்படி நடந்தாலும் பிறகு மதிப்புப் பெறுகிறுன்.

वैरिभिर्विजेतुमशक्यो भवति यतस्तदाह—

अङ्गयुक्तः कृतास्त्रश्च कुर्वन् सम्यक् पुरोविधिम् ।
विनानन् सिद्धसाध्यादीन् वैरिणोऽस्त्रैर्न पीड्यते ॥ ६ ॥

1. **अङ्गयुक्तः** स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलात्मना सप्तधा विभक्तैरङ्गैर्युक्तः **कृतास्त्रः** अस्त्रशिक्षापारगः **पुरोविधिम्** एकैकस्मिन् कार्ये पूर्वमेव परामृश्य कर्तव्यं सम्यक् कुर्वन् भविष्यद्विषयकप्राप्त्यावधानयुक्तः **पुरोविधिं** पुरोहितोक्तं पूर्वकार्यं च कुर्वन्, **पुरः** राजधान्याः **विधिं** शत्रुतः पालनाय

कार्यं कुर्वंश्च, किं कार्यं **सिद्धं** निष्पन्नम्, किमितः **साध्यं** निष्पादनीयम्, किमिदानीं कृताकृतमिति च विविच्य जानन् **वैरिणः** विरोधिनः **अस्त्रैः** आयुधैर्न **पीड्यते** न हिंस्यते ॥

2. मन्त्रजपपरविषयश्च । मननेन सर्वसत्त्वत्राणकरणात् मन्त्रता । तत्र व्यापकमन्त्रादीनां केषाञ्चित् सर्वसाधारण्येन स्वीकार्यत्वेऽपि, प्रायो मन्त्रसिद्धिकामैः मन्त्रस्य स्वाप्रतिकूलत्वं स्वानुकूल्ये तारतम्यञ्च बुध्वा प्रवृत्तिः क्रियते । तत्र चतुष्पदं विलिख्य अकारादिक्रमेणाक्षराणि विन्यस्येत् । तत्र स्वनामाद्याक्षरं यस्मिन् कोष्ठे, तत्रैव मन्त्राद्याक्षरमपि भवति चेत्—सिद्धम् । द्वितीये चेत्, साध्यम् । तृतीये चेत्, सुसिद्धम् । चतुर्थे चेत् अरिः इति सिद्धारिकोष्ठज्ञानपूर्वम् अरिभूतं परित्यज्य अन्यं मन्त्रमावर्तयेत् । सिद्धात् कार्यं सिद्धमेव । साध्यात् साधयितुं शक्यम् । सुसिद्धस्तु अधीतिमात्रेणापि महते फलायेति । तदिदमुक्तम् **विजानन् सिद्धसाध्यादी**निति । एवञ्च वैर्यवैरिविज्ञानात् वैरिणोऽस्त्रैर्न पीड्यते । जपश्चैवं भवेत्—**अङ्गयुक्तः** हृदयशिरश्शिखाकवचनेत्ररूपैः अङ्गैः क्वचिदधिकोक्तौ तैश्च युक्तः स्यात् । अङ्गन्यासः कार्य इति । **कृतास्त्रः** अस्त्रमन्त्रेण दिग्बन्धनं कुर्वन् सिद्धयर्थं **पुरोविधिं** पुरश्चरणमपि सम्यक् कुर्यात् । "जपहोमौ तर्पणञ्च सेको ब्राह्मणतर्पणम् । पञ्चाङ्गोपासनं लोके पुरश्चरणमुच्यते" इति गौतमतन्त्रे । अष्टाक्षरमन्त्रविषये, "जपो लक्षाष्टकं प्रोक्तं तदर्धं जलतर्पणम् । तदर्धं जुहुयादग्नौ" इत्युक्तम् । अक्षरलक्षमिति तत्र तत्र वेदितव्यम् । तर्पणार्धं होमः, होमार्धं तर्पणमिति पक्षद्वयमाहुः । **सेकः** अभिषेकः । यन्मन्त्रसिद्धिरिष्यते, तेन प्रत्यहं स्नानं कुर्यादिति । अन्ते यथाशक्ति ब्राह्मणतर्पणञ्च । एवं पुरश्चरणं कुर्वन् साधयेत् । सिद्धादिज्ञानवत्त्वाच्च वैरिमन्त्राधीना बाधाऽप्यस्य नास्ति । सिद्धत्वाच्च तन्मन्त्रबलात् सर्ववैरिबाधापरिहरणक्षमश्च भवतीति ।

> *அங்கயுக்த: க்ருதாஸ்த்ரச்ச குர்வந் ஸம்யக் புரோவிதிம் |*
> *விஜாநந் ஸித்தஸாத்யாதீந் வைரிணோऽஸ்த்ரைர் ந பீட்யதே || 6 ||*

1 அரசன் ஸ்வாமி, மந்த்ரி, ஸிநேகிதர், நிதி, தேசம், துர்க்கம், சேனை என்ற ஏழு அங்கங்கள் உடையனாய், அஸ்த்ர வித்யையில் தேறினவனாய், முன் நோக்கிச் செய்ய வேண்டுமவற்றைச் செய்கின்றவனாய், எது செய்தாயிற்று, எது செய்யப்பட வேண்டும், செய்யும் தருவாயிலுள்ளது எது என்ற விவேகமுள்ளவனுமாகில் பகைவரின் அஸ்த்ரங்களால் வாதை பெறான்.

2 மந்த்ர ஸித்தி பெற விரும்புகின்றவன் ஸித்தாரி கோஷ்டமென்பதைக் கொண்டு எந்த மந்த்ரம் தன் பெயருக்கு அனுகூலம் அல்லது ப்ரதிகூலம் என்ற பகுத்தறிவுடன் ஜபத்தில் இழிந்து அங்க ந்யாஸங்களை ஒழுங்காகச் செய்து அஸ்த்ர மந்த்ரத்தைக் கொண்டு திக்குகளில் பாதுகாப்பு அமைத்து, புரச்சரணம் என்ற சடங்கை, (முறைப்படி யெண்ணிக்கை முடியும் வரையில் ஜபம் செய்து பிறகு அந்த மந்த்ரத்திலே சொல்லிய எண்ணிக்கையில் தர்ப்பணமும் ஹோமமும் செய்து

ஜபகாலத்தில் அந்த மந்த்ரத்தினுல் ஸ்னனமும் முடிவில் ப்ராஹ்மண ஸந்தர்ப்பணையையும் நடத்துவதே புரச்சரணம் அதை) செய்தால் அவனது கோரிக்கை பலிக்கும், சத்ரு பாதைகளுக்கு இடமில்லை.

मन्त्रप्रस्तावात् विषमन्त्रजपपरपुरुषश्लेषेण राजानं वर्णयति—

कामाधिकरणग्राह्य कुलादिबलशालिनः ।
अहीनेऽपि नरेन्द्रस्य शक्तयः सिद्धिहेतवः ॥ ७ ॥

1. **कामाधिकानि** उद्दिष्टशत्रुजयाय यावदपेक्षितं ततोऽधिकानि, **रणग्राह्याणि रणः** युद्धं **ग्राह्यः** परिग्राह्यः आदरणीयः येषां तानि ; युद्धं कदेति सोत्साहानीति यावत् । कुलमादिर्येषां तानि । **कुलपदेन** मूलबलमुच्यते । गर्भदासादिबलस्य कुलपरम्पराप्राप्तत्वात् । **कुलेत्यत्र मूलेत्यपि** पाठः । बलं षड्विधम्-"मौलं भृतं श्रेणिसुहृद्द्विषदाटविकं बलम्" इत्युक्तेः । **भृतं** वेतनदानेनाऽऽवर्जितम् , जनपदे गृहीतं श्रेणिबलम् । सुहृदा दत्तं सुहृद्बलम् । येन युद्धं चिकीर्षितं तद्द्वेषिणा केनचिद्दत्तं द्विषद्बलम् । अरण्यवासिजनसंघः आटविकं बलम् । इमानि **शालति** गच्छतीति तादृशस्य । अथ वा कुलशब्दस्य अभिजातपरत्वात् अभिजातादि पञ्चविधबलं ग्राह्यम्-'बलं पञ्चविधं नित्यं पुरुषाणां निबोध मे' इत्यारभ्य बाहुबलम् , अमात्यलाभः, धनलाभः, अभिजातबलाख्यं पितृपितामहमूलं बलम् , प्रज्ञाबलञ्चेति गणनात् । तस्य **नरेन्द्रस्य** राज्ञः **शक्तयः** प्रभुमन्त्रोत्साहरूपास्तिस्रः **अहीनेऽपि** शक्तिहीनभिन्ने पूर्णशक्तिकशत्रुविषयेऽपि सिद्धिहेतवः, कामाधिकबलवत्त्वादिति ।

2. नरेन्द्रपदस्य सर्पवैद्यार्थकत्वात् तत्परतयाऽपि कश्चिदर्थो वक्तव्यः । अत्रैवं व्याख्यान्ति— **कामाधिकरणं** मन्मथबीजम् । मन्त्राणां सर्वेषां मन्मथबीज-सरस्वतीबीज-श्रीबीजयुक्तत्वात् कामबीजेन सह ग्राह्या भवन्ति मन्त्राः । मन्त्रेषु कुलाकुलभेदोऽस्तीति मन्त्रवेदिनो वदन्तीति कुलादिपदेन तेषां ग्रहणम् । एवं मन्त्रबलशालिनो नरेन्द्रस्य **शक्तयः** मन्त्रौषधादिशक्तयः **अहीने**-अहीनाम् **इने** सर्पश्रेष्ठेऽपि सिद्धिहेतव इति । **मूलेति** पाठं स्वीकृत्य **कामानाम्** इष्टानां मणिमन्त्रौषधादीनां यानि **अधिकरणानि** स्थानानि तेभ्यो ग्राह्याणां मूलादीनां ओषधिमूलादीनां बलमित्यपि व्याख्यायते । अथैवमपि व्याख्यातुं शक्यम्—सर्पवैद्यस्य बलं बहुविधम् । मन्त्रादिसिद्धिसंपन्नस्य **कामे** संकल्पमात्रेऽपि बलं भवति । तस्य **अधिकरणं** गरुडाद्यभिमतस्थानञ्चेत् तस्यापि बलमुपकारि । **ग्राह्याः** मन्त्राः तद्बलम् । यद्वा सर्प**ग्राह्यस्य** पुरुषस्य यद् देहादिबलं तदपि सहकारि । **कुलपदेन** सर्पविरोधिकुलग्रहणम् । तच्च गरुडादि । अत एव **काश्यपसंहितायाम्** (8-58) "पित्तानि मेषनकुलबिडालशिखिपोत्रिणाम् । तैः कृता गुलिका हन्यात् सर्वक्ष्वेलग्रहादिकम्" इत्युक्तम् । पूर्वम् "अहितुण्डिक" (5.9.) इति श्लोके सूकरग्रहणमपि तस्य सर्पभक्षकत्वादिति एतत्संहितात एव ज्ञायते । **आदिना** कुलभिन्नसंबन्धिमन्त्रौषधादिकं ग्राह्यम् । सर्पेषु-मण्डल्याद्यवान्तरभेदाः गारुडादिमन्त्रभेदाः अञ्जन-लेपन-भक्ष्य-गुडिकादिसाधनप्रकाराश्च तत्र संहितायां

प्रपञ्चिताः। ईदृशविपत्तिवारक-प्राप्तविपन्निवारकनानाविधबलशालिनस्तस्य शक्तयः सिद्धिहेतवः सर्वविधसर्पविषयेऽपीति। कविहृदयं विचार्यम्। काम-आधि-बल-शक्त्यादिपदानामर्थान्तरसंभवात् अन्यथापि व्याख्यानं सर्वपदान्वयानुरूपं विमृश्यम्।

காமாதிகரணக்ராஹ்யகுலாதிபலசாலிந: |
அஹீநேऽபி நரேந்த்ரஸ்ய சக்தய: ஸித்திஹேதவ: || 7 ||

1. விரும்பிய அளவுக்கு மேலாகி, போர் புரிதலைப் பெருமையாகக் கொள்கின்ற குலம் முதலிய பலம் (அதாவது குலத்திற் பரம்பரையாக வந்த சேனை, பணம் கொடுத்துப் பெற்றது, தேசத்தார் சேர்த்தது, சினேகிதர் அளித்தது, பகைவருக்குப் பகைவராயிருப்பவர் தந்தது, காட்டில் திரட்டியது என்றவாறான பலம்) உடைய அரசனுக்கு உத்ஸாஹம் ப்ரபுத்வம் மந்த்ராலோசனை யென்ற சக்திகள் உண்டாகில், பகைவன் எவ்வளவு பெரியவனாகிலும் பலனுக்கு சித்தியுண்டு.

2. நரேந்த்ரனுவான் நாகவைத்யன். அவன் விஷயமுமாம். பாம்பினால் வரும் தீங்கைப் போக்கும் வைத்யன் மந்த்ரஸித்தியினால் உண்டான ஸங்கல்ப்ப சக்தி, தானுள்ள இடத்தின் பலம், பாம்பு தீண்டும் புருஷனின் உடல்பலம், பாம்புக்குப் பகையான பல ஐந்துக்களின் பலம், மூலிகை முதலானவையெல்லாம் உடையனாகில் எத்தகைய பாம்பு விஷயத்திலும் ஸித்தி பெறுவான். இவ்வாறின்றி பூர்வார்த்தத்திற்கு வேறு பொருள் உரைகாரர் சொல்வது உண்டு. அதை வடமொழி உரையில் காண்க.

राज्ञो वीर्यातिशयमाह—

प्रद्युम्नो ह्यनिरुद्धात्मा स्वनाम्ना मानसोदयः।
वीरः कश्चिद् वितन्वीत स्त्रीप्रायमखिलं जगत् ॥ ८ ॥

1. **प्रद्युम्नः** प्रकृष्टं **द्युम्नं** द्रविणं यस्य सः। "हिरण्यं द्रविणं द्युम्नम्" इत्यमरः। **अनिरुद्धः** अन्यकर्तृकनिरोधाविषयः **आत्मा** देहादिर्यस्य सः देहादिबलसंपन्नः **स्वनाम्ना** स्वकीर्त्या **मानसोदयः** परेषां **मानसस्य** मनोविकारस्य अनुकूलानां प्रीतिरूपस्य प्रतिकूलानां भयरूपस्य च **उदयः** उत्पत्तिहेतुः यद्वा **मानेन** परकृतबहुमानेन **सोदयः** अभिवृद्धिसहितः **कश्चित्** अद्वितीयः **वीरः** अत्यद्भुतयुद्धादिकरणेऽप्यायासरहितो राजा अखिलं जगत् **स्त्रीप्रायम्** स्त्रीतुल्यं पौरुषहीनं **वितन्वीत** कुर्यात्।

2. व्यूहचतुष्टयान्तर्गतप्रद्युम्नपरोऽपि। संकर्षणव्यूहानन्तरः स्वनाम्ना प्रद्युम्नः **अनिरुद्धात्मा** अनिरुद्धव्यूहस्याविर्भावकत्वात् तद्रूपः तद्विषयकमनोभाववान् वा, "प्रद्युम्नसंज्ञं मनो जायते" इति प्रसिद्ध्या सर्वमनोभिमानित्वात् **मानसोदयः** मनोभिमानाविर्भाववान्, मानसस्वाम्नसृष्टिनिर्वाहक इति वा। **वीरः** "ऐश्वर्यवीर्यात् प्रद्युम्नः सर्गधर्मौ नयसि" इत्युक्त्या वीर्यगुणस्य विशेषेणाविर्भाववान्। प्रद्युम्नपदेनैव ऐश्वर्याविर्भावः सूचितः; द्युम्नं द्रविणमैश्वर्यमिति। ईदृशः **कः** परमात्मा **चित्** मनोभिमानित्वात्

ज्ञानस्वरूपश्च जगत् स्त्रीप्रायं वितन्वीत । पुरुषोत्तमस्य भगवतो भावने सर्वे स्त्रीतुल्या भवन्ति, स्त्रीत्वमेव स्वात्मन इच्छन्ति । अत एव महर्षयो गोप्य आसन् । स्त्रीवत् पारतन्त्र्येण तच्छेषत्वरसिकाश्च विवेकिनो भवन्तीति । **विः** पक्षी गरुडः तमीरयति —प्रेरयतीति वीर इत्यपि वदन्ति । इदं शुद्धमनोग्राह्यत्वरूपमानसोदयत्वरूपतदुक्तार्थवत् सर्वावतारसाधारणम् । पूर्वोक्तार्थ उचितः ।

3. श्रीकृष्णात्मजप्रद्युम्नपरोऽपि । सः अनिरुद्धपुत्रकत्वात् तत्र निक्षिप्तमना इति अनिरुद्धात्मत्वम् । तस्यैव मन्मथत्वात् मनसिजत्वात् मानसोदयत्वम् । बाणासुरादियुद्धे सुब्रह्मण्यादिपरिभवनात् आदौ मायिशम्बरशमनाच्च वीरत्वम् । मन्मथेन सर्वः पुरुषो लोके स्त्रीलोलतया स्त्रीमयः क्रियत इति तद्रूपप्रद्युम्नस्य तथात्वम् ।

ப்ரத்யும்நோ ஹ்யநிருத்தாத்மா ஸ்வநாம்நா மாநஸோதய:.
வீர: கச்சித் விதந்வீத ஸ்த்ரீப்ராயம் அகிலம் ஜகத் ‖ 8 ‖

1 ஐச்வர்யம் மிக உடையனும், தடைபடாத மனம் உடல் உடையனும், தன் புகழால் எல்லோர் மனத்திலும் இருப்பவனும், வீரனுமான ஒப்பற்ற அரசன் முழுவுலகையும் பௌருஷ மற்ற பெண்ணினத்திற்கு ஒப்பாக்குகிறான்.

2 வ்யூஹாவதாரமாய் ப்ரத்யும்னன் என்ற பெயர் பெற்றவர் அநிருத்தாவதாரத்திற்குக் காரணமானவர், எல்லோர் மனத்திற்கும் அபிமானி தேவதையாகவும் வீர்யம் ஐச்வர்யமென்ற இருகுணங்கள் தோற்ற விளங்குகின்றவருமாகிறார், புருஷனான பெருமானுக்கு எல்லோரும் ஸ்த்ரீ போல் பரதந்த்ரரேயாவராகையால் எல்லாம் பெண்ணாக்குகிறார்.

3 கண்ணபிரானின் குமரனான ப்ரத்யும்னன், அநிருத்தன் என்னும் மகனுக்குப் பிதா. காமனானபடியாலே மனத்திலுண்டாகின்றவன், மிக்க வீர்யமுடையன், உலகில் எல்லோரையும் ஸ்த்ரீகளிடம் காதல் உடையனாகப் பண்ணும் காமனாகிறான்.

क्रोधोद्भटत्वेऽपि दण्डोद्योगित्वेऽपि मन्त्रिभिः सामानुसारे उपदिश्यमाने राजा तदेवाऽऽद्रियेतेत्याह—

प्रयुक्तं मन्त्रिभिः काले भक्तिभेदपुरस्कृतम् ।
अपि ज्वलनवक्त्राणां साम संवननं परम् ॥ ९ ॥

1. **काले** चतुर्विधोपायप्रथमोपायावकाशे पर्यालोच्य **मन्त्रिभिः** मन्त्रालोचनकर्तृभिः **प्रयुक्तम्** अनुष्ठेयतया व्याहृतं **भक्तिभेदपुरस्कृतम्** अधिपतिख्यातिक्षेमपर्यालोचनया भक्तिविशेषेणाऽऽविर्भावितम् **साम** सामोपायः **ज्वलनवक्त्राणामपि** क्रोधोज्ज्वलमुखविशिष्टानां तन्मन्त्र्यधिपतिभूतानां राज्ञाम्, तथा क्रुद्धानां परेषामपि **परम्** उत्कृष्टं **संवननम्** वशीकारकम् । मन्त्रिभिरुपदिष्टं साम ग्राह्यमित्यर्थः । क्रुद्धो राजा मन्त्रिभिः साम्ना वशीकार्य इति वा । मन्त्रिप्रयुक्तसामश्रवणे क्रुद्धोऽपि शत्रुर्वशीकार्यो भवेदिति वा ।

2. **मन्त्रिभिः** "तेषां ऋक् यत्रार्थवशेन पादव्यवस्था,", "गीतिषु सामाख्या,", "शेषे यजुश्शब्दः" इति मीमांसासूत्रलक्षितविविधमन्त्रविद्भिः **काले** यागे बहिष्पवमानस्तोत्रादिकाले स्वाधीतासु ऋक्षु **प्रयुक्तम्** उच्चारितं **भक्तिभेदपुरस्कृतम्** । **भक्तिः** भागः । हिङ्कारः प्रस्तावः उद्गीथः प्रतिहारो निधनमिति साम्नि पञ्च भक्तयः । सप्तधाऽपि विभज्यते हिंकारः प्रस्तावः आदिः उद्गीथः प्रतिहार उपद्रवो निधनमिति । एवं भक्तिविशेषैः ऋच्यध्यूढं साम गायतीति ऋचि गीयमानं हिंकाररूपप्रथम भक्त्योपक्रम्यमाणञ्च साम **ज्वलनवक्त्राणाम् ज्वलनः** अग्निः । अग्निमुखा वै देवाः हविर्भुजः । हविःप्रतीक्षाणां बुभुक्षूणां देवानामपि **परं संवननम्** आकर्षकं विशेषतः प्रीणनमिति यावत् ।

3. **मन्त्रिभिः** श्राद्धादौ निमन्त्रणप्रवृत्तैः कर्तृभिः **प्रयुक्तं** भोक्तॄन् उद्दिश्य प्रयुज्यमानम् । **भक्तिभेदपुरस्कृतम्** । **भक्तम्** अन्नम् भक्तिनाम्—अन्नवतां पदार्थानां ये **भेदाः** विशेषाः मुद्गतिल माष-गुडादिकृताः, व्यञ्जनापूपादयश्च । तैः **पुरस्कृतम्** तान् समर्पयद्भिरेव क्रियमाणम् **साम** वस्त्रादिसमर्पणेन वसिष्ठवामदेवादिवत् यूयमागता इति प्रशंसापूर्वकं स्वाशक्तिनिवेदनादिरूपसान्त्ववचनं **ज्वलनवक्त्राणा-मपि** कालातिपातात् अतिघोरक्षुदर्दितानामपि **परं संवननम्** दर्शनश्रवणमात्रेणापि प्रीत्यतिशयकरं भवति ।

4. **मन्त्रिभिः** विषवैद्यैः मन्त्रविद्भिः **भक्तिभेदपुरस्कृतम्** तत्तद्रागानुरोधेन यथा यत्र यत्र विभजनं कार्यं तथा तत्र तत्र कृत्वा **काले** सर्पग्रहणात् पूर्वं प्रयुक्तं **साम** गानम् **ज्वलनवक्त्राणामपि** 'काली कराली कमरी कालरात्रीति संज्ञिताः' (का. सं. 4. 31) चतस्रो दंष्ट्राः वहतां क्रोधाविष्टानां सर्पाणामपि **परं संवननम्** । 'पशुर्वेत्ति शिशुर्वेत्ति वेत्ति गानरसं फणी' इति, 'विप्रकृतः पन्नगः फणं कुरुते' इति फणित्वावस्थायामपि गानरसमग्नत्वोक्तेः । गानवश्यतामूलफणप्रसरणाच्च ।

ப்ரயுக்தம் மந்த்ரிபி: காலே பக்திபேதபுரஸ்க்ருதம் |
அபி ஜ்வலநவக்த்ராணாம் ஸாம ஸம்வநநம் பரம் || 9 ||

1 மந்த்ரிகள் மந்த்ராலோசனையின்போது விசேஷ பக்தியினால் முன்னிடப்பட்டுச் சொல்லும் ஸாமோபாயமானது எவ்வளவு கோப முள்ளவர்களுக்கும் மிகவும் வசீகரமாகும். அரசர் அமைச்சரின் வேண்டுகோளுக்கு உட்பட வேண்டும். கோபம் முகத்தில் வீசப் பறக் கும் பகைவரையும் அது வசப்படுத்தும்.

2 வேதத்திலுள்ள மந்த்ரங்களை அறிந்தவர்கள் ஐந்து பாகமாக வும் ஏழு பாகமாகவும் பிரிக்கப்பட்ட ஸாமத்தை உரிய காலத்தில் கானம் செய்தால் அது (ஜ்வலநம் என்ற) அக்னியை முகமாகக் கொண்டு ஹவிஸ்ஸைக் கைப்பற்றும் தேவதைகளுக்கு மிகவும் உவப்பாயிருக்கும்.

3 ச்ராத்தாதிகளில் நிமந்த்ரணம் செய்கின்ற கர்த்தர்கள், பக்தம் என்னும் அன்னவகைகள், பக்ஷயம் காய் பழம் முதலியவற்றை ஸமர்ப் பிக்கும் போது முன்னாக அவர்களைப் புகழ்ந்து வேண்டும் வார்த்தைகள் பசி மிகவாயினும் அவர்களையும் வசப்படுத்துவனவாகும்.

4 பாம்பாட்டிகள் மந்த்ரங்களை யறிந்தவர்கள் பாடவேண்டிய முறை தெரிந்து பாம்பு புறப்படுவதற்கு முன் பாடினார்களாகில், அது உக்ரமாய் விஷநெருப்பு வீசும் பாம்புகளையும் வசப்படுத்தும்.

मर्यादापालकेन राज्ञा तत्तत्पुरुषाणां गुणानुगुणं स्थानेषु निवेशनं शोभायै इत्याह—

विधौ लब्धधृतिर्नीत्या विनतानन्दनो द्विजः ।
नियम्यमानैः स्थानेषु भुजङ्गैरपि भूष्यते ॥ १० ॥

1. **विधौ**-इदं कार्यम्, इदं न कार्यमिति जातिगोत्रकुलाद्याचारशासनपद्धतौ व्यवस्थितायां **लब्धधृतिः** प्राप्ताचाञ्चल्यः यथावत् कारयन् **नीत्या** व्यवहारस्थाननिर्णीतन्यायानुसारेण **विनतानन्दनः** ये प्रह्वाः तान् प्रीणयन्, विगतं **नतं** नमनं येषु तेषाम् अप्रह्वानाम् **अनन्दनः** तान् शिक्षयन् **द्विजः** स्वयमप्यधीतवेदस्मृत्यादिकत्वात् युक्तायुक्तविशेषज्ञः, **स्थानेषु** तत्तद्योग्यतानुगुणं कल्पितेषु पदेषु भुजङ्गान् स्थापयन् एवं नियुक्तैः भुजङ्गैरपि भूष्यते। **भुजङ्ग**शब्दः राजमित्रविशेषपरः। ये राजमैत्र्याः दुर्विनियोगं कुर्वन्ति, येषु राज्ञो दाक्षिण्यं कथमप्यनुवर्तते, ते विदूषकादितुल्याः भुजङ्गाः तन्मूलं परेषां छिद्रदर्शनं मा भूदिति तान् मानयन्नेव तैरपि मान्यमानस्तेषां राजद्रोहपर्यवसायिनोऽपथात् वारणे प्रभवतीति तैरप्ययं भूष्यत इति।

2. विधुर्वा विधिर्वा विष्णुः। **विधौ** नियन्तुर्विष्णोर्विषये **लब्धधृतिः** गृहीतधारणः। कृतविष्णुधारण इति यावत्। किमर्थम्? तदाह **नीत्ये**ति। नयनात्-स्थलान्तरप्रापणाद्धेतोः। कः? **विनतानन्दनः** विनतायाः पुत्रः। अरुणव्यावृत्तये **द्विज** इति। पक्षी गरुत्मान् **स्थानेषु** स्वाङ्गेषु तत्तत्र **नियम्यमानैः** अचलं स्थाप्यमानैः **भुजङ्गैरपि** स्वविरोधिभिः सर्पैरपि भूष्यते। स्थाननिर्देशश्चैवं काश्यपसंहितायाम् (2. 7.) "अनन्तो वामकटको यज्ञसूत्रं तु वासुकिः। तक्षकः कटिसूत्रं तु हारः कार्कोटकः स्मृतः। पद्मो दक्षिणकर्णे तु महापद्मस्तु वामतः। शंखः शिरःप्रदेशे तु गुलिकस्तु भुजान्तरे। इत्येवं भूषणैर्युक्तं महापद्मस्थितं विभुम्" इति। आचार्यकृतगरुडपञ्चाशत्यप्युक्तमिदम्।

3. रुद्रपरश्च। **विधौ** चतुर्मुखे **नीत्या** सत्पथेन **लब्धधृतिः** प्राप्तधारणः। ब्रह्मणा क्षपितक्लेश इत्यर्थः। रुद्रो जातमात्रे रुरोद। विधिः पप्रच्छ किमिति। अनपहतपाप्मा वै अहमस्मि नामानि मे धेहि इति प्रत्यब्रवीत्। अथ स एकादशनामान्यकरोत् एकादशधा तमाविर्भाव्य। एवं रोदनादिनिवर्तनेन धारणकृत् विधिः। तल्लब्धशक्तिकतया विनतानामानन्दनः। **द्विजश्च**; साक्षात् परमात्मनः कदाचित्, अन्यदा चतुर्मुखाच्च द्वाभ्यां जातत्वात्। **स्थानेषु** तत्तदर्हस्थलेषु स्वाङ्गेषु नियम्यमानैः **भुजङ्गैरपि** सर्पैरपि भूष्यते नागाभरणत्वात्।

4. कर्मानुष्ठानपरश्च **द्विजः** यथावदधीतवेदः **नीत्या** मीमांसादर्शितन्यायैर्विचारणात् **विधौ** विहिते ज्योतिष्टोमादौ तद्वाक्ये वा **लब्धधृतिः** यथावस्थितं निर्णयं प्राप्तः। धर्मशब्दस्य धृतिसाधनार्थकत्वात् धृतेश्च प्रीतिपर्यायत्वात् **लब्धधृतिः** इदं फलमनेन संपाद्यमिति ज्ञातफलविशेषश्च; **विनतानन्दनः**। दक्षिणाशब्दस्य अनुष्ठानानतिसाधनद्रव्यवाचित्वात् ये दक्षिणाग्रहणेन सहायीभवितुं प्रवृत्ताः ऋत्विजः ते विनता इत्युच्यन्ते। तेषां यावदपेक्षदानात् आनन्दनः **स्थानेषु** हौत्राध्वर्यवौद्गात्रादिस्थानेषु नियम्यमानैः

तैः **भुजङ्गैः** स्वभुजं प्राप्तैः हस्तवत् स्वकार्यकरणात् सहायभूतैः **भूष्यते** अलंक्रियते यजमानः । भुजङ्गशब्दः पशुसंज्ञपनविशसनादिप्रवृत्तपुरुषपरश्च भाव्यः ।

5. **विनतानां** मयेदं पापं कृतम्, तत्र प्रायश्चित्तं किमिति जिज्ञासया प्रणतानाम् **आनन्दनः** तत्तदुचितप्रायश्चित्तविधिपरः द्विजः **विधौ** प्रायश्चित्तशास्त्रेषु लब्धनिर्धारणः तदर्थेषु स्थानेषु नियम्यमानैः **भुजङ्गैः** दुष्टैः विटैरपि भूष्यते । तन्मध्ये तेषां शिक्षणाय विलसतीति ।

விதௌ லப்தத்ருதிர் நீத்யா விநதாநந்தநோ த்விஜ: |
*நியம்யமாநை: ஸ்த்தாநேஷு புஜங்கைரபி **பூஷ்யதே** || 10 ||*

1. சாஸனமார்க்கங்களிலே நிலையுடையனும், வ்யவஹாரங்களில் நீதிஸ்த்தானங்களிலே நிர்ணயித்தபடி அடக்கமாய் வந்தவர்களை ஆனந்திப்பவனும், மற்றவரை தண்டிப்பவனுமாகி, அரசன் தன்னுடைய தாக்ஷிண்யத்திற்கு உட்பட்ட சில துஷ்ட சினேகிதர்களையும் தக்க ஸ்த்தானங்களில் நியமித்து ஆள்வதால் அவர்களாலும் அழகை, பெருமையைப் பெறுகிருன்.

2. விஷ்ணுவுக்கு வாஹனமாய் அவரை இஷ்டமான இடம் சேர்க்க அவரை தரிப்பதிலே நிலையுற்ற வைநதேயரென்ற கெருடன் தன்னுடைய அங்கங்களில் சிறந்த நாகங்களை அணிந்துகொள்வதால் அந்த ஸர்ப்பங்களால் அலங்கரிக்கப்படுகிருர்.

3. ருத்ரன் பிரமனிடம் முறைப்படி தரிப்பு உற்றவன். அதாவது- ருத்ரன் பிறந்தவுடனே அழுத போது பிரமன் ஏன் அழுகிருயென்ன, எனது பாபங்கள் போகவில்லையே, பெயர் வைக்க வேண்டுமென்று ப்ரார்த்திக்க, பதினெரு ருத்ரர்களாக்கி பதினெரு பெயர்களையும் வைத்துப் பிரமன் அனுக்ரஹித்ததால் ப்ரீதியுற்றவன். அதனுல் தன்னை வணங்கினுர்க்கு ஆனந்தம் விளைவிப்பவன், நாகாபரணனுகையால் தன் மேனியில் பலவிடங்களில் பல நாகங்களாலே அலங்கரிக்கப்படுகிருன்.

4. வேதம் ஓதியவன் மீமாம்ஸாநீதிகளைக் கொண்டு செய்ய வேண்டும் தர்மங்களைத் தெளிந்தவன் அதற்குத் துணையாய் தக்ஷிணைக்கு இணங்கி வந்தவர்களை தகுமாறு அளித்து ஆனந்திப்பவன் யாகத்தை அனுஷ்டிக்கும் போது தனக்குக் கை போலிருந்து தன் கைவசமாய் உரிய ஸ்த்தானங்களிலே அமர்த்தப்பெற்ற அவர்களால் அழகு பெறுகிருன்.

5. செய்த குற்றத்திற்கு ப்ராயச்சித்தம் கேட்க வந்து வணங்கினவர்களை மகிழ்விக்கும் அந்தணன், ப்ராயச்சித்த விதிகளிலே தேர்ந்தவன் அததற்கான விதங்களிலே நியமிக்கப்பட்ட விடர்கள் போன்ற பல பாபிகளாலும் அலங்கரிக்கப்படுகிருன். அவர்களால் சூழப்பட்டும் விளங்குகிருன், கௌரவிக்கப்படுகிறபடியால்.

निकृष्टकुलपोषितस्योत्कृष्टस्य तदुत्कर्षज्ञानानन्तरं पोषकैरेव त्यागः क्रियते चेत् , तदुचितमेवेत्याह । राजकुमारस्यापि मनसिकरणादत्र पद्धतावेतच्छ्लोकप्रवेशः—

नीतिः सती त्वयि परं परपुष्ट ! धातुः
कण्ठे ययैष तव पञ्चममुच्चकार(ज्जगार) ।
पुत्रीकृतोऽपि बलिपुष्टकुलैर्यतस्त्वं
दूरीकृतोऽसि परुषैस्तत एव काले ॥ ११ ॥

1. अस्मिन् श्लोके पदविपर्यासः पादविपर्यासश्च नाना । अत्रैकः प्रकारः सम्यगित्यादृतः । तदनुगुणोऽर्थ एवं वर्ण्यते—हे **परपुष्ट !** (परैः स्वविजातीयैः काकैः पुष्ट) कोकिल ! **धातुः** स्रष्टुर्ब्रह्मणः **नीतिः** न्याय्यनिर्माणरीतिः **त्वयि परं** त्वय्येव **सती** समीचीना श्लाघ्या वर्तते । अथवा त्वयि **परम्** अतिशयेन **सती** श्लघ्या भवति, यया नीत्या **एषः** धाता तव कण्ठे गळे **पञ्चमं** पञ्चमस्वरं कूजितम् **उच्चकार (उज्जगार)** कल्पयामास आविर्भावयामास । पञ्चमाविर्भावनात् तस्या नीतेः श्राघ्यत्वं कुत इति चेत्-**यतः** यस्मात् कारणात् । अस्य **दूरीकृतो**ऽसीत्यत्रान्वयः । दूरीकरणसाधनात् हेतोः तस्याः श्लाग्यत्वम् । **बलिपुष्टानाम्** इतस्ततो बलिभोजनेन पोषं प्राप्तानाम् असमर्थत्वज्जातिविल-क्षणानां काकानां **कुलैः** संघैः । काकाः सर्वदा संघीभवन्ति । सजात्यभिमानात् प्रतिदिनमेकैकसंघ-रक्षितत्वमपि भवेत् । त्वं **पुत्रीकृतोऽपि** कोकिलपुत्रत्वात् वस्तुतः अकाकपुत्र एव तैः पुत्रः **कृतः** भावितस्सन्नपि **तत एव** कूजनादेव हेतोः कूजनश्रवणेन विजातीयत्वनिश्चयेन हेतुना **काले** त्वया पृथक् वृत्तिकरणार्हसमये, न तु प्राक्, **परुषैः** परुषत्वमापन्नैः । पुरुषैरित्यशुद्धम् । **किल तैरिति** व्यर्थम् । **दूरीकृतोऽसि** स्वकुलान्निष्कासितोऽसि । यतो दूरीकृतोऽसि, अतो नीतिः सती इत्यन्वयः । 'उद्गीर्णवान्' इति व्याख्यानदर्शनात् उच्चकारेत्यत्र उज्जगारेति पाठो विमृश्यते । शब्दः शोभनः । उच्चकारेत्यत्रार्थः सम्यक् । उपनिषदि "उदरमन्तरं कुरुते" इत्यत्र उत्कुरुते इत्यन्वयः सर्वेष्टः ॥

2. सामर्थ्यलाभपर्यन्तं निहीनसंबन्धस्य सह्यत्वेऽपि ततस्तत्त्याग एव युक्तः । तत्र निहीना-नामपि सहकारित्वे सुवर्णस्य सौरभमिव श्लाघ्यमेव तत् । मार्गभ्रष्टो राजकुमारः पुत्रवात्सल्येन व्याध-कुलेन संवर्धितो दैवात् अभिज्ञसहवासेन स्वरूपज्ञानेन व्याधवृत्तिवेषादिकमुपेक्षमाणो व्याधैरेव स्वकुलानर्ह इत्युपेक्ष्यते चेत्-तदस्य भाग्यमेव । व्याधमुखेन विधिनैतद्रक्षणविधानमपि अभिनन्दनीयम् इतीदमत्र व्यज्यते । तथा राज्ञाऽपि हीनसंबन्धो गत्यलाभपर्यन्तमेव ग्राह्यः । पश्चात् तद्विसर्गमार्गं कुर्यादिति च ज्ञाप्यते ।

3. राक्षसकुले उत्पन्नो विभीषणः "परमापद्यपि सदा धर्मे मम मतिर्भवेत्" इति लब्धवरः, "विभीषणस्तु धर्मात्मा न तु राक्षसचेष्टितः" इति सोदर्या शूर्पणखया निन्दितः, ज्येष्ठेन पितृ-तुल्येन रावणेन पुत्रवत् पूर्वं मतोऽपि 'सीतां रामाय निवेद्य देवीं सुखं वसेमं' इति हितोपदेशमस्वीकुर्वद्भिः

रावणादिभिः परुषमुक्तो विसृष्टः । तस्य तदनुगुणहितोपदेशबुद्धिप्रदानं यत् कोकिलकूजिततुल्यं तत्र विधिना कृतम्, तत् सर्वं समीचीनमेवेति अत्र ज्ञाप्यम् ।

4. तत्त्वज्ञानसंपत्तिपर्यन्तं सर्वबन्धुसंबन्धमनुपालयद्भिरपि पश्चात् वैराग्येण क्रमेण सर्वत्यागः साधुभिरिष्यते, बन्धवश्चोपेक्षन्त इति युक्तमेवैतत् । जडभरतादीनां कुलजनैस्त्यक्तताऽपि प्रसिद्धा । अत एव विषयसंगविरहे कुटुम्बस्य स्वेन भारो मा भूदिति संन्यस्यन्ति ।

5. मोक्षोपायनिष्पत्त्यर्थमेव करणकलेबरादिकमीश्वरेणानुगृहीतमिति तन्निष्पत्तिपर्यन्तं तदपरित्यज्य ततः तस्य सर्वस्य त्यागेनापुनरावर्तिनो नदीतरणेनाप्राकृतरूपभासुराः भगवदेकान्तिनित्यसूरिगोष्ठ्यां निविशन्ते सन्त इति चेह व्यङ्ग्यम् । इयं धातुः परमात्मनः सती नीतिः काककुलत्यागेन कोकिलकुलप्रवेशसंपादनी ॥

நீதி: ஸதீ த்வயி பரம் பரபுஷ்ட தாது:
கண்ட்டே யயைஷ தவ பஞ்சமமுச்சகார |
புத்ரீக்ருதோऽபி பலிபுஷ்டகுலைர் யதஸ் த்வம்
தூரீக்ருதோऽஸி பருஷைஸ் தத ஏவ காலே || 11 ||

1. (பிறந்தவுடன் காக்கையினால் போஷிக்கப்படும் இனமாகும் குயில். அதனால் அதற்கு பரபுஷ்டமெனப் பெயராம்.) குயிலே! உன் விஷயத்தில் பகவான் கொண்ட நீதி மிகச் சிறந்ததாகும். உனது மிடற்றில் பஞ்சமஸ்வரத்தை வைத்தருளினனே. அதனால் ஏன் சிறப் பென்னில்—உன்னைக் கூட்டமாகச் சேர்ந்து தம் குட்டியாகக்கொண்டு வளர்த்த காக்கைகள் உனது குரலைக் கேட்டு காலத்தில் உன்னைக் கொடுமை செய்து அப்புறப்படுத்துகின்றனவல்லவோ. (அக் குரல்சிறப்பு இல்லையேல், நீயும் காக்கையோடு காக்கையாய் மதிப்புக்கு இடமாகாமற் போவாயே.)

2. ஈன இனத்தோடு சேர்க்கை பிரிந்திருக்கத் தகுதி வரும் வரைக்குமே யாகிப் பிறகு பிரிதல் தகும். வழி தப்பிய ராஜகுமாரன் வேடுவச் சேரியில் வளர்ந்து பிறகு பெரியோர்மூலம் தன் தன்மையை யுணர்ந்து வேடுவருக்கு உரிய தொழிலைச் செய்யாமலிருந்தால், அவர்களே அவனை விடவாமே. அதுபோல் அவனும் ஈன ஸம்பந்தத்தை ஸமயம் வந்த போது விட்டுவிடவேண்டும்.

3. அரக்கர்குலத்தில் பிறந்தும், தர்மமே ஆபத்திலும் செய்ய வரம் பெற்ற விபீடணன் அண்ணனை ராவணனால் அன்புடன் மகன்போல் முன் போஷிக்கப்பட்டிருந்தும், ஸீதையை ஸ்ரீராமனிடம் அர்ப்பணம் செய்ய வேண்டுமென்று நன்னெறியைக் கூறியவுடனே கடுமையாகப் பழித்து விலக்கப்பட்டான். விபீஷணன் அவ்வாறு கூறியது நன்மையே.

4. தத்துவஜ்ஞானம் பெறும்வரையில் எல்லா பந்துக்களுடன் கலந்திருப்பவர் சிறிதுசிறிதாக அதிகப்பற்றின்றி விலகுகிறார்கள். பந்துக்களும் விடுகிறார்கள். ஜடபரதர் மீண்டும் பிறந்தபோது குடும்பத்திற்கு ஒற்று இராமையால் அவரது குடும்பத்தினரே விட்டனரே. அந்நிலைமையில் விட்டு விலகுவது நியாயமே.

5. மோக்ஷம் பெறக் கருவியாக நமக்கு ஈச்வரன் உடல் கருவி எல்லாம் கொடுத்திருப்பதை யறிந்து அவற்றைக் கொண்டு உபாயம் அனுஷ்டித்து முடிவில் அவற்றை விட்டு வெளியேறி மோக்ஷ பூமியில் விளங்கும் நித்ய முக்தர்களின் குழாமில் புகுதல் நலமாகையால் எம்பெருமான் உடல் அளிக்கும் நீதி மிகவும் நல்லதாகும்.

एवं विवेकिनो विशिष्टस्य राज्ञः परेण क्रियमाणं क्षुद्रैकपिपीलिकादंशमायं कर्म न हानये। अतस्तादृक् कर्म स तृणीकृत्य वर्ततेति उपदेष्टुमाह—

विबुधमहिते मेरावैरावतः करटी मुहुः
कषतु करटं कण्डूलं स्वं क्षरन् मदकर्दमम् ।
भजतु च तटक्रीडां पीडाभिसंधिरसात् दृढं
न तु मलिनता नापि क्षोभः क्षमामृति संभृतः ॥ १२ ॥

1. ऐरावतनामा **करटी** गजः। 'काकेभगण्डौ करटौ' इत्यमरः। काकस्य गजगण्डस्य च करट इति नाम। अतिशयेन तद्वान् ऐरावतः। **कण्डूलं** कण्डूतिविशिष्टं **स्वं** स्वकीयं **करटं** गण्डं **विबुधैः** देवैः महर्षिभिश्च **महिते** गौरविते **मेरौ** पर्वते **मदकर्दमं** मदजलपंकं **क्षरन्** निस्सारयन् सन् **मुहुः कषतु** पुनःपुनः कण्डूत्यपनोदकलेखनकर्मीकरोतु। **न तु मलिनता**—तावता मेरोस्तेन कर्दमेन मलिनता न भवति। तस्य कुत्रापि कोणे निलीनतया व्यापित्वाभावात् तावता मेरुर्मलिन इति व्यवहारायोगात्। तथा **पीडाभिसंधिरसात्**। अस्य मेरोः पीडा कार्या इत्यभिप्रायमूलकात् **रसात्** रुच्या **तटक्रीडां** दन्तैः अन्यैश्च पर्वतप्रदेशभेदनव्यापारञ्च **भजतु** लभताम्। करटकर्षणं कण्डूतिनिवृत्तिरूपस्वप्रयोजनोद्देश्यकम्; अनुद्देशेपि स्वतोनिःसृतमदबलान्मलिनता; तटक्रीडा तु परहिंसनोद्देशेनैवेति भेदः। तावतापि **क्षमामृति** पर्वते मेरौ क्षोभोऽपि **न संभृतः** नापादितः। पीडाभिसंधिरसादित्यत्र **पीडाभिसंधिरसो** इति पाठान्तरम्। **पादैर्विसन्धि तथा** इति च; व्याख्यान्ति च, **विसंधि** संन्धिभंगो यथा भवेत् तथा चरणैः तटक्रीडां करोतु इति। **तथेति** व्यर्थम्। चकारस्य प्राक्प्रयोगात्। दन्तेन भेदनमेव गजकार्यं मुख्यम्। अतः पादैरिति प्रयुज्य संकोचो न युक्तः। **क्षमामृति** इत्येतत्स्थाने **कलामृति** इति पाठो न पेशलः। तस्य स्वर्णवति मेरावित्यर्थवर्णनञ्च क्लिष्टम्। संकल्पसूर्योदये श्लोकोऽयं क्षान्तिप्रभाववर्णनावसरे उपन्यासीति ततोऽपि **क्षमामृतीत्यस्यैव** युक्ततरता। पूर्वश्लोकानामत्र पद्धतौ राजविषयकत्वात् **क्षमामृतीति** पदं राजोपस्थापकं युज्यतेतमाम्।

2. **विबुधमहिते** विद्वन्मन्त्रिमुखपरिवारश्लाघिते **मेरौ** धनाढ्ये। आभ्यां दुष्टप्रतिकरण-सामर्थ्यपौष्कल्यमुक्तं भवति। एवमपि क्षमाभृति स्वेन सह **स्पर्धानर्ह**जनत्वबुद्ध्या क्षान्तिभरिते राज्ञि ऐरावतकरटिचेष्टया न मालिन्यं न च क्षोभः। **इरा**–मद्यम्; **इरावान्** मद्यपः। तदीयः **करटी** काकतुल्यपरिवारयुक्तो मत्तः कश्चित् स्वकार्यसिद्धये राजशासनविषये क्वचित् कोणे किमपि मालिन्यं जनयतु। राजा पीडनीय इत्यभिसंधिपूर्वकं क्वचित् छेदनभेदनादिकमपि करोतु। तावता न विबुधसेवनस्य धनसंपत्तेर्वा हानिः। न चैतद्दूषणं तन्मालिन्याय, न च तन्मनसः क्षोभणायेति। एवं राजभिन्ना अपि क्षान्तिनिधयो महान्त इह ग्राह्याः॥ (१२)

इति नीतिमत्पद्धतिः

விபுதமஹிதே மேராவைராவத: கரட முஹு:
கஷது கரடம் கண்டூலம் ஸ்வம் க்ஷரந் மதகர்தமம் |
பஜது ச தடக்ரீடாம் பீடாபிஸந்திரஸாத் த்ருடம்
ந து மலிநதா நாபி க்ஷோப: க்ஷமாப்ருதி ஸம்ப்ருத: || 12 ||

1. தேவதைகளாலும் கொண்டாடப் பெற்ற மேருமலையில் ஐராவதமென்ற மதயானை தினவுற்ற, தன் கன்னத்தை மதநீர் பெருகும்படி தேய்க்கட்டும். மலையில் தொல்லை விளைவிக்க வேண்டுமென்ற நோக்குடன் தந்தங்களால் தாழ்வரையைப் பெயர்க்கட்டும். பரந்த பெரிய மலைக்கு அம்மத நீரினால் அழுக்கு உண்டாய் விடாது; பெயர்ப்பும் பலமாக ஏற்படாது.

2. வித்வான்களால் சூழப் பெற்றும் மதிக்கப் பெற்றுமிருப்பவன் செல்வ வளம் உடையன் அரசனோ அல்லது வேறு மஹானோ பொறுமை மிக்கனாகில், கள்குடி வெறியன் போன்றவன் தன் கார்யத்தை ஸாதித்துக்கொள்ளச் செய்யும் செயலால் சில தோஷமேறிட்டாலும், மஹானை நலிய வேண்டுமென நோக்குடனே சில விரோதங்களிலிழிந்தாலும் அம் மஹானுக்கு அழுக்கும் கலக்கமும் சிறிதும் விளையா. ஆகையால் பேரரசன் ஏதோ சிலர் செய்யும் திங்குகளைப் பெருமனதுடன் பொருட்படுத்தாமலிருப்பதே பெருமையாகும். பொறுமை பெரிது.

நீதிமத் பத்ததி முற்றும்.

अथ वदान्यपद्धतिर्दशमी (१०)

अस्याः पद्धतेः धनधान्यपद्धतिरिति नाम लिखन्ति। दुर्जन-सुजनपुरुषनामत एव सर्वपद्धति-व्यवहारादत्र परं तद्भंगो न युक्तः। विशिष्य धनधान्यरूपद्वयग्रहणमपि निष्कारणम्। अतो विषयानुरोधात् वदान्यपद्धतिरिति नाम। वदान्यस्य सौलभ्यमावश्यकमिति आदावुच्यते—

आभिमुख्यदशामात्रादादर्श इव सज्जनः।
शीघ्रं रक्तमरक्तं वा (च) गृह्णाति स्वप्रसादतः॥ १॥

1. 'स्युर्वदान्य-स्थूललक्ष-दानशौण्डा बहुप्रदे' इति **वदान्यः** बहुप्रदः । **सज्जनः**, "श्रद्धया देयम्, अश्रद्धया देयम्" इत्यादिश्रुत्यर्थनिरूपको दानोत्साही पुरुषः **आदर्श इव** निर्मलदर्पण इव **आभिमुख्यदशामात्रात्** आगतस्य स्वाभिमुख्यमात्रं कारणं कृत्वा तदीयप्रार्थनापेक्षां विनैव **स्वप्रसादतः** स्वगतात् निर्मलत्वात् मनोमुखादीनां प्रसन्नत्वात् शीघ्रं क्षणमप्यविलम्ब्य धुरि स्थितं स्वयं **गृह्णाति** संप्रदानत्वेन स्वीकरोति; **रक्तं** रागवन्तं-स्वस्मात् किञ्चिद्वस्तुग्रहणे सापेक्षम्, **अरक्तं** वा वस्तुग्रहणार्थमनागतमपि । तस्यापेक्षाभावेऽपि आहूय, किं ते दद्यां ब्रूहीति याचमानो गृह्णाति । लोके प्रतिग्रहीतारं याचकं वदन्ति, यो देयद्रव्यस्वामी भविष्यति । पूर्वं स्वामिभूतं तु दातेति । **वदान्यस्तु** वद अन्यदपि किञ्चिदपेक्षितमिति याचकं याचते । अरक्तमपि पुरुषम्, गृहाणेति याचते । अतो दाताऽपि याचकः । दाता स एव ग्रहीता च, रक्तारक्तसर्वग्राहित्वात् । इदमत्र गृह्णातीति पदेन व्यज्यते । एवं दातारं प्रति प्रतिग्रहीत्रा स्वात्मदानादेव पाणिनिरपि संप्रदानमिति तस्य नाम साम्प्रदायिकमनुसंधत्ते इव । भगवानप्यगासीत् प्रतिग्रहीतॄणामुदारत्वम्, "उदाराः सर्व एवैते" इति । असज्जनस्तु अनपेक्षमाणमागतमपि आभिमुख्यमात्रेण याचकत्वशंकया निगृह्णाति । आदर्शपक्षे **रक्तमरक्तं** वेत्यस्य द्रव्यान्तरसंपर्काधीनवर्णान्तरवन्तं स्वाभाविकरूपवन्तं वेत्यर्थः । एतत्कथनञ्च-नीरूपस्याचाक्षुषत्वात् प्रतिफलनं न भवति; औपाधिकरूपमपि पर्याप्तमिति ज्ञापनाय । **स्वप्रसादत** इत्यस्य मालिन्यराहित्यादित्यर्थः । मलिनत्वे हि यथावद्ग्रहणं दर्पणकार्यं न भवेत् । उदारेणारक्तग्रहणमुपनिषद्यपि श्रुतम्—अश्वपतिर्हि केकयः वैश्वानरात्मजिज्ञासया स्वमुपसेदुषः प्राचीनयोग्यादीन् महर्षीन् 'न मे स्तेनो जनपदे' इति श्लोकेन स्वस्य शुद्धद्रव्यकत्वं विज्ञाप्य विशेषतो धनमदित्सत; ते तु आत्मज्ञानमेवापेक्षमाणास्तत्र रागं नावहन् ।

प्रसादो नाम 'कृतज्ञतोपकर्तृत्वं भूयो दोषानभिज्ञता । एष प्रसादश्चित्तानाम्' इत्युक्तो गुणः ।

2. **सज्जनः** "प्रथमसुजनाय पुंसे" इत्युपक्रान्तः सुजनसार्वभौमो भगवान् **आभिमुख्यदशामात्रात्** "प्रपद्यन्तेऽन्यदेवताः" इति रीतिं परित्यज्य स्वाभिमुख्यसद्भावमात्रेण, यद्वा स्वोपदिष्टवेदोक्तार्थविश्वासेन तदाभिमुख्यमात्रेण **रक्तमरक्तं वा** मुमुक्षुममुमुक्षुं वा, स्वस्मिन् रक्तं देवतान्तररक्ततया स्वारक्तं वा **स्वप्रसादतः** वैदिककर्मानुष्ठायीति तत्कर्माधीनप्रसादं साक्षाद्वा देवतान्तरमुखेन वा लब्ध्वा **गृह्णाति** देयफलकत्वेन स्वीकरोति; क्रमेण रक्तं चिकीर्षुः अनुगृह्णाति च । गीतं हि, "चतुर्विधा भजन्ते माम्" इति, "योयो यांयां तनुम्" इति च । मुमुक्षुर्भगवति रक्तः । अन्यफलसक्तस्त्वरक्तो भगवति ।

3. लोके सज्जनः स्वं प्रति आभिमुख्यं देहिनोऽस्ति चेत्-तावन्मात्रेण प्रसन्नः **अरक्तं** फले रागरहितमपि **गृह्णाति** स्वीकीयत्वेन मन्यते । तेन, "पशुर्मनुष्यः पक्षी वा" इति न्यायेन फलिनं करोति । यथा श्रीरामो जटायुमोक्षदः ।

4. **आदर्श** इत्यत्र आ इति पृथक्पदम् । दर्शः अमावास्या । **स्वप्रसादतः** स्वस्य प्रकर्षेण सदनात् वर्तमानत्वादेव आ आभिमुख्यदशामात्रात् सूर्यस्य प्रतिपत्तिथ्याभिमुख्यदशाया ईषत्सत्त्वे **रक्तम्** उपरक्तं राहुग्रस्तं सूर्यम्, राहुग्रासाभावे अरक्तञ्च गृह्णाति ।

5. **आ अदर्श** इति पदच्छेदे, अदर्शः पर्वणोर्मध्ये दर्शभिन्नं पर्व । पूर्णिमेत्यर्थः । स चन्द्रं गृह्णातीति । शेषं पूर्ववत् ॥

விரும்பியதற்கு மேலாக அளிப்பவன் வதாந்யன்—

ஆபிமுக்யதசாமாத்ராத் ஆதர்ச இவ ஸஜ்ஜந:|
சீக்ரம் ரக்தம் அரக்தம் வா(ச)க்ருஹ்ணதி ஸ்வப்ரஸாதத:॥ 1 ॥

1. நல்லான் கொடையில் நோக்கு உடையன் தன்னைப் பார்த்து வந்தவன் யாரேனுமாகிலும், அவன் அபேக்ஷையுள்ளவனாயினும் இராதவனாயினும் தான் அளிப்பதற்காகச் சேர்த்துக்கொள்ளுகிறான். அதற்கு இவனது மனத்தெளிவே காரணம். ஆக இவன் கண்ணாடி போலாவான். கண்ணாடி தன் எதிரில் இருப்பது எதையும் வாங்கிக்கொள்ளும் வர்ணம் கொடுக்கப்பட்டதோ, படாததோ எல்லாம் கண்ணாடியில் விழும். அது அழுக்கற்று நிழல் விழும்படி தெளிந்திருப்பதால்.

2. ஸஜ்ஜநனான் ஸர்வேச்வரன். அவன் தன்னையோ தான் உபதேசித்த வேதத்தையோ இசைந்திருக்கிறான் எந்த ஜீவன், அவனுக்கு மோக்ஷத்தில் விருப்பம் இருப்பினும் இராமற் போயினும், தன்னிடம் பக்தி இருப்பினும் வேறு தேவதையினிடம் பக்தி இருப்பினும் படிப்படியாகத் திருத்தலாமென்ற நோக்குடன் பலன் அளிக்க அவனைக் கொள்கிறான்.

3. உலகில் நல்லானாயிருக்கும் மஹான் தன்னை அண்டின ஜந்து எதாயினும் அதற்கு மோக்ஷபலனில் விருப்பம் இருப்பினும் இராமற் போயினும் தனது கிருபையினாலே மோக்ஷம் பெறுவிக்க முயல்வான். அதனாலன்றோ பசு பக்ஷி முதலானவையும் மோக்ஷம் பெறும் வைஷ்ணவனை யண்டினால் என்கிறது. ராமன் ஜடாயுவுக்கு மோக்ஷம் அளித்தாரே.

4. ஆதர்ச: என்ற பதத்தில் ஆ என்றும் தர்ச: என்றும் பிரிக்க, தர்சமாவது அமாவாஸ்யை—அது சிறிதிருக்கும்போது, ப்ரதமைக்கு முன்னாக ராகுக்ரஹணத்திற்காளான சூர்யனையும் வேறு ஸமயத்தில் அவ்வாறாகாத சூர்யனையும் கொள்ளும்.

5. அதர்ச: என்று பிரித்தால் பூர்ணிமை பொருளாகும். அது அவ்வாறு சந்த்ரனைக் கொள்ளும்.

साधूनां कल्पवृक्षवत् सर्वप्रदत्वं स्वाभाविकमित्याह—

अप्यनावर्जिताः स्वेन फलभारेण संनताः ।
अर्भकैरपि गृह्यन्ते साधुसंतानशाखिनः ॥ २ ॥

1. अत्युच्छ्रितत्वात् परैर्नमयितुमशक्यतया **अनावर्जिता अपि** परकर्तृकनमनव्यापाराविषयभूता अपि । पारिजातो हि कल्पतरुः परमपुरुषवाहनेन गरुत्मतैवाऽऽवर्जनीय आसीत्; नान्येन ।

स्वेन स्वकीयेन **फलभारेण** परार्थमेव कृप्तेन नानाविधफलभूम्ना **संनताः** स्वयमेवात्यन्तं नीचीभूतनिखिलपार्श्वशाखास्सन्तः, **साधवः** सज्जना एव **संतानशाखिनः** कल्पवृक्षाः **अर्भकैः** शिशुभिः अतिबालैरपि **गृह्यन्ते** स्वायत्तीक्रियन्ते । अप्रचितापेक्षितफलाः क्रियन्ते । **भारेणे**त्यत्र रागेणेति कृत्वा अभिलाषेणेति व्याख्यान्ति। तदा फलदानाभिलाषेण स्वगतेनेति वा, याचकगतेन फलप्राप्त्यभिलाषेण हेतुनेति वा भावः । कल्पवृक्षस्याभिलाषो भवितुमर्हति । भारेणेति पाठे गौरवेणेत्यर्थः । **अर्भकाः** ज्ञानहीनाः शक्तिहीनाश्च पुरुषाः साधून् आश्रित्य ज्ञानं शक्तिञ्च लभन्ते । ज्ञानशक्तिलाभप्रसक्त्यभावेऽपि तदधीनं फलं साधुमुखेनैवानायासं लभन्ते । साधूनां स्वयमेतन्मुखेन किञ्चिदपेक्षित्वाभावात् अशक्यावर्जना एव ते स्वयं वितरन्ति ।

அப்யநாவர்ஜிதா: ஸ்வேந பலபாரேண ஸந்நதா: |
அர்ப்பகைரபி க்ருஹ்யந்தே ஸாதுஸந்தாந சாகிந: || 2 ||

1. *ஸாதுக்களாகிற கல்ப்ப விருட்சங்கள் தங்கள் பெருமையினால் பிறரால் வணக்கப்படாதபடி ஓங்கியிருந்தும் தம்மிடம் உள்ள பலன்களின் பளுவினால் தாமே வணங்கிநின்று சிறு குழந்தைகளும் பிடித்துப் பறித்துக் கொள்ளும்படியாகின்றன.*

दातृणामेव भोगित्वम्, न तु कृपणानामित्याह—

निर्मुक्तभवनक्षेत्राः स्युः सदागतिनिर्वृताः ।
प्राप्ते भयविपर्यासे भोगिनः खलु भोगिनः (योगिनः) ॥ ३ ॥

1. **भोगिनां** भोगभाजाम् । भोगित्वं न परेभ्योऽप्रदाय स्वयमनुभवात्; न वा कृपणत्वात् । किं तु ये **निर्मुक्तभवनक्षेत्राः**, **भवनानि** गृहाणि **क्षेत्राणि** केदारादीनि च यैः परेभ्यः **निर्मुक्तानि** भोगार्थं दत्तानि, ये च **सदागतिनिर्वृताः** पुनः पुनः प्रतिग्रहार्थमागच्छतां सत्पुरुषाणामागतिं दृष्ट्वैव **निर्वृताः** सुखिनः स्युः, तेषामेव भोगिता । कुतः ? भयविपर्यासस्य प्राप्तत्वात् । ये हि न ददति, तेषाम् अर्थानामार्जने इव आर्जितरक्षणे, तन्नाशे, तद्व्यये च दुःखानुवृत्तेः कथं भोगवत्त्वम् । "दृप्यद्दुरीश्वरद्वाःस्थदण्डिचण्डार्धचन्द्रजाम् । वेदनां भावयन् प्राज्ञः कः सेवास्वनुषज्जते" इति सेवादिरूपार्जनोपाये दुःखम् । राजचोराग्निजलादिभ्यो रक्षणे दुःखम् । तस्य भोगादिना क्षयदर्शनादपि दुःखम् । भुक्तस्य पुनर्भोगवासनाधायकत्वात् पुनःप्रवृत्त्याऽपि दुःखम् । भोगप्रतिरोद्धृपुरुषहिंसादिप्रवृत्त्याऽपि दुःखमित्यादि सांख्याद्युक्तं ग्राह्यम् । "ये हि संस्पर्शजा भोगा दुःखयोनय एव ते" (गी. 5-22) इत्यत्र **तात्पर्यचन्द्रिका** द्रष्टव्या । ये तु परेभ्यो ददति, तेषां दत्तं सर्वमिति संतोषातिशयात् उक्तदुःखविपरीतं सुखमेवेति त एव भोगिनः । **प्राप्ते भयविपर्यासे** इत्यस्यार्थान्तरम्, याचकानां यत् भयम्, **कथं वयं** जीविष्याम इति, तस्य विपर्यासे संपन्ने इति । अर्थिषु सुखिष्विति यावत् ।

2. **भोगिनः** सुखभाजः **भोगिनः** सर्पा इति सर्पसाम्यमपि विवक्षितम् । भोगिनां भोगित्वं भोगिशब्दवाच्यत्वं कस्मादिति चेत्–भोगः सर्पशरीरं तद्वत्त्वादिति ब्रूयुः । वस्तुतः उक्तविशेषणवत्त्वादेवेत्याह **निरिति** । सर्पाः खलु परैरध्युषितेषु गृहेषु क्षेत्रेषु च न वसन्ति, किं तु तानि निर्मुञ्चन्ति, तत्र स्थितौ भयं स्यादिति । तन्मोचनात् तेषां भयविपर्यासः **प्राप्तः** संपन्नः । किञ्चाऽऽहारार्थमपि न बह्वार्जयन्ति **सदागतिनिर्वृताः** । **सदागतिः** वायुः ; तेनैव **निर्वृताः** सुखिनः ; वाताशनत्वात् । तदार्जनेपि न श्रमः । सदागतित्वाद्वातः स्वयमेवैषां मुखं प्रविशति । एवं निर्भयत्वादेव निर्दुःखाः भोगिन इत्युच्यन्ते ।

3. योगिन इति पाठे **योगिनः** एवं भाग्यशालिन इत्यर्थः । योगानुष्ठायिपुरुषपरतयाऽप्यर्थस्तदा । ते योगनिष्पत्तये सर्वपरिग्रहवर्जनात् निर्मुक्तभवनक्षेत्रा भवन्ति । **सदागतिनिर्वृताः** तत्र तत्र सतां समागमात् निर्वृताः । क्रमेण सर्वत्यागात् यत्रसायंगृहोमुनिरित्युक्त्या रात्रौ योगानुष्ठानार्थं क्वचित् स्थिता अपि अहस्सु सदा गच्छन्त एव सन्ति । अतः सर्वपरिचयवर्जनात् निर्वृताः । **भयविपर्यासः** अभयं ब्रह्म । तत्प्राप्त्या भोगिनः, "अत्र ब्रह्म समश्नुते" इति । क्रमेण, "न बिभेति कदाचन कुतश्चन कचन" इति दशां प्राप्य **भोगिनः** परमात्मना भोगसम्यभाजश्च ।

4. ये तु **भोगिन** इति कथ्यमानाः धनिनः, ते **भयविपर्यासे प्राप्ते** । भयशब्दस्य विपर्यासे यभशब्दो भवति । यभधात्वर्थो मैथुनम् । तदेव भोग इति तन्मतम् । तत्रैव सदा प्रवृत्त्या कालक्रमेण भवनैः क्षेत्रैश्च हीना भवन्ति ; तदर्थमेव सर्वव्ययात् । **सदा** सर्वदा **गतिभिः** अपायैः **निर्वृताः** परिवृताश्च । तथा **निर्वृतं** सुखं । भावे क्तः । **सदागति** सर्वदा गच्छत् सुखं येषां ते सदागतिनिर्वृताः । अभोगिनः खलु । चतुर्थपादारम्भे **अभोगिन** इति पदच्छेदः ।

நிர்முக்த பவநக்ஷேத்ரா: ஸ்யுஸ் ஸதாகதி நிர்வ்ருதா: |
ப்ராப்தே பயவிபர்யாஸே போகிந: கலு போகிந: (யோகிந:) || 3 ||

1. நன்கொடையளிப்பதிலே நோக்குள்ள மஹான்கள், வீடுகள் வயல்கள் முதலாக எல்லாம் த்யாகம் செய்கின்றவர்களாய், அளிப்பதைப் பெற நல்லோர்களின் வரவைக் கண்டு களிப்பவர்களாய், வஸ்துக்களைக் காப்பதில், அரசர், கள்ளர், வெள்ளம், நெருப்பு முதலான விபத்துக்கள் நேர்வதை நினைத்துப் பெறும் அச்சம் சிறிதுமின்றி ஆனந்தப் படுகிறார்களாகையால் அவர்களே போகிகள். அவர்களே யோகிகள். பாக்யமுள்ளவர்கள்.

2. பாம்புகளுக்கு போகி என்ற பெயர் உண்டு. போகமாவது பாம்பின் உடல் என்பர். அது நிற்க. இந்த ச்லோகத்தில் போகிகளுக்குச் சொன்ன விசேஷணங்கள் அவற்றிற்கும் பொருந்தும். அதனால் போகிகளென்க. பிறர் பழகும் வீடுகளிலோ மனை வயல் முதலானவற்றிலோ அவை வாஸம் செய்யா. அவற்றை விடும். ஆஹாரத்திற்காகவும் பிர

யாசை கொள்வதில்லை. ஸதாகதி என்னப்பட்ட வாயுவே அவற்றிற்கு ஆஹாரம். வாய் திறந்திருந்து தானே புகும் காற்றை உட்கொண்டு பசி தீர்க்கும். யாரும் ஸஞ்சாரம் செய்யாத இடங்களில் தங்குவதால் அவற்றிற்கு பயமில்லாமை தானே அமைகிறது. எனவே அவை போகிகள்—பாக்யமுமுள்ளனவாம்.

3. யோகிகளுடைய ஸௌக்கியம் பிறர்க்கு இல்லையாகையால் அவர்களே போகிகள். யோகம் பெற வேண்டுமென்று வீடு வயல் எல்லாம் விட்டுவிடுகின்றனர். ஸத்புருஷர்களின் சேர்க்கை ஆங்காங்கு நேர அதனால் ஆனந்தம் உறுகின்றனர். கால வடைவில் எல்லாம் விட்டு ஸதாகதி—அதாவது எப்போதும் ஸஞ்சாரமே, அதனால் ஸந்தோஷிப்பவர். பயமெல்லாம் போக்குவதால் பய விபர்யாஸம்—அபயம் எனப்படும் ப்ரஹ்மத்தை இவ்வுலகிலும் அனுபவிப்பதால் போகிகளாகிறார்கள். பிறகு மோக்ஷம் பெற்று பகவானுடைய ஸாம்யமாம் முழு போகமும் பெறுகின்றார்களாகையால் போகிகளே.

4. போகிகளென்பவர் போகிகளல்லர். இவர்கள் பய என்பதற்கு மாறான யப என்ற சொல்லின் பொருளான ஸ்த்ரீ போகங்களில் கண்டபடி இழிவதால் வீடுவாசல் வயலெல்லாம் தொலைந்து, உடல் நலமும் கெட்டு, பலவித அபாயங்களால் சூழப்படுவரே. ஆக அவர்களை அபோகிகளென்றே சொல்வதாம்.

मनुष्यस्य सतो वदान्यत्वे कुबेरतौल्यं भवतीत्याह—

सर्वेषामुत्तरामाशां धनदो यः प्रतीक्षते ।
सत्यं मनुष्यधर्मैव स तु पुण्यजनेश्वरः ॥ ४ ॥

1. यः पुमान् **धनदः** धनप्रदस्सन् **सर्वेषामुत्तरामाशां प्रतीक्षते**—सर्वे मत्तो धनग्रहणाय उपर्युपरि **आशावन्तः** अपेक्षावन्तो भवन्तु इति प्रतीक्षमाणोऽस्ति, सः **मनुष्यधर्मा एव**—पुण्यपापोभयवत्त्वं मनुष्यस्य धर्मः तथा अज्ञत्वाशक्तत्वादिकमपि—तथाविधोऽपि सामान्यमनुष्यवत् प्रतीयमानोपि धनदायित्व-पूर्वोक्तप्रतीक्षावत्त्वमात्रेण **पुण्यानां** पुण्यकृतां जनानामीश्वरो भवति ; सर्वोत्कृष्टपुण्यशाली भवति । **सत्यम्**—नात्र संदेहः । तादृक्कुबेरदर्शनात् ।

2. कुबेरो हि मनुष्यधर्मा ; न देवलोकस्थेतरदेवतातुल्यदेहसौष्ठवयुक्तः कुत्सितबेरत्वात् । पीतैकनेत्रः दन्ताष्टकमात्रयुतः पादत्रयवांश्च इत्याहुः । एवं स्वाभाविकविकारवत् श्मश्रुलत्वरूपो विकारः स्वयंकृतोऽप्यस्तीति ज्ञायते । एवम्भूतस्य किंनरेश्वरत्वं युज्यते । किमिमे नरा इति शंकनीयकुत्सिताकारपुरुषेश्वरत्वं हि तत् । तादृशस्य पुण्यजनेश्वरत्वं धनदत्वोत्तराशाप्रतीक्षत्वसहचरितं यद्दृश्यते, तत् प्रशंसनीयमिति । वास्तवार्थस्तु—**धनदत्वं** धनप्रदानप्रयुक्ततथानामवत्त्वमेव । सर्वेषां दिक्पालकानां मध्ये स धनदः **उत्तरां आशाम्** दक्षिणस्या दिशः प्रतिकोटिभूतां दिशं **प्रतीक्षते** । **प्रति ईक्षते**

इति पदद्वयम् । तां दिशं प्रति तद्दृष्टिर्भवति ; तत्परिपाल्यत्वात् । पुण्यजनेश्वरत्वञ्च राक्षसेश्वरत्वम् । रावणस्याग्रजो हि सः । एवमर्थभेदे सत्यपि याचकाशाप्रतीक्षणात् पुण्येश्वरत्वमित्यर्थमादाय प्रशंसा ।

3. श्रीरामभद्रः वनप्रस्थानावसरे सर्वं धनं दातुं प्रवृत्तः सर्वेषामाशाम् अपेक्षमाण आसीत् । तत्र त्रिजटो नाम ब्राह्मणो वृद्धः तरुण्या भार्यया प्रचोदितः शाटीमाच्छाद्य दुश्छदां राममासाद्याब्रवीत्-निर्धनो बहुपुत्रोऽस्मि....प्रत्यवेक्षस्व मामिति । श्रीरामश्च तदाशां जिज्ञासुः, (अ. 32) "परिक्षिपसि दण्डेन यावत् तावदवाप्स्यसि" इति गोबृन्दं प्रादर्शयत् । गोव्रजे बहुसाहस्रे तद्दण्डपातं दृष्ट्वा तं विप्रं परिष्वज्य तावत् प्रादात् । एवं धनप्रदो रामः अवतारपुरुषत्वात् मनुष्यभावनां कुर्वन् मनुष्यधर्मैव । एवम्भूतस्य पुण्यजनेश्वरत्वम्-पुण्यजना इति राक्षसाः कथ्यन्ते, अमङ्गलस्य वारस्य यथा मङ्गलवारतेति । तदीश्वरत्वम् असंभावितमप्यासीत् । राक्षसेश्वररावणवधेन विभीषणस्य स्वदासस्य तत्र प्रतिष्ठापनेन स्वयमयं राक्षसेश्वरोऽप्यासीत् । एवं राक्षसाधिपत्यमपि प्राप्य निर्बाधतया प्रतिनिवर्तनं नूनमुत्कृष्टापेक्षारूपोतराशाप्रतीक्षणेन त्रिजटाय गोव्रजदानफलम् । त्रिजटं प्रति अनुकूलस्यास्य लंकायां त्रिजटा यदनुकूलाऽसीत्, ततोऽप्येतत् सूच्यमिति सुनिश्चयमिति । पुण्यान् जनान् संनिहितमोक्षान् साकेतवासिनः प्रति ईश्वरत्वमपि ॥

கொடையாளியிற் சிறந்தவன் குபேரனுக்கு ஸமானமென்கிறார்—

ஸர்வேஷாம் உத்தராம் ஆசாம் தநதோ ய: ப்ரதீக்ஷதே |
ஸத்யம் மனுஷ்யதர்மைவ ஸ து புண்யஜநேச்வர: || 4 ||

1. யாவன் தனம் அளிப்பானாய் எல்லோருக்கும் மேன்மேல் தன்னிடம் தனம் பெற ஆசை வளரவேண்டுமென்று எதிர்பார்க்கிறான். அவன் காண்பதற்கு சாமான்ய மனுஷ்யனாகவே யிருப்பினும் புண்யம் செய்தவர்களுக்கெல்லாம் மேம்பட்டவனாகிறான். இது உண்மை இவ்வாறு குபேரனைக் காண்கிறோமே.

2. குபேரனைக் கூறும்போது சொற்களின் பொருள் வேறாகும். சொல்லொத்துமையினாலாம் சமத்காரமிங்கு. குபேரன் தனதன் தனம் அளிப்பதால் அவனுக்கு தனதனென்றே பெயர். ஸர்வேஷாம் உத்தராசாப்ரதீக்ஷன். அதாவது திக்பாலகர்களுக்குள்ளே வட திக்கைக் குறித்துத் தன் கண்ணோக்கு உடையன். அந்த திசைக்கு அவன் பதியாகிறானே. மனுஷ்யதர்மா—தேவலோகத்தில் தேவதைக்குள்ளது போன்ற ஒளியும் அழகும் வாய்ந்தவனாகாமல் மனுஷ்யனைப் போலிருப்பவன். (குபேரன் என அவன் பெயரினின்று அவன் உடல் அழகற்றதென விளங்கும். அவனுக்கு மூன்று கால், எட்டே பற்கள், ஒரு கண் மஞ்சள் என்பர்.) இப்படியிருந்தும் திக்பாலகனாய் புண்ய ஜனங்களுக்கு ஈச்வரனுமானமைக்குக் காரணம் அவன் தனதனாகையே. புண்யஜந என்ற சொல்லுக்கு, புண்யங்களைச் செய்த ஜனங்கள் என்ற பொருள் நீங்கலாக அரக்கர்களென்ற பொருள் கொள்க. ராவணனுக்கு அண்ணனாகையால் ராக்ஷஸேச்வரனுமாகிறான். அரக்கருக்குத் தக்க உடல்.

3. கொடையில் குபேரனுக்கு ஒப்பான ஸ்ரீராமன்விஷயமுமாம். அவர் காட்டுக்குப் புறப்படும்போது எல்லா தனத்தையும் தானம் செய்பவராய் த்ரிஜடன் என்ற ஏழையாய் குடும்பியான அந்தணன் வந்து கேட்கும்போது அவனது ஆசை எவ்வளவு மேலிட்டிருக்கின்றதென அறிய விரும்பித் தடியொன்றைக் கொடுத்து விட்டெறியச் சொன்னார். அது பல்லாயிரம் கோக்களைக் கடந்து ஸரயூ நதிக்கரை சென்றது. அது கண்டு வியந்து அது வரையில் கோக்களை நிறுத்தி தானம் செய்தருளினார். மனுஷ்யாவதாரம் செய்ததால் மனுஷ்யனாகத் தன்னை எண்பிக்கும் அவர் இத்தகையதான மஹிமையால் அரக்கவரசனான ராவணனை அழித்து அவர்களுக்கும் ஈச்வரனாகிப் பெருமையோடு திரும்பினார்.

केषाञ्चित् सर्वविधदानग्यग्राणामेव कदाचित् तिर्यङ्मुखता–प्रतिग्रहीत्राभिमुख्याभावः स्यात्। तावता न वदान्यत्वहानिः। वैमुख्यकारणं तु तदविरोधेनान्यदेवोन्नेयमित्याह—

येषां हिरण्यकशिपुक्षेत्रदानकरः करः।
तेषां तिर्यङ्मुखत्वेऽपि पुरुषत्वं न हीयते ॥ ५ ॥

1. **येषां** दातॄणां **करः** हस्तः **हिरण्यं** स्वर्णं रजतञ्च, **कशिपु** अन्नं वस्त्रञ्च। "कशिपु त्वन्नमाच्छादनं द्वयम्" इत्यमरः। **क्षेत्रं** सस्यादिवृद्धिभूमिः। एषां सर्वेषां दानं करोति–तेषां **तिर्यङ्मुखत्वेऽपि**–सत्यपि वैमुख्ये **पुरुषत्वं** वदान्यत्वं **पुरु** बहु **सनोति** ददातीति पुरुषः तत्त्वं न हीयते। अनेकार्थदानात्।

2. नृसिंहावतारपरत्वमपि। **येषा**मिति पूजायां बहुवचनम्। 'भक्तस्य दानवशिशोः' इति श्लोके 'त्रैलोक्यमेतदखिलं नरसिंहगर्भम्' इत्युक्तत्वात् नृसिंहव्यक्त्यानन्त्यादेव बहुवचनमिति वा। तत्करः हिरण्यकशिपोः प्रह्लादपितुः यत् **क्षेत्रं** शरीरम् तस्य **दानं** नखैरेव खण्डनं करोतीति तादृशः। **तेषां तिर्यक्** मृगः मृगेन्द्रः ; तस्य मुखमिव मुखं तद्वत्त्वेऽपि सिंहत्वमिव **पुरुषत्वं** मनुष्याकारत्वमपि न हीयते ; कण्ठादधोनरत्वात्। करादिमत्त्वात्। पुरुषसूक्तसिद्धमहापुरुषत्वमपि पुरुषत्वम्।

3. महाबलिपरोऽपि। यस्य करः हिरण्यादिदानं करोति, तस्य बलेः **तिर्यङ्मुखत्वेऽपि** श्रीवामनरूपिणे विष्णवे पदत्रयदानप्रतिबन्धकतया कमण्डलुद्वारे तिर्यग्भूतः शुक्राचार्यो यस्य बलेर्**मुखभूतः** पुरोहित उपदेष्टा, तथात्वेऽपि शुक्राचार्यप्रतिषिद्धत्वेऽपीति यावत्। तस्य **पुरुषत्वं** बहुप्रदत्वं लोकत्रयात्मकपदत्रयप्रदत्वं न हीयते।

4. **तिर्यङ्मुखाः** तिर्यक्प्रभृतयोऽपि वदान्या भवन्ति। गजमुखो गणपतिः स्वशुण्डया हिरण्यादिकं श्रितेभ्यो दद्यात्। नाडीजङ्घोपाख्यानमपि द्रष्टव्यम् (1–10)। कपोतः **क्षेत्रं** शरीरमदात्। तदपि प्रसिद्धम्। (रा. यु.)

யேஷாம் ஹிரண்ய கசிபு க்ஷேத்ரதாநகர: கர: |
தேஷாம் திர்யங்முகத்வேऽபி புருஷத்வம் ந ஹீயதே ‖ 5 ‖

1. ஹிரண்யமாவது பொன்னும் வெள்ளியும். கசிபு என்றால் அன்னவஸ்த்ரம். இவற்றையும் பூமியையும் தானம் செய்யும் கை எவருக்கோ, அவர் நேர்முகமாய் இராவிட்டாலும் கொடையாளியென்ற பெருமைக்கு அழிவில்லை. (தானம் பெறுகிறவர்களிடத்தில் நேர்முகமாயில்லாமை தானம் செய்ய விருப்பமில்லாமையாலென்பதில்லை.)

2. ந்ருஸிம்ஹாவதார விஷயமாம். ஹிரண்ய கசிபுவின் க்ஷேத்ரமாவது அவனது உடல். அதற்கு தானமாவது பிளப்பு. அவன் உடலைப் பிளந்த திருக்கையையுடையனுகையால் நரசிங்கனுக்கு முகம் சிங்கமானுலும் மற்ற பாகத்தினுல் நரத்தன்மைக்கும் குறையில்லை. அப்போதும் அவர் புருஷ ஸூக்தத்தில் ஓதிய மஹாபுருஷனுமாவார்.

3. மாவலி இரண்யம் (பொன்) ஊண் உடை பூமியெல்லாம் அளிக்கும் கையுடையவன். அவன் வாமனுவதாரப் பெருமானுக்கு தானம் செய்யும்போது திர்யக்காக—குறுக்காக இருந்த சுக்ராசார்யரை முகமாக—புரோஹிதராகக் கொண்டிருந்தாலும் மூன்று அடி அளிப்பதை நிறுத்தவில்லை.

4. திர்யங்முகத்வமாவது—திர்யக்கென்ற பக்ஷி முதலானவையாகை. அப் பிறவியிலும் கொடையாளி யாகை உண்டு. கணபதி யானைமுகமாகியே தன்னை அண்டினுர்க்குத் தன் கரமான துதிக்கையாலே பொன் முதலானவற்றைக் கொடுப்பதுண்டு. நாளீஜங்கம் என்ற கொக்கின் உபாக்யானம் கீழே கூறப் பெற்றுள்ளது. கபோதோபாக்யானமும் ப்ரஸித்தமே. அது தனது க்ஷேத்ரத்தை அதாவது உடலையே வேடனுக்கு அர்ப்பணம் செய்தது. (5)

दानमार्गं सम्यग् जानन् वदान्यो यः, तन्निकटे न कदाप्यर्थिन आशा वन्ध्या भवतीत्याह—

मुख्यदानोदकक्लिन्नकरः ख्यातक्षमाधृतिः ।
लोकपालाश्रितः कश्चिदनाशावारणः कथम् ॥ ६ ॥

1. **मुख्यानां** श्रेष्ठानां वस्तूनां दानार्थेन **उदकेन** तीर्थेन सर्वदा **क्लिन्नः** आर्द्रः **करो** यस्य सः । ख्याते **क्षमा** क्षान्तिः, **धृतिः** धैर्यञ्च यस्य ; लोकपालैरपि गुणवश्यैः निधिमद्भिर्य आश्रितः, स कश्चित् अर्थिनामाशायाः **वारणः** पूरणेन निवर्तको न भवतीति कथम् । सर्वदा आशापूरक एव ।

2. दिग्गजविषयोऽपि । मुखे भवं **मुख्यं दानोदकं** मदजलम् । तेन क्लिन्नः **करः** शुण्डा यस्य सः दिग्गजः भूधारकत्वेन पुराणोक्तः । अतः **ख्यातक्षमाधृतिः** । इन्द्रादीन् दिक्पालान् लोकपालान् आश्रितश्च ; तद्वाहनत्वात् । ईदृशः **आशावारण** एव दिग्गज एव । अतस्तद्भिन्नः स कथं भवेत् ।

3. रघुर्महाराजो विश्वजिद्यागे दानस्य मुख्यत्वमाकलय्य सर्वं दत्वा तदुदकक्लिन्नहस्तो यदाऽऽसीत्, ततः पश्चात् कौत्सो महर्षिर्गुरुदक्षिणाग्रहणाय तमुपससाद । तदाऽपि स क्षमया धृत्या च दानपूर्तये कुबेरं जेतुं प्रतस्थे । तत्क्षण एव कुबेरेण लोकपालेनायमाश्रितोऽभूत् । स हि राज्ञो निधिगृहे

धनं कामाधिकं ववर्ष । एवम्भूतो रघुः कथमाशावारणो न भवेत् । पुनराशाप्रसक्तिर्हि गृहीतद्रव्यन्यूनतायाम् । पूर्णकामत्वात् पुनराशोदयस्य न प्रसक्तिः । कुबेरदत्तं सर्वमधिकमपि हि निर्बध्य प्रददौ ॥

கொடையாளியாய் கொடுப்பதற்கு வேண்டும் வழியுள்ளவனிடம் கேட்பவரின் ஆசை வீண் போகாதென்கிறார்—

முக்யதாநோதகக்லிந்நகர: க்ஷாதக்ஷமாத்ருதி: |
லோகபாலாச்ரித: கச்சித் அநாசாவாரண: கதம் ‖ 6 ‖

1. முக்யமான (சிறந்த) வஸ்துக்களை தானம் செய்தே வருவதால் ஈரமான கையை எப்போதும் உடையனும், பொறுமை தைர்யம் இரண்டும் உடையனும், உலகங்களைக் காப்பவனும் ஆச்ரயிக்கும்படியிருப்பவனுமாகின்றவன் ஆசையைப் பூர்த்திசெய்யாமலிருப்பானென்பது எவ்வாறு? பூர்த்தி செய்பவனே.

2. திக்கஜம் உதாரணம். அது முகத்தினின்று பெருகிய மதநீரினால் நனைந்த தும்பிக்கையுடையது. திக்கஜங்கள் பூமியைத் தாங்குகின்றன என ப்ரமாணம் இருப்பதால் பூமியை தரிப்பதும் அதற்கு ப்ரஸித்தமே. இந்த்ரன் முதலான லோகபாலர்களை ஆச்ரயித்திருக்கும் திக்கஜமாகையாலே ஆசாவாரணம். (ஆசா-திக்கு; வாரணம்-யானை) ஆசாவாரணங்களாகையாலே அநாசாவாரணமாகா. இரு பொருட் சொல்.

3. ரகு என்ற அரசன் விச்வஜித்யாகம் செய்து சிறந்தவற்றையெல்லாம் கொடுத்து நீரால் நனைந்த கையாயிருப்பவன் கௌத்ஸ மஹர்ஷி வந்து கேட்கும் போது அவருடைய ஆசையை நிறைவேற்றுமலிருப்பானு? குபேரன் என்ற லோகபாலனே ரகுவை அணுகும்படியிருந்ததே. குபேரனை வசப்படுத்த தைர்யமும் பொறுமையும் உடையவன். ஆசைக்கு மேலாகவும் நிர்பந்தித்து அளித்தவன்.

वदान्येषु केचित् विशेषेण स्तुतिवशीकृता अपरिमितं ददतीत्याह—

क्षोभितो विबुधैः कश्चित् गम्भीरमधुराशयः ।
चन्द्ररत्नगजाश्वादिसहितां दिशति श्रियम् ॥ ७ ॥

1. **गम्भीरः** परदुर्ग्रहतलः **मधुरः** सर्वप्रीतिवहश्च **आशयः** चित्तं यस्य स **कश्चित्** वदान्यविशेषः **विबुधैः** विद्वद्भिरुपायज्ञैः **क्षोभितः** स्तुत्या दानधर्मप्रभावप्रपञ्चनेन वा प्रापितोत्साहस्सन् । **चन्द्रः** सुवर्णम् । "चन्द्रः शुभ्रांशुकर्पूरकाम्पिल्यस्वर्णवारिषु" इति विश्वः । पादुकासहस्रे स्वर्णविषयतया प्रयोगोऽपि । रत्नानि विविधानि, गजाश्च अश्वाश्चाऽऽदयो येषां धान्यादीनां तत्सहितां **श्रियं** सम्पदं दिशति विबुधेभ्यः, अन्येभ्यश्च ।

2. यथा **कश्चित्** क्षीरोदधिः **गम्भीरः** अगाधः **मधुरस्य** पयसोऽमृतस्य चा**शयः** स्थानभूतश्च **विबुधैः** असुरविशिष्टैः सुरैः क्षोभितः मन्दराचलेन मथितस्सन् । **चन्द्रः** शुभ्रांशुः **रत्नम्**

चिन्तामणिः **गजः** ऐरावतः **अश्वः** उच्चैश्श्रवाः । **आदिना** धेन्वमृतपारिजातादिग्रहणम् । **तैः** सहितां **श्रियं** साक्षाल्लक्ष्मीमपि दिशति ।

க்ஷோபிதோ விபுதை: கச்சித் கம்பீரமதுராசய: |
சந்த்ர ரத்ந கஜாச்வாதி ஸஹிதாம் திசதி ச்ரியம் || 7 ||

1. ஒருவன் ஆழமாயும் இனிதாயுமுள்ள மனம் உடையன் வித்வான்களால் கொடையிளுலாம் நன்மையின் மேன்மையை யறிவிப்பதாலும் துதியிளுலும் தூண்டப்பட்டவனுய், பொன், மணி, யானை குதிரை முதலானவற்ருேடு சேர்ந்த செல்வத்தை அளிக்கிருன்.

2. பாற்கடல் ஆழமாய் அமுதுக்கும் பாலுக்கும் இடமானது தேவர்களால் கடையப் பெற்று, சந்திரன் சிந்தாமணி ஐராவதம் உச்சைச்ச்ரவஸ்ஸு முதலானவற்ருேடு ஸ்ரீமஹாலக்ஷ்மியையும் அளித்தது.

वदान्यं भगवता तुलयति—

अपुनर्देहिशब्दार्थमप्रत्युपकृतिक्षमम् ।
अर्थिनं कुरुते कश्चित् पुनरावृत्तिवर्जितम् ॥ ८ ॥

1. **कश्चित्** वदान्यविशेषः **अर्थिनं** याचकम् अर्थिनमेव कुरुते । अर्थो धनम् ; अतिशयेन तद्वन्तं कुरुते । पुनःकथम्भूतम् ? **अपुनर्देहिशब्दार्थम्** । न भवति पुनरपि देहीति शब्दो **येनार्थेन** धनेन । बलवद्धनविशिष्टं कुरुते । केचिदल्पेनापि तृप्ताः देहीति पुनर्न वदन्ति ; न तथेत्याह **अप्रत्युपकृतिक्षम**मिति । कृतज्ञतया प्रत्युपकारप्रवृत्तौ तत्करणासमर्थञ्च कुरुते । गृहीतद्रविणानुरूपः प्रत्युपकारो नैव भवतीति भावः । **पुनरावृत्तिवर्जितञ्च** कुरुते । देहीति वदन् पुनर्नायातीति प्रथममेवोक्तम् । प्रत्युपकारार्थं नागन्तुं शक्यमिति चोक्तम् । अथापि एवं भवता लब्धमहत्त्वोऽहमिति स्तोतुमर्थिनां पुनरागमनमपि न सहते इतीहोच्यते । किं मया दत्तम् , कथं मे दातृत्वमिति ह्रीविशिष्टः स्तुत्यर्थमागमनस्यावकाशं न ददातीति ।

2. **कश्चित्** अद्वितीयः पतिः परमात्मा **अर्थिनं** स्वस्मात् पुरुषार्थमपेक्षमाणम् । तस्य सापेक्षत्वे क्षिप्रमेव, फलान्तरापेक्षत्वेऽपि वैराग्यजननेन कालक्रमेण, **अपुनर्देहिशब्दार्थम्-देही** इति शब्दस्य योऽर्थः देहविशिष्ट इति, सः देहविशिष्टतारूपोऽर्थः न विद्यते पुनर्यस्य तादृशम् । पुनर्जन्मरहितमिति यावत् । प्रत्युपकृतेरक्षमञ्च । अतिमहत्त्वात् फलस्य । जीवस्य किञ्चिच्छेषित्वस्वातन्त्र्ययोरभावाच्च प्रत्युपकारस्य अशक्यता । तथा "न च पुनरावर्तते" इति दशापादनात् पुनरावृत्तिवर्जितञ्च करोति । जरामरणादिनिबन्धनदुःखहेतुत्वात् देहस्य तद्देहानुत्पादनेऽपि असंबोधरूपप्रकृतिलयादिमात्रेण कदाचित् पुनरावृत्तिः क्रियेतेत्यपि न मन्तव्यमिति ज्ञापनायेदं विशेषणम् । मोक्षस्थिरत्वपरञ्च ।

3. अपकारस्तु कदाचित् युक्तः कृपणस्य हिंसकत्वे । श्लोकोऽयं कृपणपरोऽपि स्यात्-कृपणः स्वसमीपमागतं याचकं पुनरयं देहि इति स्वं प्रति यथा न वदेत् तथा करोति विद्रावणात् । प्रत्युपकारस्य नैवावसरः, उपकारस्यैवाभावात् । अत एवैतत्समीपे न स पुनरावर्तेत ।

4. **कश्चित्** आचार्यः **अर्थिनं** मोक्षार्थिनं विद्यार्थिनं वा अपुनर्देहिशब्दार्थम्-मुख्यस्य लब्धतया, पुनः देहिशब्दो यत्रार्थे तादृशनश्वरार्थनिरपेक्षम्, ब्रह्मविद्यादानस्य प्रत्युपकरणस्याशक्यतया तदक्षमम्, प्रपत्तेः सकृत् कर्तव्यतया तत्पुनरावृत्तिवर्जितञ्च करोति ॥

அபுநர்தேஹிசப்தார்த்தம் அப்ரத்யுபக்ருதிக்ஷமம் |
அர்த்திநம் குருதே கச்சித் புநராவ்ருத்திவர்ஜிதம் ‖ 8 ‖

1. நன்கொடை யளிப்பவனொருவன் தன்னிடம் வந்த யாசகனை மீண்டும் 'தேஹி' (கொடு) என்று கேட்காதவாறு தனமுள்ளவனாக வும், செய்ததற்கு ஈடான உபகாரம் செய்யவாகாதவனாகவும், மீண்டும் அதுவிஷயமாகத் தன்னிடம் அண்டாதவனாகவும் ஆக்குகிறான்.

2. ஸர்வேச்வரன் தன்னை யண்டி வேண்டுகின்றவனை மீண்டும் தேஹியாகாதபடி செய்கிறான். தேஹி—தேஹமுள்ளவன். மீண்டும் தேஹம் பெறலாவது பிறவி. அதில்லாதவாறு செய்கிறான். தான் அளித்ததற்குக் கைம்மாறு ஒன்றுமில்லாதபடியாக்குகிறான். மீண்டும் ஸம்ஸாரத்திற்குத் திருப்பாமல் தன்னுடனே யிருக்கச் செய்கிறான்.

3. இந்த ச்லோகம் லோபியையும் குறிக்கும். அவனிடம் ஒரு தரம் வந்தவன் மீண்டும் தேஹி என்று வாரான். லோபியென்று தெரிந்து விட்டதால் உபகாரமேயில்லையாகையால் ப்யத்யுபகாரத்திற்கு எதிராக அபகாரங்கூட செய்யும்படியாக்குவான் லோபி. மீண்டும் தன்னிடம் நாடாதபடியுமாக்குகிறான் லோபி.

4. போதாமல் மேன்மேல் வேண்டப்படும் வேறு பலனை விரும்பாத வனாகவும், தான் அளித்ததற்குக் கைம்மாறு இல்லாதவனாகவும், மீண்டும் ப்ரபத்தி செய்யத்தகாதாகையால் மறுபடி உபாயாநுஷ்டானம் வேண் டாதபடியும் வித்யார்த்தியை மோக்ஷார்த்தியை ஆசார்யன் செய்கிறான்.

पूर्वश्लोक एव वदान्यकृपणयोः किञ्चिद्रूपेण साम्यमिष्टम् । अथ तत् स्पष्टमाह—

वदान्यश्च कदर्यश्च गृहीतस्थिरलोभतः ।
स्वानर्थान् संचिनोत्यर्थान् (त्येव) परानर्थैरयोजयन् ॥ ९ ॥

1. **कदर्यः** कृपणः **गृहीते** स्वकीये धने **स्थिरलोभतः** इदं मे स्थिरं भवत्विति तद्व्ययायनिच्छया **परान्** याचकादीन् **अर्थैः** स्वकीयधनैः **अयोजयन्** संबद्धान् अकुर्वन्, दानेन वा अपहारेण वा तत्संबन्धो यथा न स्यात् तथा जागरूकस्सन्, **स्वानर्थान्** स्वस्यानर्थो यतः, तद्रूपान् स्वानिष्टहेतून् अर्थान् **सञ्चिनोति** राशीकरोति । **गृहीते**त्यादिकं वदान्यपक्षे एवं योज्यम्—वदान्यः **गृहीतानां** स्वपरिगृहीतानामर्थिनां **स्थिरलोभतः** स्थिरद्रव्यसद्भावकामनया स्वान् अर्थान् **परानर्थैरयोजयन्** परकीयानर्थासंबद्धान् कुर्वन् अर्थान् परार्थमेव सञ्चिनोति । वदान्यपक्षे **स्वान्** **अर्था**निति पदच्छेदः **परानर्थै**रित्येकं पदम् । कदर्यपक्षे **स्वानर्था**नित्येकं पदम्, **परान्** **अर्थै**रितिच्छेदः । एवमन्वयेऽपि विशेषः ।

வதாந்யச்ச கதர்யச்ச க்ருஹீதஸ்த்திரலோபத: |
ஸ்வாநர்த்தாந் ஸஞ்சிநோத்யர்த்தாந் பராநர்த்தைரயோஜயந் || 9 ||

1. கொடையாளியும் லோபியும் ஒத்திருக்கின்றனர். இரண்டாம் பாதம் தொடங்கிச் சொன்னது இருவருக்கும் அமையுமே. சொல் ஒன்ருனாலும் பொருள் வேறு. கொடையாளிக்குக் கூறும் போது, தான் கொண்ட மனிதர்களுக்குச் செல்வம் ஸ்த்திரமாயிருக்க வேண்டு மென்கிற ஆசையினுல் பணங்களைச் சேர்க்கிருன் தன் பணங்களைப் பிறரின் ஹிம்ஸைக்குப் பயன்படுத்தாமல் என்று பொருளாம். லோபி விஷயமாம்போது தான் கொண்ட பணம் தன்னை விட்டுப் போகலாகா தென்ற பேராசையால் பிறருக்குப் பணம் சேர்க்காதவனுய் தனக்குக் கேட்டுக்கே யாகுமாறு பணங்களைச் சேகரிக்கிருனென்க. (9)

प्रियवाक् दानशीलश्चेति वदान्यलक्षणम्। तस्माद्दत्त्वैव प्रियवाचः पुरुषस्येह निन्दा । अप्रियवाचो दातुरुपरि निन्दा । केचिद् वदान्यशब्दव्यपदेश्या भवन्ति । कस्मात् । न दानशीलत्वात्; किंतु, वद अन्यदिति याचकान् प्रति वादात्। एष वदान्यवादीत्यभिप्रायेण वदान्य इति परिहासनाम। यदि दातव्यं दत्त्वाऽन्यदपि दित्सुः, अन्यद्वदेति वदेत्, तदाऽयं वास्तववदान्यस्स्यादितीदं सदृष्टान्तमाह—

अनिश्शेषितदातव्यं वदान्यदिति वादिनम् ।
वधूर्व्रीडाकुलेवार्थी सव्रीडो नोपसर्पति ॥ १० ॥

1. **दातव्यं** दातुं शक्यमर्थिनाऽपेक्षितञ्च **अनिश्शेषितं** निश्शेषं न कृतम्, पूर्णं न दत्तं येन तादृशम्, एवमपि सर्वदित्सुवत्, अन्यदप्यपेक्षितं वद दास्यामीति वृथावादशीलं पुरुषमर्थी नोपसर्पति । अस्य व्रीडाविरहेऽपि तस्य सव्रीडत्वात् । 'अनर्हपुरुषविषये याचनेति लज्जा । तत्र दृष्टान्तो वधूः । स्वापेक्षितं दातव्यं वस्त्राभरणादिकं शक्तस्सन्नेव पूर्णमददानः, अन्यदपि वद दास्यामीति यो मिथ्या वदन् भोगपरो भवति भर्ता, तं व्रीडाव्याकुला नवोढा वधूर्नोपसर्पति, नतरामन्यदपेक्षितं वदिष्यति । तद्वत् । नवोढस्त्रीविलक्षणा तु युवतिः व्रीडाया अप्रसक्तया भर्तारमधिक्षिपेत्, 'पृष्टं सर्वं बहुशोभनं दत्तमासीत्, अपृष्टमपि दातुं त्वर्यत इव परमोदारेण' इति परिहसेच्च । नवोढा तु व्रीडया तथा वक्तुमनिच्छन्ती समीपमपि नेयात् । तथाऽर्थिनः परिहसितुं समर्था अपि विवेकित्वात् अस्थाने याचनं कृतमिति स्वयं व्रीडिता भवेयुरिति ॥

அநிச்சேஷிததாதவ்யம் வதாந்யத் இதி வாதிநம் |
வதூர் வ்ரீடாகுலேவார்த்தீ ஸவ்ரீடோ நோபஸர்பதி || 10 ||

1. கொடுக்கத் தக்கதை முழுமையும் கொடாமல், வேறு வேண்டு வதையும் சொல் என்பவனை யாசகன் நெருங்கமாட்டான். புதிதாக மணந்த பெண், கேட்டது கொடுக்கத் தக்கதாயிருக்கக் கொடாமல் இன்னும் என்ன வேண்டும் சொல் என்னும் கணவனை வெட்கமுற்று அணுகாள். அது போலென்க. (பழகின பிறகானுல் எதிர்த்துப் பேசு வாள் ஏசுவாள்.)

दातुर्निष्कपटप्रियभाषणमावश्यकमित्याह—

त्वचं मांसं जीवं यदपि ददुरस्थीनि पृथिवीम्
श्रियं रत्नाधीशं त्रिदशतरुमैरावतमपि ।
तदेतत् प्रत्येकं मिलितमपि नालं तुलयितुं
मनस्कारोपेत(रारोपि(हि?)स्थिरमधुर कल्योक्तिकणिकाम् ॥ ११ ॥

1. दातुमशक्यान्यपि दानप्रियत्वात् मनस्विनो ददति, यथा **त्वचं** चर्म कर्णः । स्वशरीरेण सह जातं कवचं पृथक्कर्तुमशक्यमपि स विभज्येन्द्राय प्रादादित्याहुः । शिबिः श्येनाय कपोतग्रहणप्रवृत्ताय (इन्द्र एव श्येनरूपेणाऽऽगतः परीक्षितुम्) स्वोरुमांसं प्रदाय कपोतमरक्षत् । कश्चित् कपोतो व्याधाय **जीवं** प्राणान् अदात् । "श्रूयते हि कपोतेन शत्रुः शरणमागतः । अर्चितश्च यथान्यायं स्वैश्च मांसैर्निमन्त्रितः" इत्युक्त्या भार्याप्रेरितः कपोतः स्वमप्यदात् व्याधायेति मन्तव्यम्, न तु भार्याप्राणानेवादादिति । एवं शुनश्शेफः पित्रा माता च यज्ञपशुत्वेन दत्त इति कथाऽप्यनुसंधेया । तदप्युक्तं श्रीमति रामायणे विश्वामित्रवृत्तघट्टे । दधीचिरिन्द्राय स्वास्थीनि ददौ । ततस्तस्य वज्रायुधं निर्मितम् । सर्वराजन्यवधानन्तरं परशुरामः काश्यपाय पृथिवीं ददौ । इदं सर्वं प्रत्येकं दत्तम् । **श्रिय**मित्यादिकं मिलितमेकेन क्षीराब्धिना दत्तम् । एकस्मै दानाभावेऽपि एकेन दत्तत्वात् मिलितत्वम् । प्रथमः **अपि**शब्दः त्वगादीनां दातुमशक्यत्वमावेदयति । पृथिवीमपि कृत्स्नां को नाम दातुमीष्टे ; दानानन्तरं तत्र स्ववासासंभवात् । अत एव हि परशुरामः समुद्रात् स्थलान्तरमाविर्भाव्य तत्रोवास । एवं दुश्शकत्वप्रतिपादको**ऽपि**शब्दः । **ऐरावतमपी**त्य**पि**शब्दः श्रीप्रभृतिसर्वसमुच्चायकः ; तेषामेकसमुद्रराजदत्तत्वात् । इमानि ददुरिति यत्, तदेतत् प्रत्येकमिव **मिलितमपि** सर्वमिदमेकेन दत्तमिति मेलनसंभावनेऽपि **न कणिकां तुलयितुमलम्** । न कणिकासाम्यं लभेत । केयं कणिका ? विशिनष्टि **मनस्कारे**ति । **मनस्कारः** मनसो निक्षेपः ; पूर्णादर इति यावत् । "चित्ताभोगो मनस्कारः" इत्यमरः । **तदुपेता** मनस्काराारोहीति वा पाठः । मनस्कारस्याऽऽरोहो यस्याम् उक्तौ सा मनस्काराारोहिणी । **स्थिरा** । पुरत इव परोक्षेपि तथैव वचनात् स्थिरत्वम् । **मधुरा** श्रोतुर्भोग्यत्वात्, प्रतिग्रहीतरि भक्त्योत्पन्नत्वाच्च । **कल्या** समर्था अबाधितार्था । अशक्तोऽहमेतावद्दातुम्, विषीदामि अन्यमुखेनापि प्रापयितुमसमर्थोऽस्मीति प्रियोक्तिः सत्या चेत्, तदेव श्रेयस्करीति । ईदृशी उक्तिर्यस्याः, सा कणिकेति बहुव्रीहिः । कणिका-पदेन देयद्रव्यस्वल्पकणग्रहणम् । तस्यास्तादृशोक्तिविशिष्टत्वात् पूर्वार्धोक्तसर्वद्रव्यात् मिलितादप्यतिशयितत्वम् । वाङ्मात्रमाधुर्यव्युदासाय मनस्काराारोहित्वोक्तिः । **आरोपी**ति पाठो दृश्यते । **अरोही**ति पाठो युक्त इव । उक्तेः कणिकेति विग्रहोऽपि सुशकः ; द्रव्याभावेऽपि उक्तिमात्रमपि मनःपूर्वकं यथावदस्ति चेत्, तदेवालमिति भाववर्णनसंभवात् । अथापि तथा मनस्वी किमपि दद्यादेवेति मत्या, द्रव्यसाजात्य-संपत्त्यौचित्याच्च बहुव्रीहिरादृतः । प्रथमपादोक्तक्रमः, "कर्णस्त्वचं शिबिर्मांसं जीवं जीमूतवाहनः । ददौ दधीचिरस्थीनि किमदेयं महात्मनाम्" इति श्लोके लक्ष्यते । जीमूतवाहनस्य सर्पप्रतिनिधितया गरुडाय स्वजीवदानश्रद्धा **नागानन्दे** द्रष्टव्या ।

த்வசம் மாம்ஸம் ஜீவம் யதபி ததுரஸ்த்திநி ப்ருதிவீம்
ச்ரியம் ரத்நாதீசம் த்ரிதசதரும் ஐராவதமபி |
ததேதத் ப்ரத்யேகம் மிளிதமபி நாலம் துலயிதும்
மநஸ்காரரோபேத ஸ்த்திரமதுரகல்யோக்தி கணிகாம் || 11 ||

1. தன் தோலை உரித்து அளித்தான் கர்ணன் ; தன் தொடையினின்று மாம்ஸமெடுத்து சிபிச்சக்ரவர்த்தி ; தன் உயிரை கபோதம்(புறு ;) (புதல்வனை சுநச்சேபனை அவர் தமப்பன்) ; முதுகெலும்பை ததீசிமஹர்ஷி. பூமியை முழுதும் பரசுராமன், மஹாலக்ஷ்மியையும் சிந்தாமணியையும் பாரிஜாத மென்ற தேவ வ்ருட்சத்தையும் ஐராவதத்தையும் ஸமுத்ர ராஜன். இவையெல்லாம் சேர்த்தால் கூட மிக்க அன்புடன் சுத்தமான மனத்துடன் உறுதியாயும் மதுரமாயும் உண்மையாயுமுள்ள நல்வார்த்தையுடன் அளிக்கும் ஒரு சிறு பணத்திற்கு ஈடாகா. பேச்சு மட்டுமேயும் சிறிதாய், செவ்வையானல் போதும். ஆக இனிய சொல் முக்கியமாகும். 11

दातृत्वेन प्रसिद्धानां धाराधरादीनां सर्वेषां मेलनेन महावदान्यः पुरुषः पुरुषोत्तमेन सृष्टः। मेलनकाले च धाराधरादिषु विद्यमानान् दोषान् आलक्ष्य तान् निरस्य शुद्धैस्तैस्तं निरमादित्याह। अनेन यस्य वदान्यस्येमे दोषा न सन्ति, स एवोत्तम इत्युक्तं भवति—

अनिर्घातं धाराधरममथनीयं निधिमपाम्
अकाठिन्यं चिन्तामणिमजडभूतं सुरतरुम्।
अभित्त्वोपादाय प्रभुरपशुवृत्तिश्च सुरभिं
परार्थैकस्वार्थान् अकृत पुरुषान् आदिपुरुषः ॥ १२ ॥

1. **अनिर्घात**मित्यादीनां धाराधरादिविशेषणत्वेऽपि अनिर्घातत्वादिरूपेण धाराधराद्युपादानं विधिकृतमिति **उपादाये**ति क्रियां प्रति विशेषणत्व एव पर्यवसानम्। सनिर्घातधाराधरादिप्रसिद्धवस्तु-विलक्षणानि वस्तूनि निर्माय तन्मेळनमेवं कृतमिति वा भावः। दातॄणां परुषशब्दाविष्करणम् असुरप्रायैरपि मथनीयत्वं पात्रभूतेष्वपि (निर्दयत्वरूप) कठिनत्वम्, अनुभवन्यूनतारूपजडत्वम् आहारविहारव्यवस्था-राहित्यरूपा पशुवृत्तिश्च न युज्यन्ते। धाराधरादिषु एकैकत्र एकैकदोषोऽस्ति। अतस्तद्राहित्येन तद्ग्रहणेन सर्वगतौदार्यगुणसमावेशः कार्य इति विमृश्य स्वयं **प्रभुत्वात्** फलप्रदानप्रवीणत्वात् स्वतुल्यान् पुरुषान् ससर्जेत्युच्यतेऽत्र। **अनिर्घातं** वज्रनिर्घोषरहितं धाराधरं मेघम्। **अभित्त्वोपादाये**त्यत्र सर्वान्वयः। **अमथनीय**मपांनिधिम्। अकूपारस्तु असुरैर्मथित आसीत्। काठिन्यरहितं चिन्तामणिम्। **अजडभूतम्।** जडभूतत्वं सर्वात्मना ज्ञानराहित्यम्। **अजडभूतम्** ईषद्ज्ञानवन्तम्। "अन्तःप्रज्ञा भवन्त्येते सुखदुःख-समन्विताः" इति ईषन्मात्रानुभववत्त्वं वृक्षादीनां स्थितम्। अतो धाराधरादिवैलक्षण्यसिद्धिः। **अपशुवृत्तिम्** आहारादिव्यवस्थाराहित्यं पशुवृत्तिः। तद्रहिताश्च। चिन्तामणिवत् अतिकाठिन्याभावात् वृक्षस्य, कल्पतरुवत् ईषत्संवेदनवत्त्वरूपजडत्वाभावात् चिन्तामणिकल्पवृक्षयोः न धर्मसंकरः। एवं **कामधेनौ**

सुरमावपि । भित्त्वा पृथक्कृत्य । **अभित्त्वा** मेलयित्वा । परानेवोद्दिश्य यः स **परार्थः । एकः** एकरूप एव स्वार्थः **एकस्वार्थः ।** परार्थ एव एकस्वार्थः येषां तान् । वदान्यानिति यावत् ।**स्वार्थः** स्वकीयं धनम् । **अकृत** अकरोत् । कृञ आत्मनेपदे लुङ् ॥

इति वदान्यपद्धतिर्दशमी

உலகில் கொடையாளியாக ப்ரஸித்தமான வஸ்துக்களில் ஒவ்வொன்றுக்கு ஒவ்வொரு குறையிருக்கின்றது. அக் குறைகளை விலக்கி அவ் வஸ்துக்களை யெல்லாம் ஒன்று சேர்த்து வள்ளலானவர்களைப் பெருமான் படைத்தான் என்கிறார். வள்ளலுக்கு அந்தக் குற்றங்கள் தகா என்பதிலே நோக்கு—

அநிர்க்காதம் தாராதரம் அமதநீயம் நிதிமபாம்
அகாடிந்யம் சிந்தாமணிம் அஜடபூதம் ஸுரதரும் |
அபித்வோபாதாய ப்ரபுரபசுவ்ருத்திஞ்ச ஸுரபிம்
பரார்த்தைகஸ்வார்த்தாந் அக்ருத புருஷாந் ஆதிபுருஷ: || 12 ||

1. மேகத்திற்கு இடி குற்றம். வள்ளலுக்கு கடுமையான சொல் தகாதென இடியை விலக்கினார், கடலைக் கலக்கி விட்டனர் அசுரர். தகாதவரின் நிர்பந்தத்திற்கு வள்ளல் கலங்கக் கூடாது. சிந்தாமணி மிகவும் கடினமாகும். யாசகரான ஸத்துக்களிடம் கடினமாயிருக்கலாகாது. கல்ப்பவிருட்சம் மிகச் சிறிய உணர்ச்சியுள்ளது. வள்ளலுக்கு நல்ல அனுபவம் வேண்டும். காமதேனு கண்டதைத் தின்னும் மிருகம். அது தகாது—அதனால் அந்த குற்றங்களில்லாமல் அவற்றையெல்லாம் ஒன்று சேர்த்து வள்ளலான மஹான்களைப் பெருமான் படைத்தான். அவன் சிறந்த கொடையாளியாய் ப்ரபு என்னப்படுகிறவனாகையாலே அவனே இவ்வாறு படைக்க வல்லனாவான்.

வதாந்யபத்ததி (10) முற்றும்.

अथ सुकवि(सत्कवि)पद्धतिरेकादशी (११)

सत्कविपद्धतिरित्यपि इयं व्यवह्रियते । "अविदितगुणाऽपि सत्कविफणितिः कर्णेषु वमति मधुधाराम्" इति अन्यत्र प्रयोगोऽपि । अत्र उपरि, "सुकवेरनघा नयस्य सूक्तिः" इति दर्शनात् एषोऽपि व्यवहार आद्रियते । कविशब्दस्य जलपक्षिवाचित्वात् जलपक्षिषु हंसस्य श्रेष्ठत्वात् तत्साम्यमादौ सत्कवौ दर्शयति—

अपङ्किलधियः शुद्धाः साधुमानसवृत्तयः ।
वमन्ति श्रुतिजीवातुं ध्वनिं नवरसास्पदम् ॥ १ ॥

1. **अपंकिलधियः**—न विद्यते **पंकिले** पापिष्ठविषये आभासपदविन्यासे च धीर्येषां ते। विग्रहान्तरे द्वितीयपादपौनरुक्त्यं स्यात्। लोकास्तिवयनाशकविषयव्यवहारदूराः, **शुद्धाः** शीलवृत्त-संपन्नाः **साध्वी** समीचीना **मानसवृत्तिः** चित्तव्यापारः लोक-शास्त्र-सत्काव्यादिग्रहण-चिन्तन-सदसद्वि-वेचनादिरूपः प्रतिभारूपश्च येषां ते। **कवय** इति अर्थसिद्धम्। **श्रुतिजीवातुं** वेदार्थोपबृंहणरूपतया वेदानुवृत्तिहेतुतया तज्जीवनौषधरूपं **नवरसास्पदम्** नवानां शृंगारादिरसानां मध्ये एकस्य प्राधान्येऽपि नवानामपि यथायथमन्वयस्थानम्, **ध्वनिम्**-काव्येषु व्यङ्ग्यप्रधानस्य ध्वनिकाव्यस्य प्रधानत्वात् तादृशमेव **वमन्ति** उद्गिरन्ति। तेषां मुखादतिवेगात् अवशादेव तादृशं निस्सरति। **वमन्ती**ति प्रयोगोऽतिभोग्यः; यदाहुः-"निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम्। अतिसुन्दरम्; अन्यत्त्र ग्राम्यकक्ष्यां विगाहते" इति।

2. हंसपरोऽपि। **अपंकिलधियः** हंसाः **पंकिलेषु** जलेषु जम्बालकलुषेषु **धियम्** आस्थां न बहन्ति। अत एव वर्षासु मानसं सरो गच्छन्तीति **साधुमानसवृत्तयः**। स्वयं स्वरूपेण **शुद्धाः** धवलाः **श्रुतिजीवातुं** श्रवणभोग्यं **नवरसास्पदं** पुनःपुनःश्रवणेऽपि नव इव **रसस्य** रुचेरास्पदं **ध्वनिं** शब्दं **वमन्ति** कण्ठतो जनयन्ति।

3. श्रीपञ्चरात्त्रविभक्तरीत्या सृष्टिर्द्विविधा शुद्धसृष्टिरशुद्धसृष्टिश्चेति। आद्या अप्राकृती भगवद-वताराद्यात्मिका; द्वितीया प्रकृतिमण्डलमात्त्रप्रसिद्धा। शुद्धानामवताराणामेव मोक्षप्रदत्वं भक्तैर्ध्येयत्वञ्च। तेषां धर्मसंस्थापनार्थत्वात् सदुपदेशपरत्वमपि। तथा चायमर्थः-**शुद्धाः** शुद्धसत्त्वप्रवर्तकाः अप्राकृतावताराः हंसमत्स्यहयग्रीवादयः **अपंकिलधियः** अपंकिलेषु अपापेषु असुरप्रायविलक्षणेषु आदरवन्तः, **साधूनां** 'परित्त्राणाय साधूनाम्' इत्युक्त्या उपासकादीनां मानसेषु वृत्तिर्येषां ते, **श्रुतिजीवातुं** वेदव्याख्यारूपं **नवरसास्पदम्** नित्यनवायमानस्य अनुभूतविलक्षणस्य "रसो वै सः" इत्युक्तानन्दमयस्य तदनुभवस्य वा आविर्भावकं **ध्वनिं** सदुपदेशं हेषाहलहलादिकं सर्वश्रुतिमुखग्रन्थस्फूर्तिहेतुं **वमन्ति** आविष्कुर्वन्ति॥

ஸுகவிபத்ததி. 11. கவிகளைப் பற்றியது இப்பத்ததி

அபங்கிலதியः சுத்தாः ஸாதுமாநஸவ்ருத்தயः |
வமந்தி ச்ருதிஜீவாதும் த்வநிம் நவரஸாஸ்பதம் || 1 ||

1. ஆபாஸமான விஷயங்களிலும் செம்மையற்ற சொற்களிலும் மனம் வைக்காதவரும், ஆத்ம குணம் ஒழுக்கம் எல்லாம் உள்ளவரும், சாஸ்த்ரங்கள், சிறந்த காவ்யங்கள், உலகநடை, இயற்கை முதலான விஷயங்களிலே நல்ல பரிசயமும் விமர்சமும் ப்ரதிபா சக்தியும் உள்ளவர் களுமான கவிகள் வைதிகமான தர்மம் தத்துவம் எல்லாம் ஸ்தாபிக்க வான, ச்ருங்காரம் முதலிய ஒன்பது ரஸங்களுக்கும் தோற்றமளிக்கின்ற, வ்யங்க்யமான பொருளை ப்ரதானமாக் கொண்டதால் த்வனி என்னப் படுகின்ற காவ்யத்தை இயற்றுகின்றனர்.

2. கவியாவது ஹம்ஸம். (கம் நீர். அதிலுள்ள வி. பக்ஷி) அவ் அன்னங்கள் விஷயமுமாம். அவை சேறு முதலானவற்றால் கலங்கிய நீரில் மனம் வைக்காதவை, வெண்ணிறமானவை, மானஸம் என்ற ஸரஸ்ஸு கைலாஸத்தில் இருப்பது. அங்கே மழைக்காலங்களில் நன்றாக நிலைத்திருப்பவை. செவிக்கினிதாயும், மேன் மேல் கேட்க ஆசையை விளைவிக்கின்றதுமான தொனியைச் செய்கின்றன அவை.

3. சுத்தங்களாகின்றன பகவானின் அவதாரங்கள். ஹம்ஸம் ஹயக்ரீவன் என்றாற் போன்ற அவதாரங்கள் பாபிகளிடத்திலே செல்லாத மனம் உடையவை, ஸாதுக்களின் மனத்திலே நிலைத்திருப்பவை, தர்ம தத்துவ ஸ்த்தாபனமாய் வேதத்திற்கு உயிர் அளிக்கின்றதாய் எம்பெருமானின் அனுபவத்தைப் புதிதாக விளைவிக்கின்றதுமான மிடற்றொலியை உண்டுபண்ணுகின்றன.

'अपारे काव्यसंसारे कविरेकः प्रजापतिः' इति स्रष्टृसाम्यं कवौ प्रसिद्धमभिप्रेत्याऽऽह—

महापुरुषबद्धात्मा सर्गादिप्रथितोदयः ।
वश्यावदातया वाचा सेव्यते चतुराननः ॥ २ ॥

चतुराननः चतुरं व्यक्तव्यवहारसमर्थम् **आननं** मुखं यस्य स कविः काव्यनिर्माणे प्रवृत्तः तत्प्रतिपाद्ये नायके महापुरुषे प्राधान्येन **बद्धः** नियमितः **आत्मा** मनः येन सः, तत्प्राधान्येन यथा निर्मातव्यं तथाऽऽलोचयन्, **सर्गादिप्रथितोदयः** पद्यकाव्ये सर्गबन्धेन, गद्यकाव्ये हर्षचरितादाविवोच्छ्वासत्रिभागेन, नाटके अङ्करूपेण एवम्भूतावान्तरविभागेन **प्रथितः** प्रसिद्धः **उदयः** काव्याविर्भावो यस्मात् तादृशः **वश्यावदातया** वश्यया अनायासप्रवाहरूपया **अवदातया** निर्दोषया गुणालङ्कारादिमत्या वाचा **सेव्यते** । वाक् स्वयमेव चतुराननसमीपमायाति स्वाविर्भावाय ।

2. **चतुरानन** इत्यत्र **चे**ति पृथक्पदम् । **तुराननः** तुरङ्गमुखः श्रीहयग्रीवः । तुर त्वरणे । "इगुपधज्ञाप्रीकिरः कः" इति इगुपधात् तुरधातोः कप्रत्ययः । त्वरावान् त्वरितगतिरित्यर्थात् तुरस्तुरग एव । स हयग्रीवः **महापुरुषबद्धात्मा** 'वेदाहमेतं पुरुषं महान्तम्" इति प्रसिद्धपरवासुदेवमूर्तितः प्राप्तसंस्थानविग्रहः । **आत्म**शब्दः शरीरवाची । अनिरुद्ध एव वेदापहारे जाते व्यथितेन विधात्रा प्रार्थितः एवमवततारेति महाभारते । महापुरुषरूपेण संनिविष्टकण्ठोधोभाग इति वा । **आत्मा** मध्यकायः । **सर्गादिप्रथितोदयः** । **सर्गादिः** सृष्ट्यारम्भः । तदा प्रथितस्वाविर्भावः । यद्वा सहशब्दस्य सभावे सेत्यनेन ऋगादिपदस्य समासः । ऋगादिप्रथितोदयसहित इत्यर्थः । ऋगादिषु वेदेषु प्रथितेन **उदयेन** अभ्युदयेन सहितः इति वा, ऋग्वेदादीनां प्रथितो य **उदयः** आविर्भावः तत्करत्वात् तत्सहित इति वा, ऋगिति शब्दः आदिर्यस्य हयग्रीवमन्त्रस्य स ऋगादिः ; तेन जप्तेन प्रथितः आचार्यादिषु प्रसिद्ध आविर्भावोऽस्येति तत्सहित इति वाऽप्युक्तं भवति । **वश्यावदातया** वश्यया अप्राकृतरूपविशिष्टया **वाचा** वाग्देव्या । भगवद्दिव्यमहिषीषु वाग्देवी एका विद्यारूपलक्ष्म्या सह विशिष्य हयग्रीवमूर्तिपत्नीत्वेन लब्धाविर्भावेति तया सेव्यते ।

3. चतुर्मुखविषयकोऽपि । **महापुरुषे** नाभिकमलात् स्वोत्पादके स्वाचार्ये च भगवति **बद्धः** निबद्धः **आत्मा** मनो येन सः, **सर्गः** सृष्टिः आदिना वेदप्रवचन-वरप्रदान-स्वलोकस्थमोक्षप्रापणादि-ग्रहणम् । तादृशव्यापारैः प्रथितमहिमा । चतु**राननः** चतुर्मुखः **वश्यया** स्वानुकूलया **अवदातया** चन्द्रवर्णया **वाचा** स्वपत्न्या सरस्वत्या सेव्यते ।

4. कृत्स्नवेदपरोऽपि । वेदः **महापुरुषबद्धात्मा** "सर्वे वेदा यत् पदमामनन्ति" इत्युक्तरीत्या भगवति निक्षिप्तस्वस्वरूपः । तदेकप्रतिपादक इति यावत् । महर्षिषु लब्धपूर्णस्वरूप इति वा । **स— ऋगादिप्रथितोदयः** ऋग्यजुस्सामाथर्वरूपवेदरूपेणविख्यातविभागसहितः **चतुराननः** परतत्त्वपरमहित-परमपुरुषार्थप्रतिपादकशिरोभागशोभितः **वश्यावदातया** तत्तत्पुरुषवशंवदया सात्त्विक्या **वाचा** वागि-न्द्रियेण **सेव्यते** अधीयते ।

மஹாபுருஷபத்தாத்மா ஸர்காதிப்ரதிதோதய: |
வச்யாவதாதயா வாசா ஸேவ்யதே சதுராநந: || 2 ||

1. சதுராநநனுவான் பேசத் திறமையுள்ள முகம் உடைய கவி. அவன் தான் இயற்றும் காவ்யத்திற்கு நாயகனுன மஹாபுருஷனிடம் மனம் செலுத்தி ஸர்கம் உச்ச்வாஸம் அங்கம் என்ருற் போன்ற பிரிவு களால் விளங்கும்படி விசேஷங்களைக் காவ்யத்திற்குக் கொண்டவனுய் தனக்கு வசமாய் சுத்தமான வாக்கினுலே ஆச்ரயிக்கப்படுகிருன்.

2. சதுராநந: என்றவிடத்தில் ச என்பதைப் பிரித்து, துராநந: என்க. துரமாவது துரகம் குதிரை. ஆகப் பரிமுகன் என்றதாயிற்று. ஸ்ரீஹயக்ரீவன் பரவாஸுதேவனென்ற மஹாபுருஷனின்று தோன்றிய அநிருத்த மூர்த்தியில் தோன்றிய மூர்த்தி. ஸ்ருஷ்டியின் தொடக்கத் திலே பிரமனுல் போற்றப்பட்டு, மதுகைடபர்கள் அபஹரித்த வேதத்தை மீட்டு அளிக்கத் தோன்றியவர். ரிக்வேதம் முதலியவற்றின் சிறந்த தோற்றத்திற்குக் காரணமானவர். தம் மந்த்ர ஜபம் செய்பவருக்குத் தோன்றுமவர். தமது திவ்ய மஹிஷியான வாக்தேவியினுல் சிறப்பாக ஸேவிக்கப் பெறுகிருர்.

3. எம்பெருமானிடம் மனம் செலுத்தி, ருக்வேதம் முதலான வற்றை ஓதி, ஸ்ருஷ்டி வரனளிப்பு முதலான செயல்களைக் கொண்ட நான்முகன் வச்யமாய் வெண்ணிறமான ஸரஸ்வதியால் ஸேவிக்கப் படுகிருன்.

4. வேதமானது எம்பெருமானைச் சொல்லவே ஏற்பட்டது. ருக் வேதம் முதலான பிரிவுடையது. வ்யாஸாதிகளான மஹாபுருஷர் களிடத்திலே முழுமையும் தோன்றியது. தத்துவஹித புருஷார்த்தங் களைச் செவ்வையாய் உணர்த்தும் முகபாகமான உபநிஷத்தை யுடை யது. ஸ்வாதீனமாய் சுத்தமான வாக்கு என்னும் இந்திரியத்தினுலே ஓதப்பெறும்.

पुनरपि कवौ श्लेषत्रयमाह—

विशुद्धवर्णललिता गुणालंकारशालिनी ।
सरसा भारती यस्य स सत्येकः प्रतिष्ठितः ॥ ३ ॥

1. यस्य कवेः **भारती** वाक् **विशुद्धैः** रसभङ्गकत्वादिदोषरहितैः **वर्णैः** अक्षरपदवाक्यरूपैः **ललिता** भोग्या, **गुणान्** ओजःप्रसादमाधुर्याख्यान् , **अलंकारान्** उपमारूपकादींश्च **शालति** प्राप्नोतीति तादृशी, **सरसा** यथावत् रसाविष्कारिणी भवति, स **एकः** दुर्लभः कविः **सति** साधुपर्वणि **प्रतिष्ठितः** लब्धप्रतिष्ठो भवति । यद्वा **सः** तादृशः कः **सत्ये** कल्पनालेशेनापि रहिते यथावस्थितार्थमात्रे प्रतिष्ठितः? । न कश्चित् । सर्वेऽपि नानाकल्पनापरा एवेति भावः ।

2. यस्य चतुर्मुखस्य भवति **विशुद्धवर्णेन** धवलरूपेण ललिता, **गुणान्** आत्मगुणदेहगुणान् **अलंकारान्** आभरणानि च प्रासवती, **सरसा** प्रियभाषिणी **भारती** सरस्वती देवी ; सः **कः** ब्रह्मा **सत्ये** सत्याख्ये स्वलोके प्रतिष्ठितो भवति ।

3. यस्य नटस्य **भारती** नटी **विशुद्धवर्णललिता** समुचितहरितालादिरञ्जकद्रव्यलेपललिता नाट्यानुगुणालंकारयुक्ता भवति, स नटः तया सह संभाषमाणः **सत्ये** शास्त्रीये नाट्ये प्रतिष्ठां लभते ।

4. कैशिकी आरभटी सात्वती भारतीति चतस्रो वृत्तयः । तत्र भारत्याः ईषन्मृद्वर्थसंदर्भत्वं लक्षणम् । तथाच गुणालंकारशोभिता सरसा भारती **विशुद्धवर्णललिता** अत्युद्धतार्थसंदर्भत्वरूपदोषरहितरचनाविशेषात् ललिता यस्य कवेः, स सति प्रतिष्ठितः । अत्युद्धतत्वातिमृदुत्वाभावात् भारती सर्वानुकूला भवेत् । शान्तिरसोचितता च सति प्रतिश्रितत्वम् । अथवा **यस्येति** भाणाख्यरूपकग्रहणम् । तस्य भारतीवृत्तिभूयिष्ठत्वमेकाङ्कत्वं चेष्टम् । तथाच यस्य भाणस्य संबन्धिनी सा, स **एकः** एकांकभूतः **सति** अलंकारग्रन्थे प्रतिष्ठित इति ।

5. **भारती** भरतस्येयम् , जडभरतोपदेशरूपा वाक् **विशुद्धवर्णललिता** देहातिरिक्तजीवप्रतिपादकशब्दशोभिता । अहं हस्तः अहं पादः अहं चक्षुरित्यादिव्यवहाराभावात् मम हस्त इत्यादिव्यवहारस्यैव दर्शनात् अहमिति संज्ञां शरीरे कुत्र कुर्यामिति विशुद्धं ललितञ्च हि तेनोपदिष्टम् । **गुणालङ्कारशालिनी**-गुणेषु—प्रकृतिगुणेषु विचित्रजगद्रूपेषु **अलङ्कारः** अलम्बुद्धिः वैराग्यम्-तच्छालिनी **यस्य** रहूगणस्य राज्ञो मुमुक्षोः-**सरसा**-भोग्याऽऽसीत् , स एको रहूगणः तत्तुल्यो वा **सति** स्थिरे आत्मनि प्रतिष्ठितः ।

6. यस्य वाक् वेदान्ततत्त्वार्थोपदेशिका भवति उक्तरीत्या, स **सति** परमात्मनि मोक्षे वा स्थिरे प्रतिष्ठितो भवतीति च ॥

விசுத்தவர்ணலலிதா குணாலங்கார சாலிநீ |
ஸரஸா பாரதீ யத்ர ஸ ஸத்யேக: ப்ரதிஷ்ட்டித: || 3 ||

1. பாரதியாவது—வாக்கு. எந்தக் கவியினுடைய வாக்கானது ரஸத்திற்கு பங்கம் வராதபடி சுத்தமான சொற்களால் அழகாய், மாதுர்

யம் முதலான குணங்களாலும் உவமை முதலான அலங்காரங்களாலும் சிறப்புற்று ரஸத்தை யூட்டுகின்றதோ, அவன் ஒருவன் நற்பதத்தில் நிலையுடையனுவான். கல்ப்பனையிராமல் உண்மையையே சொல்பவனுகான்.

2. வெண்ணிறத்தினுல் அழகாய், ஆத்ம குணங்களும் ஒப்பனைகளும் சேர்ந்து, ஸரஸமாய் ப்ரியமான பேச்சுடனிருக்கும் ஸரஸ்வதி தேவி யாருக்கு மனைவியோ, அந்த நான்முகன் ஸத்ய லோகத்தில் மன்னியிருப்பவன். (க: என்று பிரமனுக்குப் பெயர்.)

3. பாரதி என்று நடியைச் சொல்வதாம். வேஷத்திற்கான ஹரிதாளப் பூச்சுடன் நடிக்கவான அலங்காரம் கொண்டு எவள் நடனுக்கு அமைகின்ருளோ, அந்த நடன் நல்ல நாட்யத்தில் நிலை பெறுகிருன்.

4. கைசிகி முதலான வ்ருத்திகள் நான்கில் பாரதி ஒன்று. சிறிது மிருதுவாய் ஆர்பாடமில்லாத சொற்களைக் கொண்டு பொருள் தெரிவித்தல் பாரதியாம். அப்படி சுத்தமான சொற்ருெடர் உடைய பாரதி சாந்தி ரஸத்திலும் ப்ரதிஷ்டை பெறும். பாணமென்ற ரூபகத்திற்கு பாரதி பெரும்பாலும் சேரும். அந்த பாணம் ஒரே அங்கமானபடியால் ஏகமென்று அலங்கார க்ரந்தத்தில் நிலையுற்றது.

5. பாரதி—[ஜட]பரத முனிவரின் வாக்கு. அது தேஹத்தைக் காட்டிலும் ஆத்மா வேறு என்பதை சுத்தமான சொற்களாலே காட்டும். ஸத்வ ரஜஸ் தமோகுணங்களாலான உலகில் அலங்காரத்தை—அதாவது வேண்டா என்ற புத்தியை—வைராக்யத்தை விளைவிக்கும். அச்சொல் யாருக்கு உண்டாயிற்ருே, அந்த ரகூகணன் போன்றவன் ஸத்யமான அழிவற்ற ஆத்மாவில் நிலையுற்ருன்.

6. எவருடைய வாக்கு வேதாந்த விஷயமான நல்ல சொற்கள் கொண்டதோ, அவர் பரமாத்மாவினிடம் அல்லது மோக்ஷத்தில் நிலை பெறுவர்.

उत्कृष्टा वाक् सर्वलोकव्यापिन्यपि सर्वविदितार्था न भवतीत्याह—

कुतश्चिदचलस्थानात् प्रयान्ती सागरान्तिकम् ।
दृश्यादृश्यतनुर्भाति श्रुत्यभीष्टा सरस्वती ॥ ४ ॥

1. **अचलं** चाञ्चल्यरहितं **स्थानं** स्थितिः ज्ञानानुष्ठानादिमर्यादा यस्य तस्मात् **कुतश्चित्** महापुरुषात् उत्पद्य **सागरान्तिकं** समुद्रपर्यन्तं चतसृष्वपि दिक्षु **प्रयान्ती** व्याप्नुवती यद्वा **सा** प्रसिद्धा **अगराः** विषरहिताः दूषणोक्तिदुरभिप्रायादिरहिताः अनसूयवः । **अगरम्** अनसूयादि ; सागराः तद्विशिष्टा इति वा । तदन्तिकं प्रयान्ती **श्रुत्यभीष्टा** श्रवणभोग्या **दृश्यादृश्यतनुः** किञ्चिदर्थांशे स्पष्टा, क्वचिदंशे अस्पष्टा च भाति । कविहृदयं सुग्रहं न भवति । बहुव्यङ्ग्यार्थत्वादिति भावः ।

2. सरस्वती नाम नदी **कुतश्चित्** कस्माच्चित् **अचलस्थानात्** पर्वतभूमेरुत्पद्य । नदीसामान्यस्य पर्वतादेवाऽऽविर्भावात् । समुद्रगामित्वाच्च तस्याः **सागरान्तिकं प्रयान्तीति** विशेषणम् । एवमनुस्यूतं प्रवहन्त्यपि **दृश्यादृश्यतनुः** । अनेकस्थानेषु गुप्तवाहिनी हि सा । "क्वचिदुपलक्षिता क्वचिदभंगुरगूढगतिः" इति चोक्तम् । प्रयागे आविर्भवन्त्यास्तस्या ततः प्राग्घि निगूढः प्रवाहः । **श्रुत्यभीष्टा** च 'इमं मे गंगे यमुने सरस्वति' इत्येवं श्रुत्या प्रशंसितत्वात् ।

3. "दिव्यस्थानात् त्वमिव जगतीं पादुके गाहमाना" इत्युक्तरीत्या **अचलात्** सत्यात् नैमित्तिक-प्रलयेष्वनश्यतः कुतश्चित् **स्थानात्** लोकात् तत्र शतकोटिप्रविस्तररामायणरूपेणाऽऽविर्भूय ततः **साग-रान्तिकं** भूलोकम् । सगरपुत्राः सागराः तदन्तिकं तद्वंशजरामसमीपमिति वा । यद्वा सगरवंश्यः सागरो रामः । **तदन्तिकः** । अयोध्यातः सीता देवी वाल्मीक्याश्रमसमीपे विसृष्टा वाल्मीकिना स्वाश्रमे यथा-वदाराधितेति वाल्मीकिरेव तदन्तिकः । तं प्रयान्ती सरस्वती **श्रुत्यभीष्टा** वेदोपबृंहणभूता, पाठ्ये येवे च मधुरत्वात् कर्णामृतरूपा च । **दृश्यादृश्यनुः** विस्पष्टार्थकत्वात् दृश्याऽपि आध्यात्मिकाद्यनेकगूढार्थ-गर्भत्वात् अदृश्यरूपा च भाति ॥

குதச்சித் அசலஸ்த்தாநாத் ப்ரயாந்தீ ஸாகராந்திகம் |
த்ருச்யாத்ருச்யதநுர் ப்பாதி ச்ருத்யபீஷ்டா ஸரஸ்வதீ || 4 ||

1. நிலை தவறுமலிருக்கும் ஒப்பற்ற கவியினிடமிருந்து புறப்பட்டு கடல் ஓரம் வரை பரவும் க்ரந்தம் எளிதில் காணக் கூடியனவும் காண வாகாதனவுமான பொருள்களைக் கொண்டிருக்கும். வேதத்திற்கும் செவிக்கும் இஷ்டமாகும்.

2. ஸரஸ்வதி என்கிற நதி ஒரு மலையினின்று தோன்றி கடல் வரையும் செல்லுகிறதாலும் சிலவிடங்களில் காணுமாறும் மற்ற இடங்களில் காணவாகாமலுமிருக்கும். வேதம் புகழ்ந்த நதியாம் அது.

3. ஸரஸ்வதிதேவியானவள் ஸத்யலோகத்தில் பிரமனிடம் நூறு கோடி க்ரந்தமான ராமாயணமாகத் தோன்றியவள் அங்குநின்று புறப் பட்டு ஸகரவம்சத்தில் உதித்த ஸ்ரீராமனின் அருகிலிருக்கும் வால்மீகி முனிவரிடம் சேர்ந்து வேதத்திற்குப் பொருள் தெளியுமாறு ஸ்ரீமத்ராமா யணஸூக்தியானாள். நன்றாகப் பொருள் அறியக் கூடியதாயினும் அது நுண்ணிய பல உட்பொருள்களைக் கொண்டிருப்பதால் அறியப் படாத பல அம்சங்கள் கொண்டதாகும்.

सूक्तीनां शुक्तिसाम्यमाह—

प्रभूतोदितमुक्ताभिर्भूयते सूक्तिशुक्तिभिः ।
सुदृशां कर्णपूराय तादृक्त्वं फलमेदतः ॥ ५ ॥

1. सूक्तयः सुभाषितानि **शुक्तय इव** मुक्तोत्पत्तिस्थानानीव । ताभिर्भूयते । ता भवन्तीत्यर्थः । कथं भवन्ति । **सुदृशां** प्राज्ञानां **कर्णपूराय** पूर्णश्राव्यत्वाय भवन्ति । सुदृशामिति प्रयोगः ज्ञानिभिरेव

सूक्तिशुक्तिनिगूढनानार्थग्रहणसंभवात् । सूक्तयः कीदृश्यः ? प्रभूतोदितमुक्ताः । सूक्तिप्रतिपाद्यार्थविशेषा एव मुक्तात्वेनाध्यवसीयन्ते । **प्रभूतं** प्राज्यं यथा तथा **उदिताः** उक्ताः मौक्तिकतुल्या अनर्घाः विषयाः याभिस्ताभिः । प्रभूताः उदितमुक्ताः यासां ताभिरिति वा । तदा **उदित**शब्द एव उक्तपर्यायः उक्तार्थ-परः । **उदिताः** उक्तार्थाः मुक्ता इवोदितमुक्ता इत्यवान्तरविग्रहः । यद्वा उदितं मुञ्चन्तीति **उदितमुचः** तासां भावः **उदितमुक्ता** उक्तार्थत्यागिता प्रभूता यत्र ताभिः । प्रायेण पौनरुक्त्यभिया उक्तार्थास्त्य-ज्यन्ते चेत्, प्राज्ञाः शृणुयुरिति भावः । अथवा **प्रभूतोदितं** प्राज्योत्पत्तिकं यथा तथा **उक्ताभिः** विस्तरेण व्याख्यानरूपेणोक्ताभिरिति यावत् । यथा पौनरुक्त्यवर्जिताः सूक्तयः श्रूयन्ते, तथा विस्तरेणोक्ताः अपि । **तादृक्त्वं** सुदृक्कर्णपूरकत्वं सर्वासां फलभेदतः । उक्तस्यैवोक्तिर्नाद्रियते अतिरिक्तफलाभावात् । अनर्घाश्च विषयाः श्रूयन्ते ; तन्मुखेन धर्मार्थकाममोक्षरूपफललाभात् । विस्तृता अपि ; वैशद्यात् ।

2. एवं **सूक्तिशुक्तिभिः** शोभना **उक्तिः** स्तवरूपवचनजातं यासां विषये ताभिः शुक्तिभिः **प्रभूतं** यथा तथा पंक्तिशः उत्पन्नमुक्तामणिभिः **सुदृशां** कुवलयनयनानां स्त्रीणां **कर्णपूराय भूयते** । कर्णालंकारत्वं न शुक्तिस्वरूपेण ; किन्तु मुक्ताफलानां **भेदात्** भेदनात् उत्पादनादिति चतुर्थपादार्थः ।

3. अथ **सुदृशां सूक्तिशुक्ति**भिरित्यन्वयः । शुचिर् पूतीभावे शुच्यत इति धातोः शुक्तिरिति रूपम् । सूक्तिसंबन्धिशुद्धिभिः । शुद्धसूक्तिभिरित्यर्थो भवितुमर्हति । ताः प्रभूतोदितमुक्ताः । उदितञ्च मुक्तञ्च उदितमुक्ते ते द्वे **प्रभूते** प्राज्ये यत्र ता इत्यर्थः । वक्तव्यं यत्राधिकम् उक्तमस्ति, त्यक्तव्यञ्च त्यक्तमस्ति, तादृश्य इत्युक्तं भवति । ताः सुदृशां ज्ञानिनां (तत्कर्तृकाः) सूक्तयः कर्णपूराय भवन्ति । **तादृक्त्वं** वक्तव्यं सत्यवचनं त्यक्तव्यार्थत्यागश्च **फलभेदतः** इष्टप्रापणानिष्टवारणरूपफलानुरोधादिति ।

4. कर्णविषयकोऽपि । कुन्ती वसुदेवसहजा शूरपुत्री कुन्तिभोजस्वीकृता कन्यावस्थायां दुर्वाससः परिचारिणी तेन दत्तमन्त्रा आसीत्, तेन मन्त्रेण यं देवमाह्वयेत् सा, स तस्यां पुत्रं जनयिष्यतीति । सा कन्या सती कौतूहलेन सूर्यमाहूय ततः पुत्रमसूत । स एव कर्णः । तं सा बन्धुपक्षभयात् उत्ससर्ज जले । तं यदृच्छया लब्ध्वा सूतः स्वपत्न्या राधया वर्धयामास । (भा. आदि) । इमां कथां कुन्ती कर्णं प्रति भारतयुद्धात् प्रागेवावोचत्, तं दुर्योधनपक्षान्निवर्तयितुं स्वपक्षं तेन पूरयितुम् । तदत्रोच्यते—**सुदृशा**-मिति पूजायां बहुवचनम् । कुन्त्याः सूक्तिशुक्तिभिः शुद्धाभिर्वाग्भिः **प्रभूतोदितमुक्ताभिः** । कर्णस्य स्वात्मन उदितम्–उत्पत्तिः **मुक्तं**–जले मोचनञ्च प्रकर्षेण भूतं यासु सूक्तिषु ताभिः ; तत्प्रतिपादिकाभि-रित्यर्थः । **कर्णपूराय** कर्णेन स्वपक्षपूरणाय, कर्णस्य स्वपुत्रस्याऽऽयुरादिपूरणाय च भूयते । **तादृक्त्वं** तथा तदुत्पादनं जले त्यजनञ्च **फलभेदतः** मन्त्रबलपरीक्षणकुतूहलरूपात् बन्धुजनभयरूपाच्च फलादिति ॥

ப்ரபூதோதிதமுக்தாபிர் பூயதே ஸூக்தி சுக்திபி: |
ஸுத்ருசாம் கர்ண பூராய தாத்ருக்த்வம் பலபேதத: || 5 ||

1. முத்துச்சிப்பி போன்ற ஸுபாஷிதங்கள் முத்துக்கள் போன்ற பல பொருள்களை யுள்ளனவாகி அறிஞர்களுக்குச் செவிக்கு இனியன

வாகின்றன. அதனால் அவரவர் பெறவேண்டும் பலனைப் பெறுகின்றாராதலின்.

2. நல்ல புகழ்ச்சிக்கு இடமான முத்துச்சிப்பிகள் மிக்க முத்துக்களை யுண்டாக்குகின்றவை ஸ்த்ரீகளுக்குக் காதணியாகும். காதணியாகை தாம் பெறும் முத்துக்களைக் கொண்டு.

3. நல்ல ஞானிகளின் ஸுபாஷிதங்கள் மெய்யைச் சொல்வனவும் பொய்யைப் புறக்கணிப்பனவுமாகி எல்லோருக்கும் செவிக்கு இனியனவாகும். தக்க பல பலன் இருப்பதால்.

4. குந்தியானவள் கர்ணன் தன்னிடம் பிறந்தமையையும் தான் ஜலத்தில் அப்போது விட்டுவிட்டதையும் கர்ணனைக் கொள்வதற்காக பாரதப் போருக்கு முன்னே அவனிடம் சொன்னாள்.

सत्सूक्तेर्यथावस्थितार्थबोधकत्वं नियतमित्याह—

प्रतीपमवमृष्टाऽपि स्वामभिख्यां न मुञ्चति ।
कालिकेव सतां सूक्तिस्तादृशश्रुतिनन्दनी ॥ ६ ॥

सतां "ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति" इति प्रशस्तानां सूक्तिः जडैः **प्रतीपं** यथा तथा-अपार्थत्वेन **अवमृष्टाऽपि** परामृष्टाऽपि **स्वामभिख्यां** यथार्थबोधकत्वं न मुञ्चति । अत एव वेदवेद्यार्थपरत्वात् सा **तादृशश्रुतिनन्दनी** तथाविधार्थबोधकवेदप्रीतिकरी । बिभेत्यल्पश्रुतात् वेदः प्रहृष्येत्तु बहुश्रुतात् । **मुञ्चति** इत्यत्र **मुञ्चती** इति स्त्रीलिङ्गपाठः, **श्रुतीत्यत्र द्युतीति** पाठश्च कचित् । **कालिकेवे**ति दृष्टान्तोऽनेकधोपपादयितुं शक्यते—

1. **कालिका** मेघपंक्तिः । सा **प्रतीपमवमृष्टापि** प्रतिकूलवायुनाऽन्यत्र नीताऽपि **स्वामभिख्यां** धारासंपातनकार्यं न मुञ्चति । तादृशानां प्रथमं वर्षस्थानत्वेनक्लृप्तदेशस्थितजनतुल्यानां देशान्तरस्थानां **श्रुतेः** श्रोत्रस्य **नन्दनी** आनन्दकरी ; गर्जितं श्रावयित्वा अत्र मेघो वर्षिष्यतीति हर्षोत्पादनात् ।

2. **कालिका** कालिकेति शब्दः **प्रतीपमवमृष्टा** व्युत्क्रमेण वाचिताऽपि स्वामभिख्याम् अभिव्यक्तिम् आनुपूर्वीं न मुञ्चति । **तादृशं** क्रमोच्चारितशब्दतुल्यं यथातथा **श्रुतेः** श्रोत्रस्य **नन्दनी** आनन्दजननी च ।

3. **कालिका**—कृष्णवर्णः । सा **प्रतीपमवमृष्टापि** रूपमिदं मा भूदिति बहुधा मार्जनक्षालनादिनाऽपनेतुमिष्टापि स्वप्रकाशं न मुञ्चति । **तादृशश्रुतिनन्दनी** । प्रथमतो लोहिततेजउत्पत्तेः ततः कृष्णपृथिव्युत्पत्तेश्च प्रतिपादिका या श्रुतिः, तस्याः पोषिका । तत्र हि लोहितधवलयोर्वर्णयोर्लोपः कृष्णवर्णस्यालोपश्च प्रतीयते ; भूम्या वर्णान्तरविशिष्टभूतान्तरसृष्टेरनुक्तत्वात् । दाहे सुतरां कृष्णता ; अग्नेः कृष्णवर्मत्वात् ।

4. **कालिका** काकस्त्री । सा बहुकृत्वः स्नापिताऽपि कालरूपैव । **तादृशश्रुतिनन्दनी** । **तादृशी** स्ववाचककालिकाशब्दतुल्या व्युत्क्रमेऽप्यनन्यथाभूता या काकेति **श्रुतिः** शब्दः, तयाऽन्येषां काकादीनां नन्दनी ।

5. **कालिका** दुर्गा। सा ग्रामेषु **प्रतीपमवमृष्टाऽपि** जनैर्यथावदपूजिताऽपि **स्वामभिख्यां** बिम्बे स्वसांनिध्यं न मुञ्चति। **तादृशश्रुतिनन्दनी** आशुतोषित्व–बहुजनसेव्यत्वौपयिकगुणशालित्वप्रतिपादकवेदप्रीणनी। किञ्च पाषाणे प्रहाराय कंसेन प्रतीपमवमृष्टाऽपि **स्वामभिख्यां न मुञ्चति** स्वशक्तिमद्भुतामवहत्; श्रीकृष्णोत्पत्तिस्थित्यादेः श्रावणेन भगवदनुकूलानां वसुदेवादीनामानन्दनी चासीत्।

6. देयतया संकल्पितस्य धनस्य व्यवस्थितेषु कालेषु भागशोऽर्पणं कदाचिद् भवति। तथा नानाकाले दीयमानं धनं **कालिके**त्युच्यते। सा **प्रतीपमवमृष्टाऽपि** अव्यवस्थया न्यूनाधिकभावेन दीयमानापि अन्ते मेलने **स्वामभिख्यां** व्याप्तस्वसंख्यां न मुञ्चेत्। तच्छ्रवणे दातृविषये सर्वेषां नन्द एव संतोष एव भवति। अवध्यतिक्रमाभावात्। तथा नन्दनी सत्येव स्वामभिख்யां न मुञ्चति। अन्यथा दोष इति।

ப்ரதீபம் அவம்ருஷ்டாऽபி ஸ்வாம் அபிக்யாம் ந முஞ்சதி |
காலிகேவ ஸதாம் ஸூக்தி: தாத்ருசச்ருதிநந்தநீ || 6 ||

மஹான்களின் பேச்சு சிலரால் தவருகக் கொள்ளப்பட்டாலும் உண்மையையே சொல்லும் வேதத்திற்கு ஒத்து சரியான பொருளைக் கூறுவதென்ற தன் நிலையை விடாது. காளிகை போல். காளிகை யென்பதைப் பலவிதமாக உரைக்கலாம். எவ்வாறெனில்—

1. காளிகா—மேகவரிசை. அது ஒரு திக்குக்குப் போவது எதிர் காற்றினல் வேறு திக்குக்குச் செலுத்தப் பட்டாலும் அதற்குத் தக்க இடியுடன் மழை பெய்வதை விடாது.

2. காளிகா என்ற சொல்லானது தலை கீழாக சொல்லப்பட்டாலும் தன் உரு குலையாமலிருக்கும். நேராகச் சொல்லும்போது போலவே காதுக்கு இனிதாகும்.

3. காளிகா—கருநிறம். அந்நிறம் பலவிதம் மாற்ற முயன்றாலும் எவ்வளவு தேய்த்துக் கழுவினாலும் மாருது. வேதமும் சிவந்த தேசு வெண்மையான நீராகவும் அது கருநிறமான பூமியாகவும் மாறுமென் கிறது. அதனின்று சிவப்பும் வெளுப்பும் அழியும் போது, கறுப்புக்கு அழிவில்லை யெனத் தோன்றும். (வேறு நிறமான வஸ்து அக்னியாய் எரிக்கப்படக் கறுப்பாகும்.)

4. காளிகை—காக்கை. அது எவ்வளவு கழுவினாலும் தன் நிற மாகவே யிருக்கும். காளிகையென்ற தன் பெயர் போல் மாற்றினாலும் வேருகாத 'காகா' என்ற சொல்லால் ஆனந்திக்கும்.

5. காளிகா துர்கை. துர்க்கைக்கு ஒழுங்காகப் பூசை நடத்தா விடினும் பிம்பத்தில் தன் ஸன்னிதானத்தை விடாமல் அவ்வாறு ஓதும் வேதத்திற்கு இணங்கி விளங்கும். கம்ஸன் துர்க்கையைப் பாறை யில் எறிந்து அழிக்க முயன்ற போதும் தன் பெருமை குன்ருமல் அதைக்கேட்பவருக்கு ஆனந்தம் ஊட்டி விளங்கினாள் துர்க்கை.

6. பல தவணைகளில் கொடுப்பதாக ஏற்படுத்தப்பட்ட பணமும் காலிகையாம். அத்தவணைகளில் சிறிது ஏறத் தாழவாஞலும் முடிவான காலமாகக் குறிப்பிட்ட அளவுக்கு இணங்கியிருந்தால் தன் ஏற்பாட்டைக் கடக்காததாகும்.

वर्णलिंगवयोविशेषानादरेण अबाधितार्थकं सर्वं प्रमाणम् । अत एव ह्युच्यते, 'युक्तियुक्तं वचो ग्राह्यं बालादपि शुकादपि' इति । युक्तिर्नाम प्रमाणम् । तदाह—

अपार्थेतरयुक्तानां व्याससंग्रहशालिनाम् ।
अपि गोपालगीतानां निवेशो निगमादिषु ॥ ७ ॥

1. अपशब्दपदवत् अपार्थपदमपि तदाभासपरम् । अतः **अपार्थो** बाधितोऽर्थः तदि**तरयुक्तानाम्** अबाधितार्थकानाम् । **व्यासः** विस्तरः, **संग्रहः** संक्षेपः तदुभयशालिनाम् । वक्तव्यमर्थं व्यासेन संग्रहेण च वर्णयन्ति कवयः, वैशद्याय धारणसौकर्याय च; "इष्टं हि विदुषां लोके समासव्यासधारणम्" । ईदृशानां **गोपालगीतानामपि** वर्णचतुष्टयानन्तर्गतेन मूढतया ख्यातेन स्वपाल्यपशुतुल्येन गोपजातीयेन कथितानामपि वाक्यानां **निगमादिषु** वेदस्मृतिपञ्चरात्रगोष्ठ्यां निवेशो भवति । निहीनजाति-वाक्यमपि निगमतुल्यं प्रतिपाद्यार्थयाथार्थ्ये इति भावः ।

2. **पार्थः** अर्जुनः; **तदितरो** दुर्योधनादिः । न पार्थेतरः **अपार्थेतर** इत्यर्जुन एवोच्यते । तमेकमेव संबोध्योक्तत्वात् तदेकयुक्तानाम् । पार्थेतरयुक्तभिन्नानामिति वा । पार्थेतरसंबोधनेनाप्रवृत्तानामि-त्यर्थः । **अपि**शब्दस्य तत्रान्वयः । तदितरास्मदसंबोधनेऽपि सर्वविषयकत्वात् निगमतुल्यतेति भावः । **गोपालस्य** श्रीकृष्णस्य **गीतानां** भगवद्गीतावाक्यानां **व्याससंग्रहशालिनां** व्यासमहर्षिणा संगृह्य श्लोक रूपेण निबद्धानाम् । तथा गीतास्वपि संग्रहभागो व्यासभागश्च वर्तते । द्वितीयाध्याये प्रथमं संगृह्योक्त्वा पश्चात् विस्तरः कृतः; पुनरपि तृतीयादिषष्ठान्तभागेन तद्विस्तरः । षष्ठान्ते योगिनामपीति श्लोकसंगृहीतः सप्तमादिद्वादशान्तभागेन विस्तृतः । तावति संक्षिप्तानां तत्त्वहितानां पुनः प्रपञ्चनं त्रयोदशाध्याय-मारभ्येति । **निगमादिषु** वेदपञ्चरात्रपरिषदि **निवेशः** । तत्तुल्यप्रामाण्यमित्यर्थः । भगवता गोपालनोद्देशेन गीताः । **गौः** वेदः पञ्चरात्रञ्च । तत्संरक्षणार्थं तदर्थो निष्कृष्येहोपदिष्ट इति ।

3. **अपार्थाः** बाधितार्थकाः वेदबाह्यकुदृष्टिग्रन्थाः । तदितरे वेदस्मृत्यादयः । **तद्युक्तानां** तत्प्रमाणीकरणेन प्रवृत्तानां व्यासेन महर्षिणा संगृह्य सूत्रादिरूपेण कृततया संग्रहशालिनां **गोपालेन** श्रीकृष्णेन **गीतानां** "ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः" इति श्लाघितानां शारीरकशास्त्रादीनां **निगमादिषु** निरूप्यमाणेषु तदुपयुक्ततर्कप्रदर्शनेन तदुपकारकतया निवेशो भवति ।

4. **अपार्थाः** निरर्थकाः स्तोभाक्षरत्वेनोच्यमाना गीतिनिविष्टाः; **इतरे** सार्थकपद्यादिरूपाः । तदुभययुक्तानां **व्यासेन महर्षिणा** श्रीभागवते स्तुतानां **गोपालगीतानां** रासक्रीडा-पशुपालनादि-समयसामयिकानां श्रीकृष्णगोपीजनगानविशेषाणां ग्रामादौ उत्पन्नानामपि **निगमादिषु** नगरेषु नाक-लोकेषु च निवेशः प्रचार आसीदिति ।

அபார்த்தேதர யுக்தாநாம் வ்யாஸ ஸங்க்ரஹசாலிநாம் |
அபி கோபாலகீதாநாம் நிவேசோ நிகமாதிஷு || 7 ||

1. ப்ரமாணத்திற்குப் பொருந்தாத பொருள்களன்றி மெய்யான பொருளைக் கூறுகின்ற, விரிவாகவும் சுருக்கமாகவும் உள்ள வார்த்தைகள் இடையன் சொல்வனவாயினும் வேதம் முதலியவற்றின் கோவையில் சேரும்.

2. பார்த்தனுவான் அர்ஜுநன். அவன் தவிர வேறொருவனை விளிக்காமல் கண்ணனால் கூறப்பட்டு வியாஸ மஹர்ஷியால் சுருக்கமாக பத்யமாக அமைக்கப் பெற்ற கீதையானது வேதம் முதலியன போல் ப்ரமாணமாகும். கீதையிலும் விரிவும் சுருக்கமுமான பாகங்கள் உள.

3. அபார்த்தங்களாகும் வேதத்திற்கு முரணான நூல்கள் ஸாங்க்யம் தர்க்கம் பௌத்தம் போன்றவை, அவற்றைவிட வேறானவை வேதாதிகள். அவற்றிற்கு இணங்க வ்யாஸ மஹர்ஷி சுருக்கமாக அருளிய ஸூத்ரங்கள் கண்ணனால் கீதையிலும் போற்றப்பட்டவை. அவை வேதத்திற்குச் சேர்ந்தவை. அவற்றின் பொருளை விளக்க யுக்திகளைக்காட்ட வந்தவையாம்.

4. அபார்த்தங்களாவன பாடும் போது ஆலாபனையில் தோன்றும் சொற்கள். ஸாமகானத்தில் ஸ்தோபாக்ஷரங்கள் போன்றவை, அவ்வாறுகாமல் பொருள்படும் கீர்த்தனைகளும் உண்டு. இவ்விருவகையும் கலந்த ஸங்கீதம் கண்ணன் பலகால் பாடியவை வியாஸ மஹர்ஷியாலும் ஸ்ரீபாகவதாதிகளில் புகழப் பெற்றன. அவை ஆய்ப்பாடியில் இடையர் பாடியவை யானாலும் நகரங்களிலும் மேலுலகங்களிலும் மேன்மை பெறும்.

जडाः स्वघोषेण सत्कविवचश्श्रवणस्तवननिरोधं कामं कुर्वन्तु । तावता तदभीष्टसिद्धिर्न भवति ; प्रत्युतानर्थ एवेति परैरनभिभाव्यत्वमाह—

जडाशयस्य घोषेण जातलौल्यस्य भूयसा ।
कविशब्दं तिरोधाय कश्चिदर्थो न साध्यते ॥ ८ ॥

जातलौल्यस्य स्वं कवित्वेन प्रकटयितुं वा परान् अकवित्वेन प्रकटयितुं वा प्राप्तचापल्यस्य, **जडाशयस्य** जडबुद्धेः असूयाबलादपि अज्ञस्य गुणदोषानभिज्ञस्य कस्यचित् **भूयसा** महत्तरेण घोषेण **कविशब्दं** कवेर्मधुरं वाक्यं अयं कविरिति प्रसिद्धिश्च **तिरोधाय** अज्ञातं कृत्वा अपलप्य, कश्चिदपि **अर्थः** इष्टं **न साध्यते** साधितो न भवति। प्रत्युतानर्थ एव साध्यत इति भावः। **जडाशयस्येति** षष्ठीप्रयोगः **अर्थ** इत्यत्रापि तदन्वयाय। तस्यार्थो न साध्यते ; कवेरेवानर्थः साध्यते। शुश्रूषूणामिष्टालाभात् कष्टञ्च। न तु सत् फलं किञ्चित्। **घोषेणे**त्यत्र तदन्वये नियमो न। तत्कर्तृकघोषेण तत्पक्षपातिव्यूहघोषेण चेति विवक्षितम्।

2. हंसपक्षिध्वनितोऽधिको भवतु सरसि समुद्रादौ वा वातोत्थापितवीचीसमुद्घोषः । तावता किं भवतीत्याह—**जातलौल्यस्ये**ति । पूर्वं लोलत्वं सतृष्णत्वम् ; अत्र चञ्चलत्वम् । तद्वतः **जडाशयस्य** लडयोरभेदात् **जलाशयस्य** सरसः जलधेर्वा भूयसा घोषेण **कविशब्दं के** जले स्थितः **विः** पक्षी हंसः तस्य ध्वनिं **तिरोधाय** अभिभूय न किञ्चित् साध्यते । न ह्ययं ध्वनिस्तस्य कदाऽपि ।

ஜடாசயஸ்ய கோஷேண ஜாதலௌல்யஸ்ய பூயஸா |
கவிசப்தம் திரோதாய கச்சித் அர்த்தோ நஸாத்யதே || 8 ||

1. வீணை கொண்டு ஒரு மூடபுத்தி பேரிரைச்சலிட்டு கவியான வனின் பேரையும் காவ்யத்தையும் மறைத்துப் புறக்கணித்தால் அதனால் பெறும் பயன் ஒன்றுமில்லை. (தனக்கும் கேடு. கேட்க விரும்பிய பலருக்கும் நஷ்டம்.)

2. 'ஜட' என்பதை 'ஜல' என்று கொள்க. ஜலாசயமாவது பெருநீர்த்தேக்கம் ஏரி ஸாகரம் போன்றது. அலைவீசிப் புரளும் ஏரியின் மிக்க இரைச்சலால் அங்கிருக்கும் அன்னத்தின் தொனியை மறைத்துப் பெறப்படும் நன்மை ஒன்றுமில்லை. அதற்கு இனிமை இன்றிமையாதது.

अथ कवेः पराभिभावकत्वमुच्यते—

सदानवोक्तिमहितः प्रतिरुन्धन् प्रतीपगान् ।
प्रथितः काव्यनाम्नापि कविरेकः प्रकाशते ॥ ९ ॥

1. बहुषु कविषु लोके वर्तमानेषु कविरेकः **सदा** सर्वदा **नवोक्त्या** नवनवोन्मेषशालि-प्रज्ञारूपप्रतिभाधीनया नवनवोल्लेखादिमत्या सूक्त्या नवनवग्रन्थनिर्माणेन च **महितः** श्लाघितः, **प्रतीपगान्** कविकाव्यरीतिविपरीतगतीन् कविम्मन्यान् **प्रतिरुन्धन्** अपथात् वारयन्, **काव्यनाम्नाऽपि** स्वनाम्नेव स्वकृतग्रन्थनामपुरस्कारेणापि, यथा श्रीभाष्यकारः मणिकारः दीधितिकार इत्येवम् । केषाञ्चित् काव्यं कविनाम्नैव व्यवह्रियते माघः भारविरित्येवम् । एवं काव्यस्यापि स्वनामसद्भावत इव काव्यदर्शितविशेषमूलनाम्नापि दीपशिखाकालिदासः घण्टामाघ इत्येवं प्रथितश्च । ईदृशः **एकः** मुख्यतया प्रकाशते ।

2. शुक्राचार्यपरोऽपि । **सः** नीतिग्रन्थकर्तृतया नीतिमत्पद्धताविवात्र प्रस्तोतव्यः **दानवानां** स्वशिष्याणामसुराणाम् उक्तिभिर्महितः दानवोद्देश्यकोपदेशतः प्रसिद्ध इति वा । **प्रतीपगान्** असुर-विरोधिनो देवादीन् **प्रतिरुन्धन्** बाधमानः । अत्र शुक्रदृष्ट्या प्रतिकूलवर्तिग्रहदोषशमनं भवतीत्यर्थ-विवक्षा वा । प्रतिशुक्रगृहप्रवेशादिगतिरोधित्वं वा विवक्षितम् । **कवि**रिति **काव्य** इति च तस्य नाम । "शुक्रो दैत्यगुरुः काव्य उशना भार्गवः कविः" इति कोशात् । भृगुसुतकविपुत्रःशुक्रः काव्यः (आदिपूर्व-67-42.) कविः क्रान्तदर्शीति ।) **एकः प्रकाशते** । आकाशेऽपि शुक्र प्रकाशोऽधिकः ॥

ஸதாநவோக்திமஹித: ப்ரதிருந்தந் ப்ரதீபகாந் |
ப்ரதித: காவ்யநாம்நாऽபி கவிரேக: ப்ரகாசதே || 9 ||

1. எப்போதும் புதுப்புது ஸூக்திகளாலும் புதிய புதிய க்ரந்தங்கள் செய்வதாலும் கொண்டாடப்படுகின்றவன், காவ்ய லக்ஷணத்திற்கு இணங்காமல் கவிபாடுகின்றவர்களைத் தடுப்பவன், தன் பெயரால் போல் காவ்யத்தின் பெயராலும் (பாஷ்யகாரர் மணிகாரர், தீதிகாரர் நைஷதகாரர் என்றாற்போல்) ப்ரஸித்தி பெற்றவன் நன்கு விளங்குகிறான்.

2. சுக்ராசார்யர்விஷயமுமாம். அவர் சுக்ரநீதி எழுதி ப்ரஸித்தமானவர். தானவர்கள் (அசுரர்கள்) பேச்சால் புகழ் பெற்றவர், விரோதிகளைத் தடுப்பவர். ப்ரதிகூலமான க்ரஹத்தின் தோஷத்தைத் தம் த்ருஷ்டியால் போக்குபவர். எதிர்சுக்ரன் ஆகாதென ப்ரஸித்தமாகையால் அதை மீறத் தடை செய்பவர். கவி என்ற பெயராற்போல் காவ்யர் என்ற பெயராலும் வழங்கப்பட்டவர், ஒருவர் புத்திக்கும் எட்டாததைக் காண்பவர், வானத்திலும் சிறப்பாக விளங்குகிறார். (பா-ஆதி. 67-42)

सनातनधर्मरक्षणं यथावस्थिततत्त्वज्ञापनेन प्रजानां पुरुषार्थलाभञ्चोद्दिश्य पूर्वपुरुषक्षुण्णमार्गेण सञ्चरमाण एव महाकविर्भवतीत्याह—

पूर्वकल्पप्रकारेण पुरुषार्थप्रवृत्तया ।
विचित्रसृष्ट्या विहरन् व्याप्तः कश्चिन्महाकविः ॥ १० ॥

1. **कश्चित्** "अपत्यञ्च कवित्वञ्च द्वयमेव शुभास्पदम्" इति कवित्वाभिरुचिमान् **पूर्वकल्पप्रकारेण** स्वपूर्वानेक स्वोपजीव्यकविकल्पनारीत्यनुसारेण। नानाकाव्यपरामर्शेनेति यावत्। "शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्। काव्यज्ञशिक्षयाऽभ्यासः" इत्येषां काव्योद्भवहेतुत्वात्। पूर्वेषां **कल्पः** अनुष्ठानं तत्प्रकारेण। सनातनधर्माक्षोभेणेति चार्थः। अथवा कृतवाग्द्वारे वंशेऽस्मिन् पूर्वसूरिभिरितिवत् पूर्वपुरुषक्षुण्णवर्त्मनेत्यर्थः। पूर्वचारित्रे किञ्चिद्रसावहकल्पनाप्रक्रिययेति वा। **पुरुषार्थप्रवृत्तया** "काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये। सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे" इति दर्शितविविधफलोद्देशेनोत्पन्नया। यद्वा स्वस्य अन्येषां च श्रोतॄणां **पुरुषाणां** जनानाम् **अर्थान्** धर्मार्थकाममोक्षरूपफलान्युद्दिश्य प्रवृत्तया **विचित्रसृष्ट्या** पराचुम्बितसंस्थानया शब्दार्थचित्रभूयिष्ठया अपूर्वसृष्ट्या कवितया **विहरन्** कृतविहारः सुखी **व्याप्तः** सर्वत्र लब्धयशाः विशेषेणाऽऽप्तश्च महाकविर्भवतीति।

2. महाकवेर्भगवत्साम्यमिह व्यज्यते। स हि **पूर्वकल्पप्रकारेण,** धाता यथा पूर्वमकल्पयदिति श्रुत्युक्तरीत्या पूर्वपूर्वसृष्टिकालकृतरीत्यैवोत्तरकालेपि पुरुषार्थप्रवृत्तया सर्वजीवसर्वफलार्थं भवन्त्या **विचित्रसृष्ट्या** चतुर्दशभुवनदेवतिर्यङ्मनुष्यस्थावरतदवान्तरभेदभिन्नया **सृष्ट्या** सर्गेण **विहरन्** लक्ष्म्या सह लीलारसमनुभवन् अवतारांश्च कुर्वन् **व्याप्तः,** "तेनेदं पूर्णं पुरुषेण सर्वम्" इति नियमनार्थव्याप्तिमान् विशेषेणाप्तश्च **कश्चित्** अद्वितीयः **महाकविः** क्रान्तदर्शिषूत्तमः सर्वज्ञः। **महाकविरित्यस्य** महाकश्चासौ विश्चेति विगृह्य कं सुखं पूर्णसुखः विः परमात्मा। विःपक्षिपरमात्मनोरिति बाणकोशादिति व्याख्यानमपि ग्राह्यम्। महान् **कविः** चतुर्मुखः सृष्ट्यर्थं यस्य—यद्वशे, स महाकविरिति वा।

3. **पूर्व-कल्प-प्रकारेण** प्राचीनकल्पसूत्रोक्तरीत्या **पुरुषार्थप्रवृत्तया** 'श्येनचितं चिन्वीत स्वर्गकामः' इत्येवं फलार्थमनुष्ठीयमानया **विचित्रसृष्ट्या** "सृष्टीरुपदधाति" इति विहितानेकेष्टकाविचित्रसृष्टीष्टकायुक्तया चित्या विहरन् अग्निविहारं कुर्वन् कश्चित् यजमानः **महाकविः** । **कं**-सुखम्; विः-पक्षी । अधिकसुखहेतुश्येनाख्यपक्ष्याकारस्थण्डिलाग्निविशिष्टो **व्याप्तः** प्रसिद्धः ॥

பூர்வகல்ப்ப ப்ரகாரேண புருஷார்த்தப்ரவ்ருத்தயா |
விசித்ரஸ்ருஷ்ட்யா விஹரந் வ்யாப்த: கச்சித் மஹாகவி: || 10 ||

1. இதற்கு முன் இருந்த கவிகள் போன வழியிலே ஸநாதநதர்மத்தில் நோக்குடன் புராண வரலாற்றில் காலத்திற்கேற்ப சிறு மாறுதல் மட்டும் செய்து தனக்கும் பிறருக்கும் பல பலன்களைக் குறித்துச் செய்த புதிய வகையிலான கவிதாஸ்ருஷ்டியினுல் திசை எங்கும் பரவி மஹாகவியாகிருன்.

2. முன் முன் படைப்புக்களிலே போலே ஒவ்வொரு படைப்பிலும் ப்ரஜைகளை யெல்லாம் தர்மார்த்த காமமோக்ஷங்களுக்காக விதம் விதமாகப் படைத்து அவதரித்து லீலாரஸம் அனுபவிக்கிருன் ஸர்வேச்வரன் ஸர்வஜ்ஞன்.

3. பண்டைய கல்ப்ப ஸூத்ரப்படி ஸ்வர்க்காதி பலனுக்கு ஸ்ருஷ்டி என்ற பெயர் பெற்றவை முதலான செங்கல்களால் கருடசயனம் செய்து அதில் அக்னியை வைத்து யாகம் செய்கிருன், மிக்க ஸுகத்திற்கான, பக்ஷி என்ற சயனம் உடைய எசமானன்.

कविः क्षीरपारावारः, कविता च सुधेत्याह—

मतिमन्थजवेन लब्धवर्णा प्रतिपन्ना विबुधैरनन्यभक्तैः ।
सुकवेरनघाशयस्य सूक्तिः स्वदते दुग्धपयोनिधेः सुधेव ॥ ११ ॥

1. **अनघाशयस्य** निर्दोषान्तःकरणस्य यद्वा **अनघः** अखिलहेयप्रत्यनीकः श्रीपतिः **आशये** यस्य तस्य, **दुग्धानां** वेदादिप्रमाणवाग्भ्यो दोहनेन लब्धानां **पयसां** क्षीरवद्भोग्यानां वचसामर्थानाञ्च निधेः संभरणस्थानस्य **सुकवेः** शोभनस्य कवेः सूक्तिः **मतिमन्थस्य** मथनोपकरणतुल्यमननव्यापारस्य **जवेन** वेगेन **लब्धवर्णा** प्राप्तसमुचिताक्षरा, **अनन्यभक्तैः** अनन्यभक्तैः विषयान्तरप्रीतिरहितैः **प्रतिपन्ना** सगौरवं गृहीता **सुधेव** अमृतमिव **स्वदते** भोग्या भवति । सुधायाः क्षीराब्धिसंबन्धो ज्ञात एव । अथापि कवौ अब्धिसाम्यप्रतीतये तदुक्तिः । सूक्तिभिन्नाः कव्युक्तयः तत्रोत्पन्नवस्त्वन्तरतुल्याः ॥

2. **अनघाशयस्य** "अनुग्रहमयीं वन्दे नित्यमज्ञातनिग्रहाम्" इति निर्दोषां श्रियमनघं भगवन्तञ्च द्वौ आशये-अन्तः प्राप्तवतः, **सुकवेः** शोभनहंसादिजलपक्षियुक्तस्य । **कं** जलम् । **कं** सुखमिति शोभनसुखशालिपक्षियुक्तस्येति वा । **दुग्धपयोनिधेः** क्षीरसमुद्रस्य **सुधा** अमृतं सूक्तिरिव तत्तुल्यं **मतिमन्थजवेन** मतिकारितेन मन्दराद्रिवेगेन **लब्धवर्णा** उपरिलब्धप्रकाशा **अनन्यभक्तैः** । **भक्तम्** अन्नम् । आहारान्तररहितैः । **विबुधैः** देवैः **प्रतिपन्ना** लब्धा **स्वदते** भोग्या भवति ।

மதிமந்த்தஜவேந லப்த்தவர்ணா
ப்ரதிபந்நா விபுதைரநந்யபக்தை: |
ஸுகவேரநகாசயஸ்ய ஸூக்தி:
ஸ்வததே துகத்தபயோநிதேஸ் ஸுதேவ || 11 ||

1. குற்றமற்ற மனம் உடைய, கடல் போன்ற சிறந்த கவியின் ஸூக்தியானது ஆராய்தல் என்ற மத்தால் கடையப்பட்டு அந்த வேகத்திலே வெளியில் தோன்றிய செஞ்சொற்களேயாகி, வேறொன்றில் மனம் செல்லாதவாறு வித்வான்களால் நன்கு அறியப் பெற்று அமுது போல் இனிதாகின்றது.

2. மந்தரமலை நாட்டிக் கடைந்த விரைவில் தோன்றி, வேறு ஆஹாரம் வேண்டாத அமரர்களால் பெறப்பட்ட அமுதம் அழகிய பக்ஷிகள் ஸுகிக்கவாகி, அருள் வடிவமான பிராட்டிக்கும் பெருமானுக்கும் இடமுமான பாற்கடலில் தோன்றியது சிறந்த கவியின் ஸூக்தி போல் இனிதாகும்.

यथा क्षीरपयोनिधितः पीयूषप्रादुर्भावनं प्रबलप्रयाससाध्यमासीत्, तथैव कवेः कविताऽपीति मतिमपाचिकीर्षुः, मनुव्यासवाल्मीकिप्रभृतयो विना प्रयासं दिव्यसूक्तिसुधावर्षिण्यो दृष्टाः, तथाऽन्यत्राप्याविर्भवतीत्याह—

मनुव्यासप्राचेतसपरिषदर्हा क्वचिदियं
सुधासिक्ता सूक्तिः स्वयमुदयमन्विच्छति जने ।
निरुन्ध्युः के विन्ध्याचलविकटसन्ध्यानटजटा-
परिभ्रान्ता पङ्गोरुपरि यदि गङ्गा निपतति ॥ १२ ॥

1 मनोः सूक्तिः धर्मशास्त्ररूपा अत्यद्भुतमधुरवाग्गुम्भपूर्णा काव्यशोभां लभते। व्यासः **प्राचेतसः** वाल्मीकिश्चेतिहासप्रणेतारौ प्रसिद्धौ। एवं पराशरादयोऽपि ग्राह्याः। एवमर्थतः शब्दतश्च तत्परिषदर्हा सूक्तिः **इयं** पूर्वप्रस्तुतरूपा **इयं** प्रकृता वा **सुधासिक्ता** रसघना **जने** तदाविर्भावार्हभाग्यमात्रवति यथाजातस्थितावपि **क्वचित् उदयम्** आविर्भावम् **अन्विच्छति** अनुस्यूततया कांक्षति। तदिदमनुभवसिद्धमिति वर्तमाननिर्देशाभिप्रायः। तत्र जनस्य प्रयत्नो वाऽभिसंधिर्वा नापेक्षित इतीदं दृष्टान्तेन दर्शयति-**निरुन्ध्यु**रिति। विन्ध्याचलवत् **विकटायाः** विस्तृतायाः निम्नोन्नतायाश्च **सन्ध्यानटस्य** नटराजस्य जटातः **परिभ्रान्ता** नटनसमये यदृच्छया निर्गता **गङ्गा पङ्गोः** गङ्गासमीपगमनप्रसक्तिरहितस्य पादेन्द्रियविकलस्य **उपरि यदि निपतति, के निरुन्ध्युः**—के तत्प्रतिबन्धारः। यथाऽयं पङ्गुरपि गङ्गाधर एव भवति, तथा कश्चित् स्वयं सामग्रीरहितोऽपि मन्वादिवत् सुकविर्भवेदिति। अत्रोदाहरणम् अयमाचार्य एव। पद्यमिदमस्य कवेरीदृशसूक्तिसुधावर्षित्वस्थापनार्थतया संकल्पसूर्योदये रचितम् ॥

மநுவ்யாஸப்ராசேதஸபரிஷதர்ஹா க்வசித் இயம்
ஸுதாஸிக்தா ஸூக்தி: ஸ்வயம் உதயம் அந்விச்சதி ஜநே |
நிருந்த்யு: கே விந்தயாசலவிகட ஸந்த்யாநட ஜடா-
பரிப்ராந்தா பங்கோருபரி யதி கங்கா நிபததி || 12 ||

1. கீழ்க்கூறிய குணமெல்லாம் உள்ள ஸ்ரீஸூக்தி அமுதத்தில் தோய்க்கப் பெற்றதாகும், மநு வ்யாஸர் வால்மீகி போன்றோரின் கோஷ்டிக்கே தகுமான அத்தகைய ஸூக்தி ஏதோ சாமான்ய மனிதனிடம் தோன்ற விருப்பம் கொள்ளுகின்றது அனுபவத்திலுள்ளது. விந்திய மலை போல் அகன்று மேடுபள்ளமான நடராஜன் ஜடையினின்று தெறித்து கங்கை ஒரு நொண்டியின் மேல் தானே விழுமாகில். அதை யார் தடுப்பவர். சிலர் இவ்வாறே கவியாவார்.

ஸுகவிபத்ததி (11) முற்றும்.

अथ परीक्षित(परीक्षक?)पद्धतिर्द्वादशी (१२)

एवम् 'अपदोषतैव विगुणस्य गुणः' इति न्यायेन दोषाभावस्यापि गुणत्वात्, 'विधेर्निषेधो बलीयान्' इति न्यायेन गुणापेक्षया दोषाभावस्य मुख्यत्वात् दुष्टविषयकपद्धतीः प्राक् प्रणीय सद्विषयकपद्धतीः प्रणिनाय। काव्येनेत्थं प्रकटनादथ सत्कविपद्धतिम्। अथ सर्वस्य परीक्षणमूलकत्वात् तदर्थपद्धतिमन्ते निवेशयति। पूर्वपद्धतीनां पुरुषविषयकत्वात् अत्रापि तदैकरूप्यस्पष्टत्वाय **परीक्षकपद्धति**रिति नाम युक्तम्। **परीक्षितपद्धति**रित्येव निर्दिश्यते। यत् साधुत्वेन परीक्षितं तद्ग्राह्यं भवति। तत् चेतनमचेतनं वा द्रव्यमद्रव्यं वा शब्दोऽर्थो वा यथायथमिति द्वादशसंख्यानतिक्रमेण उदाहृत्य, विद्यायाः प्राधान्यात् परीक्षायाश्च तदधीनत्वात् अन्ते विद्यां निर्दिश्योपसंहरिष्यति। आदौ परीक्षासाधनप्रमाणेषु प्रत्यक्षं प्रमाणं गृह्णन् आह—

काकानां कोकिलानाञ्च सीमाभेदः कथं भवेत्।
यदि विश्वसृजा साक्षं न कृता कर्णशष्कुली ॥ १ ॥

1. **सीमा** मर्यादा अवधिः इयत्ता साधर्म्यवैधर्म्यसमुदायः। काकस्य सीमा कोकिलसाधारणानेकांशेषु सत्सु असाधारणांशवत्त्वम्; तथा कोकिलस्य **सीमा** काकसाधरणांशेषु सत्सु स्वासाधारणांशवत्त्वम्। तच्च काकरटन-कोकिलकूजितरूपम्। तयो**र्भेदः** विवेकः वैलक्षण्यग्रहणं कदा भवेत्। कर्णेन्द्रिये सत्येव। यदि **विश्वसृजा** सर्वस्रष्ट्रा भगवता **साक्षं**-अक्ष्णा सह। चक्षुरिन्द्रियसृष्टिवदिति यावत्। **कर्णशष्कुली** कर्णसंस्थानम्। शष्कुलीशब्दो भक्ष्यविशेषमिव कर्णसंस्थानमप्याह, "शष्कुली कर्णपाश्यपि" इत्यमरः। सा न कृता चेत्, कथं सीमाभेदो भवेदिति। अक्षिसृष्टिः काककोकिलैक्यभ्रमायैव भवति। कोकिले काकभ्रान्तिः परभृतां काकानामेव चेत्, अस्माकं कथं न भवेत्। तन्निवृत्तिश्च तद्रवश्रवणेनैव। उक्तमिदं प्राक्, "नीतिस्त्वयि" इति श्लोके।

2. तथा द्वयोः पुरुषयोर्देहदर्शने साम्यप्रतीतौ जातायामपि तत्तद्व्यवहारश्रवणेनैव वर्णदेशवैदुष्यादिविवेको भवेदिति। नेत्रादपि श्रोत्रस्यातो महिमा लक्ष्यते। एवं मानान्तरात् वेदस्य वैशिष्ट्यमपि युज्यते॥

பரீக்ஷித (பரீக்ஷக) பத்ததி 12

காகாநாம் கோகிலாநாஞ்ச ஸீமாபேத: கதம் பவேத் |
யதி விச்வஸ்ருஜா ஸாக்ஷம் ந க்ருதா கர்ணசஷ்குலீ || 1 ||

1. காக்கைகளுக்கும் குயில்களுக்குமுள்ள வேறுபாட்டின் தெளிவு எங்ஙனே பிறக்கும், எல்லாம் படைப்பவன் கண்ணுடன் காதையும் படைக்காமலிருந்தானுகில். கண்ணுற் காண்பது அவ்விரண்டையும் ஓர் இனமாகக் கொள்வதென்ற விபரீத ஞானத்திற்கே யாகிறது. காது தான் அததன் குரலை யறிவித்து வேறுபாட்டை விளக்குவதாம்.

2. மனிதர் இருவரைக் காண்பது மட்டிலிருந்து திகைப்பே யன்றி தெளிவில்லையென்ற விடத்திலும். அவர்கள் பேச்சைக் கேட்டவுடனே வர்ணம், தேசம் வித்யை யெல்லாம் அறியலாகும்.

शब्दश्रवणमूलो विवेको दर्शितः । शास्त्राख्यशब्दश्रवणमूलतदर्थज्ञानकल्पनीयो विवेको व्युत्पाद्यते—

छन्दःप्रत्ययशुद्धात्मा पश्यन् यतिगणस्थितीः ।
वर्णादिनियतं वृत्तं नियुंक्ते गौरवादिवित् ॥ २ ॥

1. **छन्दस्सु** वेदेषु **प्रत्ययेन** विश्वासेन यथार्थबोधकत्वरूपप्रामाण्यनिश्चयेन तदुचिताचार-बलात् **शुद्धात्मा** परिशुद्धदेहमनस्स्वात्मस्वरूपः **गौरवादिवित् गौरवं** साक्षात् गुरुत्वम् तात्कालिकं हितोपदेष्टृत्वं वा लब्धवान् महान् । विदिर्लाभे । **यतिनां** यतनशीलानाम् "ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च ते" इत्यमरः । विरक्तसर्वग्रहणमत्र । **गण**शब्देन बुभुक्षुग्रहणम् । तेषामाधिक्यात् गणत्वम् । तथा च मुमुक्षुबुभुक्षुप्रपन्नाप्रपन्नादिस्थितिं पश्यन्नित्यर्थः । यथाधिकारमेव धर्मस्योपदेष्टव्यत्वादिति भावः । तत्रापि **वर्णादिनियतं** विप्रादिवर्णतत्तदाश्रमकुलगोत्रसंकरजातिदेशकालादिभेदव्यवस्थितं **वृत्तम्** अनुष्ठेयक्रियां **नियुंक्ते** ज्ञापयति । सर्वं परीक्ष्यैव वक्तव्यमिति भावः ।

2. **छन्दसां** गायत्र्यनुष्टुब्जगतीप्रभृतीनां वैदिकलौकिकानां छन्दसां सर्वेषां प्रत्ययेन ज्ञानेन **शुद्धात्मा** लोकार्हवृत्तज्ञानवान् **यतिगणस्थितीः । यतिः** विच्छेदः रूढपदपूर्तिः । यथा सूर्याश्वैरिति शार्दूलविक्रीडिते द्वादशभिः सप्तभिश्च यतिः, त्रिमुनियतियुतेति स्रग्धरायां प्रतिसप्तकं यतिरित्येवम् । **गणाः** अक्षरत्रिकरूपाः जगणादयोऽष्टौ । तेषां स्थितीः । यद्वा **स्थिति**शब्देन पदोपरमो ग्राह्यः ; द्वितीयचतुर्थपादावसाने पूर्णपदोपरमस्याऽऽवश्यकत्वात् । तथा च यतिं गणं स्थितिञ्च पश्यन्नित्यर्थः । **गौरवादिवित्** वर्णगुरुत्वलघुत्वज्ञानी । विद ज्ञाने । एकैकपादेऽपि एतावान् गणः एतावत् गुर्वक्षरम् एतावल्लघ्वक्षरञ्च गणन्यूनमिति जानन् ; **वर्णादिनियतं** वर्णमात्राव्यवस्थितम् अनुष्टुबादिषु प्रतिपादं वर्णाष्टकादिनियमः आर्यायां च द्वादशाष्टादशादिमात्रानियमः इति तद्युक्तं वृत्तम् अनुष्टुबादिरूपं **नियुंक्ते** उपदिशति, नितरां घटयति वेति । पद्यनिर्माणमेतावदंशज्ञानसाध्यमित्यर्थः ॥

ச்சந்த:ப்ரத்யயசுத்தாத்மா பச்யந் யதிகணஸ்த்திதி: |
வர்ணாதிநியதம் வ்ருத்தம் நியுங்க்தே கௌரவாதிவித் || 2 ||

1. ஆசார்யகத்தை வஹிப்பவன் மற்றும் பிறருக்கு உபதேசம் செய்கின்றவன் வேதத்தில் விச்வாஸம் பூர்ணமாயிருந்து தன் நிலையுற்றவனாய், வைராக்யமுள்ளவர். காம்ய பலன்களிலேயே நோக்குள்ளவர் என்ற நிலைகளைக் கண்டு, அவர்களை ப்ராஹ்மணாதி வர்ணம், ஆச்ரமம், குலம், கோத்ரம், வேதம் காலம் தேசம் என்றவற்றிற்கு இணங்க ஸதாசாரத்திலே ஏவுவான்.

2. பத்யம் எழுத விரும்புகின்றவன், வைதிக-அவைதிக வ்ருத்தங்களை யறிந்து லோகத்தில் வழங்குமவற்றைத் தெளிந்து அதில் என்ன என்ன கணங்கள், சொல்முடிவு எங்கு, பதமுடிவு எங்கு, எத்தனை எழுத்து, எத்தனை மாத்திரை, மற்றும் குறில் நெடில் என நிலையெல்லாம் தெரிந்து வ்ருத்தம் அமைப்பான்.

वर्णाद्यनुरोधेनाऽऽचारशिक्षणं प्रागुक्तम् । वर्णव्यवस्थाऽपि दोषोद्भावने समुचितप्रमाणमुखेन परीक्ष्य कार्या भवतीत्याह—

सुवर्णमपि दुर्वर्णं युक्त्या दर्शयति (यितुं) क्वचित् ।
व्यनक्ति शुद्धिं सहसा शुचिरेकः स्वतैक्ष्ण्यतः ॥ ३ ॥

1. **क्वचित्** कस्मिंश्चित् दूषके पुरुषे **युक्त्या** कूटयुक्त्या कुतर्केण सुवर्णमपि शोभनब्राह्मणादिवर्णमपि दुर्वर्णं वर्णाभासत्वेन **दर्शयति** निरूपयति सति, **शुचिः** शुद्धः विवेकी **एकः** अद्वितीयः विशेषशक्तिमान् स्वस्य **तैक्ष्ण्यतः** बुद्धिसौक्ष्म्यात् तदुपमर्दकप्रमाणबलात् तस्य विवादविषयस्य **शुद्धिं** सुवर्णतां **सहसा** वेगेन अनायासेन **व्यनक्ति** स्पष्टीकरोति । श्रीकृष्णं गोकुलवासमात्रेण वैश्यमेव केचिन्मन्यन्ते चेत्—तन्मतिदूषणेन क्षत्रियवर्णजनित्वादिकं शुचिनोपदेष्टव्यं भवति । एवं तस्य जारत्वादिदोषशंकापरिहारोपि । उत्कृष्टेषु निकृष्टकुलसंबन्धमूलदोषशंकापरिहारो बहुत्र द्रष्टव्यः । **दर्शयितु**मिति पाठात् **दर्शयती**ति पाठः साधीयान् ।

2. **सुवर्णं** पातिव्रत्याधीनशोभनवर्णं श्रीसीतादिव्यमंगलविग्रहं **क्वचित्** रामे नेत्रातुर इव अन्यभूमिवासरूपयुक्तिमात्रेण दुर्वर्णतया दर्शयति सति **शुचिः** अग्निः सहसा **स्वतैक्ष्ण्यतः** स्वस्योष्णत्वे सत्येव तामन्यथाकर्तुमशक्तः गौरवेण, "विशुद्धभावां निष्पापां प्रतिगृह्णीष्व राघव । न किञ्चिदभिधातव्यमहमाज्ञापयामि ते" इति प्रणतब्रह्मरुद्रादिसर्वदेवतासंनिधौ रामकृतमनुष्यत्वाभिनयानुरूपं स्वयमाज्ञापनरूपवचनमुखेन सीतायाः शुद्धिं व्यनक्ति ।

3. **सुवर्णं** कनकं **दुर्वर्णं** रजतादिरूपेण **युक्त्या** वस्त्वन्तरयोगवशात् कस्मिंश्चित् दर्शयति सति अग्निः स्वज्वालयौष्ण्येन संतप्य तस्य शुद्धिं व्यनक्ति ।

4. **सुवर्णं** शोभनाक्षरवाङ्मयमपि **क्वचित्** अभ्यसूयौ जने दुर्वर्णं हेयाक्षरराशिरूपतया दुर्युक्त्या दर्शयति सति मध्यस्थतया **शुचिः** निष्पक्षपात एकः सभाध्यक्षः शुद्धिं व्यनक्ति ।

5. नाहमचोरयमिति समीचीनवर्णप्रयोक्तारमपि पुरुषं संदिहाने कस्मिंश्चित् अयमचोरयदिति दुष्टविषयकवर्णसमुदायरूपवाक्यविषयतया दर्शयति सति, व्यवहारस्थाने तन्निरूपणाय तस्य हस्ते तप्तपरशौ निक्षिप्ते सोऽग्निः तस्य शुद्धिं व्यनक्ति । एवं परीक्षणं प्राचीनकाले ।

6. क्वचित् वसन्तकाले सुवर्णमपि शुभ्रमेव स्थानं युक्त्या नानापुष्परजःकिञ्जल्कपातेन दुर्वर्णं दुष्टशोभं दर्शयति सति शुचिः ग्रीष्मर्तुमासः स्वतैक्ष्ण्येन सर्वं शुष्कं कृत्वाऽपसार्य शुद्धिं व्यनक्ति ।

7. अरण्यां मथ्यमानायां मन्त्रे उच्चार्यमाणे, अर्थज्ञानसहितेऽपि तस्मिन्, यदि कश्चित् दुर्वर्णोऽयम् अर्थज्ञानरहितं प्रयुक्त इति दर्शयेत्, तदा अग्निः सहसा सह ज्वालयोत्पद्यमानः तस्य शुद्धिं व्यनक्ति । अग्नेरभ्यधिकोत्पत्तिरूपफलदर्शनेन मन्त्रस्य यथावत्प्रयोगं निश्चिन्वत इति ।

8. क्वचित् अश्वत्थामनि द्रोणपुत्रे युक्त्या अस्त्रयोगेन सुवर्णमपि शोभनकान्तिमपि परीक्षिद्रूपं शिशुं दुर्वर्णं दग्धकाष्ठतुल्यरूपं दर्शयति सति, शुचिः नित्यब्रह्मचर्यरूपशुद्धिमान् एकः अद्वितीयः श्रीकृष्णः स्वतैक्ष्ण्यतः स्वप्रभावात् शुद्धिं व्यनक्ति ।

9. दुर्वर्णम् असुवर्णं सुवर्णतया कस्मिंश्चित् दर्शयति, अग्निः तस्य वास्तवतत्त्वं व्यनक्तीत्येवंरीत्या विपरिवर्त्याप्यर्थो ग्राह्यः ।

ஸுவர்ணமபி துர்வர்ணம் யுக்த்யா தர்சயதி க்வசித் |
வ்யநக்தி சுத்திம் ஸஹஸா சுசிரேக: ஸ்வதைக்ஷ்ண்யத: || 3 ||

1. நல்ல ஜாதியிற் பிறந்தவனை ஒருவன் குயுக்தியினல் கெட்ட ஜாதியைச் சேர்ந்தவனுகக் காட்டும்போது சுத்தமான மஹான் தனது புத்தியின் நுண்மையினல் அறிந்து அவனது தூய்மையை விளக்குவான்.

2. சிறந்த கற்பொளியுடைய ஸீதாதேவியை ராமன் பகைவனின் இடத்தில் வஸித்தது காரணமாகக் குற்றமுள்ளவளாகக் கூறும் போது அக்னிபகவான் அவளுடைய சுத்தியை யறிவித்தான்.

3. பொன்னை ஒருவன் கீழ்லோஹமாக யுக்தியினல் காட்டமுயன்ருல் அக்னியினல் காயச்சின போது அது அதன் செம்மையை யறிவிக்கும்.

4. செஞ்சொற்கவியைப் பொருமையுடையவன் குற்றமுள்ளதாகக் கூறுமளவில் மத்யஸ்தனுய் பக்ஷபாதமில்லாதவன் ஸபாநாயகன் அதனை விளக்கி செம்மையை யறிவிப்பான்.

5. நான் திருடவில்லை யென்று உண்மை சொல்பவனை யொருவன் திருடனுக்க் கொண்டபோது அவன் கையில் பழுக்கக் காயச்சி வைக்கப் பட்ட இரும்பின் நெருப்பானது அவனை எரிக்கமாட்டாது அவனது தூய்மையைக் காட்டும்.

6. செம்மையான இடமே வேறு காலங்களில் பூவும் இலையும் தூள்களுமெல்லாம் சேர்ந்து அழுக்காகுமாகில் கோடைகாலம் தன் வெப்பத்தால் எல்லாம் தொலைத்து இடத்தை சுத்தமாக்கும்.

7. அரணிக் கட்டையில் அக்னியை உண்டுபண்ண ஒருவன் மந்த்ரம் ஜபிக்கும்போது மந்த்ரஜபம் ஒழுங்காக இல்லையென்று மற்றொருவன் கூறினால் அப்போது அக் கட்டையில் செவ்வையாகக் கிளர்ந்த தீயானது மந்த்ரம் நன்றாக ஓதப்பெற்றதென்பதை விளக்கும்.

8. அச்வத்தாமா தான் எய்த அஸ்த்ரத்தினால் நல்லுருவான சிசுவை (பரீக்ஷித்தை)—உத்தரையின் கருவில் இருந்த குழந்தையைக் கரிக்கட்டையாக்கிய போது நித்ய ப்ரஹ்மசாரியாய் சுத்தமான கண்ணன் அதனை சுய உருக் கொண்டதாக்கினன்.

9. துர்வர்ணம்—பொன்னாகாததை ஒருவன் பொன்னென்று காட்டி மோசம் செய்தால் அக்னி அதன் தன்மையைக் காட்டும் என்றவாறு சொற்களை மாற்றியும் உரை செய்க. (3)

शुद्धानामशुद्धत्वारोपे परीक्षणेन शुद्धत्वावगमः सुकर इत्युक्तम् । परीक्षणपर्यन्तमगत्वैव क्वचित् दोषारोपं साधवो न सहन्त इत्याह—

स्वच्छस्वादुविशुद्धानां स्रोतसां कलशोदधेः ।
दोषं केऽपि न मृष्यन्ति दुष्टजिह्वेन कल्पितम् ॥ ४ ॥

1. **दुष्टजिह्मेने**ति पाठो न शुद्धः ; **दुष्ट**पदवैयर्थ्यात् । क्षीरप्रस्तावे जिह्वापदौचित्याच्चायं पाठ एवाऽऽदर्तव्यः । **कलशोदधेः** अमृतकलशोत्पत्तिस्थानस्य समुद्रस्य संबन्धिनां **स्वच्छानां** निर्मलानां **स्वादूनां** रस्यानां **विशुद्धानां** दोषप्रसक्तावपि तत्क्षण एव विशेषेण शुद्धिं भजतां नीरसंपर्करहितानाञ्च **स्रोतसां** क्षीरप्रवाहाणां **दुष्टजिह्वेन** पित्तदोषदूषितरसनेन्द्रियेण मिथ्यादूषणवादस्वभावरसनायुक्तेन च **कल्पितम्** आरोपितं **दोषं** अनच्छत्वास्वादुत्वनीरमिश्रत्वादिदोषं **केऽपि न मृष्यन्ति** न सहन्ते । प्रत्यक्षविरुद्धत्वात् परीक्षणीत्वाभावात् ।

2. **कलशोदधेः** कुलशीलविद्यादिनिधेः पुंसः **स्रोतसाम्** अपत्यानां स्वयमपि स्वच्छस्वादुविशुद्धानां कैश्चित् परदूषणार्थजिह्वायुक्तैरारोपितं दोषं साधवो न सहन्ते ।

3. सत्पुरुषेण प्रणीतानां **स्वच्छानां** विशदार्थानां **स्वादूनां** रसभरितानां **विशुद्धानां** निर्दोषाणां **स्रोतसां** वाङ्मयप्रवाहाणां दुष्टजिह्वकृतं दूषणं न सहेरन् । पादुकासहस्रे सदसि वाच्यमाने दुर्जिह्वकोलाहलं कः शृणुयात् ।

4. कलशोदधेः स्रोतसां यो **दोषः** हालाहलाश्रयत्वरूपः, तस्य **दुष्टजिह्वेन** विषपूर्णरसनाविशिष्टेन सर्पेण वासुकिना मथनरज्जुभूतेन पीड्यमानेन स्वमुखनिष्कासितविषेण कल्पितत्वात् न तं समुद्रस्य स्वाभाविकत्वेन मन्येरन् ।

ஸ்வச்சஸ்வாதுவிசுத்தாநாம் ஸ்ரோதஸாம் கலசோததே: |
தோஷம் கேபி ந ம்ருஷ்யந்தி துஷ்டஜிஹ்வேந கல்பிதம் ‖ 4 ‖

1. தெளிவாகவும் இனிமையாகவும் கலக்கமற்றுமிருக்கும் பாற்கடல் வெள்ளங்களுக்கு நாக்கில் தோஷம் உள்ளவன் கற்பனை செய்யும் தோஷத்தை (இவை அழுக்கானவை, கசப்பானவை தெளியாதவை என்றதை) யாரும் பொறுக்கமாட்டார்—இசையமாட்டார். (ப்ரத்யக்ஷத்திற்கு முரணாயிருப்பதாலே பரீக்ஷையின்றியே இதனை யறிவர்.)

2. குலம் சீலம் கல்வி எல்லாம் நிறைந்தவரின் ஸந்ததிகள் நன்றாக, போக்யமாக, குற்றமுமின்றியிருக்க அவற்றிற்குப் பொல்லாநாக்கர் பொழியும் பழியைப் பிறர் கொள்ளார்.

3. நல்லோர் இயற்றிய நூல்கள் தெளிவாக விஷயங்களைக் குறிப்பனவும் இனியனவும் குறையற்றனவுமாயிருக்க, நாக்கின் கொடுமையால் சிலர் ஏற்றும் குற்றம் எவராலும் ஏற்கவாகாது.

4. பாற்கடலின் வெள்ளம் தெளிவாய் இனிதாய் கலக்கமின்றியுளது. அதில் விஷமுள்ள நாக்கு உடைய பாம்பு—வாஸுகி கடையும் போது வாயினின்று விஷம் கக்கியது சேர்ந்தாலும் அது கடலுக்கு இயற்கையானதல்ல. (4)

उभयस्मिन्नप्युपलभ्यमाने कश्चित् किञ्चिद्गृह्णाति । तत् असदपि । 'स्वर्गे गतेऽप्यप्सरसां समाजे काणैव किं काऽपि गवेषणीया ?' । तदिदं दौर्भाग्यस्य विलक्षणं विलसितमिति मन्वान आह—

सहैव(इहैव)भुवने जातं सत्त्वसंस्थापन(नं)क्षमम् ।
गृह्यते किमपि स्वस्थैरन्यत् किमपि जिह्मगैः ॥ ५ ॥

1. **भुवने** इह जगति द्वयं **सहैव** युगपदेव जातमस्ति । उभयमपि तत् पुण्यपापोभयात्मकं **सत्त्वसंस्थापनक्षमम् ।** सत्त्वं-प्राणि ; तस्योत्पत्तिस्थितिहेतुः । यद्वा एकं सत्त्वगुणस्य सम्यक् स्थापकं फलाभिसंधिरहितकर्मानुष्ठानं शुद्धाहारसेवनमित्यादि ; "धर्मेण पापमपनुदति", "आहारशुद्धौ सत्त्वशुद्धिः" इत्यादिप्रामाण्यात् । अन्यत् सत्त्वस्य गुणस्य **संस्थापकं** नाशकम्-राजसतामसधर्मप्रवृत्ति-अधर्माचरणादिकम् । तत्र **किमपि** प्रथमम् आत्मक्षेमकरं **स्वस्थैः** स्वस्वरूपनिष्ठैः स्वात्मतदन्तर्यामिपरमात्मग्रहणानुभवपरैः **गृह्यते** आद्रियते । **अन्यत्** द्वितीयं **किमपि** महानर्थकरं **जिह्मगैः** वक्रगामिभिः कापुरुषैर्गृह्यते ॥

2. **भुवने** जले समुद्रे सहैवोभयं जातम् अमृतं विषञ्च । उभयमपि **सत्त्वसंस्थापनक्षमम्** सत्त्वस्य बलस्य यद्वा सत्तायाः—चिरकालानुवृत्तेः अमरत्वस्य सम्यक् स्थापकमेकम् , अन्यत् सत्त्वस्य प्राणिनः **संस्थापकं** मारकञ्च । तत्र **किमपि** अमृतं **स्वस्स्थैः** स्वर्गलोकस्थितैर्देवैर्गृह्यते । **किमपि** विषं **जिह्मगैः** सर्पैः वृश्चिकादिभिश्च गृह्यते । क्षीरोदधौ जाते हालाहले रुद्रायार्पिते तत्र स्थितं शेषं पातालवासिनो नागा वृश्चिकादयश्च वेगेन जगृहुरिति पुराणवृत्तम् । अत्र श्लोके **सहे**ति पाठमनुसृत्यैवं व्याख्यातम् । उत्तरार्धे उभयविभजनात् द्वयं पूर्वार्धविवक्षितमित्यर्थसिद्धम् । **इहे**ति पाठमादृत्यापि व्याख्यान्ति । तदा **इहैव** ग्राहकपुरुषाधिष्ठितलोक एव, न तु स्थलान्तरे इत्यर्थः । यद्येकं यत्र, तत्रान्यन्न स्यात् , तदा

ग्राहकाः अगत्या तद् गृह्णन्तीति स्यात् । उभयमपि संनिहितम् । अथाप्येकमेकेन गृह्यते विधिवशादिति ज्ञापितं भवति ।

3. तदाऽर्थान्तरमपि भवति—"इह चेदवेदीत् अथ सत्यमस्ति, न चेदिहावेदीन्महती विनष्टिः", "इह चेदशकत् बोद्धुं प्राक् शरीरस्य विस्रसः । ततः सर्गेषु लोकेषु शरीरत्वाय कल्पते ॥ यथाऽऽदर्शे तथाऽऽत्मनि यथा स्वप्ने तथा पितृलोके । यथाऽप्सु परीव ददृशे तथा गन्धर्वलोके छायातपयोरिव ब्रह्मलोके" इति अस्मिन् शरीरे ब्रह्मग्रहणस्य स्पष्टतायाः लोकान्तरेष्वपि तद्ग्रहणारम्भस्यास्पष्टतायाश्च स्पष्टमभिधानात् इहैव भुवने सत्त्वस्थापकं ज्ञानं जातं क्षमं कार्यकरं भवति । एतद्भिन्नलोकद्वये **स्वस्स्थैः** उपरि स्वर्गे स्थितैः **सत्त्वसंस्थापकं किमपि** सत्त्वगुणनाशकं कामभोगादिकं गृह्यते, **जिह्मगैः** नागैः पातालस्थैः **सत्त्वसंस्थापकं किमपि** सत्त्वनाशकमेव, यद्वा **सत्त्वं** बलं तत्स्थापकमेव **अन्यत्** रसादिकं गृह्यते । रत्नशिरस्कत्वान्नागानामर्थप्रावण्यं ज्ञायते । तथा बद्ध्वा जले पातितो भीमः पातालं गतो नागैर्महादंष्ट्रैरप्यभेद्यत्वक्सारो वासुकिना राज्ञा गाढं परिष्वक्तो धनरत्नादिदानमुपेक्ष्य रसविशेषं पायितो बलप्रापणायेत्युक्तं भारते (आदि 138), "रसं पिबेत् कुमारोऽयं त्वयि प्रीते महाबलः । बलं नागसहस्रस्य यस्मिन् कुण्डे प्रतिष्ठितम्....एवमष्टौ स कुण्डानि ह्यपिबत् पाण्डुनन्दनः" इति । अतो लोकान्तरे अर्थकामभोगबलप्रवणभूयिष्ठे ब्रह्मज्ञानं यथावद्दुर्लभमिति इहैव जातं क्षममिति श्लोकार्थः । पूर्वोक्तार्थद्वयेऽपि सत्त्वसंस्थापनं द्वयं विवक्षितम् ; अत्र पक्षे त्रयमिति भेदः । पूर्वयोजनयोः **इहैवेति** पाठे **इहशब्दः** उभयोरेकस्मिन्नेव स्थले स्थितिदर्शकः ।

ஸஹைவ (இஹைவ) புவநே ஜாதம் ஸத்வஸம்ஸ்த்தாபந[ம்] க்ஷமம் |
க்ருஹ்யதே கிமபி ஸ்வஸ்த்தை: அந்யத் கிமபி ஜிஹ்மகை: || 5 ||

1. இவ்வுலகில் ஸத்வஸம்ஸ்தாபனமாகும் வஸ்து உண்டாகத் தகும். அது தர்மாசரணமும். அதர்மப்ரவ்ருத்தியும் என்றே, மோக்ஷத்திற்கான முயற்சியும், மற்ற ப்ரவ்ருத்தியும் என்றே பிரிக்கப்படலாம். ஒன்று தன்ஸ்வரூபத்தில் அதாவது தேஹத்தைக்காட்டிலும் வேறான ஆத்மாவிலும் அதற்கு அந்தர்யாமி பரமாத்மா என்ற வஸ்துவிலும் நோக்குள்ளவர் கொள்வது, மற்றொன்று ஸம்ஸாரத்தில் இழிகின்றவர் பற்றுவதாம். ஸத்துவ ஸம்ஸ்த்தாபனமென்பதற்கு ஸத்துவ குணத்தை நிலைக்கச் செய்வது, அழிக்கச்செய்வது என்றபொருள்கள் முறையேயாம்.

2. புவனமாவது நீர்; அதாவது கடல். பாற்கடலில் ஸத்வஸம்ஸ்த்தாபனமாக இரண்டு உண்டாயின. நீடித்து இருப்பையளிக்கும் அமுதம் ஒன்று. அது ஸ்வர்கவாஸிகளான தேவர்களால் கொள்ளப்பட்டது. மற்றொன்று ப்ராணிகளை யழிப்பதாலே ஸத்வஸம்ஸ்த்தாபனமாம். அது விஷம். அது பாம்பு தேள் முதலான துஷ்டஜந்துக்களால் கொள்ளப்பட்டது.

3. ஸத்துவகுணத்தை ஸ்த்தாபித்து மோக்ஷம் பெற ப்ரஹ்ம ஜ்ஞானத்தை இவ்வுலகிலே இப்பிறவியிலேயே பெறுவதுதான் தகும். மீண்டும் இவ்வாறு பிறவியுண்டென்பதை யார் கண்டனர்? மேலுலகிற் பிறந்தால் காமபோகங்களிலே நோக்காகும். பாதாளம் நாகங்கள் உள்ள இடம். அங்கே பணத்தில் அல்லது உடல் பெலன்பெறுவதிலே நோக்கு. (ப்ரஹ்மஜ்ஞானம் செவ்வையாய் வேறெங்கும் பெறப்பட மாட்டாதென்று உபநிஷத்தும் ஓதுகின்றது.)

परीक्षकमूलं गुणदोषनिश्चयस्तृतीयश्लोके उक्तः । क्वचित् परिक्षानिरपेक्षमेव दोषारोपणवारणं परेषु सिद्धमित्युक्तम् । एवं स्थिते दोषारोपणं कथमित्यत्र सदसतोर्मध्ये कस्यचित् ग्रहणं ग्राहकगतगुणवैषम्यमूलमिति पूर्वश्लोके उक्तम् । अत्र सद्वस्तुस्वामिनः स्ववस्तुनि दोषोद्भावके चित्तविकारो न भवितुमर्हतीत्युच्यते-

कलकण्ठगला(कुला)(गणा)स्वाद्ये कामस्यास्त्रे निजाङ्कुरे ।
निम्बवृत्तिभिरुद्गीर्णे न चूतः परितप्यते ॥ ६ ॥

1-2. सुगन्धमरन्दसान्द्रं चूताङ्कुरं कोकिला आस्वादयन्ति ; काका उष्ट्राश्च परित्यजन्ति । ते तु **निम्बं** पिचुमन्दमेव भुञ्जते । तावता न चूतस्यान्तस्ताप इत्यर्थः । **कलकण्ठाः** अव्यक्तमधुरकूजितोत्पादककण्ठाः कोकिलाः तादृशध्वनिमाधुर्यकारणत्वात् भोग्यत्वात् पुष्टिप्रदत्वाच्च तं स्वादयन्तीति तदास्वाद्ये । **कामस्यास्त्रे** मन्मथस्य बाणभूते । 'अरविन्दमशोकञ्च चूतञ्च' इति तदस्त्रे परिगणनात् । तेन स्त्रीपुरुषसर्वभोगहेतुत्वं सत्प्रजावृद्धिहेतुत्वञ्च दर्शितम् ।

श्रीमद्रहस्यत्रयसारान्ते श्लोकस्यास्य निवेशनात् कलकण्ठादिपदानामर्थद्वयसंभवाच्च तादृशाध्यात्मिकसद्ग्रन्थोऽपि अङ्कुरपदविवक्षितः । तस्य मधुरकण्ठवाल्मीकितुल्यमहनीयकोकिलास्वाद्ययथावस्थिततत्त्वहितपुरुषार्थप्रतिपादकत्वं प्रथमविशेषणलभ्यम् । **कामस्यास्त्रे** । 'कामः कामप्रदः प्रभुः' इत्युक्तः सर्वफलप्रदः स्वविषयककामप्रदश्च मन्मथमन्मथ एव कामः । तेन ग्रन्थोऽयं बाह्यकुदृष्टिनिरसनाय शुद्धान्तसिद्धान्तिमुखेनास्त्रतया प्रयुज्यते । तथा **कामस्य** विषयान्तराभिलाषस्य निवारकत्वादस्त्रभूतश्चायं ग्रन्थः । एवम्भूते **निजाङ्कुरे** निजे—स्वकीये अङ्कुरे पल्लवादिमाग्रूपे **निम्बवृत्तिभिः** निम्बमेव वृत्तिः—जीवनार्थमन्नं धारकपोषकभोग्यभूतं येषां तैः । कोकिलसाम्यात्, शीघ्रस्फूर्त्या, सर्वोपलभ्यत्वाच्च काकग्रहणमिष्टं केषाञ्चित् । उष्ट्रैश्चूताङ्कुरस्य मुखप्राप्तस्योद्गारः काव्यग्रन्थदृष्ट इति तद्ग्रहणमन्याभिमतम् । अविशेषादुभयग्रहणं वा । उद्गीर्णपदमुभयान्वयार्हमेव । परित्यक्तस्वरूपपर्यवसितार्थे तु न विवादः । तेन वैदिकावैदिक सयूथ्यासयूथ्यरूप विपरीतग्राहि सर्वजनग्रहणं दर्शितं भवति । काकाः निम्बवृक्षवर्तित्वादपि निम्बवृत्तयः । यद्यपि "सहकारतरौ सह वासमपि लभते काकः सरलेन कोकिलेन — अथापि निम्बपरिणतफलस्फीतिकबलनकलाकोविदत्वात् निम्बस्थता तेषां नियता । एवं तैरुद्गीर्णे सत्यपि **चूतः** अङ्कुरोत्पादकः ग्रन्थकर्ता च न परितप्यते । उत्कृष्टानां भोग्यमुत्पाद्य

मोदमानस्य निकृष्टेषु भोगानुत्पादनात् क्लेशस्य न प्रसक्तिः । उभयत्र भोगस्योत्पादयितुमशक्यत्वात् उत्कृष्ट एव तस्येष्टत्वात् ; अन्यैर्वर्जनात् आत्महान्यभावात् । यद्यपि, "बद्धवैराणि भूतानि द्वेषं कुर्वन्ति चेत् ततः । शोच्यान्यहोऽतिमोहेन व्याप्तानीति मनीषिणा" इति क्रमादस्ति तापः, अथापि ग्रन्थतत्कर्तृतदास्वादिबुधबृन्दहानिसंभावनानवकाशात् न परितापः । न हि सारासारविवेकः सर्वसुलभः ।

3. सात्त्विकराजसतामसेष्वन्नेषु अन्येषु च असात्त्विकप्रियैस्त्याज्यतया न सात्त्विकवस्तुसृजो भगवतस्ताप इति ।

களகண்ட்டகஞ்ஸ்வாத்யே காமஸ்யாஸ்த்ரே நிஜாங்குரே |
நிம்பவ்ருத்திபிருத்கிர்ணே ந ஶுத: பரிதப்யதே || 6 ||

1. இனிய குரல் உள்ள குயில்கள் இனம் இனமாகச் சுவைத்துண்ண வாகி, காமனுக்கும் அம்பாய் ஸ்த்ரீ புருஷபோகம் விளைவிக்கும் தன் முளைமொட்டானது வேம்பையே ஊணாகக் கொண்டவற்றால் (காக்கை யும் ஒட்டகமும் இவை) கக்கப்படுகிறதே என்று மாமரத்திற்கு மனத்தில் தாபமில்லை.

2. வ்யாஸ வால்மீகி நிலையில் இருந்து இனிய நூல்களை இயற்று கின்றவர் சுவைத்துக் கொண்டாடக்கூடியதும் முதற் காமனை எம் பெருமானால் தன் பக்தர்களை வசப்படுத்த அம்பாகக் கொள்ளப்படு கின்றதும் மற்ற காமங்களைக் களைய அம்புபோலாகின்றதுமான தனது நூலை வேம்புபோல் கசப்பான வேறு க்ரந்தங்களைக்கொண்டு சிலர் புறக் கணித்தால் அதனால் நூலியற்றியவனுக்கு மனத்தில் தாபமில்லை.

3. ஆஹாரமோ வெறேதேனுமோ—ஸாத்துவிகம், ராஜஸம், தாமஸ மென்ற மூவ்வகையானவற்றில் ஸாத்துவிகம் பிறரால் கொள்ளப்பட வில்லையென்றால் அதைப் படைப்பவனுக்கு அதனால் தாபம் உண்டோ. 6

विपरीतज्ञानात् निवर्त्य यथार्थज्ञाने प्रजा विनेतुं प्रवृत्ता अपि काव्यच्छायया प्रशंसनदृष्ट्या अचेतने चेतनत्वारोपणेन, अल्पस्य वस्तुनो महनेन, अनेकविधोल्लेखेन, अतिशयोक्त्या श्रोतॄन् आवर्जयन्ति, तत् सर्वमास्तिकलोकप्रोत्साहनशेषभूतं विनोदनमिति न दोषायेति विवक्षन् आह—

रत्नाभरणयोग्यानां राजान्तःपुरयोषिताम् ।
क्रीडाकङ्कणनिर्माणकाचोऽपि ललितायते ॥ ७ ॥

1. नैकविधरत्नाभरणधारिणीनाम् उद्दिष्टकाचाभरणस्थानेऽपि रत्नाभरणमन्यत् धर्तुमर्हाणां राजमहिषीणाम् । ताः प्रतीति यावत् । अनर्घानन्तकङ्कणसत्त्वेऽपि, समयेषु तत्तद्धारणेऽपि, **क्रीडार्थस्य कङ्कणस्य** करवलयस्य निर्माणस्य संबन्धी तद्विषयभूतः काचोऽपि दर्पणायितमृद्विशेषोऽपि । काचनिर्मितकङ्कणमपीति यावत् । **ललितायते** रसावहो भवति । न हि तादृशवलयस्य स्ववैभवप्रकाशनावसरेष्वस्ति उपयोगः । तद्वत् अर्थवादभूतानामतिवादानामपि विवक्षितांशविवेचकपुरुषप्रीणनत्वमेवेति भावः ॥

ரத்நாபரணயோக்யாநாம் ராஜாந்த:புரயோஷிதாம் |
க்ரீடாகங்கண நிர்மாணகாசோऽபி லலிதாயதே || 7 ||

1 ரத்னமயமான அணிகள் அணிவதற்குத் தகுந்த வைபவம் உற்ற வர்களான அரசர் அரண்மனைசிமாட்டிகளுக்கு விநோதமாகக் கங்கணம் அணியக்கொண்ட காசமும் (பளிங்கு) போக்யமாகும்.

2. உண்மையான பொருட்களைச் சொல்லும் உயர்ந்த நூல்களிலீடு பட்டவர்களுக்கும் சில ஸமயங்களிலே காவ்ய நடையில் புகழ்ச்சிக்காகச் சில அதிவாதமும் போக்யமாகிறது. அது விவேகிகளுக்கு உண்மையை மறைக்காது. (7)

"अरसिकेषु कवित्वनिवेदनं शिरसि मा लिख मा लिख मा लिख" इति रीत्या रसानुभववैदेशिकेषु रसमयाविष्करणमनुचितमित्याह—

मन्ये किन्नरमुख्यानां मौनं जगति साम्प्रतम् ।
मशकक्वणितं यत्र वीणास्वनविकल्पितम् ॥ ८ ॥

1. यत्र बृन्दे मशकानां **क्वणितं** नादः वीणास्वनेन **विकल्पितं** समत्वेन आदृतम्, सत्सु मशकेषु किं वीणयेति, तत्र **जगति** जनव्यूहे किंनरमुख्यानां गन्धर्वश्रेष्ठानां गानपारङ्गतानां **मौनं** गानं विना स्थितिरेव **साम्प्रतं** युक्तं मन्ये ।

மந்யே கிந்நரமுக்யாநாம் மௌநம் ஜகதி ஸாம்ப்ரதம் |
மசகக்வணிதம் யத்ர வீணாஸ்வநவிகல்ப்பிதம் || 8 ||

1. எந்தத் திரளிலே கொசுகின் கோஷமும் வீணாநாதத்திற்கு ஈடாக (அது போலவே) நினைக்கப்படுகிறதோ, அவ்வுலகிலே—அத் திரளிலே பாட்டில் பேர் பெற்ற சிறந்த கந்தர்வர்கள் பாடாமல் மௌனமாயிருப்பதே தகுமென நினைக்கிறேன். தராதரம் தெளிய வாகாத திரளிலே தன் திறமையை யொருவன் காட்ட நின்ருல் அது தௌர்பாக்யமே. (8)

वीररौद्रादिरसप्रधानानां काव्यानां न श्लाध्यतेत्याह—

कटूनामिह सार्थत्वात् कामं भवति संग्रहः ।
तथापि वृत्तिर्न तथा रसज्ञानुमतिक्षमा ॥ ९ ॥

1. **इह** काव्येषु **कटूनां** क्रोधाविष्कारिणां ग्रन्थानां सार्थत्वात् तत्तद्दशाव्युत्पादकत्वात् लोकज्ञानप्रवृत्तेः **संग्रहः** स्वीकार इति **कामम्** इष्यताम् । तथापि **वृत्तिः** तादृशकथाविषयस्थितिः **तथा** काव्यश्रवणपठनकाल इव तदुत्पत्तिकाले **रसज्ञानुमतिक्षमा** रसानुभवपरैरनुमन्तव्या न भवति। यथा वृत्तस्य परव्यापादनचरित्रस्य श्रवणे संघशः प्रवर्तन्ते, तथा परान् स्वयं परैर्वा व्यापादयितुं न प्रवर्तन्ते ; न वा तद्दर्शनेन रसभाजो भवन्ति ; प्रत्युत प्रायो जनानां ततो निवृत्तिरेव लक्ष्यते ॥

2. तथा **वृत्तिः** तदनुगुणा आरभट्यादिवृत्तिः **रसज्ञानां** शान्तिशृंगारानुभाविनामिष्टा न भवति।

3. **इह** जगति **कटूनां** कोपाविष्टानां पुरुषाणां संग्रहः कदाचित् युद्धादिनिर्वर्तनाय भवति। तथापि तेषां **वृत्तिः** कार्यं परहिंसनं **रसज्ञानुमतिक्षमा** "**रसज्ञानाम्**—रसो वै सः" इति प्रसिद्धपरमानन्दमयमहाशान्तपरमात्मज्ञानिनां, "सर्वं खल्विदं ब्रह्म तज्जलानिति शान्तः" इति शमनिष्णातानाम् मित्रामित्रकथाविदूराणाम् **अनुमतिक्षमा** अंगीकारार्हा न भवति। सर्वलोकहितं सर्वसुखावहमेव हि सर्वैरादरणीयम्।

4. **इह** औषधेषु **कटूनां** कटुत्रिकत्वेन वैद्यशास्त्रप्रसिद्धानां शुण्ठीमरीचीपिप्पलीनां ज्वरजलदोषाजीर्णदोषादिपरिहाररूपार्थवत्त्वात् संग्रहो भवति सत्यम्। तथापि **वृत्तिः** तद्भक्षणं **रसज्ञायाः** रसनायाः जिह्वायाः अनुमतिक्षमा न भवति। जिह्वासंबन्धो मा भूदिति गलान्तर्निक्षिप्यते तत्कृतमौषधम्। एवं **कटूना**मिति तिक्तादिसर्वद्रव्यग्रहणम्। एरण्डतैलादीनामपि जिह्वासंबन्धमकृत्वैव पीयमानत्वात्। तद्रसग्रहणे हि जिह्वा संकुचति।

கடூநாமிஹ ஸார்த்தத்வாத் காமம் பவதி ஸங்க்ரஹ: |
ததாபி வ்ருத்திர் ந ததா ரஸஜ்ஞாநுமதிக்ஷமா || 9 ||

1. காவ்யங்களில் வீரம் ரௌத்ரம் போன்ற ரஸப்ரதானமான காவ்யங்களும் இயற்றப்படுகின்றன. அனுபவிக்கப்படுகின்றன. ஆயினும் அங்குச் சொல்லப்படும் செயல்கள் நேரில் நடந்தபோது காவ்யம் கேட்கும்போது போல் எல்லோரும் பரிந்து பார்க்கவோ நடத்தவோ சம்மதிக்கப்படா.

2. அந்தக் காவ்யங்களின் நடை ஆரபடீ போன்றவை அந்தந்த ரஸத்திற்கு உரியனவாயினும், சாந்தி ச்ருங்காரம் போன்ற சுபரஸம் அனுபவிப்பார்க்கு ப்ரியமாகா.

3. கோபமுள்ள புருஷர்கள்கூட போர் முதலியன நடத்தி நன்மை பெறப் பெரும்பாலும் பாதுகாக்கப்படுகின்றனர். ஆனாலும் அவர்களின் தொழில்கள் பிற ஹிம்ஸை போன்றன, பரமானந்தமான பரமாத்மாவின் அறிவினால் சாந்தியுடையராயிருப்பார்க்கு ப்ரியமாகா.

4. சுக்கு மிளகு திப்பிலி என்ற காரமான வஸ்துக்கள் மருந்தாகின்றன. பலர் கொள்ளக்கூடியவையே. ஆயினும் அவை நாக்குக்குப் ப்ரியமாகா. பான வஸ்துக்களும் நாக்கில் படாமல் உட்கொள்ளப்படுகின்றன. அதுபோல் இஷ்டமில்லாமல் கொள்வதாகும்.

पृथक् पृथक् व्यक्तिभेदेन रसावहानां संघटनं नाद्रियते रसविरोधादित्याह—

नादं मल्लतालानां नागरी(लाङ्गली)नटनोचितम्।
कृषि(श्रुति)क्षमेषु ग्रामेषु न मूर्छयति गीतिवित्(वत्) ॥ १० ॥

1. एतच्छ्लोकानुपूर्वी नैकरूपा लक्ष्यते। श्रीशैलश्रीनिवासाचार्यकृतत्वेन प्रसिद्धायां रत्नपेटिकाख्यायां व्याख्यायामेकत्र श्लोकः किञ्चिद्रूपेणाऽऽदृत्य व्याख्यातः। मङ्गलेत्यादिपाठभेदस्तत्र। अर्थस्तु—**गीतिवित्** गीतिज्ञः पुरुषः **नागरीणां** नगरस्त्रीणां नर्तकीनां यत् नटनं बहुरसिकाभिनन्दितम्, तदुचितं मङ्गलतालवाद्यनादं **कृषिक्षमेषु** भूकर्षणमात्रार्हेषु नटनादिप्रसक्तिरहितेषु ग्रामेषु **न मूर्छयति** न वर्धयति। तत्रत्यानामरसिकत्वादिति। ग्रामीणानां तदनुभवो न भवतीति भावः। आह च महाकविः, "भ्रूविलासानभिज्ञैः प्रीतिस्निग्धैर्जनपदवधूलोचनैः" इति। अत्र ग्रामेषु वर्तमानाः ये कृषिक्षमाः जनाः **तेषु**—तान् प्रति न मूर्छयतीत्यप्यर्थः स्यात्।

2. तद्व्याख्यायामेव नागरलिपिमुद्रणे तु, "**नादमङ्गणतालानां लाङ्गलीनटनोचितम्। श्रुतिक्षमेषु ग्रामेषु न मूर्छयति गीतिवत्**" इति पठित्वा **लाङ्गलीनां** नालिकेराणां **नटने** वाय्वादिना चालने उचितम् **अङ्गणतालानां** चत्वरवर्तितालवृक्षाणां नादम्—इति पूर्वार्धं व्याख्यातम्। एतदनुरूपमुत्तरार्धव्याख्यानं न लक्ष्यते। उपरिव्याख्यानं तु योजनान्तरवदस्ति, यद्वा उपमानान्वयि। "**श्रुतिभिः** स्वरारम्भकावयवशब्दैः **क्षमेषु** समर्थेषु **ग्रामेषु** स्वरसंदोहेषु नटनोचितं नाट्योचितं **तालानां** कांस्यपात्राणां नादं **गीतिवत्** गीतिष्विव न मूर्छयति गीतिषु स्वरारोहावरोहणं मूर्छनम्। तत्तु न तालनादस्य" इति। अत्र योजनान्तरे **लाङ्गली**पदव्याख्यानं नास्ति। अत्र **गीतिव**दिति पाठे कर्तृवाचकं पदमपि न दर्शितम्।

3. केचित् **नादं मगणतालानां जाङ्गलीनटनोचितम्** इत्युल्लिख्य **जाङ्गलीनां** वन्यस्त्रीणां नटनोचितं **मगणताल**नादम्। मगणे वर्णत्रयस्यापि गुरुत्वात् गुरुतालेत्यर्थविवक्षा। तादृशं नादं **गीतिवित् स्वरग्रामेषु** श्रुतिसहचरिततद्योपभोग्येषु न वर्धयतीत्यर्थ उचित इति वदन्ति। **तालाना**मित्यस्य इदानीं तालवाद्यानामिति नार्थः; तत्र मगणसाम्यायोगात्। किंतु तज्जनितशब्दकृतकालमानानामिति। तालानां नादमिति षष्ठी राहोः शिर इतिवत् किञ्चिद्भेदविवक्षयेति वक्तव्यम्। तालघोष-तत्प्रमाण-कालविभागाः बहुधा निरूपिताः सन्ति लघुगुरुविपरिवर्तनादिना। तत्तदनुगुणाः स्वरभागा अपि दर्शिताः सन्ति। तत्र सर्वगुरुविषये मगणेति प्रयोगस्तु न दृश्यते दृष्टग्रन्थे। अन्यत्र स्याच्चेत्, अस्तु। विलक्षणनटन-निरन्तरतालनादयोः साहचर्यं श्रुति-स्वरग्राममूर्छनयोः साहचर्यञ्च पृथक् पृथक् भोग्यम्। गीतिसंमूर्छन-तालनादनयोर्न यौगपद्यमित्यर्थः स्यात्॥

4. यद्वा **गीतिव**दित्येव पाठः। गीताविवेत्यर्थः। **नागरी** इति पृथक् पदं कर्तृ। नागरी स्त्री **श्रुतिक्षमेषु** वेदाध्ययनार्हेषु अरसिकेषु ग्रामेषु नटनार्हं तालनादं **न मूर्छयति** नटनं तालनादञ्च न करोतीत्यर्थः। **गीतिवत्**। यथा गीतिकाले, **श्रुतिः** स्वरसहकारी रवः। तत्क्षमेषु स्वरग्रामेषु तालनादं न मूर्छयति तद्वत्। यद्वा यथा ग्रामेषु गीतिं न मूर्छयति, तथा तालनादमपीति।

5. **श्रु**तीत्यत्र **कृषी**ति पाठे सस्यार्थभूकर्षणार्हेषु ग्रामेषु इति कश्चिदर्थः। नानारागकर्षणक्षमेषु स्वरग्रामेष्वित्यन्योऽर्थः। **कृषीवलः** इत्यध्याहृत्य कृषिक्षमे ग्रामे कर्षणपरः **तालानां** तालवृक्षपत्राणां

घोषं न मूर्छयति । यतः कार्योपयोगितया छिनत्ति, व्यजन-गृहपटलादिरूपेण तदुपयोजनार्थमिति भावः ॥

नागरीनटनोचितमित्यस्य **नागर्याः** स्नुह्यादिलतायाः नटनोचितमित्यर्थः । उष्ट्रनृत्ते गर्दभगानस्येवौचित्यमत्र । दृष्टान्ते योजनावसरे **नागर्याः** नागरिकस्त्रियो नटनोचितमित्यर्थः । **लाङ्गली** इति दृष्टः पाठोऽपि युज्यते । **लाङ्गली**शब्दस्य नारिकेलतत्पुष्पाद्यर्थकत्वमस्ति । "लाङ्गलीकर्णपूरम्" इति हि गोपालविंशतौ । तथा **लाङ्गली**ति पृथक्पदम् । तदा **लाङ्गलवान्** हलवान् कृषीवलः कर्ता विनैवाध्याहारम् उक्तो भवति । **नटनोचित**मित्येतत् नटनस्य य उचितः नटनानुरूपो रसावहतालनादः इति ज्ञापनार्थम् । कृषीवलस्य दृष्टान्तो **गीतिवत्** इति दर्शितः । **गीती** गीतवान् नानागीतनिर्माता गायकः । तद्वदिति । स स्वरग्रामेषु गानं मूर्छयेत् । तालनादं तु न मूर्छयेत् । तस्य मूर्छनाया अभावादिति ।

वस्तुतः अर्थान्तरप्रतीत्यनुकूलत्वात् **लाङ्गली**पाठ आद्रियते । तदिदमर्थान्तरम्—

लाङ्गली हली बलरामः । तस्य हलमुसलोभयायुधत्वात् । स च तालाङ्कः, तालवृक्षध्वजकत्वात् । सः **मङ्गलतालानां** स्वध्वजीभूय जगन्मङ्गलभावार्हाणां तालानां ध्वजीभावाय भञ्जनाद् भवन्तं नादम् । तस्य **नटनोचित**त्वं नटनं कम्पनं हिंसनं पातनं तदुचितत्वात्; लब्धस्ताल इति बलरामपक्षीयाणां ससंतोषनृत्यहेतुत्वाच्च । **कृषिक्षमेषु** तालवृक्षारोपणरूपकृषिव्यापारार्हेषु ग्रामेषु न मूर्छयति । ग्रामाणां नगरविलक्षणत्वात् तालनालिकेरादिनिखिलवृक्षारोपणसंभवात् स्वार्थं बहून् तालान् बलरामश्छेत्तुं साम्प्रतम् । अथापि न तथा करोति । कस्मात्? प्रथमतो ध्वजतया क्लृप्तस्य तालस्यैव स्थायितया तल्लोपप्रसक्त्यभावात् । यद्वा मङ्गलतालानामिति बहुव्रीहिः । अर्थात् विशेष्यसिद्धिः । ध्वजभूतमङ्गलतालवृक्षविशिष्टानां रथानां नादम् । **कृषिक्षमेषुग्रामेषु** । इषूणां बाणानां ग्रामाः समुदायाः इषुग्रामाः । ते **कृषिक्षमाः** बलरामलाङ्गलेन कर्षणमर्हन्तीति तादृशाः येषां विरोधिनां ते कृषिक्षमेषुग्रामाः । कृषिकृष्टयोरनतिभेदः । **श्रुतिक्षमे**ति पाठे स्वश्रोत्रस्पर्शार्ह-कृष्यमाण बाणग्रामविशिष्टा इति त एव विपक्षा उच्यन्ते । तेषु विषये स्वरथघोषं न मूर्छयति, तेषां केवलं स्वलाङ्गलेनैवाऽऽकृष्य विनाशयितुं शक्यत्वादिति भावः । **गीतिवदि**ति । **गीती** गीतवान् गीतसक्तः । रासक्रीडाद्यर्थं गीतेन सर्वाकर्षकश्रीकृष्णवदित्यर्थः । सोऽपि बलरामतुल्यः । शब्दानां श्लेषबलादर्थान्तरमत्र । स गीती **नटनोचितं** रासक्रीडाद्युचितं **मङ्गलतालानां नादं** सर्वमङ्गलकरहस्ततालविशिष्टानां क्रीडापराणां गोपीनां गीतनादं **कृषिक्षमेषु**—रासान्निवर्त्य स्वस्वगृहं प्रति स्त्रीणामाकर्षणं हिंसनं तत्तद्बन्धुजनैर्महद्भिर्जडैर्यत्र क्रियेत, तादृशेषु **ग्रामेषु** व्रजग्राममध्येषु न मूर्छयति । ग्रामे रासक्रीडायामारब्धायां गोपैः पुरुषैस्तद्भङ्गः क्रियेतेति तदद्दश्यं यथा तथा वनेष्वेव तन्नादं मूर्छयतीत्यर्थः । **श्रुतिक्षमे**ष्विति पाठे ग्रामेषु तन्नादामूर्छनेऽपि, यावति संनिकर्षे सति स नादो ग्रामस्थानां श्रोत्रेषु पतेत् तावति संनिकर्षे प्रवर्तयति । 'मङ्गलकरत्वात् नादस्य केषाञ्चिद्विरोधबुद्धावपि तदन्येषां मङ्गलं भूयात्, श्रुत्वा अन्या अपि गोप्य आयान्तु, विरोधिनामपि 'अङ्गनामङ्गनामन्तरे माधवः' इत्यनेकमूर्त्यादिदर्शनेन देवबुद्धिप्रतिष्ठानेन विरोधः शाम्यतु' इत्याद्याशयेन श्रुतिक्षमत्वं ग्रामाणां यथा स्यात् तथा करोतीति ।

तथा च, **नादं मङ्गलतालानां लाङ्गली नटनोचितम् । कृषि(श्रुति)क्षमेषु ग्रामेषु न मूर्छयति गीतिवत्** इति पाठः साधिष्ठ इति प्रतीयते ॥

நாதம் மங்களதாளாநாம் லாங்கலீ நடநோசிதம் |
க்ருஷிக்ஷமேஷு க்ராமேஷு ந மூர்ச்சயதி கீதிவத் || 10 ||

1. லாங்கலீ—உழவன் பயிர்த்தொழிலுக்குத் தக்க க்ராமங்களில், க்ராமவாஸிகளின் ஆட்டத்திற்குத் தகுமாறு உள்ள பனையோலைச் சத்தத்தை அதிகப்படுத்துவதில்லை. ஓலைகளை வீடு விசிறி முதலான வற்றிற்காக வெட்டிவிடுகிறான். லாங்கலீ—தென்னையுமாம். பனையோலை யின் ஓசை தென்னையின் ஆட்டத்திற்கு ஏற்றுளதென்றதாம். உழவன் கீதியைப்போன்றவன். கீதியாவான்—கானம் செய்கின்றவன். ஆட்டத் திற்கு உரிய தாளவாத்ய கோஷத்தை, பல ராகங்களை இழுத்து ஸ்வரங் களைப்பயிற்சி செய்து சேர்த்து வளர்ப்பதுபோல் வளர்ப்பதில்லை. தாள நாதத்திற்கு மூர்ச்சனையில்லையே. (இங்கு வேறு பாடங்களும் அவற்றின் பொருள்களும் வடமொழியுரையில் ச்லோகத்தில் காண்க.) மேலே இசைந்த பாடத்தில் மற்றொரு பொருளுமாம். அதாவது—

2. லாங்கலீ, கலப்பையைப் படையாகக் கொண்ட பலராமன். கீதியா வான் குழல் ஊதும் கண்ணன். பலராமனுக்குப் பனைமரம் த்வஜம், அது விளையுமிடம் க்ராமம். பல பனைமரங்களை விளைக்கவாம் க்ராமங்களில் கூட தமக்கு த்வஜம் வேண்டுமென்று மங்களமான பனைகளை குதூஹலத் துடன் ஆட்டத்துடன் முறித்து அவ்வொலியை வளர்க்கிறார் அவர் என்ப தில்லை. முதலிற் கொண்ட மரமொன்றே எந்நாளும் அழியாமலிருப்ப தால். வேறு பொருளுமாம்—(க்ருஷிக்ஷம—இஷுக்ராம எனப் பிரிக்க.) கலப்பைப் படையரான பலராமன் கலப்பையினால் இழுக்கப்(கீறப்) படவான அம்புப் படை உடைய பகைவர்விஷயத்திலே மங்களமான பனையை த்வஜமாகக் கொண்ட தேர்களின் ஒலியை வளர்ப்பதில்லை. கலப்பையொன்றே போதுமாகையால் என்பதாம். கீதிவத்—ஸ்ரீக்ருஷ ணன் போல். அவன் செய்வதென்னவெனில், ராஸக்ரீடை முதலான ஆட்டத்திற்காகக் குழலூதுகின்றவன், நாட்யத்திற்குத் தக்கதான, கைகளால் தாளம்போட்டுப் பாடுகின்ற பாவைகளின் பாட்டொலியைக் காட்டிலே வளர்த்தானல்லது க்ராமங்களிலே வளர்க்கவில்லை. ஏன்? இடையர்கள் கோபிகளை ஆடாதபடி இழுத்து வதைப்பார்கள் என்ற நோக்கினால். ஆனாலும் ஆடுவது தெரியும்படி பாட்டு அவர்கள் காதில் விழுமளவுக்கான (ச்ருதிக்ஷம) தூரத்தில் காட்டில் ராஸக்ரீடை செய்தா னென்றதாம். (10)

काव्यशास्त्रलोकज्ञानन्यूनाधिकत्वप्रत्यक्षमात्रेण काव्यस्य सदसत्त्वनिर्णयो न सुकरः । असाधारणप्रतिभाशक्तेः पूर्वजन्मादिलब्धसुकृताधीनायाः परोक्षायाः काव्यपठनैकोन्नेयत्वात् । अतः कवनसामर्थ्यं नाभ्यासमात्रनिष्पाद्यमितीदमुदाहृत्य ज्ञापयति—

विधिमन्तरेण विहगेन कुतः पयसोरशिक्ष्यत विवेकविधिः ।
कति वा दिनानि वद पर्यचिनोत् कलशीसुतः कबलयन् जलधिम् ॥ ११ ॥

विहगेन पक्षिणा—पक्षित्वाविशेषेऽपि हंसेन **पयसोः** अविशेषेण मिश्रयोः क्षीरनीरयोः **विवेकविधिः** विवेचनं पृथक्करणं **विधिम् अन्तरेण** दैवं पूर्वसुकृतं विना **कुतः** अन्यस्मात् कस्मात् **अशिक्ष्यत** प्रत्यबुध्यत। न हि कश्चित् एवं पृथक्करणं कार्यमिति हंसं शिक्षितवान्। स्वयमेव आजन्मनस्तत् स करोति। अस्वाभाविकं तज्जन्मसाधितमप्युदाह्रियते **कतिवेति**। **वेति** पूर्वतो वैलक्षण्ये। **कलशीसुतः** कुम्भादुत्पन्नः अगस्त्यः **जलधिं** समुद्रं सर्वं **कबलयन्** सकृदेव मुखेन पिबन्। लक्षणहेत्वोरिति हेत्वर्थे शता। पातुमिति यावत्। कति दिनानि **पर्यचिनोत्** अभ्यस्यति स। केवलतपश्शक्तिमूलमेव तत्। न हि पल्वल-तटाक-जलाशय-सरिदाद्यनेकपरिमितपानीयाभ्यासक्रमेण पारावारपानं तेन कृतम्। **वदे**ति विध्यतिरिक्तासाधारणोपायवचनमशक्यमिति गमयितुम्। संकल्पसूर्योदये संभाषणे स्थितोऽयं श्लोकः। सति विधावनुकूले सर्वं सद्य एव सुकरमिति भावः॥

விதிமந்தரேண விஹகேந குத: பயஸோரசிக்ஷ்யத விவேகவிதி: |
கதி வா திநாநி வத பர்யசிநோத் கலசீஸுத: கபளயந் ஜலதிம் ||11||

1. பக்ஷிகளிலொன்றான அன்னம் பால் நீர் இரண்டையும் பிரித்து விடுகின்றதே. அதனை அது எங்கு நின்று கற்றது. பூர்வஜன்ம புண்யம் தவிர வேறு காரணமுண்டோ? குடக்குமரனான அகத்திமுனிவர் முழுக்கடலையும் ஒரே முழுங்காகக் கொண்டாரே, அவ்வாறு செய்ய அவர் எத்தனை நாள் பயிற்சி செய்தார். ஆகையால் கவனம் செய்தல் போன்ற தொழிலிலும் தனக்கு முற்பிறவியில் ஏற்பட்ட ப்ரதிபாசக்தி போன்றதே முக்கியகாரணம்; மற்றவை துணையாம். அன்னத்திற்கு முன் பிறவியிலானது; அகத்திமுனிவருக்கு அப் பிறவியிலேயே தவத்தினாலான தென வாசி காண்க.

ईदृशग्रन्थनिर्माणनैपुण्यविरहनिबन्धनं विषादं केषाञ्चिदपनुदन्, नानाकलासु नैपुण्यं लब्धुमशक्तानामनिष्कृष्टानेकपरिचयात् वरमेकत्र निष्कृष्टं नैपुणमितीदमुदाहृत्य बोधयति—

भूयसीरपि कलाः कलङ्किताः प्राप्य कश्चिदपचीयते शनैः ।
एकयाऽपि कलया विशुद्धया योऽपि कोऽपि भजते गिरीशताम् ॥ १२ ॥

संकल्पसूर्योदये (1-26) एकयेत्यर्धस्योत्तरार्धत्वेनैव पाठात् अत्रापि व्याख्याने **भूयसी**रित्यर्धस्यैव पूर्वं व्याख्यानात् ग्रन्थनिगमने तथानुपूर्व्यौचित्याच्च **भूयसी**रिति पूर्वार्धम्, **एक**येति चोत्तरार्धमित्याद्रियते। **कश्चित्** सर्वकलानैपुण्यमधिगन्तुमशक्तः अथापि सर्वाभिलाषी **भूयसीः** अधिकसंख्याकाः **कलाः** विद्याः शास्त्राणि **कलङ्किताः** स्वकीयसंशयविपर्ययविषयानेकार्थिका एव **प्राप्य** अधिगम्य **शनैः** तन्निष्कर्षसंपादनायोगात् कालक्रमेण **अपचीयते**—प्रवचनादेरशक्यतया गृहीतांशेऽपि प्राप्तविस्मरण

एव भवति। **योऽपि कोऽपि**। प्रथमः **अपि**शब्दः भूयःकलाग्रहणप्रवृत्तिरूपाधिकास्थारहितोऽपीत्यर्थपरः। तादृशो यः कोऽपि। **य** इत्यधिकनिवेशः परस्परविरुद्धार्थप्रतिपादकानेकशास्त्रान्तर्गते प्राज्ञतमापरिगृहीते बाह्यादिशास्त्रे प्रवृत्तोऽपीति ज्ञापनाय। **विशुद्धया** तच्छास्त्रगतिसिद्धान्तवर्त्मसु संदेहादिरहितया यथावदेव ज्ञातया **एकयाऽपि कलया** एकशास्त्रेणापि। **गिरीशता**मित्यत्र **गिरि ईशता**मिति पदद्वयम्। गिरीति गीःपदे सप्तम्यन्तम्। **गिरि** वाचि **ईशतां** स्वतन्त्रतां भजते। तच्छास्त्रविषये तदुक्तं सर्वं यथावदिति सर्वग्राह्यं भवतीति स मान्यत एवेत्यर्थः।

2. अत्र चन्द्रशंकरौ निदर्शनभूतौ। **कश्चित्** द्विजराजः पूर्णिमायां **भूयसीः** यावत्यो भवन्ति तावतीरपि--षोडशापि **कलाः** भागान् **कलङ्किताः** शशमृगादिकल्पनाविषयकलंकविशिष्टा एव प्राप्य **शनैः** कृष्णपक्षप्रथमादिक्रमेण **अपचीयते** क्षीयते अदृश्य एव भवति। **यःकोपि** द्विजराजविलक्षणो नटराजः पशुपतिरपि एकयाऽपि कलया **विशुद्धया** निष्कलङ्कया **गिरीशतां** शंकरतां (कैलासगिरिनायकतां) भजते। **कला**गिरी**शा**दिपदे श्लेषमूलं साम्यम्॥

பூயஸீரபி கலா: களங்கிதா: ப்ராப்ய கச்சித் அபசீயதே சனை: |
ஏகயாऽபி கலயா விசுத்தயா யோபி கோபி பஜதே கிரீசதாம் || 12 ||

1. ஒருவன் பல கலைகளைப் பயில இழிந்தானானாலும் தெளிவில்லாமல் அவைகளைக் கற்பதால் நாளடைவில் க்ஷீணித்து விடுகிறான். ஒரே கலையைப் பயின்றானாகிலும் அதில் தெளிவு நிரம்பப் பெற்றால் கிரீசன்—பேச்சில் வல்லான் என்ற பேர் பெறுகிறான்.

2. சந்திரனுக்குப் பிறைகள் பதினாறு. பர்வத்தில் அத்தனை பிறைகளைப் பெற்றும் அவன் க்ருஷ்ணபக்ஷத்தில் மேன்மேல் குறைந்தொழிகிறான். சிவபிரானோ ஒரே பிறை சிரஸ்ஸில் கொண்டவன். ஆயினும் கிரீசன் என்ற பெயரோடு விளங்குகிறான். கிரீசன் என்பதற்கு கைலாஸ கிரிநாதன் என்பது உண்மையான பொருள். வாக்கில் வல்லான் என்ற வேறொரு பொருளையும் குறிப்பதால் புகழ்ச்சி தோற்றும்.

इति श्रीकवितार्किकसिंह-सर्वतन्त्रस्वतन्त्र-श्रीमद्वेंकटनाथ-वेदान्ताचार्यकृतिषु
सुभाषितनीव्याम् परीक्षितपद्धतिर्द्वादशी (१२)

एवं सदसद्विवेचनाय असज्जनविषयपद्धतीः पञ्च सद्विषयपद्धतीश्च पञ्च प्रणीय काव्यमूलम् एतत्प्रकटनात् काव्यरसिकपुरुषप्रार्थनया काव्यस्यास्य प्रणीततया च सुकविपद्धतिमपि प्रणीय सर्वत्र परीक्षाक्रमेऽपि वक्तव्यं विशदयितुं द्वादशीं पद्धतिमपि विधाय काव्यमुपसंहरति—

सैषा सुभाषितानां माला महनीयवर्णवृत्तगुणा।
भावुकसंख्यारूढा प्रियपद्धतिभूषिता जयति॥ १३॥

1. **सा** वेंकटगिरिशिंगभूपप्रार्थनाधीनोदया, **एषा** श्रीमद्वेंकटनाथविरचिता सदसद्विषय-विवेचनी **सुभाषितनीवी**नाम्नी **सुभाषितानाम्** एकैकस्यापि पद्यस्यानेकार्थगर्भत्वादनेकसुभाषितत्वमिति तेषां मालाभूता। **महनीयाः** मान्याः **वर्णाः** अक्षराणि अर्थप्रतिपादकपदानि च, **वृत्तानि** आर्यानुष्टुप्तदन्यरूपाणि, **गुणाः** ओजः प्रसादो माधुर्यमिति, इमे यस्यां सा, **भावुकानाम्** अर्थपरिशीलनपराणां सहृदयानां **संख्यां** ज्ञानमारूढा **प्रियाभिः** इष्टाभिः पद्धतिभिः **भूषिता** अलंकृता च जयति। कटपयादिसंख्यासंकेतानुसारात् **भावुक**शब्देन 144 इति संख्या, **प्रिय**शब्देन 12 इति संख्या चोच्यते। तेन चतुश्चत्वारिंशदधिकशतपद्यात्मता द्वादशपद्धत्यात्मता च काव्यस्योक्ता भवति। एवम्भूता माला **जयति** सर्वोत्कर्षेण वर्तते ॥

2. **माला**शब्दप्रयोगात् पुष्पमणिमुक्तामालारूपताया अपि बोधनात् तदनुगुणोऽर्थ एवम्—**सुभाषितानां** श्रेष्ठत्वेन शोभनश्लाघनोक्तिकानां मुक्तादीनां माला। **वर्णाः** सितत्वादयः। **वृत्त**मिति वर्तुलत्वमुच्यते। **गुणाः** मूल्याधिक्यक्षमत्वं मङ्गलकरत्वमित्यादयः। एतद्युक्ताः **भावुकानाम्** तत्तदनुभावकानां संख्यारूढाः अनेकैः पुरुषैरुपर्युपरि आस्थया प्रवृत्तैः तदा तदा धार्यमाणा **प्रियपद्धतिभूषिता**—**प्रियया** सर्वप्रीतिविषयभूतया **पद्धत्या** स्वरूपनिर्माणवर्त्मना संनिवेशविशेषेण पर्वक्रमनिक्षिप्तप्रशस्त-तत्तद्वस्तुना **भूषिता** समलंकृता जयतीति।

3. स्त्रीलिङ्गत्वात् उत्तमस्त्रीविषयकतयाऽपि काचित् योजना ॥

ஸைஷா ஸுபாஷிதாநாம் மாலா மஹநீயவர்ணவ்ருத்தகுணா |
பாவுகஸங்க்யாரூடா ப்ரியபத்ததிபூஷிதா ஜயதி || 13 ||

1. இவ்வாறான இந்த ஸுபாஷிதநீவி என்ற ஸுபாஷித மாலையானது சிறந்த சொற்கள் வ்ருத்தம் இனிமை முதலிய குணங்கள் எல்லாம் கொண்டது. அனுபவிப்பாரின் அறிவில் ஏறியுள்ளது, நூற்றிநாற்பத்து நான்கென்ற எண்ணிக்கையுடையது. இஷ்டமான பத்ததிகள் பன்னிரண்டுமுள்ளது சிறப்புடன் விளங்குகின்றது. பாவுக-144; ப்ரிய. 12.

2. நல்ல புகழ்ச்சிக்குரிய முத்து ரத்னம் முதலானவற்றாலான மாலையும், நிறம் வடிவு நீர்மையெல்லாம் உள்ளதாய் அனுபவிப்பார் மேன்மேல் அணியுமாறு அததன் அமைப்பு அனைவருக்கும் இஷ்டமானபடி அமைந்து சிறந்து விளங்கும்.

3. உத்தமஸ்த்ரீ போன்றதுமாகும் ஸுபாஷிதநீவி. அதனால் ஸ்த்ரீ விஷயமான பொருளுமாம்.

अथ कविनामनिर्देशकः श्लोकोऽपि—

कविकथकसिंहकथितं कठोरललितं सुभाषितं तदिदम्।
सदसद्विवेकमुखतः संमुखयति सर्वलोकहितम् ॥

सुभाषितनीवी संपूर्णा

1. सैषेति श्लोकोऽयं कैश्चिन्न व्याख्यातः। प्रतिपद्धति द्वादशैव श्लोका इति नियमः एतत्स्वीकारे भज्येतेति शंक्येत। पूर्वश्लोक एव पद्धतिसमाप्तावपि ग्रन्थोपसंहाररूपोऽधिकः श्लोको घटते इति समाधीयेत। 'सर्वत्र ग्रन्थे स्वनामनिर्देशे नियमेन स्थिते अत्र कथं तत्त्यागः ? यद्यधिक-श्लोक उपसंहारे युक्तः, तर्हि नामनिर्देशकं पद्यमपि स्थितमेव स्यात्; 'प्रमितिपरिष्कृतिमुद्रा' (1-2) इति ग्रन्थमुद्रावश्यकत्वं स्वयमेवोक्त्वाऽत्रैव स्वनामापि कथं न निरदेशि' इति द्वितीयं पद्यमपि स्वीक्रियेत। अथवा कश्चिद् भागो लुप्तः स्यात्, ग्रन्थपूर्तिरेतावतैवेति कथमिति चिन्तयन्तः भावुकेति प्रियेति च श्लोकपद्धतिसंख्यानिर्देशात्, श्लोकमिममाचार्यकृतं न मन्येरन्। भवतु स्वकृतं वा शिंगभूपालकृतं वा व्याख्यातृकृतं वा। ग्रन्थस्यास्यापूर्णता न प्रसिद्धेति च यथार्हं भाव्यम्।

கவிகதக என்கிற ச்லோகத்தினால் இந்தக் காவ்யம் ஸ்ரீதேசிகன் இயற்றியதென விளங்கும். 'ஸைஷா' 'கவிகதக' என்ற ச்லோகங்கள் இரண்டும் ஸ்ரீதேசிகன் அருளியவையா என்பது விசாரத்தில் உளது.

श्रीशैलश्रीनिवासो नरहरिरिति यौ व्याकृषातां तदुक्त्योः
पट्टिप्पासूरिसूक्त्या चरितफलकतां प्रेक्ष्य तां संप्रकाश्य।
विश्रान्तत्वात् त्रिकेऽस्यास्तदुपरि बहुधाऽर्थश्च संभाव्य काले
स्वल्पे नानार्थदर्शिन्यखिलबुधमनःप्रीणनीत्थं प्रणीता॥

लब्धावकाशै रसिकैः सुधीभिर्विभावनीया विविधार्थदेयम्।
अलाभतोऽन्यस्य यथावदेनामयोजयं संस्फुरितार्थरक्षी॥

आद्यत्रिकान्तर्गतपद्यबृन्देऽप्यर्थोऽधिकोऽदर्शि यथाप्रतीति।
अनूदिताः द्रामिडभाषयैवं समस्तपद्यार्थविधाश्च सर्वाः॥

अभिनवदेशिकनाम्ना वात्स्यश्रीवीरराघवेण कृता।
प्रथितसुभाषितनीवीव्याख्या नानार्थदर्शिनी जयति॥

अभिनवदेशिकवात्स्य वीरराघवाचार्य कृतिषु सुभाषितनीवीव्याख्या संस्कृतद्रमिडभाषाद्वयमयी

नानार्थदर्शिनी संपूर्णा

शुभमस्तु

★

प. श्लो. पु. सुभाषितनीची श्लोकसूची

—○—

श्रीरस्तु

★